गौडीय श्राद्धप्रकाश

अथ गौडीय श्राद्धप्रकाशमहानिबन्ध-प्रारम्भः

खेमराज श्रीकृष्णदास प्रकाशन   बम्बई

संस्करण : मार्च २०१७ संवत २०७३

मूल्य : ३५० रुपये मात्र


मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop: Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg, 7th Khetwadi,
Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s. Khemraj Shrikrishnadass, Proprietors Shri Venkateshwar Press, Mumbai - 400 004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013.

॥ स्वर्गादिलोकगतानां श्राद्धेन तृप्तिप्रकारचित्रम् ॥



अथ प्रथममुद्रणकालिकी-प्रस्तावनिका ।

श्रीमद्भारते वर्षे तीर्थराजश्रीपुष्करादुदीच्यां दिशि पंचदशयोजनानन्तरं मरुसंज्ञकदेशे बीकानेरविषयान्तर्गतश्रीरत्नगढनिवासिना गौडवंशावतंस श्रीशुक्लयजुर्वेदीयमाध्यंदिनवाजसनेयिना शिवालोपाह्वयेन श्रीरामकृष्णपौत्रेण श्रीकस्तूरीचन्द्रात्मजेन पंडितश्रीचतुर्थीलालशर्मणा मया "श्राद्धप्रकाश" नामाऽयंग्रंथोऽनेकनिबंधानुरोधेन कृतः, अत्रच हेमाद्रिः, पराशरमाधवः, कात्यायनसूत्रम्, कर्कभाष्यम् काशिका, देवयाज्ञिकभाष्यम्, पारस्करसूत्रम्, हरिहरभाष्यम्, मनुस्मृतिः, मेधातिथिगोविंदराजौ, याज्ञवल्क्यः, मिताक्षरा, वृद्धपाराशरी, मदनरत्नम्, स्मृतिसंग्रहः अष्टादशस्मृतिः, अष्टाविंशतितत्त्वानियजुर्वेदीयश्राद्धतत्त्वम्, निर्णयामृतः, मदनपारिजातः, त्रिस्थलीसेतुः, श्राद्धमयूखः, ब्राह्मणसर्वस्वम्, पितृभक्तिः, मत्स्यपुराणम्, कूर्मपुराणम्, बृहद्गरुडपुराणम्, ब्रह्मपुराणम्, वायुपुराणम्, अंत्येष्टिचर्कः, स्मृतिचंद्रिका, शतपथब्राह्मणम्, इत्यादिमहानिबंधेभ्यः प्रमाणान्युपसंगृह्य बहुशो वारंवारं विचार्य अनेकशास्त्रार्थनिर्णयविभूषितपद्धतिसंग्रहोऽकारि । एतादृशो गौडानां महानिबंधोऽयमनेकपण्डितैः सशोधयित्वा टिप्पणीभिश्च सनाथीकृत्य मुंबय्याख्यराजधान्यां स्वधर्मपरायण वैश्यवंशावतंसश्रीयुतश्रीकृष्णदासात्मजाय श्रेष्ठिश्रीक्षेमराजगुप्ताय तदीये "श्रीवेङ्कटेश्वर" मुद्रणालये सीसकाक्षरैः सुन्दरचिक्कणपुष्टपत्रेषु मुद्रयित्वा प्रकाशयितुं परमसंमानसंतुष्टचेतसा मया समस्तपुनर्मुद्रणाद्यधिकारप्रदानपूर्वकं दत्तः । सचोक्तश्रेष्ठिना श्रीक्षेमराजेन स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितः । इतः परमन्यः कश्चिदपि पुस्तकव्यापारी मुद्रणसाहसं मा कार्षीत् । अभ्यर्थये च विद्वद्भ्यान् । सदयहृदयैर्नैसर्गिकगुणग्रहणसद्वृत्तैर्विद्वद्भिरयं ग्रंथपरिश्रमः कृतकृत्यः करणीयः । यदिच, अस्य शोधनसमयेऽनवधानादृग्दोषाद्वा स्थलविशेषेक्वचिद्दोषो दृश्येत, स च विद्वद्भिः क्षंतव्यः शोधनीयश्चेतिशम् । श्रीकस्तुरीचन्द्रात्मजपंडित श्रीचतुर्थीलाल गौड

प्रस्तावना।

विदित हो कि शास्त्रमें कल्याण होनेके अनेक उपाय लिखेहैं परन्तु जैसा श्राद्धकरनेसे होताहै वैसा और किसीसे नहीं होसकताहै; उक्तं च हेमाद्रौ व्यासेन-"श्राद्धात्परतरं नास्ति श्रेयस्करमुदाहृतम्। तस्मात्सर्वप्रयत्नेन श्राद्धं कुर्याद्विचक्षणः॥" देवलोपि-"अरोगी प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान्। अर्थवानर्थभोजी च श्राद्धकारी भवेदिह॥" इत्यादि अनेक मन्वादिवाक्योंसे श्राद्ध करना श्रेष्ठ है, परंच कलिकालकी प्रबलतासे तथा युगह्रास होनेसे मनुष्योंकी बुद्धि नास्तिकतासे नष्ट होगई इस कारण बहुत मनुष्य विधर्मियोंके संगसे तथा शास्त्रके अनभ्याससे और धूर्त्त लोगोंके कहनेसे सत् शास्त्रका विश्वास नहीं करते हुये श्राद्ध न करनेमें अनेक हेतु निकालतेहैं और प्रत्यक्षप्रमाण दिखाते हुये श्राद्धादि महायज्ञोंको विपरीत कहते हैं तथा भोले भाले मनुष्योंको वैदिकसनातनधर्मसे भ्रष्ट करके अधर्ममार्गमें लगादेतेहैं सो बडीही हानि है। महाशयगण! जैसे यज्ञादिकोंमें मंत्रद्वारा इंद्रादिदेवता शक्तिकरके अपने २ स्थलमें आते हैं। यजमानका कियाहुवा पूजन होम बलिदान आदि कर्मोंमें दिये हुये हविः (पदार्थ) को देखके तृप्त होतेहैं। और यजमानके मनोरथको सफल करतेहैं; इसी प्रकार श्राद्धोंमें भी "आयन्तु नः पितरः" इत्यादि वेदमंत्रद्वारा आये हुये पितृगण वायुरूप होकर ब्राह्मणोंके शरीरमें स्थित हुये नानाप्रकारके पायसआदि पदार्थोंकरके तृप्त होतेहैं। फिर पुत्रादिकोंको आयु पुत्र धन संपत्ति आरोग्यादि अनेक काम्य मनोरथोंको देतेहैं। देखिये संपूर्णही जगत् फलयुक्त कर्मोंमें प्रवृत्त होताहै निष्फल कर्ममें कोई भी नहीं प्रवृत्त होताहै। जैसे यज्ञादिकोंमें देवोंको फलदातृत्व है ऐसे श्राद्धादिकोंमें दिव्यपितरोंको भी फलदातृत्व है। कितनेक नास्तिक हेतुवादी कहतेहैं, इंद्रादिदेवता तो चेतनाविशिष्ट ज्ञानक्रियाशक्तिवाले हैं इसलिये वेदमंत्रोंद्वारा यज्ञदेशमें आतेहैं। परंतु मृत पिता आदि मनुष्यगण तो स्वस्वकर्मानुसार नानायोनियोंमें गये हुये देवशक्तिहीन कैसे आसकते हैं? यदि आतेहैं तो फिर दीखते क्यों? नहीं आप कहैं कि इंद्रादिदेवता क्या दिखाई देतेहैं। परंच देवताओंकी तो अतीन्द्रियता पूर्णरीतिसे है तथा पदार्थको दर्शन मात्रसे ग्रहण करसक्तेहैं और पितरोंकी अतींद्रियताका अभाव होनेसे तथा अपने कर्मानुसार नानायोनियोंमें भ्रमण होनेसे किसप्रकार श्राद्धदेशमें आते हैं और कैसे तृप्त होते हैं तथा पराधीन हुये पुत्रादिकोंको क्या दे सक्तेहैं। और पितरोंको अन्न पहुंचानेवाला कौनहै तथा किसप्रकार मिलताहै इस लोकमें दिया हुआ अन्न परलोकवासियोंको नानायोनियोंमें गये हुयोंको क्या मिलताहै? कदापि नहीं मिलताहै। इस प्रकार नास्तिकलोग कहतेहैं; परंच जैसे इन्द्रादिदेवगणोंमें चेतनविशिष्टशक्तिहै वैसेही दिव्यपितृगण अग्निष्वात्तादिकोंमें भी तेजशक्ति है औइ पितरोंकी वसु रुद्र आदित्य विश्वेदेवगण भी तो सहायता करतेहैं तौफिर श्राद्ध क्यों नहीं मिलता अवश्यही पितृगणोंको मिलताहै। जैसे गर्भवती स्त्री अपने खाये हुये अन्न करके आप भी तृप्त होतीहै और अपने गर्भको भी पोषण करतीहै तथा अन्नदेनेवालेका भी उपकार करतीहै वैसेही वसु रुद्र आदित्य देवता भी श्राद्धके अन्नको देखकर तृप्त होतेहैं और अपने अधीन पिता आदिकोंको भी तृप्त करतेहैं तथा श्राद्धकरनेवालोंका भी मनोरथ पूर्ण करतेहैं। और अग्निष्वात्त आदि दिव्य पितृगण मंत्रशक्तिकरके नामगोत्रद्वारा पुत्रादिकोंका दिया हुआ अन्न नानायोनियोंमें गये हुये पित्रादिकोंको तत् तत् योनिके योग्य भक्ष्य पदार्थ पुगाते हैं। और पुत्रादिकोंको उत्तम फल देतेहैं। जिसके प्रमाणके लिये नीचे धर्मशास्त्रके वचन लिखतेहैं सो कृपाकरके देखना और समग्र पढना (मनुस्मति-मत्स्यपुराण-पद्मपुराण-महाभारत-गरुडपुराण-मार्कंडेयपुराण--हेमाद्रिपु)।

"सपिंडीकरणे जाते गताब्दे च स्वकर्मभिः ॥ देवत्वं वा मनुष्यत्वं पक्षित्वमाप्नुयुर्नराः ॥ १ ॥ तेषां विभिन्नाहाराणां श्राद्धं वै तृप्तिदं कथम् ॥ यदप्यन्यैर्द्विजैर्भुक्तं हूयते यदि वानेल २
शुभाशुभात्मकैः प्रेतैस्तद्दत्तं भुंजते कथम् ॥ श्राद्धस्यावश्यकत्वं तु अमावास्यादिषु श्रुतम् ॥ ३ ॥ श्रीभगवानुवाच ॥ शृणु पक्षींद्र प्रेतानां यथाश्राद्धं तु तृप्तिदम् ॥ देवो यदपि जातोयं
मनुष्यः कर्मयोगतः ॥ ४ ॥ तस्यान्नममृतं भूत्वा देवत्वेप्यनुयाति च ॥ गांधर्वे भोगरूपेण पशुत्वे च तृणं भवेत् ॥ ५ ॥ श्राद्धं हि वायुरूपेण नागत्वेप्यनुगच्छति ॥ फलं भवति पक्षित्वे
राक्षसेषु तथामिषम् ॥६॥ दानवत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् ॥ मनुष्यत्वेऽन्नपानादि नानाभोगरसो भवेत् ॥७॥ गरुड उवाच—कथं कव्यानि दत्तानि हव्यानि च जनैरिह ॥ गच्छंति
पितृलोकं वा प्रापकः कोत्र गद्यते ॥ ८ ॥ मृतानामपि जंतूनां श्राद्धमाप्यायनं यतः ॥ निवार्णस्य प्रदीपस्य तैलं संवर्द्धयेच्छिखाम् ॥ ९ ॥ मृताश्च पुरुषाः स्वामिम् स्वकर्मजनितां गतिम् ॥
गाहंति के कथं स्वस्य सुतस्य श्रेय आप्नुयुः ॥ १० ॥ श्रीभगवानुवाच ॥ श्रते प्रत्यक्षतस्तार्क्ष्य प्रामाण्यं बलवत्तरम् ॥ श्रुत्यातु बोधितार्थस्य पीयूषत्वादिरूपता ॥ ११ ॥ नामगोत्रं पितॄणां
तु प्रापकं हव्यकव्ययोः । श्राद्धस्य मंत्रास्तद्वत्तु उपलभ्याश्च भक्तितः ॥ १२ ॥ अचेतनानि चैतानि प्रापयंति कथंत्विति ॥ सुपर्ण नावगंतव्यं प्रापकं वच्मि ते परम् ॥ १३ ॥ अग्निष्वात्त-
दयस्तेषामाधिपत्ये व्यवस्थिताः ॥ काले न्यायगतं पात्रे विधिना प्रतिपादितम् ॥ १४ ॥ अन्नं नयंति तत्रैते जंतुर्यत्रावतिष्ठते ॥ नामगोत्रं च मंत्रश्च दत्तमन्नं नयंति ते ॥ १५ ॥ अपि
योनिशतं प्राप्तांस्तांस्तृप्तिरुपतिष्ठति ॥ तेषां लोकांतरस्थानां विविधैर्नामगोत्रकैः ॥ १६ ॥ अपसव्यं क्षितौ दर्भे दत्ता पिंडास्त्रयस्तु वै ॥ यांति तांस्तर्पयंत्येवं प्रेतस्थानस्थितान्पितॄन् ॥ १७ ॥
अप्राप्तयातनास्थानं श्रेष्ठा ये भुवि पंचधा ॥ नानारूपास्तु जाता ये तिर्य्यग्योन्यादिजातिषु ॥ १८ ॥ यदाहारा भवंत्येते पितरो यत्र योनिषु ॥ तासुतासु तदाहारः श्राद्धान्नमुपतिष्ठते ॥ १९ ॥
यथा गोषु प्रनष्टो वै वत्सो विंदति मातरम् ॥ तथान्नं नयते विप्र जंतुर्यत्रावतिष्ठते ॥ २० ॥ पितरः श्राद्धभोक्तारो विश्वेदेवैः सदा सह ॥ एते श्राद्धं सदा भुक्त्वा पितॄन्संतर्पयंत्यतः ॥२१॥
वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥ प्रीणयंति मनुष्याणां पितॄन्श्राद्धेषु तर्पिताः ॥ २२ ॥ आत्मानं गुर्विणीगर्भमपि प्रीणाति वै यथा ॥ दोहदेन तथा देवाः श्राद्धैः स्वांश्च पितॄन्नृ-
णाम् ॥ २३ ॥ हृष्यंति पितरः श्रुत्वा श्राद्धकालमुपस्थितम् ॥ अन्योन्यं मनसा ध्यात्वा संपतंति मनोजवम् ॥ २४ ॥ ब्राह्मणैः सह चाश्नंति पितरो ह्यंतरिक्षगाः ॥ वायुभूताश्च तिष्ठंति
भुक्त्वा यांति परां गतिम् ॥ २५ ॥ निमंत्रितास्तु ये विप्राः श्राद्धपूर्वदिने खग ॥ प्रविश्य पितरस्तेषु भुक्त्वा यांति स्वमालयम् ॥ २६ ॥ श्राद्धकर्त्रातुयश्चैकः श्राद्धे विप्रो निमंत्रितः ॥
उदरस्थः पिता तस्य वामपार्श्वे पितामहः ॥ प्रपितामहो दक्षिणतः पृष्ठतः पिंडभक्षकः ॥ २७ ॥ श्राद्धकाले यमः प्रेतान्पितॄंश्चाथ यमालयात् ॥ विसर्ज्जयति मानुष्ये निरयदोऽपि काश्यप
॥ २८ ॥ क्षुधार्त्ताः कीर्त्तयंतश्च दुष्कृतं च स्वयं कृतम् ॥ कांक्षंते पुत्रपौत्रेभ्यः पायसं मधुसंयुतम् ॥ तस्मात्तांस्तत्र विधिना तर्पयेत्पायसेन च ॥ २९ ॥ गरुड उवाच—स्वामिन्केनापि ते

दृष्ट्वा आगताः पितरो द्विजे ॥ लोकादमुष्मादागत्य भुंजते भुवि मानद ॥ ३० ॥ श्रीभगवानुवाच ॥ गरुत्मञ्छृणु वक्ष्यामि यथा दृष्टास्तु सीतया ॥ पितरो विप्रदेहे वै श्वशुराद्यास्त्रयः
क्वचित् ॥ ३१ ॥ गृहीत्वा पितुराज्ञां वै रामो वनमुपागमत् ॥ ततः पुष्करयात्रार्थं रामोऽयात्सीतया सह ॥ ३२ ॥ तीर्थं चापि समागत्य श्राद्धं प्रारब्धवांस्तु सः ॥ आयाता ऋषयः सर्वे ये
रामेण निमंत्रिताः॥ ३३ ॥ तान्मुनीनागतान्दृष्ट्वा वैदेही जनकात्मजा ॥ रामाज्ञयाऽन्नमादाय परिवेष्टुमुपागता ॥ ३४ ॥ अपासर्पत्ततो दूरे विप्रमध्ये तु संस्थिता ॥ गुल्मैराच्छाद्य चात्मानं
निगूढं सा स्थिता तदा ॥ ३५ ॥ गतेषु द्विजमुख्येषु प्रियां रामोऽब्रवीदिदम् ॥ कथं लतासु लीना त्वं कारणं वद मा चिरम् ॥ ३६ ॥ एवमुक्ता तदा भर्त्रा सीता साऽधोमुखी स्थिता ॥
मुंचंती चाश्रुसंघातं राघवं वाक्यमब्रवीत् ॥ ३७ ॥ पिता तव मया दृष्टो ब्राह्मणाग्रेषु राघवः ॥ सर्वाभरणसंपन्नौ द्वौ चान्यौ च तथाविधौ ॥ ३८ ॥ दृष्ट्वा त्वत्पितरं चाहमपक्रांता तवांति-
कात् ॥ इति श्रुत्वा प्रियावाक्यं रामो विस्मितमानसः ॥ ३९ ॥ आश्चर्यमिति तज्ज्ञात्वा तदा स्वस्थानमागमत् ॥ सीतया पितरो दृष्टा तथा तच्चे निवेदितम् ॥ ४० ॥ तस्माच्छ्राद्धं
चरेद्भक्त्या शाकैरपि यथाविधि ॥ कुर्वीतं समये श्राद्धं कुले कश्चिन्न सीदति ॥ ४१ ॥ ये यजंति पितॄन्देवान् ब्राह्मणांश्च हुताशनम् ॥ सर्वभूतांतरात्मानं मामेव हि यजंति ते ॥ ४२ ॥
स्मार्तेन विधिना श्राद्धं कृत्वा स्वविभवोचितम् ॥ ब्रह्मस्थावरपर्य्यंतं जगत्प्रीणाति मानवः ॥ ४३ ॥ ”

इत्यादि अनेक शास्त्रके वाक्योंसे श्राद्ध करना अत्यावश्यकीय है । श्राद्धके तुल्य कोई उत्तम कर्म नहीं है इसलिये सर्वधर्मात्माओंको श्राद्ध करना चाहिये । और नास्तिक धूर्त हेतुवादियोंसे दूर ही रहना योग्य है । इसलिये मैंने परमेश्वरकी प्रीति और लोकोपकारके अर्थ यह "गौडीयश्राद्धप्रकाश" नाम महानिबंध संवत् १९५५ में श्रीमान् सेठ खेमराजजीको छापनेके लिये दिया उन्होंने अत्युत्तम छापकर जो प्रकाशित किया वह हाथोंहाथ प्रेमसे हमारे विद्वज्जनगणने उठालिया हमको देश देशांतरके अनेक पंडितमहाशयोंके धन्यवाद पत्र मिले । जिनसे प्रसन्नता और उत्साह बढा उन महाशयोंको हम धन्यवाद देतेहैं । अब यह महानिबंध द्वितीयावृत्तिमें पहलेसे भी अत्युत्तम छपाहै सो भूदेव इसको देखकर प्रसन्न होंगे और हमको तथा सेठजीको कृतार्थ करेंगे । और हमारे गौडग्रंथोंकी उन्नति करनेके लिये हमने "चतुर्थीलालभास्कर" नाम महानिबंध बनायाहै जिसके प्रकाश अर्थात् प्रकरण १२ हुये हैं श्लोकसंख्या ७५००० है जिसमेंसे नीचे लिखे प्रकाश छपके तैयारहैं शांतिप्रकाश १, प्रतिष्ठाप्रकाश २, जलाशयोत्सर्गप्रकाश ३, गौडीयश्राद्धप्रकाश ४, अनुष्ठानप्रकाश ५, मुहूर्तप्रकाश ६, संस्कारप्रकाश ७, शेष प्रकाश, समयानुकूल छपते रहैंगे । अन्य ग्रंथ भी हमारे बनाये हुये छपेहैं. शूद्रश्राद्धपद्धति १, शूद्रविवाहपद्धति २, शूद्रवास्तुपद्धति ३, तुलसीविवाहपद्धति ४, नित्यकर्मप्रयोगमाला ५, वेदोक्त चातुर्थीलाली विवाह पद्धति ६, पार्वणश्राद्धसटीक ७, अंत्येष्टिकर्मपद्धति सटीक ८, कर्मकांडसमुच्चय ९, इत्यादि छोटे २ ग्रंथ छपेहैं चाहिये सो मंगाना ।

आपलोगोंका हितैषी-

पण्डित श्रीचतुर्थीलाल गौड कर्मठरत्न-रत्नगढनिवासी.

अथ गौडीयश्राद्धप्रकाशस्थविषयाणामनुक्रमणिका ।

पंचमं प्रकरणम् ।

षष्ठं प्रकरणम् ।

शूद्रश्राद्धप्रकरणम् ।

इति गौडीयश्राद्धप्रकाशस्थविषयाणामनुक्रमणिका समाप्ता ।

॥ श्रीगणेशाय नमः ॥ अथ श्राद्धप्रकाशः॥ स्वपुरःपिण्डदातॄणांपितॄन्पापप्युतानपि ॥ समुद्धरंतंकृपयानौमिदेवंगदाधरम्॥ १॥उक्त्वापूत्तवि
धिंकृत्स्नंनत्वोमाधवमाधवौ ॥ पितॄन्मातामहांश्चैवपितॄणांपूर्वजानुजौ ॥२॥ कातीयपारस्करगृह्यसूत्राण्यथोपुराणस्मृतिपद्धतीश्च॥सतांच
वाक्यानिविचार्यसम्यक्स्वशाखिनांश्राद्धविधिंतनोमि ॥३॥ गौडग्रंथविलोपंतुदृष्ट्वासमयभेदतः॥ तदुद्धारायकुर्वेहंग्रंथंवैशिष्टसंमतम्॥४॥
ग्रंथास्तुबहवःसन्तिदाक्षिणात्याश्चमैथिलाः॥ तथापिभूमिदेवानांप्रीतिदोयंभविष्यति॥५॥(तत्रतावच्छ्राद्धस्वरूपम्)देशकालपात्रेषुपित्रा
द्युद्देशेनविधिहविस्तिलदर्भमंत्रश्रद्धादिभिर्दानंश्राद्धम्॥तथाच (पराशरः) देशेकालेचपात्रेचविधिनाहविषाचयत्॥तिलैर्दर्भैश्चमंत्रैश्चश्राद्धं
स्याच्छ्रद्धयायुतम् ॥ (ब्रह्मपुराणेऽपि) देशेकालेचपात्रेचश्रद्धयाविधिनाचयत्॥पितॄनुद्दिश्यविप्रेभ्योदत्तंश्राद्धमुदाहृतम्॥(मरीचिः)प्रेतं
पितॄंश्चनिर्दिश्यभोज्यंयत्प्रियमात्मनः॥श्रद्धयादीयतेयत्रतच्छ्राद्धंपरिकीर्त्तितम्।इति। तस्मिंश्चकर्मणियागादाविंद्रादीनामिवपित्रादेर्देवता
त्वंतदुद्देशेनमंत्रद्वाराद्रव्यत्यागात्,यथाच,यागादौमंत्राहूताइंद्रादयःशक्तिमात्रेणतत्तत्स्थलेआविर्भूतायजमानत्यक्तद्रव्यदर्शनेनतृप्यन्तस्ते
षामभीष्टफलंयथामाधयंतितथाश्राद्धेपिमंत्राहूताःपित्रादयः समागताःपुत्रादित्यक्तद्रव्यभोगेनतृप्यंतोविशिष्टफलप्रदाइत्येवंकल्पनीयम्।
(अथश्राद्धमहिमा यमस्मृतौ) आयुःपुत्रान्यशःस्वर्गंकीर्त्तिंपुष्टिंबलंश्रियम्॥पशून्सौख्यंधनंधान्यंप्राप्नुयात्पितृपूजनात्॥(याज्ञवल्क्योऽपि)
आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच ॥ प्रयच्छन्तितथाराज्यंप्रीतानॄणांपितामहाः॥ (सुमंतुरपि) श्राद्धात्परतरंनान्यच्छ्रेयस्करमुदाहृ
तम् ॥ तस्मात्सर्वप्रयत्नेनश्राद्धंकुर्याद्विचक्षणः ॥ (ब्राह्मे) तस्माच्छ्राद्धंनरोभक्त्याशाकैरपियथाविधि ॥ कुर्वीतश्रद्धयातस्यकुलेकश्चिन्नसी
दति,(वसिष्ठः)पितापितामहश्चैवतथैवप्रपितामहः।उपासतेसुतंजातंशकुंताइवपिप्पलम्।मधुमांसैश्चशाकैश्चपयसापायसेनच॥ एषनोदास्य

तिश्राद्धंवर्षासुचमघासुच,इति,अथश्राद्धाऽकरणेदोषप्रवर्त्तकानिवाक्यानि,(तत्रतावदादित्यपुराणे)नसंतिपितरश्चेतिकृत्वामनसियोनरः॥
श्राद्धंनकुरुतेमोहात्तस्यरक्तंपिबंतिते,(हेमाद्रौशातातपः)अमावास्याव्यतीपात पौर्णमास्यष्टकासु च॥विद्वाञ्छ्राद्धमकुर्वाणोनरकंप्रति पद्यते,
एतन्माध्यादिपरमितिकल्पतरुः॥ (ब्रह्मपुराणे) आश्वयुज्यांतुकृष्णायांत्रयोद श्यांमघासुच ॥ प्रावृट्तौयमःप्रेतान्पितॄंश्चाथयमालयात् ॥
विसर्जयतिभूलोकंकृत्वाशून्यंस्वकंपुरम्।तेपुत्रादेःप्रकांक्षंतिपायसंमधुसंयुतम्।कन्यागतेसवितरिपितरोयांतिवैसुतान्॥अमावास्यादिनेप्र
तेगृहद्वारंसमाश्रिताः॥श्राद्धाभावेस्वभवनंशापंदत्त्वाव्रजंतिते।अतोमूलैःफलैर्वापितथाप्युदकतर्पणैः॥पितृतृप्तिंप्रकुर्वीतनैवश्राद्धंविवर्जयेत्
(गरुडनागरखंडयोः) अमावास्यादिनेप्राप्तेगृहद्वारंसमास्थिताः॥वायुभूताःप्रवाञ्छंतिश्राद्धंपितृगणानृणाम्॥यावदस्तमनंभानोःक्षुत्पिपा
सासमाकुलाः॥ततश्चाऽस्तंगतेसूर्येनिराशादुःखसंयुताः॥ निःश्वसंतश्चिरंयांतिगर्हयंतःस्ववंशजम्॥तस्माच्छ्राद्धंप्रयत्नेनअमायांकर्तुमर्हती
ति॥ननुपुण्योत्कर्षवतांस्वर्गलोकंगतानांमनुष्यपितृपितामहादीनाममृताऽऽहाराणांसतांकथंब्राह्मणभोजनविनष्टेनमानुषेण चान्नेनतृप्तिःसं
भवति॥ पापीयसांवा तिर्य्यग्योनिगतानांतृणाद्याहाराणांसतांप्रेतादिरूपत्वंगतानांवारुधिराद्याहाराणांसतामिति॥(अस्याक्षेपस्यसमाधा
नंहेमाद्रौदेवलेनोक्तम्) देवोयदिपिताजातःशुभकर्म्मानुयोगतः ॥ तस्यान्नममृतंभूत्वादेवत्वेऽप्यनुगच्छति॥गांधर्वेभोगरूपेणपशुत्वेचतृणं
भवेत् ॥ श्राद्धान्नंवायुरूपेणनागत्वेप्यनुगच्छति ॥ पानंभवतियक्षत्वेराक्षसत्वेतथामिषम् ॥ दानवत्वेतथामांसंप्रेतत्वेरुधिरोदकम् ॥ मानु
षत्वेऽन्नपानादिनानाभोगरसोभवेत्॥(मार्कण्डेयपुराणे)पितापितामहश्चैवतथैवप्रपितामहः।पिण्डसंबंधिनोह्येतेविज्ञेयाःपुरुषास्त्रयः॥लेपसं
बधिनश्चान्येपितामहपितामहात्॥प्रभृत्युक्तास्त्रयस्तेषांयजमानश्चसप्तमः।तथान्येपूर्वजाःस्वर्गेयेचान्येनरकौकसः। येचतिर्य्यक्त्वमापन्नायेच

भूतादिसंस्थिताः।तान्सर्व्वान्यजमानोवैश्राद्धंकुर्वन्यथाविधि।समाप्यायतेतान्सयेनयेनशृणुष्वतत्।अन्नविक्षेपणंयत्तुमनुष्यैःक्रियतेभुवि।
तेनतृप्तिमुपायान्तियेपिशाचत्वमागताः॥यदंबुस्नानवस्त्रोत्थंभूमौपततिपुत्रक॥तेनतेतरुतांप्राप्तास्तेषांतृप्तिःप्रजायते॥यास्तुगंधादिकणिकाः
पतंतिधरणीतले॥ताभिराप्यायनंतेषांयेदेवत्वंकुलेगताः॥उद्धृतेषुचपिंडेषुयाश्चान्नकणिकाभुवि॥ताभिराप्यायनंतेषांयेतिर्यक्त्वंकुलेगताः॥
येचादंताःकुलेबालाःक्रियायोग्यास्त्वसंस्कृताः॥ विपन्नास्तेतुविकिरसंमार्जनजलाशिनः॥भुक्त्वान्नाचमनंयच्चजलंयदङ्घ्रिसेचने॥ब्राह्म
णानांतथैवान्येतेनतृप्तिंप्रयांतिवै॥तेनानेककुलेतत्रतत्तद्योन्यन्तरंगताः॥प्रयांत्याप्यायनंवत्ससम्यक्छ्राद्धक्रियावताम्॥यथागोषुप्रनष्टोवै
वत्सोविंदतिमातरम्॥एवंश्राद्धेऽन्नमुद्दिष्टंमंत्रःप्रापयतेपितॄन्॥ (मात्स्यपाद्मयोः)नामगोत्रंपितॄणांतुप्रापकंहव्यकव्ययोः॥श्राद्धस्यमंत्रास्तद्व
च्चउपलभ्यानिभक्तितः।पित्रादिनामादीनिउपलभ्यानिज्ञातव्यानीत्यर्थः।नन्वचेतनत्वान्नामादीनांकथंहव्यकव्यप्रापकत्वमित्याशंक्योक्तम्।
अग्निष्वात्तादयस्तेषामाधिपत्येव्यवस्थिताइति।अग्निष्वात्तादयःपितृविशेषाणामाद्यधिष्ठातारः प्रापकाइत्यर्थः।तत्रैव।नाममंत्रास्तद।देशाभ
वान्तरगतानपि॥प्राणिनःप्रीणयंत्येतेतदाहारत्वमागतान्॥ (वायुपुराणेपि) यथागोषुप्रनष्टोवैवत्सोविंदतिमातरम् ॥ तथान्नंनयतेमंत्रोजं
तुर्यत्रावतिष्ठते॥नामगोत्रंचमंत्रश्चदत्तमन्नंनयंतिते॥अपियोनिशतंप्राप्तांस्तृप्तांस्तानुपतिष्ठति ॥इति॥ (अथश्राद्धभेदानाहमदनपारिजातेवि
श्वामित्रः)नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंसपिंडनम्॥पार्वणंचेतिविज्ञेयंगोष्ठ्यांशुद्ध्यर्थमष्टमम् ॥ कर्मांगंनवमंप्रोक्तंदैविकंदशमंस्मृतम् ॥

१ पार्वणंचतुर्विधं. त्रिदैवत्यं. षड्दैवत्यं. नवदैवत्यं द्वादशदैवत्यं च। तत्रत्रिदैवत्यंसाग्निकानांक्षयाहे। निरग्निकानांतुसपिंडने। महालये दौहित्रप्रतिपदिच । षड्दैवत्यंदर्शसंक्रा
तित्रयोदश्यादिषु । नवदैवत्यं वृद्धिमहालये अन्वष्टकागयानिमित्तादिश्राद्धेषु । द्वादशदैवत्यं. तीर्थमहालयगयायात्रादिषुचज्ञेयम् । तदुक्तंहेमाद्रौ-त्रिदैवत्यंमृताहेतुषड्दैवत्यं
तु दर्शके। वृद्धौतुनवदैवत्यं तीर्थेद्वादशदैवतम् ।

यात्रास्वेकादशंप्रोक्तंपुष्ट्यर्थंद्वादशंस्मृतमिति॥(एषांलक्षणानिभविष्ये)अहन्यहनियच्छ्राद्धंतन्नित्यमितिकीर्त्तितम्॥वैश्वदेवविहीनंतदश
क्तावुदकेनतु॥एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते॥तदप्यदैवंकर्त्तव्यमयुग्मान्भोजयेद्द्विजान्॥ (अत्रषोडशप्रेतश्राद्धान्यपि संगृह्यंतेएको
द्दिष्टरूपत्वात्।(तथाचहेमाद्रौगालवः)दाहादारभ्यदातव्यंश्राद्धंनैमित्तिकंबुधैः।नियमाद्वत्सरंयावदितिगालवभाषितमिति)काम्यायविहितंका
म्यमभिप्रेतार्थसिद्धये॥ वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते॥गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयम्॥अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेच
येत्॥येसमानाइतिद्वाभ्यामेतज्ज्ञेयंसपिंडनम् ।अमावास्यायांक्रियतेतत्पार्वणमितिस्मृतम्।क्रियतेवापर्वणियत्तत्पार्वणमितिस्थितिः।(पर्वा
णिविष्णुपुराणे)चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा।पर्वाण्येतानिराजेंद्ररविसंक्रमणंतथेति॥ गोष्ठ्यांयत्क्रियतेश्राद्धंगोष्ठीश्राद्धंतदुच्य
ते॥बहूनांविदुषांसंपत्सुखार्थंपितृतृप्तये॥ क्रियतेशुद्धयेयत्तुब्राह्मणानांतुभोजनम्॥ शुद्ध्यर्थमितितत्प्रोक्तंश्राद्धंपार्वणवत्कृतम्॥ निषेकका
लेसोमेचसीमंतोन्नयनेतथा॥ ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतम्॥ देवानुद्दिश्ययच्छ्राद्धंतत्तुदैविकमुच्यते॥ गच्छन्देशांतरेयस्तुश्राद्धंकु
र्यात्तुसर्पिषा।यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशयः।(सर्पिषासर्पिःप्रधानकेन)शरीरोपचयेश्राद्धमर्थोपचयएवच॥पुष्ट्यर्थमेतद्विज्ञेयमौपचा
यिकमुच्यतेइति॥अत्रनित्यंषड्दैवतमदैवम्॥नैमित्तिकमेकोद्दिष्टंच॥ काम्यम् उपरागादौकामनोपाधिकंपार्वणवत्कृतम्॥वृद्धिश्राद्धंपुत्र
जन्मविवाहादौक्रियमाणंनवदैवत्यम्॥सपिंडनंपार्वणैकोद्दिष्टोभयात्मकम्॥ पार्वणंप्रतिपर्वक्रियमाणंषड्दैवतम्॥ गोष्ठीश्राद्धंपार्वणवत्॥
शुद्ध्यर्थमपिपार्वणवत्स्मृतम्॥कर्मांगंयागादौक्रियमाणंवृद्धिवत्कृतम्॥ दैविकनित्यश्राद्धवत्॥यात्रार्थंनवदैवतंवृद्धिश्राद्धवत्कृतम्॥पुष्ट्य

र्थंचपार्वणवज्ज्ञेयमित्यर्थः।अथश्राद्धाधिकारिणःहेमाद्रौशुमंतुःमातुःपितुः प्रकुर्वीतसंस्थितस्यौरसःसुतः।पैतृमेधिकसंस्कारंमंत्रपूर्वकमाहृ
त।इतिमंत्रपूर्वकंद्विजानामेवनतुशूद्राणाम्(विष्णुपु० गारुडेचपुत्रः)पौत्रःप्रपौत्रोवातद्भ्राताभ्रातृसंततिः।सपिंडसंततिर्वापिक्रियार्हानृपजाय
ते।तेषामभावेसर्वेषांसमानोदकसंततिः।कुलद्वयेपिचोच्छिन्नेस्त्रीभिःकार्याःक्रियाःखग मार्कंडेयपुराणेपिपुत्राभावेसपिंडास्तुतद भावेसहोद
काः॥मातुःसपिंडायेवास्युर्येवामातुःसहोदकाः।कुर्युरेनंविधिंसम्यगपुत्रस्यसुताःस्मृताः॥कुर्यान्मातामहायैवपुत्रिकातनयस्तथा।सर्वाभावे
स्त्रियःकुर्युःस्वभर्तृणाममंत्रकम्।तदभावेचनृपतिःकारयेत्तस्यरिक्थतः॥तज्जातीयैर्नरैःसम्यग्दाहाद्याःसकलाःक्रियाः ॥ सर्वेषामेववर्णानांबां
धवोनृपतिर्यतः॥इति॥सहोदकाःसमानोदकाइत्यर्थः॥सपिंडनेविशेषोगारुडेभ्रातावाभ्रातृपुत्रोवासपिंडःशिष्यएववा॥सपिंडीकरणंकुर्य्या
त्पुत्रहीनेखगेश्वर।सर्वेषांपुत्रहीनानांपत्नीकुर्यात्सपिंडनम्।ऋत्विजंकारयेद्वाथपुरोहितमथापिवा।इति।पूर्वमध्यमोत्तराशुक्रियासुपुत्रादीनांव्य
वस्थितमधिकारंदर्शयति(पराशरोविष्णुपु०)-पूर्वाःक्रियामध्यमाश्चतथैवोत्तरसंज्ञिताः॥त्रिप्रकाराःक्रियाह्येतास्तासांभेदंशृणुष्वमे। आदा
हाद्दादशाहाच्चमध्येयाःस्युक्रियामताः॥ताःपूर्वामध्यमामासिमास्येकोद्दिष्टसंज्ञिताः।प्रेतेपितृत्वमापन्नेसपिंडीकरणादनु॥ क्रियंतेयाःक्रिया
पित्र्याःप्रोच्यंतेतानृपोत्तराः॥ माधवीयेसापिंडाद्यैरेवनिपत्यंतेःपूर्वाःक्रियामध्यमाश्चकर्त्तव्याःपुत्राद्यैरेवभ्रातृसंतत्यंतैःदौहित्राद्यश्चोत्तराःक्रि
याःकर्त्तव्याःनसपिंडाद्यैरेवनिपत्यंतैरित्यर्थः।औरसःसुतोऽनुपनीतोऽपिदाहादिकाःक्रियाःकुर्यात्तदाहसुमंतुःश्राद्धंकुर्यादवश्यंतुप्रमीतपि
तृकोद्वियः॥व्रतस्थोवाऽव्रतस्थोवाएकएवभवेद्यदि।इति॥अव्रतस्थोऽनुपनीतइत्यर्थः(स्कांदेपि)पित्रोरनुपनीतोपिविदध्यादौरसःसुतः॥ औ
र्ध्वदैहिकमन्येतुसंस्कृताःश्राद्धकारिणः(स्मृतिसंग्रहे)कृतचूडोनुपेतश्चपित्रोःश्राद्धंसमाचरेत्।उदाहरेत्स्वधाकारंनतुवेदाक्षराण्यसाविति ॥

एवंपितृव्यादीनामपिश्राद्धंकुर्यात्॥ (यथाहजातूकर्ण्यः) पितृव्यभ्रातृमातृणामपुत्राणांतथैवच ॥ मातामहस्याऽपुत्रस्यश्राद्धादिपितृवद्भवे
त्॥इति॥ पितृवदित्यावश्यकत्वार्थंनतुपार्वणविधानार्थं मातृपदंसपत्नमातृपरमित्यर्थः ॥ (गारुडे) नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषो
डश॥एकेनैवतुकार्याणिसंविभक्तधनेष्वपि॥अथश्राद्धदेशाः।(तत्रमनुः) ॥ शुचिंदंशविविक्तंचगोमयेनोपलेपयेत् ॥ दक्षिणाप्रवणंचैवप्रय
त्नेनोपपादयेत्॥अवकाशेषुचोक्षेषुनदीतीरेषुचैवहि॥विविक्तेषुचतुष्यंतिदत्तेनपितरःसदा॥इति ॥ चोक्षेषुस्वभावशुचयोऽरण्यादिप्रदेश।
स्तेष्वित्यर्थः॥(विष्णुधर्मोत्तरे)दक्षिणाप्रवणेदेशेतीर्थादौचगृहेपिवा॥भूसंस्कारादिसंयुक्तेश्राद्धंकुर्यात्प्रयत्नतः॥भूसंस्कारःगोमयादिनोपले
पइत्यर्थः॥(स्कांदे)तुलसीकाननच्छायायत्रयत्रभवेद्द्विज॥तत्रश्राद्धंप्रदातव्यंपितृणांतृप्तिहेतवे॥(शङ्खस्मृतौ) गङ्गायमुनयोस्तीरेपयोष्ण्यमर
कंटके ॥ नर्मदाबाहुदातीरेभृगुलिंगेहिमालये ॥ गंगाद्वारेप्रयागेचनेमिषेपुष्करेतथा॥संनिहत्यांगयायांचदत्तमक्षयतांव्रजेत् ॥ अपिजाये
तसोऽस्माकंकुलेकश्चिन्नरोत्तमः ॥ गयाशीर्षंवटेश्राद्धंयोनोदद्यात्समाहितः ॥ एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् ॥ यजेतवाश्वमेधेननी
लंवावृषमुत्सृजेत्॥(स्मृत्यंतरे)अश्वमेधोगयाश्राद्धंकन्यादानंतथैवच॥तथानीलवृषोत्सर्गःसममेतच्चतुष्टयम्॥(वायवीयेशमीपत्रप्रमाणेन
पिंडदद्याद्गयाशिरे॥उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतम्॥पितामाताचभार्याचभगिनीदुहितातथा॥पितृमातृष्वसाचैषांसप्तगोत्राणिवैवि
दुरिति॥(स्मृत्यंतरकूर्मपुराणयोः)जीवतोवाक्यकरणात्क्षयाहेभूरिभोजनात्॥गयायांपिंडदानाच्चत्रिभिःपुत्रस्यपुत्रता॥ (अथनिषिद्धदेशाः
स्कंदपुराणे) त्रिशंकोर्वर्जयेद्देशंसर्वंद्वादशयोजनम् ॥ उत्तरेणमहानद्यादक्षिणेनतुकीकटात् ॥ देशस्त्रैशंकवोनामश्राद्धकर्मणिवर्जितः ॥
वायुपु०-कारस्काराःकलिंगाश्चसिंधोरुत्तरमेवचाप्रनष्टाश्रमधर्माश्चदेशावर्ज्याःप्रयत्नतः ॥ दिवोदासीयेम्लेच्छदेशेतथारात्रौसंध्यायांविप्र

वर्जिते ॥ नश्राद्धमाचरेद्विद्वान्नचाऽऽकाशेकथंचन ॥ (यमस्मृतौ परकीयप्रदेशेतुपितॄणांनिर्वपेत्तुयः ॥ तद्भूस्वामिपितृभिश्चश्राद्धकर्मविह
न्यते॥अटव्यःपर्वताःपुण्यानद्यस्तीर्थानियानिच ॥सर्वाण्यस्वामिकान्याहुर्नहितेषुपरिग्रहः॥रूक्षंकृमिहतंक्लिन्नंसंकीर्णांनिष्टगंधिकम्॥देशं
त्वनिष्टशब्दंचवर्जयेच्छ्राद्धकर्मणि॥इति॥ क्लिन्नंसपङ्कम्॥संकीर्णम् अन्यैःसङ्कीर्णमित्यर्थः।(अथ श्राद्धकालानाहयाज्ञवल्क्यः)अमावास्या
ष्टकावृद्धिःकृष्णपक्षोऽयनद्वयम्॥द्रव्यंब्राह्मणसम्पत्तिर्विषुवत्सूर्य्यसंक्रमः ॥ व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्य्ययोः ॥ श्राद्धंप्रतिरुचिश्चैव
श्राद्धकालाःप्रकीर्तिताः ॥ अस्यार्थः ॥ यत्रदिनेचंद्रमानदृश्यतेसाअमावास्यातस्यामहर्द्वयव्यापिन्यामपराह्णव्यापिनीग्राह्या ॥ अपराह्णे
पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायामितिकात्यायनसूत्रात् अपराह्णःपितॄणामितिवचनात्।अपराह्णश्चपञ्चधाविभक्तेदिनेचतुर्थोभाग
स्त्रिमुहूर्त्तः॥अष्टकाशब्देनपौषमाघफाल्गुनकृष्णाष्टम्यः॥अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका इतिविष्णुस्मरणात्॥वृद्धिः-पुत्रजन्मा
दिनिमित्तवक्ष्यमाणकालः ॥ कृष्णपक्षोऽपरपक्षः ॥ अपरपक्षेश्राद्धंकुर्वीत इतिकात्यायनसूत्रात् ॥ अयनद्वयम् दक्षिणायनमुत्तरायणंच॥
द्रव्यं कृसरतिलव्रीह्यादिकम् ॥ ब्राह्मणः श्रुताऽध्ययनसम्पन्नतयासम्पत्तिर्लाभोयस्मिन्कालेसतथोक्तः॥ विषुवत् मेषतुलासंक्रान्ती ॥ सूर्य्य
संक्रमः सूर्य्यस्यराश्यन्तरप्राप्तिः॥व्यतीपातो योगविशेषः॥गजच्छाया "यदेन्दुःपितृदैवत्येहंसश्चैवकरेस्थितः।याम्यातिथिर्भवेत्साहिगज
च्छायाप्रकीर्त्तितेतियमेनपरिभाषिता।इंदुश्चंद्रःपितृदैवत्योमघा हंसःसूर्यःकरोहस्तः याम्यतिथिस्त्रयोदशीत्यर्थः।हस्तिच्छायेतिकेचित्सेह
नगृह्यतेकालप्रक्रमात्।ग्रहणंसोमसूर्ययोरुपरागः।यदाकर्तुःश्राद्धंप्रतिरुचिर्भवतितदैवकर्त्तव्यं।चकारेणाऽन्येपियुगादिप्रभृतयोवक्ष्यमाणाः
श्राद्धकालाःसंगृह्यन्त इत्यर्थः॥अथभाद्रपदाऽपरपक्षः॥अत्रयद्यप्यपरपक्षेश्राद्धंकुर्वीतशाकेनापिनाऽपरपक्षमतिक्रामेदित्यादिभिर्द्वादशाऽ

परपक्षग्राहकैः सामान्यवचनैः भाद्रपदापरपक्षोऽपिगृहीतएव तथापितस्यपुण्यतमत्वप्रतिपादनार्थंतदतिक्रमेप्रत्यवायप्रतिपादनार्थंच
स्मृतिपुराणादिषुविशेषतस्तस्याभिधानंकृतम्॥(तथाचविष्णुधर्मोत्तरे) उत्तरादयनाद्राजञ्छ्रेष्ठंस्याद्दक्षिणायनम्॥याम्यायनाच्चतुर्म्मासं
तत्रसुप्तेतुकेशवे ॥ प्रोष्ठपद्याःपरः पक्षस्तत्रापिचविशेषतः ।पंचम्यूर्द्ध्वंतुतत्रापिदशम्यूर्द्ध्वंततोप्यति॥मघायुक्तातुतत्रापिशस्ताराजंस्त्रयोदशी
ति॥उत्तरायणाद्दक्षिणायनंश्राद्धकरणेश्रेष्ठं सर्वस्माद्दक्षिणायनादपितन्मध्यवर्त्युपेंद्रनिद्रादिनादाषाढ्याःपौर्णमास्याःप्रभृतिमासचतुष्टयं
श्रेष्ठम् ॥ तस्मादपिसर्वस्मात् प्रोष्ठपदस्यमासस्याऽपरपक्षः ॥ तत्राऽपिपञ्चम्या ऊर्द्ध्वंदशदिवसाःतत्राऽपिदशम्याऊर्द्ध्वंपंच॥तत्राऽपिमघायु
क्तात्रयोदशीत्यर्थः ॥ (ब्रह्मपुराणेपि) अश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यंदिनेदिने ॥ त्रिभागहीनंपक्षंवात्रिभागंत्वर्द्धमेववा॥ (नागरखंडेपि)
आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे ॥ योवैश्राद्धंनरःकुर्यादेकस्मिन्नपिवासरे ॥ तस्यसंवत्सरंयावत्तृप्ताःस्युःपितरोध्रुवम् ॥ (मार्कंडे
यपुराणे) कन्यागतेसवितरिदिनानिदशपंचच॥पार्व्वणेनैवविधिनातत्रश्राद्धंविधीयते ॥ प्रतिपद्धनलाभायद्वितीयाद्विप्रजाप्रदा॥वरार्थिनीतृ
तीयाचचतुर्थीशत्रुनाशिनी ॥ श्रियंप्राप्नोतिपंचम्यांषष्ठ्यांपूज्योभवेन्नरः॥गणाधिपत्यंसप्तम्यामष्टम्यांबुद्धिमुत्तमाम्॥स्त्रियानवम्यांप्राप्नोति
दशम्यांपूर्णकामताम् ॥ वेदांस्तथाप्नुयात्सर्वानेकादश्यांक्रियापरः॥द्वादश्यांहेमलाभंचप्राप्नोतिपितृपूजकः ॥ प्रजांमेधांपशुंपुष्टिंस्वातंत्र्यं
वृद्धिमुत्तमाम् ॥ दीर्घमायुरथैश्वर्यंकुर्व्वाणस्तुत्रयोदशीम् ॥ युवानःपितरोयस्य मृताःशस्त्रेणवैहताः॥तेनकार्यंचतुर्दश्यां तेषांतृप्तिमभीप्स
ता ॥ श्राद्धंकुर्वन्नमावास्यामन्नेनपुरुषःशुचिः॥सर्व्वान्कामानवाप्नोतिस्वर्गेवासंसमश्नुत इति॥भाद्रपदशुक्लपूर्णिमाप्रशंसा पुराणसमुच्चये॥
प्रशस्तापूर्णिमामुख्यास्तिथयःषोडशैवताः ॥ यथातिलानांतैलंचतुल्यंवैश्वेतकृष्णयोः॥पूर्णिमायाममायांचसमम्पुण्यफलंद्वयोः॥ पूर्णपक्षे

नभस्यस्यतिथिःपूर्णाप्रशस्यते॥अस्यांदत्तेपितॄणांवैतृप्तिःसांवत्सरीभवेत् ॥ नभस्यकृष्णपक्षेप्रतिपत्प्रभृतिदशपंचदिनानिकृष्णोऽपरपक्षः
सवितरिकन्यागतेसतिमहालयइतिप्रोक्तः ॥ तत्रपार्वणेनैव विधिनाश्राद्धंकुर्यात् ॥ (तदाहवृद्धमनुः) नभस्यस्यापरः पक्षोयत्र
कन्यांव्रजेद्रविः ॥ समहालयसंज्ञःस्याद्गजच्छायाह्वयस्तथा ॥ पार्वणेनैवविधिनाश्राद्धंतत्रविधीयते ॥ (आदित्यपुराणे) कन्या
गतेसवितरियान्यहानितुषोडश ॥ क्रतुभिस्तानितुल्यानिपितॄणांदत्तमक्षयम् ॥ (कार्ष्णाजिनिमनुगौतमाः) आदौमध्येऽवसानेवायत्रक
न्यांव्रजेद्रविः ॥ सपक्षःसकलःपूज्यः श्राद्धषोडशकंप्रति ॥इति॥ अत्रयद्यपिबहुवचनेषुपंचदशतिथ्यात्मकःपक्षउक्तस्तथापिकदाचित्तिथि
वृद्धौषोडशदिनात्मकोभवति॥अत्रषोडशत्वमपित्रेधाव्याचख्यौ॥तिथिवृद्ध्याप्रथमःपक्षः॥भाद्रपदपूर्णिमासहेतिद्वितीयः॥ आश्विनशुक्ल
प्रतिपदासहेतितृतीयः ॥ अत्रअन्त्यएवतुयुक्तः तस्यापिक्षीणचंद्रत्वाविशेषेणाऽपरपक्षानुप्रवेशसंभवात् ॥ (तथाचहेमाद्रिमाधवयोर्दे
वलः) ॥ अहःषोडशकंयत्तुशुक्लप्रतिपदासह॥चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृता ॥इति॥ यदिप्रतिपदादिदर्शान्तंश्राद्धंकर्तुमसमर्थ
श्चेत्पंचम्यादिदर्शान्तमष्टम्यादिदर्शान्तंवायथाशक्तिश्राद्धंकुर्यात् ॥ (तथाचहेमाद्रौगौतमः) ॥ अपरपक्षेश्राद्धंपितृभ्योदद्यात्पंचम्या
दिदर्शांतमष्टम्यादिदशम्यादिसर्वस्मिन्वाइति।कात्यायनसूत्रेऽपिअपरपक्षेश्राद्धंकुर्वीतऊर्ध्वंचतुर्थ्यायदहःसंपद्यतेसप्तम्याऊर्द्धंयदहःसंप
द्यतेक्तेचतुर्दशींशाकेना प्यपरपक्षंनातिक्रमेत् ॥ (मनुरपि) कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीम् ॥ श्राद्धेप्रशस्तास्तिथयोयथैतानतथे
तराः॥इति।अत्राऽप्यसामर्थ्येएकस्यांतिथौयथासंभवंश्राद्धंकुर्यात्।(तथाचकात्यायनः)अशक्तःपक्षमध्येतुकरोत्येकदिनेतदा।निषिद्धेपिदि
नेकुर्यात्पिंडदानंयथाविधिइति॥निषिद्धेनंदाभार्गवादिदिनेऽपीत्यर्थः।(अत्रक्षयाहदिनप्रशंसानागरखंडे)।आषाढ्याःपंचमेपक्षेकन्यासंस्थे

दिवाकरे ॥ मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः ॥ तस्यसंवत्सरंयावत्संतृप्ताःपितरोध्रुवम् ॥ (कात्यायनोपि) यातिथिर्यस्यमासस्य
मृताहेतुप्रवर्त्तते ॥ सातिथिःपितृपक्षेपिपूजनीयाप्रयत्नतः ॥ तिथिच्छेदोनकर्त्तव्योविनाशौचंयदृच्छया ॥ पिंडश्राद्धंचकर्त्तव्यंविच्छित्तिं
नैवकारयेत् ॥इति॥ अथात्रत्रयोदशीश्राद्धेविशेषः॥ (तत्रमनुः) ॥ यत्किंचिन्मधुनामिश्रंप्रदद्यात्तुत्रयोदशीम्॥तदप्यक्षयमेवस्याद्वर्षासुच
मघासुच ॥ (ब्राह्मे) ॥ त्रयोदश्यांप्रयत्नेनवर्षासुचमघासुच ॥ नास्मात्परतरःकालःश्राद्धेष्वन्येषुवर्त्तते ॥ यदत्रपितरोदत्तंगृह्णंतिस्मृतमक्ष
यम्॥ इति॥ अत्रनिषेधवचनान्यपिकेचित् (तत्रअंगिरोबृहस्पती) ॥ कृष्णपक्षेत्रयोदश्यांयःश्राद्धंकुरुतेनरः ॥ पंचत्वंतस्यजानीयाज्ज्ये
ष्ठपुत्रस्यनिश्चितम् ॥ मघासुकुर्वतःश्राद्धंज्येष्ठपुत्रोविनश्यति (हेमाद्रौषट्त्रिंशन्मते) गृहीत्रयोदशीश्राद्धंनकुर्यात्पुत्रवानपि ॥ उपवा
संचसंक्रांतौग्रहणेचंद्रसूर्ययोः ॥ इति ॥ अत्रमघात्रयोदश्यांश्राद्धनिषेधःकेवलपितृवर्गविषयः ॥ (तथाचमाधवीयेकार्ष्णाजिनिः) श्राद्धं
तुनैकवर्गस्यत्रयोदश्यामुपक्रमेत् ॥ अतृप्तास्तत्रयस्यस्युःप्रजांहिंसंतितत्रते ॥ (स्मृत्यंतरेपि) इच्छेत्रयोदशीश्राद्धंपुत्रवान्यःसुतायुषोः॥
एकस्यैवतुनोदद्यात्पार्वणंतुसमाचरेत्।इति।अस्यार्थः—यःपुत्रवानसुतायुषोरभिवृद्धिमिच्छेत्सएकस्यैकवर्गस्यैवश्राद्धंनोदद्यात् अपितुमा
तामहवर्गोद्देशेनापिपार्वणंसमाचरेत् तस्मादेकवर्गोद्देशेनैवमघात्रयोदश्यांश्राद्धंनिषेधोनतुपार्वणस्यैवतच्छ्राद्धस्यप्रशस्तत्वादित्यर्थः ॥
अथाऽपरपक्षचतुर्दशीश्राद्धनिर्णयः ॥ (तत्रयाज्ञवल्क्यः) प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीम् ॥ शस्त्रेणतुहतायेवैतेभ्यस्त
त्रप्रदीयते ॥ (ब्रह्मपुराणेपि) युवानःपितरोयस्यमृताःशस्त्रेणवाहताः ॥ तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता ॥ इति ॥ एतच्चतुर्द
श्यांश्राद्धनिषेधोऽप्यशस्त्रहतविषयः ।दुर्म्मरणमृतानांतुचतुर्दश्यामेवश्राद्धंकुर्यात् ॥ (तदाहहेमाद्रिमाधवश्राद्धतत्त्वेषुमरीचिः) विषश

स्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम्॥चतुर्दश्यांक्रियाकार्याअन्येषांतुविगर्हिता॥(प्रचेताअपि)वृक्षारोहणलोहादिविद्युज्जलविषादिभिः ॥
नखिदंष्ट्रिविपन्नानामेषांशस्ताचतुर्दशी ॥ इति ॥ अनेनशस्त्रादिहतानामेवचतुर्दशीकालमात्रंनियम्यते ॥ नतुचतुर्दश्यामेवहतानां
किंतुतेषामन्यस्मिन्नपिकालेभवत्येवश्राद्धम्॥इति हेमाद्रिमाधवप्रभृतयः॥शस्त्रहतस्यपितुर्महालयेचतुर्दश्यामेकोद्दिष्टमेवनतुपार्वणम्(तदा
हमाधवेसुमंतुः) समत्वमागतस्यापिपितुःशस्त्रहतस्यतु॥एकोद्दिष्टंसुतैःकार्य्यंचतुर्दश्यांमहालये ॥इति॥ समत्वमागतस्यसपिंडीकृतस्य
शस्त्रहतस्यपितुश्चतुर्दश्यांमहालयेसुतैरेकोद्दिष्टंकार्य्यमित्यर्थः॥दिनान्तरेतुपार्वणकार्य्यम्॥एकोद्दिष्टश्राद्धेनपितामहादितृप्त्यसिद्धेः(तथा
चहेमाद्रौप्रजापतिः)संक्रांतावुपरागेचवर्षोत्सवमहालये ॥ निर्वपेद्दत्तपिंडांस्त्रीनितिप्राहप्रजापतिः ॥इति ॥ चतुर्दश्यांमृतस्याऽपिमहालये
एकोद्दिष्टंकार्य्यंनतुपार्वणम्(तथाचहेमाद्रिनागरखडयोर्ब्रह्मणोवाक्यम्)यःकश्चिन्मानवःश्राद्धंस्वपितृभ्यःप्रदास्यति ॥ पितृपक्षेचतुर्दश्यां
नभस्येमासिसंस्थिते॥प्रेतानांराक्षसानांचभूतानांतद्भविष्यति ॥ एतस्मात्कारणाच्छ्राद्धंपार्वणंनैवकारयेत् ॥ पितृपक्षेचतुर्दश्यांकन्यासं
स्थेदिवाकरे॥तेनैकोद्दिष्टमेवात्रकर्त्तव्यंनतुपार्वणम्॥एतस्मिन्नह निप्राप्तेव्यर्थंश्राद्धंभवेद्यतः ॥इति॥ यस्यतुपितामहोपिशस्त्रादिनाहतस्तस्या
पिमहालयेचतुर्दश्यामेकोद्दिष्टं पित्रादिषुत्रिष्वपिशस्त्रादिनाहतेषु त्रयाणामपिपृथक्पृथक् एकोद्दिष्टंकार्य्यम् दिनान्तरेतुपार्वणविधानेनैव
कार्यमितिविवेकः॥इतिचतुर्दशीश्राद्धनिर्णयः॥अत्रमहालयेश्राद्धंनवदैवत्यंकर्त्तव्यम्॥(तथाचहेमाद्रौधर्मः)महालयेगयाश्राद्धेवृद्धौचान्वष्ट
कासुचानवदैवत्यमत्रस्याच्छेषंषाट्पौरुषंविदुरिति।शेषम्-अमावास्यादिश्राद्धम्त्रिदैवत्यंमृताहेतुषड्दैवत्यंतुदर्शके।वृद्धौतुनवदैवत्यंतीर्थेऽष्टो
ष्टमघासुच।इतिकाशिकायामुक्तत्वात्।नवदैवत्यताचात्रैवम्॥एकःपितृवर्गः।द्वितीयोमातृवर्गः।तृतीयोमातामहवर्ग।इति।मातामहवर्गेचस्त्री

णांसहैवोद्देशःकर्त्तव्यःनपृथक्॥तथाच निर्णयामृतेस्मृत्यर्थसारेच–तत्रमातृश्राद्धंपृथक्कार्य्यंमातामहानांसपत्नीकमेवेति॥(हेमाद्रौकर्मप्रदीपेऽ
पि)॥नयोषिद्भ्यःपृथग्दद्यादवसानदिनादृते॥स्वभर्तृपिंडमातृभ्यस्तृप्तिस्तासांप्रकीर्त्तिता॥(हेमाद्रौ छागलेयः)क्षयाहेकेवलाःकार्यावृद्धावादौ
प्रकीर्त्तिताः।सर्व्वत्रैवहिमध्यस्थानान्त्याःकार्य्यास्तुमातरः।इति।सर्व्वत्रेतिमहालयेऽन्वष्टकागयाश्राद्धेचमध्यएवनिवेशः ।तथाचसत्यव्रतः)
पितॄणांप्रथमंदानंमातॄणांतदनंतरम्॥ततोमातामहानांचक्रमश्चैवंप्रकीर्त्यते॥काशिकायांतुचतुःपार्वणमुक्तम्॥तथाच(कात्यायनः)कुर्याद्द्वाद
शदैवत्यंप्रेतपक्षेतुसर्वदा॥यथातीर्थेगयायांचएषधर्मःसनातनः॥आदौपिताततोमाताततोमातामहस्तथा ॥ मातामहास्ततोदद्यात्प्रेतपक्षेतुस
र्वदा॥(सुमंतुरपि) पितृभ्यः प्रथमंदद्यान्मातृभ्यस्तदनंतरम्॥ततोमातामहेभ्यश्चतत्पत्नीभ्यस्तथैवच॥गयायांचतथातीर्थेप्रेतपक्षेविशेषतः।
कुर्य्याद्द्वादशदैवत्यमेकोद्दिष्टमतःपरम्।इति।अपरार्कमदनपारिजातयोस्तु गयामहालयादौमातृश्राद्धं पृथग्वासहवास्वभर्तृभिरित्युक्तम्॥
(तथाचकात्यायनः) स्वेनभर्त्रासमंश्राद्धंमाताभुंक्तेसुधासमम् ।पितामहीचस्वेनैवतथैवप्रपितामही॥(चंद्रिकायां)क्षयाहंवर्जयित्वैकंस्त्रीणां
नास्तिपृथक्क्रिया॥केचिदिच्छन्तिनारीणांपृथक्श्राद्धंमहर्षयः॥ अत्रवृद्धाचारतोव्यवस्था इति ॥पितृव्यभ्रातृभगिन्यादीनांमहालयश्राद्ध
मेकोद्दिष्टविधानेनकार्यम् ॥ (तदुक्तंसुमंतुना) सपिंडीकरणादूर्ध्वंयत्रयत्रचदीयते॥भ्रात्रेभगिन्यैपुत्रायस्वामिनेमातुलायच ॥ पितृव्यगुर
वेश्राद्धमेकोद्दिष्टंनपार्वणम् । (हेमाद्रावपि) उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः॥श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः॥ भगिनी
स्वामिदुहितृजामातृभगिनीसुताः॥पितरौपितृपत्नीनांपितुर्मातुश्चयास्वसा ॥सखिद्रव्यदशिष्याद्यास्तीर्थेचैवमहालये॥एकोद्दिष्टविधानेन
पूजनीयाःप्रयत्नतः॥इति॥ इतरेषांपित्रादीनांपार्वणमिति(आपस्तंबोपि)अपुत्रायेमृताःकेचित्स्त्रियश्चपुरुषाश्चये॥ तेषामपिचदेयंस्यादेको

द्दिष्टंनपार्वणम्।स्त्रियो भगिन्यादयः।पुरुषाभ्रात्रादयः।(कात्यायनोऽपि)संबंधिबांधवादीनामेकोद्दिष्टंतुसर्वदा।इति।एतच्च भाद्रपदापरपक्षप्रति
पत्प्रभृतिषुचतुर्दशीवर्ज्यममावास्यापर्यंतासुतिथिषुप्रत्यहमशक्तौतन्मध्यएवयथासंभवंनवदैवत्यंपार्वणविधानेनपितृव्यादीनामन्येषांचैको
द्दिष्टविधानेनतंत्रेणपाकं कृत्वापृथक्पृथगपरपक्षश्राद्धंकर्त्तव्यमितिस्थितम्।इतिभाद्रपदाऽपरपक्षश्राद्धकालः।(अथयुगादयोभविष्ये)वैशा
खस्यतृतीयायानवमीकार्तिकस्यच।पौर्णमासीचमाघस्यनभस्यस्यत्रयोदशी।युगादयःस्मृताह्येतादत्तस्याक्षयकारकाः।(युगांतब्रह्मपुराणे
सूर्यस्यसिंहसंक्रांत्यामंतःकृतयुगस्यतु।अथवृश्चिकसंक्रांत्यामंतस्त्रेतायुगस्यतु।ज्ञेयस्तुवृषसंक्रांत्यांद्वापरांतश्चसंज्ञया ॥तथाचकुंभसंक्रांत्या
मंतःकलियुगस्यतु । युगादिषुयुगांतेषुश्राद्धमक्षयमुच्यते।(मन्वंतरादयो मात्स्ये)आश्वयुक्शुक्लनवमीद्वादशीकार्त्तिकस्यच।चैत्रस्यतुतृती
यायातथाभाद्रपदस्यतु॥फाल्गुनस्यत्वमावास्या पौषस्यैकादशीतथा॥श्रावणस्याष्टमीकृष्णातथाषाढस्यपूर्णिमा॥आषाढस्यापिदशमी
माघमासस्य । सप्तमी कार्त्तिकीफाल्गुनीचैत्रीज्येष्ठेपंचदशीतथा॥मन्वंतरादयश्चैतादत्तस्याक्षयकारकाः॥ इति । (अथ सांवत्सरिककालो
ब्राह्मे) प्रतिसंवत्सरंकार्य्यं मातापित्रोर्मृताहनि॥पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्यचैवहि॥(प्रभासखण्डे) मृताहनिपितुर्यस्तुनकुर्य्या
च्छ्राद्धमादरात्॥मातुश्चैववरारोहे वत्सरान्तेमृताऽहनि॥नाऽहंतस्यमहादेवि पूजांगृह्णामिनोहरिः॥तस्माद्यत्नेनकर्त्तव्यं वर्षेवर्षेमृताऽहनि ॥
(मनुस्मृतौ)पूर्वाह्णेदैविकंश्राद्धमपराह्णेतुपार्वणम्॥एकोद्दिष्टंतुमध्याह्नेप्रातर्वृद्धिनिमित्तकम्॥(ब्रह्मपुराणेऽपि) पूर्वाह्णेमातृकंश्राद्धमपराह्णेतुपैतृ
कं।एकोद्दिष्टंतुमध्याह्नेप्रातर्वृद्धिनिमित्तकमितिमातृकाश्राद्धमन्वष्टकाश्राद्धमित्यर्थः(मत्स्यपुराणे)प्रातःकालोमुहूर्तांस्त्रीन्संगवस्तावदेवतु।
मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णस्ततःपरं।सायाह्नस्त्रिमुहूर्त्तःस्याच्छ्राद्धंतत्रनकारयेत्।राक्षसीनामसावेलागर्हितासर्वकर्मसु ।क्षयाहाऽपरिज्ञानेऽ

मावास्यायांश्राद्धं। तथाचभविष्ये)मृताहंयोनजानातिमानवोविनतात्मज।तेनकार्यममावास्यांश्राद्धंसांवत्सरंनृप॥इति॥अथश्राद्धीयब्राह्मणाः(तत्रमनुः) वेदविद्याव्रतस्नाताञ्छोत्रियान्गृहमेधिनः॥पूजयेद्धव्यकव्येनविपरीतांश्चवर्जयेत्॥गृहमेधिनःगृहस्थाः॥(याज्ञवल्क्यः)॥ अग्र्यःसर्वेषुवेदेषु श्रोत्रियोब्रह्मविद्युवा। वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णिकः ॥ कर्मनिष्ठास्तपोनिष्ठाःपंचाग्निर्ब्रह्मचारिणः ॥ पितृमातृपराश्चैव ब्राह्मणाःश्राद्धसंपदे ॥ (कात्यायनसूत्रे) स्नातकानेके यतीन् गृहस्थान् साधून् वा श्रोत्रियान् वृद्धाननवद्यान्स्वकर्मस्थानिति ॥ (मात्स्ये) ॥ अथर्व्वणवेदविच्चज्ञातवंशकुलान्वितः ॥ पुराणवेत्ताब्रह्मण्यः स्वाध्यायजपतत्परः ॥ शिवभक्तः पितृपरःसूर्यभक्तोऽथवैष्णवः ॥ ब्रह्मण्योयोगविच्छांतोविजितात्मासुशीलवान् ॥ एतांस्तुभोजयेन्नित्यंदेवेपित्र्येचकर्मणि ॥ कात्यायनमनुव्यासाः) गायत्रीसारमात्रोपिवरंविप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी ॥(हेमाद्रौमात्स्ये)गायत्रीजाप्यनिरतंहव्यकव्येषुयोजयेत्॥पापंतिष्ठतिनोतस्मिन्नब्बिंदुरिवपुष्करे ॥ अपांबिंदुः अब्बिंदुरित्यर्थः ॥ (ब्रह्मवैवर्त्ते)पत्नीपुत्रसमायुक्ताञ्छ्राद्धकर्मणियोजयेत्। देहस्यार्द्धंस्मृतापत्नीनसमग्रोविनातया ॥ नवाऽपुत्रस्यलोकोस्तिश्रुतिरेषासनातनी (कौर्मे) महादेवार्चनरतोमहादेवपरायणः ॥ वैष्णवोवाऽथयोनित्यंसविप्रःपंक्तिपावनः ॥ इति ॥ (शुक्लयजुर्वेदीयमाध्यंदिनविप्रप्रशंसा होलिभाष्ये) ऋग्वेदीचपितृस्थानेयजुर्वेदीपितामहः ॥ त्रिवेदीप्रपितुःस्थानेविश्वेदेवाह्यथर्ववित् वाजिविप्रविशेषेणश्राद्धकर्मनिरन्तरम् ॥ शुक्ला प्रशस्ता कृष्णात्तु यजुरुक्तनिषेधतः ॥ तस्मात्कव्यानिहव्यानिदातव्यानिद्विजातये ॥ वाजिनेदत्तमेकंतुतत्कोटिगुणितंभवेत् ॥ (विष्णुधर्मोत्तरे) देवा ब्राह्मणरूपेणचरंतिपृथिवीमिमाम् ॥ तस्मात्संप्राप्तमतिथिंप्रयत्नेनतुभोजयेत् ॥ (अथानुकल्पो याज्ञवल्क्येन दर्शितः) स्वस्रीयऋत्विग्जामा

तृयाज्यश्वशुरमातुलाः ॥ त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः॥(मनुरपि)अनुकल्पस्त्वयंज्ञेयःसदासद्भिरनुष्ठितः॥मातामहंमातुलंच स्वस्रीयंश्वशुरंगुरुम्॥दौहित्रंविट्पतिंबंधुमृत्विग्याज्यौचभोजयेत्॥मातामहः मातुः पिता मातुलोमातुर्भ्राता स्वस्रीयः भगिन्याः पुत्रः॥ गुरुः उपाध्यायः॥विट्पतिः जामाता ॥ ऋत्विक याजकः ॥ याज्यःयस्यार्त्विज्यं क्रियत इत्यर्थः ॥ अभावेऽपि शिष्यान् स्वाचारानिति कात्यायनसूत्रे ॥ (ब्रह्मवैवर्त्तेतु) शिष्याश्चऋत्विजोयाज्याः सुहृदः शत्रवस्तथा । श्राद्धेषुश्वशुराःश्यालानभोज्यामातुलादयः॥ (वायु पुराणेपि) नभोजयेदेकगोत्रान्समानप्रवरांस्तथा ॥ एतेभ्योहिहविर्दत्तंभुंजंतेनपितामहाः ॥ अत्रविकल्पेशिष्टाचाराद्व्यवस्था॥ (माधवी येतु) श्राद्धे ऋत्विक्पितृव्यसोदर्यसपिंडा वैश्वदेवस्थाने नियोक्तव्याः नपित्रादिस्थाने इत्युक्तम् ॥ (अत्रिरपि) ऋत्विक्पुत्रादयोह्येते सकुल्या ब्राह्मणाद्विजाः ॥ वैश्वदेवेनियोक्तव्यायद्येते गुणवत्तराः ॥ इति ॥ अथवर्जनीयाब्राह्मणाः ॥ (तत्र याज्ञवल्क्यः) रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा ॥ अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभि शस्तकः ॥ मित्रध्रुक्पिशुनः सोमविक्रयी परिविंदकः ॥ मातापित्रोर्गुरुत्यागी कुंडाशी वृषलात्मजः ॥ परपूर्व्वापतिः स्तेनः कर्म दुष्टश्चनिंदितः ॥ इति ॥ (अस्यार्थः) रोगी उन्मादादिरोगवान् ॥ हीनं न्यूनमतिरिक्तमधिकमंगं यस्यासौ हीनातिरिक्ताङ्गः॥एकेनाऽ क्ष्णायोनपश्यतिअसौकाणः ॥ द्विरूढा पुनर्भूस्तस्यां जातः पौनर्भवः ॥ अवकीर्णी क्षतव्रतः ॥ कुनखी दुष्टनखः ॥ श्यावदंतकः ॥ स्वाभाविककृष्णदंतः ॥ वेतनंगृहीत्वायोऽध्यापयतिसभृतकाध्यापकः क्लीबःनपुंसकः ॥ असतासतावादोषेणकन्यांदूषयिताकन्यादूषी ॥ महापातकादियुक्तोऽभिशस्तः॥मित्रध्रुक् मित्रद्रोही ॥ परदोषसंकीर्तनशीलःपिशुनः ॥ सोमविक्रयी यज्ञेसोमस्यविक्रेता ॥ परिविंदकःपरि

वेत्ता ॥ कुंडस्याऽन्नंयोऽश्नात्यसौकुंडाशी ॥ वृषलोनिर्धर्मस्तत्सुतोवृषलात्मजः ॥ परपूर्वापतिःपुनर्भूपतिः ॥ अदत्तादायीस्तेनः ॥ कर्मदुष्टाः शास्त्रविरुद्धकारिणः॥एतेश्राद्धेनिंदिताःवर्ज्या इत्यर्थः॥(कात्यायनसूत्रे)द्विर्नग्न-शुक्ल-विक्लि-धिःश्यावे-दन्त विद्ध-प्रजनन व्याधित-व्यङ्गि-श्वित्रि-कुष्ठि-कुनखि-वर्ज्यमिति।(मनुः)नश्राद्धेभोजयेन्मित्रंधनैःकार्योस्यसंग्रहः।नाऽरिंनमित्रंयंविद्यात्तंश्राद्धेभोजयेद्द्विजम्॥यस्यमित्रप्रधानानि श्राद्धानिचहवींषिच ॥ तस्यप्रेत्यफलंनास्तिश्राद्धेषुचहविःषुच ॥ (व्यासः) संध्याहीनेव्रतभ्रष्टेविप्रेवेदविवार्जिते॥दीयमानंरुदत्यन्नंकिंमयादुष्कृतंकृतम् ॥ (मनुः) नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित् ॥ पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः ॥ (जातूकर्ण्यः) तस्मात्परीक्ष्ययुंजीतश्राद्धेवेदार्थवित्तमान् ॥ आनंत्यंस्वल्पमप्येति प्रदत्तंसुपरीक्षितेइति ॥ तीर्थश्राद्धेब्राह्मणपरीक्षानकर्तव्या ॥ (तथाच पद्मपुराणे) तीर्थेषुब्राह्मणान्नैवपरीक्षेतकथंचन ॥ अन्नार्थिनमनुप्राप्तंभोजयेन्मनुशासनात्॥(अथपितरःमनुस्मृतौ) वसवःपितरोज्ञेयारुद्राज्ञेयाःपितामहाः॥ प्रपितामहास्तथादित्याःश्रुतिरेषासनातनी॥तत्रैव—सोमपानामविप्राणांक्षत्रियाणांहविर्भुजः॥वैश्यानामाज्यपानामशूद्राणांतुसुकालिनः॥ (अथविश्वेदेवाःहेमाद्रिश्राद्धतत्त्वयोःशंखबृहस्पती) इष्टिश्राद्धेक्रतुदक्षौसत्योनांदीमुखेवसुः॥नैमित्तिकेकामकालौकाम्येचधूरिलोचनौ ॥ पुरूरवार्द्रवौचैवपार्व्वणेसमुदाहृतौ॥तत्रैव—उत्पत्तिनामवैतेषांनविदुर्येद्विजातयः॥अयमुच्चारणीयस्तैःश्लोकःश्रद्धासमन्वितैः॥ आगच्छंतुमहाभागाविश्वेदेवामहाबलाः।येयत्रविहिताःश्राद्धेसावधानाभवंतुतेइति॥(आदित्यपु०)विश्वेदेवौक्रतुर्दक्षःसर्वास्विष्टिषुकीर्तितौ।नित्यंनांदी

टी० १ दुश्चर्मा । २ अतिगौरः । ३ विचर्चिकायुक्तः । ४ जन्मनैवकृष्णदंतः । ५ छिन्नमेढ्यमी । ६ महारोगी । ७ हीनांगः । ८ श्वेतकुष्ठी । ९ गलितांगः । १० स्वभावात्कुत्सितनखी ।

मुखश्राद्धेवसुसत्यौचपैतृके।नवान्नालभनेदेवौकामकालौसदैवहि।अपिकन्यागतेसूर्येश्राद्धेचधुरिलोचनौ।पुरूरवार्द्रवौचैवविश्वेदेवौचपार्वणे
इति।कन्यागतेसूर्यइतिकेवलकाम्यबुद्ध्याक्रियमाणे।उभयबुद्ध्याकृतेतुपुरूरवार्द्रवावेव।तत्रविश्वेषांदेवानामुत्पत्तिर्ब्रह्मांडगरुडहेमाद्रिषुदक्ष
स्यदुहितासाक्षाद्विश्वानामेतिविश्रुता।विधिनासातुधर्म्मज्ञदत्ताधर्मायधीमते।तस्यापुत्रामहात्मानोविश्वेदेवाइतिश्रुतिः।विख्यातास्त्रिषुलोके
षुसर्वलोकनमस्कृताइतिअथश्राद्धोपकरणानि॥(तत्रतावत्कुशाःहारीतस्मृतौ) अथश्वोभूतेदक्षिणांदिशंगत्वादक्षिणप्रणतान्समूलान्दर्भा
नाहरेत्। (यमस्मृतौ)समूलस्तुभवेद्दर्भः पितॄणांश्राद्धकर्मणि।मूलेनलोकाञ्जयतिशक्रस्यतुमहात्मनः॥(गोभिलः)कुशमूलेस्थितोब्रह्माकुश
मध्येतुकेशवः ॥ कुशाग्रेशंकरंविद्यात्सर्वेदेवाःसमंततः ॥ (दर्भलक्षणमहाकौशिकः)सप्तपत्राःशुभादर्भास्तिलक्षेत्रसमुद्भवाः ॥ ते प्रशस्ता
द्विजातीनां दैवेपित्र्येचकर्मणि ॥ अप्रसूताःस्मृतादर्भाःप्रसूताश्चकुशाःस्मृताः ॥ समूलाःकुतपाःप्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिताः॥अप्रसूता
अपुष्पिताइत्यर्थः॥(हारीतः) दर्भाग्रंदैवमित्युक्तं समूलाग्रंतुपैतृकम्॥तत्रमूलंविनायेतुतेकुशाःकुतपाःस्मृताः ॥ अच्छिन्नाग्रान्सपत्रांश्चसमू
लान्कोमलाञ्शुभान् ॥ पितृदेवजपार्थंचसमादद्यात्कुशान्द्विजः । (हेमाद्रौयमः) समूलस्तुभवेद्दर्भः पितॄणांश्राद्धकर्मणि॥बहिर्लूनाः
सकृल्लूनाः सर्वत्रपितृकर्मणि ॥ बहिर्लूनाः उपमूललूनाइत्यर्थः ॥ (व्यासः) तर्पणादीनिकार्याणिपितॄणांयानिकानिच॥तानिस्युर्द्विगुणै
र्दर्भैःसप्तपत्रैर्विशेषतः ॥ (हेमाद्रौविष्णुपुराणेच) सपिंडीकरणंयावदृजुदर्भैःपितृक्रिया॥सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत्॥ (श्राद्ध
तत्त्वे कात्यायनः) सपवित्रः सदर्भोवाकर्मांगेपितृकर्मणि ॥ अशून्यंतुकरंकृत्वासर्वत्राचमनंचरेत् ॥ नोच्छिष्टंतत्पवित्रंतुभु
क्तोच्छिष्टंतुवर्जयेत्॥पवित्रं ग्रंथिमत्पवित्रमित्यर्थः॥ (अत्रिरपि) उभाभ्यामेवपाणिभ्यांविप्रैर्दर्भपवित्रके॥ धारणीयेप्रयत्नेनब्रह्मग्रंथिसम

न्विते ॥ ब्रह्मयज्ञेजपेचैवब्रह्मग्रंथिर्विधीयते ॥ भोजनेवर्तुलःप्रोक्तःएवंधर्मोनहीयते ॥ (एतत्प्रकारस्तुहेमाद्रौ) द्विगुणीकृतानांदर्भशिखा
नांपाशःप्रदक्षिणमर्द्धवेष्टनंविधायपश्चाद्भागेनयदाप्रवेश्यतेतदावर्तुलग्रंथिः ॥ यदासएवप्रादक्षिण्येनसमग्रवेष्टनंविधायपुरोभागेनप्रवेश्यते
तदाब्रह्मग्रंथिः ॥ (तथाचबृहद्गारुडे) अर्द्धंप्रदक्षिणीकृत्यशिखांपाशंप्रवेशयेत् ॥ वैष्णवेनैवमार्गेणवृत्तग्रंथौपवित्रके ॥वैष्णवोमार्गःपश्चा
द्भागइत्यर्थः॥(ब्रह्मग्रंथिमत्पवित्रलक्षणमपितत्रैव) संत्यज्यवैष्णवंमार्गंब्रह्ममार्गेविनिःसृतम्॥सकृत्प्रदक्षिणीकृत्यपवित्रमभिधीयते॥तद्ब्रह्म
ग्रंथिमत्प्रोक्तंपवित्रंवेदवादिभिः ॥ पवित्रकर्तुरभिमुखः प्रदेशः ब्रह्ममार्गइत्यर्थः ॥ (पवित्रलक्षणमाहकात्यायनः)अनंतर्गर्भिणंसाग्रंकौशं
द्विदलमेवच ॥ प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् ॥ एतदेवहिपिञ्जूल्याक्षणंसमुदाहृतम् ॥ आज्यस्योत्पवनार्थंयत्तदप्येतावदेवतु ॥
(पवित्रकरणप्रकारमाहयोगियाज्ञवल्क्यः) ॥ पवित्रेस्थेतिमंत्रेणद्वेपवित्रेचकारयेत्॥नांतर्गर्भेकुशच्छिन्नेकौशेप्रादेशसम्मितेइति ॥नांतर्गर्भे
शिखारहितेकुशाच्छिन्नेकुशेनावेष्टचच्छिन्नेकौशेकुशमयेपवित्रेस्थोवैष्णव्यौइतिच्छेदनमंत्र इत्यर्थः ॥ पवित्रदर्भशिखासंख्या (मार्कंडेयपु
राणे) चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकम् ॥ एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमम्॥सर्वेषांवाभवेद्द्वाभ्यांपवित्रंग्रंथितंनवा ॥ (अथवर्ज्या
न्कुशानाहहेमाद्रिश्राद्धतत्त्वयोः हारीतः) चितौदर्भाःपथिदर्भायेदर्भायज्ञभूमिषु ॥ स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत् ॥ ब्रह्मयज्ञे
चयेदर्भायेदर्भाःपितृतर्पणे ॥ धृतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयते ॥ (त्यागापवादमपितत्रैव) नीवीमध्येतुयेदर्भाब्रह्मसूत्रेचयेकृताः॥
पवित्रांस्तान्विजानीयाद्यथाकायस्तथैवते ॥ समित्पुष्पकुशादीनिश्रोत्रियःस्वयमाहरेत् ॥ शूद्राहृतैःकुशैर्विप्रःकर्मकुर्वन्व्रजत्यधः॥ (कुशा
लाभेप्रतिनिधिमाहशंखः)कुशाभावेद्विजश्रेष्ठःकाशैःकुर्वीतयत्नतः॥तर्पणादीनिकर्माणिकाशाःकुशसमाःस्मृताः॥(स्मृत्यन्तरे) कुशकाश

शरोदूर्वायवगोधूमबल्वजाः॥सुवर्णंराजतंताम्रंदशदर्भाःप्रकीर्तिता इतिकुशनिरूपणम्॥अथतिलाः॥(गारुडेविष्णुवाक्यम्) ममदेहसमुद्भू
तास्तिलास्तार्क्ष्यपवित्रकाः॥ असुरादानवादैत्याविद्रवंतितिलैस्तथा॥तिलाःश्वेतास्तिलाःकृष्णास्तिलागोमूत्रसन्निभाः॥(मात्स्ये) विष्णो
र्देहसमुद्भूताःकुशाःकृष्णतिलास्तथा ॥ श्राद्धस्यरक्षणार्थायइतिप्राहुर्महर्षयः ॥ (आपस्तंबः) अटव्यांयेसमुत्पन्नाअकृष्टफलितास्तथा ॥
तेवैश्राद्धेपवित्रास्तुतिलास्तेनतिलास्तिलाइति ॥ येअटव्यांसमुत्पन्नाअकृष्टायांचभूमौफलितास्तेश्राद्धकर्मणिप्रशस्ततमास्तिलाः ॥ येतुग्र
म्याःकृष्टक्षेत्रेफलिताःप्रसिद्धास्तिलास्ते नतिलाइतिहेमाद्रिः ॥ (ब्रह्माण्डे) यतिस्त्रिदंडीकरणंराजतंपात्रमेवच ॥ दौहित्रःकुतपः
कालश्छागःकृष्णाजिनंतथा ॥ गौराःकृष्णास्तथारण्यास्तथैवविविधास्तिलाः ॥ पितॄणांतृप्तयेसृष्टादशैतेब्रह्मणास्वयम् ॥ (अथरजतं
मात्स्ये) शिवनेत्रोद्भवंयस्मात्तस्मात्तत्पितृवल्लभम् ॥ अमंगलंचयज्ञेषुदेवकार्येविवर्जितम् ॥ रजतंदक्षिणामाहुः पितृकार्येषुसर्वदा ॥
(प्रभासखंडे) रूप्यंपितॄणामतिवल्लभंतद्दत्त्वानरोवल्लभतामुपैति ॥ सोमस्यलोकेलभतेसतावद्ध्रुवेनिबद्धाऋषयोहियावत् ॥ (अथग्रा
ह्याणिधान्यानिमनुस्मृतौ) तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेनच ॥ दत्तेनमासंप्रीयंते विधिवत्पितरोनृणाम् ॥ (प्रचेताअपि) कृष्णमाषा
स्तिलाश्चैवश्रेष्ठाःस्युर्नवशालयः ॥ महायवा व्रीहियवास्तथैवचमधूलिकाः॥कृष्णाःश्वेताश्चलोहाश्चग्राह्याःस्युःश्राद्धकर्मणि॥यवाःशितशू
काः॥शालयःकलमाद्याः॥महायवाव्रीहियवाश्चयवविशेषाः॥मधूलिकाःयावनालधान्यविशेषाः॥कृष्णाःस्थलजाःकृष्णवर्णव्रीहयः ॥लो
हारक्तशालयइत्यर्थः॥(ब्रह्मपुराणे) यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा॥संतर्पयेत्पितॄन्मुद्गैःश्यामाकैःसर्षपद्रवैरिति॥(अत्रिदेवलौ) अगोधू
मंचयच्छ्राद्धंमाषमुद्गविवर्जितम्॥तैलपक्वेनरहितंकृतमप्यकृतंभवेत्॥तैलपक्वेनतिलतैलपक्वेनइत्यर्थः ॥ (अथवर्ज्यानिधान्यानिमरीचिः)

कुलत्थाश्चणकाःश्राद्धेनदेयाश्चैवकोद्रवाः।कटुकानिचसर्वाणिविरसानितथैवचेति॥चणकेषुविकल्पोदेशाचारात्।कटुकानिपिप्पल्यादीनि।
(विष्णुः)राजमाषमसूरपर्युषितकृतलवणानिचवर्जयेत् ॥ पर्युषितं मोदकादिवर्ज्यंकृतलवणंक्षारमृत्तिकयाकृतंलवणमित्यर्थः॥(अथग्राह्य
फलानिब्रह्मपुराणे)आम्रमाम्रातकंबिल्वंदाडिमंबीजपूरकम्।चीणाकंलकुचंजंबूभव्यंभूतंतथारुकम्।प्राचीनामलकंक्षीरंनालिकेरंपरूषकम्॥
नारंगंचसखर्जूरं द्राक्षानीलकपित्थकम्॥पटोलंचप्रियालंच कर्कन्धूबदराणिच॥एतानिफलजातीनिश्राद्धेदेयानियत्नतः॥तथा॥कालशा
कंतंडुलीयंवास्तुकंमूलकंतथा ॥ शाकमारण्यकंचैवदद्यात्पुण्यान्यमूनिच॥(शाकादिसंस्कारद्रव्याण्यादित्यपुराणे)मधुकंरामठंचैवकर्पूरं
मरिचंगुडम् ॥ श्राद्धकर्मणिशस्तानिसैंधवंत्रपुसंतथा ॥ (अथवर्ज्याः मार्कंडेयपुराणे) लशुनंगृंजनंचैवपलांडुपिंडमूलकम् ॥ गंधारि
कामलाबूनिलवणान्यौषराणिच॥वर्जयेत्तानिवैश्राद्धेयच्चवाचानशस्यते॥गृंजनं गाजरइतिप्रसिद्धम्॥ पलांडु कांदाइति प्रसिद्धम्॥(कौर्मे)
पिप्पलींरुचकंचैवतथैवचमसूरकम् ॥ कुष्मांडालाबुवार्त्ताकभूस्तृणंसुरसंतथा॥राजमाषांस्तथाक्षीरंमाहिषाख्यंविवर्जयेत् ॥ रुचकं सौवर्च
लम् ॥ (अथग्राह्याणिवर्ज्यानिचक्षीरादीनिकौर्मे) क्षीरंक्षीरविकारश्चपायसंशर्करामधु॥देयंश्राद्धेषुयत्नेनसर्वदापितृतृप्तये॥(पाद्ममात्स्य
योः) अन्नंचसदधिक्षीरंगोघृतंशर्करान्वितम्॥मासंप्रीणातिवैसर्वान् पितॄनित्यब्रवीदजः॥(मनुकात्यायनौ) संवत्सरंतुगव्येनपयसापायसे
नचः ॥ पितरस्तृप्यन्तीतिशेषः॥(यमः)अनिर्दशायागोःक्षीरमाजंमाहिषमेवच॥आविकंसंधिनीक्षीरमौष्ट्रमैकशफंचयत्॥वर्जयेद्धोरवत्सा
याःपयश्चैवान्यवत्सायाः ॥ आरण्यानांतुसर्वेषांवर्जयित्वातुमाहिषम् ॥ आविकादीनिवर्ज्यानिसदास्वायंभुवोऽब्रवीत्॥(शंखः) सर्वासां
द्विस्तनीनांक्षीरमभोज्यं अजावर्जमिति ॥ (सुमंतुः) पयोदधिघृतंचैवगवांश्राद्धेषुपावनम् ॥ महिषीणांघृतंप्राहुःश्रेष्ठंनतुपयःक्वचित् ॥

(ब्रह्माण्डेमाधवीयेच) द्विःस्विन्नंपरिदग्धंचतथैवाग्रावलेहितम् ॥ शर्कराकीटपाषाणैः केशैर्यच्चाप्युपद्रुतम् ॥ पिण्याकंमथितंचैवतथा तिलवणंचयत् ॥ दधिशाकंतथाभक्ष्यमुष्णंचोष्णविवार्जितम्॥वर्ज्जयेच्चतथाचान्यान्सर्वांनभिमतानपि॥ सिद्धाः कृताश्चयेभक्ष्याःप्रत्यक्षल वणीकृताः॥ वाग्दुष्टाभावदुष्टाश्चदुष्टैश्चोपहतास्तथा॥ वाससाचोपधूतानिवर्ज्यानिश्राद्धकर्मणि इति॥अस्यार्थः-द्विः स्विन्नंवारद्वयंपक्वम्॥ परिदग्धं द्रवांशसंशोषणात् भांडाग्निनापरिप्लुष्टम्।अग्रावलेहितम् अग्रे उपरिभागे मार्जारादिभिर्लीढं पूर्वमन्येनास्वादितंवा॥शर्कराश्चे ताश्मजातिविशेषः॥ कीटाः पिपीलिकादयः॥पाषाणः दृषत्॥केशः लोम एतैर्दूषितम् ॥पिण्याकं निःस्नेहतिलचूर्णं खलीइतिख्यातम् ॥ मथितं आलोडितं दधि ॥ अतिलवणं अतिमात्रलवणम् ॥ सिद्धाभक्ष्याः आमलकादयः प्रत्यक्षलवणेन मिश्रिताः ॥वाग्दुष्टाः निंदा दिरूपया वाचा दूषिताः।दुष्टैश्चोपहताःश्वसूकरकाककुक्कुटादिभिर्नग्नपतितपाषण्ड्यादिभिश्चदर्शनस्पर्शनादिगोचरीकृताश्च॥वाससाचपि धूतानि येषामुपरिमक्षिकाद्यपगमार्थंवस्त्रमवधूयतेतान्यन्नानीत्यर्थः॥(अथवर्ज्यान्युदकानिब्रह्माण्डे) दुर्गंधिफेनिलंक्षारंपंकिलं पल्वलोदक म्।नभवेद्यत्रगोस्तृप्तिर्नक्तंचैवाप्युपाहृतम्।यन्नसर्वार्थंचोत्सृष्टंयच्चाभोज्यानपनिजम्।तद्वर्ज्यंसलिलंतातसदैवश्राद्धकर्मणीति। अस्यार्थःक्षारं कटुकम्।पल्वलोदकंक्षुद्रजलाशयोदकम्।नक्तंरात्रावुपाहृतम्।यत्कूपादिकंतत्कर्तृभिःसर्वप्राण्युपजीवनार्थंनोत्सृष्टंनपरित्यक्तंतत्सलिलंपितृ कर्मणिवर्ज्यम्॥कूपसमुद्धृतपश्वादिपेयोदकधारणार्थोजलाशयःनिपानंतज्जंतत्रस्थितमपिवर्जनीयमित्यर्थः॥(कात्यायनः) आपोनिशिनगृ ह्णीयान्नपिबेच्चकदाचन ॥(हारीतः)रात्रावेतावरुणंप्रविशंतितस्मान्नरात्रौगृह्णीयात॥(आदित्यपुराणे)चिरंपर्युषितंवापिशूद्रस्पृष्टमथापिवा॥ वर्जयेदितिशेषः॥पर्युषितंजाह्नवीभिन्नंरात्र्यंतरितम्।शूद्रस्पृष्टंशौचाचाररहितशूद्रस्पृष्टमित्यर्थः।अथब्राह्मणनिमंत्रणम्॥ तत्रतावत्कालोवि

ष्णुस्मृतौ)अथश्राद्धेप्सुःपूर्वेद्युर्ब्राह्मणानुपनिमंत्रयेदिति॥श्राद्धेप्सुःश्राद्धकर्त्तुमिच्छुः श्राद्धकर्त्ता तत्प्रेषितोवा सवर्णः।पूर्वेद्युःपूर्वस्मिन्दिवसे श्राद्धयोग्यान्ब्राह्मणानुपनिमंत्रयेत् निमंत्रणेनसंयोजयेदित्यर्थः॥हेमाद्रिश्राद्धतत्त्वयोर्देवलोपिश्वःकर्त्तास्मीतिनिश्चित्यदाताविप्रान्निमंत्रयेत्॥निरामिषंसकृद्भुक्त्वासर्व्वंभुक्तजनेगृहे॥असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रयेत्॥अज्ञातीनसमानार्षानयुग्मानात्मशक्तितइति॥अज्ञातीन्यजमानभिन्नगोत्रान्॥असमानार्षान् भिन्नप्रवरान् अयुग्मान् विषमसंख्याकानित्यर्थः॥(मनुस्मृतौ) पूर्वेद्युरपरेद्युर्वाश्राद्धकर्मण्युपस्थिते॥ निमंत्रयीतत्र्यवरान् सम्यग्विप्रान्यथोदितान् ॥ पूर्वेद्युःयदहःश्राद्धंकर्त्तव्यं ततःपूर्वस्मिन्नहनि॥अपरेद्युः अशक्तस्तुश्राद्धदिनएवइत्यर्थः॥ (याज्ञवल्क्योपि)निमंत्रयेतपूर्वेद्युर्ब्राह्मणात्मवाञ्छुचिः॥तैश्चापिसंयतैर्भाव्यंमनोवाक्कायकर्मभिरिति॥आत्मवान्नियतेन्द्रियः॥ शुचिःप्रयतश्च।तैरपिनिमंत्रितैर्ब्राह्मणैर्मनोवाक्कायव्यापारैःसंयतैर्नियतैर्भवितव्यमित्यर्थः॥(वाराहश्राद्धतत्त्वयोरपि)वस्त्रशौचादिकर्त्तव्यंश्वःकर्त्तास्मीतिजानता ॥ स्थानोपलेपनंकृत्वाततोविप्रान्निमंत्रयेत् ॥ दंतकाष्ठंचविसृजेद्ब्रह्मचारीशुचिर्भवेत्॥ (नागरखंडेऽपि) पूर्वेद्युः सायमासाद्यश्राद्धार्हाणांद्विजन्मनाम्॥गृहंगत्वाशुचिर्भूत्वासंयतस्तान्निमंत्रयेत्॥यतीन्गृहस्थान्साधूंश्चश्रोत्रियान्ब्रह्मचारिण इति॥रात्रावपिप्रदोषात्परतो निमंत्रणंकर्त्तव्यमितिहेमाद्रिः॥तत्रकर्त्तास्वयमेवनिमंत्रणंकुर्यात्॥दाताविप्रान्निमंत्रयेदितिदेवलवचनात्।असंभवेत्वन्येननिमंत्रणंकारयितव्यं तच्चसाधुनापुरुषेण ॥ (तथाचकौर्मे) गोमयेनोदकैर्भूमिंशोधयित्वाप्रयत्नतः ॥ समामंत्र्यद्विजान्सर्वान्साधुभिःसन्निमंत्रयेत् ॥ सवर्णैरेवनिमंत्रणंकारयितव्यम् ॥ (अतएवप्रचेताः स्मृतौ) सवर्णंप्रेषयेदाताद्विजानामुपमंत्रणे ॥ सवर्णशब्दोऽत्रसजातीयोपलक्षणार्थः ॥ (असवर्णप्रेषणेदोषमाहहेमाद्रौनारायणः) अभोज्यंब्राह्मणस्यान्नंक्षत्रियाद्यैर्निमंत्रितम् ॥ तथैवक्षत्रियादीनांवृषलेननिमंत्रितम् ॥

वृषलेन शूद्रेण ॥ (शातातपः) अभोज्यंब्राह्मणस्यान्नंवृषलेननिमंत्रितम् ॥ तथैववृषलस्यान्नंब्राह्मणेननिमंत्रितमिति ॥ (अथनिमंत्रणी यब्राह्मणसंख्या तत्रतावदाह कात्यायनः) दैवेयुग्मानयुग्मान्यथाशक्तिपित्र्यएवइति ॥ अयुग्मान् विषमसंख्याकानित्यर्थः ॥ (याज्ञव ल्क्योपि) दैवेयुग्मान्यथाशक्तिपित्र्येऽयुग्मांस्तथैवचेति ॥ युग्मानसमसंख्याकान् ॥ (मनुवसिष्ठौ) । द्वौदैवेपितृकृत्येत्रीनेकैकमुभयत्रवा॥ भोजयेत्सुसमृद्धोपिनप्रसज्येतविस्तरे ॥ सत्क्रियां देशकालौचशौचंब्राह्मणसंपदम् ॥ पंचैतान्विस्तरोहंतितस्मान्नेहेतविस्तरम् ॥ (बृहस्प तिरपि) एकैकमथवाद्वौत्रीन्दैवेपित्र्येचभोजयेत् ॥ सत्क्रियाकालपात्रादिनसंपद्येतविस्तरात् इति ॥ अतएवयाज्ञवल्क्येनापिसंको चएवपक्षोविहितः ॥ द्वौदैवेप्राक्त्रयः पित्र्येउदगेकैकमेववा ॥ मातामहानामप्येवंतंत्रंवावैश्वदेविकं इति ॥ दैवेवैश्वदेवेद्वौब्राह्मणौ प्राक् प्राङ्मुखौपित्र्येपित्रादिस्थानेत्रयः उदक्उदङ्मुखाउपवेश्याइत्यर्थः॥एकैकमेववेतिब्राह्मणाद्यसंभवेवेदितव्यम्मातामहानामप्येवमितिपूर्वो क्तपितृश्राद्धवत्कर्त्तव्यम् उभयत्रवैश्वदेवतंत्रेणवाकर्त्तव्यम्॥तंत्रशब्दःसमुदायवाचकइत्यर्थः॥यदातुद्वावेवब्राह्मणौलब्धौतदातुवैश्वदेवेपात्रंप्र कल्प्यउभयत्रैकैकंब्राह्मणंनियुंज्यात्॥(यदाहवासिष्ठः)यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत्॥अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच॥देवता यतनेकृत्वाततः श्राद्धंप्रवर्तयेत॥प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणइति॥अत्राशक्तावेकंब्राह्मणमपि॥(यत्तुशंखेनोक्तम्)भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनमितितदप्यलाभविषयम् ॥ (हेमाद्रौदेवलोपि) एकेनापिहि विप्रेणषट्पिंडंश्राद्धमाचरेत् ॥ षडर्घ्यान्नदापयेत्तस्मै षड् भ्योदद्यात्तथासनमिति ॥ (एकब्राह्मणपक्षे वैश्वदेविकनिर्णयोब्रह्मांडे) एकएवयदाविप्रो द्वितीयोनोपपद्यते ॥ पितॄणांब्राह्मणोयोज्योदेवे त्वग्निंनियोजयेत् ॥ (विस्तारनिंदा हेमाद्रिब्रह्मपुराणयोः) देशकालघनालाभादेकैकमुभयत्रवा ॥ शेषान्वित्तानुसारेण भोजयेदन्यवे

श्मनि॥यस्माद्ब्राह्मणबाहुल्याद्दोषोबहुतरोभवेत्॥श्राद्धनाशोमौननाशःश्राद्धतंत्रस्यविस्मृतिः॥उच्छिष्टोच्छिष्टसंस्पर्शोनिंदादातुर्नभोक्तृषु॥
वितंडयापरीवादोजल्पाश्चैवपृथग्विधा इति ॥ ब्राणबाह्मबहुल्ये यस्मादेतेदोषाः संभवंति तस्मादेतद्दोषपरिहारासमर्थैनोभयत्रैकैक एवभोज
नीय इत्यर्थः ॥ (मनुस्मृतावपि) एकैकमपिविद्वांसंदैवेपित्र्येचभोजयेत्॥पुष्कलंफलमाप्नोतिनामंत्रज्ञान्बहूनपीति ॥ (सर्वथाविप्रालाभे
अनुकल्पांतरमुक्तंहेमाद्रौदेवलेन) निधायदर्भनिचयमासनेषुसमाहितः ॥ प्रैषानुप्रैषसंयुक्तंसर्वंश्राद्धंप्रकल्पयेत् ॥ (अथनिमंत्रणप्रकारः
भविष्योत्तरे) उपवीती ततोभूत्वादेवतार्थंद्विजोत्तमान्॥अपसव्येनपित्र्येथस्वयंशिष्योथवासुतः ॥(प्रचेताः)दक्षिणंचरणंविप्रः सव्यंवैक्षत्रि
यस्तथा ॥ पादावादायवैश्योद्वौशूद्रःप्रणतिपूर्वकम् ॥ निमंत्रयीतपूर्वेद्युः श्राद्धकर्त्ताद्विजोत्तमान् ॥ (मत्स्यपुराणे) दक्षिणंजानुमा
लभ्यत्वंमयात्रनिमंत्रितः॥एवंनिमंत्र्यनियमाञ्छ्रावयेत्पितृबांधवः ॥ अक्रोधनैःशौचपरैः सततंब्रह्मचारिभिः॥भवितव्यंभवद्भिश्चमयात्र
श्राद्धकारिणा ॥ (अत्रिरपि) सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यंभवद्भिर्वै श्वोभूतेश्राद्धकर्मणीति । पूर्वेद्युःप्रथमेह्नी
त्यर्थः ॥ एवंनिमंत्रणकर्त्रावाक्येऽभिहितेनिमंत्रणीयब्राह्मणाभिधेयमाहसएव ॥ ततस्तथेत्यविघ्नेनगतेयंरजनीयदि ॥ यथाश्रुतंप्रतीक्षेर
ञ्छ्राद्धकालमतंद्रिता इति।तेननिमंत्रिताविप्रास्तंनिमंत्रणकर्त्तारं तथास्तु यद्यविघ्नेनेयंरजनीगतेत्युक्त्वा धर्मशास्त्रादौ यथानियमजातंश्रुतं
तथैवतन्नियमजातं प्रतीक्षेरन् प्रतिपालयेयुःश्राद्धकालेस्वादितान्नपरिणामपर्य्यंतमित्यर्थः॥अथनियमाः ॥ (तत्रनिमंत्रितनियमांस्तावदाह
कात्यायनः) अनिंदितेनामंत्रितोनापक्रामेदामंत्रितोवान्यदन्नंनप्रतिगृह्णीयात् इति॥अनिंदितेनभोज्यान्नेननिमंत्रितोनिमंत्र्यमाणः नापक्रा
मेत्त निमंत्रणंनेच्छेत् किंतु तदभ्युपगच्छेदेव इत्यर्थः ॥ (माधवीये यमः) आमंत्रितास्ता ये विप्राः श्राद्धकाल उपस्थिते ॥ वसेयुर्नि

यताहारा ब्रह्मचर्यपरायणाः ॥ अहिंसासत्यमक्रोधोदूरचागमनक्रिया ॥ आभारोद्वहनंचेति श्राद्धस्योपसनावधीति ॥ यस्त्वा मंत्रणमंगीकृत्य भोजनसमर्थोऽपितत्परित्यजतितस्यदोषोऽस्ति ॥ (तथाचमनुः) केतितस्तुयथान्यायं हव्येकव्ये द्विजोत्तमः ॥ कथंचिदप्यतिक्रामन्पापः सूकरतांव्रजेत् ॥ केतितः उपनिमंत्रित इत्यर्थः ॥ (यमः) आमंत्रितस्तुयोविप्रोभोक्तुमन्यत्रगच्छति ॥ नरकाणां शतंगत्वाचांडालेष्वभिजायते ॥ (देवलोपि) पूर्वंनिमंत्रितोऽन्येनकुर्यादन्यप्रतिग्रहम् ॥ भुक्ताहारोऽथवाभुंक्तेसुकृतंतस्य नश्यति ॥ निमंत्रितब्राह्मणपरित्यागेप्रत्यवायोऽस्ति॥(तथाचनारायणः) निकेतनंकारयित्वानिवारयतिदुर्मतिः ॥ ब्रह्महत्यामवाप्नोतिशू द्रयोनौचजायते ॥ इति ॥ यश्चामंत्रितः कृताह्वानोप्यनागमनेनकुतपादिश्राद्धकालातिक्रमंकरोतितस्यदोषः आदित्यपुराणेदर्शि तः ॥ “आमंत्रितश्चिरंनैवकुर्याद्विप्रः कदाचन ॥ चिरकारीभवेद्रोगीपच्यतेनरकाग्निना” इति ॥ दातृभोक्त्रोर्ब्रह्मचर्यनियमातिक्रमेदोषोवृ द्धमनुनोक्तः॥“ऋतुकालंनियुक्तोपि नैवगच्छेत्स्त्रियंक्वचित् ॥ तत्र गच्छन्समाप्नोति ह्यनिष्टफलमेवतु”॥(तत्रैव)आमंत्रितस्तुयः श्राद्धे वृष ल्यासहमोदते ॥दातुर्यद्दुष्कृतंकिंचित्तत्सर्वं प्रतिपद्यते ॥ (यमः) पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् ॥ संध्यां प्रतिग्रहं होमं श्राद्धभुग्व र्जयेत्सदा ॥ होमंस्वयंनकुर्यात्‌ अन्येनतुकारयेत् ॥ (होतुरन्यस्याऽलाभे आहउशनाः)दशकृत्वः पिबेदापो गायत्र्याश्राद्धभुग्द्विजः ॥ततः संध्यामुपासीत जपेच्चजुहुयादपि ॥ (श्राद्धतत्त्वेवायुपुराणे) अध्वनीनोभवेदश्वःपुनर्भोजीचवायसः ॥ होमकृन्नेत्ररोगी स्यात्पाठादायुःप्रही यते ॥ दानंनिष्फलतामेति प्रतिग्राहीदरिद्रताम्॥कर्म्मकृज्जायते दासो मैथुनी सूकरो भवेत् इति ॥ कर्मात्रभारोद्वहनादिकमित्यर्थः॥ (अथ श्राद्धकर्तुर्नियमानाह कात्यायनः) तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायांश्चवर्जयेदिति ॥ तद

इः श्राद्धदिने ॥ शुचिःस्नानादिभिः शुद्धदेहः॥अक्रोधनः क्रोधवर्जितः ॥ अत्वरितःद्रुतकारित्वहीनः ॥ अप्रमत्तःप्रमादशून्यः ॥सत्यवादी सत्यवदनशीलः ॥ अध्वानंदूराध्वयमनम् ॥ मैथुनं स्त्रीसंभोगः॥ श्रमः भारोद्वहनादिजनितः क्लेशः॥ स्वाध्यायशब्देन सांगस्यवेदस्याध्ययनमध्यापनं च विवक्षितमित्यर्थः ॥ (वृद्धमनुरपि) निमंत्र्य विप्रांस्तदह्नोवर्जयेन्मैथुनंक्षुरम् ॥ प्रमत्ततांच स्वाध्यायं क्रोधाऽशौचं तथानृतम्॥क्षुरं क्षुरकर्म ॥ (हेमाद्रौजाबालिः) तांबूलं दंतकाष्ठंच स्नेहस्नानमभोजनम्॥रत्यौषधपरान्नानि श्राद्धकर्त्तातुवर्जयेत्॥(आपस्तंबः) अमैथुनादयःसर्वेंनियमाःश्राद्धकारिणा ॥ अप्रमत्तेनकर्त्तव्याःप्रमादे निरयं व्रजेत् ॥ (वाराहे) नशक्नोति स्वयंकर्त्तुं यदाह्यनवकाशतः ॥ श्राद्धं शिष्येणपुत्रेण तदान्येनापि कारयेत् ॥ नियमानाचरेत्सोपिविहितांश्चवसुंधरे (मात्स्येपि) पुनर्भोजनमध्वानं भारमायासमैथुनम् ॥ श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् ॥ स्वयंचकलहं चैव दिवास्वापंतथैवच ॥ (वाराहपुराणे) ब्रह्मचर्यादिभिर्भूरिनियमैः श्राद्धमक्षयम् ॥ अन्यथाक्रियमाणंतु मोघमेव न संशयः ॥ अथश्राद्धदिनपूर्वाह्णकृत्यम् ॥ श्राद्धकर्त्ता ब्राह्मे मुहूर्त्ते उत्थाय यथोपदेशं शौचविधिं विधायाचामेत् दंतधावनं तु न कुर्यात् ॥ (अतएव भविष्योत्तरे) श्राद्धभुक्प्रातरुत्थाय प्रकुर्याद्दंतधावनम् ॥ श्राद्धकर्त्तानकुर्वीत दंतानां धावनं बुध इति ॥ अतःश्राद्धकर्त्तादंतधावनमकृत्वैवशौचाऽऽचमनविधिं निष्पादयेत् ॥ ततोनद्यादौ यथोक्तस्नानं कृत्वा स्नानाङ्गतर्प्पणं विधाय अहते धौते सिते वाससी परिधानाद्बहिःकक्षाबंधमकुर्वन् परिदधीत ॥ (तथाचहेमाद्रौ गौतमः) स्नानेदानेजपेहोमेदैवेपित्र्येचकर्मणि ॥ बध्नीयान्नासुरीं कक्षांशेषकालेयथारुचिः ॥अनंतरं सध्यांप्रातर्होमंचकृत्वा पाकभूमिमुपलेपनादिभिःसंस्कुर्यात् ॥ (यथाह उशनाः) गोमयोदकैर्भूमिभाजनशौचंकुर्यात् ॥ (ब्रह्मांडेपि) भूमिः श्राद्धे पंचगव्यैर्लिप्ता शोध्या तथोल्मुकैः ॥ गौरमृत्तिकयाच्छन्ना प्रकी

र्णतिलसर्षपा इति। अथैवंसंस्कृतायांसुविशोधितेषुनवेषुच भांडेषुपाकंकर्तुमुपक्रमेत। तथाचदेवलः। तथैव यंत्रितोदाताप्रातःस्नात्वासहांबरः।
आरभेतनवैःपात्रैरन्नारंभंचबांधवैरिति। स्नातयापरिहिताधावकधौतश्वेतवाससापत्न्यासहशक्तियुतःस्वयमेवसमस्तपाकारंभसमाप्तिंकुर्यात्
अशक्तश्चेत् स्वयमारंभमात्रंकृत्वा अन्वारंभं सुस्नातैर्बांधवैः स्वजनैःकारयेदित्यर्थः॥ पत्न्या स्वहस्तेनपाकः कर्त्तव्य इत्यत्रार्थेलिंगदर्शनं
हेमाद्रौचमत्कारखंडेच॥"ततश्चश्रपयामासतदर्थंजनकोद्भवा॥रामादेशात्स्वयंसाध्वीविनयेनसमन्विता॥"(व्यासोपि)गृहिणीचैवसुस्नाता
पाकं कुर्यात्प्रयत्नतः॥निष्पन्नेषुचपाकेषु पुनःस्नानंसमाचरेत् ॥ (पराशरः) गृहाग्निशिशुदेवानां ब्रह्मचारितपस्विनाम्॥तावन्नदीयते किं
चिद्यावत्पिंडान्ननिर्वपेत्॥पाककरणे वर्ज्याः स्त्रियः॥(ब्रह्मपुराणे रजस्वलांच पाखंडां पुंश्चलीं पतितां तथा॥त्यजेच्छूद्रां तथावंध्यांविधवां
चान्यगोत्रजाम्॥व्यंगकर्णींचतुर्थाहःस्नातामपिरजस्वलाम्॥वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम्।मातृपितृवंशजभिन्नांत्यजेदित्यर्थः।
गर्भिण्यपिपाकंनकुर्यात्॥(पाकपचनभाण्डानिहेमाद्रौ) सौवर्णान्यथरौप्याणिताम्रकांस्योद्भवानिच॥मार्तिकान्यपिभव्यानिनूतनानिदृढा
निच॥नकदाचित्पचेदन्नमयःस्थालीषुपैतृकम्।अयसोदर्शनादेवपितरोविद्रवंतिहि।कालायसंविशेषेणनिंदितंपितृकर्म्मणि।फलानांचैवशा
कानांच्छेदनार्थानियानितु।महानसेपिशस्त्राणांतेषामेवहिसन्निधिः।(आदित्यपुराणे)पचेदन्नानिसुस्नातःपात्रेशुशुचिषुस्वयम्।स्वर्णादिधातु
जातेषुमृन्मयेष्वपिवाबुधः॥अच्छिद्रेषुविलिप्तेषुतथानुपहतेषुच॥नायसेषुनभिन्नेषुदूषितेष्वपिकर्हिचित इति॥(भूभांडसंस्कारानन्तरमुक्तं
देवलस्मृतिकूर्मपुराणयोः ततोऽन्नंबहुसंस्कारं नैकव्यञ्जनभक्ष्यवत्॥चोष्यपेयसमृद्धंचयथाशक्तिप्रकल्पयेत्॥अस्यार्थो हेमाद्रिणाकृतः॥
बहुसंस्कारम् सूपकारशास्त्रोपदिष्टैः समृद्धतरगृहजनप्रतिसिद्धैर्हिंङ्गुमरिचैलाकर्पूरादियुक्तिजन्यैरभिज्ञरसनीयैरतिशयविशेषैर्युक्तम् ॥

 नैकव्यञ्जनभक्ष्यवत् व्यज्यतेऽनेनान्नस्यरसइति व्यञ्जनं सूपशाकादिकम् ॥ दंतैरवखंडचयद्भुज्यतेतद्भक्ष्यम् ॥ यस्यओष्ठदशनरसना
 दिभिर्निपीडितस्य सफूत्कारेण मुखमारुतेनरसोनिष्पीयते तच्चोष्यम् यथेक्षुखण्डादिकम् ॥ पेयम् द्रवैकस्वभावं पानकादि ॥ उपल
क्षणचैतद्भोज्यलेह्ययोः॥ यत्त्वनतिकाठिन्यादतिप्रयत्नवत्खंडनानपेक्षंचर्व्वयित्वैवनिगीर्य्यतेतद्भोज्यम्॥यत्तुसान्द्रद्रवस्वभावतयादशनान
पेक्षेणरसनाव्यापारेणाश्यते तत् लेह्यम् ॥ यथाशक्ति शक्तिमनतिक्रम्य प्रकल्पयेत् संपादयेदित्यर्थः ॥ (ब्रह्मपुराणे) गुडशर्कर
मत्स्यंडचोदेयंफाणितमुर्मुरम् ॥ गव्यंपयोदधिघृतंतैलंचतिलसंभवम् ॥ मत्स्यंडी उत्कृष्टः शर्कराभेदः ॥ फाणितम् ईषत्क्वथितस्ये
क्षुरसस्य द्रव एव विकारः मुर्मुरः गुडमरिचैलामिश्रोगोधूमस्थूलचूर्णविकारइत्यर्थः ॥तथा॥ पायसंशालिमुद्गाढ्यं मोदकादींश्चभक्तितः
पूरिकांचरसालांचगोक्षीरञ्चनियोजयेत् ॥ यानि चाभ्यवहार्याणि स्वादुस्निग्धानिभोद्विजाः ॥ ईषदुष्णकटून्येवदेयानिश्राद्धकर्मणि ॥
मोदकः लड्डूकः ॥ पूरिकाः पूरीतिनाम्ना प्रसिद्धाः ॥ रसाला शर्करात्वगेलानागकेशरमधुमरिचमिश्रमनुद्धृतस्नेहभागं वस्त्रेसंघृष्य
गालितं गोदधिकृतेत्यर्थः ॥ (कूर्मपुराणे) पूपशाकफलानीक्षून्पयोदधि घृतं मधु ॥ अन्नंचैवयथाकामंविविधं भोज्यपे
यकम् ॥ यद्यदिष्टंद्विजेंद्राणां तत्तत्सर्वंनिवेदयेत् ॥ (देवीपुराणे) सर्वेषामेवचान्नानां परमान्नंचपायसम् ॥ सर्वान्नदः
सतुप्रोक्तोयेनदत्तन्तुपायसमिति ॥ अत्रसाग्निकेनवैश्वदेवार्थंपृथक्पाकःकर्त्तव्यः ॥ एवं समाप्तेचपाके श्राद्धभूमिसंस्कारःकर्त्तव्यः ॥
(तत्रतावच्छ्राद्धयोग्याभूमिर्विष्णुधर्मोत्तरे) गोमयेनोपलिप्तेषुश्राद्धंकार्य्यंगृहेषुच ॥ मनोज्ञेषुविचित्रेषु रुचिरेषूत्तमेषुच ॥ उद्यानेषु
विचित्रेषु सैकतेषु समेषुच ॥ (मात्स्ये) गोमयेनोपलिप्तेतु दक्षिणाप्रवणेस्थले ॥ श्राद्धं समारभेद्भक्त्या गोष्ठेवाजलसन्निधौ ॥

(विष्णुस्मृतौ) संवृतेचश्राद्धंकुर्य्यात् नरजस्वलांपश्येन्नश्वानंनविड्वराहंनग्राम्यकुक्कुटं प्रयत्नाच्छादमजस्यदर्शयेत् (ब्रह्मांडे) ॥ तस्मा त्परिवृतेदद्यात्तिलैश्चान्ववकीरयेत् ॥ राक्षसानां तिलारक्षा शुनां वै संवृतेनचेति ॥ एवंसमाप्तेगृहकर्म्मणि गृहजनकृत्यमाहहारीतः ॥ कृतकर्म्माणः सस्त्रीबालवृद्धाः सुरभिस्नाताः शुचयः शुचिवाससः स्युरिति ॥ सुरभिस्नाताः सुगंधितैलादिद्रव्यस्नाता इत्यर्थः ॥ एतच्चा भ्युदयिकविषयमितिहेमाद्रिः ॥ अथाह्नः सार्द्धप्रहरे व्यतीते निमंत्रितानांब्राह्मणानांनखरोमकल्पनं (छेदनं) कारयित्वातेभ्यस्तैलादिकं स्नानसाधनंदंतधावनसाधनंचदद्यात्॥(तथाचकात्यायनस्मृतिभविष्ययोः) तैलमुद्वर्त्तनंस्नानंदंतधावनमेव च॥कृत्तरोमनखेभ्यस्तुदद्या त्तेभ्योऽपरेहनि॥अपरेहनिश्राद्धदिनइत्यर्थः॥यत्तुप्रचेतसोक्तम् ॥ "तैलमुद्वर्त्तनंस्नानंदद्यात्पूर्वाह्णएवतु॥श्राद्धभुग्भ्योनखश्मश्रुच्छेदनंनतुका रयेत्" इति॥अत्रविकल्पोवृद्धाऽऽचारतोहेयः॥अथश्राद्धसंपदः॥ (तत्रमनुयमहारीताः) ॥ अपराह्णस्तिलादर्भावास्तुसंपादनंतथा॥सृष्टिर्मृ ष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्म्मसुसंपदः ॥ अस्यार्थः॥अपराह्णः अपराह्णकालः॥तिलादर्भाश्चपूर्वउक्ताः॥वास्तुसंपादनम् वास्तु श्राद्धार्थं वे श्म तस्यसंपादनं गोमयादिनासंशोधनम् ॥ सृष्टिः अकार्पण्येनान्नादिविसर्गः॥मृष्टिरन्नादेश्चमार्जनंस्वादुतावा॥अग्र्याः पंक्तिपावनादय श्चब्राह्मणाः ॥ एतानिवस्तूनिश्राद्धसंपदःश्राद्धार्थंद्रव्यसमृद्धयः ॥ श्राद्धार्थिनासर्वाण्येतानिसंपादनीयानीत्यर्थः ॥ (ब्रह्मपुराणे) उपमूलंसकृल्लूनान्कुशांस्तत्रोपकल्पयेत् ॥ यवांस्तिलान्बृसीः कांस्यमापः शुद्धैः समाहृताः ॥ पार्णराजतताम्राणिपात्राणिस्युः समिन्मधु ॥ पुष्पधूपसुगंधादिक्षौमसूत्रंचमेक्षणम् ॥ बृसीः व्रतियोग्यानिकुशादिनिर्मितान्यासनानि ॥ कांस्यम् कांस्यमयमग्नौ करणाद्यर्थंभाजनम् ॥ शुद्धैः शौचादिशुद्धैः समाहृताः आनीताः आपः जलानि ॥ क्षौमसूत्रं दुकूलसूत्रम् ॥ मेक्षणम् दर्वी इत्यर्थः ॥

(मनुस्मृतौ) त्रीणिश्राद्धेपवित्राणिदौहित्रः कुतपस्तिलाः॥त्रीणिचात्रप्रशंसंतिशौचमक्रोधमत्वराम् ॥ तत्रैव ॥ व्रतस्थमपिदौहित्रंश्राद्धे
यत्नेनभोजयेत् ॥ कुतपं चासनेदद्यात्तिलैश्चविकिरेन्महीमिति ॥ व्रतस्थं ब्रह्मचारिणमपि॥दौहित्रं पुत्रिकायाःपुत्रम् ॥ कुतपंनेपालदेशप्र
भवं कंबलमित्यर्थः ॥ (स्मृतिसंग्रहे) उच्छिष्टंशिवनिर्माल्यंवांतंचमृतकर्पटम्॥श्राद्धेसप्तपवित्राणिदौहित्रःकुतपस्तिलाः ॥ इति ॥ उच्छि
ष्टम् वत्सस्योच्छिष्टंदुग्धम्॥शिवनिर्माल्यं गंगोदकम्॥वांतं मधु॥मृतकर्पटं कौशेयं तसरी पट्टं वा इत्यर्थः ॥ (प्रभासखंडे) ब्राह्मणाः
कंबलोगावोरूप्याग्न्यतिथयस्तथा ॥ तिलादर्भाश्चकालश्चनवैतेकुतपाःस्मृताः ॥ अथश्राद्धदेशेवर्ज्यानि (यमस्मृतौ) कुक्कुटोविड्वराह
श्चकाकश्चाथबिडालकः ॥ वृषलीपतिश्चवृषलःषंढोवीरारजस्वला ॥ एतेतुश्राद्धकालेवैवर्जनीयाःप्रयत्नतः ॥ खंजःकाणःकुणिःश्वित्री
दातुःप्रेष्यकरस्तथा ॥ न्यूनांगोप्यतिरिक्तांगस्तमप्यपनयेत्ततः ॥ (वायुपुराणे) अन्नंपश्येयुरेतेतुयदिवैहव्यकव्ययोः ॥ उत्स्रष्टव्यं
प्रधानार्थंसंस्कारस्त्वापदिस्मृतइति ॥ कुक्कुटादिभिर्दृष्टमन्नम् उत्स्रष्टव्यम् परित्याज्यम् ॥ प्रधानार्थं अग्नौकरणब्राह्मणभोजनाद्य
र्थम् ॥ आपदितुनोत्स्रष्टव्यंकिंतुतस्यैवपवित्रीकरणंकर्त्तव्यं तदुक्तंजमदग्निना ॥ " शुद्धवत्योथकूष्मांडचः पावमान्यस्तरत्समाः ॥ पूते
नवारिणादर्भैरन्नदोषमुपानुदेदिति।एतोन्विंद्रंस्तवामेत्याद्यास्तिस्रऋचःशुद्धवत्यःऋग्वेदिनाम्।यद्देवादेवहेडनमित्याद्यास्तिस्रःकूष्मांडचः
यजुषाम्॥यदंतियच्चदूरकइत्याद्याःपावमान्यःसामगानम्॥तरत्समंदीधावतीत्याद्यास्तरत्समाअथर्वणामित्यर्थः॥(मनुस्मृतौ) चांडालश्च
वराहश्चकुक्कुटःश्वातथैवच ॥ रजस्वलाचषंढश्चनेक्षेरन्नश्नतोद्विजान् ॥ होमेप्रदानेभोज्येचयदेभिरभिवीक्ष्यते ॥ दैवेकर्मणिपित्र्ये
वातद्गच्छत्ययथातथम् ॥ घ्राणेनसूकरोहंतिपक्षवातेनकुक्कुटः ॥ श्वातुदृष्टिनिपातेनस्पर्शेनावरवर्णज इति ॥ अवरवर्णजः शूद्रइत्यर्थः ॥

(पृथ्वीचंद्रोदये) पादुकोपानहौछत्रंचित्ररक्तांबरंतथा ॥ रक्तपुष्पंचमार्जारंश्राद्धभूमौविवर्जयेत्॥(निर्णयप्रदीपे) घंटानिनादोहयसन्निधानं
शंबूकशंखंकदलीदलंच॥उन्मत्तजात्यर्कहयारिजानिश्राद्धस्यवैगुण्यकराण्यमूनि ॥ घंटानिनादः घंटाशब्दः॥हयोऽश्वः ॥ सन्निधानेश्राद्ध
समीपेवर्ज्यः॥शंबूकंशुक्तिका॥उन्मत्तोधत्तूरः॥जात्यर्कौप्रसिद्धौ॥हयारिजंमहिषीक्षीरादीत्यर्थः।अथापराह्णकृत्यम्॥तत्रतावदपराह्णकालः।
(मत्स्यपुराणे) ऊर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तंचतुष्टयम् ॥ मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यते॥ (कुतपमाहपराशरः) अह्नोमुहूर्ताविख्याता
दशपंचचसर्वदा॥तत्राष्टमोमुहूर्तोयःसकालःकुतपःस्मृतः॥ (मात्स्ये)मध्याह्नेसर्वदायस्मान्मंदीभवतिभास्करः॥तस्मादनंतफलदस्तत्रारंभो
विशिष्यते॥इतिकुतपेप्रारभ्यतदादिपञ्चमुहूर्तेषुपरिसमापनंश्रेयस्करमित्यर्थः॥एवमपराह्णमुक्त्वाब्राह्मणाह्वानादिकर्मोच्यते॥ तत्रश्राद्धक
र्तास्नात्वाशुक्लेवाससीपरिदध्यात्।तथाचमाधवीयेउशनाः)स्नात्वाधिकारीभवतिदैवेपित्र्येचकर्मणीति॥श्राद्धकृच्छुक्लवासाःस्यादितिप्रचेत
सोक्तम्।(स्नानानंतरंयत्कर्त्तव्यंतदुक्तंप्रभासखण्डे)ततोऽपराह्णसमयेश्राद्धकर्त्तासमाहितः।स्वयंसमाह्वयेद्विप्रान्सवर्णैर्वासमाप्लुतान्।समाप्लु
तान् स्नातान् ॥ (विष्णुपुराणे) पादशौचादिनागेहमागतानर्चयेद्द्विजान् ॥ अर्चयेत्सत्कुर्य्यात्॥(मार्कण्डेयोपि) स्नातः स्नातान्समा
हूतान्स्वागतेनार्चयेत्पृथगिति ॥ स्वागतेनभवतांस्वागतमितिप्रश्नवाक्येन अर्चयेत्संमानयेत्॥सुस्वागतमस्माकमितिप्रतिवचनंप्रत्येकंते
ब्रूयुरित्यर्थः ॥ (यमस्मृतौ) ततःस्नानान्निवृत्तेभ्यःप्रत्युत्थायकृतांजलिः॥पाद्यमाचमनीयंच संप्रयच्छेद्यथाक्रमम्॥(पादप्रक्षालनेमन्त्रो
भविष्ये) प्रक्षालयेद्द्विप्रपादाञ्छन्नोदेवीरितित्वृचा ॥ (ब्रह्मनिरुक्ते) पाद्यंचैवतथार्घ्यंचदैवआदौप्रदापयेदिति ॥ (मार्कण्डेयपुराणे) संपू
ज्यस्वागतेनैतानभ्युपेतान्गृहेद्विजान् ॥ पवित्रपाणिराचांतानासनेषूपवेशयेत् ॥ (कौर्मे) यथोपविष्टान्सर्वांस्तानालंकुर्याद्विभूषणैः ॥

स्रग्दामभिः शिरोवेष्टैर्धूपदीपाऽनुलेपनैरिति ॥ ततोगृहद्वाराभिमुखस्थिते अंगणप्रदेशे गोमयगोमूत्राभ्यांमंडलद्वयंकुर्यात् ॥ (तथाच
मात्स्ये)एवमासाद्यतत्सर्वं भवनस्याग्रतोभुवि॥गोमयेनानुलिप्तायां गोमूत्रेणतुमण्डले ॥ (गोमयेविशेषमाहजाबालिः) अमेध्याशनशून्या
नांनीरुजानांतथागवाम्। अव्यंगानांचसद्यस्कंशुचिगोमयमाहरेत्॥(बौधायनः)उपलिप्तेसमेस्थानेशुचौशुक्लसमन्विते ॥ चतुरस्रंत्रिकोणंतु
वर्तुलंचार्द्धचंद्रकम्।कर्त्तव्यमानुपूर्व्येणब्राह्मणादिषुमण्डलम्।ब्राह्मणादिक्रमाच्चातुर्वर्ण्येष्वित्यर्थः॥(मंडलपरिमाणमाहलौगाक्षिः)हस्तद्वय
मितंकार्य्यंवैश्वदेविकमंडलम् ॥ तद्दक्षिणेचतुर्हस्तं विप्राणामंघ्रिशोधने ॥ (एतयोर्मंडलयोः क्रमेणाऽक्षतकुशादिभिरर्च्चनमाहहेमाद्रौव्या
घ्रपादः) उत्तरेऽक्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान् ॥ दक्षिणेदक्षिणाग्रांश्चसतिलान्विन्यसेद्द्विजः॥(शंखलिखितौ) पाद्यार्घ्याचमनीयो
दकानि दत्त्वा ब्राह्मणानुपसंगृह्योपवेशयेदासनमालभ्येति॥(हेमाद्रौ अत्रिः) ॥ तत्रासनानिदेयानितिलांश्चैवकुशैःसह॥पृथक्पृथगासनेषु
तिलतैलेनदीपिका इति ॥ तत्रश्राद्धदेशेआसनानिदेयानि॥कुशैः सहितास्तिलाश्चदेयाः श्राद्धभूमौप्रक्षेपणीयाः॥पृथक्पृथगेकैकस्यासन
स्यसमीपे एकैकातैलदीपिकादेया इत्यर्थः ॥ (श्राद्धतत्त्वब्रह्मपुराणयोः)पृथक्पृथगासनेषुतिलतैलेनदीपकाः॥अविच्छिन्नास्तथादेयास्ते
तुरक्षंतिवैद्विजा इति ॥ रक्षंति श्राद्धं द्विजा इतिसंबोधनमित्यर्थः ॥ अपात्रकेश्राद्धेत्वेकएवरक्षादीपइति वृद्धः॥ (उपवेशनमाह मनुः)
आसनेषुतुक्लृप्तेषु बर्हिष्मत्सुपृथक्पृथक् ॥ उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् ॥ क्लृप्तेषु स्थापितेषु ॥ बर्हिष्मत्सु दर्भोत्तरेषु॥
उपस्पृष्टोदकान् कृताचमनान् इत्यर्थः ॥(याज्ञवल्क्योपि)अपराह्णेसमभ्यर्च्यस्वागतेनागतांस्तुतान्॥पवित्रपाणिराचांतानासनेषूपवेशये
दिति॥अत्रवैश्वदेविकानामादावुपवेशनंकार्य्यंपित्र्याणांतुपश्चात् इतिहेमाद्रिः॥ (आसनानि स्मृतिसंग्रहे)क्षौमंदुकूलंनैपालमाविकंदारुजं

तथा ॥ तार्णंपार्णंबृसींचैवविष्टरादिचविन्यसेत् ॥ अग्निदग्धान्यासनानि भग्नानिचविवर्जयेत इति ॥ क्षौमम् अतसीत्वक्संभ
वतंतुसंभवम्॥दुकूलंसूक्ष्मवस्त्रम्॥नैपाल नेपालदेशजंकंबलम्।आविकम् ऊर्णारचितम्॥दारुजं काष्ठमयं।कालायसपट्टिकाकीलकादिरहि
तम् ॥ तार्णं तृणादिरचितम् ॥ पार्णं पणात्मकम् ॥ बृसीं कुशासनमित्यर्थः ॥ (वाराहे) पवित्रपाणिराचांतानासनेषूपवेशयेत् ॥
(विष्णुपुराणे) प्राङ्मुखान्भोजयेद्विप्रान्देवानामुभयात्मकान् ॥ पितृपैतामहादीनांभोजयेच्चाप्युदङ्मुखान् ॥ उभयात्मकान्
पित्रादिमातामहादिश्राद्धद्वयार्थं वैश्वदेविकद्वयसंबंधिन इत्यर्थः ॥ (याज्ञवल्क्योपि) मातामहानामप्येवमिति ॥ (मरीचिरपि)
तथामातामहश्राद्धं वैश्वदेवसमन्वितम् ॥ कुर्वीतभक्तिसपन्नस्तंत्रंवावैश्वदैविकमिति ॥ अत्रद्वयोरपिश्राद्धयोर्वैश्वदैविककर्म्म
णः तंत्रावृत्तिविधानादेकप्रयोगविधिप्रयोज्यत्वं भिन्नप्रयोगविधिप्रयोज्यत्वंचप्राप्तमित्यर्थः (उपविष्टब्राह्मणनियमानाहसुमंतुः)
पवित्रपाणयः सर्व्वे तेचमौनव्रतान्विताः ॥ उच्छिष्टोच्छिष्टसंस्पर्शं वर्जयन्तःपरस्परमिति ॥ मौनित्वंच ब्रह्मोद्यकथाव्यतिरिक्तवि
षयम्।(अतएवयमः)ब्रह्मोद्याश्चकथाःकुर्युः पितृणामेतदीप्सितम्।एवमुपविष्टेष्वपि ब्राह्मणेषुयतिर्ब्रह्मचारीवायद्यागच्छतितदासोऽपिश्राद्धे
भोजयितव्यः।(तथाच यमः)भिक्षुकोब्रह्मचारीवा भोजनार्थमुपस्थितः।उपविष्टेष्वनुप्राप्तःकामंतमपिभोजयेदिति।कामं तृप्तिपर्यंतमित्यर्थः।
अथपृथिवीस्तुत्यादिकृत्यम्॥तत्र तावदासनोपविष्टानां ब्राह्मणानांपुरतःकुशोपस्कृत।यांभुवियज्ञोपवीती प्राङ्मुखउपविश्याचम्यप्रमाद
कृताविज्ञाताशुचित्वनिवृत्त्यर्थं शुचित्वाशयार्थंवा प्रथमतः पुंडरीकाक्षस्मरणं कुर्यात् ॥ तथाच वायवीये) शंखचक्रधरं विष्णुंद्विभुजं
पीतवाससम् प्रारंभेकर्मणांविप्रपुंडरीकंस्मरेद्धरिमिति।स्मरणं चात्रोच्चारणमित्यर्थः॥(गारुडेपि) अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा॥

यः स्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरः शुचिः ॥ (प्रोक्षणं ब्रह्माण्डे) नाप्रोक्षितं स्पृशेत्किंचिद्दैवेपित्र्येचकर्मणीति ॥ नस्पृशेन्नदद्यादित्यर्थः॥
आचारात्पुंडरीकाक्षःपुनात्वित्युच्चार्य सेक इतितरंगिण्यामुक्तम्॥अनंतरंच पृथिवीस्तुतिः कर्त्तव्या ॥ (तथाच वाराहे) प्रणम्यशिरसाभू
मिंनिवापस्यचधारिणीम्॥ वैष्णवी काश्यपीचेति अक्षयेतिच नामत इति ॥ अत्र प्रणवादीनि नमोन्तचतुर्थ्यंतानि वैष्णव्यादिनामानि
प्रयोज्यानीत्यर्थः ॥ ततः श्राद्धप्रदेशंगयात्मकत्वेन तदेकदेशस्थितंगदाधरंच ध्यात्त्वातयोश्चनमस्कारं कृत्वोत्तरंकर्मप्रवर्त्तयेत् ॥(तथाच
ब्रह्माण्डपुराणे)श्राद्धभूमींगयांध्यात्वा ध्यात्वादेवं गदाधरम्॥ताभ्यांचैवनमस्कृत्य ततःश्राद्धंप्रवर्त्तयेत् इति॥ताभ्यामितिचतुर्थीद्वितीया
र्थे ॥ नमस्कारश्चमनोवाक्कायैर्विधेयः॥श्राद्धंप्रवर्त्तयेदिति श्राद्धंकरिष्ये इत्येवमुपविष्टान्ब्राह्मणान्पृच्छेदित्यर्थः ॥अथ शिष्टाचारप्राप्त देश
कालसंकीर्त्तनं कुर्यात् ॥ (तथाच भविष्यपुराणे) संकल्पेनविनाराजन् यत्किञ्चित्कुरुतेनरः॥ फलंचाल्पाल्पकंतस्य धर्म्मस्यार्द्धक्षयो
भवेत् ॥ मासपक्षतिथीनांच निमित्तानांचसर्वशः ॥ उल्लेखनमकुर्वाणो नतस्यफलभाग्भवेत् ॥ गृहीत्वौदुम्बरंपात्रं वारिपूर्णंगुणान्वितम् ॥
दर्भत्रयंसाग्रमूलं फलपुष्पतिलान्वितम्॥जलाशयारामकूपे सङ्कल्पेपूर्वदिङ्मुखः ॥ साधारणेचोत्तरास्य ऐशान्यांनिक्षिपेत्पय इति ॥ उदुं
बरंपात्रंताम्रपात्रमित्यर्थः ॥ गोत्रसम्बंधनामानि यथावत्प्रतिपादयेदितिप्रचेतसोक्तम् ॥ (पारस्करोऽपि ॥ गोत्रसम्बंधनामानि पितृणाम
नुकीर्त्तयन्निति ॥(वृद्धपराशरोऽपि)सङ्कल्पासनयोरर्घ्ये गंधेऽन्नेचावनेजने ॥ गोत्रसम्बंधनामानिपिण्डेप्रत्यवनेजने ॥ सूत्रेऽक्षय्येप्रतिष्ठार्थे
कीर्त्तयेत्प्रयतः सदा ॥ आद्येचान्तिमयोःषष्ठीं सम्बुद्धिमितरेषुचेति ॥ आद्ये प्रतिज्ञासङ्कल्पे ॥ अन्तिमयोरक्षय्येदक्षिणायांचेत्यर्थः॥ (हे
माद्रौ नारायणः) विभक्तिभिस्तुयत्किंचिद्दीयतेपितृदैवते ॥ तत्सर्वंसफलंज्ञेयं विपरीतंनिरर्थकम् ॥ (तत्रैव व्यासः) चतुर्थीचासने

नित्यंसंकल्पेचविधीयते ॥ प्रथमातर्पणेप्रोक्तासम्बुद्धिमपरेजगुः ॥ (मत्स्यपुराणेपि) नामगोत्रंपितॄणां तु प्रापकंहव्यकव्ययोः ॥
(ब्रह्माण्डे) उभौहस्तौसमौकृत्वा जानुभ्यामंतरेस्थितौ ॥ सप्रश्रयश्चोपविष्टान्सर्वान्पृच्छेद्द्विजोत्तमान् ॥ सप्रश्रयःविनयान्वित इत्यर्थः ॥
तथा ॥ श्राद्धंकरिष्यइत्येवं पृच्छेद्विप्रान्समाहितः ॥ कुरुष्वेतिसतैरुक्तो दद्याद्दर्भासनंततः ॥ (कात्यायनोपि) प्रश्नंतुपङ्क्तिमूर्द्धन्यंपृच्छ
तिसर्वान्वा इति ॥ (दर्भासनात्पूर्वंगायत्र्यादिजप्यमाह प्रचेताः) गायत्रींप्रणवंवापिजप्त्वाश्राद्धमुपक्रमेत् ॥ (ब्रह्मपुराणभविष्योत्तरश्राद्ध
तत्त्वविष्णुधर्मोत्तरेषु) उपविश्यजपेद्धीमान्गायत्रींतदनुज्ञया ॥ पापापहांपावमानीमश्वमेधफलांतथा ॥ मंत्रंवक्ष्याम्यहंतस्मादमृ
तंवह्मसंभवम् ॥ देवताभ्यःपितृभ्तश्चमहायोगिभ्यएवच ॥ नमःस्वधायैस्वाहायै नित्यमेवनमोनमः ॥ आद्यावसानेश्राद्धस्यत्रिरा
वृत्तंजपेत्सदा ॥ पिंडनिर्वपणेचापिजपेदेतत्समाहित इति ॥ शिष्टास्तु नमःस्वाहायैस्वधायैनित्यमेवनमोनमः ॥ इतिपठंति ॥
(ब्रह्माण्डेपि) ॥ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः ॥ आदिमध्यावसानेषुत्रिरावृत्तं
जपेद्बुधः॥ पितरःक्षिप्रमायांति राक्षसाःप्रद्रवंतिचेति ॥ (विष्णुपुराणे) अमूर्तीनांसमूर्तीनांपितॄणांदीप्ततेजसाम् ॥ नमस्यामिसदातेषांध्या
यिनांयोगचक्षुषामितिमंत्रोऽप्यादिमध्यावसानेषुपठितव्यः ॥ अत्रावसरेनीवीबंधोविधेयइतिहेमाद्रिप्रभृतयः शिष्टास्तुविकिरणांतेकुर्वंति
नीवीबंधश्चाऽपसव्येनैवकर्त्तव्यइतिहेमाद्रिः । पितृदैवत्यावैनीविरितिशतपथीयलिंगदर्शनेनपितृदैवत्यंकर्म्मनीवीमताकर्त्तव्यमित्यवगमात् ।
(आश्वलायनोपि) नीवीवासोदशान्तेनस्वरक्षार्थंप्रबंधयेत् ॥ (योगियाज्ञवल्क्यस्तु) दाशाकटिदेशेतुतिलैः सह कुशत्रयम् ॥ तर्ज्जयं
तीहदैत्यानांयथानॄणांयमस्तथा ॥ (कात्यायनः) नीवीकार्यादशाग्रुप्तिर्वामकुक्षौकुशैः सहेति ॥ एतद्वृद्धिश्राद्धे ॥ पितॄणांदक्षिणेपार्श्वेविपरी

तातुदेविके ॥ इतिस्मृत्यंतरात् । पितॄणांपितृश्राद्धे । दैविकेनांदीश्राद्धइत्यर्थः । अत्रवामेदक्षिणेवाइत्याचाराद्व्यवस्थाइतिमदनपारिजातः ॥
नीवीबंधनप्रकारोदेवयाज्ञिकभाष्ये । कुशतिलसंयुक्तानांवस्त्रदशानां सव्यभागेपरिहितवस्त्रेणसंवेष्टचावगाहनंनीवीकरणमिति । सव्यभागे
वामकुक्षावित्यर्थः ॥ नीवीनामात्रतिलकुशान्वितानांपरिहितवस्त्रोत्तरांचलदशानांवामकटिसंलग्नवस्त्रबहिर्भागेनसंवेष्टचगोपनमितिकर्को
पाध्यायः ।(मंत्रस्तुब्रह्माण्डे) । निहन्मिसर्वंयदमेध्यवद्भवेद्धताश्चसर्वेऽसुरदानवामया ॥ रक्षांसियक्षाश्चपिशाचगुह्यकाहतामयायातुधानाश्चसर्वे
इति॥अनंतरंदैवप्रदेशेयवान्विकीर्यपैतृकप्रदेशेपरितस्तिलान्गौरसर्षपांश्चविकिरेत्॥ तथाचब्रह्मपुराणे अक्षतैर्देवतारक्षांचक्रेचक्रगदाधरः।
अक्षताश्चयवौषध्यः सर्वदेवास्त्रसंभवाः ॥ रक्षंतिसर्वांस्त्रिदशान्रक्षार्थंनिर्मिताहिते ॥ (मार्कंडेयपुराणे) रक्षोघ्नांस्तुपठेन्मंत्रांस्तिलैश्चविकिरे
न्महीम् ॥ सिद्धार्थकैश्चरक्षार्थंश्राद्धेहिप्रचुरंछलम् ॥ छलंयातुधानादिकृतो विघ्नः (ब्राह्मे) ततस्तिलान्गृहेतस्मिन्विकिरेच्चाप्रदक्षिणम् ॥
नमोनमस्तेगोविन्दपुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेशरक्षतांसर्वतोदिशः ॥ (द्वारदेशेतिलकुशप्रक्षेपणमंत्रः स्कंदपुराणे) तिलारक्षं
त्वसुरान्दर्भारक्षंतुराक्षसान् ॥ पङ्क्तिंवैश्रोत्रियोरक्षेदतिथिःसर्वरक्षक इति । (श्राद्धप्रदेशस्यपरितःप्राच्यादिदिक्षुमध्येचतिलविकिरणमंत्राः॥
भविष्यपुराणे अग्निष्वात्ताःपितृगणाः प्राचींरक्षन्तुमेदिशम्॥तथाबर्हिषदःपांतुयाम्यांयेपितरःस्थिताः ॥ प्रतीचीमाज्यपास्तद्वदुदीचीम
पिसोमपाः ॥ अधोर्ध्वमपिकोणेषु विकोणेषुचसर्वशः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुमे ॥
वायुभूतपितॄणांचतृप्तिर्भवतुशाश्वती इति (ब्रह्माण्डे) रक्षार्थंपितृसत्रस्य त्रिःकृत्वःसर्वतोदिशम् ॥ तिलांस्तुप्रक्षिपेन्मंत्रमुच्चा
र्यापहताइति ॥ तिलविकिरणानंतरंप्रमादोपजातस्यप्रमितस्यवा मार्जारादिदृष्टिदोषस्यानिवृत्तये कस्मिंश्चित्पात्रेजलंगृहीत्वादर्भै

रालोड्य कूष्मांडीभिः पाकप्रोक्षणंकृत्वाऽन्यानपिकुशकुसुमादीन्सर्वान्पदार्थान्प्रोक्षयेत् ॥ (तथाच कात्यायनः) कूष्मांडीमंत्रसूक्तेन
कुर्यात्तोयाभिमंत्रणम् ॥ अन्नानिप्रोक्षयेत्तेनतैरेवश्राद्धमाचरेत् ॥ कूष्मांडीसूक्तं यद्देवादेवहेडनमित्यादि कंडिकात्रयम् ॥ (पराशरोपि)
अप्रोक्षितंचयत्किंचित्पर्युषितंविवर्जयेत्। (हेमाद्रौवसिष्ठः)शुद्धवतीभिःकूष्मांडीभिःपावमानीभिश्चपाकादिप्रोक्षेत् शुद्धवतीभिश्छंदोगाः
कूष्मांडीभिर्याजुषाः पावमानीभिर्बह्वृचश्च प्रोक्षणंकुर्युरित्यर्थः ॥ (प्रोक्षणाभावेदोषमाह याज्ञवल्क्यः) अनभ्युक्ष्यानुपस्पृश्यजुहोतिच
ददातिच ॥ नैर्ऋतंभागधेयंस्यात्तस्मात्प्रोक्षणमाचरेत् ॥ ततःप्रोक्षितमन्नंहरयेनिवेद्यश्राद्धंकुर्यात् ॥ (तथाच विधानपारिजाते
विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरम् ॥ पितृभ्यश्चापितद्देयंतदनंत्यायकल्पते ॥ पितृशेषंतुयोदद्याद्धरयेपरमात्मने॥रेतोधाःपितरस्तस्यभ
वंतिक्लेशभागिनः ॥ (ब्रह्मपुराणेपि) यःश्राद्धकालेहरिभुक्तशेषंददातिभक्त्यापितृदेवतानाम् ॥ तेनैवपिंडास्तुलसीविमिश्रानाकल्पको
टिंपितरस्तुतृप्ता इति ॥ केचित्तुवैष्णवपरमितिवदंति॥ अथदर्भासनादयःपदार्थाः ॥ तेचसर्वस्यदैवपूर्वकत्वात्पूर्वंदेवद्विजेष्वनुष्ठेयास्ततः
पैत्र्यद्विजेषु ॥(तथाच देवलः) ॥ यद्यत्तुक्रियतेकर्मपैतृकेब्राह्मणान्प्रति॥तत्सर्व्वमेवकर्त्तव्यंवैश्वदैवत्यपूर्वकमिति॥(आसनादिदानेदिङ्नियममाह शातातपः) उदङ्मुखस्तुदेवानांपितॄणांदक्षिणामुखः ॥ प्रदद्यात्पार्व्वणश्राद्धेदैवपूर्वंविधानतः ॥ (जानुनिपातमाहकात्यायनः)
दक्षिणंपातयेज्जानुंदेवान्परिचरन्सदा ॥ पातये ज्जानुंपितॄन्परिचरन्नथ ॥ जानुपातनानंतरमासनदानात्पूर्वंद्विजहस्तेषुजलंप्रक्षिपेत् ॥
(तथाचयाज्ञवल्क्यः) पाणिप्रक्षालनंदत्त्वाविष्टरार्थान्कुशानपि ।(प्रचेताः) दर्भांश्चैवासनेदद्यान्नतुपाणौकदाचन॥पितृदेवमनुष्याणांस्या
द्दुष्टिःशाश्वतीतथेति॥रुष्टिःकलहः ॥ब्राह्मणहस्तेदेवपितृमनुष्यप्रजापत्यग्नितीर्थानांसद्भावाद्धस्तविन्यस्तेषुदर्भेषुममेदंममेदमितिदेवादीनां

कलहःस्यात्तस्माद्धस्तेनदद्यादित्यर्थः ॥ (अत्रकुतपाद्यासनोपरिप्रदेयस्यकुशासनस्यप्रदेशविशेषोब्रह्माण्डेदर्शितः) आसनेचासनं
दद्याद्वामेवादक्षिणेऽपिवाइति ॥ वामेतिब्राह्मणस्यआसनावस्थितस्यवामभागावस्थितेआसनप्रदेशे एवंदक्षिणइत्यर्थः ॥ अत्रदक्षिणवैश्वदे
विकविषयं वामेतिपैतृकविषयम् ॥ (तदुक्तं पराशरेण) पितृकार्येषुवामंतद्दैवेकर्म्मणिदक्षिणमिति ॥ एतच्चासनंदेवानांयवसहितैर्दर्भै
र्दैयंपितृणांतुतिलसहितैः ॥ (तथाच बोधायनः)देवानांसयवादर्भाः पितृणांद्विगुणास्तिलैः ॥ सहिता इतिशेषः ॥ द्विगुणाः मध्यभागेन
द्विगुणीकृता इत्यर्थः ॥ (बृहस्पतिरपि) ऋजून्सव्येनवैकृत्वादैवेदर्भान्प्रदक्षिणम् ॥ द्विगुणानपसव्येनदद्यात्पित्र्येऽपसव्यवत् ॥ ऋजवः
द्विगुणरहिताः॥अपसव्यवत्अप्रदक्षिणमित्यर्थः॥ वैश्वदैविकंसवकर्मप्रदक्षिणकर्म्मणापैतृकमप्रदक्षिणकर्मणाचकार्यम्॥(तथा बोधायनः)
प्रदक्षिणंतुदेवानांपितॄणामप्रदक्षिणम् ॥ देवानामृजवोदर्भाःपितॄणांद्विगुणामता इति ॥ आसनदानेविभक्तिविशेषस्तुपूर्वमेवदर्शितः ॥
(नागरखंडेपि) विभत्त्कयापूर्वंयतेषामासनंचप्रदापयेदिति॥एवमेवमातामहादिब्राह्मणेभ्योप्यासनानिदद्यात्॥पितरोयत्रपूज्यंतेतत्रमा
तामहाध्रुवमितिवृद्धयाज्ञवल्क्यवचनात् ॥ (अथावाहनंकालिकापुराणे) रक्षणायततोदेवान्विश्वाख्यांस्तत्रयोजयेत् ॥ रक्षणायश्राद्ध
स्येतिशेषः ॥ तत्रयोजयेत्तेषुब्राह्मणेषु आवाहनेनसन्निधापयेदित्यर्थः ॥ (कात्यायनः) आसनेषुदर्भानास्तीर्यविश्वान्देवानावाह
यिष्यइतिपृच्छत्यावाहयेत्यनुज्ञातइतिपृच्छतियजमानः अनुज्ञातोद्विजैरित्यर्थः ॥ (कौर्मेपि) ततस्त्वावाहयेद्देवान्ब्राह्मणानामनु
ज्ञया ॥ उदङ्मुखोयथान्यायंविश्वेदेवासइत्यृचा ॥ (याज्ञवल्क्योपि) पाणिप्रक्षालनंदत्त्वाविष्टरार्थान्कुशानपि ॥ आवाहयेदनु
ज्ञातेविश्वेदेवासइत्यृचाइति ॥ आवाहनंविप्राङ्गुष्ठंगृहीत्वाकर्त्तव्यम् ॥ (तदुक्तं ब्राह्मे) विप्राङ्गुष्ठगृहीत्वातुविश्वान्देवान्समाह्वयेवइति॥

(आवाहनप्रकारस्त्वाह कात्यायनः) विश्वेदेवासआगतेत्यनयाऽऽवाह्याऽवकीर्य्य विश्वेदेवाः शृणुतेममितिजपित्वेति॥(वृद्धपराशरोपि)
देवानावाहयिष्येहमितिवाचउदीरयेत् ॥ आवाहयेदनुज्ञातो विश्वेदेवासऽआगतः ॥ विश्वेदेवाःशृणुतेममितिमंत्रद्वयंपठेत् ॥ (उत्पत्तिना
माऽज्ञाते आह बृहस्पतिः) उत्पत्तिनामचैतेषां नविदुर्येद्विजातयः ॥ अयमुच्चारणीयस्तैःश्लोकःश्रद्धासमन्वितैः ॥ आगच्छंतुमहाभागा
विश्वेदेवामहाबलाः ॥ येयत्रविहिताः श्राद्धे सावधानाभवंतुते इति ॥ उत्पत्तिश्चैषां दक्षकन्यायांविश्वायां धर्माज्जाताइत्यादिहेमाद्रौदर्शि
ता ॥ नामप्रयोगश्च पुरूरवार्द्रवौ चैवपार्वणेसमुदाहृतावित्यादि शंखबृहस्पत्युक्तेश्चेत्यर्थः ॥ (भविष्ये) आवाहयेद्यवैर्देवानपसव्यंतिलैः
पितॄनिति ॥ यवैः यवहस्त इत्यर्थः ॥ (अथपित्राद्यावाहनमाह याज्ञवल्क्यः) द्विगुणांस्तुकुशान्दत्त्वाह्युशन्तस्त्वेत्यृचापितॄन्॥आवाह्यत
दनुज्ञातो जपेदायंतुनस्ततः ॥ (कूर्मपुराणेपि) अपसव्यंततःकृत्वा पितॄणांदक्षिणामुखः ॥ आवाहनंततःकुर्यादुशंतस्त्वेत्यृचाबुधः ॥
आवाह्यतदनुज्ञातोजपेदायन्तुन इति ॥ (कात्यायनोपि) अथपितॄनावाहयिष्य इतिपृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयावाह्या
वकीर्य्य आयंतुनः जपतीति ॥ अवकीर्य्यतिलानितिशेषः ॥ अथार्घ्यपात्रासादनादि ॥ (तत्रतावदर्घ्यपात्राणि ब्रह्माण्डे) सौवर्णराजतां
भोज मणिपात्राण्यथापिवा ॥ अर्घ्यार्थं संस्करोत्येवशुभंपत्रपुटादिवा इति ॥ अंभोजंताम्रमयम् ॥ पत्रपुटाःपलाशादिपत्रकृतानिपात्राणी
त्यर्थः ॥ (हेमाद्रौ वैजवापः) राजतानिप्रशस्तानि पित्र्येहैमानिदैविके ॥ अपिवाताम्रपात्राणिदैवेपित्र्येऽर्घ्यकर्मणि ॥ (कात्यायनसूत्रे
पि) सौवर्णराजतोदुंबरखड्गमणिमयानांपात्राणामन्यतमेषु यानिवाविद्यंतेपत्रपुटेष्विति ॥ उदुंबरं ताम्रम् ॥ खड्गं गंडकशृङ्गोद्भवमित्य
र्थः ॥ राजतंतुपित्र्येकर्मण्येवनतुदैवे ॥ (तथाच मत्स्यपुराणे) शिवनेत्रोद्भवंयस्मात्तस्मात्तत्पितृवल्लभम् ॥ अमंगलंतद्यत्नेनदेवकार्येषुव

र्जितम् ॥ शिवनेत्रोद्भवं रुद्राश्रुसंभवमित्यर्थः ॥ (तैत्तिरीयश्रुतिरपि) यदश्रु अशीर्यत्तद्रजतं हिरण्यमभवदिति ॥ अश्रुप्रभवत्वादेवा
मङ्गसम् ॥ (पात्रपूरणविधिमाह याज्ञवल्क्यः) यवैरन्ववकीर्य्याथ भाजनेसपवित्रके ॥ शन्नोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथा ॥
यादिव्याइतिमंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत्॥(कात्यायनोपि) पत्रपुटेष्वेकैकस्येकैकेनददाति सपवित्रेषुहस्तेषु यादिव्याइति। (नागरखं
डेपि)शन्नोदेवीतिमंत्रेणअर्घ्यपात्रेविनिक्षिपेत्॥यवोसियवयास्मेतिअक्षतांस्तत्रनिर्वपेत्॥अक्षतान्यवान् ॥ पात्रयुग्मंपाद्ममात्स्ययोरुक्तम्॥
विश्वेदेवान्यवैःपुष्पैरभ्यर्च्यासनपूर्वकम्॥पूरयेत्पात्रयुग्मंतुस्थाप्यदर्भपवित्रके॥शन्नादेवीत्यपोदद्याद्यवोसीतियवानपि॥(हेमाद्रौमात्स्येपि)
शन्नोदेवीत्यपो दद्याद्यवोसीतियवानपि ॥ गंधपुष्पैस्तु संपूज्य वैश्वदेवं प्रतिन्यसेदितिवैश्वदेवंप्रति ॥ वैश्वदेविकब्राह्मणानांपुरतःब्राह्मण
द्वयपक्षेपात्रयुग्मं ब्राह्मणैकपक्षेपात्रमेकंच न्यसेत् ॥ अर्घ्यपात्रं स्थापयेदित्यर्थः ॥ पात्रेषुगंधादिपानंतृष्णीम् ॥तृष्णींपुष्पाणिचंदनमिति
योगियाज्ञवल्क्यवाक्यात् ॥ (पराशरोपि) यवोसीतियवांस्तत्रतृष्णींपुष्पाणिचंदनमिति॥(अत्रार्घ्यपात्रसंपत्तिरस्त्विवतिप्रश्नपूर्वकंवाक्य
माहहेमाद्रौजातूकर्ण्यः) ततोर्घ्यपात्रसंपत्तिंवाचयित्वाद्विजोत्तमान् ॥ तदग्रेचार्घ्यपात्रंतुस्वाहार्घ्याइतिविन्यसेत् इति ॥ अनंतरंपात्रस्थं
पवित्रंविप्रकरेदत्त्वापादप्रभृतिमूर्द्धांतंपूजयेत्(तथाचहेमाद्रौगार्ग्यः)दत्त्वाहस्तेपवित्रंतुकृत्वापूजांचपादतः ॥यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यं
विनिक्षिपेदितिपादतःपादप्रभृतिमूर्द्धान्तमित्यर्थः॥(तथाचप्रचेताः)पादप्रभृतिमूर्द्धान्तंदेवानांपुष्पपूजनम्इति॥अर्घ्यदानेस्वाहांतःशब्दःप्र
योक्तव्यः ॥ (तदुक्तंहेमाद्रिमाधव योर्गार्ग्येण)स्वधेतिचैवमंत्रांतेपितॄणांवचनंयथा॥स्वाहेतिचैवदेवानांहोमकर्मण्युदाहरेत्इति॥होमशब्दो
त्रत्यागप्रक्षेपरूपत्वादर्घ्येपिवर्त्तते ॥ स्वाहांते नमःशब्दोपिप्रयोज्यः ॥ नमोदेवानामितिश्रुतेः ॥ एतच्चसर्वं वैश्वदेविकानुष्ठानार्हम् ॥

(अथपित्राद्यर्घ्यदानप्रकारमाह याज्ञवल्क्यः) यवार्थस्तुतिलैः कार्य्यः कुर्य्यादर्घ्यादिपूर्ववत ॥ पूर्ववत वैश्वदेविकार्घ्यादिवत् ॥ आदि शब्देनगंधपुष्पादिदानंगृह्यते॥ (छंदोगपरिशिष्टे कात्यायनः) अपसव्यंतदासिंचेत्पितृपात्रेषुपूर्ववत् ॥ ततस्तिलांस्तिलोसीतिगंधपुष्पा णिचैवहि पूर्ववत् शन्नोदेवीरित्यनेनेत्यर्थः ॥ (गंधदानंतर्जन्याएवकार्यं तदुक्तं ब्रह्मपुराणे) पितॄणामर्पयेद्गंधंतर्जन्याचसदैवहीति॥ अथ प्रतिपात्रंसमंत्रकंतिलावापमाहहेमाद्रौ कात्यायनः) यज्ञियवृक्षचमसेषुपवित्रांतर्हितेष्वेकैकस्मिन्नपआसिंचति शन्नोदेवीरित्येकैकस्मि न्नेवतिलानावपति॥तिलोऽसिसोमदेवत्योगोसवेदेवनिर्मितः॥प्रत्नमद्भिःप्रत्तःस्वधयापितॄँल्लोकान्प्रीणाहिनः स्वधानमइति ॥ (माधवीये शौनकोपि) पात्रेषुदर्भान्तरितेष्वपःप्रदायशन्नोदेवीरभिष्टयइत्यनुमंत्रितासुतिलानावपति ॥ तिलोसिसोमदेवत्योगोसवेदेवनिर्म्मितः ॥ प्रत्नमद्भिःप्रत्त स्वधयापितॄनिमाँल्लोकान्प्रीणयाहिनःस्वधानमइति।एवमेवहेमाद्रिस्थगोभिलआश्वलायनसूत्रेषुअग्निपुराणादावपिदृश्यते मैथिलास्तु स्वाहांतंपठंतिस्वपरंपराव्यवहारसिद्धत्वात् ॥ युक्तंतुस्वधांतमेवपैतृकत्वात ॥(तथाच गार्ग्यः स्वधेतिचैवमंत्रांतेपितॄणां वचनंयथाइति ॥ (पित्रादिनामगोत्रोच्चारणपूर्वकत्वमुक्तंमात्स्ये) एवंपात्राणिसंकल्प्ययथालाभंविमत्सरः ॥ यादिव्येतिपितृनामगोत्रे दर्भकरेन्यसेत॥पित्रादीनांनामगोत्रोच्चार्यदर्भंयुक्तेब्राह्मणदक्षिणकरेऽर्घ्यंन्यसेदित्यर्थः॥(व्यासोपि)गोत्रसंबंधनामानिपितॄणामनुकीर्त्तयन्। एकैकस्यतु विप्रस्य अर्घ्यपात्रंविनिक्षिपेत।एकैकस्यविप्रस्यदक्षिणकरे अर्घ्यपात्रंअर्घ्यपात्रस्थजलंविनिक्षिपेत् दद्यादित्यर्थः।(ब्रह्मपुराणे विशेषः) ततोवामेनहस्तेनगृहीत्वाचमसान्क्रमात् ॥ पितृतीर्थेनतत्तोयं दक्षिणेनचपाणिना ॥ दत्तदर्भोदकेहस्ते विप्राणां च पृथक्पृथक्॥ दद्यान्मंत्रंजपंश्चाथ यादिव्या आप इत्यपि ॥ अमुकामुकगोत्रैतत्तुभ्यमस्तुतिलोदकम् ॥ तिलोदकमित्युच्चारणंप्रायेणसाग्निकविषयक

मितिहेमाद्रिः॥असावेषतेऽर्घं इतिकात्यायनेनानुपूर्वीविशेषोपादानात्॥एषवोहस्तार्घःस्वाहानमः॥एषतेहस्तार्घःस्वधानम इतिसिद्धम् ॥
अथसंस्रवविनियोगादि ॥ तत्रकात्यायनसूत्रे ॥ एकस्मिन्संस्रवान्समवनीयपुत्रकामोमुखमनक्तीति ॥ अस्यार्थः-एकस्मिन्प्रथमपितृपात्रे
संस्रवान्पितामहाद्यर्घ्यपात्रस्थिताञ्जलशेषान् ॥ (तथाच शतपथश्रुतिः) संस्रवोह्यवखलु परिशिष्टोभवतीति॥केचित्तुहस्तगलिताम्बुवद
न्ति तत्तुमतान्तरे॥समवनीय एकत्रसंभृत्य पुत्रकामोयजमानः मुखम् अनक्ति स्वमुखसंज्यात् मार्जयेदित्यर्थः॥(शातातपोपि)प्रथमेपितृ
पात्रेतु सर्वान्संभृत्यसंस्रवान् ॥ अनक्तिवदनंपश्चात्पुत्रकामोभवेद्यदीति ॥ वदनंमुखमित्यर्थः॥ (नागरखंडेतु) आयुष्कामस्यसंस्रवजलेन
लोचनावसेचनमुक्तम् ॥ पितृपात्रे समादाय अर्घ्यपात्राणि कृत्स्नशः॥आयुष्कामस्तु तत्तोयं लोचनाभ्यांपरिक्षिपेदिति॥पितृपात्रे पितुर
र्घ्यपात्रे ॥ अर्घ्यपात्राणि पात्रस्थिताजलशेषाः॥समाधाय निक्षिप्य लोचनाभ्यांपरिक्षिपेत्॥ नेत्रावसेचनं कुर्यादित्यर्थः॥(हेमाद्रौ वाज
सनेयिनांतु प्रथमपात्रसम्भृतं संस्रवोदकं हस्तेगृहीत्वा आपःशिवा इतिमंत्रेणप्राङ्मुखोपविष्टस्ययजमानस्यान्येनाभिषेकःक्रियत इत्यु
क्तम्॥एतानिचमुखाञ्जनादीनिकाम्यानिकर्माणियज्ञोपवीतिनायजमानेनकार्याणि अनन्तरंविमोकादि। तत्रतावद्देवपात्रस्योत्तानंस्थापनं
बृहद्नारुडे) ततः पात्रंदक्षिणेतुदेवेभ्यः स्थानमस्यथ ॥ उत्तानंस्थापयेदेव नोद्धरेन्नचचालयेत्॥दक्षिणेदेवविप्रदक्षिण इत्यर्थः॥ततोऽपस
व्येनपितृपात्रस्यन्युब्जीकरणम्॥(तथाच अत्रिः) अपसव्यं ततः कृत्वा पितृपात्रेसमाहितः॥क्षिप्त्वादर्भपवित्राणिमोचयेत्संस्रवांस्ततः॥
(कात्यायनः) प्रथमेपात्रे संस्रवान्समवनीयपितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोतीति ॥ प्रथमेपात्रे पितृपात्रे संस्रवान्पितामहाद्यर्घ्य
पात्रस्थजलादीन् समवनीय निधाय पितृभ्यः स्थानमसीतिमंत्रेण न्युब्जमधोमुख करोति स्थापयेदित्यर्थः ॥ (नागरखंडे) अधोमुखं

चतत्पात्रं विजनेस्थापयेत्तत इति ॥ विजनेश्राद्धीयद्रव्याऽऽनयनापनयपरिवेषणादिकर्तृकजनसंचरणदोषरहितेप्रदेश इत्यर्थः ॥ शिष्टास्तु
पितृविप्रवामप्रदेशेऽवस्थापनंकुर्वंति॥(हेमाद्रौ प्रचेताअपि)न्युब्जमुत्तरतोन्यसेत् इति ॥ उत्तरशब्दो वामपर्यायवाचकइत्यर्थः॥विप्रवामे
इति हलायुधः॥(याज्ञवल्क्यः)दत्त्वाऽर्घ्यंसंस्रवांस्तेषांपात्रेकृत्वाविधानतः ॥ पितृभ्यः स्थानमसीतिन्युब्जंपात्रंकरोत्यधः॥अधःभूमावेव
नतुपीठबृस्यादिषु ॥ (कूर्मपुराणेपि) संस्रवांश्चततःसर्वान्पात्रेकुर्यात्समाहितः ॥ पितृभ्यः स्थानमसीतिन्युब्जंपात्रंनिधापयेदिति॥पितृ
पात्रन्युब्जानंतरंपितामहप्रपितामहपात्रेअपितदुपरिन्यसेत् ॥(तथाच हेमाद्रौ यमकात्यायनौ) पैतृकंप्रथमंपात्रं तस्मिन्पैतामहंन्यसेत्॥
प्रपितामहंततोन्यस्य नोद्धरेन्नचचालयेदिति ॥ पैतृकंपितृपात्रंन्यस्य न्युब्जीकृत्य तस्मिंस्तदुपरि पैतामहं पितामहपात्रं तदुपरि
पितामहपात्रंचन्यसेत्स्थापयेत् ॥ ब्राह्मणविसर्जनपूर्वकालात्पूर्वंचनोद्धरणीयमित्यर्थः॥एवमेवमैथिलश्रीदत्तादीनांव्यवहारः॥अत्रमिलित
पात्रत्रयन्युब्जकरणेरुद्धघरलिखनंप्रमाणशून्यम्॥मातामहादेः संस्रवानपिपितृकार्यवद्गृहीत्वान्युब्जीकुर्यादितिशूलपाणिः॥एतच्चपात्रंविस
र्जनादिकालात्पूर्वंनोद्धरणीयमित्याह-(यमः) नोद्धरेत्प्रथमंपात्रंपितृणामर्घ्यपातितम् ॥ आवृतास्तत्रतिष्ठंति यावद्विप्रविसर्जनमिति ॥
प्रथमविप्रविसर्जनात्पूर्वं विप्रविसर्जनपूर्वकालात्पूर्वंवा पितृणामर्घ्यपातितं पितृणामर्घ्यंकर्म्मणि न्युब्जीकृतपात्रं नोद्धरेदितिहेमाद्रिः ॥
विप्रविसर्जनपूर्वकालात्पूर्वकालः दक्षिणादानपर्यंतमित्यर्थः ॥ (पराशरः) आश्रित्यप्रथमंपात्रंतिष्ठंतिपितरोनृणाम् ॥ श्राद्धेतस्मान्नत
द्विद्वानुद्धरेत्प्रथमंसुधीरिति॥प्रथमंपितुःपात्रमित्यर्थः(उद्घाटनेदोषमाहतुर्यमापस्तंबौ) उद्धरेत्तुयदापात्रं विवृतंवायदाभवेत् ॥ अभोज्यंत
द्भवेच्छ्राद्धं देवैःपितृगणैःसह ॥ विवृतम् उद्घाटितम् ॥ (कात्यायनः) स्पृष्टमुद्धृतमन्यत्रनीतमुद्घाटितंतथा ॥ पात्रंदृष्ट्वा व्रजंत्याशु पितरः

प्रतपन्तिचेति ॥ स्पृष्टंहस्तादिनासंयोजितम् उद्धृतम् उत्क्षिप्तम्॥अन्यत्रनीतं स्थानान्तरंप्राप्तम् ॥ उद्घाटितम् अपनीतपिधानम्॥पात्रं
अर्घ्यपात्रम्॥ दृष्ट्वापितरः व्रजंति श्राद्धदेशंत्यजन्ति शपंतिच यजमानंप्रतित्वमसुतोऽनायुरधनोभव इत्यादिप्रकारमनिष्टफलंवाचमुत्सृ
जंति ॥ तस्माज्जनसंचाररहितेप्रदेशेस्थापनंकुर्यादित्यर्थः ॥ अथगंधादिदानम् ॥ (तत्र कात्यायनः) अत्रगंधपुष्पधूपदीपतांबूलवाससां
चप्रदानमिति ॥ (विष्णुधर्मोत्तरे) आदौसमर्चयेद्विप्रान्वैश्वदेवनिवेशितान् ॥ निवेशितांश्चपित्रर्थंततःपश्चात्समर्चयेत् ॥(हेमाद्रौ पैठी
नसिरपि) नामगोत्रेसमुच्चार्य्यंदद्याच्छ्रद्धासमन्वितः ॥ पितॄनुदिश्यविप्रेभ्योगंधादीन्देवपूर्वकम् इति ॥ (मात्स्येपि) यादि
व्येत्यर्घ्यमुत्सृज्य दद्याद्गंधादिकंततः ॥ वस्त्रोत्तरंगंधपूर्वंवाक्यंकृत्वायथाविधि ॥ इति वस्त्रोत्तरमित्यादिना समुदायदानवाक्यंगंधस्य
पूर्वंमुच्चारणं वस्त्रस्यांतेउच्चारणमन्येषांमध्येउच्चारणमितिसूचितमित्यर्थः ॥ तत्रप्रदत्तस्यब्राह्मणोपलेपनोपयोज्यत्वमुक्तम् ॥ (ब्रह्मपुरा
णे)श्वेतचंदनकर्पूरकुंकुमानिशुभानितु॥विलेपनार्थंदद्यात्तुयच्चान्यत्पितृवल्लभमिति॥विलेपनंचद्विजानांश्राद्धकर्त्ताकुर्यात्।तएववाकुर्युरित्य
र्थः।अत्रवर्त्तुलंतिलकंनकार्यमितिहेमाद्रिः॥(गंधानाह मार्कंडेयः)चंदनागरुकर्पूरकुंकुमानिप्रदापयेत्॥(वृद्धपराशरोपि)गंधाश्चविविधादेयाः
कर्पूरागुरुमिश्रिताः ॥ (वर्ज्यागंधाः ब्रह्मपुराणे) पूतिकंमृगनाभिंचरोचनांरक्तचंदनम्॥ कालीयकंजोङ्गकञ्चतुरुष्कञ्चापिवर्जयेत् ॥ पूतिकं
सुगंधितृणविशेषः ॥मृगनाभिः कस्तूरी॥रोचना गोरोचनम्॥रक्तचंदनं प्रसिद्धम् ॥ कालीयकजोङ्गके गंधद्रव्यविशेषौ ॥ तुरुष्कःसिह्लकइ
त्यर्थः॥अथपुष्पाणि (वायुपुराणे) शुक्लाःसुमनसःश्रेष्ठास्तथापद्मोत्पलानिच॥गंधवर्णोपपन्नानियानिचान्यानिकृत्स्नशः॥अत्रपद्मोत्पला
निशुक्लेतराण्यपिदेयानि ॥ (अत्र विष्णुः) जलजानिरक्तान्यपिदद्यात् ॥ (मार्कंडेयपुराणे) जात्यश्चसर्वादातव्यामल्लिकाश्वेतयूथिका॥

जलोद्भवानिसर्वाणिकुसुमानिचचंपकम् ॥ जात्यः मालत्यः॥मल्लिका मुद्गराख्यानिपुष्पाणि ॥ श्वेतयूथिकाहेमकुसुमानि ॥ अथवर्ज्या
नि मात्स्ये) पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः ॥ नदेयाःपितृकार्येषु पयश्चैवाविकंतथा ॥ पद्मपत्रंस्थलजंप्रतिषिध्यतेजल
जस्यविहितत्वात् ॥ पारिभद्रोमंदारः ॥ आटरूषो वासकः ॥ (हेमाद्रौ शंखः) उग्रगंधीन्यगन्धीनिचैत्यवृक्षोद्भवानिच ॥
पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच ॥ जलोद्भवानिदेयानिसर्वस्मिन्श्राद्धकर्मणि ॥ रक्तान्यपिविशेषतः ॥ उग्रगंधीनि अहृद्य
गंधीनि ॥ चैत्यवृक्षः श्मशानवृक्षः ॥ धूपद्रव्याणि विष्णुधर्मोत्तरे) धूपस्तुगुग्गुलुर्देयस्तथाचंदनसारजः ॥ अगरुश्चसकर्पूरस्तु
रुष्कस्त्वक्तथैवच॥तुरुष्कः सल्लकीवृक्षः॥त्वक्लवंगम् ॥ (हेमाद्रौ विष्णुः) घृतमधुयुक्तंगुग्गुलंश्रीखंडदेवदारुसरलादिदद्यात् ॥ (ब्रह्म
पुराणे) चंदनागुरुणीचोभेतथैवोशीरपद्मकम् ॥ तुरुष्कंगुग्गुलुश्चैवघृताक्तंयुगपद्दहेत् इति ॥ (वर्ज्यधूपानाहदेवलः) ॥ येहिप्राण्यङ्गजा
धूपाहस्तवाताहताश्चये ॥ नतेश्राद्धेनियोक्तव्यायेचकेचोग्रगंधयः ॥ घृतंनकेवलंदद्याद्दुष्टंवातृणगुग्गुलम् ॥ प्राण्यङ्गजाः कस्तूर्या
दयः ॥ तृणगुग्गुलं राल इतिप्रसिद्धम् ॥ (दीपस्नेहमाह विष्णुः) घृतेनदीपोदातव्यस्तिलतैलेनवापुनः ॥ वसामेदोद्भवंदीपंप्रयतेनविवर्ज
येदिति ॥ वसा पाकात्समुद्धृतोमांसस्नेहः॥मेदस्तुहृदयकमलाच्छादकोमांसविशेषइत्यर्थः ॥ (वस्त्राणि ब्रह्मपुराणे) कौशेयंक्षौमकार्पासं
दुकूलमहतंतथा ॥ श्राद्धेष्वेतानियोदद्यात्कामानाप्नोतिचोत्तमान् ॥ (अहतलक्षणमाह कात्यायनः) ईषद्धौतंनवंश्वेतंसदशंयन्नधा
रितम् ॥ अहतंतद्विजनीयात्सर्वकर्मसुपावनम् ॥ ईषद्धौतम् अकारुधौतम् ॥ स्त्रीश्राद्धेस्त्रीणांवस्त्रादीनिदेयानि ॥ (तथाच विष्णुधर्मोत्तरे
स्त्रीणांश्राद्धेतुसिंदूरंदद्युश्चंडातकानिच ॥ निमंत्रिताभ्यःस्त्रीभ्योयेतेस्युःसौभाग्यसंयुताः ॥ चंडातकानिस्त्रीपरिधानोचितान्यंशुकानि ॥

(ब्रह्मवैवर्त्ते) यज्ञोपवीतंदातव्यंवस्त्राभावेविजानता॥पितॄणांवस्त्रदानस्यफलंतेनाश्नुतेखिलम्॥(आदित्यपुराणे) यज्ञोपवीतदानेनविना श्राद्धंतुनिष्फलम् ॥ तस्माद्यज्ञोपवीतस्यदानमावश्यकंस्मृतम् ॥ (भविष्ये) श्राद्धेषुभक्तिसंयुक्तोजलपूर्णंकमंडलुम् ॥ दद्यादभिनवंरम्यं द्विजेभ्यःपितृतृप्तये ॥ (ब्रह्मपुराणे) आसनानिचरम्याणिपितृभ्योयःप्रयच्छति ॥ सआस्तेसुचिरंकालंत्रिदशैर पिपूजितः ॥ (नृसिंहपुराणे) उपानच्छत्रवस्त्राणिभुक्तंपात्रंकमंडलुम् ॥ शयनासनयानानिदर्पणव्यजनानिच ॥ अन्यत्प्रियतरंगंधं तांबूलंदीपचामरम् ॥ पितृभ्योयःप्रयच्छेत्तुविष्णुलोकंसगच्छति इति ॥ गंधादिदानवाक्यान्युच्चारणीयानि तानिचब्रह्मपुराणे दर्शितानि ॥ इदंवःपाद्यमर्घ्यंचपुष्पधूपविलेपनम् ॥ अयंदीपप्रकाशश्चविश्वेदेवाःसमर्प्यते ॥ अयंवोगंधइत्युक्त्वागंधंदद्यात्सु शोभनम् ॥ इदंवःपुष्पमित्युक्त्वापुष्पाणिचनिवेदयेत् ॥ अयंवोधूपइत्युक्त्वा तदग्रेतुदहेत्ततः ॥ अयंवोदीपइत्युक्त्वादी पंदद्यन्निवेदयेत् ॥ अनङ्गलग्नंसद्वस्त्रंभवेद्यत्तद्युगंशुभम् ॥ इदंवोवस्त्रमित्युक्त्वात्रितयंवानिवेदयेत् ॥ इदंवोमाल्यमित्युक्त्वादद्यान्माल्यं सुशोभनमिति ॥ माल्यं ग्रथितपुष्पाणि ॥ स्वीकारकाले-स्वासनम् ॥ सुगंधः ॥ सुपुष्पाणि ॥ सुधूपः ॥ सुदीपः ॥ स्वाच्छादन मितिप्रतिवचनंब्राह्मणाब्रूयुरितिहेमाद्रिप्रभृतयः ॥ शिष्टाचारश्चापि ॥ एवंगंधादिदानंपदार्थानुसमयेनवाकाण्डानुसमयेननिर्वर्त्य श्रा द्धभूमिशोधनादिकंकुर्यात् ॥ अत्रपदार्थानुसमयएवमुख्यः कात्यायनेनदेवावाहनानन्तरंपित्र्यावाहनोक्तेः ॥ एकैकस्मिन्नपआसिंच तीतिचसर्वपात्रेषुजलप्रक्षेपावगमात् शिष्टाचाराच्च ॥ (भूम्यादिशुद्धिः कालिकापुराणे) निर्वर्त्यब्राह्मणादेशात् क्रियामेवंयथाविधि ॥ पुनर्भूमिंतुसंशोध्यपंक्तेरन्तरमाचरेत् ॥ भाजनानिततोदद्याद्धस्तशौचंपुनःक्रमात् ॥ अस्यार्थः ॥ एवमनेनप्रकारेणब्राह्मणादेशात् ब्राह्मणा

नुज्ञया गंधादिदानांतांक्रियां निष्पाद्यार्चनप्रसङ्गपतितकुशकुसुमादिद्रव्ययुक्तामर्चकपदपातोपहतां भूमिंपतितकुशाद्यपनयने करप
रिमार्जनेन संशोध्य शुचीकृत्य पंक्तेरनन्तरं भोजनपात्रस्थापनपर्यांतदेशं परितोभस्मादिरेखाविरचितमंडलैरन्योन्यव्यवधानं कुर्यात् ॥
भाजनानि भोजनपात्राणि दद्यात् यथोक्तमण्डलेस्थापयेत् ॥ ततो ब्राह्मणहस्तक्षालनायजलंदत्त्वापात्रक्षालनंकुर्यादित्यर्थः ॥
मर्य्यादाहस्तप्रक्षालनयोः पौर्वापर्यविपर्य्यये दोषोमत्स्यपुराणेऽभिहितः ॥ अकृत्वाभस्ममर्य्यादांयःकुर्यात्पाणिशोधनम् ॥ आसुरं
तद्भवेच्छ्राद्धं पितॄणांनोपतिष्ठते ॥ मर्यादाशब्देनात्रपङ्क्तेरंतरमेवोच्यते ॥ (तथाच ब्राह्मे) मंडलानिचकार्य्याणिनीवारैश्चूर्णकैः शुभैः ॥
गौरमृत्तिकयावापिप्रणीतेनाथभस्मना ॥ पाषाणचूर्णसंकीर्णमाहृतञ्चविवर्जयेत् ॥ (भृगुणाश्राद्धतत्त्वेविशेषोक्तम्) ॥ भस्मनावा
रिणावापिकारयेन्मण्डलंततः ॥ चतुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु ॥ मंडालाकृतिवैश्यस्य शूद्रस्याभ्युक्षणंस्मृतम् ॥ मण्ड
लाकृति वर्तुलाकारम् ॥ अथाग्नौकरणनिर्णयः ॥ तत्राग्नौकरणहोमः किं सव्येनकार्य्योऽपसव्येनवा इतिसन्देहेचिन्त्यते ॥ तत्रस्वाहादि
दैविकधर्मयुक्तेनयज्ञोपवीतिनाकार्य्यः स्वधादिपैतृकधर्मयुक्तेनप्राचीनावीतिनावाकार्य्यइतिमन्यन्ते ॥तथाहि—(कात्यायनः)अग्नौकरण
होमश्चकर्त्तव्यउपवीतिना ॥ प्राङ्मुखेनैवदेवेभ्योजुहोतीतिश्रुतिश्रुतेः ॥ अपसव्येनवाकार्योदक्षिणाभिमुखेनच इति ॥ कर्कभाष्येपि
सव्यंकृत्वाप्राङ्मुखउपविश्यदक्षिणंजान्वाच्य मेक्षणेन द्वेआहुती देवेभ्योजुहोति अग्नयेकव्यवाहनायस्वाहा सोमायपितृमते स्वाहा इति॥
(शौनकोपि) स्वाहाकारेणहोमेतुभवेद्यज्ञोपवीतवान् ॥ तत्रप्रागग्नयेहुत्वापश्चात्सोमायहूयते इति ॥अग्नौकरणंचप्राचीनावीत्युपवीतीवाकु
र्य्यादितिमाधवः॥(याज्ञवल्क्यः) अग्नौकरिष्यन्नादायपृच्छत्यन्नंघृतप्लुतम् ॥ कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौपितृयज्ञवत्॥अस्यार्थः—अग्नौकरि

ष्यन्घृतप्लुतंघृताक्तमन्नमादायब्राह्मणान्पृच्छेदग्नौकरिष्य इति ततस्तैःकुरुष्वेत्यनुज्ञातःप्राचीनावीत्यग्निमुपसमाधाय मेक्षणेनावदायजुहुयात्
ष्यन्घृतप्लुतंघृताक्तमन्नमादायब्राह्मणान्पृच्छेदग्नौकरिष्य इति ततस्तैःकुरुष्वेत्यनुज्ञातःप्राचीनावीत्यग्निमुपसमाधाय मेक्षणेनावदायजुहुयात् इतिपिंडपितृयज्ञकल्पेनाग्नौहुत्वाहुतशेषंपित्रादिभाजनेषुदद्यादित्यर्थः। अयंहोमस्तु
अग्नयेकव्यवाहनायस्वाहा॥ सोमायपितृमतेस्वाहा॥ इतिपिंडपितृयज्ञकल्पेनाग्नौहुत्वाहुतशेषंपित्रादिभाजनेषुदद्यादित्यर्थः। अयंहोमस्तु
साग्निकानाम्॥ निरग्निकानातुदैवधर्मयुक्तोदेवविप्रकरे पैतृकधर्मयुक्तः पितृविप्रकरेवाहोमंकुर्यात्॥ (तथाच हेमाद्रौ) साग्निरग्नावन
ग्निस्तुद्विजपाणौतथाप्सुवा॥ कुर्यादग्नौक्रियांनित्यंलौकिकेनेतिनिश्चितम्॥ (मनुस्मृतावपि) अग्न्यभावेतुविप्रस्यपाणावे
वोपपादयेत्॥ योह्यग्निःसद्विजोविप्रैर्मंत्रदर्शिभिरुच्यते॥ (हेमाद्रौ) यैर्दैविककर्म्मधर्मेणयज्ञोपवीतेनस्वाहाकारेणचायंहोमः
क्रियते तैर्दैविकविप्रपाणौकर्त्तव्यः यैश्चपैतृककर्म्मधर्मेणप्राचीनावीतेनस्वधाशब्देनक्रियतेतैस्तु पैतृकविप्रदक्षिणकरेकार्यः॥ तत्राऽ
स्माकंयजुर्वेदीयगौडानां तु प्राचीनावीतेनएव॥ तथाच (योगियाज्ञवल्क्यः छंदोगाजुहुयुःसव्येनापसव्येनयाजुषा इति॥ छंदोगाःसाम
गा इत्यर्थः॥(यजुर्वेदीयश्राद्धतत्त्वेपि पिण्डपितृयज्ञेशतपथश्रुतिः)॥ पातितवामजानुनासजघनेनप्राचीनावीतीभूत्वादक्षिणामुख आसी
नइत्युपक्रम्य द्वेआहुतीजुहोति॥ ॐ अग्नयेकव्यवाहनायस्वाहा॥ॐ सोमायपितृमतेस्वाहा इति॥ एवमेवहरिहरहलायुधकर्कवासुदेव
हरिशर्मशूलपाणिराजमुकुटाचार्यचूडामणिप्रभृतयः॥ एवंचपितृभक्तौसव्येन इतिलिखनंप्रमाणशून्यमितिरघुनंदनः॥ तत्रसव्यपक्षेप्रथ
मोपविष्टस्यदेवविप्रस्यपाणौहोमः॥(तदुक्तं वायुपुराणे) वैश्वदेवेपदैकस्मिन् भवेयुर्बहवोद्विजाः॥तदैकपाणौहोतव्यंस्य।द्विर्धिर्विहितस्त
थाइति॥ अपसव्यपक्षेपैतृकपंक्त्युपविष्टस्यप्रथमस्यपाणावेव॥ तथाच (कात्यायनः) पैत्र्येयःपङ्क्तिमूर्द्धन्यस्तस्यपाणावनग्निकः॥
हुत्वामंत्रवदन्येषांतूष्णींपात्रेपुनिक्षिपेत्॥ इति पात्रेषुपितामहादिपात्रेष्वित्यर्थः॥ यत्रदैवविप्रकरेहोमस्तदापितृमातामहश्राद्धद्वयाथमपि

सकृदेवानुष्ठेयः ॥ यदापित्र्यविप्रकरे होमश्चिकीर्षेत् तदापितृपंक्त्युपविष्टेमुख्यद्विजकरेहुत्वामातामहस्यसंबंधी यो ब्राह्मणस्तस्यापि करे पृथग्गृहोमंकुर्य्यादिति हेमाद्रिमाधवौ ॥ एतत्तुसाग्निकपरम् ॥ (तदुक्तं तत्रैव कात्यायनेन) मातामहस्यभेदेपिकुर्यात्तत्रेणसाग्निकइति ॥ हस्तेग्नौकरणंकुर्यादग्नौवासाग्निकोद्विजः ॥ इतिपराशरस्मरणात् ॥ निरग्निकस्तुसकृदेवकुर्यात् ॥ एवमेवपितृभक्तौश्रीदत्तः ॥ तत्रावाहनतिल विकिरणाऽग्नौकरणजपाऽन्नविकिरणादिकंसकृदेवानुष्ठेयमिति ॥ शिष्टाअप्येवमेवकुर्वंति ॥ पात्राभावे ब्राह्मणस्थानेदर्भबटुनिवेशेजलादी नामवकाशः कार्यः॥ (तथाच मात्स्ये) अग्न्यभावेतुविप्रस्यपाणौवाथजलेपिवा ॥ अजकर्णेऽश्वकर्णेवागोष्ठेवाथशिवालये इति ॥ अग्न्यभावे विप्रपाणौ विप्राभावेजलादिष्वित्यर्थः (हेमाद्रौ शंखः) अजस्यदक्षिणेकर्णे पाणौविप्रस्यदक्षिणे ॥ अप्सुचैवकुशस्तंबे अग्निक त्यायनोऽ ब्रवीत् ॥ रजतेचसुवर्णेचनित्यंवसतिपावक इति ॥ अयंजलादौहोमः सव्येनाऽपसव्येनवाकुर्यात् ॥ अत्राऽत्रेव्यंजनयोगोनकर्तव्यः ॥ (तथाच विष्णुपुराणे) जुहुयाद्व्यंजनक्षारवर्ज्जमन्नंततोऽतले इति ॥ व्यंजनंशाकादि ॥ क्षाराणिलवणरसवंतिद्रव्याणीत्यर्थः ॥ अथ हुताव शिष्टप्रतिपत्तिः याज्ञवल्क्याऽऽह ॥ हुतशेषंप्रदद्यात्तु भाजनेषुसमाहितः ॥ यथालाभोपपन्नेषुरौप्येषुतुविशेषतः ॥ अत्रपितृग्रियोरौप्य इति वचनात् पैतृकविप्रभाजनेष्वितिगम्यते ॥ (हेमाद्रौ वसिष्ठः) पित्र्येविप्रकरे हुत्वा शेषंपात्रेषुनिक्षिपेत् ॥ पिंडेभ्यः शेषयेत्किंचिन्नदद्याद्वैश्व देविके ॥ (श्राद्धतत्त्वे यमोपि) अग्नौकरणशेषंतु पित्र्येषुप्रतिपादयेत् ॥ प्रतिपाद्यपितॄणांतुनदद्याद्वैश्वदेविके ॥ (ब्रह्मांडेपि) अग्नौकरणशे षंतुनदद्याद्वैश्वदेविके ॥ नहिस्मृताः शेषभाजो विश्वेदेवाः पुराणगैरिति ॥ अयंपक्षःसाग्निकानां पितृविप्रकरेजुह्वतांच ॥ निरग्निरपि दैविक ब्राह्मणपाणौहोमंकृत्वाशेषंपित्र्यब्राह्मणपात्रेष्वेवनिक्षिपेत् ॥ (तथाच वायुपुराणे) हुत्वादैवकरेऽनग्निः शेषंपित्र्येनिवेदयेत् ॥ नहि

स्मृता शेषभाजोविश्वेदेवाः पुराणगैः ॥ (हेमाद्रौ यमोपि) दैव विप्रकरेऽनग्निः कृत्वाग्नौकरणंद्विजः ॥ शेषयेत्पितृविप्रेभ्यः पिंडार्थं चावशेषयेत् ॥ (पाणितलेहुतशेषान्नस्यविनियोगमाह गृह्यपरिशिष्टे कात्यायनः) यच्चपाणितलेदत्तंयच्चान्यदुपकल्पितम् ॥ एकीभावेनभोक्तव्यंपृथग्भावोनविद्यते ॥ अन्नंपाणितलेदत्तंपूर्वमश्नंत्यबुद्धयः ॥ पितरस्तेनतृप्यंतिशेषान्नं न लभंतिते इति ॥ इयं व्यवस्थासपात्रकेज्ञेया ॥ पात्राऽभावेजलहुतशेषान्नंसव्येनदेवपात्रद्वये अपसव्येन पितृपात्रेषुदद्यात् ॥ अनाहिताग्नेर्विप्रस्ययदग्नौकरणंहुतम् ॥ वैश्वदेवायदातव्यं पश्चात्पित्रेनिवेदयेदिति श्राद्धतत्त्वेसमुद्रकरधृतवचनात् ॥ एवमेवमैथिलश्रीदत्तरुद्रधरप्रभृतीनांव्यवहारः ॥ इत्यग्नौकरणादि ॥ अत्रपरकीयगृहे श्राद्धकरणेभूस्वामिपितृभ्योऽन्नदानम् ॥ (तथाच ब्रह्मपुराणश्राद्धतत्त्वयोः) परकीयगृहेयस्तु स्वान्पितॄंस्तर्पयेज्जडः ॥ तद्भूमिस्वामिनस्तस्यहरन्तिपितरोबलात् ॥ (यमोपि) परकीयप्रदेशेषुपितॄणांनिर्वपेत्तुयः ॥ तद्भूमिस्वामिपितृभिः श्राद्धकर्मविहन्यते ॥ अग्रभागंततस्तेभ्योदद्यान्मूल्यंचजीवतामिति ॥ भूस्वामिपितृभ्योऽन्नंप्रथमतोदेयम् ॥ पार्वणादौप्राचीनावीतित्वादिनांदीमुखेउपवीतित्वादिना इतिश्राद्धतत्त्वादयः ॥ स्वगृहकरणेभूस्वाम्यन्नदानाभावएव ॥ (अथपरिवेषणमाहप्रचेताः) हुतशेषंपितृभ्यस्तुदत्त्वान्नंपरिवेषयेत् ॥ हविष्यंमधुमांसानिपायसापूपमेवच ॥ मांसंकलौनदेयं नकलौपलपैतृकमितिश्रीमद्भागवतवाक्यात् ॥ (शौनकः) पाकंसर्वमुपानीय संवेद्यच पृथक्पृथक् ॥ विधिनादेवपूर्वंतुपरिवेषणमाचरेत् ॥ (तत्रप्रकारमाह मनुः) पाणिभ्यामुपसंगृह्य स्वयमन्नस्यवर्द्धितम् ॥ विप्रांतिके पितॄन्ध्यायञ्छनकैरुपनिक्षिपेत् ॥ अस्यार्थः ॥ अन्नस्यवर्द्धितम् अन्नेनपूर्णंभाजनम् अन्नस्येतितृतीयार्थेषष्ठी ॥ रसवत्पाकागाराद्धाभ्यांकराभ्यांस्वयंगृहीत्वातत्रत्यमन्नं विप्रांतिके भोजनार्थंपात्रे शनकैः यथाभाण्डभेदः शब्दोवानोत्पद्यतेतथा निक्षिपेत् परिवेषयेत् ॥ स्वय

मितिवचनात्स्वयंपरिवेषणंमुख्यम् ॥ (अतएव वायुपुराणे) फलस्यानंतताप्रोक्तास्वयंचपरिवेषणे ॥ स्वयमितियजमानेन ॥ (यत्तुभ
विष्योत्तरे) भार्य्ययाश्राद्धकालेतुप्रशस्तंपरिवेषणम् ॥ (वायुपुराणे परिवेषणंप्रशस्तंस्यात्पितृकर्मणिभार्यया ॥ पितृदेवमनुष्याणां
स्त्रीसहायोयतःस्मृत इति ॥ भार्य्ययापिसवर्णयैवकर्त्तव्यंनान्यवर्णया इत्यर्थः ॥ इतिहेतुवन्निगदान्मुख्यतयायजमानकर्तृकएवपरिवेषणं
भार्यायाः सहकारिमात्रत्वं नतुमुख्यत्वमितिगम्यते ॥ (मात्स्ये) उभाभ्यामथहस्ताभ्यामाहृत्यपरिवेषयेत् ॥ प्रशांतचित्तः
सतिलदर्भपाणिर्विशेषतः ॥ (ब्रह्माण्डे) नापवित्रेणनैकेनहस्तेननविनाकुशम् ॥ नायसेनैवपात्रेणश्राद्धेतुपरिवेषयेत् ॥ आयसेन लोह
पात्रेण ॥(ब्राह्मणसर्वस्वे वसिष्ठोपि) आयसेनतुपात्रेणयदन्नंसंप्रदीयते॥भोक्ताविष्ठासमंभुंक्ते दाताचनरकं व्रजेत् इति॥केचित्आयसंमृन्मय
मितिवदंति तन्न ॥ सीसकायसरीतिपात्राण्ययज्ञियानीतिपैठीनसिस्मरणात् ॥ (हेमाद्रौ कार्ष्णाजिनिः) ॥ दर्व्यादेयंशृतान्नंचसमस्तंव्यंज
नानिच ॥ उदकंयच्चपक्वान्नंनोदर्व्यातुकदाचन इति ॥ शृतान्नंपायसौदनादि ॥ पक्वान्नं मोदकादि ॥ उदकादिदानेदर्वीनिषेधात्॥पात्रान्तरेण
दानंकर्त्तव्यमित्यर्थः ॥ (शातातपः) हस्तदत्तास्तुयेस्नेहा लवणं व्यंजनादयः ॥ पितृणांनोपतिष्ठन्तिभोक्ताभुंजीतकिल्बिषम् ॥
हस्तदत्ता हस्तेनदत्ताः ॥ स्नेहाः घृतादयः ॥ (वसिष्ठः) तस्मादंतरितं देयंपर्णेनाथतृणेनवा ॥ प्रदद्यान्नतुहस्तेननायसेनकदा
चन ॥ (संग्रहे) अपक्वंतैलपक्वंचहस्तेनैवप्रदीयते ॥ (मत्स्यपुराणे) यत्किंचिन्मधुनायुक्तं गोक्षीरघृतपायसम् ॥ दत्त
मक्षय्यमित्याहुःपितरःपूर्वदेवताः ॥ (स्मृत्यन्तरे) अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसम् ॥ शाकादिपुरतः स्थाप्य भक्ष्यं
भोज्यमथवामतः ॥ उक्तंचमुनिभिःश्राद्धेविधिर्वाजसनेयिनाम् ॥ परिवेषणंभूमावेवस्थितेषुपात्रेषुकर्त्तव्यम् ॥ नतुदारुशिलादिपा

त्रान्तराद्युपरिस्थितेषु ॥ (तदाह मनुः) गणांश्चसूपशाकाद्यान्पयोदधिघृतंमधु ॥ विन्यसेत्प्रयतःसम्यग्भूमावेवसमाहितः ॥ प्रयतः अनन्यमनाः ॥ भूमावेवेतिभूमौनिहितेषुभाजनेष्वित्यर्थः ॥ (ब्रह्मपुराणे) ततोमधुघृताक्तंतुसोष्णमन्नंतिलान्वितम् ॥ परिवेषयेदितिशेषः॥ (मनुस्मृतौ) ॥ यावदुष्णंभवत्यन्नंयावदश्नंतिवाग्यताः ॥ पितरस्तावदश्नंतियावन्नोक्ताहविर्गुणाः ॥ वाग्यताः मौनिनः॥ (जाबालिः) इष्टमुष्णंहविष्यंचदद्यादन्नंशनैःशनैः ॥ इष्टं पितॄणांद्विजानांचापेक्षितम्॥(पारस्करः)मधुवाताइतित्र्यृचंमध्वित्येतत्रिकंजपेत्॥इतिपरिवेषणम्॥ अथपात्रालंभजपाङ्गुष्ठनिवेशनानि ॥ (तत्राह कात्यायनः) ॥ हुतशेषंदत्त्वापात्रमालभ्यजपति पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखे अमृतेअमृतंजुहोमिस्वाहेतिवैष्णव्यर्चायजुषावाङ्गुष्ठमन्नेवगाह्यापहताइतितिलान्प्रकीर्य्योष्णंस्विष्टमन्नंदद्यादिति। अस्यार्थः—पृथिवीतेपात्रमित्यादिस्वाहांतमुच्चार्य्यानन्तर मिदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपांसुरेइत्यंतां वैष्णवीमृचंजस्वानंतरविष्णोहव्यंरक्षस्वेतियजुषोच्चार्य्यपित्र्यपात्रेनिहितेअग्नौकरणशेषेऽन्नेऽङ्गुष्ठमवगाह्यनिवेश्यापहताइत्यादिकृत्वान्नंदद्यादित्यर्थः। जुहोम्यग्नेस्वाहाशब्दःकातीयसूत्रेउक्तः तत्तुदैवेपैतृकेतुस्वधाशब्दएव। प्रचेतसातुपात्रालंभजपाङ्गुष्ठावगाहनानिपरिवेषणात्पश्चादेवोक्तानि। सर्वंचप्रकृतंदत्त्वापात्रमालभ्यसंजपेत्। प्रकृतं प्रस्तुतश्राद्धार्थतया संपादित भक्ष्यभोज्यादिकं सर्वं दत्त्वा परिवेष्य जपेत। पृथिवीतेपात्रमित्यादीतिशेषः(याज्ञवल्क्योपि) दत्त्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणम् ॥ कृत्वेदंविष्णुरित्यन्नेद्विजाङ्गुष्ठंनिवेशयेत् ॥ (अस्यार्थो मिताक्षरायाम्) अन्नमोदनसूपपायसघृतादिकं भाजनेषुदत्त्वापृथिवीतेपात्रमित्यादिनामंत्रेणपात्राभिमंत्रणंकृत्वाइदं विष्णुर्विचक्रमे इत्यनयार्चा अन्नेद्विजाङ्गुष्ठं निवेशयेत्। तत्रवैश्वदेवेयज्ञोपवीती विष्णोहव्यं रक्षेति पित्र्येप्राचीनावीती विष्णोकव्यंरक्षेति। विष्णोहव्यंचकव्यंचब्रूयाद्रक्षेतिवैक्रमात्।

इतिमनुस्मरणात् इत्यर्थः ॥ (यमस्मृतावपि) ॥ विष्णोहव्यंचकव्यंच ब्रूयाद्रक्षेतिचक्रमात् ॥ वारिष्वग्रप्रदत्तेषु तमङ्गुष्ठंनिवेशये
दिति ॥ विष्णोहव्यंरक्षस्वेतिदैवेब्रूयात् ॥ विष्णोकव्यंरक्षस्वेति पित्र्येब्रूयात् ॥ तमिति पूर्वमन्त्रेनिवेशितमंगुष्ठम् ॥ अग्रप्रदत्तेषु ब्राह्मणा
ग्रेस्थापितेषु जलेषु अन्नवत्पूर्वमेवपरिविष्टेषुवाइत्यर्थः।एवमेवहेमाद्रिमदनरत्नपितृभक्तिषु।अत्रकृष्णहव्यमिदंरक्षमदीयमितिश्राद्धविवेके
रुद्रधरलिखनंप्रमाणाभावादयुक्तम् ॥ (ब्रह्मपुराणेपि) अथदत्त्वासमग्रंतु जलान्तंभोजनंक्रमात् ॥ विश्वेभ्यस्त्वथदेवेभ्यःकुर्याच्चप्रति
पादनम् ॥ द्विजाङ्गुष्ठंगृहीत्वातुपठेन्मंत्रंचवाग्यतः ॥ पृथिवीतेपात्रमित्यन्नममृतंचिंतयेत्पठेत् ॥ विष्णोहव्यमिदंरक्षमदीयमितिकी
र्तयेत् ॥ पुनस्तेनैवमंत्रेणपितृभ्यश्चनिवेदयेत् ॥ एकैकस्याथविप्रस्य गृहीत्वाङ्गुष्ठमादरादिति ॥ कुशविप्रपक्षेतुस्वाङ्गुष्ठमनखंनिवेशयेदि
तिगयाश्राद्धपद्धतिकारः । अत्रदेवपात्रमुत्तानपाणिभ्यां पितृपात्रंचन्युब्जाभ्यांव्यस्ताभ्यामालभेत । (तथाच यमः) पित्र्येऽनुत्तानपाणि
भ्यामुत्तानाभ्यांचदैवते। एवमेवहेमाद्रिमदनरत्नप्रभृतयः । (पाराशरीये) पितृपात्रसमालंभेकरयोर्व्यस्ततामता इति । (अन्नमध्येऽङ्गुष्ठस्य
भ्रामणमुक्तं यमेन) अंगुष्ठमात्रोभगवान् विष्णुःपर्य्यटतेमहीम् । राक्षसानांवधार्थाय कोमेऽद्यप्रहरिष्यति । तस्माच्छ्राद्धेषुसर्वेषु ह्यंगुष्ठग्र
हणंस्मृतम् ॥ निरङ्गुष्ठंतुयच्छ्राद्धंबहिर्जानुतुयद्धृतम् ॥ तत्सर्वमसुरैर्भुक्तं सर्वमेवासुरंभवेत् ॥ (हारीतोपि) निरंगुष्ठंतुयच्छ्राद्धंनत
त्प्रीणातिवैपितॄन् । तस्मादंगुष्ठमाक्रम्यजपेन्मंत्रंसमाहितः । मंत्रस्त्विदंविष्णुर्विचक्रमइति । (विशेषमाह धौम्यः) उत्तानेनतुहस्तेनद्विजा
ङ्गुष्ठनिवेशनम् ॥ यःकरोतिनरोमोहात्तद्वैरक्षांसिगच्छति ॥ अतोद्विजहस्तमुत्तानीकृत्यअङ्गुष्ठंनिवेशयेत् यजमानेनापिस्वकीयेनोत्ताने
नकरेणांगुष्ठग्रहणंनकार्य्यमित्यर्थः । अत्रशिष्टास्तु इदमन्नम् इमाआप इदमाज्यम् इदंहविः इत्यन्नादिष्वङ्गुष्ठनिवेशनंकुर्वन्ति । अत्रअन्नो

परिप्रचुरतिलान्निक्षिपेदितिमैथिलरुद्रधरलिखनंप्रमाणशून्यम् । सर्वदाचतिलाग्राह्याः पितृकृत्येविशेषतः । भोज्यपात्रेतिलान्दृष्ट्वानिरा
शाःपितरोगताइतिपृथ्वीचंद्रोदयेपराशरस्मरणात् । अतोभोजनपात्रपरितोविकिरेदितिसमीचीनम् ॥ अथान्नसंकल्पः ॥ (तथाच प्रभा
सखण्डे) द्विजपात्रेषुदत्त्वान्नंकृत्स्नंसंकल्पमाचरेत् । दर्व्यादिस्थेननोतेषांसंबंधोदृश्यतेयतः ॥ (अत्रिः) ॥ अकृतेत्वन्नसंकल्पे यःपात्रं
चोद्धरेद्द्विजः । वृथाभवतितच्छ्राद्धं दाताचनरकंव्रजेत् । (धर्मप्रदीपे) सिद्धान्नस्यतुसंकल्पोभूमावेवप्रदीयते । हस्तेषुदीयमानंयत्पितॄणां
नोपतिष्ठति । (ब्राह्मे) पितृकर्म्मणिवामेतद्दैवेदद्यात्तुदक्षिणे । संकल्पोदकदानंस्यान्नित्यगश्राद्धेयथारुचि । (हेमाद्रावत्रिः) संबंधनामगो
त्राणि इदमन्नंततः स्वधा । (ब्राह्मेपि) अमुकामुकगोत्रैतत्तुभ्यमन्नंस्वधानमः ॥ अथसावित्रीजपादि । (तत्र पारस्करः) संकल्प्यपितृदेवे
भ्यः सावित्रीमधुमज्जपः । श्राद्धंनिवेद्यापोशानं जुषप्रैषोऽथभोजनम् । अस्यार्थः—देवेभ्यःपितृभ्यश्चान्नंसंकल्प्य यथोक्तविधिनात्यक्त्वा
सावित्रीं सवितृदैवत्यांगायत्रींमधुमतींचजप्त्वाश्राद्धंचनिवेद्य दर्शयिष्यमाणेनप्रकारेण श्राद्धस्याच्छिद्रवाचनंकृत्वाऽऽपोशानजलंचद्विज
करेदत्त्वा जुषध्वमितिप्रैषेण भोजयेदित्यर्थः । मधुसेचनादिकमच्छिद्रवाचनप्रकारंचाह—(यमः) अन्नंमधुमयंकृत्वामधुवातेतिमंत्रितम् ।
अन्नहीनंक्रियाहीनं मंत्रहीनंचयद्भवेत् । सर्वमच्छिद्रमित्युक्त्वा ततोयत्नेनभोजयेत् । एतच्चापोशानदानात्पूर्वमेवकर्त्तव्यंपश्चात्करणेद्विप्र
चेतसा दोषस्योक्तत्वात् ॥ आपोशानकराग्राणामच्छिद्रस्यतुभाषणात् ॥ निराशाःपितरोयांति देवैःसहनसंशयः ॥ (पारस्करः) गाय
त्रींत्रिःसकृद्वापिजपेद्व्याहृतिपूर्विकाम् । मधुवाताइतित्र्यृचंमध्वित्येतत्त्रिकंजपेत् । (याज्ञवल्क्योपि) सव्याहृतिकांगायत्रींमधुवाताइति
त्र्यृचम् । जप्त्वायथासुखंवाच्यंभुंजीरंस्तेतिवाग्यताः । अस्यार्थोमिताक्षरायाम । अनंतरं विश्वेभ्योदेवेभ्य इदमन्नंपरिविष्टंपरिवेक्ष्यमाणं

चातृप्तेरितियवोदकेनदैवेनिवेद्य तथापित्रेअमुकगोत्रायामुकशर्मणे इदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचा।तृप्तेरितितिलोदकप्रदानेनपित्रेनिवेद्य
एव पितामहादिभ्यश्चनिवेद्यानंतरमापोशानंदत्त्वापूर्वोक्ताभिर्व्याहृतिभिःसहितां गायत्रीं मधुवाता इतित्र्यृचंमधुमधुमध्विवतित्रिवारंजप्त्वा
यथासुखंजुषध्वमितिब्रूयात्।तेपिब्राह्मणावाग्यतामौनिनोभुंजीरन्नित्यर्थः।(जपेविशेषमाह कात्यायनः)अश्नत्सुजपेत्व्याहृतिपूर्वांगायत्रींत्रिः
सकृद्वारक्षोघ्नीःपितृमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानिचपवित्राणीति ॥ अस्यार्थः॥ अश्नत्सुभुञ्जानेषुप्रणवव्याहृतियुक्तांगायत्रीं त्रिः वार
त्रयं वा सकृत् वारैकंजपेत् पठेत् रक्षोघ्नीः कृणुष्वपाजइत्याद्याः पंचर्चः ॥ पितृमंत्रान्उदीरतामवर इत्यादि त्रयोदशर्चः॥पुरुषसूक्तं सहस्र
शीर्षेत्यादिषोडशर्चः ॥ अप्रतिरथम् आशुःशिशानइत्याद्याद्वादशर्चः॥ अन्यानिपवित्राणि सप्तव्याधाइत्यादीनिपितृरुचिस्तुत्यादिबोधका
निश्रुतिपुराणादिप्रतिपाद्यानीत्यर्थः ॥ (विष्णुपुराणे) रक्षोघ्नमंत्रपठनं भूमेरास्तरणंतिलैः ॥ कृत्वाध्येयाश्चपितरस्तएवद्विजसत्तमाः॥
(मनुस्मृतौ) स्वाध्यायंश्रावयेत्पित्र्ये धर्मशास्त्राणिचैवहि ॥ आख्यानानीतिहासांश्च पुराणानिखिलानिचेति ॥ स्वाधायः वेदः ॥ धर्म
शास्त्राणिमन्वादिप्रणीताग्रंथाः॥आख्यानानिसौपर्णमैत्रावरुणादीनिपौराणानिसप्तव्याधाख्यानप्रभृतीनि॥इतिहासाःमहाभारतादयः॥पुरा
णानि ब्रह्मपुराणादीनि ॥ खिलानिश्रीसूक्तमहानाम्निकां शिवसंकल्पादीनि ॥ एतानिभुञ्जानान्ब्राह्मणाञ्श्रावयेदित्यर्थः ॥ (मात्स्येपि)
स्वाध्यायंश्रावयेत्पैत्र्येपुराणानिखिलानिच ॥ ब्रह्मविष्ण्वर्करुद्राणांस्तोत्राणिविविधानिच ॥ (शंखलिखितौ) पवित्रपाणिर्दर्भेष्वासीनो
मधुवाताइति जपेत्॥पवित्रपाणिःदर्भहस्तः॥दर्भेष्वासीनःदर्भोपर्युपविष्टःमधुवाताऽऋतायतइतितिस्रःऋचोजपेदित्यर्थः॥अत्रगायत्रीमधु
वाताइतिजपःप्राचीनावीतिनेवकार्यइतिहेमाद्रिः ॥ (ब्रह्मपुराणे) वीणावंशध्वनिंवाथविप्रेभ्यःसन्निवेदयेदिति ॥ अन्यान्यपिसमाचारात्

पवित्राणिजप्यानीतिहेमाद्रिः ॥ अयंचसर्वोपिजप उपवीतिनाकार्यः ॥(तथाच हेमाद्रिब्रह्माण्डपुराणयोः) कुशपाणिःकुशासीनउपवीती
जपेत्ततः ॥ वेदोक्तानिपवित्राणिपुराणानिखिलानिचेति ॥(हेमाद्रिमाधवयोर्जमदग्निरपि) अपसव्येनकर्त्तव्यंसर्वंश्राद्धंयथाविधि॥ सूक्त
स्तोत्रजपंमुक्त्वाविप्राणांचविसर्जनम्॥ (तत्रैववृद्धशातातपोऽपि) कृतापसव्यःकुर्वीतमुक्त्वायस्त्वश्नताञ्जपः॥अस्यार्थोहेमाद्रिणाकृतः॥
अश्नतामित्यश्नत्सुब्राह्मणेषुयजमानेनक्रियमाणोजप इत्यर्थः॥अश्नतामितिग्रहणात् ब्राह्मणभोजनकालादन्यत्रयोजपस्तत्प्राचीनावीतमेव
कर्त्तव्यमित्यर्थः ॥ मैथिलास्त्वपसव्येनैवकुर्वंतितत्प्रमाणाऽभावादयुक्तम् ॥ ब्राह्मणद्वाराकारितेतुप्राचीनोपवीतएवयुक्तइतिविवेकः ॥अथ
विकिरादिः॥(तत्र कात्यायनः) तृप्ताञ्ज्ञात्वाऽन्नंप्रकीर्य्यसकृत्सकृदपोदत्त्वापूर्ववद्गायत्रींजप्त्वामधुमतीमधुमध्वितिचतृप्ताःस्थेतिपृच्छति
तृप्ताःस्मेत्यनुज्ञातः॥शेषमन्ननुमज्ञाप्येति॥अस्यार्थः—तृप्तान्ब्राह्मणाननुमानेनविज्ञायप्रकृतसर्वजातीयमन्नमेकस्मिन्पात्रेगृहीत्वावक्ष्यमाण
संस्कारयुक्तायांभुविप्रकीर्य्याऽऽचम्यविरलंप्रक्षिप्यपात्रमौनोभयविमोचनार्थंसकृत्सकृदपःप्रदायत्रिःसकृद्वागायत्रींमधुवातेत्यादिऋक्त्रयञ्च
जप्त्वामधुशब्दंचत्रिरुक्त्वातृप्ताःस्थेतिविप्रान्यजमानःपृच्छेत्॥तैश्चतृप्ताःस्मइत्युक्ते शेषमन्नंकिंक्रियताम् इत्यन्नशेषविनियोगानुज्ञाभ्यर्थने
कृतेविप्रैःश्रेष्ठैःसहभुज्यतामित्युक्तेसतिपिंडानदद्यादित्युत्तरेणसंबंधइत्यर्थः॥(पाद्ममात्स्ययोः)तृप्ताञ्ज्ञात्वाततःकुर्याद्विकिरंसार्ववर्णिकम्।
सोदकंचान्नमुद्धृत्यसतिलंप्रक्षिपेद्भुवि ॥ (मनुरपि)॥ सार्ववर्णिकमन्नाद्यंसन्नीयाप्लाव्यवारिणा॥समुत्सृजेद्भुक्तवतामग्रतोविकिरन्भुवि ॥
अस्यार्थः॥वर्णशब्दः प्रकारवाचा ॥ सर्वप्रकारकमन्नादिकंव्यंजनादिभिरेकीकृत्यउदकेनाप्लावयित्वाकृतभोजनानांब्राह्मणानांपुरताभूमौ
दर्भेषुनिक्षिपेदित्यर्थः ॥(तत्रैव) असंस्कृतप्रमीतानांत्यागिनांकुलयोषिताम् ॥ उच्छिष्टंभागधेयंस्याद्दर्भेषुविकिरश्चयः ॥ (श्राद्धतत्त्वे

ब्राह्मेच) उच्छिष्टेसतिलान्दर्भान्दक्षिणाग्रान्निधापयेत् । यदन्ननिवेदितंकिंचित्पितृभ्यश्चाथतत्रच ।।तस्मात्तस्माच्च भागंतुगृहीत्वाचमसेशुभे ।।
दत्त्वामृताभिधानंतुविप्रेभ्यश्चसकृत्सकृदिति ।। उच्छिष्टइत्युच्छिष्टसन्निधावित्यर्थः ।। सापिंड्यादौक्षयाहेचएकोद्दिष्टेचपार्वणे ।। विकिरेण
विनाकुर्यात्तंवृथामनुरब्रवीत् ।। (विकिरमंत्रमाहहेमाद्रौबृहस्पतिः) उपस्पृष्टोदकानांचब्राह्मणानांतथाग्रतः ।। सोदकंविकिरेदन्नंमंत्रंचेममुदा
हरेत् ।।अनग्निदग्धायेजीवायेऽग्निदग्धाःकुलेमम ।। भूमौदत्तेनतृप्यन्तुतृप्तायांतुपरांगतिम् ।। (मात्स्येपि) समुत्सृजेद्भुक्तवतामग्रतोविकि
रन्भुवि ।। अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ।। भूमौदत्तेनतृप्यंतुतृप्तायान्तुपरांगतिम् ।। येषांनमातानपितानबंधुर्नचान्नसिद्धि
र्नतथान्नमस्ति ।। तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयांतुलोकायसुखायतेतु ।। (प्राचीनपद्धतिश्राद्धतत्त्वयोरपि) अग्निदग्धाश्चयेजीवायेऽप्यद
ग्धाः कुलेमम ।।भूमौदत्तेनतृप्यन्तुतृप्तायांतुपरांगतिमित्युक्तम् ।।एवमेवपितृभक्तौश्रीदत्तैरुक्तम् ।। (विकिरप्रक्षेपादनंतरं करणीयमुक्तं ब्रह्म
पुराणश्राद्धतत्त्वयोः) ततःप्रक्षाल्यहस्तौच त्रिराचम्य हरिंस्मरेत् ।। सव्याहृतिकांसप्रणवांगायत्रींश्चपठेत्तथा ।। पठेन्मधुमतीःपुण्यास्त
थाचमधुमध्विति ।। (मरीचिः) श्राद्धेषुविकिरंदत्त्वा योनाचामेन्मतिभ्रमात् ।। पितरस्तस्यषण्मासं भवंत्युच्छिष्टभोजिनइति ।। अनंतरं
गंडूषार्थमुदकं ब्राह्मणेभ्यः प्रत्येकंदद्यात् ।। (तथाच मार्कंडेयपुराणे) ततस्त्वाचमनार्थायदद्याच्चापःसकृत्सकृदिति ।। पितृब्राह्मणपूर्वकंदद्या
दितिहेमाद्रिमाधवौ ।। (विष्णुरपि)उदङ्मुखेष्वाचमनमादौ दद्यात्ततः प्राङ्मुखेषुइति उदङ्मुखेषु पित्र्यब्राह्मणेष्वित्यर्थः ।।(पितृभक्तौ
श्रीदत्तोपि)ब्राह्मणान्भोजनोत्तरमाचमनंविसर्जनंचपितृपूर्वकमिति ।। ततः कात्यायनेनविकिरोत्तरं गायत्र्यादिजपस्तृप्तिप्रश्नश्चउक्तः त
त्तुपूर्वमेवसूत्रव्याख्यातम् ।। अथपिंडदानम् ।।(तत्रकात्यायनः) सर्वमन्नमेकतउद्धृत्योच्छिष्टसमीपेदर्भेषुत्रींस्त्रीन्पिंडानवनेज्यदद्यादाचांते

ष्वित्येके इति ॥ सर्वमन्नमेकस्मिन् पात्रेउद्धरेत ॥ सर्वशब्दःप्रकृतान्नजातिसर्वत्वार्थः ॥ अतः पायसौदनापूपसूपादिजातीयेभ्यः प्रकृत
श्राद्धप्रयोगार्थसाधितेभ्यःसर्वेभ्योऽन्नेभ्यःकिंचित्किंचिदादाय पिंडपर्याप्तपरिमाणमन्नसमुदायमेकस्मिन्पात्रे संभृत्येत्येतदुक्तंभवति ॥
उच्छिष्टसमीप इत्युच्छिष्टप्रदेशात॥व्यामःअरत्निबाह्वादिव्यवहितेदेशेइत्यर्थः।त्रींस्त्रीनिति वीप्सा मातामहादिपिंडत्रयमपेक्ष्य पिंडान्दद्या
दितिव्याख्याकाराः ॥(याज्ञवल्क्योपि) सर्वमन्नमुपादायसतिलंदक्षिणामुखः॥उच्छिष्टसन्निधौपिंडान् दद्याद्वैपितृयज्ञवदिति ॥ ब्राह्म
णार्थं कृतमन्नंसर्वमुपादायसतिलं तिलमिश्रंदक्षिणामुखउच्छिष्टसन्निधौपिंडपितृयज्ञकल्पेनपिंडान् दद्यादित्यर्थः ॥केचिद्ब्राह्मणभोजनात्
पूर्वमर्चनानन्तरमग्नौकरणानन्तरंवापिंडनिर्वपणंकुर्वन्ति ॥ तत्तुमतान्तरम् ॥(तत्रतावत्पिंडदानस्थानमाह—व्यासः) अरत्निमात्रमुत्सृज्य
पिंडांस्तत्रप्रदापयेत् ॥ यत्रोपस्पृशतांवापि प्राप्नुवन्तिनबिंदव इति ॥ तत्र तस्मिम् श्राद्धप्रयोगे उच्छिष्टप्रदेशादरत्निपरिमितंप्रदेशं
परित्यज्ययोदेशोऽवतिष्ठते तत्रपिंडान् प्रदद्यात्॥सकनिष्ठिकः करः अरत्निरित्यर्थः ॥ (हेमाद्रौ देवलः) उपलिप्तेशुचौदेशे स्थानंकुर्वीत
सैकतम्॥मंडलंचतुरस्रंवादक्षिणावनतंमहत् इति॥ उपलिप्ते गोमयगोमूत्राभ्यामुपलिप्ते सैकतं सिकतामयं स्थानंमंडलं वृत्ताकारमित्यर्थः॥
(ब्रह्मपुराणेपि) हस्तमात्रातथाभूमेश्चतुरंगुलमुच्छ्रिता॥पिंडनिर्वापणार्थायरमणीयाविशेषतः॥ (अथउल्लेखनादि ब्राह्मे) सव्योत्तराभ्यां
पाणिभ्यांकुर्यादुल्लेखनंबुधः॥दर्भैरितिशेषः ॥उल्लेखनंतुसकृदेव ॥(तदुक्तं शतपथीये) सकृदुल्लिखतितद्वेदिभाजनमिति॥वेदिभाजनं वेदि
स्थानीयम्॥(ब्रह्मांडेपि)खंडणंपेषणंचैव तथैवोल्लेखनक्रिया॥सकृदेवपितॄणांस्याद्देवानांतुत्रिरुच्यतेइति ॥खंडनं बर्हिरादेश्छेदनम् ॥ पेषणं
भूमिघर्षणादिकम्॥उल्लेखनक्रिया रेखाकरणं पितॄणां पितृकार्ये सकृदेव स्यादित्यर्थः॥ रेखाकरणेमंत्रोऽपहता इत्यादि ॥ दक्षिणेनोल्लिख

त्यपहता इति कात्यायनसूत्रात् । (उल्लेखनानंतरं पश्चादुल्मुकनिधानमाह कात्यायनः) उल्मुकंपरस्तात्करोतियेरूपाणीतिरेखायाःपरस्ताद्दक्षिणप्रदेशेउल्मुकंनिदधातीत्यर्थः । (स्कंदपुराणेपि) येरूपाणीतिमंत्रेणन्यसेदुल्मुकमन्तिके । अंतिकेदक्षिणाशायामित्यर्थः । उल्मुकभ्रामणंवामावर्त्तेन कर्त्तव्यम् ॥ (ततः छिन्नमूलकुशानामास्तरणमाह हेमाद्रौदेवलः) तस्मिन्स्थानेततोदर्भानेकमूलाञ्छिवान्बहून् ॥ दक्षिणाग्रानुदक्पादान्सर्वांस्तान्स्तृणुयात्समम् । अस्यार्थः तस्मिन्निति । यत्रपिंडाःप्रदातव्याः ततइत्युल्लेखनाद्यनन्तरं दर्भान् कुशान् । तदभावे काशादीन् । एकमूलसंलग्नबहुशिखान् । शिवान् साग्रान् ॥ बहून् एकैकस्मिन्पिंडेत्रित्वात्प्रभृतियथेच्छं यथासंभवंच ॥ दक्षिणतोऽग्रंयेषांतेदक्षिणाग्राः । उदक्पादाः उदङ्मूलाः । स्तृणुयात् विस्तारयेत् । समंसमस्थलंतय इत्यर्थः ॥ (कात्यायनोपि) उपमूलर्ठसकृदाच्छिन्नानिलेखायांकृत्वायथावनिक्तं पिंडान् ददात्यसावेतत्तइति । (अस्यार्थोदेवयाज्ञिकभाष्ये) ततोमूलसमीपेएकेनैवप्रयत्नेनच्छिन्नानि दर्भतृणानिदक्षिणाग्राणिरेखायामास्तीर्यंयथावनिक्तं यत्रयत्रावनेजनंयस्ययस्यदत्तंतत्रतत्रपिंडान्ददातिअसावित्यस्यस्थानेऽमुकगोत्राऽमुकशर्मन्नित्यर्थः । (उपमूलेलूनानांसकृदाच्छिन्नत्वमुक्तंशतपथे)अथसकृदाच्छिन्नान्युपमूलंदितानिभवंतिअग्रमिववैदेवानांमध्यमिवमनुष्याणांमूलमिवपितॄणांतस्मादुपमूलंदितानिभवन्तिसकृदाच्छिन्नानिभवन्ति इति।दितानिखंडितानीत्यर्थः। (तैत्तिरीयश्रुतावपि) सकृदाच्छिन्नंबर्हिर्भवतिसकृदिवहिपितरइति।बर्हिःकुशाः।(मात्स्ये)निधायदर्भान्विधिवद्दक्षिणाग्रान्समाहितःत्रींस्त्रीन्पिडानथोदद्यात्सर्वान्नेवतिलैर्युतान् । (ब्रह्मपुराणे) सपिञ्जूलाश्चहरिताः स्निग्धाःपुष्टाः समाहिताः । गोकर्णदीर्घाश्चकुशाः सकृच्छिन्नसमूलकाः । सपिंजूला अपृथक्कृतदलाः।हरिता हरिद्वर्णाः।स्निग्धाः अरूक्षाः।गोकर्णदीर्घाःअनामिकांगुष्ठविस्तृतप्रमाणा इत्यर्थः। (स्मृत्यंतरे) पिंडनिर्वपणंकार्यं

कुशाभावेविचक्षणैः।काशेषुराजदूर्वासुपवित्रेपरमेहिते।राजदूर्वाअतिदीर्घदूर्वाइत्यर्थः।दर्भास्तरणानंतरम्‌अवनेजनमुक्तंहेमाद्रौभविष्यत्पुरा
णेसुमंतुना) असाववनेनिक्ष्वेतिपुरुषंपुरुषंप्रति । त्रिस्त्रिरेकेनहस्तेनविदधीतावनेजनम् ।इति। असावित्यत्रगोत्रसंबंधनामानिसंबुद्ध्यंतानि
क्रमेणोच्चार्यावनेनिक्ष्वेत्यभिधायावनेजनायपितॄणांकरशोधनायोदकंदद्यादित्यर्थः । (कात्यायनसूत्रेपि) । उदपात्रेणावनेजयत्यपसव्यर्ठं
सव्येनवोद्धरणसामर्थ्यादसाववनेनिक्ष्वेतियजमानस्यपितृप्रभृतित्रीनुपमूलर्ठंसकृदाच्छिन्नानिलेखायांकृत्वायथावनिक्तंपिंडान्ददात्यसा
वेतत्तइति ॥ (अस्यार्थो देवयाज्ञिकभाष्ये) उदकस्यपात्रमुदपात्रं तेनाध्वर्युः यजमानस्यपितृप्रभृतिपितुरारभ्यत्रीन्पूर्वान् पितृपि
तामहप्रपितामहान् अपसव्यंयथास्याद्धस्तस्यसव्यप्रदेशाद्दक्षिणप्रदेशेनउदकनिनयनं यथास्यात्तथांगुष्ठप्रदेशिन्योरन्तरालेन अवनेजय
तअवनिक्तान् शुचीन्करोतिपिंडदानायअसावितिसंबुद्ध्यंतगोत्रनामादेशपूर्वकम् अमुकसगोत्रयजमानस्यपितरमुकशर्मन् अवनेनिक्ष्वरे
खायामूलमध्याग्रप्रदेशेषुदक्षिणसंस्थमवनेजनंकार्यमित्यर्थः । (शतपथेपि) अथोदपात्रमादायावनेजयत्यसाववनेनिक्ष्वेतियजमानस्य
पितरमसाववनेनिक्ष्वेतिपितामहमसाववनेनिक्ष्वेतिप्रपितामहमसाववनेनिक्ष्वेतीति। (स्मृत्यंतरे) गंधपुष्पाढ्यसलिलैश्छिन्नमूलेक्रमेणवै
दद्यादत्रावनंसम्यक्प्रतिदानेजलंस्पृशेत् । जलंस्पृशेत्संकल्पंकुर्यादित्यर्थः । अत्रकात्यायनेनबर्हिःस्तरणात्पूर्वमवनेजनमुक्तम् । यथासुमं
तुप्रभृतिभिस्तुदर्भास्तरणानन्तरंचोक्तमतोऽवनेजनबर्हिस्तरणयोः पौर्वापर्य्यैविकल्पः । यद्यपिविकल्पोदृश्यते तथापिब्रह्मपुराणादौदर्भो
पर्य्यैवावनेजनोक्तत्वात् ॥ भविष्यत्पुराणेसुमंतुनाविशेषोपादानात् ॥ हेमाद्रिमाधवपितृभक्तिमदनरत्नश्राद्धमयूखादिमहानिबंध
कारैः शिष्टैश्चाङ्गीकृतत्वाच्च सकृदाच्छिन्नदर्भेष्वेवावनेजनंकार्यमितिविवेकः ॥ (अथपिंडानाह मनुः) त्रींस्तुतस्माद्धविःशेषात्

पिंडान्कृत्वासमाहितः ॥ औदकेनैवविधिनानिर्वपेद्दक्षिणामुखइति ॥ तस्माद्धविःशेषात् इत्यग्नौकरणहविःशेषात् ॥ उदकमि
त्ययमौदकोविधिरित्यर्थः (याज्ञिकदेवभाष्ये) आर्द्रामलकमात्रः प्रथमः पिंडः तदपेक्षयाद्वितीयः स्थूलः तृतीयः स्थूलतरः ॥
(देवलः) अभ्यज्यमधुसर्पिर्भ्यांतान्वपेत्कुशसंचये ॥ वपेत् निदध्यात् ॥ (बृहस्पतिः) सर्वस्मात्प्रकृतादन्नात् पिण्डान्मधुतिला
न्वितान् ॥ पितृमातामहादीनांदद्याद्गृह्यविधानतः ॥ पिंडदानंचसव्यंजान्वाच्यकर्त्तव्यम् ॥ (तदुक्तं वायुपुराणे) मधुसर्पिस्तिलयु
तांस्त्रीन्पिंडान्निर्वपेद्बुधः ॥ जानुकृत्वा तथासव्यं भूमौपितृपरायणः (विठ्ठलीये कात्यायनः) शाल्योदनंगवांक्षीरंमाषान्नंतिलमि
श्रितम्॥पिंडंदद्यात्प्रयत्नेन यजुषा च विशेषत इति॥ पिंडदानंवामान्वारब्धेनहस्तेनकार्यम् ॥(तदुक्तं शंखलिखिताभ्याम्) पिंडंनिदध्या
त्सव्येनपाणिना दक्षिणपाणिपुरःसरेणइति ॥ (पिंडपरिमाणमाहमरीचिः) आर्द्रामलकमात्रांस्तुपिंडान्कुर्वीतपार्वणे॥ एकोद्दिष्टेबिल्व
मात्रं पिंडमेकंतुनिर्वपेत् ॥ नवश्राद्धेस्थूलतरं तस्मात्पिंडंतुनिर्वपेत् ॥ तस्मादपिस्थूलतरमाशौचेप्रतिवासरम् इति ॥ नवश्राद्धम् आशौ
चमध्येप्रथमतृतीयादिदिनेष्वेकादशेचदिनेविहितंश्राद्धम्।प्रतिवासरं प्रतिदिवसंदशगात्रोत्पत्त्यर्थं नवश्राद्धपिंडादपिस्थूलतरंपिंडंदद्यादि
त्यर्थः ॥(पिंडदानेसंकल्पामाहपारस्करः) अर्घ्यदानेचसंकल्पेपिंडदानेतथाऽक्षये ॥ गोत्रसंबंधनामानियथावत्प्रतिपादयेत् इति ॥ संक
ल्पशब्देनात्रद्विजभोजनस्यत्यागोऽभिधीयते इत्यर्थः॥गोत्राज्ञानेकाश्यपंगोत्रं कर्त्तव्यम् ॥(तथाच शतपथश्रुतिः) तस्मादाहुःसर्वाःप्रजाः
काश्यप्यइति॥गोत्रनाशेतुकाश्यपइतिव्याघ्रपात्॥अथहस्तोन्मार्जनम्॥(तथाच मनुयमौ) न्युप्यपिंडांस्ततस्तांस्तुप्रयगोविधिपूर्वकम् ॥
तेषुदर्भेषुतंहस्तंनिमृज्याल्लेपभागिनामितिन्युप्यपिंडान्दत्त्वादर्भमूलेहस्तंनिर्लेपंकुर्यादित्यर्थः ॥ (लेपभागिनो मनुस्मृतिमत्स्यपुराणयोः

दर्शिताः) लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः ॥ पिंडदः सप्तमस्तेषांसापिंडयंसाप्तपौरुषम् इति ॥ चतुर्थाद्याः वृद्धप्रपितामहप्रभृ
तयः॥तान्वृद्धप्रपितामहादीस्त्रीनुद्दिश्यतेषामयंभागोऽस्तिइत्यभिधानः॥प्रथमपिंडाधारभूतदर्भमूलेषु हस्तंनिमृज्यात॥निमार्जनंचहस्तल
ग्नस्यान्नस्योदकस्यवापरेचनाय दर्भेषु संश्लेषणंकरावघर्षणमित्यर्थः॥करलेपाभावेपिकरंनिमृज्यादेवेतिमेधातिथिहरिहरप्रभृतयः॥हस्तमा
र्जनानन्तरमाचमनंकुर्य्यात् ॥ एतच्चाचमनंहस्तप्रक्षालनपूर्वकंत्रिश्चकर्त्तव्यम् ॥ (तथाच ब्रह्मपुराणे) ततोदर्भेषुविधिवत् संमार्ज्यचकरौ
ततः ॥ प्रक्षाल्यचजलेनाथत्रिराचम्यहरिंस्मरेत्॥आचमनादिकंच यज्ञोपवीतिनाकर्त्तव्यम्॥अत्रत्रिराचम्येत्यभिधानात् ॥ चुलकत्रयात्म
कस्याचमनपदार्थस्यत्रिरित्यनेनान्वयात् ॥ चुलकनवतयाऽऽचमनंमन्यन्तेशिष्टाः ततोऽत्रपितरइत्याद्यनुष्ठानम् ॥ (पिंडपितृयज्ञे आह-
कात्यायनः) अत्रपितरइत्युक्त्वोदङ्ङ्स्तआतमनादावृत्त्यामीमदन्तेतिजपतिइति॥आतमनात् प्राणायामोत्थवायुपीडावधिउदङ्मुखआ
सीत॥ततोऽनुच्छ्वसन्नेवपर्यावृत्त्यामीमदन्तेतिमनसाजपित्वोच्छ्वसेदित्यर्थः॥अमंत्रंप्राणान्निरुध्येतिकर्काद्याः॥(अत्रविशेषः कर्मप्रदीपे) वामे
नावर्त्तनंकेचिदुदगंतंप्रचक्षते ॥ आवृत्यप्राणमायम्यपितॄन्ध्यायन्यथार्हतः ॥ जपंस्तेनैवचावृत्यततःप्राणान्प्रमोचयेत् इति ॥ जपन्
अमीमदन्तेतिमंत्रमितिविशेषः ॥ तेनैववामेनैवमार्गेणप्राणान् प्रमोचयेत्॥उच्छ्वसेदित्यर्थः ॥ (विष्णुनाप्युक्तम्) दत्त्वाचपिंडान्नि
वृतानुमंत्रयेताऽत्रपितरोमादयध्वंयथाभागमावृषायध्वमिति ॥ (स्मृत्यन्तरे (श्वासस्यधारणंपूर्वं ततःप्रत्यवनेजनम् ॥ इतिक्रम
विशेषस्तुज्ञेयोवाजसनेयिनाम् ॥ (ब्रह्मपुराणे) दत्त्वात्रपितरश्चेतिपठंश्चोदङ्मुखःस्थितः ॥ संचिंतयन्पितॄंस्तुष्टान्सर्वान्भास्वर
मूर्त्तिकान ॥ अमीमदन्तपितरइतिपश्चात्त्यजन्पठेदिति ॥ प्रत्यवनेजनमाह कात्यायनः) अवनेज्य पूर्ववदिति ॥ पूर्ववदित्यने

नपूर्वांवनेजने तिकर्त्तव्यतातिदिश्यतेसा चोदपात्रादिरूपादर्शितैवपूर्वमित्यर्थः ॥ (स्मृत्यंतरेपि) अवनेजनावशिष्टैस्तुजलैर्मार्ध्यंदिनी
यकः ॥ अनंतरम् ॥ (कात्यायनसूत्रे) ॥ नीवींविस्रंस्यनमोवइत्यंजलिंकरोतिइति ॥ नीवींविस्रंस्येतिवामकुक्षावंतरीयवस्त्रदशा
संगोपनंनीविःतांविस्रंस्य उन्मुच्य विस्रंसनविधानादितःपूर्वंतस्याःधारणंकर्त्तव्यमित्यवगम्यते नमोवइत्यंजलिंकरोतीतिसूत्रम्।नमोवःपित
रोरसायेत्यादिभिःषड्भिर्मंत्रैःप्रतिनमस्कारमंजलिंकरोति।अंजलिःकरसंपुटः।अंजलिमाबध्यपिंडाभिमुखःपितृभ्योनमइतिनमस्कारान्कु
र्यादित्यर्थः।तेचमंत्राः वाजसनेयिभिःपठ्यंतेइतिहेमाद्रिः।(शतपथेपि) अथनीवीमुद्धृत्यनमस्करोतिनमोवःपितरइति॥ततःपिंडेषुसूत्राणि
दद्यात्। (तथाचपिंडपितृयज्ञे कात्यायनः) । एतद्वइत्युपास्यतिसूत्राणिप्रतिपिंडमूर्णादशावावयस्युत्तरेयजमानलोमानिवाइति । अस्यार्थो
भाष्ये। प्रतिपिंडंबहुवचनात्त्रीणि सूत्राणि उपास्यति पिंडानामुपरिनिदधाति । ऊर्णामेषरोमाणि तन्निर्मितवस्त्रदशावा दशाः वस्त्रांचल
सूत्राणि। बहुत्वविशिष्टाः प्रतिपिंडमेतद्वः पितरो वास इत्युपास्यति।अथवा यजमानस्य पंचाशत्तमवर्षादूर्ध्वं यजमानलोमानिपलिता
नि हृदयस्थानि सूत्रस्थानेप्रतिपिंडंप्रास्यतीति।(पाराशरोपि)पंचाशद्वार्षिकोयस्तुदद्याल्लोमस्वमंशुकमिति । एतच्च सूत्रादिवस्त्राभावे वस्त्र
स्थाने दातव्यं सतितु वस्त्रे वस्त्रमेव । वस्त्रार्थे सूत्रमेववा इतिवायुपुराणात् । (ब्रह्मपुराणेपि) दद्यात्क्रमेणवासांसि दशांवाश्वेतवस्त्रजाम् ।
एतद्वःपितरोवासस्त्वितिजल्पन्पृथक्पृथक् ॥ अमुकामुकगोत्रैतत्तुभ्यं वासः पठेत्ततः ॥ (काशिकायाम्) सर्वाभावेकुशान्न्यसेदिति ॥
ततस्तूष्णींगंधादिदानम् । (तथाच छंदोगपरिशिष्टे) गंधादीनि क्षिपेत्तूष्णींतत आचामयेद्द्विजान् । (मात्स्येपि) गंधधूपादिकंदद्यात्कृ
त्वाप्रत्यवनेजनम् ॥ दीपप्रज्वालनंतद्वत्कुर्यात्पुष्पार्चनंबुधः ॥ (याज्ञवल्क्यः) तुलसींभृंगराजंचअपामार्गंशमींतथा ॥ पितृमूर्द्ध

नियोदद्यात्सयातिपरमांगतिम् ॥ शमी शमीपत्राणि ॥ पितृमूर्द्धनि पिंडोपरि इत्यर्थः ॥ (पद्मपुराणेपि) तुलसीगंधमाघ्रायपितरस्तु ष्टमानसाः ॥ प्रयांति गरुडारूढास्तत्पदं चक्रपाणिनः ॥ (हेमाद्रौदेवलः) दक्षिणांसर्वभोगांश्चप्रतिपिंडंप्रदापयेत् ॥ भक्ष्यानपूपानिक्षूंश्चव्यंजनान्यशनानिच ॥ दक्षिणाशब्देनात्ररजतादि ॥ (तत्रैव शंखः) ॥ यत्किंचित्पच्यतेगेहे भक्ष्यंभोज्यंविगर्हितम् ॥ अनिवेद्यनभोक्तव्यंपिंडमूलेकथंचन इति ॥ एवंपिंडेभ्योगंधपुष्पादि दत्त्वा वारिदानंपुनर्ब्राह्मणहस्तेषु शिवा आपः संत्वित्यादिभिरत्रकर्त्तव्यम् ॥ (तथाचमात्स्ये) आचांतेषुपुनर्दद्याज्जलपुष्पाक्षतोदकम् (मार्कंडेयोपि) गंधमाल्यादिसंयुक्तं दद्यादाचमनंततः ॥ (कात्यायनोपि) आचांतेषुसोदकपुष्पाक्षतान् अक्षय्योदकंचदद्यादिति ॥ इदमंबुपुष्पाक्षतदानंदैवेषुतुसव्येन पित्र्येत्वपसव्येनकार्य्यमितिकर्कभाष्ये ॥ (छंदोगपरिशिष्टे वृद्धिश्राद्धप्रकरणे कात्यायनः) शिवा आपःसंत्वितिचसंत्वित्युक्ते पुनश्चतैः।सौमनस्यमस्त्विति चपुष्पदानमतःपरम् । अक्षतंचारिष्टमस्त्वित्यक्षतान् प्रतिपादयेदिति । अक्षतान् यवानित्यर्थः । अक्षतशब्देनयवाउच्यंते इतिहेमाद्रिः । अत्र अक्षतान्न तंडुलानिति मैथिलरुद्रधरलेखनमयुक्तमेव ॥ अक्षतास्तुयवाःप्रोक्ता भृष्टाधानाभवंतिते इति कात्यायनवाक्यात् । (ब्रह्मपुराणेपि) आचांतेषूदकंदद्यात्पुष्पाणिसयवानिच । यवोसीतिपठेन्मंत्रं श्रद्धाभक्तिसमन्वित इति। यवदानंचवैश्वदेविकद्विजहस्तेष्वेव ॥ पित्र्यहस्तेषुतुतिलदानमेवकार्य्यम् (तथाचहेमाद्रौ ब्राह्मे) सतिलांबुपितृष्वादौदत्त्वादैवेषुसाक्षतमिति ॥ (अत्रोदकादिदानेमंत्रानाहहेमाद्रौश्राद्धतत्त्वेच शातातपः) अपांमध्येस्थितादेवाः सर्वमप्सुप्रतिष्ठितम् । ब्राह्मणस्यकरेन्यस्ताःशिवाआपो भवंतुनः ॥ लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे ॥ लक्ष्मीर्वसेत्सदासोमे सौमनस्यंसदास्तुमे ॥ अक्षतंचास्तुमेपुण्यं शांतिःपुष्टिर्धृति

श्रमे॥यद्यच्छ्रेयस्करं लोके तत्तदस्तुसदा मम इति॥ हस्तदत्तानांचांबुपुष्पाक्षतानां कस्मिंश्चिच्छुचौदेशेविप्राः प्रक्षेपंकुर्य्युरितिहेमाद्रिः ॥
(मात्स्ये) दत्त्वाशीःप्रतिगृह्णीयाद्द्विजेभ्यः प्राङ्मुखोबुधः ॥ अघोराःपितरःसंतु संत्वित्युक्तेपुनर्द्विजैः ॥ गोत्रं तथावर्द्धतांनस्तथेत्युक्तः
सतैःपुनः ॥ दातारोभिवर्द्धतामन्नंचैवेत्युदीरयेत्॥ एताः सत्याशिषः संतु संत्वित्युक्तश्चतैः पुनः इति॥ दत्त्वा अक्षय्योदकं दत्त्वा इत्यर्थः॥
(कात्यायनसूत्रेपि) अघोराः पितरः संतु संत्वित्युक्ते गोत्रंनोवर्द्धतांवर्द्धतामित्युक्ते दातारोऽभिवर्द्धंतां वेदाःसंततिरेवच॥श्रद्धाचनोमाव्यगम
द्बहुदेयंचनोस्त्वित्याशिषः प्रतिगृह्येति ॥ (मनुपराशरयाज्ञवल्क्याः) दातारो नोभिवर्द्धंतां वेदाः संततिरेवच॥श्रद्धाचनोमाव्यगमद्बहुदेयं
चनास्त्विवति इति॥ अस्यार्थः॥दातारोहिरण्यादेःनोऽस्माकंकुलेऽभिवर्धंतां बहवोभवंतु वेदाश्चवर्द्धताम् अध्ययनाध्यापनतदर्थज्ञानानुष्ठान
द्वारेण संततिश्चपुत्रपौत्रादिपरंपरयाश्रद्धाच पित्र्ये कर्मण्यास्थानोऽस्माकं माव्यगमत् मागच्छतुदेयंच हिरण्यादि बहु अपरिमितमस्माकं
भवत्विवितिजपेदित्यर्थः॥(गारुडस्कांदयोः)अन्नंचनोबहुभवेदतिर्थींश्चलभेमपि॥याचितारश्चनः संतु मा चयाचिष्मकंचन॥एतेषामाशिषः
सर्वागृह्णीयात्प्रतिभाषितमिति॥एताआशिषःप्राङ्मुखउपवीती एवगृह्णीयात्॥(तथाच हेमाद्रौ मरीचिः) प्रदक्षिणंशिवाआपोजपाशीःस्व
स्तिवाचनम्॥विप्रेषुदक्षिणादानंषट्सख्यानिप्रचक्षते इति ॥अस्यार्थो हेमाद्रिणाकृतः ॥ प्रदक्षिणं विसर्जनानंतरं बहिर्निर्गत्यमंडलोपर्य्येव
स्थितानां ब्राह्मणानांप्रदक्षिणीकरणम्॥शिवाआपः संत्वित्यादिमंत्रैः क्रियमाणं कर्म॥जपःपुरुषसूक्तादि आशीश्च॥दातारोनोभिवर्द्धंताभि
त्यादिकाभिप्रेता ॥ स्वस्तिवाचनं स्वस्तिभवतो ब्रुवंत्वितिवाचनम् ॥ विप्रेषुदक्षिणादानं यद्विप्रोद्देशेन दक्षिणादानंक्रियतेतदत्राभि
मतम्॥नतुयत्पित्राद्युद्देशेन विप्ररूपाधिष्ठानंक्रियते इति ॥ एतानिषट्कर्माणिसख्यानि सव्यधर्मकाणि इत्यर्थः॥मनुविष्णुभ्यांतु विसर्ज

नानंतरं दक्षिणामुखेनपितृभ्यश्चकार्य्यमित्युक्तं तत्तु साग्निकानाम् ॥ (तथाच मात्स्ये) विसृज्यब्राह्मणांस्तांस्तुतेषांकृत्वाप्रदक्षिणम्॥
दक्षिणांदिशमाकांक्षन् पितॄन्याचेतसाग्निक इति ॥ अत्रयदाप्राङ्मुखोवरयाचनग्रहणं कुर्य्यात्तदायज्ञोपवीत्येव इतिहेमाद्रिः ॥
(अनंतरमाह कात्यायनः) आशिषः प्रतिगृह्यस्वधावाचनीयान् सपवित्रान्कुशानास्तीर्य स्वधांवाचयिष्य इतिपृच्छति वाच्यतामित्य
नुज्ञातःपितृभ्यःपितामहेभ्यः प्रपितामहेभ्योमातामहेभ्यः प्रमातामहेभ्योवृद्धप्रमातामहेभ्यश्चस्वधोच्यतामित्यस्तुस्वधेत्युच्यमानेस्वधावा
चनीयेष्वपोनिषिंचति ऊर्जमिति ॥ अस्यार्थः ॥ (अत्रसांप्रदायिका व्याचक्षते) ॥ स्वधावाचनार्थमुपकल्पिताः कुशाः
स्वधावाचनीयाः पवित्राण्यास्तीर्य्य पिंडानामुपरि दक्षिणाग्रान् तेषु पिंडावनेजनपात्रस्थितमुदकं दक्षिणकरे गृहीत्वा ऊर्जं
वहंतीरित्यादिकं मंत्रमुच्चार्य पितृतीर्थेन निषेचनीयमित्यर्थः ॥ (पराशरोपि) ऊर्जंवहंतीरुच्चार्य्य जलं पिंडेषुदापयेदिति ॥ (अनं
तरमर्घपात्रोत्तानीकरणंदक्षिणादानंचाह कात्यायनः) उत्तानपात्रंकृत्वा यथाशक्तिदक्षिणांदद्यात् इति ॥ (पराशरोपि) न्युब्ज
पिंडार्घपात्राणि कृत्वोत्तानानिसंस्रवान् ॥ दक्षिणांदद्यादित्यर्थः ॥ (नागरखंडेपि) उत्त नमर्घ्यपात्रंतुकृत्वादद्याच्चदक्षिणाम् ॥ हिरण्यं
देवतानांचपितॄणांरजतंतथा इति ॥ (पात्रचालनेविशेषमाहजातूकर्ण्यः) पात्राणिचालयेच्छ्राद्धेस्वयंशिष्योथवासुतः ॥ नस्त्रीभिर्नचबा
लेननासज्जात्याकथंचन ॥(प्रचेतास्तु (श्राद्धेभोजनपात्राणिस्वयमेवप्रचालयेदितिवदति॥ दक्षिणादानेविशेषमाहबृहस्पतिः) तस्मा
त्पणंकाकिणींवाफलंपुष्पमथापिवा॥प्रदद्याद्दक्षिणांश्राद्धेतयाससफलोभवेत् इति ॥(दक्षिणाद नेसव्यापसव्ययोर्विकल्पमाह हेमाद्रौजम
दग्निः)सर्वकर्मापसव्येनदक्षिणादानवर्जितमिति॥अनेनदक्षिणायांसव्यमुक्तम्॥ (अपसव्यपक्षो पतत्रैवतेनोक्तः) अपसव्यंतुतत्राहमत्स्यो

हिभगवान्मनोः इति ॥ अनयोःपक्षयोर्द्वितीयःपक्षोयुक्तःपैतृकत्वात्॥पितॄणामपसव्येनदद्याद्दौप्यंतुदक्षिणामितिस्मृत्यंतरवाक्यात्॥अप
सव्यंतुतत्राहमत्स्योहिभगवान्मनोः इतिविशेषवाक्याच्च ॥ (माधवीयेपि) पित्रुद्देशेनदक्षिणादानंप्राचीनावीतिनाकार्यमिति॥अथदक्षिणा
दानानंतरमप्याह(पिंडपितृयज्ञेकात्यायनः)अवधायावजिघ्रतियजमानःउल्मुकसकृदाच्छिन्नान्यग्नाविति॥(अस्यार्थो भाष्ये)पिंडानध्व
र्युःस्थाल्यांप्रत्यवधायततोयजमानःसव्यंकृत्वा पिंडान्स्थालीस्थानवजिघ्रति अवघ्राणंकरोति पूर्वंसकृदाच्छिन्नानि यानिरेखायामास्तृता
न्यभूवन् तान्यग्नौप्रक्षिप्य उल्मुकंचतत्रैवप्रक्षिपति इत्यर्थः ॥ (अथविसर्जनमाह कात्यायनः) विश्वेदेवाः प्रीयंतामितिदैवेजपित्र्यावाजे
वाज इति विसृज्येति ॥ (याज्ञवल्क्योपि) वाजेवाजइतिप्रीतः पितृपूर्वंविसर्जयेत् ॥ (प्रचेताः) विसृजेद्भक्तिसंयुक्तःसीमांतंचाप्यनुव्र
जेदिति॥सीमांतंस्वगृहसीमापर्यंतमित्यर्थः ॥ (कात्यायनसूत्रेपि) आमावाजस्येत्यनुव्रज्यप्रदक्षिणीकृत्योपविशेत्॥ (विष्णुधर्मोत्तरेपि)
पश्चाद्विसर्जयेद्देवान्पूर्वंपैतामहान्द्विजान्॥मातामाहानामप्येवं सहदेवैःक्रमःस्मृत इति॥एतद्विसर्जनंतुजमदग्निनासव्येनोक्तम्॥युक्तमपिस
व्येनैव॥परंचशिष्टानाचरंतिपूर्वमपसव्येनावाहनविधानात् अपसव्येनैवविसर्जनंकुर्वंति॥अत्रशिष्टाचारएवप्रामाणिक इति॥अनंतरंदेवता
भ्य इतित्रिर्जपः कर्त्तव्यः॥(तथाच ब्राह्मे)देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच॥नमःस्वाहायैस्वधायैनित्यमेवनमोनमः॥आद्यावसाने
श्राद्धस्यत्रिरावृत्त्याजपेत्सदा॥पिंडनिर्वपणेचापिजपेदेतत्समाहित इति॥पिंडनिर्वपणेपिंडदानात्पूर्वमित्यर्थः॥ततोदीपनिर्वापणम्॥ (तदु
क्तंदेवलेन) निर्वृत्तेपितृमेधेतुदीपंप्रच्छाद्यपाणिना॥आचम्यपाणीप्रक्षाल्यज्ञातीञ्छेषेणभोजयेदिति॥ प्रच्छाद्यनिर्वाप्यइत्यर्थः॥अपसव्येन
दीपंनिर्वापयेद्दक्षिणामुख इतिश्राद्धकल्पकारः ॥ (स्मृत्यंतरेपि) दीपंहस्तेननिर्वाप्य पवित्रत्यागपूर्वकम् ॥ पादशुद्धिर्द्विराचामेदु

च्छिष्टोद्वासनंततः ॥ तथा ॥ अपसव्यंततः कृत्वा दीपनिर्वापणंचरेत् ॥ ततः सव्येन हस्तादिप्रक्षाल्याचम्य यत्न
तः ॥ न्यूनादिदोषशांत्यैतु सांगकर्मप्रपूर्त्तये ॥ स्मृत्वा संप्रार्थयेद्विष्णुं यथाश्रुतिनिदर्शनम् ॥ ततः श्राद्धीयवस्तूनि
ब्राह्मणायानवेदयेत् ॥ पिंडादिकंजलादौतु प्रक्षिपेदिष्टसिद्धये इति ॥ अथ पिंडप्रतिपत्तयः ॥ (तत्रहेमाद्रौ देवलः) ततः कर्मणि
निर्वृत्तेतान्पिंडांस्तदनंतरम् ॥ ब्राह्मणोग्निरजोगौर्वाभक्षयेदप्सुवाक्षिपेत् ॥ (याज्ञवल्क्योपि) पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौ
जलेपिवा ॥ प्रक्षिपेत्सत्सुविप्रेषुद्विजोच्छिष्टंनमार्जयेत् इति ॥ जले अगाधे जले प्रक्षिपेदित्यर्थः॥ सत्सुविप्रेषुभोजनदेशावस्थितेषुद्वि
जोच्छिष्टंनमार्जयेत् ॥ नोद्वासयेदित्यर्थः॥(मनुस्मृतावपि) गांविप्रमजमग्निंवाप्राशयेदप्सुवाक्षिपेत्॥वयोभिःखादयन्त्यन्ये प्रक्षिपंत्यन
लेषुवा ॥ (मात्स्येपि) पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा ॥ विप्रांतेवाथविकिरेद्वयोभिरथवाशयेदिति ॥ पुत्रार्थीमध्यमपिंडं
पत्न्यैदद्यात् ॥ (तथाच वायुपुराणे) पत्न्यैप्रजार्थीदद्यात्तुमध्यमंमंत्रपूर्वकमिति॥(मंत्रस्तुमत्स्येनदर्शितः) आधत्तपितरोगर्भंमंत्रःसंतान
वर्द्धन इति।कात्यायनसूत्रेआधत्तेतिमध्यमपिंडपत्नीप्राश्नातिपुत्रकामाइति अस्यार्थोभाष्येगर्भग्रहणयोग्याऋतुस्नातापत्नीमध्यमपिंडंप्रा
श्नाति।पत्नीबहुत्वेपिंडविभागोमंत्रावृत्तिश्चेतिधूर्तस्वामी।(पाराशरः)।पिंडानांमध्यमंपिंडं पितॄन्ध्यायन्समाहिता॥प्राशयेत्पुत्रकामातुभा
र्यांतंश्राद्धदस्य च॥स्नुषावापिसगोत्रावापुत्रकामाद्विजाज्ञया॥आधत्तपितरोगर्भंव्याहरेयुर्द्विजातयः।महारोगगृहीतावातद्रोगोपशमायच।
घ्नंतुमेपितरोरोगमित्युक्त्वाप्राशयेच्चतान॥अन्नान्यप्सुहुताशेवाक्षिपेद्गवेद्विजायवाअजायवाप्रदद्याच्चपश्चाद्विप्रविसर्जनम् ॥ (मनुस्मृतौ)
पतिव्रताधर्मपत्नीपितृपूजनतत्परा ॥ मध्यमंतुततः पिंडमद्यात्सम्यक्सुतार्थिनी ॥ आयुष्मंतंसुतंविंदेद्यशोमेधासमन्वितम् ॥ धनवंतंप्र

जावतंधार्मिकंसात्त्विकंतथा इति ॥ रोगाभितप्तेनप्रथमोऽन्नाद्यकामेनतुचरमः पिंडोभक्षणीयः ॥ (तथाच हारीतः)
आयुर्दःप्रथमः पिंडो द्वितीयःपुत्रदः स्मृतः ॥ ऋद्धिदस्तुतृतीयोवै तस्मान्मध्यममाशयेत् ॥ पुत्रकामायजमानपत्नीतिशेषः ॥ (ब्रह्मांड
पुराणे) पिंडमग्नौसदादद्याद्भोगार्थीप्रथमंनरः ॥ पत्न्यैप्रजार्थीदद्याद्वैमध्यमंमंत्रपूर्वकम् ॥ उत्तमांगतिमन्विच्छन् गोभ्योनित्यंप्रयच्छति॥
आज्ञांप्रज्ञांयशःकीर्तिमप्सुपिंडंप्रवेशयेत् ॥ प्रार्थयन्दीर्घमायुश्च वायसेभ्यःप्रयच्छति ॥ आकाशंगमयेद् सु स्थितोवादक्षिणामुखः ॥ पि
णांस्थानमाकाशं दक्षिणादिक्तथैवच इति ॥ मध्यमपिंडप्राशनंचकेवलंकाम्यमेव ननित्यमितिद्वैतनिर्णये॥ पिंडोपघातेहेमाद्रौ देवलः)
६ श्वशृगालखरैःपिंडः स्पृष्टोभिन्नःप्रमादतः ॥ मार्जारमूषकैः स्पृष्टश्चांडालपतितादिभिः ॥ कर्तुरायुष्यनाशःस्यात्प्रेतस्तंनोपसर्पति ॥ (तद्दो
षनिवृत्तिमाह जातूकर्ण्यः) तद्दोषपरिहारार्थंप्राजापत्यंप्रकल्पयेत् ॥ पुनःस्नात्वातदाकर्तापिंडंकुर्याद्यथाविधि इति ॥ पाकांतरेणतेनपा
केनवापिंडदानमात्रंपुनःकार्यंनसर्वंश्राद्धावृत्तिरितिसर्वसंमतमितिकमलाकरप्रभृतयः ॥ (अथवैश्वदेवादि) तत्रतावद्वैश्वदेवकालनिर्णयः॥
(हेमाद्रौ ब्रह्माण्डे) वैश्वदेवाहुतीरग्नावर्वाग्ब्राह्मणभोजनात् ॥ जुहुयाद्भूतयज्ञादि श्राद्धकृत्वातुतत्स्मृतम् इति ॥ अर्वाग्ब्राह्मणभोज
जनात् इत्यनेनाग्नौकरणानंतरंवैश्वदेवाहुतिर्जुहुयादित्यर्थः॥श्राद्धंकृत्वाभूतयज्ञादिस्मृतम्इत्यनेनभूतयज्ञस्यैवश्राद्धांतेकर्त्तव्यतेतिकृतार्था
द्वैश्वदेवाहुत्यनंतरमेवबलिहरणंकार्य्यमितिदर्शितमितिस्मृतिचंद्रिकाकारः ॥ अयमेकोऽनग्निकवैश्वदेवस्यकालः ॥ द्वितीयोऽपि (भवि
ष्यपुराणे) पितॄन्संतर्प्य विधिवद्बलिंदद्याद्विधानतः ॥ वैश्वदेवंततः कुर्यात्पश्चाद्ब्राह्मणवाचनम् ॥ बलिशब्दोपितत्रैवव्याख्यातः ॥ येग्निद
ग्धातुमंत्रेण भूमौयन्निक्षिपेद्बुधः॥जानीहितंबलिंवीरश्राद्धकर्मणिसर्वदेति॥अनेनविकिरसंज्ञकबलिप्रदानानंतरं स्वस्तिवाचनात्पूर्वं वैश्वदेवं

कुर्य्यादित्युक्तंभवति ॥ अयंद्वितीयः कालः ॥ अथ तृतीयोपि स्मृतिपुराणादावुक्तः ॥ (तत्राह मनुः) उच्छेषणंतुतत्तिष्ठेद्यावद्विप्रविस
र्जिताः ॥ ततोगृहबलिंकुर्यादितिधर्मोव्यवस्थितः ॥ (अस्यार्थोमेधातिथिनाकृतः) भुंजानेषु द्विजेषु यद्भुज्यधिकरणपात्रलग्नभूमौ
चपतितमन्नंतस्माद्देशात्तावन्नमार्ष्टव्यंयावद्ब्राह्मणाननिष्क्रांताः ॥ ततोनिष्पन्नेश्राद्धकर्मणि अनंतरंवैश्वदेवहोमान्नबहिःकाकातिथ्यादि
भोजनं च कर्त्तव्यमित्यर्थः ॥ (अयमेवार्थोमत्स्यपुराणे) उच्छेषणंतुतत्तिष्ठेद्यावद्विप्राविसर्जिताः ॥ वैश्वदेवंततःकुर्यान्निवृत्ते
पितृकर्मणि ॥ (माधवीये पैठीनसिः) श्राद्धंनिर्वर्त्यविधिवद्वैश्वदेवादिकंततः ॥ कुर्याद्भिक्षांततोदद्याद्धंतकारादिकंतथा इति ॥
निरग्निकानांकातीयानांतुश्राद्धांतेएववैश्वदेवेतिकाशिनाथप्रभृतयः ॥ सर्वेषांश्राद्धांतेएवेतिमेधातिथिस्मृतिरत्नावल्यादयोबहवः ॥
(श्राद्धतत्त्वे भविष्यपुराणमपि) कृत्वाश्राद्धंमहाबाहोब्राह्मणांश्चविसृज्यच ॥वैश्वदेवादिकंकर्मततःकुर्यान्नराधिप इति ॥ अतोऽनग्निकर्तृक
स्य वैश्वदेवादेस्त्रयःकालः ॥ एकोऽग्नौकरणानंतरम् अन्योविकिरादुपरि तृतीयो ब्राह्मणविसर्जनात्पश्चादिति ॥ एतत्सर्वंतुसपात्रकविष
यम् ॥ अपात्रकेतुश्राद्धांते ब्राह्मणभोजनात् प्रागेव ॥ साग्निकानांतुसर्वत्रश्राद्धात् पूर्वमेव वैश्वदेवः ॥ इति वैश्वदेवकालनिर्णयः ॥ (अथ
वैश्वदेवकरणप्रकारो मार्कंडेयपुराणे) स्वाहांतास्ताजलेवाग्नौकुर्यात्पंचाहुतीःक्रमात् ॥ ब्रह्मप्रजापतिर्गृह्याःकश्यपोनुमतिस्तथा ॥ १ ॥
चतुर्थ्यंतैर्जलंक्षिप्त्वा वैश्वदेवबलिंचरेत्॥पर्ज्जन्यआपःपृथ्वी धातापिचविपूर्वगः॥२॥ चतुर्वायुःप्राच्यवाचीप्रतीचीचाप्युदीच्यपि॥ब्रह्मान्त
रिक्षसूर्याश्चविश्वेदेवास्ततः परम् ॥ ३ ॥ विश्वेभूताउषाश्चापि भूतानांचपतिस्तथा ॥ अपसव्येनसतिलं पितृभ्यश्चस्वधानमः ॥ ४ ॥
सनकादिसप्तमर्त्येभ्योहंतकंठोपवीतवान् ॥ यक्ष्मैतत्तेचसव्येनजलंनिर्णेजनंनमः ॥ ५ ॥ दद्यात्काकाश्चचांडालाः पतिताःपापसंगिनः ॥

ततःकीटपतंगाश्च गावःश्वानौततःपरम् ॥ ६ ॥ चतुर्थ्यंतानुपादाय नमोंतान्क्रमतःपठेत् इति ॥ उच्छिष्टमार्जनानंतरं वैश्वदेवंकृत्वा
शेषमन्नं बांधवैःसह भुंजीत ॥ (तथाच मत्स्यपुराणे) ततस्तुवैश्वदेवांते सभृत्यसुतबांधवः ॥ भुंजीतातिथिसंयुक्तः सर्वंपितृनिषेवितमिति ॥
(ब्रह्मपुराणे) एवंसम्यग्गृहस्थेन देवताः पितरस्तथा ॥ संपूज्याहव्यकव्याभ्यामन्नेनातिथिबांधवाः ॥ भूतानिभृत्याविकलाः पशुप
क्षिपिपीलिकाः ॥ भिक्षवोयाचमानाश्चयेचान्येयाचकागृहे इति ॥ विकलाः अंधबधिरमूकादय इत्यर्थः ॥ (हेमाद्रौ) बंदिमागधसूताश्च
तौर्यत्रिकविदस्तथा । अलब्धलाभाः श्राद्धेषु नाशयंति महद्यशः ॥ तस्मात्तेपि विभक्तव्याः सकलंसंविभज्यच इति ॥ तौर्यत्रिकं नृत्यगी
तवाद्यानि॥अलब्धलाभाः अप्राप्तान्ना इत्यर्थः॥ एतत्क्षयाहश्राद्धपरमिति वृद्धाः॥क्षयाहे भूरिभोजनमितिकौर्मात् ॥ (शेषभोजनाकृते दोष
माह देवलः) श्राद्धंकृत्वातुयोमर्त्योंनभुंक्तेऽथकदाचन ॥ देवाहव्यंनगृह्णंति कव्यानिपितरस्तथा इति ॥ (अतएवश्राद्धदिनेउपवासनिषेध
माह व्यासः) आदित्येऽहनिसंक्रांतावसितैकादशीग्रहे ॥ व्यतीपातेकृतेश्राद्धेपुत्रीनोपवसेद्गृही ॥ (कात्यायनव्यासौ) उपवासोयदानित्यः
श्राद्धंनैमित्तिकंभवेत् ॥ उपवासंतदाकुर्यादाघ्रायपितृसेवितत इति ॥ (श्राद्धशेषान्नभोजनस्य क्वचिन्निषेधमाह मार्कंडेयः) पित्रादीनाम
थान्येषां श्राद्धशेषान्नभोजनम् ॥ व्रतिनांविधवानांच यतीनांचविगर्हितम्॥(अथभोजनानंतरं दातृभोक्तृनियममाह बृहस्पतिः)तांनिशां
ब्रह्मचारीस्याच्छ्राद्धकृच्छ्राद्धभुक्तथा॥ अन्यथावर्त्तमानौतौस्यातांनिरयगामिनौ॥ (मात्स्येऽपि पुनर्भोजनमध्वानंयानमायासमैथुनम्।
श्राद्धकृच्छ्राद्धभोक्ताचसर्वमेतद्विवर्जयेत् ॥ (जाबालिः) तांबूलंदंतकाष्ठंचस्नेहस्नानमभोजनम् ॥ रत्यौपधिपराान्नंचश्राद्धकर्त्ताविवर्जयेत् ॥
(मात्स्ये) एतच्चानुपनीतोऽपिकुर्यात्सर्वेषुपर्वसु ॥ श्राद्धंसाधारणंनामसर्वकामफलप्रदम् ॥ भार्याविरहितोऽप्येतत्प्रवासस्थोपिभक्तिमान्॥

शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनानृप। इति गौडीयश्राद्धप्रकाशे पार्वणश्राद्धप्रयोगनिर्णयः ॥ ॥ अथैकोद्दिष्टप्रयोगः। (तत्र कात्यायनः) अथैकोद्दिष्टमेकंपात्रमेकोऽर्घ्यएकंपिंडंनावाहनं नाग्नौकरणं नात्रविश्वेदेवाः स्वदितमितितृप्तिप्रश्नः सुस्वदितमित्यनुज्ञानोपतिष्ठतामित्यक्षय्यस्थानेअभिरम्यतामितिविसर्गं इति ॥ (याज्ञवल्क्योपि) एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ॥ अवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामितिवदेयुस्तेभिरताःस्मह ॥ अस्यार्थः—एकोद्दिष्टम् एक उद्दिष्टो यस्मिन् श्राद्धे तदेकोद्दिष्टमितिकर्मनामधेयं दैवरहितं विश्वेदेवरहितं एकार्घ्यपात्रमेकदर्भपवित्रकं च आवाहनाग्नौकरणहोमेनचरहितम् अपसव्यवत् प्राचीनावीतब्रह्मसूत्रवत् तत्राक्षय्यस्थाने उपतिष्ठतामितिवदेत् ॥ विप्रविसर्जने कर्तव्ये वाजेवाज इतिजपानंतरं अभिरम्यतामितिब्रूयात् तेचाभिरताः स्मेति ब्रूयुः ॥ शेषंपार्वणवदित्यर्थः ॥ इत्येकोद्दिष्टम् ॥

अथ पार्वणविकृतिरूपवृद्धिश्राद्धनिर्णयः ॥ तत्रतावद्वृद्धिर्नामपुत्रजन्मादिनिमित्तोपलक्षितः कालः ॥ (तथाचहेमाद्रौ वसिष्ठः) पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् ॥ (श्राद्धतत्त्वेमात्स्येच) अन्नप्राशेचसीमंते पुत्रोत्पत्तिनिमित्तके ॥ पुंसवेचनिषेकेच नववेश्मप्रवेशने ॥ वेदव्रतजलादीनांप्रतिष्ठानांतथैवच ॥ तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितम् ॥ (ब्रह्मपुराणेपि) जन्मन्यथोपनयने विवाहेपुत्रकस्यच ॥ पितृन्नांदीमुखान्नामतर्पयेद्विधिपूर्वकम् ॥ देवव्रतेषुचाधानयज्ञपुंसवनेषुच ॥ नवान्नभोजनेस्नाने ऊढायाःप्रथमार्त्तवे ॥ देवारामतडागादिप्रतिष्ठासूत्सवेषुच ॥ राज्याभिषेकेबालान्नभोजने वृद्धिसंज्ञकान् ॥ वनस्थाद्याश्रमंगच्छन् पूर्वेद्युःसत्यएववा ॥ पितॄन्पूर्वोक्तविधिनातर्पयेत्कर्मसिद्धये ॥ (हेमाद्रौ जाबालिः) यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः ॥ पुत्र

जन्मवृषोत्सर्गे वृद्धिश्राद्धंसमाचरेदिति ॥ इदंचावश्यकम् ॥ वृद्धौनतर्पितायेवै पितरोगृहमेधिभिः ॥ तद्धीनमफलंज्ञेयमासुरोविधिरेवसः ॥
इतिशातातपोक्तेः ॥ (अत्रश्राद्धत्रयंसएवआह) मातृश्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरम् ॥ ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतम् ॥
(तत्कालमाहपृथ्वीचंद्रोदये गार्ग्यः) मातृश्राद्धंतुपूर्वेद्युः कर्माहनितुपैतृकम् ॥ मातामहं चोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतम् ॥ (अत्राप्य
शक्तौसएव) ॥ पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे ॥ श्राद्धत्रयंप्रकुर्वीतवैश्वदेवंतुतांत्रिकम् ॥ (वृद्धमनुरपि) अलाभेभिन्नकाला
नां नांदीश्राद्धत्रयंबुधः पूर्वेद्युर्वैप्रकुर्वीत पूर्वाह्णे मातृपूर्वकमिति॥ पूर्वाऽह्णोत्रसार्द्धप्रहरपरः॥ एतच्छ्राद्धंतुमातृपूजापूर्वकंकार्यमित्यर्थः ॥
कूर्मपुराणेपि) पूर्वंतुमातुरः पूज्याभक्त्यावैसगणेश्वराः ॥ (कात्यायनोपि) कर्मादिषुतुसर्वेषु मातरः सगणाधिपाः ॥ पूजनीयाः प्रयत्ने
न पूजिताः पूजयंतिताः ॥ प्रतिमासुचशुभ्रासु लिखितावापटादिषु ॥ अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः ॥ कुड्यलग्नांवसोर्धारांसप्तधारां
घृतेनतु ॥ कारयेत्पंचधारांवानातिनीचांनचोच्छ्रिताम् ॥ आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितइति॥ आयुष्याणि आयुष्यंवर्चस्य
मित्यादिमंत्रत्रयम् ॥ (एतन्मातृपूजनस्याकरणे भविष्यपुराणे दोषोदर्शितः) ॥ अकृत्वामातृयज्ञंतुयःश्राद्धंपरिवेषयेत् ॥ तास्तस्यक्रोध
संपन्नाहिंसांकुर्वंतिदारुणाम् (तासां नामान्याह कर्मप्रदीपेकात्यायनः)॥गौरीपद्माशचीमेधासावित्री विजयाजया॥देवसेनास्वधास्वाहा
मातरोलोकमातरः ॥ धृतिःपुष्टिस्तथातुष्टिरात्मदेवतयासह ॥ विनायकेनसहिताः पूजनीयाःप्रयत्नत इति ॥ (श्राद्धानुक्रमो मत्स्य
पुराणे) उत्सवानंदसंताने यज्ञोद्वाहादिमंगले ॥ मातरः प्रथमं पूज्याः पितरस्तदनंतरम् ॥ ततोमातामहाःपूज्या विश्वेदेवास्तथैवच ॥
(शातातपवसिष्ठावपि) मातृभ्यःकल्पयेत्पूर्वं पितृभ्यस्तदनंतरम् ॥ ततोमातामहानांच कुर्याच्छ्राद्धंक्रमेणवै इति ॥ कात्यानेनतु

अयंश्राद्धः षट्पुरुषात्मकः कथितः॥तच्चुछंदोगानामेव नतु सर्वेषाम् इति॥केचित् मातामह्यादित्रिदैवत्यंचतुर्थमपिश्राद्धमाचक्षते॥ तत्तु शाखान्तरविषयम् ॥ ब्राह्मणसंख्या मार्कंडेयपुराणे युग्माश्चात्रद्विजाः कार्य्यास्तेपूज्याश्चप्रदक्षिणम् ॥ (वृद्धशातातपोपि) त्रिष्वप्येतेषुयुग्मांस्तु ब्राह्मणान्नियतः शुचिरिति ॥ त्रिषुमातृपितृमातामहश्राद्धेष्वित्यर्थः ॥ (विष्णुपुराणे) युग्मास्तुप्राङ्मुखान्विप्रान् भोजयेन्मनुजेश्वरः ॥ (हेमाद्रौ छागलेयः) एकैकस्यतुवर्गस्य द्वौद्वौविप्रौसमर्चयेत् ॥ वैश्वदेवेतथाद्वौच नप्रसज्येतविस्तरे इति ॥ एवं चात्राष्टौ ब्राह्मणाःसंपद्यंते यः कश्चिदतिथिरागच्छेत् सनवमोपितत्र भोजनीय इति हेमाद्रिप्रभृतयः ॥ (अत्रविशेषः कात्यायनेनदर्शितः) आभ्युदयिके प्रदक्षिणार्थमुपचारः ॥ पूर्वाह्णे पित्र्यमंत्रवर्ज्यंजपऋजवोदर्भायवैस्तिलार्थाः संपन्नमितितृप्तिप्रश्नः सुसंपन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिंडा नांदीमुखान् पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नांदीमुखाः पितरः प्रीयंतामित्यक्षय्यस्थाने नांदीमुखान्पितॄन् वाचयिष्य इतिपृच्छति वाच्यतामित्यनुज्ञातोनांदीमुखाःपितरो मातामहाश्च प्रीयंतामितिनस्वधांप्रयुजीतयुग्मानाशयेदत्र इति । (हेमाद्रौ शातातपः) कर्तव्यंचाभ्युदयिकंश्राद्धमभ्युदयार्थिना । सव्येनचोपवीतेनऋजुदर्भैश्चधीमता । पितॄणांरूपमास्थायदेवा अन्नंसमश्नुते । तस्मात्सव्येनदातव्यंवृद्धिश्राद्धेतुनित्यशः । यथैवोपचरेद्देवांस्तथावृद्धौपितॄनपि । (कात्यायनोऽपि) सदापरिचरेद्भक्त्या पितॄनप्यत्रदेववत् । निपातोनहिसव्यस्यजानुनोविद्यतेक्वचित् । नात्रापसव्यकरणंनपित्र्यंतीर्थमिष्यते । मधुमध्वितियस्तत्रत्रिर्जपः श्रेय इच्छता । गायत्र्यनंतरःसोऽत्रमधुमंत्रविवर्जितः । नचाश्नत्सुजपेदत्रकदाचित्पितृसंहिताम् । अन्यएवजपः कार्य्यःसोमसामादिकःशुभः। यस्तस्यविकिरोऽन्नस्य तिलवान्यववांस्तथा ॥ उच्छिष्टसन्निधौसोऽत्रतृप्तेषुविपरीतक इति ॥ वैश्वदेविकः यववान् पित्र्यः तिलवान्

विपरीतकः सर्वोपियववानित्यर्थः । अनेनवैश्वदेविके येधर्मास्तेसर्वेप्यत्रकर्त्तव्यानपित्र्यश्राद्धधर्माइत्युक्तंभवति ॥ (ब्रह्मपुराणे) स्वाहा
शब्दंप्रयुंजीतस्वधास्थानेचबुद्धिमान् । वृद्धिश्राद्धे सदासव्यं यज्ञसूत्रंचकारयेत् । कुशस्थानेचदूर्वाःस्युर्मंगलस्याभिवृद्धये । (हेमाद्रौ प्र
चेताः) नजपेत्पैतृकंजप्यंनमांसंतत्रदापयेत् इति । अत्रजप्यशब्दात् योभुंजानेषुद्विजेषुपितृलिंगकानांमंत्राणांजपःसएवनिषिद्ध्यते नतूशं
तस्त्वेत्यादिपदार्थानुष्ठानकरणीभूतानामपि।(अतएव जातूकर्ण्यः) पितृलिंगेन मंत्रेण यत्कर्मपुनिभिः स्मृतम् । तेनैवतद्विधातव्यममंत्रम
कृतंयतः । (कात्यायनः) अतःपरंप्रवक्ष्यामि विशेषइहयोभवेत् ॥ प्रातरामंत्रितान्विप्रान् युग्मानुभयतस्तथा ॥ उपवेश्य कुशान्दद्यादृ
जूनेवहिपातितान् इति । उभयतः दैवेपित्र्येच इत्यर्थः ॥ (ब्रह्मपुराणे) विप्रान्प्रदक्षिणावर्त्तंप्राङ्मुखानुपवेशयेत् ॥ (छागलेयोपि) सर्वा
नेवतुतान्विप्रान्प्राङ्मुखानुपवेशयेत् । प्राङ्मुखानुदङ्मुखान्वेतिहेमाद्रिः ॥ (आवाहनप्रकारश्चब्राह्मेदर्शितः) नांदीमुखान्पितॄन्भक्त्या
सांजलिश्चसमाह्वयेत् । पठेत्पवित्रमंत्रंतुविश्वेदेवासआगतइति।अत्रार्घ्यदानंचद्वयोर्द्वयोर्विप्रयोर्हस्तौमेलयित्वादद्यात् (तथाचपद्मपुराणे)
दद्यादर्घ्यंद्वयोर्द्वयोरिति । अर्घ्यदानानंतरं गंधपुष्पादिकंदेयमितिहेमाद्रौ । अत्राग्नौकरणंसव्येनएवदैविकवत्धर्मत्वात्।(पिंडदानेविशेषो
भविष्ये) एवंभुक्तेषुविप्रेषु दद्यात्पिंडान्समाहितः।दध्यक्षतैर्विमिश्रांस्तुबदरैश्चखगाधिप । (विष्णुपुराणेपि) दध्यक्षतैः सबदरैः प्राङ्मुखो
दङ्मुखोपिवा । देवतीर्थेनवैपिंडान् दद्यात्कामेनवैनृप इति ॥ कामेन इच्छया इच्छाभावेतुनदद्यात् ॥ (पिंडदानकरणाकरणयोर्व्यवस्था
उक्ता भविष्यपुराणे) पिंडनिर्वपणंकुर्यान्नैवकुर्यान्नराधिप ॥ वृद्धिश्राद्धेमहाबाहो कुलधर्ममवेक्ष्यवै ॥ अनेनयेषांकुलेवृद्धपरंपरयावृद्धिश्रा
द्धेपिंडदानमनुष्ठीयते तैः कर्त्तव्यं येषांकुलेनानुष्ठीयते तैर्नकर्त्तव्यमिति व्यवस्थादर्शिता ॥ इयंचव्यवस्था निरग्निकानामेव ॥ साग्निकैस्तु

सर्वदाकर्त्तव्यमिति ॥ तथाच (ब्रह्मपुराणे) योऽग्नौतुविद्यमानेपि वृद्धौपिंडान्ननिर्वपेत् ॥ पतंतिपितरस्तस्य नरकेसतुपच्यते इति ॥
(अत्रपिंडदानायप्रदेशविशेषमाह शातातपः) प्रदद्यात्प्राङ्मुखः पिंडान्वृद्धौनाम्नासबाह्यतइति । सः श्राद्धकर्त्ता । बाह्यतः भोजनशाला
या बहिः। नतूच्छिष्टसमीप इत्यर्थः । (हेमाद्रौ) शेषमन्नमनुज्ञाप्य वैश्वदेवक्रियांततः । श्राद्धाहिश्राद्धशेषेण वैश्वदेवंसमाचरेत् इति । अत्र
प्रागुक्तविशेषातिरिक्तंधर्मजातंपार्वणवत् कर्त्तव्यम् । (तथाच विष्णुधर्मोत्तरे) वृद्धौसमर्चयेद्विद्वान्नित्यंनांदीमुखान्पितॄन् । संपादितोविशे
षस्तु शेषंपार्वणवद्भवेत् । (पद्मपुराणे) एवंशूद्रोपिसामान्यं वृद्धिश्राद्धंतुसर्वदा । नमस्कारेणमंत्रेण कुर्याद्दानादिवैबुधः । इतिवृद्धिश्राद्धप्र
योगः ।। अथनित्यश्राद्धप्रयोगः (तत्र याज्ञवल्क्यः) कुर्य्यादहरहःश्राद्धमन्नाद्येनोदकेनवा । तृप्त्यर्थंवैपितॄणांतु आत्मनःश्रेय इच्छता ॥
(कूर्मपुराणे) एकंतुभोजयेद्विप्रं पितॄनुद्दिश्यसत्तम ॥ नित्यश्राद्धंतदुद्दिश्य पितृयज्ञोगतिप्रदः ॥ (कात्यायनोपि) एकमप्याशयेद्विप्रं पितृ
यज्ञार्थसिद्धये ॥ (मनुस्मृतावपि) दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा ॥ पयोमूलफलैर्वापि पितृभ्यस्तृप्तिमाहरन् ॥ कुर्यादहरहःश्रा
द्धमन्नाद्येनोदकेनवा ॥ पितॄनुद्दिश्यविप्रांस्तु भोजयेद्विप्रमेववा इति ॥ एकस्यापिविप्रस्य सन्निहितालाभे भोजनपर्याप्तान्नासंभवविष
येच कात्यायनेनोक्तम् । अदैवंनास्ति चेदन्योभोक्ताभोज्यमथापिवा॥ अप्युद्धृत्ययथाशक्त्याकिंचिदन्नंयथाविधि । पितृभ्यइदमित्युक्त्वा
स्वधाकारमुदाहरेत् ॥ एतच्चात्र ब्राह्मणस्थानंगत्वातस्मैदद्यात् ॥ यत्रपात्रंततोगतिरितिवचनात् ॥ सर्वथाविप्रालाभेतुतदन्नमग्नावप्सुवाक्षि
पेत् गवेवादद्यात् । (तदाहदेवलः) पात्राभावेक्षिपेदग्नौगवेदद्यात्तथाप्सुवाइति । एतच्चश्राद्धंषड्दैवत्यंकर्त्तव्यम् । (तथाच व्यासः) तत्तुषट्
पुरुषंज्ञेयंदक्षिणापिंडवर्जितमिति । दक्षिणायांविकल्पः। किंचिद्दत्त्वाविसर्जयेदितिप्रचेतसोक्तेः।(हेमाद्रौ व्यासोऽपि। नित्यश्राद्धंदेवपूजास

र्वमेवसदक्षिणम्॥(मत्स्यपुराणे) नित्यंतावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितम् ॥ अदैवंतद्विजानीयात् पार्वणंपर्वसुस्मृतम् ॥ (भविष्यो
त्तरेपि)आवाहनंस्वधाकारः पिंडाग्नौकरणादिकम्॥ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव च॥नित्यश्राद्धेत्यजेदेतान् भोज्यमन्नंप्रकल्पयेत्
इति ॥ भोज्यमन्नंनामयत्स्वययजमानोभुंक्ते इत्यर्थः (हेमाद्रौ प्रचेताः) नावाहनाग्नौकरणंनपिंडानविसर्जनम् ॥ अनुब्रह्मदक्षिणाश्चत्रिभ्य
श्चातिथिकल्पनम्॥अनुब्रह्मप्रतिब्राह्मणंदक्षिणाश्चदद्यादित्यर्थः॥एतावत्यशक्तौपित्र्यबलिनैवनित्यश्राद्धसिद्धिः॥तथा च (छंदोगपरिशिष्टे)
श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवा॥इति नित्यश्राद्धप्रयोगः ॥ ॥ अथतीर्थश्राद्धप्रयोगः ॥(तावद्ब्राह्मणानुज्ञानमुक्तंहेमाद्रौप्रभास
खंडे) तीर्थेविप्रवचोग्राह्यंस्नानश्राद्धार्चनादिषु ॥ (पद्मपुराणेपि) तीर्थेषुब्राह्मणंनैवपरीक्षेतकथंचन ॥ अन्नार्थिनमनुप्राप्तंभोजयेन्मनुशास
नात् इति ॥ तीर्थश्राद्धे कुतपादिकालंनप्रतीक्षेत ॥ (तथाच हारीतः) तीर्थेद्रव्योपपत्तौचनकालमवधारयेत् ॥ पात्रंचब्राह्मणंप्राप्यसद्यः
श्राद्धंविधीयते इति ॥ तीर्थंगयादि द्रव्यम् अन्नादिश्रोत्रियत्वादिविशेषेणविशिष्टंचब्राह्मणंप्राप्यनकालान्तरंप्रतीक्षेत॥किन्तुतस्मिन्नेवका
लेश्राद्धंकुर्यात्॥अत्रचसद्यइतिवचनादावश्यकत्वंप्रतीयते इत्यर्थः ॥(प्रभासखंडे) यात्रागतैर्नरैर्देवितत्रक्षेत्रनिवासिनः ॥ ब्राह्मणाःप्रथमं
पूज्या दैवेपित्र्येचकर्मणि ॥ येषुतीर्थेषुयेविप्रायेदेवायाश्चमातृकाः ॥ तेषुतान्नावमन्येतयदीच्छेज्जीवितंचिरम्॥इति ॥ तीर्थेश्राद्धंपित्रादि
नवदैवत्यंकार्यम्॥तथाच(विष्णुधर्मोत्तरे)महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच॥नवदैवत्यमत्रेष्टंशेषंषाट्पौरुषंविदुः ॥इति॥अन्वष्टकायां
वृद्धौ चगयायां चमृताहनि॥पितामह्यादिभिःसार्द्धं मातुःश्राद्धंसमाचरेत् इतिशातातपोक्तेः ॥मात्रादीनामप्युद्देश्यता तेननवदैवत्यमिति ॥
(द्वैतनिर्णये) निगमेतुद्वादशदैवत्यमुक्तम् ॥ महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच॥ज्ञेयंद्वादशदैवत्यंतीर्थेप्रौष्ठेमघासुच इति ॥ अत्रतीर्थे

इतिविशेषवाक्यात् तीर्थश्राद्धंद्वादशदैवत्यंगम्यते ॥ (अग्निपुराणेतु) पित्रादिनवदैवंवातथाद्वादशदैवतमिति ॥ अत्र वाश्रवणात् विक
ल्पएवगम्यते सचदेशभेदादिनाव्यवस्थितः ॥ पितृव्यादीनांतुएकोद्दिष्टमेव ॥ तदशक्तौपिंडदानमात्रंकार्य्यम् ॥ तत्पत्नीनामपिपृथगेवै
कोद्दिष्टादिकार्य्यमिति ॥ (तीर्थश्राद्धेवर्ज्जनीयानि हेमाद्रौपद्मपुराणे) श्राद्धंतत्रतुकर्त्तव्यमर्घ्यावाहनवर्जितम् ॥ श्वध्वांक्षगृध्रकाकाद्याश्च
तिदृष्टानतत्क्रिया इति ॥ क्रियाःश्राद्धपिंडदानादिरूपाः श्वादयः सर्वेप्यशस्ताःनघ्नंतिनदूषयंतीत्यर्थः॥(तत्रैव) अर्घ्यमावाहनंचैवद्विजा
ङ्गुष्ठनिवेशनम्॥विकिरंतृप्तिप्रश्नश्चतीर्थश्राद्धे विवर्जयेत् ॥(पितृभक्तौ स्मृत्यन्तरे) आसनंपिंडदानंचपुनःप्रत्यवनेजनम् ॥ अर्चनंदक्षिणां
चान्नंदद्यात्तीर्थेष्वयंविधिः ॥ (वायुपुराणेपि) नावाहनंनदिग्बंधोनदोषोदृष्टिसंभवः ॥ सकारुण्येनकर्त्तव्यंतीर्थश्राद्धंविचक्षणैः ॥ पिंडासनं
पिंडदानंपुनः प्रत्यवनेजनम्॥दक्षिणाचान्नसंकल्पस्तीर्थश्राद्धेष्वयंविधिः ॥ (तत्रैव) अन्यत्रावाहिताःकाले पितरोयांत्यसुंप्रति ॥ अत्रा
गतंसुतंदृष्ट्वास्वयमायांतिसर्वथा इति॥ (पिंडद्रव्याण्युक्तानि देवीपुराणे) सक्तुभिःपिंडदानंस्यात् संयावैःपायसेनवा॥पिण्याकेनतिला
नांवाभक्तिमद्भिर्नरैःसदा ॥ (अग्निपुराणेपि) पायसेनाज्ययुक्तेनसक्तुनाचरुणातथा॥पिंडदानंतंडुलैश्चगोधूमैस्तिलमिश्रितैः॥ (विष्णुध
र्मोत्तरे) तीर्थश्राद्धेसदापिंडान्क्षिपेत्तीर्थेसमाहितः॥ दक्षिणाभिमुखोभूत्वापित्र्यादिग्याप्रकीर्तिता इति॥(अथगयामधिकृत्यहेमाद्रौब्रह्म
वैवर्त्तै) उद्यतस्तुगयांगंतुश्राद्धंकृत्वाविधानतः ॥ विधायकार्पटीवेषंग्रामस्यापिप्रदक्षिणम् ॥ ततोग्रामान्तरंगत्वाश्राद्धशेषस्यभोजनम् ॥
कृत्वाप्रतिदिनंगच्छेत्प्रतिग्रहविवर्जित इति॥श्राद्धंमातृपूर्वंनवदैवतं कार्पटीवेषंकाषायादिवस्त्रपरिधानरूपमित्यर्थः।(श्राद्धतत्त्वे गौतमोपि)
तीर्थयात्रासमारंभेतीर्थात्प्रत्यागमेपिच।वृद्धिश्राद्धंप्रकुर्वीतबहुसर्पिःसमन्वितम्।वृद्धिश्राद्धं नांदीश्राद्धमित्यर्थः।(महाभारते)केशश्मश्रुनखा

दीनांवपनंचनशस्यते॥ अतोनकार्य्यंवपनंगयाश्राद्धार्थेनासदा॥(वायुपुराणेपि)मुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः॥वर्जयित्वाकुरुक्षेत्रं
विशालंविरजांगयाम् ॥ (तत्रैव) पायसेनाथचरुणासक्तुनापिष्टकेनवा ॥ तंडुलैःफलमूलाद्यैर्गयायांपिंडपातनम् इति ॥ सक्तुर्यं
वपिष्टंपिष्टकंतंडुलपिष्टंतंडुलाअखंडाएवपायसादीनांपूर्वपूर्वाभावेउत्तरोत्तरंग्राह्यमित्यर्थः॥ अन्यदपितत्रैव॥तिलकल्केनखंडेन गुडेनसघृ
तेनवा ॥ कवलेनैवदध्नावा ऊर्षेनमधुनापिवा॥ पिण्याकंसघृतंखंडंपितृभ्योऽक्षय्यमित्युत॥मुष्टिमात्रप्रमाणेनचार्द्रामलकमात्रकम्॥शमी
पत्रप्रमाणेनपिंडंदद्याद्गयाशिरे ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतम्॥पितामाताचभार्याचभगिनीदुहितुःपतिः॥पितृष्वसामातृष्वसा
सप्तगोत्रांश्चतारयेत् ॥ चतुर्विंशश्चविंशश्चषोडषद्वादशैवहि ॥ रुद्रादशवसुश्चैवकुलमेकोत्तरंशतमिति ॥ अथ गयाश्राद्धाधिकारिणः।तत्र
पुत्रपौत्रप्रपौत्राएवप्रधानाधिकारिणःतद्भिन्नाःसर्वेपिगौणाधिकारिणः॥(तथाच वायुपुराणे)आत्मजोवान्यजोवापिगयाकूपेयदातदा॥यन्ना
म्नापातयेत्पिंडंतंनयेद्ब्रह्मशाश्वतम्॥(स्मृतिरत्नावल्याम्) सवर्णाज्ञातयोमित्रबांधवाःसुहृदस्तथा॥तेपिभूयोगयांगत्वापिण्डंदद्युर्विधानतः॥
(वह्निपु०) पुत्रोवाबन्धुपुत्रोवामित्रंवास्वजनोपिवा।ऋणिकोवाथवादद्याद्द्वयोःस्वर्गस्तदातयोः। जीवत्पितृकोजीवन्मातृकश्चगयाश्राद्धे
सर्वथानाधिकारी।जीवत्पितृकोमृतमातृकस्तुयदिप्रसंगेनगयांप्राप्नोतितदात्रिदैवत्यअन्वष्टकाश्राद्धमिवमातृश्राद्धमेवकुर्यात्॥(तदुक्तंत्रिस्थ
लीसेतौ)गयांप्रसंगतोगत्वामातृश्राद्धंसमाचरेदिति।तेनजीवत्पितृकस्यगयामुद्दिश्यगमनेनमातृश्राद्धंकरणम्।आन्वष्टक्यंगयाप्राप्तौसत्यां
यच्चक्षयाऽहनि ॥ मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवतीतिमैत्रायणीयपरिशिष्टवाक्यात्।अत्रप्राप्तावित्युक्त्याप्रासङ्गिकगमनंसूचितम्।
(गयाश्राद्धकालोवायुपुराणे)मीनेमेषेस्थितेसूर्येकन्यायांकार्मुकेघटे॥दुर्लभंत्रिषुलोकेषुगयायांपिंडपातनम्॥मकरेवर्त्तमानेच ग्रहणेचंद्रसूर्ययोः

योः ॥ दुर्लभंत्रिषुलोकेषुगयायांपिंडपातनम् ॥ गयायांसर्वकालेषु पिंडंदद्याद्विचक्षणः ॥ अधिमासेजन्मदिने अस्तेचगुरुशुक्रयोः ॥
नत्यक्तव्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ।(वह्निपुराणे)गयाश्राद्धंप्रकुर्वीतसंक्रांत्यादौविशेषतः।कालेवाऽपरपक्षेवाचतुर्थ्यांदितिथिष्वपीति॥
अपरपक्षे कृष्णपक्षे इत्यर्थः॥(गयामहिमा ब्रह्मवैवर्त्ते) फल्गुतीर्थेनरःस्नात्वा देवंदृष्ट्वागदाधरम्॥गयाशिरःपरिक्रम्य मुच्यतेब्रह्महत्यया॥
(वायुपुराणे) गयायांपिंडदानेन यत्फलंलभतेनरः॥नतच्छक्यंमयावक्तुं कल्पकोटिशतैरपि॥(आदित्यपुराणे)प्रत्यागतश्चाथगृहंपुनस्तु
देवान्पितृन्ब्राह्मणान् पूजयेच्च ॥ एवंकुर्वंस्तस्यतीर्थाद्यदुक्तफलंतत्स्यान्नात्रसंदेहोऽस्ति ॥ इतिश्रीगौडीयश्राद्धप्रकाशे पूर्वखंडे मुख्यश्राद्ध
कल्पेपार्वणादिप्रयोगनिर्णयः ॥ ॥ अथानुकल्पिकाः पार्वणादिश्राद्धप्रयोगाः ॥ तत्रतावन्मुख्यकल्पाशक्तौ चानुकल्पानुष्ठानेमुख्यफला
वाप्तिमाह-(शातातपः) यथाकथंचिन्नित्यानिकुर्यादिन्दुक्षयादिषु ॥ पात्रद्रव्याद्यसंपत्तौ सोतिमुख्यफलंलभेदिति॥अस्यार्थः॥ यथाक
थंचित्॥कियदङ्गहान्या नित्यानि यावज्जीवमनुष्ठेयतया विहितानि दर्शपूर्णमासपिंडपितृयज्ञश्राद्धादीनि ॥ इंदुक्षयादिषु अमावास्या
दिकालेषु पात्राणि पूर्वोक्तलक्षणाब्राह्मणाः द्रव्यंमधुपायसोदनापूपसूपशाकादि इत्यर्थः ॥ (भविष्योत्तरे) श्राद्धानुकल्पंयः
कुर्यात् जात्यवस्थाद्यपेक्षया ॥ श्रद्धावान्सोऽप्यवाप्नोति मुख्यश्राद्धफलंनर इति ॥ जात्यपेक्षया यथाशूद्रः स्वकीयां शूद्रतामपेक्ष्य
मंत्ररूपाङ्गहीनं पक्वान्नहीनं चानुकल्परूपंश्राद्धं करोति यथावा स्त्रीमंत्रहीनं अवस्थापेक्षया यथाऽनुपनीतोमंत्रहीनमपत्नीकःप्रवासी चाऽऽ
महेमश्राद्धयोरन्यतरत् ॥ आदिशब्देनपात्रद्रव्याद्यसंपत्त्यपेक्षादि संगृह्यते इत्यर्थः ॥ मुख्यानुष्ठानशक्तिमांस्त्वनुकल्पमनुतिष्ठन्
कर्मफलंनप्राप्नोतीत्याह (हेमाद्रौ व्यासः) शक्तःप्रथमकल्पस्य योऽनुकल्पेनवर्त्तते ॥ सनाप्नोतिफलंतस्य परत्रेतिसुनिश्चितम् ॥इति॥

अत्रानेकब्राह्मणसंपत्त्यभावे अनेकब्राह्मणभोजनपर्याप्तान्नासंभवेचैकेनैवब्राह्मणेनषड्दैवत्यंषट्पिंडात्मकंश्राद्धंकुर्यात ॥ (तथाच प्रभास खंडे) ॥ द्रव्याभावेद्विजालाभे विधिंवक्ष्यामितत्त्वतः ॥ एकेनापिहिविप्रेण षट्पिंडंश्राद्धमाचरेत्॥ षड्दर्भान् दापयेत्तस्मै षड्भ्योदद्यात्त थासनम्।षडप्यावाहयेत्तत्र षड्भ्योदद्यात्तथाहविरिति।द्विजालाभे इत्यनेकद्विजालाभे यदाचषड्दैवत्यमेकेनैवविप्रेण कुर्यात्तदासर्वगुणसं पन्नंविप्रंनिमंत्रयेदित्यर्थः॥एकविप्रपक्षेवैश्वदेविकानुष्ठानप्रकारंकथंकार्यं तदाह (वसिष्ठः) यद्येकंभोजयेच्छ्राद्धे देवंतत्रकथंभवेत् ॥ अन्नं पात्रेसमुद्धृत्य सर्वस्यप्रकृतस्यच ॥ देवतायतनेकृत्वा ततःश्राद्धंप्रवर्त्तयेत ॥ प्रास्येदन्नं तद ग्नौ तु दद्याद्वाब्रह्मचारिणे इति ॥ अस्यार्थोहेमाद्रिणाकृतः ॥ प्रकृतश्राद्धार्थंसंपादितस्यतत्तज्जातीयस्यान्नस्य प्रत्येकमेकदेशं समुद्धृत्य देवतायतने वैश्वदेविकद्विजोपवेशनो चितेस्थाने पात्रमासाद्य तत्रपरिवेष्य तत्रत्यासनेच विश्वान्देवानावाह्य तान् पुरोवर्त्तिन इवानुध्याय पृथिवीतेपात्रमित्यादिकंजपित्वा पुरूरवार्द्रवसंज्ञकेभ्योविश्वेभ्योदेवेभ्यइदमन्नंस्वाहा ॐतत्सदित्युक्त्वाश्राद्ध पितृकर्म प्रवर्त्तयेदित्यर्थः ॥ (ब्रह्माण्डपुराणेतु) वैश्वदेवि कस्थाने अग्निस्थापनमुक्तम् ॥ एकएवयदाविप्रो द्वितीयोनोपपद्यते ॥ पितॄणांब्राह्मणो योज्यो दैवेत्वग्निंनियोजयेत् ॥ अत्रैकस्मिन् ब्राह्मणे अनेकेषांपितॄणां तृप्तिप्रकारमाह (शातातपः) ॥ एकस्तुब्राह्मणःश्राद्धे स्वल्पंचप्रकृतंभवेत् ॥ त्रयश्चपितरःप्रोक्ताः कथंतृप्यंतुते त्रयः ॥ उरस्यश्नंतिपितरो वामपार्श्वेपितामहाः ॥ प्रपितामहादक्षिणतः पृष्ठतस्त्वनुयायिनः ॥ अनुयायिनः पितृपत्नीप्रभृतय इत्यर्थः ॥ (देवलस्मृतौतु) पिताभुंक्तेद्विजकरे मुखेभुंक्तेपितामहः ॥ प्रपितामहस्तुतालुस्थः कंठेमातामहःस्मृतः ॥ प्रमातामहस्तुहृदये वृद्धो

नाभौतु संस्थित इति॥वृद्धः वृद्धप्रमातामह इत्यर्थः॥(अत्रैकस्यापि ब्राह्मणस्यालाभेऽनुकल्पोत्तरमुक्तं हेमाद्रौप्रभासखंडे)अलाभे ब्राह्मण
स्यैव कौशःकार्य्योबटुःप्रिये ॥ एवमप्याचरेच्छ्राद्धं षड्दैवत्यं समाहितः ॥ विभक्तिकारयेद्यस्तु पितृह्रासप्रजायते इति ॥ कौशः
कुशमयः बटुः लघुमनुष्यप्रतिकृतिः तंबटुं ब्राह्मणत्वेनपरिकल्प्य सर्वं श्राद्धमाचरेत्॥विभक्तिः कर्मणश्छंदो लोप इतियावत् तन्नकुर्यां
दित्यर्थः ॥ दर्भबटुषुश्राद्धप्रकारमाह (श्राद्धतत्त्वेदेवलः) ॥ निधायवादर्भबटूनासनेषुसमाहितः ॥ प्रैषानुप्रैषसंयुक्तं विधानंप्रतिपादयेत्
इति ॥ आसनेषु ब्राह्मणोपवेशनोचितेषु स्वागतं भवताम् श्राद्धं करिष्ये श्राद्धे क्षणः क्रियताम् देवान् पितृनावाहयिष्ये अग्नौ करणंक
रिष्ये इत्यादयः प्रश्नाः प्रैषाः ॥ एषामुत्तराणि अनुप्रैषाः॥ तदुभयसंयुक्तंविधानं श्राद्धेतिकर्त्तव्यताकांडस्वयमेवकुर्यात् इत्यर्थः॥ तत्रसंक
लिपतस्यान्नस्य यत् कर्त्तव्यं तदपि स एव आह ॥ पात्राभावेपरंकृत्वा पितृयज्ञविधिंनरः॥ निर्दिश्याप्यन्नमुद्धृत्य यत्रपात्रंततोगतिः ॥
पात्राभावेक्षिपेदग्नौ गवेदद्यात्तथाप्सुवा ॥ नतुप्राप्तस्यलोकोस्ति पैतृकस्यविशेषत इति ॥ ब्राह्मणानामसंपत्तौ कृत्वादर्भमयान्द्विजान् ॥
श्राद्धंकृत्वा।विधानेन पश्चाद्विप्रेषु दापयेदितिश्राद्धतत्त्वेसमुद्रकरधृतवचनात्॥मुख्यद्रव्यासंभवेचान्येप्यनुकल्पाः तत्रामश्राद्धाख्याः॥ (परा
शरस्मृतिविष्णुपुराणयोः) असमर्थोऽन्नदानस्य धान्यमाशंस्वशक्तितः ॥ प्रदद्यात्तद्द्विजातिभ्यः स्वल्पामपिचदक्षिणाम् ॥ अस्यार्थः--
पक्वान्नाभावेश्राद्धयोग्यान्नप्रकृतिभूतं यवगोधूमतंडुलादि धान्यमेवविश्वान्देवान् पितृश्चोद्दिश्य पक्वान्नवत्त्यक्त्वा निमंत्रितद्विजेभ्यः सम
र्पयेदित्यर्थः॥अत्रप्रदेयधान्यपरिमाणमितिकर्त्तव्यतांचाह (हेमाद्रौ व्यासः) आमंदद्यात्तुकौंतेय दद्यादन्नंचतुर्गुणम्॥सिद्धान्नेतुविधिर्यः
स्यादामश्राद्धेप्यसौविधिः ॥ आवाहनादिसर्वंस्यात्पिंडदानंचभारत ॥ दद्याद्यच्चद्विजातिभ्यः शृतंवाऽशृतमेववा ॥ तेनाग्नौकरणंकुर्यात्

पिंडांस्तेनैवनिर्वपेत् इति ॥ चतुर्गुणाशक्तापेक्षांतरमपितेनैवोक्तम् ॥ आमं दद्याद्विकौंतेय तद्दानंद्विगुणंभवेत् ॥ त्रिगुणंचतुर्गुणंवापि न त्वेकगुणमर्पयेत् इति षट्त्रिंशन्मतेपिंडदानेपक्षान्तरमुक्तम् । आमश्राद्धंयदाकुर्यात् पिंडदानंकथंभवेत् । गृहपाकात्समुद्धृत्य सक्तुभिःप यसेनवा पिंडान्प्रदद्याद्यथालाभं तिलैःसहविमत्सर इति । विकिरादिकमप्यामद्रव्येणैवकर्त्तव्यम् । (तथाच प्रचेताः) आम ड स्तथाग्नौकरणंचयत् ॥ तद्दद्यात्तत्रतेनैव यत्किंचिच्छ्राद्धादिकंभवेत् ॥ यत्किंचिद्यदन्यदपिविकिरादितदपितेनैवआमेनैवकर्त्तव्यमित्यर्थः ॥ शूद्रस्तु आमान्नेनैवश्राद्धंकुर्यान्नतुपक्वान्नेन ॥ (तथाच सुमंतुः) सदाचैवतुशूद्राणामामश्राद्धंविधीयते ॥ (मात्स्येपि) एवंशूद्रोपिसामान्यं वृद्धिश्राद्धंचसर्वदा ॥ नमस्कारेणमंत्रेण कुर्यादामान्नवत्सदा ॥ (पराशरोपि) आमान्नेनतुशूद्रस्य तूष्णींतुद्विज पूजनम् ॥ आमंशूद्रस्यपक्वान्नं पक्वमुच्छिष्टमुच्यते ॥ (कूर्मपुराणेपि) आमश्राद्धंद्विजःकुर्याद्वृषलस्तुसदैवहि ॥ (सुमंतुप्रचेतसौ) स्त्रीशूद्रः श्वपचश्चैव जातकर्मणिचाप्यथ ॥ आमश्राद्धंसदाकुर्याद्विधिनापार्वणेनतु ॥ श्वपचः स्त्रीरहितः इत्यर्थः ॥ विष्णूशनसौ नपक्वंभोजयेद्विद्वान्सच्छूद्रोपिकदाचन ॥ भोजयन्प्रत्यवायीस्यान्नचतस्यफलभवेत् ॥ (मनुस्मृतौ) नाद्याच्छूद्रस्यपक्वान्नंविद्वा नश्राद्धिनोद्विज इति । सच्छूद्रा याज्ञवल्क्येनोक्ताः । शूद्रेषुदासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्नानापितश्चैवयश्चात्मानंनिवेदयेत् । (देवलस्तु) स्वदासोनापितोगोपः कुंभकारःकृषीवलः । ब्राह्मणैरपिभोज्यान्नाः पंचैतेशूद्रयोनय इति । अत्रान्नशब्द आमान्नपरःनतुपक्वा न्नपर इत्यर्थः । आमंशूद्रस्यपक्वान्नंपक्वमुच्छिष्टमुच्यते इतिशातातपीयात् ।(तदनुष्ठानप्रकारस्तु भविष्योत्तरेदर्शितः) धर्मेप्सवश्चधर्मज्ञा यदिशूद्राःप्रकुर्वते ॥ अग्नौकरणमंत्रश्चनमस्कारोविधीयते । आवाहनादिकर्त्तव्यं यथाशूद्रेणतच्छृणु । देवानांदेवनाम्नातुपितॄणांनामगो

त्रतः । पिंडादीन्निर्वपेद्वीर नामतोगोत्रतस्तथा इति । नमस्कारः नमइतिशब्दः । अग्नयेकव्यवाहनायनमः सोमायपितृमतेनमः ॥ अग्नौक
रणमित्युपलक्षणम् इत्यर्थः ॥ (शूद्रस्यमंत्रांतरनिवृत्तिर्मत्स्यपुराणेऽभिहिता) सर्वश्राद्धंचकर्त्तव्यं शूद्रेणाप्येवमेवतु ॥ मंत्रवर्जंहिशूद्रस्य
सर्वमेवविधीयते । एवमेवपार्वणश्राद्धविधिनैवइत्यर्थः।(ब्रह्मपुराणेपि) अयमेवविधिःप्रोक्तः शूद्राणांमंत्रवर्जितः।अमंत्रस्यतुशूद्रस्यविप्रोमं
त्रेणगृह्यते इति । शूद्राणांगोत्रस्याऽविद्यमानत्वात् काश्यपगोत्रम् । (तथाच श्रुतिः) ॥ तस्मादाहुःसर्वाःप्रजाः काश्यप्य इति । (हेमाद्रौ
व्याघ्रपादोपि) गोत्रनाशेतुकाश्यप इति । स्त्रीशूद्रकर्तृकेऽस्मिन्श्राद्धेस्वधास्थाने नमःपदप्रयोगः कर्त्तव्यः । (तथाच व्यासः) शूद्रोवर्ण
श्चतुर्थोपिवर्णत्वाद्धर्ममर्हति। वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विना इति।अयंसर्वोपिश्राद्धविधिः शूद्राणामामान्नेनाऽमन्त्रकः कार्य इति
विवेकः । आमश्राद्धंशूद्रैरपराह्णेकर्त्तव्यम् । तेषांमाध्यंदिनीयशाखयाकर्म । (तथाच श्राद्धतत्त्वेदक्षः) शूद्रावाजसनेयिन इति ॥ आमान्न
स्याप्यसंभवे हेमश्राद्धंकर्त्तव्यम् । (तथाच मरीचिः) आमान्नस्याप्यभावेतु श्राद्धंकुर्वीतबुद्धिमान् । धान्याच्चतुर्गुणेनैवहिरण्येनसुरोचिषा
इति । (हेमाद्रौ धर्मः) आमंतुद्विगुणंप्रोक्तं हेमतद्वच्चतुर्गुणम् । अन्नाभावेद्विजातीनां ब्राह्मणस्यविशेषत इति ॥ एकैकब्राह्मणतृप्तिपर्याप्ता
न्नसमर्थं धान्यंयावतालभ्यते तावतश्चतुर्गुणंहेमएकैकस्मै ब्राह्मणाय इत्यर्थः। (तत्रैव व्यासः) द्रव्याभावेद्विजाभावे प्रवासेपुत्रजन्मनि।हेम
श्राद्धंप्रकुर्वीत यस्यभार्य्यारजस्वला इति । हेमश्राद्धस्यक्वचिदपवादः (षट्त्रिंशन्मते) अन्नाभावेद्विजाभावे प्रवासेपुत्रजन्मनि ॥ हेम
श्राद्धंप्रकुर्वीतवर्जयित्वाक्षयेऽहनि ॥ (हेमाद्रौ संवर्तः) पुत्रजन्मनिकुर्वीत श्राद्धंहेम्नैवबुद्धिमान् । नपक्वेननचामेन कल्याणान्यभिकाम
यन् । पिंडदानप्रकारोऽप्यत्र हेमाद्रिभविष्योत्तरएवदर्शितः।गृहपाकात्समुद्धृत्य सक्तुभिः पायसेनवा।पिंडदानंप्रकुर्वीतहेमश्राद्धेकृतेसदा।

शूद्रस्तुगृहपाकेन तत्पिंडान्निर्वपेत्तथा ॥ सक्तुमूलंफलंतस्य पायसंवाभवेत्स्मृतम् ॥ पिंडनिर्वपणार्थमितिशेषः ॥ (तत्रैवषट्त्रिंशन्मते) नमंत्रेणाग्नौकरणं विकिरोनैवदीयते॥तृप्तिप्रश्नोऽपिनैवात्र कर्त्तव्यःकेनचिद्भवेत् इति।इतिहेमश्राद्धप्रकारः॥यस्तुपिंडप्रदानादिबहुविधान युक्तंश्राद्धमनुष्ठातुमशक्तः ससांकल्पंश्राद्धंकुर्यात् ॥ (तथाच हेमाद्रौ संवर्तः) समग्रंयस्तुशक्नोति कर्तुंनैवेहपार्वणम् ॥ अपिसं कल्पविधिना कालेतस्यविधीयते ॥ पात्रभोज्यस्यचान्नस्य त्यागःसंकल्पउच्यते ॥ तत्प्रयुक्तोविधिर्यस्तु सतेनव्यपदिश्यते ॥ तावन्मात्रेणसंबद्धं श्राद्धंसांकल्पमुच्यते ॥ (अत्रविशेषमाह व्यासः) सांकल्पंतुयदाकुर्यान्नकुर्यात्पात्रपूरणम् ॥ नावाहनं नाग्नौकरणं पिंडांश्चैवनदापयेदिति ॥ (हेमाद्रौ षट्त्रिंशन्मते) अनग्निकोयदाविप्र उत्सन्नाग्निस्तथैवच ॥ तदावृद्धिषुसर्वासु संक ल्प्यश्राद्धमाचरेत् इति ॥ साग्निकस्तु संकल्पविधिनाबदरादिमिश्रपिंडप्रदानयुक्तं वा वृद्धिश्राद्धंकुर्यादित्यर्थादिहगम्यते इति ॥ (श्राद्धयोग्यद्विजद्रव्यालाभेचानुकल्पमाह देवलः) पिंडमात्रंप्रदातव्यमलाभेद्रव्यविप्रयोः ॥ श्राद्धेऽहनितुसंप्राप्ते भवेन्निर शनोऽपिवा॥(अत्राप्यसामर्थ्येकर्त्तव्यतामाह वृद्धवसिष्ठः)किंचिद्दद्यादशक्तस्तु उदकुंभादिकंद्विजे ॥ तृणानिवागवेदद्यात्पिंडान्वाप्यथनिर्व पेत् ॥तिलदर्भैःपितॄन्वापि तर्पयेत्स्नानपूर्वकम् ॥ (हेमाद्रौ देवलः) यदेवतर्पयत्यद्भिराहिताग्निर्दिनेदिने ॥ पित्र्यंतेनैवप्राप्नोतिवार्षिका दिक्रियाफलम् ॥ (वाराहे) यतः कुतश्चित्संप्राप्यागोभ्योवापिगवाह्निकम् ॥ पितृनुद्दिश्यविप्रेभ्योदद्याच्छ्रद्धासमन्वितः ॥ (हेमाद्रौ पुरा णान्तरे) पराधीनःप्रवासीचनिर्धनोवापिमानवः ॥ मनसाभावयुक्तेनश्राद्धंकुर्यात्तिलोदकम् इति ॥ इत्यनुकल्पपार्वणादिश्राद्धप्रयोग निर्णयः।अथदौहित्रप्रतिपच्छ्राद्धप्रयोगः ।तच्चाश्विनशुक्लप्रतिपद्येवकर्त्तव्यम्।(तथाच हेमाद्रौ संग्रहेच)जातमात्रोपिदौहित्रोविद्यमानेपिमातु

ले॥कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसिते इति॥ननु दशश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकम् ॥नजीवत्पितृकःकुर्यात्तिलैस्तर्प्पणमेव च॥
इतिजीवत्पितृकस्यापरपक्षश्राद्धनिषेधात्कथमितिचेत् ॥ शिष्टाचारादितिचेद्ब्रूमः ॥ यद्यपरपक्षनिमित्तकं दौहित्रस्यश्राद्धंनिषिद्धंतर्हि
प्रतिपद्यपिक्रियमाणं तन्निषिद्धमितिउच्यते ॥ कन्यागतेसवितरिपितरोयांतिवैसुतान्॥शून्याप्रेतपुरीसर्वायावद्वृश्चिकदर्शनमिति॥अत्र
कन्यागतस्यापिश्राद्धनिमित्तत्वाद्दौहित्रैस्तन्निमित्तमेवश्राद्धंकर्त्तव्यंनापरपक्षनिमित्तमिति ॥ एतच्चत्रिदैवत्यपार्वणविधानेनकर्त्तव्यम् ॥
तथाच ॥ प्रतिपद्याश्विनेशुक्ले दौहित्रस्त्वेकपार्वणम् ॥ श्राद्धंमातामहंकुयात्सपितासंगवेसदा ॥ संगवे संगवकाले इत्यर्थः ॥
जातमात्रोपिदौहित्रोजीवत्यपिचमातुले।प्रातःसंगवयोर्मध्ये आर्यस्यप्रतिपद्भवेत् इति।इदंचसपिंडकंकार्यमितिकेचित्॥पिंडरहितंजीवत्पितृ
कस्यइत्यपरे।तत्र मुंडनंपिंडदानंचप्रेतकर्म चसर्वशः।नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवच।इतिदक्षेणपिडनिषेधात् पिंडरहितंजीवत्पितृक
स्ययुक्तंइति।अथ अष्टकान्वष्टकाश्राद्धम्।अष्टकाशब्देनपौषमाघफाल्गुनकृष्णाष्टम्यः।अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाइतिविष्णु
स्मरणात्।अष्टकानामनुपश्चाद्भवंतीत्यन्वष्टकाः अष्टकानामुपरितनानवम्यइत्यर्थः।(पारस्करगृह्येपि ऊर्द्ध्वमाग्रहायण्यास्तिस्रोष्टका इति॥अ
स्यार्थः-ऊर्द्ध्वमुपरि आग्रहायण्याः मार्गशीर्ष्याःपूर्णिमायास्तिस्रअष्टकाःत्रीण्यष्टकानिकर्माणि भवंतीत्यर्थः।(हेमाद्रौकूर्मपुराणेपि)अमावास्या
ष्टकास्तिस्रःपौषमासादिषुत्रिषु। तिस्रश्चान्वष्टकाःपुण्या माघीपंचदशीतथा इति। विष्णुधर्मोत्तरेपि)आग्रहायण्यतिक्रांतोकृष्णास्तिस्रोष्टका
स्तथा॥इति केषांचिन्मते चतस्रएवअष्टकाः॥हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकास्स्यांवाइतिशौनकाश्वलायनस्मरणात्॥
पौषमासकृष्णाष्टमीमारभ्यतिस्रोऽष्टकाइत्येतन्मतपरिग्रहेचतुर्थीभाद्रपदाऽपरपक्षाष्टमीसन्निहितादर्शिता॥प्रौष्ठपद्यष्टकाभूयः पितृलोकेभ

॥ ४३ ॥

विष्यति ॥ आयुरारोग्यदानित्यं सर्व्वकामफलप्रदा ॥ इत्यादि हेमाद्रौ पद्मपुराणीयेतिहासात् ॥ एतासुचापूपमांसशाका
निक्रमेणश्राद्धद्रव्याणि॥तत्रापूपस्याऽन्नरूपतयातस्यैवतृप्तिक्षमतयामुख्यत्वम्॥मांसशाकयोस्तु उपकरणत्वेनान्वयोयथासंख्यमष्टकाद्वये
मुख्यद्रव्यमोदनादिकमेव ॥ अत्रपारस्करगृह्यसूत्रम् ॥ ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाऐंद्रीवैश्वदेवीप्रजापत्यापित्र्याप्यपूपमां
९७ सशाकैर्यथासंख्यमिति ॥ अस्यार्थो हरिहरभाष्ये ॥ एवमष्टकाकर्माणिकर्त्तव्यत्वेनविधाय तत्र द्रव्यदेवतापेक्षायांद्रव्याणिदे
वताश्चाभिधत्ते॥तत्रप्रथमा ऐंद्री इंद्रोदेवतायस्याइतिऐंद्री इंद्रदैवत्येत्यर्थः ॥ द्वितीयावैश्वेदेवी विश्वेदेवादेवतायस्या इतिवैश्वदेवी विश्वे
देवदैवत्येत्यर्थः ॥ तृतीयाप्रजापत्या प्रजापतिर्देवता यस्याइतिप्रजापत्या प्रजापतिदैवत्येतियावत् ॥ चतुर्थी पित्र्या पितरोदेवताय
स्याइति पित्र्यापितृदैवत्येत्यर्थः॥अपूपंचमांसंचशाकश्चअपूपमांसकाशाकास्तैःअपूपमांसशाकैःयथासंख्या यस्याःयथासंख्या॥ तान्न
तिक्रम्ययथासंख्यंयजेतेत्यध्याहारः॥तदुक्तंभवतिप्रथमायामपूपेनइंद्रंयजेत् ॥ द्वितीयायांमांसेनविश्वान्देवान् ॥ तृतीयायांशाकेनप्रजा
पतिम्।अत्रतिसृषुयथासंख्यंपित्र्यापीत्यनेनचतुर्थीअष्टकाविधीयतेतत्रापिशाकमुपकरणम्।तथाचब्रह्मपुराणे। वर्षासुमध्येशाकैश्चतुर्थ्यामे
वसर्व्वदा इति॥वर्षासुमध्येऽपरपक्षस्यभाद्रकृष्णपक्षत्वात्तदष्टम्यंतंवर्षामध्यत्वम्।शाकैरितितस्यांब्रह्मपुराणेनशाकोपकरणविधानात्॥अत्र
चतसृष्वपिशाकमांसापूपशब्दाः श्राद्धेविहितस्यसर्व्वस्यापिभोज्यस्यतत्तद्रव्यप्रधानत्वप्रतिपादनपराः ॥ नतुद्रव्यान्तरनिवृत्तिपरा इति
हेमाद्रिप्रभृतयः॥एतच्चभाद्रपदाऽपरपक्षेमहालयाख्ये सप्तम्यादिषु त्रिष्वहःसु अष्टकावत्सर्वंकुर्यादितिवृत्तिकृत् ॥ अशक्तश्चेदेकस्यामष्ट
म्यांवैकार्यमिति हरदत्तः ॥ अत्रसप्तमीश्राद्धमाश्वलायनशाखिनाम् अष्टमीसाग्निकानांकालः अष्टकाश्राद्धविधानेसाग्निककर्तृत्वलिंगदर्श

नादिति ॥ नवमीतुसाग्निनिरग्निसाधारणाऽवश्यकश्राद्धकालोज्ञातव्यइति ॥ अत्रश्राद्धंनवदैवत्यंकार्यम् ॥ (तथाच कात्यायनः)
अन्वष्टकासुनवभिः पिंडैःश्राद्धमुदाहृतम्॥पित्रादिमातृमध्यंच ततोमातामहांतकम्॥ (हेमाद्रौ ब्रह्मांडेपि) पितॄणांप्रथमंदद्यान्मातॄणांतद
नंतरम् ॥ ततोमातामहानांच आन्वष्टक्येक्रमःस्मृतः॥(तत्रैव छागलेयः) केवलास्तुक्षयेकार्यावृद्धावादौप्रकीर्त्तिताः॥अन्वष्टकासुमध्यस्था
नांत्याःकार्यास्तुमातर इति। काशिकायांतुद्वादशदैवत्यमुक्तम्॥॥(तत्रैव पुराणसमुच्चये)॥तामिस्रपक्षेनवमी यापुण्यातुनभस्यके॥चत्वारः
पार्वणाःकार्याःपितृपूर्वामनीषिभिः॥पितॄणांतुत्रयःपिंडा मातृपूर्वास्तथात्रयः॥ मातामहानामप्येवं त्रयोमातामहीषुच॥एवंकुर्वंस्ततः श्राद्धं
मातॄणांचनदोषभाक् ॥ भवत्येवनरोविप्रा इतिब्रह्मानुशासनमिति॥ इदं तु प्रेतपक्षनवमीपरंज्ञेयमिति॥केचिन्मातृश्राद्धमादौकार्यमिति
पठंतितत्तुशाखान्तरविषयम्।इदंचजीवत्पितृकेणापिकार्यम्।(तदुक्तंनिर्णयामृते)आन्वष्टक्यंगयाप्राप्तौसत्यांयच्चमृतेऽहनि।मातुःश्राद्धंसुतः
कुर्यात्पितर्यपिजीवतिइति।यद्यपिजीवत्पितृकस्यचतुष्टयान्वष्टकाआवश्यंकर्त्तव्यातथाप्यशक्तस्येयमावश्यकीसर्वासामेवमातॄणांश्राद्धंक
न्यागतेरवौ॥नवम्यांहिप्रदातव्यंब्रह्मलग्नवरायतः॥पितृमातृकुलेनार्योयाःकाश्चित्प्रमृताःस्त्रियः॥श्राद्धार्हामातरोज्ञेयास्तासांश्राद्धंप्रदापयेत्
वृद्धौतुमातृपूर्वंहिश्राद्धंकुर्वीतबुद्धिमान् ॥ अन्वष्टकासुसर्वासुपितृपूर्वंसमाचरेत् इतिसुतेनावश्यकत्वोक्तेः॥अत्रसर्वासामित्युक्तेःस्वमातरि
जीवंत्यामपिसपत्नमातृभ्योदद्यादिति॥केचित्भर्तृमरणोत्तरंपूर्वंमृतमातृश्राद्धंनकार्यमितिवदंतितदयुक्तम्। श्राद्धंनवम्यांकुर्यात्तन्मृतेभर्तरि
लुप्यते ॥ इतिस्मृत्यन्तरोक्तत्वात् ॥ अन्वष्टकासुवृद्धौचगयायांचमृतेऽहनि ॥ अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासह इति॥हेमाद्रावग्नि
पुराणोक्तत्वाच्च ॥ इदंचजीवत्पितृकेणापिसपिंडंत्रिदैव्यंपार्वणंकार्यम् ॥ (तथाचहेमाद्रौ विष्णुधर्मोत्तरे) अन्वष्टकासुचस्त्रीणांश्राद्धं

कार्यंतथैवच॥इत्युपक्रम्य ॥ पिंडनिर्वपणंकार्यंतस्यामपिनृसत्तम इति ॥ अत्र सुवासिन्योपिभोजनीयाः ॥ तथाच (मार्कंण्डेयपुराणे)
भर्तुरग्रेमृतानारीसहवातेनयामृता॥तस्याःस्थानेनियुंजीतविप्रैःसहसुवासिनी॥इति इदंचनित्यम्॥अष्टकान्वष्टकास्तिस्रस्तथैवचनृपोत्तम।
एतानिश्राद्धकालानिनित्यान्याहप्रजापतिः ॥ श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यत इति हेमाद्रौविष्णुधर्मोत्तरात् ॥ (कूर्मपुराणेपि) यस्य
तेप्रतिगच्छेयुरष्टकारभिपूजिताः॥मोघास्तस्यभवंत्याशाःपरत्रैवचसर्वश इति॥एतदकरणेप्रायश्चित्तम् ऋग्विधाने॥एभिर्द्युभिर्जपेन्मंत्रंशत
वारंतुतद्दिने॥अन्वष्टक्यंयदाशून्यंसंपूर्णंयातिसर्वदा इति॥इदंशूद्रानुपेताभ्यामपिकार्यमितिश्राद्धमयूखे।अत्राष्टम्यपराह्णव्यापिनीग्राह्या।
श्राद्धंपार्वणवद्भवेत् इत्याश्वलायनोक्तेपराह्णकालत्वाच्चपार्वणस्य ॥ अत्रकामकालौविश्वेदेवौ॥इष्टिश्राद्धेक्रतुदक्षावष्टम्यांकामकालकौ इति
सायणीये शंखोक्तेः॥इत्यष्टकाऽन्वष्टकाश्राद्धम् ॥ अथग्रहणनिमित्तकश्राद्धम्॥(तत्र ऋष्यशृङ्गः)चंद्रसूर्य्यग्रहेयस्तुश्राद्धंविधिवदाचरेत॥
तेनैवसकलापृथ्वीदत्ताविप्रस्यवैकरे ॥ (महाभारतेपि) सर्वस्वेनापिकर्त्तव्यंश्राद्धंवैराहुदर्शने ॥ अकुर्वाणस्तुनास्तिक्यात्पङ्केगौरिवसी
दति ॥ (विष्णुः) राहुदर्शनदत्तंहिश्राद्धमाचंद्रतारकम् इति ॥ एतच्चश्राद्धंस्पर्शकालेआमान्नेनहेम्नावाकार्यं नत्वन्नेन॥(तथाच पारिजाते
वृद्धवसिष्ठः) त्रिदशाःस्पर्शसमयेतृप्यन्तिपितरस्तथा ॥ मनुष्यामध्यकालेतुमोक्षकालेतुराक्षसाः इत्युक्तत्वात्स्पर्शकालेकरणीयम् ॥
(हेमाद्रौ शातातपः) आपद्यनग्नौतीर्थेंचचंद्रसूर्यग्रहेतथा ॥ आमश्राद्धंप्रकुर्वीतहेमश्राद्धमथापिवा इति ॥ अस्यार्थः ॥ आपदीति आत्म
नोदेशकालादीनांचोपप्लवावस्थाकथिता तेनस्वाशक्तौदेशकालोपप्लवेपाकक्रिययाश्राद्धासंभावनयाऽऽमश्राद्धंकर्त्तव्यम्॥अनग्नाविति पाक
योग्याऽग्निरहितः नत्वनग्नौश्रौतस्मार्ताग्निरहितः॥तीर्थे इति पाकाऽसामर्थ्येसति चंद्रसूर्यग्रहे भोक्तुरभावे इत्यर्थः॥आशौचमध्येपिस्नान

श्राद्धादि कार्यम् ॥ (तथाच वृद्धवसिष्ठः) सूतकेमृतकेचैव नदोषोराहुदर्शने ॥ तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते इति ॥ ग्रहणदिने
वार्षिकश्राद्धप्राप्तावपि आमान्नेनैवकुर्यात् ॥ (तथाच निर्णयसिंधौप्रयोगपारिजाते गोभिलः) दर्शेरविग्रहेपित्रोःप्रत्याब्दिकमुपस्थितम् ॥
अन्नेनासंभवेहेम्नाकुर्यादामेनवासुत इति ॥ ननु आमश्राद्धंप्रकुर्वीतमाससंवत्सरादृते इति ॥ अन्नेनैवाब्दिकं कुर्याद्धेम्नावामेन न क्वचिदिति
मरीचिलौगाक्षिभ्यांनिषेधात्॥कथमामान्नेनश्राद्धमितिचेन्मरीचिलौगाक्ष्यादिवचनानि ग्रहणदिनातिरिक्तविषयाणीति हेमाद्रिप्रभृतिनि
बंधेषूक्तत्वादितिचेद्ब्रूमः॥आमहेमश्राद्धे पिंडादिविचारः पूर्वएवोक्तः ॥ एतच्चामश्राद्धंहेमश्राद्धंचपार्वणाधिकारिणापार्वणवदेवकर्त्तव्यमि
तिमदनपारिजातः ॥ अत्रकेषुचिन्मंत्रेषूहोभवति॥(अतएवतत्रैव मरीचिः) आवाहनेस्वधाकारे मन्त्राऊह्याविसर्जने॥अन्यकर्मण्यनूह्याः
स्युरामश्राद्धविधिःस्मृत इति ॥ अस्यार्थः॥ आवाहने आवाहनमन्त्रे उशन्तुशत आवहपितृन्हविषे अत्तवे इतिपदस्थानेस्वीकर्त्तव्ये इति
पदस्योहःकर्त्तव्यः॥स्वधाकारेनमोवःपितरइषेइत्यादिमन्त्रे इषेइतिपदस्थाने आमद्रव्यायेतिपदस्योहः॥ विसर्जने वाजेवाजे इति मंत्रे तृप्ता
यातपथिभिर्देवयानैरित्यत्रतृप्ताइतिपदस्थानेतृप्यत इत्यूहः कार्य इत्यर्थः ॥ अथपिंडदानेनिषिद्धकालाः ॥ (तत्राह हेमाद्रौपुलस्त्यः)
अयनद्वितयेश्राद्धं विषुवद्वितयेतथा॥युगादिषुचसर्वासु पिंडनिर्व्वपणादृते इति ॥एतेषुकालेषुश्राद्धं पिंडनिर्वपणादृते पिंडदानंविनाकर्त्त
व्यमित्यर्थः ॥ (ब्रह्मपुराणे) सर्व्वास्वपिसंक्रांतिषु पिंडनिर्व्वपणंविनाश्राद्धमुक्तम् ॥ अयनद्वितयेश्राद्धं विषुवद्वितयेतथा॥संक्रांतिषुचस
र्व्वासु पिंडनिर्वपणादृते इति॥एतत्कालनिमित्तकएवश्राद्धे पिंडनिर्व्वपणप्रतिषेधोयंनमृताहादिनिमित्तकेप्रसंगादयनादिषुपतिते इत्यर्थः॥
(बृहत्पाराशरः) युगादिषुमघायांचविषुवत्ययनेतथा॥भरणीषुचकुर्व्वीत पिंडनिर्व्वपणंनहि इति ॥ ॥ इति श्रीबीकानेरराज्यान्तर्गत

श्रीरत्नगढनगरनिवासिनाश्रीवसिष्ठकुलोद्भवेनश्रीरामकृष्णाऽमरचंद्रपौत्रेणश्रीकस्तूरीचंद्रसूनुनाश्रीमहादेवभक्तवाजसनेयिनापंडितगौड
श्रीचतुर्थीलालशर्मणाप्रणीतेगौडीयश्राद्धप्रकाशेपूर्वखंडेमुख्यकल्पानुकल्पपार्वणादिप्रयोगनिर्णयकथनंनामप्रथमंप्रकरणम् ॥ १ ॥

श्रीगणेशायनमः ।। अथप्रेततृप्तिकरश्राद्धनिर्णयविधायकं द्वितीयप्रकरणम् । तत्रतावदंत्येष्टिफलमाह (गारुडे विष्णुः) किंदत्तैर्बहुभि
र्दानैः पित्रोरंत्येष्टिमाचरेत् । तेनाग्निष्टोमसदृशं पुत्रःफलमवाप्नुयात् ।(तत्रैव) आत्मावैपुत्रनामास्तिपुत्रस्त्रातायमालयात् ।तारयेत्पितरंघो
रात्तेनपुत्रःप्रचक्षते ॥ अतोदेयंचपुत्रेणश्राद्धमाजीविताबधि ॥ अतिवाहस्तदाप्रेतोभोगान्वैलभतेसदा ॥ तत्रैव ॥ धृत्वास्कंधेस्वपितरं यः
श्मशानायगच्छति । सोश्वमेधफलंपुत्रो लभतेचपदेपदे । (दिवोदासीये) दृष्ट्वास्थानस्थमासन्नमर्धोन्मीलितलोचनम् । भूमिस्थंपितरंपुत्रो
यद्धिदानंप्रदापयेत । तद्विशिष्टंगयाश्राद्धादश्वमेधशतादपीति । दानं मोक्षधेनुऋणधेनुपापधेन्वादि इत्यर्थः । (तथाच व्यासः)आसन्नमृ
त्युनादेयागौःसवत्सातुपूर्ववत । तदभावेतुगौरेवनरकोत्तारणायवै । तदायदिनशक्नोतिदातुंवैतरणींतुगाम् ॥ शक्तोऽन्योऽरुक्तदादत्त्वादद्या
च्छ्रेयोमृतस्यच। (मदनरत्नेजातूकर्ण्यः) उत्क्रांत्यादीनिदानानिदशदद्यान्मृतस्यतु ॥ गोभूतिलहिरण्याज्यवासोधान्यगुडानिच ॥ रौप्यं
लवणमित्याहुर्दशदानान्यनुक्रमात् । एतानिदशदानानिनराणांमृत्युजन्मनोः । कुर्यादभ्युदयार्थंतुप्रेतेपिहिपरत्रवै इति । (अष्टौदानानि
गारुडे) तिलालोहंहिरण्यंच कार्पासंलवणंतथा । सप्तधान्यक्षितिर्गावि एकैकंपावनंस्मृतम् । एतान्यष्टौमहादानान्युत्तमानिद्विजातये ॥
आतुरेणतुदेयानि शय्यादानंतथैवच ॥ (ब्रह्मपुराणे) उत्क्रांतवैतरिण्यौचदशदानानिचैवहि ॥ प्रेतेपिकृत्वातंप्रेतंशवधर्मेणदाहयेत ॥
(अथदाहादिकर्म । तत्र तावन्म्रियमाणस्य कृत्यं (बृहद्गारुडे) । आसन्नमरणंज्ञात्वा पुरुषंस्नापयेत्ततः ॥ गोमूत्रगोमयमृत्तीर्थोदक

कुशोदकैः ॥ वाससीपरिधार्य्याथधौतेतुशुचिनीशुभे ॥ दर्भानादौसमास्तीर्य्य दक्षिणाग्रान्विकीर्य्यच ॥ तिलान्गोमयलिप्तायांभूमौतत्र
निवेशयेत् । प्रागुदक्शिरसंवापिमुखेस्वर्णविनिक्षिपेत् । शालग्रामशिलातत्र तुलसीचखगेश्वर । विधेयंसंनिधौसर्पिर्दीपस्यज्वलनंपुनः ॥
नमोभगवतेवासुदेवायेतिजपस्तथा ॥ समभ्यर्च्यहृषीकेशंपुष्पधूपादिभिस्ततः ॥ प्रणिपातैःस्तवैःपुण्यैर्ध्यानयोगेनपूजयेत् ॥ दत्त्वादा
नंचविप्रेभ्योदीनानाथेभ्यएवच॥पुत्रेमित्रेकलत्रेचक्षेत्रधान्यधनादिषु ॥ निवर्त्तयेन्ममत्वंचविष्णोःपादौहृदिस्मरन् ॥ उच्चैःपुरुषसूक्तंचय
दिश्रेष्ठापदस्तथा॥पुत्राद्याःप्रपठेयुस्तेम्रियमाणेनिजेजने ॥(छंदोगपरिशिष्टेतु)दुर्बलंस्नापयित्वातुशुद्धचैलाभिसंवृतम् ॥ दक्षिणाशिरसंभू
मौबर्हिष्मत्यांनिवेशयेत्। घृतेनाभ्यक्तमाप्लाव्यसवस्त्रमुपवीतिनम्। चंदनोक्षितसर्वांगंसुमनोभिर्विभूषितम्।हिरण्यशकलान्यस्यक्षिप्त्वाच्छि
द्रेषुसप्तसु। मुखेवस्त्रंपिधायैनंनिर्हरेयुःसुतादयः।इति। अत्रदक्षिणाशिरसंसामगपरं सामगग्रंथेषूक्तत्वात् सामगेतरेषामुत्तरशिरस्त्वमितिश्रा
द्धतत्त्वोक्तेश्च । चितायांदाहकालेतु दक्षिणशिरसमुत्तानत्व चकार्यम् । (तथाच कात्यायनस्मृतौ) अथपुत्रादिराप्लुत्यकुर्याद्दारुचयंमहत्॥
भूप्रदेशेशुचौदेशेपश्चाच्चित्यादिलक्षणे । तत्रोत्तानंनिपात्यैनंदक्षिणाशिरसंमुखे इति ॥ (तत्रैव) अर्द्धमादहनंकार्यमासीनोदक्षिणामुखः ॥
सव्यंजान्वाच्यशनकैः सतिलंपिडदानवत्। इत्यन्यत्रोक्तम्।केचित्उत्तानत्वंसाग्निपरमितिवदंतितन्न।सदग्धव्यउपेतश्चेदाहिताग्निर्यथार्थ
वदिति।स्मृतिकौमुद्यांमदनपालेननिरग्नेरप्याहिताग्निवद्दाहोक्तेस्तस्यचकात्यायनेनतत्रोत्तानंनिपात्यैनंदक्षिणाशिरसंमुखेइत्युत्तानत्वोक्ते
र्निरग्नेरपितदेवेति।श्राद्धतत्त्वेतुदक्षिणाशिरसंसामगमधोमुखंपुमांसंन्यसेत्नार्यास्तूत्तानदेहत्वंसामगेतरेषांदक्षिणाशिरसमुत्तानत्वंचइत्यु
क्तंसामगेतरेषां यजुर्वेदिनामित्यर्थः।तत्राऽस्माकंयजुर्वेदीयगौडानांतु दक्षिणाशिरसमुत्तानत्वंच पूर्वोक्तकात्यायनवाक्यात् परंपरासिद्धत्वा

ल्लोकगर्हाभयाच्चेतिसिद्धांतः।(मरणसमयेसंन्यासमुक्तंगारुडे विष्णुना)आसन्नमरणेकुर्यात्संन्यासंचेद्विधानतः।आवर्तंतपुनर्नासौब्रह्मभूयाय
कल्पते॥आसन्नमरणोमर्त्यश्चेत्तीर्थंप्रतिनीयते ॥ तीर्थप्राप्तौभवेन्मुक्तिर्म्रियतेयदिमार्गगः॥पदेपदेक्रतुसमंभवेत्तस्यनसंशयः॥अथमरणोत्तर
कर्म्म।तत्रतावत्पुत्रादीनांवपनमाह(मदनरत्ने गालवः)प्रथमेहनिकर्त्तव्यंवपनंचानुभाविनाम्।प्रेतस्यकेशश्मश्रूादिवापयित्वाथदाहयेत्इति।
अनुभाविनःपुत्राःकनिष्ठभ्रातरश्च इत्यर्थः।देवलोपि॥क्रियांचकुरुतेयस्तुतद्दिनेतस्यमुंडनमिति।(तदनंतरंबृहद्गारुडे)गतप्राणंततोज्ञात्वास्ना
त्वापुत्रादिराश्रुतम्।शवंजलेनशुद्धेनक्षालयेदविचारयन्॥परिधाप्याऽहतेवस्त्रेचंदनैः प्रोक्षयेत्तनुम्॥ततोमृतस्यस्थानेवैएकोद्दिष्टंसमाचरेत्॥
एकोद्दिष्टंपिंडदानमात्रमित्यर्थः।(तत्रैव)मृतस्योत्क्रांतिसमयेषट्पिंडान्क्रमशोददेत्॥मृतिस्थानेतथाद्वारिचत्वरेताक्ष्र्यकारणात् ॥ विश्रामे
काष्ठचयनेतथासंचयनेचषट् ॥ काष्ठचयने चितायाम् संचयने अस्थिसंचयने इत्यर्थः॥मृतिस्थानेशवोनामभूमिस्तुष्यतिदेवता ॥ पांथो
द्वारिभवेत्तेनप्रीतास्याद्वास्तुदेवता ॥ चत्वरेखेचरस्तेनतुष्येद्भूताधिदेवता ॥ विश्रामेभूतसंज्ञोयंतुष्टास्तेनदिशोदश ॥ चितायांसाधक
इतिसंचितौप्रेतउच्यते इति ॥ अत्रदाल्भ्येनतुचत्वरेपिंडंनोक्तंतत्स्थानेकुक्षिपिंडमुक्तं अत्रविकल्पोवृद्धाचारतः परिहार्यः॥ (अनंतरमपि
गारुडे)तिलदर्भघृतैर्धांसिगृहीत्वातुसुतादयः ॥ गाथांयमस्यसूक्तंवाप्यधीयानाव्रजंतिहि ॥ अहरहर्नीयमानोगामश्वंपुरुषंवृषम् ॥ वैवस्व
तोनतृप्येतसुरयाइवदुर्म्मतिः ॥ इमांगाथामुपेतेतिसूक्तंवापथिसंपठेत् ॥ दक्षिणस्यांदिश्यरण्यंव्रजेयुःसर्व्वबांधवाः ॥ ततःशनैर्भूतलेवै
दक्षिणाशिरसंशवम्॥स्थापयित्वाचिताभूमौ पूर्वोक्तंश्राद्धमाचरेत् ॥ तृणकाष्ठतिलाज्यादि स्वयंनिन्युःसुतादयः ॥ शूद्रानीतैःकृतंकर्म्म
सर्व्वंभवतिनिष्फलम् ॥ प्राचीनावीतिनाभाव्यं दक्षिणाभिमुखेनच ॥ वेदीतत्रप्रकर्त्तव्या यथाशास्त्रमथांडज ॥ संमृज्यचोपलिप्याथ उ

ल्लिख्योद्धृत्यवेदिकाम् ॥ अभ्युक्ष्योपसमाधायवह्नितत्रविधानतः ॥ पुष्पाक्षतैश्चसंपूज्यदेवंक्रव्यादसंज्ञकम् ॥ लोमभ्यस्त्वनुवाकेनहोमं
कुर्याद्यथाविधि ॥ त्वंभूतकृज्जगद्योनिस्त्वंलोकपरिपालकः ॥ उपसंहरतस्मात्त्वमेनंस्वर्गंनयामृतम् ॥ इतिक्रव्यादमभ्यर्च्य चितांतत्रैव
कारयेत् ॥ श्रीखंडतुलसीकाष्ठैः पलाशाऽश्वत्थदारुभिः ॥ चितामारोप्यतंप्रेतं पिंडंतत्रप्रदापयेत् इति॥अग्निदानेमंत्रो (वाराहपुराणे) कृ
त्वातुदुष्करंकर्म्मजानतावाप्यजानता ॥ मृत्युकालवशंप्राप्यनरंपंचत्वमागतम् ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम्॥दहेयंसर्वगात्रा
णिदिव्याँल्लोकान्सगच्छतु ॥ ज्वलमानंमहावह्निशिरःस्थानेप्रदापयेत् ॥ चतुर्वर्णेषुसंस्थानमेवंभवतिपुत्रिके ॥ (गारुडे) अर्द्धदग्धे
तथादेहेदद्यादाज्याहुतिंततः ॥ अस्मात्त्वमधिजातोसि त्वदयंजायतांपुनः ॥ असौस्वर्गायलोकाय स्वाहाज्वलतुपावकः॥एवमाज्याहुतिं
दत्त्वातिलमिश्रांसमंत्रकाम् ॥ रोदितव्यंततोगाढमेवंतस्यसुखंभवेत् इति ॥ (दाहानंतरकर्त्तव्यतापि तत्रैव) ततःप्रदक्षिणंसुक्त्वा चितां
प्रस्थानवेक्षकाः ॥ कनिष्ठपूर्वाःस्नानार्थं गच्छेयुःसूक्तजापकाः ॥ ततोजलसमीपेतु गत्वाप्रक्षाल्यचांशुकम् ॥ प्राचीनावीतिनः सर्वे विशेयु
र्मौनिनोजलम्॥जलंनःशोशुचदघमनेनपितृदिङ्मुखः ॥ जलावघटनंचैवनकुर्य्युःस्नानकारकाः ॥ ततस्तटेसमागत्य शिखांबद्ध्वाऋजून्
कुशान् ॥ दक्षिणाग्रान्हस्तयोस्तु कृत्वाथसतिलंजलम् ॥ आदायांजलिनायाम्यां दुःखीपैतृकतीर्थतः ॥एकवारंत्रिवारंवादशवारमथापि
वा ॥ भूमावश्मनिवासवैं क्षिपेयुर्वाग्यताःखग ॥ तृप्यंतुतृप्यतांवापि तर्पयाम्युपतिष्ठताम् ॥ प्रेतैतदमुकगोत्रेत्युक्तेष्वेकंसमु ॥ ४७ ॥
च्चरेत् ॥ (कात्यायनोपि) ॥ अथानवेक्षमित्यापः सर्व्वएव शवस्पृशः ॥ स्नात्वा सचैलमाचम्य दद्युरस्योदकंस्थले ॥ गोत्र
नामपदांतेच तर्पयामीत्यनंतरम् ॥ दक्षिणाग्रान्कुशान्कृत्वा सतिलंतुपृथकसकृत् इति॥ (पठीनसिरपि) प्रेतंमनसाध्यायन्दक्षिणामुख

स्त्रीनुदकांजलीन्निनयेत् इति ॥ एतत्तिलोदकदानंचाशुग्मदिनेषुकार्यम् ॥ प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रिया इतिगौतमस्मरणात् ॥ प्रेतोपकारविशेषापेक्षयातुयावंत्याशौचदिनानि तावदुदकदानावृत्तिः कार्या ॥ (तथाच प्रचेताः) दिनेदिनेंजलिपूर्णान्प्रदद्यात्प्रेतकारणात् ॥ तावद्वृद्धिश्चकर्त्तव्यायावत्पिंडःसमाप्यते ॥ इति यावद्दशमः पिंडः समाप्यते तावदंजलिवृद्धिःकार्येत्यर्थः ॥ अज्ञातिभिरपि क्वचिदुदकदानंकर्त्तव्यम् ॥ (तदाह याज्ञवल्क्यः) एवंमातामहाचार्यप्रेतानामुदकक्रिया ॥ कामोदकंसखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम् ॥ इति ॥ प्रत्ता परिणीतादुहितृभगिन्यादिः स्वस्त्रीयो भागिनेयः ॥ अत्रप्रेतानांमातामहादीनांसपिंडवदुदकदानं नित्यं कार्यम् ॥ सख्यादीनांतुकामतः ननित्यतया अकरणेप्रत्यवायाभावादित्यर्थः ॥ क्लीबभर्तृगभर्द्रुहस्त्रीपतितैरुदकनकार्यम्॥(तथा च मनुः) क्लीबाद्यानोदककुर्युःस्तेनाव्रात्याविधर्मिणः॥गर्भभर्तृद्रुहश्चैवसुराप्यश्चैवयोषितः ॥ उदकदानानंतरंपिंडदानमपिकर्त्तव्यम्॥(तथा विष्णुः) प्रेतस्योदकनिर्वपणंकृत्वा एकंपिंडंकुशेषुदद्युरिति ॥ (अनंतरं गारुडे) ततउत्तीर्योदकाद्वैवस्त्राणिपरिधायच ॥ स्नानवस्त्रंसकृत्पीडचविशेयुःशुचिभूतले ॥ अश्रुपातंनकुर्वीतदत्त्वादाहजलांजलिम् ॥ श्लेष्माश्रुबांधवैर्मुक्तंप्रतोभुंक्तेयतोवशः ॥ अतोनरोदितव्यंहिक्रियाःकार्याःस्वशक्तितइति॥पिंडोदकदानानंतरंबांधवैरातुराश्वासनकार्यम्॥(तथाच याज्ञवल्क्यः)कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् ॥ स्नातानपवदेयुस्तानितिहासैःपुरातनैः इति ॥ इतिहासस्तुतेनैवदार्शितः ॥ मानुष्येकदलीस्तंभेनिःसारेसारमार्गणम् ॥ करोतियःससंमूढोजलबुद्बुदसन्निभे॥पंचधासंभृतः कायोयदिपंचत्वमागतः॥ कर्मभिःस्वशरीरोत्थैस्तत्रकापरिदेवना ॥ गंत्रीवसुमतीनाशमुदधिर्दैवतानिच ॥ फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति ॥ इति ॥(कात्यायनोपि) माशोकंकुरुतानित्येसर्वस्मिन्प्राणधर्मणि

धर्मंकुरुतयत्नेनयोवः सहगमिष्यति । (याज्ञवल्क्यगरुडपुराणयोः) एवंसंश्रावयेत्तत्रमृदुशाद्वलसंस्थितान् । तेऽपिसंश्रुत्यगच्छेयुर्गृहंबाले
पुरःसराः । विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः । आचम्यवह्निसलिलंगोमयंगौरसर्षपान् । दूर्वांप्रवालंवृषभमन्यदप्यथमंगलम् ।प्रवि
शेयुः समालभ्यकृत्वाश्मनिपदंशनैः ॥ तेप्रविश्यगृहंसर्वेंसुताद्याश्चसपिंडका इति ॥ अथाशौचनियमाः ॥ (तथाच गारुडे) क्रीतलब्धा
शनाःसर्वे स्वपेयुस्तेपृथक्पृथक् ॥ अक्षारलवणान्नाःस्युर्निमज्जेयुश्चतेन्वहम् ॥ अमांसभोजनाश्चाधःशयीरन्ब्रह्मचारिणः ॥ परस्परंनसंस्पृ
ष्टादानाध्ययनवर्जिताः ॥ मलिनाधोमुखादीनाः सर्वभोगविवर्जिताः ॥ अंगसंवाहनंकेशमार्जनंवर्जयंतिते ॥ मृन्मयेपत्रजेवापिभुंजीरंस्तेच
भाजने ॥ उपवासंतुतेकुर्युरेकाहमथवात्र्यहम् ॥ (मरीचिः) प्रथमेह्नितृतीयेचसप्तमेदशमेतथा ॥ ज्ञातिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्ल
भम् । भोजनंचदिवैव । क्रीत्वालब्ध्वावा दिवान्नमश्नीयुरितिपारस्करोक्तेः ॥ (शंखः) दानंप्रतिग्रहोहोमः स्वाध्यायःपितृकर्मच ॥ प्रेत
पिंडक्रियावर्ज्यमाशौचेविनिवर्तते । इतिदाहप्रयोगः । प्रथमेहनिएकाहंत्र्यहंवाप्रेतमुद्दिश्यजलंक्षीरंचाकाशेशिक्यादौमृन्मयेपात्रेस्थापनी
यम् ॥ (तदाह याज्ञवल्क्यः) जलमेकाहमाकाशेस्थाप्यंक्षीरंचमृन्मये इति ॥ (गरुडपुराणेपि) सूर्येस्तमागतेताक्ष्यंश्मशानेवाचतुष्पथे ॥
दुग्धंचमृण्मयेपात्रेतोयंदद्याद्दिनत्रयम् । अपक्वंमृण्मयंपात्रंक्षीरनीरप्रपूरितम् । काष्ठत्रयंगुणैर्बद्धंधृत्वामंत्रंपठेदिमम् ॥ श्मशानाऽनलदग्धोसि
परित्यक्तोसिबांधवैः ॥ इदंनीरमिदंक्षीरमत्रस्नाहिजलंपिब इति ॥ अथास्थिसंचयनम् ॥ तच्चप्रथमतृतीयसप्तमनवमदिवसानामन्यतमेस्मि
न्कार्यम् । (तथाचपराशरमाधवे संवर्त्तः) प्रथमेऽह्नितृतीयेवासप्तमेनवमेपिवा । अस्थिसंचयनंकार्यंदिनेतद्गोत्रजैःसह ॥ तदूर्ध्वमंगसंस्पर्शः
सपिंडानांविधीयते ।इति। तत्रविप्राणांविशेषतश्चतुर्थेऽह्नि । राज्ञांपंचमे । विशांनवमे शूद्राणांदशमदिनेकार्यम्। (तथाचब्रह्मपुराणे) चतुर्थे

ब्राह्मणानांतुपंचमेहनिभूभुजाम् ॥ नवमेवैश्यजातीनांशूद्राणांदशमात्परम् ॥ कर्त्तव्यंतुनरैःश्राद्धंदेशकालाऽविरोधतः ॥ इति ॥ (माधवे
विष्णुरपि) चतुर्थेदिवसेऽस्थि संचयनंकुर्युः तेषांगंगांभसिप्रक्षेपः॥ इति ॥ ब्राह्मणादीनांचतुर्थादिदिनेष्वसंभवेसंवर्त्तोक्तप्रथमादिदिवसेष्व
स्थिसंचयःकर्त्तव्यः ॥ त्र्यहाशौचेतुतृतीयेह्निसर्वेषांसद्यःशौचेदाहानंतरमेवकर्त्तव्यः ॥(तथाच ब्रह्मपुराणमदनरत्नाऽपरार्केषु)सद्यःशौचेतथै
काहेसद्यःसंचयनंभवेत् ॥ त्र्यहाशौचेतृतीयेह्निकर्त्तव्यस्त्वस्थिसंचय इति ॥ (अस्थिसंचयनेतिथिवारनक्षत्रनिषेधोयमेनोक्तः) भौ
मार्कमंदवारेषुतिथियुग्मेविवर्ज्जयेत् ॥ वर्जयेदेकपादर्क्षेद्विपादर्क्षेऽस्थिसंचयम् ॥ प्रदातृजन्मनक्षत्रेत्रिपादर्क्षेविशेषतः ॥ (माधवीये वृद्धम
नुः) वस्वंतार्द्धादितः पंचनक्षत्रेषुत्रिजन्मसु ॥ द्वित्रिपादर्क्षयोश्चैवनंदायांचविशेषतः इति ॥ (तत्प्रकारस्तु ब्रह्मपुराणे) श्मशा
नदेवतायागं चतुर्थेदिवसेचरेत् ॥ मृन्मयेषुचभांडेषु कुंभेषुरुचकेषुवा ॥ सपक्वैर्भक्ष्यभोज्यैश्चपायसैःपानकैस्तथा ॥ फलैर्मूलैर्वनोत्थै
श्चपूज्याःक्रव्याददेवताः।धूपोदीपस्तथामाल्यमर्घ्यंदेयंत्वरान्वितैः।तत्रपात्राणिपूर्णानिश्मशानाग्नेःसमंततः।निवेदयद्भिर्वक्तव्यंतैःसर्वैरनहं
कृतैः॥नमःक्रव्यादमुख्येभ्योदेवेभ्यइतिसर्वदा॥येऽत्रश्मशानदेवाःस्युर्भगवंतःसनातनाः।तेऽस्मत्सकाशाद्गृह्णन्तुबलिमष्टांगमक्षयम्।प्रेतस्या
स्यशुभाँल्लोकान्प्रयच्छंतुचशाश्वतान्॥अस्माकमायुरारोग्यंसुखंचददतांचिरम्॥ एवंकृत्वाबलीन्सर्वान् क्षीरेणाभ्युक्ष्यवाग्यतः।एवंदत्त्वा
बलिंचैवदद्यात्पिंडत्रयंबुधः॥ एकंश्मशानवासिभ्यःप्रेतायैवतुमध्यमम्॥तृतीयंतत्सखिभ्यश्चदक्षिणासंस्थमादरात् ॥ ततोयज्ञियवृक्षोत्थां
शाखामादायवाग्यतः॥प्रेतस्यास्थीनिगृह्णातिप्रधानाङ्गोद्भवानिच॥शिरसोवक्षसःपाण्योः पार्श्वाभ्यांचैवपादतः॥ पंचगव्येनसंस्नाप्य क्षौ
मवस्त्रेणवेष्टयच॥प्रक्षिप्यमृन्मयेभांडेनवेसाच्छादनेशुभे॥अरण्येवृक्षमूलेवाशुद्धेसंस्थापयत्यपि ॥ गृहीत्वास्थीनितद्भस्म नीत्वातोयेवि

निक्षिपेत् ॥ तोये गंगादिके ततःसंमार्ज्जनंभूमेः कर्त्तव्यंगोमयांबुभिः ॥ पूजांचपुष्पधूपाद्यैर्बलिभिःपूर्ववत्क्रमात् इति ॥ (अथतीर्थेऽ
स्थिक्षेपविधिरपि ब्राह्मे) तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले॥कश्चित्क्षिपतिसत्पुत्रोदौहित्रो वा सहोदरः॥मातृकुलंपितृकुलंव
र्ज्जयित्वानराधमः ॥ अस्थीन्यन्यकुलोत्थानिनीत्वाचांद्रायणंचरेत् इति ॥ एतच्च द्रव्यादिलोभेन नयतः न श्रेयोर्थिन इति हरिहरः॥
(गंगादिषुप्रक्षेपप्रकारो ब्रह्माण्डपुराणे) स्नात्वाततः पंचगव्येनसिक्त्वाहिरण्यमध्वाज्यतिलैश्चयोज्य“ततस्तुमृत्पिंडपुटेनिधायपश्यन्दिशंप्रे
तगणोपरूढाम् ॥ नमोस्तुधर्मायवदेत्प्रविश्यजलंसमेप्रीतइतिक्षिपेच्च ॥ उत्थायभास्वंतमवेक्ष्यसूर्यं सदक्षिणांविप्रमुखायदद्यात्॥ एवंकृते
प्रेतपुरस्थितस्य स्वर्गेगतिःस्यात्तुमहेंद्रतुल्या॥क्षीणेषुपुण्येषुपतन्दिविस्थो नैवंविदोस्यच्यवनंद्युलोकात्॥ (यमस्मृतौ) गंगातोयेषुयस्या
स्थि क्षिप्यतेशुभकर्मणः ॥ नतस्यपुनरावृत्तिर्ब्रह्मलोकात्सनातनात् ॥ (गारुडेपि)यावदस्थिमनुष्यस्य गंगातोये निमज्जति॥तावद्वर्ष
सहस्राणिस्वर्गलोकेमहीयते इति॥इदमधिमासशुक्रास्तादौनकार्यं दशाहमध्येतुनदोषः॥(तथाच मदनरत्नेवृद्धमनुः) दशाहस्यान्तरेयस्य
गंगातोयेऽस्थिमज्जति॥गंगायांमरणंयादृक्तादृक्फलमवाप्नुयात् इति॥अथप्रेतपिंडप्रयोगः॥पिंडोदकदानंच यावदाशौचंकार्यम्॥तथाच
(विष्णुः)यावदाशौचंतावत्प्रेतस्योदकंपिंडंचदद्युः॥(पारस्करोपि)प्रेतेभ्यःसर्ववर्णेभ्यःपिंडान्दद्याद्दशैवतु।(हेमाद्रौब्रह्माण्डे) प्रेतीभूतस्यसत
तंभुविपिंडजलंतथा॥सतिलंसकुशं दद्याद्बहिर्जलसमीपतः॥ इति॥उदकदानवत्पिंडदानंनसर्वैः कर्त्तव्यमपितुपुत्रेणैव तदभावेसन्निहितेन
सपिंडेन तदभावेमातृसपिंडादिना॥(तथाह गौतमः)पुत्राभावेसपिंडाः मातृसपिंडाः शिष्याश्चदद्युःतदभावेऋत्विगाचार्यौ इति ॥ पुत्रे
ष्वपिज्येष्ठएवपिंडंदद्यात्॥ (तथाच मरीचिः) सर्वैरनुमतिंकृत्वाज्येष्ठेनैवतुयत्कृतम्॥द्रव्येणवाऽविभक्तेनसर्वैरेवकृतंभवेत् इति ॥ यदा

पुत्राऽसन्निधानादिनाऽन्यः पिंडदानंकरोति तदादशाहमध्येपुत्रसान्निध्येपिसएवदशाहंपिंडंदद्यात् (तदुक्त गृह्यपरिशिष्टे) असगोत्रःसगोत्रो वायदिस्त्रीयदिबापुमान् ॥ प्रथमेऽहनियोदद्यात्सदशाहंसमापयेत्॥ (शुद्धितत्त्वेवायुपुराणेपि) असगोत्रःसगोत्रोवा यदिस्त्रीयदिवापुमान्॥ यश्चाग्निदाताप्रेतस्य पिंडंदद्यात्सएवहि ॥ (श्राद्धदेशाः भविष्योत्तरे) गृहद्वारेश्मशानेच तीर्थेदेवगृहेतथा ॥ यत्राद्योदीयतेपिंडस्तत्र सर्वंसमापयेत् ॥ (आदित्यपुराणे) शुचौदेशेतुनद्यांवाजीर्णंतोयेप्रवाहयेत् ॥ (ब्रह्मपुराणे) ग्रामाद्बहिश्चकर्त्तव्यंजलाशयसमीपतः ॥ पिंडदानंदशाहानिप्रेतारण्यसमाश्रितैः ॥ (अरण्येपिंडदानंतुमोहान्नक्रियतेयदि ॥ तदारौरवमायाति प्रमीतः प्रथमेऽहनि ॥ द्रव्य नियमो गरुडपुराणे) शालिनासक्तुभिर्वापिशाकैर्वाप्यथनिर्वपेत् ॥ प्रथमेऽहनियद्द्रव्यंतदेवस्यादशाह्निकम् ॥ (भविष्योत्तरे) ओदना मिषसक्तूनांशाकमूलफलादिषु ॥ प्रथमेऽहनियद्दद्यात्तद्द्यादुत्तरेऽहनि ॥ (तद्विधिरादित्यपुराणे) पितृशब्दंस्वधांचैवनप्रयुंजीतकर्हिचित्॥ उपतिष्ठतामयंपिंडः प्रेतायेति समुच्चरेत् ॥ तूष्णींधूपंप्रसेकंच दीपंपुष्पंतथैवच ॥ अशुद्धस्त्रिषुवर्णेषु इदंदद्यान्नसंशयः ॥ (ब्रह्मपुराणेपि) मृन्मयंभांडमादाय नवंस्नातःसुसंयतः ॥ लगुडंसर्वदुष्टघ्नं गृहीत्वातोयमानयेत् ॥ ततश्चोत्तरपूर्वस्यामग्निप्रज्वालयेद्दिशि ॥ तंडुलप्रसृतिंतत्र त्रिःप्रक्षाल्यपचेत्स्वयम् ॥ सपवित्रैस्तिलैर्मिश्रं कृमिकेशविवर्जितम् ॥ द्वारोपांतेततःक्षिप्त्वा सुशुद्धांगौरमृत्तिकाम्॥तत्पृ ष्ठेप्रस्तरेद्दर्भान्याम्याग्रान्देशसंभवान् ॥ ततोऽवनेजनंदद्यात्संस्मरन्गोत्रनामनी ॥ तिलसर्पिर्मधुक्षीरैः संसिक्तंतत्समेवहि ॥ दद्या त्प्रेतायपिंडंतु दक्षिणाभिमुखःस्थितः ॥ फलमूलगुडक्षीरतिलैर्मिश्रंतुकुत्रचित् ॥ अर्घ्यैःपुष्पैस्तथाधूपैर्दीपैस्तोयैश्चशीतलैः ॥ ऊर्णातंतुमयैःशुद्धैर्वासोभिःपिंडमर्चयेत् ॥ प्रयातियावदाकाशंपिंडाद्बाष्पमयीशिखा॥ तावत्तत्संमुखंतिष्ठेत्पिंडंतोयेक्षिपेत्ततः॥एकतोया

ञ्जलिश्चैवपात्रमेकंचदीयते ॥ द्वितीयेद्वौतृतीयेत्रीन्चतुर्थेचतुरस्तथा ॥ पंचमेपंचषष्ठेषट्सप्तमेसप्तएवच॥ अष्टमेष्टौचनवमेनवैवदशमेदश॥
येनस्युःपंचपंचाशत्तोयस्यांजलयःक्रमात् ॥ तोयपात्राणितावंतिसंयुक्तानितिलादिभिः इति ॥ (तत्रदशपिंडनिष्पाद्यावयवाःहेमाद्रि
ब्रह्मगारुडेषु) शिरस्त्वाद्येनपिंडेन प्रेतस्यक्रियतेसदा ॥ द्वितीयेनतुकर्णाक्षिनासिकाश्चसमासतः ॥ गलांसभुजवक्षांसि तृतीयेनयथाक्र
मम् ॥ चतुर्थेनतुपिंडेन नाभिलिंगगुदानिच ॥ जानुजंघेतथापादौ पंचमेनतुसर्वदा ॥ सर्वमर्माणिषष्ठेन सप्तमेनचनाडयः ॥ दंतलोमान्य
ष्टमेन वीर्यंतुनवमेनच ॥ दशमेनतुपूर्णत्व तृप्तताक्षुद्विपर्ययः इति ॥ (त्र्यहाशौचे दशपिंडदानप्रकारमाह पारस्करः) प्रथमेदिवसेदेयास्त्र
यःपिंडाःसमाहितैः ॥ द्वितीयेचतुरोदद्यादस्थिसंचयनंतथा ॥ त्रींस्तुदद्यात्तृतीयेह्निवस्त्रादिक्षालनंतथा ॥ सद्यआशौचविषयेतुयुगपद्दश
पिंडदानमितिहेमाद्रौ ॥ (त्र्यहाशौचे अजलीनाह गारुडेविष्णुः) यथाहित्र्यहमाशौचंतदावांजलयोदश॥त्रयोंजलयएवंतु प्रथमेऽहनिवै
तदा ॥ चतुरस्तुद्वितीयेऽह्नितृतीयेस्युस्त्रयस्तथा ॥ यदाशतांजलिपक्षिस्त्राद्येत्रिंशत्तदाहनि ॥ चत्वारिंशद्द्वितीयेऽह्नि त्रिंशदह्नितृतीयके
इति॥अथनवश्राद्धं तच्चविषमदिनेषुप्रथमतृतीयपंचमसप्तमनवमैकादशेषुकार्यम्॥(तथाच गरुडपुराणे) प्रथमेऽह्नितृतीयेच पंचमेसप्तमे
तथा ॥ नवमैकादशेचैव नवश्राद्धंप्रकीर्तितम्॥ (बोधायनोपि) मरणाद्विषमेषुदिनेष्वेकैकंनवश्राद्धंकुर्यात् इति॥एवन्नवश्राद्धं केचित्कुर्वंति
तत्राऽधिकफलंभवति ॥ अकरणेप्रत्यवायोनास्ति॥इच्छाचेत्कर्तव्यमितिबृहदंत्येष्टिपद्धतौ॥अथप्रेतश्राद्धेषुकेषांचित्पदार्थानामनुष्ठानम्॥
प्रेतश्राद्धंतुयावत्सपिंडनंतावत् ॥ सपिंडीकरणान्तातुज्ञेयाप्रेतक्रियाबुधैरितिशातातपस्मरणात् तत्रतावत्प्रेतक्रियाऋजुदर्भैरेवकार्या ॥
(तथाच हेमाद्रौ विष्णुपुराणे) सपिंडीकरणंयावदृजुदर्भैःपितृक्रियाः ॥ सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् ॥ द्विगुणैर्मोटकरूपैरि

त्यर्थः ॥ हेमाद्रिकारिका गारुडेषु ॥ आशिषोद्विगुणादर्भा जपाशीःस्वस्तिवाचनम् ॥ पितृशब्दःस्वसम्बन्धः शर्मशब्दस्तथैवच ॥
पात्रालंभावगाहश्च उल्मुकोल्लेखनादिकम् ॥ तृप्तिप्रश्नश्चविकिरःशेष प्रश्नःस्तथैवच॥प्रदक्षिणविसर्गश्च सीमांतंगमनंतथा ॥ अष्टादशपदा
र्थाश्चप्रेतश्राद्धेविवर्जयेत् इति ॥ अस्यार्थः॥आशिषः गोत्रंनोवर्द्धतामित्यादिकाभिप्रेताः ॥ द्विगुणादर्भा द्विगुणभुग्नकृताःमोटकरूपाः॥ज
पः पैतृकःपुरुषसूक्तम् उदीरतामवरइत्यादि॥नपैतृकोजपःकार्य इतिप्रचेतःस्मरणात्॥स्वस्तिवाचनं स्वस्ति भवंतोब्रुवंत्त्विति वाचनम्॥ पितृ
शब्दःस्वसंबंधश्चेति॥अस्मत्पितःअस्मन्मातरित्यादि॥पितृशब्दंनकुर्वीतपितृहाचोपजायते इतिहेमाद्रावुक्तत्वात्॥प्रेतायइत्यनेनप्रेतशब्दो
ऽत्रप्रयोक्तव्यो नतु पितृशब्दइत्युक्तंभवति॥शर्मशब्दः अस्मत्पितरमुकशर्मन्नित्यादि ॥पात्रालंभः न्युब्जाभ्यांन्यस्ताभ्यांपाणिभ्यांपृथिवी
तेपात्रमित्यादिनाकृतंकर्म ॥ अवगाहः विष्णोकव्यंरक्ष इत्यादि ॥ अंगुष्ठभ्रामणंनिवेशनंच ॥उल्मुकोल्लेखनादिकम् उल्मुक येरूपाणीति
ज्वलदुल्मुकमंगारभ्रामणम्॥उल्लेखनं अपहताअसुराइति सकृद्रेखाकरणम्॥आदिशब्देन सकृदाच्छिन्नकुशास्तरणंज्ञेयम् ॥नसकृदाच्छिन्न
कुशाः किंतुसमूलाःकुशाइतिहेमाद्रौभृगुस्मरणात् ॥ तृप्तिप्रश्नः स्वदितं सुस्वदितमितिकर्म ॥ स्वदितंचनोदाहरेदितिहेमाद्रौप्रचेतस्स्मर
णात्॥विकिरः अग्निदग्धाइतिमंत्रेणाऽन्नोत्सर्जनम् ॥ विकिरंनस्वधाकारमितिवायुपुराणात् ॥ प्रेतश्राद्धेनविकिर इतिस्मृतिरत्नावल्युक्त
त्वाच्च ॥ शेषप्रश्नः शेषमन्नंकिंक्रियतामिष्टैःसहभुज्यतामित्यादि ॥ (तथाचाङ्गिराः) नवश्राद्धेषुयच्छिष्टंगृहेपर्युषितचयत्॥दंपत्योर्भुक्त
मुच्छिष्टंतन्नभुंजीतकर्हिचित् ॥(हेमाद्रौ देवलोपि)एकोद्दिष्टेषुशेषंतुब्राह्मणेभ्यः समर्पयेत् ॥ ततःकामंतुभुंजीत स्वयंमंगलभोजने इति ॥
प्रेतश्राद्धसंज्ञकेष्वेकोद्दिष्टेषुशेषंश्राद्धभोक्तृभ्योब्राह्मणेभ्यः समर्पयेत्॥तदनुज्ञयाजलादौवाप्रक्षिपेत्॥नतुस्वयंभुंजीतनचान्यंकमपिभोजयेत्॥

ततः तदनंतरंक्रियमाणे मंगलभोजनेसांवत्सरिकादौशेषं ज्ञात्यादीन् भोजयेत्॥स्वयंचयजमानोभुंजीत।श्राद्धशेषादन्येनान्नेनतुज्ञातिदीना
नाथादयो भोजनीया इत्यर्थः ॥ (अज्ञातिनातुभुक्तेऽस्मिन्नन्नेप्रायश्चित्तमुक्तं ब्रह्मपुराणे) द्वाभ्यांतुतप्तकृच्छ्राभ्यां शुद्धिःस्यात्तुविवेकिना
मिति॥प्रदक्षिणविसर्गः प्रदक्षिणं विसर्जनानंतरं ब्राह्मणानांप्रदक्षिणीकरणम् विसर्गःअभिरम्यतामितिविप्रविसर्ज्जनम् ॥सीमांतगमनं वि
सर्जनानंतरंब्राह्मणानुगमनम्॥एतान् अष्टादशपदार्थान् प्रेतश्राद्धेषुवर्जयेदित्यर्थः॥अथाशौचान्तदिनकर्म॥(तत्र ब्रह्मपुराणम्) यस्ययस्य
तुवर्णस्य यद्यत्स्यात्पश्चिमंत्वहः।सतत्रवस्त्रशुद्धिंच गृहशुद्धिंकरोत्यपि।समाप्यदशमंपिंडं प्रेतस्पृष्टेतुवाससि । अन्त्यानामाश्रितानांचत्य
क्त्वास्नानंकरोतिच।श्मश्रुलोमनखानांच यत्त्याज्यंतज्जहात्यपि।गौरसर्षपकल्केन तिलकल्केनसंयुतम् शिरःस्नानंततःकृत्वा तोयेनाचम्य
वाग्यतः।वृषभंगांसुवर्णंच स्पृष्ट्वाशुद्धोभवेन्नरः॥(देवलोपि)दशमेऽहनिसंप्राप्ते स्नानंग्रामाद्बहिश्चरेत्॥तत्रत्याज्यानिवासांसि केशश्मश्रुनखा
निच इति॥(दशमेऽहनिवपनमाह अपरार्केव्यासः)आशौचांत्यदिनेक्षौरं जनन्यांचगुरौमृते इति॥वापनंचप्रेताल्पवयसाम्॥(तथाच माध
वीये आपस्तंबः) अनुभाविनांपरिवापनमिति॥अनु पश्चाद्भवंति जायंते इति पुत्रा(कनिष्ठभ्रातरश्च अथवा अनुभाविनाम् इतिपुत्राएवनि
र्दिश्यन्ते॥गंगायांभास्करक्षेत्रे मातापित्रोर्गुरौमृते॥आधानकालेसोमेच वपनंसप्तसुस्मृतम्॥इत्यत्रमातापित्रोर्मृतौ इतिविशेषेणोपादानात्॥
अत्रगुरुर्मंत्रोपदेष्टाविद्योपदेष्टाच इति ॥ अनुभाविनः कनिष्ठा इतिमिताक्षरारत्नाकरादयः ॥ आशौचमनुभवतांसर्वेषांवपनमितिशुद्धित
त्वादयः ॥ अत्रदेशाचारतोव्यवस्था ॥ अथैकादशाहः ॥ (तत्र मनुः)विप्रःशुध्यत्यपःस्पृष्ट्वा क्षत्रियोवाहनायुधैः॥ वैश्यःप्रतोदरश्मीन्वा

१ श्राद्धविवेके रुद्रधरेण प्रेतश्राद्धेषु एतदष्टादशपदार्थालिखनम् अस्थिसंचयनेसमंत्रकश्राद्धप्रयोगलिखनंचप्रमाणशून्यम् ।

यद्यपिशूद्रःकृतक्रियः। (हेमाद्रौ कौर्मे) एकादशेह्निकुर्वीत प्रेतमुद्दिश्यभावतः। एकंपवित्रमेकोर्घ्यः पिंडपात्रंतथैवच ॥ एवंमृताऽह्निकर्त्तव्यं
प्रतिमासंतुवत्सरम् ॥ (तत्रैव पाद्मे) ततस्त्वेकादशाहेतु द्विजानेकादशैवतु ॥ गोत्रादिसूतकान्तेच भोजयेदयुजोद्विजान्॥आवाहना
ग्नौकरणं दैवहीनंविधानतः ॥ एकंपवित्रमेकोर्घ्यं एकपिंडोविधीयते ॥ उपतिष्ठतांतइति देयंपश्चात्तिलोदकम् ॥ स्वदितंद्विकरेब्रूया
द्विसर्गेचाभिरम्यताम् । शेषंपूर्ववदत्रापि कार्यंवेदविदोविदुः ॥ (गरुडपुराणे) अमंत्रंकारयेच्छ्राद्धं दशाहंनामगोत्रतः ॥ एकादशेह्निप्रेतस्य
दद्यात्पिडंसमंत्रकम् ॥ (माधवेमरीचिः)॥आशौचान्तेततःसम्यक् पिंडदानंसमाप्यते। ततः श्राद्धंप्रदातव्यं सर्ववर्णेष्वयंविधिरितिश्राद्ध
मेकोद्दिष्टम् । श्वोभूते एकोद्दिष्टंकुर्यादितिहारीतस्मरणात्।एतच्छ्राद्धंनकेवलं ब्राह्मणस्यैकादशेह्नि अपितुक्षत्रियादेरप्यस्याद्यश्राद्धस्यायमे
वकालः। (तथाचहेमाद्रिमाधवयोः पैठीनसिः) एकादशेह्नियच्छ्राद्धं तत्सामान्यमुदाहृतम् चतुर्णामपिवर्णानांसूतकंतुपृथक्पृथक् इति।
नचक्षत्रियादेरशुचित्वेनतत्रश्राद्धाऽनधिकारइत्याशंकनीयम्।अशुद्धस्याऽप्ययंवाचनिकोऽधिकारः।(तथाच तत्रैवशंखः)आद्यंश्राद्धमशुद्धो
पि कुर्यादेकादशेऽहनि । कर्त्तुस्तात्कालिकीशुद्धिरशुद्धिःपुनरेवसा इति । आद्यमितिसर्वैकोद्दिष्टप्रकृतिभूतमेकादशाहाख्यमित्यर्थः ॥ एत
च्छ्राद्धानंतरंस्नात्वाभुंजीतेति ॥ (भविष्योत्तरे) एकादशाहेयच्छ्राद्धं तत्सामान्यमुदाहृतम् । एकादशभ्योविप्रेभ्यो दद्यादेकादशेऽहनि ॥
भोजनंतत्रचैकस्मै ब्राह्मणायमहात्मने।वस्त्रालंकारशय्याढ्यं पितुर्यद्वाहनादिकम् । गोगृहासनदासीश्च दद्यात्संपूज्यभक्तितः इति॥ क्रिया
निबंधेस्मृत्यंतरे) सूतकेमृतकेचैव द्वितीयंमृतकंयदि । पिंडदानंप्रकुर्वीत वृषोत्सर्गंतथैवच ॥ नहन्यात्सूतकेकर्म द्वादशैकादशाहिकम् ॥
शुद्धोवायदिवाऽशुद्धः कुर्यादेवाविचारयन् इति ॥ अथ वृषोत्सर्गः ॥ तत्रतावदस्यविधिकालदेशाः ॥ इहचैकादशेऽहनिप्रमीतमनु

ष्योद्देशेनवृषोत्सर्गःकार्य्यइत्युक्तम् ॥ (हेमाद्रौषट्त्रिंशन्मतेगारुडेच) एकादशाहेप्रेतस्य यस्यनोत्सृज्यतेवृषः ॥ पिशाचत्वंस्थिरंतस्य
दत्तैःश्राद्धशतैरपि ॥ (बृहद्गारुडेऽपि) एकादशेह्निसंप्राप्ते वृषाभावोभवेद्यदि ॥ दर्भैःपिष्टैस्तुसंपाद्य तंवृषंमोचयेद्बुधः इति ॥ भ
विष्योत्तरेतुद्वादशेह्निवृषोत्सर्गोविहितः ॥ कार्त्तिक्यथवामावास्यामयनेवायुधिष्ठिर ॥ चैत्र्यांवापितृतीयायां वैशाख्यांद्वादशेह्निवा इति॥
एतदेकादशाहेऽसंभवेज्ञेयम् ॥ (विष्णुधर्मोत्तरेतु) यस्मिन्कस्मिंश्चिन्मृताहेऽपि वृषोत्सर्गो वहितः । अश्वयुक्शुक्लपक्षस्य पंचदश्यांनरा
धिप । कार्त्तिकेऽप्यथवामासि वृषोत्सर्गंतुकारयेत् । ग्रहणेद्वेमहामुख्ये तथाचैवायनद्वये । विषुवद्वितयेचैव मृताहेबांधवस्य चाउत्सृजेन्नी
लकंठंवे कौमुदीसमुपागता इति।नीलकंठःनीलवृषः।कौमुदी आश्विनकार्तिकयोः पौर्णमासी इत्यर्थः ।(पित्राद्युद्देशेनवृषोत्सर्गमकुर्व्वाणस्य
निंदा हेमाद्रौमात्स्ये)नकरोतिवृषोत्सर्गं सुतीर्थेवाजलांजलिम् । नददातिसुतोयस्तु पितुरुच्चारएवसः । उच्चारः पुरीषोत्सर्गः । वृषोत्सर्गप्र
देशाः । (तत्रदेवीपुराणम्) सत्वरण्येमवेत्तीर्थे उत्सर्गोगोकुलेपिवा। (ब्रह्मपुराणे) प्रागुदक्प्रवणेदेशेमनोज्ञेनिर्जनेवने । वृषोत्सर्गःकार्य्यइति
शेषः।(कालिकापुराणे)अरण्येचत्वरेवापिगोष्ठेवामोचयेद्वृषम्।नगृहेमोचयेद्विद्वान्कामयन्पुष्कलंफलम्।(अथोत्सर्जनीयवृषलक्षणं हेमाद्रौ
ब्रह्मपुराणे) वृषभः कृष्णसारस्तु प्रत्यग्रस्तुत्रिहायनः।मनोज्ञोदर्शनीयश्च सर्वलक्षणसंयुतः। (हरिहरभाष्ये) पृथुकर्णोमहास्कंधःसूक्ष्मरोमा
चयोभवेत्।रक्ताक्षःकपिलोयश्च रक्तशृंगगलोभवेत् ॥ श्वेतोदरःकृष्णपृष्ठोब्राह्मणस्यप्रशस्यते ॥ स्निग्धवर्णेनरक्तेन क्षत्रियस्यप्रचक्षते ॥ कां
चनाभेनवैश्यस्य कृष्णःशूद्रस्यशस्यते।यस्यप्रागायतेशृंगे स्वमुखाभिमुखेसदा। सर्वेषामेववर्णानां सचसर्वार्थसाधकः। अथसर्वोत्तमनील
वृषस्यलक्षणं प्रशंसाच ब्रह्माण्डे) लोहितोयस्तुवर्णेन मुखेपुच्छेचपांडुरः । श्वेतःखुरविषाणाभ्यां सनीलोवृषउच्यते । (हेमाद्रौमात्स्येपि)

चरणाश्चमुखंपुच्छं यस्यश्वेतानिगोपतेः॥लाक्षारससवर्णस्य तन्नीलमितिनिर्दिशेत्॥वृषएवसमोक्तव्योनसधार्य्योगृहेभवेत्॥तदर्थमेषाचरति लोकेगाथापुरातनी॥एष्टव्याबहवःपुत्रा यद्येकोपिगयांव्रजेत्॥गौरींवाप्युद्वहेद्भार्य्यां नीलंवावृषमुत्सृजेत् इति॥गौरीमष्टवर्षिकांकन्याम्॥ अष्टवर्षाभवेद्गौरीति गर्गस्मरणात् ॥ इति॥ (गारुडे) पितापितामहश्चैव तथैवप्रपितामहः॥आशासतेसुतंजातं वृषोत्सर्गंकरिष्यति इति ॥ (वर्ज्जनीयावृषा हरिहरभाष्ये) कृष्णताल्वोष्ठदशना रूक्षशृंगशफाश्चये॥अशक्तदंताह्रस्वाश्च व्याघ्रभस्मनिभाश्चये॥ध्वांक्षगृध्रसवर्णाश्च तथामूषकसन्निभाः ॥ कुब्जाःकाणाश्चखञ्जाश्चकेकराक्षास्तथैवच॥अत्यंतश्वेतपादाश्च उद्भ्रांतनयनास्तथा ॥ नैतेवृषाःप्रमोक्तव्या गृहेधार्याःकथंचन इति ॥ (अथवृषोत्सर्गविधिप्रवर्त्तकानि कात्यायनपारस्करसूत्राणि) कार्त्तिक्यांपौर्णमास्यां रेवत्यांवाश्वयुजस्यमध्येगवाꣳ सुसमिद्धमग्निंकृत्वाज्यꣳ संस्कृत्येहरतिरितिषड्जुहोतिप्रतिमंत्रं पूषागाऽअन्वेतुनःपूषारक्षत्वर्व्वतः॥पूषावाजंसनोतुनःस्वाहेतिपौष्णस्यजुहोतिरुद्रांजपित्वैकवर्णंवायोवायूथंछादयतियंवायूथंछादयेद्रोहितोवैवस्यात्सर्वांगैरुपेतोजीववत्सायाः ॥ पयस्विन्याःपुत्रोयूथेचरूपस्वित्तमः स्यात्तमलंकृत्ययूथेमुख्याश्चतस्रोवत्सतर्य्यस्ताश्चालंकृत्यैनंयुवानंपतिंवोददामि तेनक्रीडंतीश्चरथप्रियेणमानः साप्तजनुषासुभगारायस्पोषेणसमिषामदेमेत्येतयैवोत्सृजेरन्नस्यस्थमभिमंत्रयतेमयोभूरित्यनुवाकशेषेणसर्वासांपयसिपायसꣳ श्रपयित्वाब्राह्मणान्भोजयेदिति ॥ (हेमाद्रौभविष्योत्तरे विशेषः षांडनीलंशंखपादं सपौंड्रंश्वेतपुच्छकम्॥गोभिश्चतुर्भिःसहितमुत्सृजेत्तंविधिंशृणु॥मातरः स्थापयित्वाच पूजयेत्कुसुमाक्षतैः मातृश्राद्धंततःकुर्य्यात्सदाभ्युदयकारकम् ॥ अर्कमूलेतुकलशमश्वत्थदलशोभितम् ॥ तत्र रुद्राञ्जपित्वातु स्थापयेद्रुद्रदैवतम् ॥ रुद्रान्रुद्राध्यायंजप्त्वारुद्रदैवतंकलशंस्थापयेदित्यर्थः ॥ सुसमिद्धंततःकृत्वा वह्निंमंत्रपुरःसरम् ॥

आज्येनजुहुयात्षड्भिः पृथगाहुतिसंस्कृतैः ॥ पौष्णयमंत्रैस्ततःपश्चाद्धुत्वावह्निंयथाविधि ॥ एकवर्णंद्विवर्णंवा लोहितंश्वेतमेव वा ॥ जीवद्वत्सपयस्विन्याः पुत्रंसर्वांगसुंदरम् ॥ चतस्रोवत्सतर्य्यश्च ताभिःसार्द्धमलंकृतम् ॥ तासांकर्णेजपेद्विप्रः पतिवोबलिनंशुभम् ॥ ददामितेनसहिताःक्रीडध्वंहृष्टमानसाः ॥ ततोवामेत्रिशूलंच दक्षिणेचक्रमालिखेत् ॥ अंकितंशूलचक्राभ्यां चर्चितंकुंकुमादिना ॥ पुष्पमालावृतग्रीवं श्वेतवस्त्रैश्चच्छादितम् ॥ विमुंचेद्वत्सिकाभिश्च तिसृभिर्बलिनंवृषम्॥देवालयेगोकुलेवा नदीनांसंगमे तथा॥इत्युक्तंगर्गमुनिना विधानंवृषमोक्षणे इति॥ अत्रमातृश्राद्धंमातृपूजापूर्वकाभ्युदयिकं श्राद्धंकर्तव्यमितिगम्यते ॥ एतच्छ्राद्धंसंवत्सरानंतरं कार्त्तिक्यादौक्रियमाणवृषोत्सर्गविषयकं सपिंडनंविना काम्याभ्युदयिकयोर्निषेधात्॥(तथाच स्मृतिः)वत्सराभ्यंतरेपित्रोर्वृषस्योत्सर्गकर्मणि॥वृद्धिश्राद्धंनकुर्वीत तदन्यत्रसमाचरेत् इति ॥ वत्सतरीचतुष्टयाभावेद्वाभ्यामेकयावा सहविवाहयेत्। तथाच बृहद्गारुडे)चतसृभिर्वत्सिकाभिर्द्वाभ्यांचैवैकयाखग ॥ विवाह्यमंगलद्रव्यैर्मंत्रवत्तंसमुत्सृजेत् ॥ इहरतीतिषड्भिर्ऋग्भिर्होमंकुर्याद्विभावसाविति ॥ (कलशेरुद्रजपानंतरंपुरुषसूक्तादिजपोप्युक्तो हेमाद्रौविष्णुधर्मोत्तरे) तत्ररुद्रंजपित्वातु स्थापयेद्रुद्रदैवतम्।तथैव पौरुषंसूक्तं कूष्मांडानितथैवच ॥ इति॥रुद्रं नमस्तेरुद्रमन्यव इत्यादिरध्यायोयजुर्वेदेप्रसिद्धः॥पुरुषसूक्तंसहस्रशीर्षेत्यादिषोडशर्चः॥यद्देवादेवहेडनमित्याद्या ऋचः कूष्मांडसंज्ञकाइत्यर्थः ॥ (जपानंतरं होमःकार्यः विष्णुधर्मोत्तरे) सुसमिद्धंगवांमध्ये सुविस्तीर्य्यहुताशनम् ॥ पयसाश्रपयेद्विद्वांश्चरुंपौष्णंसमाहित इति॥अस्यार्थोहेमाद्रिणाकृतः॥अत्रायंक्रमेणहोमोऽभिधीयते॥ गवांमध्येरुद्रकलशस्यपश्चाद्भागेपरिसमूहनादिपंचभूसंस्कारान् विधायाग्निमुपसमाधाय दक्षिणतोब्रह्माणमुपवेश्य उत्तरेकर्मोपयुक्तसर्वमासाद्य आज्यमधिश्रित्यपयसासहतंडुलान् प्रक्षिप्यपायसंश्रप

यित्वा सोदकतंडुलपिष्टंस्थाल्यांप्रक्षिप्य पौष्णंचरुंश्रपयित्वा आज्योद्वासनादिकर्मसमाप्यदक्षिणंजान्वाच्यप्रथममन्वारब्धेइहरतिरिति
षडाज्याहुतयोहोतव्याः।तत आघारावाज्यभागौघृतेनहुत्वा तदनंतरमन्वारब्धेपायसेन गोयज्ञोक्तदेवताभ्योहोमः॥ततःपौष्णचरोःपूषागा
अन्वेतुनइत्येकाहुतिः॥ततः पौष्णपायसाभ्यांस्विष्टकृद्धोमः ॥ आज्येनमहाव्याहृतिहोमं त्वन्नोऽअग्नेइत्यादि सर्वप्रायश्चित्तहोमंप्राजाप
त्यंचजुहुयात्॥ततःसंस्रवप्राशनं मार्जनं पवित्रप्रतिपत्तिः दक्षिणादानमित्यर्थः॥एवंहोमंपरिसमाप्य वृषस्याङ्कनादिकंकुर्यात् ॥ (तथाच
विष्णुः) गवांमध्येसुसमिद्धमग्निंपरिस्तीर्य्य पौष्णंचरुंश्रपयित्वा पूषागिगंधेतु इहरति बहुत्वावृषभमानीयायस्कारमाह्वयेत्।अयस्करः
लोहकारः ॥ हेमाद्रौसौरपुराणे) कुंकुमेनांकयित्वदौ ब्राह्मणःसुसमाहितः । तप्तेनधातुनापश्चादयस्कारोङ्कयेद्वृषम् इति॥अत्रवृषांकने
विचारः ॥ तत्रतावत् (हेमाद्रौसौरपुराणे) ततोवृषभमानीय अग्नेरुत्तरतःस्थितम्॥सव्यस्फिचिलिखेच्चक्रं शूलंबाहौतुदक्षिणे इति ॥ सव्य
स्फिचिवामकटिभागे इत्यर्थः॥(बृहद्गारुडेपि दक्षिणांसेत्रिशूलाङ्कं वामोरौचक्रचिह्नितम्॥(देवीपुराणेपि) तप्तेनवामतश्चक्रं पार्श्वेशूलंसमा
लिखेत्॥धातुनाहेमतारेण आयसेनाथवांकयेत् इति ॥हेम सुवर्णं तारं रूप्यम् आयसं लोहमित्यर्थः इत्येकंमतम् ॥ (द्वितीयप्रकारमाह
हेमाद्रौ विष्णुः) एकस्मिन्पार्श्वेचक्रेणपरस्मिन् शूलेनाङ्कितंचहिरण्यवर्णेतिचतसृभिः शन्नोदेवीरितिचस्नापयेत् इति॥एकस्मिन् पार्श्वेद
क्षिणपार्श्वेचक्रेणाङ्कयेत् ॥ परस्मिन्वामपार्श्वे त्रिशूलेनेत्यर्थः ॥(तथाच विष्णुधर्मोत्तरे) ततोवामेत्रिशूलंचदक्षिणेचक्रमालिखेत् इति ॥
एवमेवहरिहरप्रभृनयः ॥ (विश्वनाथीयान्त्येष्टिपद्धतिगारुडयोस्तु) त्रिशूलंदक्षिणेपार्श्वे वामेचक्रंतुविन्यसेत् इत्युक्तम्॥अत्रविकल्पोदेश
कुलाचारतः परिहार्यं इति॥(विष्णुधर्मोत्तरे) अंकितंस्नापयेत्पश्चात्स्नानेतस्यतथापठेत्॥हिरण्यवर्णेतिऋचश्चतस्रोमनुजेश्वर॥आपोहि

ष्ठेतितिस्रश्च शन्नोदेवीति चाप्यथ इति।हिरण्यवर्णाःशुचयःपावकाइत्याद्याश्चतस्रोभिषेचनीयाःऋचस्तैत्तिरीयेप्रसिद्धाः(तत्रैव)वत्सतर्यश्चतस्रश्च
तंवृषंचनराधिप।अलंकुर्यात्ततःपश्चाद्गंधमाल्यैश्चशक्तितःकिंकिणीभिश्चरम्याभिस्तथाचीनांशुकैःशुभैः।(आदित्यपुराणे)घंटांलोहकृतांदद्या
च्छृंगेचपटलंशुभम्॥पटलं सुवर्णादिनिर्मितकोशः।(हेमाद्रौ विष्णुः)स्नातालंकृतं स्नाताभिश्चतसृभिर्वत्सतरीभिः सार्द्धमानीयरुद्रान्पुरुष
सूक्तंकूष्मांडीश्चजपेत् ॥ पितावत्सेतिचमंत्रंवृषभस्यदक्षिणकर्णेजपेदिति॥पितावत्सेतिमंत्रोऽथर्ववेदेप्रसिद्धः॥(तत्रैव पारस्करोपि) अथा
लंकृत्यतान्सर्वान्रुद्राध्यायंसमाहितः ॥ श्रावयेत्पौरुषंसूक्तं तथाऽप्रतिरथानिच ॥ (विष्णुधर्मोत्तरे) ततोंकितेजपेन्मंत्रमिमंप्र
यतमानसः ॥ वृषोसिभगवान्धर्मश्चतुष्पादःप्रकीर्त्तितः ॥ वृणोमितमहंभक्त्या समांरक्षतुसर्वतः॥इतिप्रार्थ्यवृषेंद्रतं गृहीतकुसुमांजलिः ॥
त्रिःप्रदक्षिणमावृत्य नमस्कुर्याद्यथाविधि ॥ प्रत्यङ्मुखानांतुगवामेतावान्विधिरिष्यते ॥ अथैशान्यभिमुखतः कुर्याद्गावोवृषंतथा ॥
गावोवृषस्योभयतो वृषंमध्येनिवेश्यच ॥ सर्वेषांकंठवस्त्राणि श्लेषयेत्तुपरस्परम् ॥ अयंहिवोमयादत्तः सर्वासांपतिरुत्तमः ॥ तुभ्यंचैता
मयादत्ताः पत्न्यःसर्वामनोरमाः ॥ संयोज्येत्तिवृषंताभिः पितृभ्यस्तंनिवेदयेत् ॥ सव्येनपाणिनापुच्छं समालभ्यवृषस्यतु ॥ दक्षिणेना
पआदाय सतिलाःसकुशास्ततः ॥ ततोगोत्रंसमुच्चार्य्य अमुकस्माइतिब्रुवन् ॥ एषएवमयादत्तः तंतारयतुसर्वदा ॥ सहेमसतिलंभूमावि
त्युच्चार्य्यविनिक्षिपेत् इति॥इदंतुपारस्करेणैकप्रमीतोद्देशेनवृषोत्सर्गवाक्यमुक्तम् ॥ अनेकप्रमीतोद्देशेनतुनीलोत्सर्गे मंत्रउक्तः ॥ (वाराह ॥ ६४ ॥
पुराणे) नरा ये चात्रतिष्ठंति पतिताः पितृबांधवाः ॥ तेषांभवत्वयंत्राता नीलोमुक्तोयथाविधि॥गृहीत्वोदुंबरंपात्रं कृत्वाकृष्णतिलोदकम्॥
करेणपुच्छमादाय पितृणांमुच्यतेवृषम् ॥ उदुंबरं ताम्रम्॥(ब्रह्मपुराणेपि) स्वपितृभ्योथमातृभ्यो बंधुभ्यश्चापितृप्तये ॥मातृपक्षाश्चयेके

चिद्येचान्येपितृपक्षजाः ॥ गुरुश्वशुरबंधूनां येकुलेषुसमुद्भवाः ॥ येमेतभावमापन्ना येचान्येश्राद्धवर्जिताः ॥ वृषोत्सर्गेणतेसर्वे लभंतांतृप्ति
मुत्तमाम् ॥ दद्यादनेनमंत्रेण तिलाक्षतयुतंजलम् ॥ पितृभ्यश्चसमासेन ब्राह्मणेभ्यश्चदक्षिणाम् ॥ अनेनमंत्रेण बहुपित्र्युद्देशेनवृषमुत्सृ
जेत् ॥ (अनंतरकृत्यमाह विष्णुः) वृषंवत्सतरीयुक्तमैशान्यांकालयेद्दिशि ॥ कालयेत् प्रणोदयेत् ॥ एनंयुवानंपतिमितिमंत्रेणेतिशेषः॥
(विष्णुधर्मोत्तरेपि) एतंयुवानंवृषभंददामि गवांपतिंयूथपतिंसदर्पम् ॥ अनेनसार्द्धंचरतः प्रकामं कामंतथाप्राक्तनवत्सतर्य्यः ॥
प्रकालयेत्तंवृषभं ततस्तु पूर्वांदिशंवत्सतरीश्चसर्वाः ॥ (हेमाद्रौ ब्रह्मपुराणे) अथवृत्ते वृषोत्सर्गे दातावक्रोक्तिभिः पदैः ॥ ब्राह्मणा
नाह्वयत्किंचिद्येनोत्सृष्टंतुनिर्जने ॥ तत्कश्चिदन्योननयेद्विभाज्यंनयथाक्रमम् इति ॥ अत्रनिर्जनेयेनकेनापियत्किंचिदुत्सृष्टंतदन्येनकेन
चिन्ननेयम् ॥ नच विभाज्यमितिब्राह्मणान्प्रति दातुरुक्तिः ॥ (अथमोक्तव्यस्थानमाह पारस्करः) बहुतोयतृणेरण्ये क्षेपणीयःसगोपतिः॥
वत्सतर्य्यश्चतस्रस्तासर्वास्तेनैवसहकालयेत्॥ अथवागोकुलेक्षेप्या बहुगोधनसंकुले॥ निष्क्रान्तेगोपतौतत्रब्राह्मणान्स्वस्तिवाचयेत्॥दद्या
च्चदक्षिणांतेषां ब्राह्मणान्भोजयेत्ततः ॥ सहिरण्यंरुद्रकुंभं तथास्नानघटानपि ॥ होत्रेप्रदद्यात्तत्सर्वं धेनुंचैवपयस्विनीम् इति ॥ (एवंविधि
नामुक्तस्यधारणादिनिषेधमाह हेमाद्रौ स एव) विधारयेन्नतंकश्चिन्नचकश्चिन्नवाहयेत्॥नदोहयेच्चतांधेनुं नचकश्चनबंधयेत्॥(शिवधर्मोत्त
रेपि) येवृषाःसाधुभिर्मुक्तास्त्रिशूलाङ्काःशिवप्रियाः ॥ तान्वाहयंतियेमूढाः पापाचारानराधमाः ॥ तेमहाप्रलयंयावदशेषनरकादिषु ॥
पच्यन्ते विविधैर्घोरैः पत्नीपुत्रादिसंयुताः॥राज्ञश्चविषयेयस्य जनायत्रनराधमाः॥वाहयंतिवृषंपापाः पापंतस्यापितत्समम्। तस्मान्निवा
रयेद्राजा वाह्यमानांश्चतैर्वृषान्॥(देवीपुराणे)एवंकृत्वाह्यवाप्नोति फलंवाजिमखोदितम्॥ यमुद्दिश्योत्सृजेद्वत्सं सलभेताविचारणात्॥एवं

वृषोत्सर्गंविधिंनरोयः करोतिभक्त्यानिजपूर्वजानाम्॥उद्धृत्यतान्दुर्गतिपङ्कमग्नान्स्वयंसलोकं समुपैतिशंभोरिति ॥ (स्त्रीपुंविशेषःसंग्रहे)
पतिपुत्रवतीनारी भर्तुरग्रेमृतायदि ॥ वृषोत्सर्गंनकर्वीत गांदद्याच्चपयस्विनीम्॥इतिवृषोत्सर्गप्रयोगनिर्णयः॥ (अथ शय्यादिदानं हेमाद्रौ
पद्मपुराणे) सूतकांतेद्वितीयेह्नि शय्यांदद्याद्विलक्षणाम् ॥ कांचनंपुरुषं तद्वत्फलवस्त्रसमन्वितम्॥संपूज्यद्विजदांपत्यं नानाभरणभूषित
म् ॥ उपवेश्यतुशय्यायां मधुपर्कंततोवदेत् ॥ (गरुडपुराणेपि) मृतमुद्दिश्यदातव्यं शय्याधेन्वादिकंतथा ॥ विप्रान्बहून्भोजयीतप्रेतस्य
क्षुद्विशांतये इति ॥ इदं सपिंडनोत्तरमितिशिष्टाः॥(अत्रपददानमुक्तं गारुडे एकादशाहं प्रक्रम्य) तदह्निदीयतेसर्वं द्वादशाहेविशेषतः ॥
पदानिसर्ववस्तूनि वरिष्ठानित्रयोदश ॥ योददातिमृतस्येह जीवन्नप्यात्महेतवे ॥ सुखीभूत्वामहामार्गे वैनतेयसगच्छति ॥ आसनोपा
नहौछत्रं मुद्रिकाचकमंडलुः॥ भोजनंभाजनाधारो वस्त्राण्यष्टविधंपदम्॥तथा॥भाजनासनदानेन मुद्रिकाभोजनेनच॥आज्ययज्ञोपवीतेन
पदंसंपूर्णतांव्रजेत् ॥ महिषीरथगोदानात्सुखीभवतिनिश्चितम् ॥ सर्वोपस्करयुक्तानि पदान्यत्रत्रयोदश॥योददातिमृतस्येह जीवन्नप्यात्म
हेतवे ॥ सगच्छतिपरंस्थानं महाकष्टविवर्जित इति ॥ (अथोदककुंभः) तच्चैकादशाहादारभ्यसंवत्सरपर्यंतंप्रतिदिनंप्रतिमासं वा
प्रेतायसान्नोदकुंभदानंकार्यम् ॥ (तथाचहेमाद्रौस्मृतिसमुच्चये) एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ॥ दिनेदिनेप्रदातव्यो यावत्संव
त्सरंस्मृतेः ॥ (पारस्करोपि) अहरहरन्नमस्मैब्राह्मणायोदकुंभंचदद्यात्पिंडमप्येके निगृह्णंतीति ॥ शिष्टास्तुसंवत्सरपर्यंतंप्रतिदिनंसान्नो
दकुंभदानाऽशक्तौ तन्निमित्तकंषष्ट्युत्तरत्रिशतमंजलिदानमामान्नेनपिंडदानंचैकादशेह्निकुर्वंति ॥ अथद्वादशाहसपिंडनमधिकृत्यमा
सिकानि उच्यंते ॥ तत्रतावत्तानिकृत्वैवसपिंडनंकार्यम् ॥ (तथाच लौगाक्षिगोभिलवसिष्ठाः) श्राद्धानिषोडशाऽदत्त्वा नैवकुर्यात्सपिंड

नम् ॥ श्राद्धानिषोडशापाद्यविदधीतसपिंडनम् इति ॥ (षोडशश्राद्धानि पराशरमाधवीयेजातूकर्ण्येनदर्शितानि) द्वादशप्रतिमास्यानि
आद्यषाण्मासिकेतथा ॥ त्रैपक्षिकाब्दिकेचेति श्राद्धान्येतानिषोडश इति ॥ अत्राद्यषाण्मासिकाब्दिकशब्दाः ऊनमासिकोनषाण्मासिको
नाब्दिकपराइत्यर्थः।(गरुडपुराणेपि) द्वादशप्रतिमास्यानि आद्यमेकादशेतथा।त्रिपक्षसंभवंचैव द्वेरिक्तेखगषोडश इति।एकादशेएकादशेऽ
हरि द्वेरिक्ते ऊनषाण्मासिकोनवार्षिके इत्यर्थः।(हेमाद्रौकात्यायनोपि)द्वादशप्रतिमास्यानिआद्यंषाण्मासिकेतथा।सपिंडीकरणंचेतिश्राद्धा
न्येतानिषोडश इति। षाण्मासिके ऊनषाण्मासिकोनवार्षिके। चकारात्त्रैपक्षिकमपिग्राह्यमित्यर्थः।अत्रकात्यायनेनषोडशश्राद्धान्तर्गतंसपिं
डीकरणमुक्तंतद्द्वादशाहसपिंडनव्यतिरिक्तंज्ञेयम् । (तथाच स्मृतिरत्नावल्याम्)द्वादशाहेयदाकुर्यात्पितुःपुत्रःसपिंडनम्।एकादशेह्निकुर्वीत
प्रेतश्राद्धानिषोडश इति ।(द्वादशमासिकानांकालो याज्ञवल्क्येन दर्शितः) मृतेऽहनितुकर्त्तव्यं प्रतिमासंतुवत्सरम् । प्रतिसंवत्सरंचैवमाद्य
मेकादशेऽहनि इति । वत्सरं वत्सरपर्यंतंमासिमासिमृतेऽहनिश्राद्धंकर्त्तव्यम् । सपिण्डीकरणादूर्ध्वंप्रतिवत्सरंमृतेऽहनिकर्त्तव्यम्।आद्यंतुमा
सिकमेकादशेऽहनिकर्त्तव्यमित्यर्थः।तथाचआद्यंमासिकमूनमासिकम्।अद्यमेकादशेऽहनीत्यस्य आद्यद्वादशमासिकानामादिभूतंतेभ्यः पूर्वं
कर्त्तव्यमित्यर्थोबोध्य इत्यर्थः। (एषुश्राद्धेष्वदत्तेषुप्रेतत्वमुक्तिर्नभवतीत्याह यमः) । यस्यैतानिनदत्तानि प्रेतश्राद्धानिषोडश । पिशाचत्वं
स्थिरंतस्य दत्तैःश्राद्धशतैरपि इति। एवमेतानिषोडशश्राद्धानिकृत्वाततःसपिंडनंविदधीत । (तस्यकालमाह कात्यायनः)ततःसंवत्सरेपूर्णे
त्रिपक्षेद्वादशाहेवायदहर्वावृद्धिरापद्येतइतित्रिपक्षेमरणात्ततीयपक्षेवृद्धिर्विवाहादिशुभागमइत्यर्थः।(गारुडेपि)द्वादशाहेत्रिपक्षेवा षाण्मासेवत्स
रेपिवा सपिंडीकरणंप्रोक्तं मुनिभिस्तत्त्वदर्शिभिरिति ॥ संवत्सरांतेतृतीयपक्षेद्वादशाहेवृद्धिप्राप्तौइतिचत्वारःपक्षाःसूत्रेदर्शिताः।तत्रद्वादशा

हेसपिंडीकरणंसाग्निकेनकार्यं सपिंडीकरणंविनापिंडपितृयज्ञाऽसिद्धेः। (तथाच भविष्यपुराणे) यजमानोऽग्निमान्राजन्प्रेतश्चाऽनग्निमान्भ
वेत् ॥ द्वादशाहेभवेत्कार्यं सपिंडीकरणंसुतैः इति ॥ (प्रेतस्यसाग्नित्वेतृतीयपक्षेसपिंडीकरणमाह सुमंतुः) प्रेतश्चेदाहिताग्निः स्यात्कर्त्ताऽ
नग्निर्यदाभवेत् ॥ सपिंडीकरणंतस्य कुर्यात्पक्षेतृतीयके इति ॥ उभयोःसाग्नित्वेतुद्वादशाहएव ॥ उभयोरनग्नित्वेपिद्वादशाहादयः
सप्तकालाः ॥ (भविष्यपुराणे) सपिंडीकरणंकुर्याद्यजमानस्त्वनग्निमान् ॥ अनाहिताग्नेःप्रेतस्य पूर्णेब्दे भरतर्षभ ॥ द्वादशेऽहनि
षष्ठेवा त्रिपक्षेवात्रिमासिवा ॥ एकादशेपिवामासि मंगलंस्यादुपस्थितम् इति ॥ एतेषुसप्तसुकालेषुकलौद्वादशाहःप्रशस्तः ॥
(तदाहतुर्हेमाद्रिमाधवगारुडेषुव्याघ्रपादविष्णू) ॥ आनंत्यात्कुलधर्माणां पुंसांचैवायुषःक्षयात् ॥ अस्थितेश्चशरीरस्य द्वादशाहः
प्रशस्यते इति ॥ अस्यार्थः—कुलधर्माणामानंत्यादित्यनेनयेषांद्वादशाहे सपिंडीकरणंकुलाचारः तेषांद्वादशाहः प्रशस्त इत्य
भिहितम् ॥ पुंसांचैवायुषःक्षयादित्यनेनयदाज्योतिरागमादिनासंवत्सरादर्वागधिकारिणआयुःक्षयोऽवधार्य्यते तदापिद्वादशाहः
प्रशस्तः ॥ अथवा कलिप्रभावेणायुःक्षयत्वादित्युक्तम् ॥ अस्थितेश्चशरीरस्यइत्येनन यदाअनुपेक्षणीयकार्यानुरोधेनविदेशगमनमावश्य
कंसंभाव्यतेतदापिद्वादशाहः प्रशस्त इत्यर्थः ॥ (गारुडेपि) निरग्निकःसाग्निकोवा द्वादशाहेसपिंडयेत् इति। सर्वेषामेववर्णानामाशौचां
तेसपिंडनमिति कात्यायनोक्तेः। (आशौचमाह मिताक्षरायामंगिराः) सर्वेषामेववर्णानां सूतकेमृतकेतथा। दशाहाच्छुद्धिरेतेषामितिशा
तातपोब्रवीत् ॥ ॥ (देवलोपि) आशौचंदशरात्रंतु सर्वेषामपरेविदुः ॥ निधनेप्रसवेचैव प्रश्यन्तःकर्मणःक्षयम् इति ॥ एतत्सर्वं त्रैवर्णिक
विषयम् ॥ शूद्रस्यतु द्वादशाहएवप्रतिनियतः। (तदाह हेमाद्रिमाधवयोर्विष्णुः) मंत्रवर्ज्यंहिशूद्राणां द्वादशेऽहनिकीर्त्तितमिति। एतदमावा

स्याश्राद्धकारिशूद्रविषयमिति हेमाद्रिः ॥ (अपरार्ककल्पतरुप्रभृतयः) वचनबलादाशौचमध्यएवश्राद्धकरणम् इति॥ यदा संवत्सरपूर्त्तेः प्रागेवैकादशाहादिषुषोडशश्राद्धानिकृत्वासपिंडीकरणं क्रियते तदा पुनरपिस्वस्वकालेमासिकादीन्यावर्त्तनीयानि॥(तदाह माधवेगोभिलः) यस्यसंवत्सरादर्वाग्विहितातुसपिंडता॥विधिवत्तानिकुर्वीत पुनःश्राद्धानिषोडश इति॥विधिवदेकोद्दिष्टविधिना इत्यर्थः॥ (गारुडेपि) सपिंडीकरणादूर्ध्वं यानिश्राद्धानिषोडश॥एकोद्दिष्टविधानेन चरेद्वापार्वणादृते इति।(माधवीयेगालवः)अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतम्॥षोडशानांद्विरावृत्तिं कुर्यादित्याहगौतमः॥(मदनरत्ने अंगिराः)यस्यसंवत्सरादर्वाक्सपिंडीकरणंकृतम्॥मासिकंचोदकुंभंच देयं तस्यापिवत्सरमिति॥(ऊनषाण्मासिकादीनांकालमाह माधवेगालवः) ऊनषाण्मासिकंषष्ठे मासार्द्धेह्यूनमासिकम् ॥ त्रैपक्षिकं त्रिपक्षेस्यादूनाब्दंद्वादशेतथा॥(तत्रैवगौतमोपि)एकद्वित्रिदिनैरूने त्रिभागेनोनएववा ॥ श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याहगौतम इति॥ ऊनमासिकोनषाण्मासिकोनाब्दिकानामेकदिनेनोनपक्षेपंचम्यांमृतस्यतृतीयायां द्वाभ्यामूनत्वपक्षोद्वितीयायांत्रिभिर्न्यूनेप्रतिपदायामनुष्ठानमित्यर्थः।(ऊनानांवर्ज्यकालमाह हेमाद्रिमाधवयोर्गार्ग्यः)नंदायांभार्गवदिने चतुर्दश्यांत्रिपुष्करे।ऊनश्राद्धंनकुर्वीत गृहीपुत्रधनक्षयात् इति॥प्रतिपत्षष्ठ्येकादशीच नंदा।भार्गवदिनंशुक्रवारः। त्रिपुष्करं तिथिवारनक्षत्रविशेषाणां मेलनं द्वयोर्मेलनंद्विपुष्करमित्यर्थः ॥ (तत्रैवमरीचिरपि) द्विपुष्करेचनंदासुसिनीवाल्यांभृगोर्दिने॥चतुर्दश्यांचनोनानि कृत्तिकासुत्रिपुष्करे इति॥सिनीवाली चतुर्दशीयुक्ता अमावास्या इत्यर्थः ॥ (त्रिपुष्करयोगमाह वसिष्ठः) रविरविजभौमवारे भद्रायांविषमपादमृक्षंचेत् ॥ त्रैपुष्करारव्ययोगस्त्रिगुणफलोयमलभे द्विगुण इति ॥ भद्रा द्वितीयासप्तमीद्वादश्यो भद्रातिथयः॥भानुभौमशनैश्चरवाराः पुनर्वसूत्तरफाल्गुनीविशाखोत्तराषाढापूर्वाभाद्रपदानक्ष

त्राणि विषमपादऋक्षाणीत्यर्थः ॥ (वाराहपुराणेविशेषः) चतुर्थाष्टमगेचंद्रे द्वादशेचविवर्जयेत्॥प्रेतकृत्यंव्यतीपाते वैधृतौपरिघेतथा ॥
करणेविष्टिसंज्ञेच शनैश्चरदिनेषुच॥त्रयोदश्यांविशेषेण जन्मताराात्रयेतथा इति।सपिंडीकरणादूर्ध्वमावर्त्तनीयानामूनमासिकादीनांवृद्धिप्रा
तौपुनरपकर्षः ॥ (तदाह माधवीयेसांख्यायनिः) सपिंडीकरणादर्वागपकृष्यकृतान्यपि ॥ पुनरप्यपकर्ष्यन्ते वृद्ध्युत्तरनिषेधनात् इति ॥
(निषेधश्चतत्रैवकात्यायनेनोक्तः) निर्वर्त्यवृद्धितंत्रंतु मासिकानिनतंत्रयेदिति ॥ एवंवृद्धिनिमित्तेनमासिकापकर्षेऽदकुंभश्राद्धानामप्यप
कर्षः प्रेतश्राद्धत्वात् ॥ प्रतिमासंसान्नोदकुंभदानाऽशक्तेनाऽप्येकस्मिन्दिने तावद्भिरामान्नैरुदकुंभैश्चतावदामान्नोदकुंभनिष्क्रयेण
वाऽपकृष्योदकुंभश्राद्धानिकार्याणि ॥ (तथाच गारुडे) द्वादशाहेचषाण्मासे त्रिपक्षेवाथवत्सरे ॥ उदकुंभाः प्रदातव्या मार्गेतस्य
सुखायवै इति॥ (वृद्धिंविनामासिकापकर्षेतुदोषमाह उशनाः) वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानियस्त्यजेत्॥सश्राद्धीनरकेघोरे पितृभिः
सहमज्जति इति ॥ चतुःपुरुषसपिंडेष्वाधानादिप्राप्तिनिमित्तोप्यपकर्ष इति॥(अथसपिंडीकरणप्रकारमाह याज्ञवल्क्यः) गंधोदकतिलै
र्युक्तं कुर्यात्पात्रचतुष्टयम् ॥ अर्घ्यार्थंपितृपात्रेषु प्रेतपात्रंप्रसिंचयेत् ॥ येसमानाइतिद्वाभ्यां शेषंपूर्ववदाचरेत् ॥ एतत्सपिंडीकरणमेको
द्दिष्टंस्त्रियाअपि इति॥(अस्यार्थो हेमाद्रिणा कृतः)॥गंधैश्चंदनादिभिरुदकेनतिलैश्चयुक्तं पात्रचतुष्टयं प्रेतादिभ्योऽर्घ्यपात्रंकुर्यात्॥तत्र
प्रेतायार्घ्यंदत्त्वाशेषंतत्पात्रस्थं जलंपितामहादिपात्रेषु येसमाना इति द्वाभ्यां मंत्राभ्यां यथाक्रमंपितृदेवत्याभ्यांप्रसिंचेत्॥शेषंतुकर्मब्राह्मण
निमंत्रणादिपार्वणवदाचरेत्।एतदुक्तप्रकारंपितामहदैवत्यंपार्वणं प्रेतदैवत्यंचैकोद्दिष्टश्राद्धंसपिंडीकरणसंज्ञकंवेदितव्यम्।स्त्रियाऽपिचैतत्का
र्यंनपुनःपुरुषस्यैव इत्यर्थः॥(कात्यायनसूत्रेपि) ततः संवत्सरेपूर्णेचत्वारिपात्राणि सतिलगंधोदकानि पूरयित्वा त्रीणिपितॄणामेकंप्र

तस्यपात्रंपितृपात्रेष्वासिंचति येसमाना इति द्वाभ्यामेतेन् पिंडोव्याख्यात इति॥अत्रपात्रमेलने विचारः।अर्घ्यदानात्प्राक् प्रात्रमेलनं कार्यं पश्चाद्वा इति संदेहेचिन्त्यते॥(तत्रतावत्प्राग्विधायकं हेमाद्रौब्रह्मपुराणम्) चतुर्भ्यश्चार्घ्यपात्रेभ्य एकंवामेनपाणिना ॥ गृहीत्वादक्षिणेनैव पाणिनाच तिलोदकम्॥प्रेतस्यविप्रहस्तेतु चतुर्भागंजलंक्षिपेत्॥ततःपितामहादिभ्यस्तन्मंत्रश्चपृथक्पृथक्॥येसमान द्वाभ्यां तज्जलंतु समर्पयेत्॥अर्घ्यंतेनैवविधिना प्रेतपात्राच्चपूर्ववत्॥तेभ्यश्चार्घ्यंनिवेद्यैव पश्चाच्चस्वयमाचमेत्॥अथतेनैवविधिना दर्भमूलेऽवनेजनम्॥पितुर्दत्वातुपिंडंतु दद्याद्भृत्त्यातुपूर्ववत्॥ सुवर्णरूप्यदर्भैस्तु तस्मिन्पिंडंततस्त्रिधा॥कृत्वापितामहादिभ्यः पितृभ्यःप्रेतमर्पयेत्॥येसमाना इति द्वाभ्यां पितृभ्यःप्रेतमर्पयेत् ॥ सुवर्तुलांस्ततस्तांस्त्रीन्पिंडान्कृत्वाप्रपूजयेत् ॥ अर्घ्यपुष्पैस्तथाधूपैर्दीपमाल्यानुलेपनैरिति ॥ एवमेव हेमाद्रिविज्ञानेश्वरनीलकंठकमलाकरविश्वनाथप्रभृतयोवदन्ति ॥ इत्येकंमतम् ॥ पश्चाद्विधायिका पितृभक्तौव्यवस्था ॥ मेलकस्तुदानानन्तरंकर्त्तव्यो न प्रथमं दानबाधापत्तेः॥(उक्तंच वृद्धशातातपेन) निरूप्यचतुरःपिंडान्श्राद्धदःप्रतिनामतः ॥ येसमानाइतिद्वाभ्यामाद्यंतुविभजेत्त्रिधा॥एषएवविधिःपूर्वमर्घपात्रचतुष्टये इति॥निरूप्यदत्त्वा आद्यंप्रथमदत्तंप्रेतपिंडंतेनप्रेतपूर्वमनुष्ठानम् इति सिध्यति ॥ एष एवविधिरित्यतिदेशात्॥ अर्घेऽपिदानानंतरमवशिष्टजलमेलक इति ॥ एवमेवाधुनिकारुद्रधरप्रभृतयोमैथिलाः इत्यपरम्॥ अत्रपक्षद्वयस्यापिस्मृतिसदाचारमूलकत्वात् प्राचीनमहानिबंधकारैरङ्गीकृतत्वाच्चवृद्धाचारतो व्यवस्थाज्ञेया॥अस्माकंतुप्रथमःपक्षएवपद्धतिस्तुद्वयमेव पुरतोवक्ष्यामि इति ॥ (अत्रद्वादशघटदानं वृहद्गारुडे) ॥ द्वादशाहेविशेषेणघटान् द्वादशसंख्यकान्॥एकापिवर्द्धनीतत्र पक्वान्नजलपूरिता॥विष्णुमुद्दिश्यदातव्या संकल्प्यब्राह्मणायवै इति ॥ अथव्युत्क्रममृतौसपिंडनविचारः ॥ यदापिताम्रियतेपितामहस्तिष्ठति तदाप्र

पितामहादिभिः सहपितुः सापिंड्यम् ॥(तदुक्तं माधवीये ब्रह्मांडपुराणे) मृतेपितरियस्याथ विद्यतेचपितामहः॥तेनदेयास्त्रयःपिंडाः
प्रपितामहपूर्वकाः ॥ तेभ्यश्चपैतृकःपिंडो नियोक्तव्यश्चपूर्ववत् इति ॥ (तत्रैव) मातर्य्यथमृतायान्तु विद्यतेचापतामही॥ प्रपितामहीतः
सर्वः कार्य्यस्तत्राप्ययंविधिरिति ॥ एवंप्रपितामहजीवने ॥ तत्पित्रादिभिः कार्यः ॥ यदातु पितुःसपिंडनात्प्राक् पितामहोमृतस्तदा
पितामहसपिंडनंकृत्वापितामहादिभिः सहपितृसपिंडनंकार्यमिति ॥ (अथ स्त्रीसपिंडीकरणे केनसहसपिंडनंकर्त्तव्यमितिसंशयपूर्व
कत्वमाहतुर्हेमाद्रिमाधवयोः शातातपशंखौ) मातुःसपिंडीकरणं कथंकार्य्यंभवेत्सुतैः ॥ पितामह्यादिभिःसार्द्धं सपिंडीकरणं
स्मृतमिति ॥ पितामहीप्रपितामहीवृद्धप्रपितामहीभिः सहेत्यर्थः ॥ (गारुडेपि) पितामह्यासमंमातुः पितामहैःसमंपितुः ॥
सपिंडीकरणंकुर्यादितितार्क्ष्यमतंमम ॥ भर्त्रादिभिस्त्रिभिःकार्य्यं सपिंडीकरणंस्त्रियाः ॥ नैतन्ममममतंतार्क्ष्य पत्यासापिंड्य
मर्हतीति ॥ (प्रमीतपितृकस्यविकल्पमाह पराशरमाधवे यमः) जीवत्पितापितामह्या मातुःकुर्य्यात्सपिंडताम् ॥ प्रमी
तपितृकः पित्रापितामह्याथवासुतः–इति ॥ (हेमाद्रौ ब्रह्माण्डेपि) मातुःसपिंडीकरणं कार्य्यंसंवत्सरेसुतैः ॥ पितामह्यासहै
वास्याः पितायदितुजीवति इति ॥ तदेवंकेषुचिद्वचनेषुमातुः पितामह्यादिभिः सहसपिंडीकरणंकर्त्तव्यमुक्तम् ॥ केषुचिच्चपत्यासहेति ॥
तत्रपत्यासहसपिंडनंतुभर्त्रासहान्वारूढामातृविषयम् ॥ (तथाच हेमाद्रौ शातातपः)मृतायानुगतानाथं सातेनसह पिंडताम्॥अर्हतिस्व
र्गवासंच यावदाभूतसंप्लवमिति॥एवंचसतिपितरिजीवति पितामह्यादिभिरेवसहसपिंडीकरणं कार्य्यम् प्रमीतेतुपितर्य्यनन्वारूढायां मातरि
पित्रैवसहसपिंडीकरणम् ॥ अनन्वारूढायामपिपितामह्यादिभिः सहेतिव्यवस्थाप्रतिपादिताभवति ॥ यदित्वनन्वारूढायामपि मातरि

पित्रैवसह सपिंडनंस्यात् तदान्वारूढाविषयंवचनमनर्थकंभवेत् तस्मादन्वारूढाभर्त्रैवसहसपिंडनीया नतु अनन्वारूढा इतिस्थितम्॥
पुत्रिकासुतस्तुमातृसपिंडनंमातामहादिभिः सह कुर्यात् ॥ (तथाच माधवेबोधायनः) आदिशेत्प्रथमेपिंडे मातरंपुत्रिकासुतः॥द्वितीये
पितरस्तस्यतृतीयेचपितामहम् इति ॥ (पुत्राद्यभावेपत्युरपित्नीसपिंडीकरणाधिकारः प्रतिपादितो व्यासेन) अपुत्रायांमृतायांतुप
तिःकुर्यात्सपिंडनम्॥श्वश्रूभिस्तिसृभिःसार्द्धमेवंधर्मेणयुज्यतेइति।पतिःसपिंडनंकरोतितदामात्रादिभिःसहैवस्त्रियाःसपिंडनंकुर्यादित्यर्थः।
(गारुडेपि) पुत्रोनास्तिनभर्त्ताच स्त्रीणांताक्ष्र्यसपिंडने ॥ कारयेद्वृद्धिसमये भ्रातृजायाथदेवरा इति॥ (पत्युःसापिंड्यमाह पराशरमा
धवेसुमंतुः) अपुत्रेप्रस्थितेकर्त्ता नास्तिचेच्छ्राद्धकर्मणि ॥ तत्रपत्न्यपिकुर्वीत सापिंड्यंपार्वणंतथा इति॥प्रस्थिते मृते इत्यर्थः॥(तत्रैव लौ
गाक्षिरपि) सर्वाभावेस्वयंपत्न्यः स्वभर्तॄणाममंत्रकम् ॥ सपिंडीकरणंकुर्युस्ततःपार्वणमेवच इति॥(विधवायाःपार्वणप्रकारःस्मृतिरत्ना
वल्याम्) स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच ॥ विधवाकारयेच्छ्राद्धंयथाकालमतंद्रिता इति॥विधवास्वयंसंकल्पंकृत्वाऽन्यत्सर्वं
ब्राह्मणद्वाराकारयेदित्युक्तंप्रयोगपारिजाते ॥ (यतीनांसापिंड्यंनिषेधतिमाधवे उशनाः) सपिंडीकरणंतेषां नकर्त्तव्यंसुतादिभिः॥त्रिदंड
ग्रहणादेव प्रेतत्वंनैवजायते इति॥(त्रिदंडमपितत्रैव) वाग्दडोऽथमनोदंडः कायदंडस्तथैवच ॥ यस्यैषानियताबुद्धिस्त्रिदंडीतिसउच्यते
इति ॥ (तत्रैव) एकोद्दिष्टंनकुर्वीत यतीनांचैवसर्वदा ॥ अहन्येकादशेतेषां पार्वणंतुविधीयते इति॥पौगंडमृतस्यापिसपिंडनंनकार्यम्॥
(तथाच देवलः) द्वादशाब्दत्सरादर्वाक्पौगंडमरणेसति ॥ सपिंडीकरणंनस्यादेकोद्दिष्टानिकारयेत्इति ॥ पौगंडोनवहायन इति देवया
ज्ञिकः ॥ एतदनुपनीतपरमितिविज्ञानेश्वरः ॥ अकृतविवाहपरमितिवृद्धाः ॥ इत्युभयात्मकं सपिंडीकरणंनिरूपितम् ॥ अथैताःसपिडी

करणांताःप्रेतक्रियाःकेषांचिद्दुर्मरणमृतानाम् एकादशेह्निनारायणबलिमकृत्वाचनकार्य्याः॥(तत्राह हेमाद्रौवृद्धयाज्ञवल्क्यः) सर्पविप्रहता
नांच शृंगिदंष्ट्रिसरीसृपैः ॥ श्राद्धमेषांनकर्त्तव्यं ब्रह्मदंडहताश्चये ॥ (संवर्तोपि) महापातकिनांचैव तथाचैवात्मघातिनाम् ॥ उदकंपिंड
दानंच श्राद्धंचैवतुयत्कृतम् ॥ नोपतिष्ठतितत्सव रक्षसैर्विप्रलुप्यते ॥ (बृहद्गारुडेपि) शृणुतार्क्ष्यपरंगोप्यं जातेदुर्मरणेसति॥ लंघनैर्ये
मृताजीवा दंष्ट्रिभिश्चाभिघातिताः ॥ कंठग्रहे विलग्नानां क्षीणानांतुंडघातिनाम् ॥ विषाग्निवृषविप्रेभ्यो विषूच्याचात्मघातकाः॥ पतनो
द्बंधनजलैर्मृतानांशृणुसंस्थितम्॥सर्पव्याघ्रशृंगिभिश्च उपसर्गोपलोदकैः ॥ ब्राह्मणैःश्वापदैश्चैव पतनैर्वृक्षवैद्युतैः ॥ नखैर्लोहैर्गिरेःपातैर्भत्तेः
पातैर्भृगोस्तथा ॥ खट्वायामंतरिक्षेच चौरचाण्डालतस्तथा॥उदक्याशुनकीशूद्ररजकादिविदूषिकाः॥ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छि
ष्टास्तुयेमृताः ॥ शस्त्रघातैर्मृतायेचास्पर्शस्पृष्टास्तथैवच ॥ तच्चुदुर्मरणंज्ञेयं यच्चजातंविधिंविना ॥ तेनपापेननरकान्भुक्त्वाप्रेतत्वभागिनः॥
नतेषांकारयेद्दाहं सूतकंनोदकक्रियाम्।नविधानंमृताद्यंच नकुर्यादौर्ध्वदेहिकम्।नपिंडदानंकर्त्तव्यं प्रमादाच्चेत्करोतिहि।नोपतिष्ठतितत्सर्वमं
तरिक्षेविनश्यति।अतस्तस्यसुतैःपौत्रैःसपिंडैःशुभमिच्छुभिः। नारायणबलिःकार्य्योलोकगर्हाभियाखग।तथातेषांभवेच्छौचंनान्यथेत्यब्रवी
द्यमः॥कृतेनारायणबलावौर्ध्वदेहिकयोग्यता॥तस्यशुद्धिकरंकर्म तद्भवेन्नतदन्यथा—इति॥(हेमाद्रौषट्त्रिंशन्मते)कृत्वाचान्द्रायणंपूर्वंक्रियाः
कार्य्यायथाविधि॥नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः॥अन्नमिष्टंप्रियंचैव विप्रेदद्यात्सदक्षिणम् ॥पिंडोदकक्रियापश्चाद्वृषोत्सर्गा
दिकंचयत् ॥ एकोद्दिष्टानिकुर्वीत सपिंडीकरणं तथा इति ॥ योऽयमम्बुदकादिमृतानांनारायणबलिरुक्तः सतुक्रोधमदशोकादियोगेन
यैरात्माघातितस्तेषामेवनतुप्रमादतोविदितोवा॥(तदुक्तं तत्रैवबोधायनेन) बुद्धिपूर्वाङ्गहंतॄणां क्रियालोपोविधीयते॥तेषामेवचसंस्कर्तुर्दोष

२पुश्रुत्युदाहृतः इति ॥ (गोब्राह्मणहतानांतुविशेषः षट्त्रिंशन्मते) गोब्राह्मणहतानांच पतितानांतथैवच ॥ ऊर्ध्वंसंवत्सरात्कुर्यात्सर्वमेवौ
र्ध्वदेहिकमिति ॥ (नारायणबलिकालउक्तो भविष्योत्तरे) पूर्णेसंवत्सरेतेषामथकार्य्यंदयालुभिः ॥ एकादशींसमासाद्य शुक्लपक्षस्यवैति
थिम् ॥ (बोधायनसूत्रेपि) अथातोनारायणबलिंव्याख्यास्यामः दक्षिणायने वोत्तरायणेवा अपरपक्षस्य द्वादश्यांक्रियेतपूर्वेद्युः षड्द्वाद
शवा ब्राह्मणान्निमंत्रयेत इति ॥ एतत्पूर्णसांवत्सरिकसपिंडीविषयंज्ञेयम् ॥ (द्वादशेऽह्निकृतेतुव्यवस्था गारुडे) निमित्तंदुर्गतिंकृत्वा यदि
नारायणोबलिः ॥ एकादशाहेकर्त्तव्यो वृषोत्सर्गोपितत्रवै इति ॥ (अथनारायणबलिप्रकारो बृहद्गरुडपुराणे) नारायणबलौसम्यक्ती
र्थेसर्वंप्रकल्पयेत् ॥ गंगायांयमुनायांच नैमिषेपुष्करेपिच ॥ तडागेजलपूर्णेवा ह्रदे वा विमलोदके ॥ वापीकूपगवांगोष्ठे गृहेवाप्रतिमालये॥
कृष्णाग्रेकारयेद्विप्र बलिंनारायणाह्वयम् ॥ विष्णुःस्वर्णमयःकार्यो रुद्रस्ताम्रमयस्तथा ॥ ब्रह्मारौप्यमयस्तद्वद्यमोलोहमयोभवेत् ॥
सीसकंतुभवेत्प्रेतो ह्यथवादर्भकंतथा इति ॥ (प्रतिमाप्रमाणमपितत्रैव) सुवर्णकर्षकोविष्णुर्ब्रह्मारौप्यपलेनतु ॥ रुद्रस्ताम्रैर्दशपलैर्यमो
लोहमयस्तथा ॥ चतुःषष्टिप्रमाणंतु पलंपुरुषसीसकः ॥ अर्द्धंवास्वर्णमानेनप्रतिमाकार्य्यामनोरमा ॥ सुवर्णंसर्वदैवत्यं सर्वदेवात्मको
नलः ॥ सर्वदेवमयोविप्रः सर्वदेवमयोहरिः ॥ (शौनकोपि) पलमानेनवार्द्धेन तदर्द्धेनचशक्तितः ॥ देवतानांहिप्रतिमावित्तशाठ्यविव
र्जित इति । (गारुडे) शन्नोदेवीतिमंत्रेण गोविंदंपश्चिमेन्यसेत् । अग्नआयाहीतिरुद्रमुत्तरएवविन्यसेत् । अग्निमीळेतिमंत्रेण पूर्वेणैवप्रजा
पतिम् । इषेत्वोर्जेतिमंत्रेण दक्षिणेस्थापयेद्यमम् ॥ मध्येमंडलकंकृत्वा स्थाप्योदर्भमयोनर· ॥ ब्रह्माविष्णुस्तथारुद्रो यमःप्रेतश्चपंचमः॥
पृथक्कुंभेततःस्थाप्याः पंचरत्नसमन्विताः ॥ विष्णुंविधिंशिवंधर्मं वेदमंत्रैश्चतर्पयेत् ॥ प्रेतायतर्पणंकार्यं मंत्रैःपौराणवैदिकैः ॥

सर्वौषध्यक्षतैर्मिश्रैर्विष्णुमुद्दिश्यतर्पयेत् ॥ कार्यंपुरुषसूक्तेन मंत्रैर्वावैष्णवैरपि ॥ दक्षिणाभिमुखोभूत्वा प्रेतंविष्णुमिति
स्मरन् ॥ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अक्षयःपुंडरीकाक्षः प्रेतमोक्षप्रदोभव ॥ तर्पणस्यावसानेच वीतरागोविमत्सरः ॥
जितेंद्रियमना भूत्वा शुचिष्मान्धर्मतत्परः ॥ होमंकृत्वाचरेत्पश्चाच्छ्राद्धान्विष्णवादिदैवकान् ॥ प्रथमंविष्णवेदद्या
द्वितीयंश्रीशिवायच ॥ याम्यायसपरिवाराय तृतीयंपिंडमुत्सृजेत् ॥ चतुर्थं सोमराजाय हव्यवाहायपंचमम् ॥ कव्यवाहा
यषष्ठच दद्यात्कालायसप्तमम् ॥ रुद्रायचाष्टमंदद्यान्नवमंपुरुषायच ॥ प्रेतायदशमंदत्त्वा चैकादशंतुविष्णवे ॥ द्वादशंब्रह्मणेदद्या
द्विष्णवेचत्रयोदशम् ॥ चतुर्दशंशिवायैव यमायदशपंचकम् ॥ दद्यात्तत्पुरुषायैव पिंडंषोडशकंखग ॥ ऋचावेदापयेद्धर्मे
कोद्दिष्टेपृथक्पृथक् ॥ आपोदेवामधुमती आदिपिंडेप्रकल्पिता ॥ उपयामगृहीतोसि द्वितीयेर्घनिवेदयेत् ॥ येनापावकचक्षुषा
तृतीयेचप्रकल्पिता ॥ येदेवासश्चतुर्थेतु समुद्रंगच्छपंचमे।अग्निर्ज्योतिस्तथाषष्ठे हिरण्यगर्भश्चसप्तमे। यज्जाग्रतेतिनवमे दशमेयाःफलीति
च॥दद्याच्चविश्वत श्चक्षुःपिंडेचैकादशेततः।भद्रंकर्णेभिरितिच कुर्यात्पिंडविसर्जनम्।पंचश्राद्धानिकुर्वीत देवतानांयथाविधि। शंखेवाताम्र
पात्रेवाअलाभेमृन्मयेपिवा।तिलोदकंसमादायसर्वौषधिसमन्वितम्।जलधारांततोदद्यात्पीठेपीठेपृथक्पृथक्इति(अत्रविशेषस्तुग्रंथांतरात्)
इतिनारायणबलिप्रकारः। (अथसर्पदष्टहतेनागपूजाउक्ता भविष्योत्तरे) प्रमादादिच्छयावापि नागाद्वासर्पतोमृतः। पक्षयोरुभयोर्नागान्पं ॥ ६० ॥
चमीषुप्रपूजयेत्। कुर्य्यात्पिष्टमयींलेख्यां नागप्रतिकृतिंभुवि ॥ अर्चयेत्तांसितैःपुष्पैसुगंधैश्चंदनेनतु ॥ प्रदद्याद्धूपदीपन्तु तंडुलांश्चसितान्
क्षिपेत् ॥ आमपिष्टंतथैवान्नं क्षीरंचविनिवेदयेत्। उपस्थायवदेदेवं मुञ्चमुंचामुकंत्विति। मधुरंतद्दिनेदद्यादेवमब्दंसमाचरेत्।सौवर्णशक्ति

तोनागं ततोदद्याद्द्विजोत्तमः॥गांसवत्सांततोदद्यात्प्रीयतांनागराडिति॥यथाविभागंकुर्वीत कर्माणिप्राक्तनान्यपि॥ नागाद्विमोक्षणार्थंतु प्रो
क्तमप्यधिकंत्विदम्।द्विजान्विमोक्षयित्वातु संप्रीताःसन्तुपन्नगाः।इतिनागपूजा।(अथदुर्मरणनिमित्तप्रायश्चित्तानि दिवोदासीये)चांडाला
दिमृतेविप्रे त्वंतरिक्षमृतेपिवा॥कृच्छ्रातिकृच्छ्रचांद्रस्तु शुद्धिस्तत्रप्रकीर्त्तिता॥ (तत्रैव जाबालिः) शूद्रेणदग्धोयोविप्रो नलभेच्छाश्वतींग
तिम्॥प्रायश्चित्तंप्रकुर्वीत ब्राह्मणःपापशुद्धये॥चांद्रायणंपराकंच प्राजापत्यंविशोधनम्॥(मदनरत्ने) ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छि
ष्टेतथैवच॥अस्पृश्यस्पर्शनेचैव खट्वादिमरणेपिच॥श्वानक्रव्यादसंस्पर्शे कृमिकीटोद्भवेऽपिच॥एतद्दोषानुसारेण प्रायश्चित्तंसमाचरेत् ॥
कृच्छ्रांस्त्रिषट्पंचदशांश्चांद्रायणमथापिवा॥शुद्धंचैतदानींसंपाद्य शवधर्मेणदाहयेत्॥(स्मृतिरत्नावल्याम्) शवंरात्र्युषितंचेत्त्रीन्कृच्छ्रान्कृ
त्वादहेत्सुतः इति ॥प्राजापत्यादिप्रत्याम्नाया उक्ताः ॥ (स्मृत्यर्थसारे) प्राजापत्येष्वशक्तस्तु धेनुंदद्यात्पयस्विनीम्॥ धेनोरभावेनिष्कं
स्यात्तदर्द्धंपादमेववा इति ॥ निष्कश्चत्वारिंशन्माषकइत्यर्थः ॥(पारिजातेषट्त्रिंशन्मते) कृच्छ्रायुतंचगायत्र्या द्वादशब्राह्मणभो
जनम्॥तिलहोमसहस्रंतु सममेतच्चतुष्टयम्॥धेनुनिष्कस्तदर्द्धार्द्धं प्राणायामशतद्वयमिति॥प्रायश्चित्तंसूतकान्तेकार्यम्॥अथदुर्मरणनिमि
त्तदानानि॥(शातातपस्मृतौ) व्याघ्रेणनिहतेप्रेते विप्रकन्यांविवाहयेत्॥सर्पदष्टेनागबलिर्देयः सर्पश्चकांचनः॥चतुर्निष्कमितंहैमं गजंदद्या
द्गजैर्हते ॥ राज्ञाविनिहतेदद्यात्पुरुषंतुहिरण्मयम् ॥ चौरेणनिहतेधेनुं वैरिणानिहतेवृषम् ॥ वृषेणनिहतेदद्याद्यथाशक्त्यातुकाञ्चनम् ॥
शय्यामृतेप्रदातव्या शय्यातूलीसमन्विता॥निष्कमात्रसुवर्णस्य विष्णुनासमधिष्ठिता॥शौचहीनेमृतेचैव द्विनिष्कस्वर्णजंहरिम्॥संस्का
रहीनेचमृते कुमारमुपनाययेत् ॥ निष्कत्रयंस्वर्णमितं दद्यादश्वंहयाहते ॥ शुनाहतेक्षेत्रपालं स्थापयेन्निजशक्तितः ॥ सूकरेणहतेदद्यान्म

शृङ्गिणानिहतेदद्यादृषभंवस्त्रसंयु
क्तिषंदक्षिणान्वितम् ॥कृमिभिश्चमृतेदद्याद्गोधूमान्नश्चखारिका ॥ वृक्षंवृक्षहतेदद्यात्सौवर्णंवस्त्रसयुतम ॥ शृङ्गिणानिहतेदद्यादृषभंवस्त्रसंयु
तम् ॥ शकटेनहतेदद्यादश्वं सोपस्करान्वितम्॥भृगुपातहतेचैव प्रदद्याद्धान्यपर्वतम्॥अग्निना निहतेकार्यमुददानंस्वशक्तितः॥दारुणानि
हतेचैव कर्त्तव्यासदनेसभा ॥ शस्त्रेणनिहतेदद्यान्महिषींदक्षिणान्विताम् ॥ अश्मनानिहतेदद्यात्सवत्सांगांपयस्विनीम्॥विषेणचमृतेदद्या
न्मेदिनींक्षेत्रसंयुताम् ॥ उद्वंधनेनचमृते कपिंकनकनिर्मितम्॥ मृतेजलेनवरुणंहेमं दद्याद्विनिष्कजम् ॥ विषूचिकामृतेस्वादु भोजयेच्चशतं
द्विजान् ॥ घृतधेनुःप्रदातव्या कंठान्नकवलेमृते ॥ कासरोगेणचमृते अष्टकृच्छ्रव्रतंचरेत् ॥ अतीसारमृतेलक्षं गायत्र्याःप्रयतोजपेत्॥शा
किन्यादिग्रहग्रस्ते जपेद्रुद्रंयथोदितम् ॥ विद्युत्पातेननिहते विद्यादानंसमाचरेत् ॥ अंतरिक्षमृतेकार्यं वेदपारायणंतथा ॥ सच्छा
स्त्रपुस्तकंदद्यादस्पृश्यस्पर्शतोमृते ॥ पतितेचमृतेकुर्यात्प्राजापत्यांस्तुषोडश ॥ मृतेचापत्यरहिते कृच्छ्राणांनवतिंचरेत् ॥ एवंकृते
विधानेतु विदध्यादौर्ध्वदैहिकम् ॥ ततःप्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा॥दद्युःपुत्रांश्चपौत्रांश्च आयुरारोग्यसंपदः इति॥अयपंचकादि
मृतविधानम् ॥ (गरुडपुराणे) मृतस्यपंचकेदाहविधिंवच्मिश्रृणुष्वमे॥आदौकृत्वाधनिष्ठार्द्धमेतन्नक्षत्रपंचकम्॥रेवत्यंतंसदादूष्यमशुभं
सर्वदाभवेत्॥दाहस्तत्रनकर्त्तव्यो विषादःसर्वजंतुषु॥नजलंदीयतेतेषु ह्यशुभंसर्व्वदाभवेत्॥पंचकानंतरंसर्व्वं कार्यंकर्त्तव्यमन्यथा॥पुत्राणांगो
त्रिणांतस्य संतापोऽप्युपजायते॥गृहेहानिर्भवत्येव ऋक्षेष्वेषुमृतस्यच॥अथवाऋक्षमध्येच दाहस्तुविधिपूर्वकः॥शवस्यतुसमीपेच क्षेप्तव्या ॥ ६१ ॥
पुत्तलास्ततः ॥ दर्भजास्तुचत्वार ऋक्षमंत्राभिमंत्रिताः ॥ ततोदाहःप्रकर्त्तव्यस्तैश्चपुत्तलकैःसह ॥ सूतकान्तेततःपुत्रैः कार्य्यंशांतिक
पौष्टिकम्॥तिलान्गांचसुवर्णंच तदुद्देशेघृतंददेत् ॥ भोजनोपानहौछत्रं हेममुद्राचवाससी॥दक्षिणादीयतेविप्रे पातकस्यप्रमोचनी इति ॥

(तद्विधिः ब्रह्मपुराणे)कुंभमीनस्थितेचंद्रे मरणंयस्यजायते ॥ नतस्यौर्ध्वंगतिर्दृष्टा संततौनशुभंभवेत्॥नतस्यदाहःकर्त्तव्यो विनाशास्त्रे
षुजंतुषु॥अथवातद्दिनेकार्यो दाहस्तुविधिपूर्वकम्॥धनिष्ठापंचकेजीवो मृतोयदिकथंचन॥ त्रिपुष्करेयाम्यभेवा कुलजान्मारयेद्ध्रुवम् ॥
तत्रानिष्टविनाशार्थं विधानंसमुदीर्यते॥दर्भाणांप्रतिमाःकार्याः पंचोर्णा सूत्रवेष्टिताः॥यवपिष्टेनानुलिप्तास्ताभिः सहशवंदहेत्॥प्रेतवाहः
प्रेतसखः प्रेतपःप्रेतभूमिपः॥प्रेतहर्त्तापंचमस्तु नामान्येतानिचक्रमात्॥(अथप्रतिमागंधपुष्पैःपूजयित्वा)॥शिरसिदक्षिणेकुक्षौ वामेनाभौ
चतुर्थकम्॥पंचमंपादयोर्मध्ये तेषुदद्याद्घृताहुतीः ॥ सूतकान्तेततःकुर्याद्विधानपंचकंतथा ॥ अन्यथानगतिस्तस्य प्रेतपुत्रसुशोभनम् ॥
स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनंततः॥अभिध्यानंविवर्णंतु देवतानांतथाशृणु॥वसवोवरुणश्चैव अजैकपात्तृतीयकम्॥अहिर्बुध्न्यश्चतुर्थं
च पूषणंपंचमंतथा ॥ यमायधर्मराजाय मृत्यवेचान्तकायच ॥ वैवस्वतायकालाय सर्वभूतक्षयायच ॥ औदुंबरायदध्नाय नीलायपरमे
ष्ठिने ॥ वृकोदरायचित्राय चित्रगुप्तायवैनमः॥अघोररुद्रमंत्रैश्च निर्वापयेत्क्रमेणतु॥विधिनाश्रपणंकृत्वा एकैकामाहुतिंहुनेत्॥कुंडादीशान
दिग्भागे स्थंडिलंहस्तमात्रकम् ॥ तत्रवस्त्रंसमास्तीर्य स्थापयेद्वस्वादिपंचकान ॥ चतुर्दशयमांश्चैव अघोरंस्थापयेत्पुनः॥अव्रणाःकलशाः
स्थाप्या दिक्षुचत्वारिविन्यसेत् ॥ कलशःपंचमोमध्ये स्थापयेद्विधिपूर्वकम्॥उच्चार्यवरुणंमंत्रं पूरयेत्तीर्थवारिणा॥मध्येसर्वौषधीः क्षिप्त्वा
मृद्दूर्वापल्लवस्तथा॥हिरण्यफलसंयुक्तं वस्त्रेणवेष्टयेत्ततः॥कलशोपरिन्यसेन्मूर्तिं पंचस्वर्णमयीभवेत्॥प्रतिष्ठापूजनंकार्यं पंचसूक्तंजपेत्ततः॥
श्रपयित्वाचरुंविद्वान्दद्यादग्निमुखंततः॥आघारावाज्यभागौच ततोवह्निंसमर्चयेत्॥समित्तिलैश्चचरुभिर्होमंकुर्यात्पृथक्पृथक् ॥ अघोरेणै
व मंत्रेण ततोहोमंचरेत्क्रमात् ॥ पूर्णाहुतिंचविधिवत्पूजयेद्देवतांततः॥इत्थंसमाप्यहवनं धेनुंदद्यात्पयस्विनीम्॥सहिरण्यंतिलान् दत्त्वा

मद्दिषींसप्तधान्यकम्॥सहिरण्यंघृतंदद्यात् कृष्णवस्त्रंचदक्षिणाम् ॥ अभिषेकंततःकुर्यात्कलशोदेनयत्नतः ॥ कलशैःस्नपनंतस्य कुर्या
दाज्यावलोकनम्॥वस्त्रंचैवपरित्यज्य रुद्रभक्तिविशेषतः॥ब्राह्मणान्भोजयेत्पश्चात् पायसंमधुसर्पिषा ॥ एवंयःकुरुतेपुत्रः शुभंतस्यप्र
जायते॥विधानंयोनकुर्वीत विघ्नस्तस्यभवेत्सदा॥तस्मात्सर्वप्रयत्नेन शांतिंकुर्याद्यथाविधि॥कृत्वातुगोत्रजाःसर्वे सुखिनःस्युर्निरामयाः॥
भवंतिनात्रसंदेहो नात्रकार्याविचारणा॥इतिब्रह्मपुराणोक्तंपंचकविधानम्॥(मदनरत्ने गार्ग्यः) यदिभद्रातिथीनांस्याद्भानुभौमशनैश्चराः ॥
त्रिपादर्क्षैश्चसंयोगे द्वयोर्योगेद्विपुष्करः॥द्वित्रिपुष्करयोगेतु मृतिमृत्यन्तरावहा॥दहनेमरणेचैव त्रिगुणंस्यात्त्रिपुष्करे ॥ खननेप्येवमेवस्या
देतद्दोषोपशांतये॥तिलपिष्टैर्यवैर्वापि शरीरंकारयेत्ततः॥शूर्पेनिधायालंकृत्य दाहयेत्पैतृकोपरि ॥ (तदाहेमंत्रमाह बोधायनः)अस्मात्त्व
मितिमंत्रेण तिलपिष्टंप्रदाहयेत्।द्वित्रिपुष्करयोर्दोषैस्त्रिभिःकृच्छ्रैर्व्यपोहति इति।इतिदुर्मरणप्रायश्चित्तादीनि।अथ सांवत्सरिकंश्राद्धंनिरूप्य
ते॥तत्रतावत्क्षयाहनिर्णयः॥(ब्रह्मपुराणे)प्रतिसंवत्सरंकार्य्यं मातापित्रोर्मृतेऽहनि।पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्यचैवहि इति॥अत्रमृ
ताहशब्देनमरणाहर्वर्तिनीतिथिर्विवक्षिता।संवत्सरान्तेमुख्यमृताहस्याऽसंभवात्। अहर्ग्रहणंरात्रेरप्युपलक्षणार्थं तेनरात्रिमृतस्यापिसातिथि
र्लभ्यते।अतःसंवत्सरान्तेमृताहसंबंधिन्यांतिथौसांवत्सरिकंकर्त्तव्यमित्यर्थः।(तथाच हेमाद्रौवसिष्ठः)पारणेमरणेनॄणां तिथिस्तात्कालिकीस्मृ
ता।पित्र्येऽस्तमयवेलायां स्पृष्टापूर्णानिगद्यतेइति॥तात्कालिकी यस्मिन्कालेउपवासादिव्रतपारणं मरणं वातत्कालवर्त्तिन्येवतयोस्तिथिः॥
नपुनस्तत्कालवर्त्तिनी इत्यर्थः॥अथवात्रमृताहशब्देनोपलक्षणत्रयविशिष्टमहोरात्रमभिप्रेतम्॥(तदाह तत्रैवव्यासः) मासपक्षतिथिस्पृ
ष्टे योयस्मिन्म्रियतेऽहनि ॥ प्रात्यब्दन्तत्तथाभूतं क्षयाहंतस्यतंविदुरिति॥तथाभूतमित्युपलक्षणत्रयोपेतमित्यर्थः॥एकोद्दिष्टादिश्राद्धेषु

मध्यह्नादिव्यापिनीग्राह्या ॥(तथाच हेमाद्रौवृद्धगौतमः)मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् ॥ अपराह्णव्यापिनीया पार्वणेसा
तिथिर्भवेत् ॥ मध्याह्नव्यापिनीयातु तिथिःपूर्व्वांपरापिवा॥तस्यांपितृभ्योदातव्यं ह्रासवृद्धीनकारणम्–इति॥ (क्षयाहप्रशंसामाह हेमाद्रौ
जाबालिः) उपरागसहस्राणि अमावास्यायुतानिच ॥ अक्षयंतुभवेच्छ्राद्धं यस्तुदद्यान्मृतेऽहनि॥(अकरणेदोषमाह तत्रैवकार्ष्णाजिनिः)
ऊषरेतुयथाक्षिप्तं बीजंनप्रतिरोहति ॥ तथाचतद्भवेत्तेषां यन्नदत्तंमृतेऽहनि–तेनमृताहे अवश्यंदातव्यमित्यभिप्रायः ॥ अत्रैकोद्दिष्टपा
र्वणयोर्विचारः ॥ (तथाचहेमाद्रौब्रह्माण्डपुराणे) वत्सरेकेचिदेकस्मै दानंत्रिभ्यः परेजगुः॥अतःस्मृतिविरोधेन निर्णयंश्रोतुमर्हथ–इति॥
एकस्मैदानमित्यनेन एकोद्दिष्टवत् सांवत्सरिकश्राद्धप्रयोगउक्तः॥त्रिभ्य इत्यनेनपार्वणवदित्यर्थः ॥तावदेकोद्दिष्ट विधायकानिवाक्यानि
लिख्यंते ॥ (तत्राह यमः) सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरंसुतः ॥ एकोद्दिष्टंप्रकुर्वीत पित्रोरन्यत्रपार्वणम्॥ (हेमाद्रौव्यासोपि)प्रतिसंव
त्सरंयत्र मातापित्रोःप्रदीयते ॥ अदैवंभोजयेच्छ्राद्धं पिंडमेकंचनिर्वपेत्–इति॥यमेनत्वेकोद्दिष्टं सांवत्सरिकं विधायतस्याकरणेदोषउक्तो
हेमाद्रौ ॥ एकोद्दिष्टंपरित्यज्य पार्व्वणंकुरुतेयदि ॥ अकृतंतद्विजानीयात्समातृपितृघातकः–इति ॥ अधुनापार्वणविधायकानिवचनानि
लिख्यंते॥(तत्र हेमाद्रिमाधवयोर्जातूकर्ण्यः)पितुःपितृगणस्थस्य कुर्य्यात्पार्वणवत्सुतः॥प्रत्यब्दंप्रतिमासंच विधिर्ज्ञेयःसनातनः–इति ॥
पितृगणस्थःकृतसपिंडीकरणःसनातनःआवश्यकइत्यर्थः॥(तत्रैवपुलस्त्योपि) एकोद्दिष्टंतुकर्त्तव्यं यावत्पित्रोःसपिंडनम्॥ततःसपिंडनादू
र्ध्वमेकोद्दिष्टंनिवर्त्तते ॥ (भविष्यपुराणेपि) सपिंडीकरणंकृत्वा कुर्यात्पार्वणवत्सदा॥प्रतिसंवत्सरे विद्वानित्येवं विष्णुरब्रवीत् इति॥ अत्र
केचित्पार्वणैकोद्दिष्टयोरन्यथाव्यवस्थामाहुः।(तत्र हेमाद्रिमाधवयोर्जमदग्निः)आपाद्यःसहपिंडत्वमौरसोविधिवत्सुतः।कुर्वीतदर्शवच्छ्राद्धं

मातापित्रोःक्षयेऽहनि ॥ पुत्राणामौरसःपुत्रः पुत्रमात्रास्तथाऽपरे ॥ पितुःपितृगणस्थस्य नित्यंकुर्यात्सपार्वणमिति ॥ ननुदर्शातिदेशात् मातामहानामपिश्राद्धंप्रसज्येत॥ नायदोषः॥प्रत्याब्दिकेषट्पिंडानांपर्युदस्तत्वात्॥(तथाच कात्यायनः)कर्षूसमन्वितंमुक्त्वा तथाद्यंश्राद्धषोडशम्।प्रत्याब्दिकंचशेषेषु पिंडाःस्युःषडितिस्थितिः-इति।कर्षूसमन्वितं सपिंडीकरणम् अनेन अर्थात् कर्षूसमन्वितादिषुमातामहश्राद्धंनविद्यत इति चोक्तं भवति॥(हेमाद्रौजाबालिः) औरसक्षेत्रजौपुत्रौ विधिनापार्वणेनतु॥प्रत्यब्दमितरेकुर्युरेकोद्दिष्टंसुतादश-इति॥तदयुक्तम् ॥ एकोद्दिष्टंतुकर्त्तव्यमौरसेनमृतेऽहनि-इति माधवीयपैठिनसिवचनविरोधात् ॥ जमदग्न्यादिवाक्यंतु क्षयाहव्यतिरिक्तप्रत्यब्दकर्त्तव्याक्षय्यतृतीयादिविषयत्वेनाप्युपपद्यते-इति ॥ केचित् अन्यथाव्यवस्थामाहुः ॥ (तत्र हेमाद्रिसुमंतुस्मृतिभविष्यपुराणेषु) ॥ कुर्याच्चविधिवच्छ्राद्धं पार्वणंयोग्निमान्द्विजः॥ पित्रोरनग्निमान्धीर एकोद्दिष्टंमृतेऽहनि इति॥तदयुक्तम् ॥ बह्वग्नयस्तुयेविप्रा येचैकाग्नयएवच॥ तेषांसपिंडनादूर्ध्वमेकोद्दिष्टंनपार्वणमिति-माधवीयेमनुनासाग्निकस्यापि एकोद्दिष्टविधानात्॥तत्रैकोद्दिष्टपार्वणयोर्विकल्पस्तथापियेषां परंपरयापार्वणमेवक्रियतेतैस्तदेवकर्त्तव्यंयेषामेकोद्दिष्टमेवक्रियतेतैरेकोद्दिष्टमेवेति ॥ येनास्यपितरोयाता येनयाताःपितामहाः॥तेनयायात्सतांमार्गं तत्रगच्छन्नदुष्यति-इतिमनुवचनात् ॥ तेननिरग्निकौरसक्षेत्रजपुत्रिकापुत्रैर्मृतेऽहनिएकोद्दिष्टंकर्त्तव्यम्॥साग्निकैस्तुपार्वणमेव अन्यैस्तुदत्तकादिभिर्दशपुत्रपुत्रैरेकोद्दिष्टमेवेतिस्थितम् ॥ (उक्तंच हेमाद्रौभविष्यपुराणे) निरग्नेरौरसस्योक्तमेकोद्दिष्टंमृतेऽहनि॥प्रत्यब्दंपार्वणं साग्नेरन्येषान्तुनपार्वणमिति ॥ अमावास्यायांप्रेतपक्षेचमृतानांसर्वेषांपार्वणमेवनियतम् ॥(तदाह हेमाद्रिमाधवयोःशंखः) ॥ अमायांतुक्षयोयस्य प्रेतपक्षेथवापुनः॥पार्वणंतस्यकर्त्तव्यं नैकोद्दिष्टंकदाचनइति॥प्रेतपक्षोऽश्वयुक्कृष्णपक्ष इत्यर्थः ॥ (तत्रैव) प्रेतपक्षेप्रमीतस्यपि

तुःकुर्वीतपार्वणम् ॥ पितृव्यभ्रातृमातॄणामेकोद्दिष्टंनपार्वणम्–इति ॥ इत्थंपार्वणैकोद्दिष्टेअभिहितेयतस्तुनकाप्येकोद्दिष्टम् ॥ किन्तुसर्वत्र पार्वणमेव (तथा माधवेप्रचेताः) दण्डग्रहणमात्रेणनैवप्रेतोभवेद्यतिः॥अतःसुतेनकर्त्तव्यं पार्वणंतस्यसर्वदा॥(?)(हेमाद्रौशातातपः) एकोद्दिष्टंजलंपिंडमाशौचंप्रेतसत्क्रियाम् ॥ नकुर्यात्पार्वणादन्यद्ब्रह्मीभूताय भिक्षवे इति ॥ (मातृश्राद्धेविशेषमाह कात्यायनः) प्रत्यब्दंयोयथा कुर्यात्पुत्रःपित्रेसदाद्विजः ॥ तथैवमातुःकर्त्तव्यं पार्वणमन्यदेववा इति ॥ अन्यदेकोद्दिष्टंयत्तुतेनैवोक्तम् ॥ पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैवहीति ॥ एतत्पितृव्यादिसमभिव्यवहारान्मातृसपत्नीपरमितिवेदितव्यम् ॥ (अपुत्राणांसांवत्सरिकश्राद्धमाहाऽऽपस्तंबः) अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषाश्चये ॥ तेषामपिचदेयंस्यादेकोद्दिष्टंनपार्वणम् ॥ मित्रबंधुसपिंडेभ्यःस्त्रीकुमारीभ्यएवच ॥ दद्याद्वैमासिकंश्राद्धंसावत्सरमतोन्यथा॥ (प्रचेताः)सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते ॥ अपुत्राणांचसर्वेषामपत्नीनातथैवच–इति ॥ अपत्नीनांअकृतविवाहानाम् ॥ (हेमाद्रावत्रिः)भ्रात्रेभगिन्यैपुत्राय स्वामिनेमातुलायच ॥ पितृव्यगुरवेश्राद्धमेकोद्दिष्टंनपार्वणम् ॥ (तत्रैव जातूकर्ण्यः) पितृव्यभ्रातृमातॄणामपुत्राणांतथैवच ॥ मातामहस्यपुत्रस्य श्राद्धादिपितृवद्भवेदिति ॥ (एकोद्दिष्टलक्षणमाह कात्यायनः) अथैकोद्दिष्टमेकंपवित्रमेकोऽर्घ्यएकंपिंडंनावाहनंनाग्नौकरणंनात्रविश्वेदेवाः स्वदितमितितृप्तिप्रश्नःसुस्वदितमित्यनुज्ञानमुपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामितिविसर्गे अभिरताःस्मेत्यपरेइति ॥ तच्चैकोद्दिष्टंत्रिविधंनवंनवमिश्रंपुराणंचेति॥अत्रप्रथमाहाद्येकादशाहांतविषयंनवश्राद्धम् ॥ नवश्राद्धानामुपरिकर्त्तव्यंमासिकंनवमिश्रम् ॥ मासिकानामुपरिकर्त्तव्यंप्रत्याब्दिकादिचपुराणम् इति माधवप्रभृतयः ॥ एतच्छ्राद्धंसूतिकादिना यकालातिक्रमेत्वाशौचागमनानन्तरकालएवकार्यम् ॥ (तथाच ऋष्यशृङ्गः) देयेपितॄणांश्राद्धेतु आशौचंजायतेतदा ॥

आशौचेतुव्यतिक्रान्ते तेभ्यःश्राद्धंप्रदीयते इति ॥ यत्त्वत्रिवचनम् ॥ तदहश्चेत्प्रदुष्येतकेनचित्सूतकादिना ॥ सूतकानन्तरंकुर्यात्पुनस्तदहरे
वव-इति ॥ सूतकानन्तरकालेवाअन्तरेवामासितत्पक्षेतत्तिथौवेतिपक्षद्वयमुपन्यस्तम् ॥ तत्राद्यपक्षेविरोधएवनास्ति पुनस्तदहरेववेत्ययं
पक्षः सूतकव्यतिरिक्तनिमित्तान्तरेणविघ्नेसमुत्पन्नेप्रतिमासंक्षयाहेविहितैकोद्दिष्टमासिकश्राद्धविषयइतिऋष्यशृंगवचनाविरोधायव्यवस्था
प्यते ॥ (अतएव देवलः) एकोद्दिष्टेतुसंप्राप्ते यदिविघ्नःप्रजायते । अन्यस्मिंस्तत्तिथौतस्मिन् श्राद्धंकुर्यात्प्रयत्नतः इति । अन्यस्मिन्नन्तरे
मासितत्तिथौमृततिथौयस्मिन्शुक्लेकृष्णेवामृतस्तस्मिन्पक्षेश्राद्धंविघ्नवशात्कुर्यादित्यर्थः ॥ आशौचनिमित्तकविघ्नेतुमासिश्राद्धमपिसूत
कानन्तरमेवऋष्यशृङ्गवचनबलादनुष्ठेयम । एतत् ऋष्यशृंगवचनंसूतकाशौचविषयम् । निमित्तान्तरतस्तदहर्विघाते।एकोद्दिष्टेतुसंप्राप्ते
यदिविघ्नःप्रजायते ॥ इत्यादिस्मृत्यन्तरवचनमिति ॥ यत्तु व्यासेनोक्तम् ॥ श्राद्धविघ्नेसमुत्पन्ने अन्तरामृतसूतके ॥ अमायांतुप्रकुर्वीत
शुद्धावेकेमनीषिणः-इति ।अन्तराप्रयोगमध्येपाकोपक्रमात्प्राक्मृतकेसूतकेवाजातेअमावास्यायांशुद्धौशुद्ध्यनन्तरंवाश्राद्धंप्रकुर्वीतइति।
एतदनुमासिकसांवत्सरिकश्राद्धविषयम् (अतएवोक्तं षट्त्रिंशन्मते) ॥ मासिकेद्धेतुसंप्राप्ते अन्तरामृतसूतके ॥ वदन्तिशुद्धौतत्कार्यं
दर्शेवापिविचक्षणाः-इति ॥ दर्शग्रहणंशुक्लकृष्णैकादश्योरुपलक्षणार्थम् ॥ (अतएव मरीचिः) श्राद्धविघ्नेसमुत्पन्ने अविज्ञातेमृतेऽहनि ॥
एकादश्यान्तुकर्त्तव्यं कृष्णपक्षेविशेषतः। इति कृष्णपक्षे या एकादशीतस्यां विशेषतः कर्त्तव्यमितियोजना।पितृकार्ये कृष्णपक्षस्यैव विशे
षतोग्राह्यत्वात् कृष्णैकादशीतोपि अमावास्यामुख्यत्वं पितृकार्येदंडापूपन्यायसिद्धम् एतदुक्तं भवति आशौचसमनन्तरकालोमुख्यकाल
सन्निकृष्टत्वाच्छ्रेष्ठतमः दर्शकालस्तुमुख्यकालप्रत्यासत्त्यभावात ततोजघन्यः-इति। (अतएव ऋष्यशृङ्गः)शुचीभूतेनदातव्यं यातिथिः

प्रतिपद्यते॥सातिथिस्तस्यकर्त्तव्या नचान्यावैकदाचन ॥इतिशुचिनातावच्छ्राद्धंकर्त्तव्यंतत्राशौचवशान्मुख्यकालेशुद्ध्यभावे शुद्ध्यनन्त
रंयातिथिः प्रतिपद्यते लभ्यते सातिथिस्तस्य कर्मणोऽङ्गत्वेनस्वीकर्त्तव्या आशौचाद्यनुपघातेतुमुख्यकालोनालस्यादिनाऽपिक्रमणीयः॥
तदाह सएव तिथिच्छेदानकर्त्तव्यो विनाऽऽशौचंयदृच्छया पिंडंश्राद्धंचदातव्यं विच्छित्तिंनैवकारयेत् ॥ इति ॥ श्राद्धशब्देनान्नब्राह्मण
तर्पणमात्रंविवक्षितंपिंडदानस्य पृथगुपात्तत्वात्॥विच्छित्तिंनैवकारयेदितिब्राह्मणकर्मकर्त्तुमसमर्थश्चेत्पिंडप्रदानमात्रमपिकुर्यात्॥सर्व्वथा
पित्रर्चनस्यविच्छेदंनकुर्यादित्यर्थः॥अतएवनिगमः आहिताग्नेःपित्रर्चनंपिंडैरेव ब्राह्मणानपिवाभोजयेत् इति ॥ अत्रव्यवस्थितो विकल्पः
सतिसामर्थ्यें ब्राह्मणतर्पणंपिंडप्रदानंचकुर्यात् तत्राऽसामर्थ्येंपिंडप्रदानमात्रमिति॥(यत्तु हारीतेन) श्राद्धविघ्ने समुत्पन्नेअमावास्यादिष्वा
मश्राद्धंविहितम्॥श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्त्तितम्॥अमावास्यादिनियतं माससंवत्सरादृते इति॥मासं मासिकम्॥सांवत्सरंसांव
त्सरिकम्॥तद्भार्यारजोदर्शनकृतविघ्नविषयम् (तथाऽऽहोशनाः) अपत्नीकःप्रवासीच यस्यभार्यारजस्वला ॥ सिद्धान्ननप्रकुर्व्वीत आ
मन्तस्यविधीयते इति।यस्ययजमानस्यभार्यांऋतुमतीतत्रपाककर्त्रभावेनित्यनैमित्तिकश्राद्धेषुमासिकसांवत्सरिकव्यतिरिक्तेषुयजमानआ
मश्राद्धाधिकारी भवतीत्यर्थः॥(कात्यायनोपि)आपद्यनग्नौतीर्थेच प्रवासेपुत्रजन्मनि॥आमश्राद्धंप्रकुर्वीत यस्यभार्यारजस्वला ॥(व्या
घ्रपादोऽपि) आर्त्तवेदेशकालानां विप्लुवेसमुपस्थिते ॥ आमश्राद्धंद्विजैःकार्यं शूद्रेणतुसदैवहि इति ॥ नचकात्यायनव्याघ्रपाद
वचनपर्यालोचनयामासिकप्रत्याब्दिकयोरप्यामश्राद्धंप्राप्नोतीतिमन्तव्यम्॥'माससंवत्सरादृते'इतिहारीतवचनविशेषेणामश्राद्धस्य तद्व्य
तिरिक्तविषयत्वावगमात्॥(अतएव मरीचिः) अनग्निकःप्रवासीच यस्यभार्यारजस्वला ॥ आमश्राद्धंद्विजःकुर्यान्नतत्कुर्यान्मृतेऽहनि॥

इति॥तदामश्राद्धंमृतेऽहनिनकुर्यात् किन्तुपक्वान्नेनैवकुर्यादित्यर्थः॥(लौगाक्षिरपि) पुष्पवत्स्वपिदारेषु विदेशस्थोप्यनग्निकः ॥ अन्नेनैवा
ब्दिकंकुर्याद्धेम्नावामेनवाक्वचित् इति(यत्तु स्मृत्यन्तरे) भार्यायांरजस्वलायांमृतेऽहनिश्राद्धनिषेधः॥मृतेऽहनितुसंप्राप्ते यस्यभार्यारजस्व
ला ॥ श्राद्धंतदानकर्त्तव्यं कर्त्तव्यंपंचमेऽहनीतितस्यायंविषयः अपुत्रायाः पत्न्याएवपत्युर्मृताहश्राद्धेऽधिकाराद्यदास्वयमेवरजस्वलास्या
त्तदामृतेऽहनिश्राद्धंनकर्त्तव्यं किन्तुपंचमेऽहनीति ॥ (तथाच गौतमः) अपुत्रातुयस्यभार्या संप्राप्तेभर्तुराब्दिके ॥ रजस्वलाभवेत्सातु कु
र्यात्तत्पंचमेऽहनि इति॥(प्रभासखंडेऽपि)शुद्धासातुचतुर्थेह्नि स्नानान्नारीरजस्वला॥दैवेकर्मणिपित्र्येच पंचमेऽहनिशुध्यति इति॥अन्येतु-
श्राद्धीयेऽहनिसंप्राप्ते यस्यभार्यारजस्वला॥श्राद्धंतत्रनकर्त्तव्यं कर्तव्यंपंचमेऽहनि।इतिश्लोकगौतमवचनमन्यथापठित्वाश्राद्धादौकर्म्मणिभा
र्ययासहैवाधिकारश्रवणात्तस्यांरजोदर्शनदूषितायामधिकारनिवृत्तेर्मुख्यकालमतिक्रम्यपंचमेऽहनिश्राद्धंकर्त्तव्यमितिमन्यंते नन्वस्मिन्पा
ठेऽमावास्यादिश्राद्धस्यापिपंचमेऽहन्युत्कर्षःप्राप्नोति।मैवंश्राद्धविघ्नेद्विजातीनामिति हारीतवचनेनामावास्यादिष्वामस्यान्नकार्ये सोमकार्येपू
तिकवद्विहितत्वात्।श्राद्धीयेऽहनीत्यस्यवचनस्यमृताहव्यतिरिक्तविषयत्वेनसार्थकत्वमस्त्विति चेत् भवेदेतदेवं यदि विषयान्तरंवक्तुंशक्ये
तनत्वेतदस्तिमृताहविषयन्तु'मृतेहनितुसंप्राप्ते'इतिस्मृत्यन्तरवचनादेवावगम्यते तस्मादेकभार्येणमृताहश्राद्धंरजोदर्शनरूपविघ्नोपरमकाल
एवकर्त्तव्यं भार्यान्तरयुक्तेनत्वधिकारानपगमान्मुख्यएव कालेकर्त्तव्यमिति यदत्रयुक्तं तद्ग्राह्यमितिपराशरमाधवीयाव्यवस्था ॥ एवमेव
हेमाद्रिमदनपारिजातयोः ॥ अथ क्षयाहाऽपरिज्ञानेसांवत्सरिकश्राद्धकालाः ॥ (तत्र हेमाद्रौबृहस्पतिः)नज्ञायतेमृताहश्चेत्प्रमीतेप्रोषिते
सति ॥ मासश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यान्मृतेऽहनि ॥ इति यस्यप्रोषितस्याऽप्रोषितस्यवामृतस्यतिथिर्नज्ञायतेतस्यतन्मासामावास्यायां

सांवत्सरिकंकार्यमित्यर्थः ॥ (अस्मिन्नेवविषये एकादश्यांश्राद्धमाहमरीचिः) श्राद्धविघ्नेसमुत्पन्ने अविज्ञातेमृतेऽहनि।एकादश्यान्तुकर्त्तव्यं
कृष्णपक्षेविशेषत इति॥ यस्य तुमृताहः परिज्ञायतेमासस्तुनज्ञायते तस्यमार्गशीर्षे माघेवातस्मिन्नहनिश्राद्धंकर्त्तव्यम् ॥ (तथाच बृहस्प
तिः) यदामासोनविज्ञातो विज्ञातंदिनमेवतु।तदामार्गशिरेमासिमाघेवातद्दिनंभवेत्-इति।यदातुप्रोषितमृतस्य दिनमासावुभावप्यविज्ञातौ
स्यातां तदातत्प्रस्थानकालिकयोर्दिनमासयोस्तत्सांवत्सरिकंकार्यम् । (तदाह बृहस्पतिः) दिनमासौनविज्ञातौमरणस्ययदापुनः।प्रस्थान
दिनमासौतु ग्राह्यौपूर्वोक्तयादिशा इति । प्रस्थानतिथिमासयोरुभयोरप्यज्ञानेतुतन्मरणश्रवणकालिकयोस्तिथिमासयोःकुर्यात्।(तदाहहे
माद्रौप्रचेताः) अविज्ञातमृते अमावास्यायांश्रवणदिवसेवा इतिश्रवणदिनसेमरणवार्त्ताकर्णनतिथौ इत्यर्थः इतिसांवत्सरिककाल
निरूपणम् ॥ (अथसंघातमरणेक्रममाह ऋष्यशृङ्गः) भवेद्यदिसपिंडानां युगपन्मरणंतथा।संबंधासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत्।
इति ॥ (अत्र माधवाचार्यः) पत्न्यादिसपिंडेषुसंबंधासत्तिरेवंद्रष्टव्या ॥ पतिपत्न्योः संबंधःप्रत्यासन्नः एकप्रतियोगिकत्वादव्यवधाना
च्च पतित्वंपत्नीमात्रनिरूप्यं पत्नीत्वमपिपतिमात्रनिरूप्यमित्येकप्रतियोगिकत्वमतएवाप्यवहिततत्वञ्चतत्संबंधस्य ॥ पुत्रस्यतु मातापितृ
द्वयनिरूप्यत्वेनविलम्बितप्रतिपत्तेर्विप्रकृष्टः संबंधः।भ्रातुस्तुपितृजत्वव्यवधानेनततोऽपिविप्रकृष्टः एवमन्यत्रोहनीयम्इत्यर्थः।(पत्न्यादी
नांपित्रोश्चसंघातमरणे माधवीयेऋष्यशृङ्गः) पत्न्याःपुत्रस्यतत्पुत्रभ्रात्रोस्तत्तनयस्यच॥ स्नुषाश्वश्र्वोश्चपित्रोश्च संघातमरणंयदि॥अर्वाग
ब्दान्मातृपितृपूर्वसापिंडचमाचरेदिति ॥ तत्पुत्रः पुत्रपुत्रः ॥ तत्तनयो भ्रातृतनयः इत्यर्थः ॥ (यत्तु देवलेनोक्तम्) पितरौप्रमृतौयस्य देह
स्तस्याशुचिर्भवेत् ॥ नदैवंनापिपित्र्यंच यावत्पूर्णोनवत्सरः ॥ इतितत्पूर्वोक्तपत्न्यादिव्यतिरिक्तसपिंडविषयम् ॥ (अतएव लौगाक्षिः)

अन्येषांप्रेतकार्याणि महागुरुनिपातने ॥ कुर्यात्संवत्सरादर्वाक्श्राद्धमेकंतुवर्जयेत् ॥ इतिप्रेतकार्याणिदहनादीन्याद्यश्राद्धान्तानिविवक्षि
तानि ॥ आद्यंश्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि ॥ इतिविशेषस्मरणात् ॥ अनेनपितृमातृमरणेवत्सरमध्येपत्न्यादीनांदाहादिप्रेतकार्यं
श्राद्धंच कर्त्तव्यमेव ॥ पत्न्यादिभिन्नसपिंडानान्तु दाहाऽऽद्यश्राद्धपर्यन्तमेवकार्यंनतेषांप्रेतश्राद्धमपि इतिव्यवस्थानिष्कर्षः ॥(पित्रोः संघा
तमरणे माधवे देवलः) पित्रोरुपरमेपुत्राः क्रियांकुर्युर्द्वयोरपि ॥ अनुवृत्तौचनान्येषां संघातमरणेऽपिवा इति॥अनुगमनेनपित्रोःसंघातमरणे
मातुरनुगमनेनदिनान्तरमरणेपितत्तद्द्वादशाहेक्रियांकुर्युः ।अन्येषांपित्रोश्चसंघातमरणे यथाकालंनकुर्युः किंतुत्रिपक्षएव।(तदाहलौगाक्षिः)
पत्नीपुत्रस्तथापौत्रो भ्रातातत्पुत्रकाअपि ॥ पितरौचयदैकस्मिन् म्रियेरन्वासरेतदा ॥ आद्यमेकादशेकुर्यात्रिपक्षेतुसपिंडनम् इति ॥
पित्रोरनुगमनं विना सघातमरणे मातुरनुगमनंविना दिनान्तरमरणेपि मातुस्त्रिपक्षेसपिंडनं कुर्यात् ॥(तथाच देवलः)एकाहमरणेपित्रोर
न्यस्यान्यदिनेमृतौ ॥ सपिंडनंत्रिपक्षेस्यादनुयानमृतिं विना इति।अथश्राद्धसंपातेनिर्णयः । तत्रमातृपितृश्राद्धद्वयस्यदैवात्कालैक्येपिपितृ
श्राद्धंपूर्व्वंकुर्यात् ॥ तदाह (माधवीयेकार्ष्णाजिनिः) पित्रोःश्राद्धेसमंप्राप्ते नवेपर्युषितेपिवा ॥ पितृपूर्व्वंसुतःकुर्यादन्यत्रासत्तियोगतःइति॥
पर्युषितेचिरन्तने अन्यत्रमातृपितृव्यतिरिक्तविषयेसंबंधासत्तियोगतः कुर्यादित्यर्थः । (गृहदाहादिनायुगपन्मरणे (भृगुः)एककालेगतासू
नां बहूनामथवाद्वयोः ॥ तंत्रेणश्रपणंकृत्वा कुर्याच्छ्राद्धंपृथक्पृथक् ॥ पूर्वकस्यमृतस्यादौ द्वितीयस्यजघन्यतः ॥ तृतीयस्यततःकुर्यात्स
न्निपातेष्वयंक्रमः ॥ इति पूर्वकस्यमुख्यस्यपितुः द्वितीयस्यततोजघन्यायाजनन्याः ॥ तृतीयस्यततोऽपिजघन्यायाःसापत्नमातुरित्यर्थः॥
(गारुडेपि)एकेनैवतुपाकेन श्राद्धानिकुरुतेऽन्वहि। विकिरंत्वेकतःकुर्यात्पिंडान्दद्यात्पृथक्पृथक्। (पुलस्त्योपि)महालयेगयाश्राद्धेगतासूनां

क्षयेऽहनि ॥ तंत्रेणश्रपणंकृत्वा श्राद्धंकुर्यात्पृथक्पृथक् इति ॥ इदंचपृथक्पाकाशक्ताविति कमलाकरः ॥ (पृथ्वीचंद्रोदये आश्वलायन स्मृतिः) एकत्रैवदिनेश्राद्धं द्वयंप्राप्तंयदातदा ॥ चरेदेवपुरावर्षात्पितुर्मातुश्चयत्सुतः ॥ एकस्मिन्यःकरोत्यह्नि द्वयोः श्राद्धंयदाद्विजः ॥ तदापूर्वंमृतस्यादौ कृत्वास्नात्वायथाविधि ॥ पश्चात्पश्चान्मृतस्यैव पृथक्पाकैःसमाचरेत्॥नैकस्मिन्दिवसेश्राद्धं त्रयाणांकुत्रचिद्द्विजः। एकःकुर्यात्तथाप्राप्ते अन्योभ्रातासमाचरेत् ॥ भ्रातर्यविद्यमानेतु तत्परेह्निसमाचरेत् ॥ अन्यथाश्राद्धहंतास्याच्छ्राद्धसंकरकृद्भवेदिति ॥ (माधवीये कात्यायनः) द्वेबह्वूनिनिमित्तानि जायेरन्नेकवासरे॥नैमित्तिकानिकार्याणि निमित्तोत्पत्त्यनुक्रमात इति॥यद्यप्येकदेवताक श्राद्धद्वयमेकस्मिन्नह्निनयुक्तम्एकानुष्ठानेनेतरप्रयोजनस्यापिप्रसंगात्सिद्धेः।तथापिनैमित्तिकानिवचनबलादनेकान्यप्यनुष्ठेयानि।(तथा चतत्रैवजाबालिः)श्राद्धंकृत्वातुतस्यैव पुनःश्राद्धंनतद्दिने॥नैमित्तिकन्तुकर्त्तव्यं निमित्तानुक्रमोदयमिति॥नित्यकाम्ययोरेकदेवताकयोः सन्निपाते काम्येनैवनित्यसिद्धिः॥(तदुक्तं स्मृतिसंग्रहे) काम्यतंत्रेण नित्यस्य तंत्रश्राद्धस्यसिध्यति इति॥ (पार्वणैकोद्दिष्टयोरेकदिनेस न्निपाते माधवीये जाबालिः) यद्येकत्रभवेतांवा एकोदिष्टंचपार्वणम्॥पार्वणंत्वभिनिर्वर्त्य एकोद्दिष्टंसमाचरेत इति॥ यद्यप्येकोद्दिष्टकाला त्पार्वणकालः परः तथाप्येतद्वचनबलादेवैकोद्दिष्टंपरंकार्यमित्यर्थः॥इतिसंघातमरणेश्राद्धनिर्णयःसमाप्तः॥अथश्राद्धदिनेतिलतर्पणनिर्ण यः ॥ (तत्र श्राद्धमयूखे गर्गः) पूर्वंतिलोदकंकृत्वा अमाश्राद्धतुकारयेत॥प्रत्यब्देनभवेत्पूर्वं परेद्दनितिलोदकम्॥पक्षश्राद्धेहिरण्येच अनु व्रज्यतिलोदकम् इति॥अमाश्राद्धं दर्शश्राद्धम्॥तत्रविप्रनिमंत्रणोत्तरंपाकारंभोत्तरंवातिलतर्पणंकार्यम् श्राद्धप्रयोगस्यारब्धत्वात् प्रत्यब्दे पित्रोर्वार्षिकेतिलतर्पणं न किंतु परेद्युरेव॥नंवश्राद्धदिनेकुर्यात्तिलैस्तुपितृतर्पणम् इति॥स्मृत्यंतरवचनात॥सप्तम्यांभानुवारेच मातापित्रोः

क्षयेऽहनि ॥ तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः ॥ इतिस्मृतिरत्नावल्यां वृद्धमनुनानिषेधाच्च ॥ अतोवार्षिकश्राद्धदिनेनित्यतर्पणे
तिलमात्रस्यनिषेधः नतुतर्पणस्य ॥ तिलैरित्यस्यवैय्यर्थ्यापत्तेः ॥ अत्रनित्यतर्पणंब्रह्मयज्ञोत्तरंकार्यम् ॥ पक्षश्राद्धे महालयश्रा
द्धे हिरण्ये आमश्राद्धेच अनुव्रज्य ब्राह्मणविसर्जनोत्तरं तर्पणं कार्यमित्यर्थः ॥ (महालये तर्पणं श्राद्धोत्तरं कार्यं तथाच
मयूखे कपिलः) अर्द्धोदयेगजच्छाये षष्ठ्यांचैवमहालये ॥ भरण्यांचमघाश्राद्धे पिंडांतेतर्पणंभवेत् ॥ (तत्रैव गार्ग्योऽपि)
कृष्णभाद्रपदेमासि श्राद्धंप्रतिदिनंभवेत् ॥ पितॄणांप्रत्यहंकार्यं निषिद्धाहेपितर्पणम् इति ॥ सकृन्महालयेतु वार्षिकवत् परे
द्युरेव ॥ सकृन्महालयेश्वःस्यादष्टकास्वंतएवहि ॥ इतिस्मृत्यंतरस्मरणात् ॥ अंते विसर्जनान्ते इत्यर्थः ॥ मन्वादिषुदर्शश्राद्ध
वत् ॥ (तथाच कपिलः मन्वादिषुयुगाद्यासु दर्शसंक्रमणेषुच ॥ पौर्णमास्यांव्यतीपाते दद्यात्पूर्वंतिलोदकम् इति ॥ तिलत
र्पणनिषेधकालानाह गार्ग्यः) भानौभौमेत्रयोदश्यां नंदाभृगुमघासुच॥पिंडदानंमृदास्नानं नकुर्यात्तिलतर्पणम्॥(हेमाद्रौ मरीचिः)सप्त
म्यांरविवारेच ग्रहेजन्मदिनेतथा॥ निशिसंध्यासुपुत्रार्थी नकुर्यात्तिलतर्पणम्॥(बृहन्नारदीये)वृद्धिश्राद्धेसपिंड्यांच प्रेतश्राद्धेऽनुमासिके॥
संवत्सरविमोकेच नकुर्यात्तिलतर्पणमिति ॥ एतत्सर्वंनित्यतर्पणविषयकम्॥(अस्यापवादः पृथ्वीचंद्रोदये) तीर्थेतिथिविशेषेच गयायां
प्रेतपक्षके ॥ निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितम्॥(गोभिलः)तिलाभावेनिषिद्धाहे सुवर्णरजतान्वितम्॥तदभावेनिषिंचेत्तु दर्भमंत्रेण
वापुनरिति ॥ श्राद्धाऽशक्तौश्राद्धनिमित्तकतर्पणेकृतेतिलयुक्तमेव ॥ (यत्तु कातीयम्) उपरागेपितुःश्राद्धे पातेऽमायांचसंक्रमे॥निषिद्धे
पिहिसर्वत्र तिलैस्तर्पणमाचरेदिति॥॥ इतिश्रीबीकानेरस्यविषयान्तर्गतरत्नगढनगरनिवासिना श्रीवसिष्ठकुलोद्भवेन श्रीरामकृष्णपौत्रेण

श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तवाजसनेयिना पण्डितगौडश्रीचतुर्थीलालशर्मणा विरचिते गौडीयश्राद्धप्रकाशे प्रथमखंडे प्रेतकल्प निर्णयकथनं नाम द्वितीयं प्रकरणम् ॥ अथमिश्रप्रकरणं तृतीयम् ॥ तत्रतावन्नित्यपितृयज्ञमधिकृत्यतर्पणमुच्यते ॥ (तस्यकालदेशौ हेमाद्रौशातातपः) तर्पणंतुततःकुर्यात्प्रत्यहंस्नातकोद्विजः॥देवेभ्यश्चऋषिभ्यश्च पितृभ्यश्चयथाक्रमम् ॥ (याज्ञवल्क्योपि) स्नात्वा देवान्पितॄंश्चैव तर्पयेदर्चयेत्तथा॥ (व्यासः) तर्पणंद्विविधंप्राहुर्मुनयःशंसितव्रताः॥एकंजलेस्थितःकुर्यादपरंतुस्थलेस्थितः इति॥(अनयोर्व्य वस्थामाह विष्णुः) स्नातश्चार्द्रवासादेवपितृतर्पणमम्भःस्थएवकुर्य्यात्॥परिवर्तितवासाश्चतीर्थंतीरमुत्तीर्य्य॥(हारीतोपि) आर्द्रवासाज लेकुर्य्यात्तर्पणाचमनंजपम्॥शुष्कवासाःस्थलेकुर्य्यात्तर्पणाचमनंजपमिति॥(उक्तव्यवस्थातिक्रमेदोषमाह लिखितः) शुष्केणान्तर्जले चैव बहिरप्यार्द्रवाससा ॥ स्नानंदानंजपोहोमो निष्फलंपितृतर्पणम् इति॥(स्नानं ब्राह्मे) यदातुस्थलेस्थितस्तर्पणंकुर्यात्तदातर्पणोदक मुदकमध्ये न निक्षिपेत्॥(तदाह विष्णुः) स्थलेस्थित्वाजलेयस्तु प्रयच्छेदुदकंनरः॥नोपतिष्ठतितद्वारि पितॄणांतन्निरर्थकमिति॥(स्थलत र्पणमेवप्रकृत्याह गोभिलः) नोदकेषुनपात्रेषु नक्रुधानैकपाणिना ॥ नोपतिष्ठतितत्तोयं यन्नभूमौप्रदीयते इति॥अतः स्थलस्थेनभूमावेव देयमित्यभिप्रायः ॥ (अत्रविशेषमाह हारीतः) वसित्वावसनंशुक्लं स्थलेविस्तीर्णबर्हिषि ॥ विधिज्ञस्तर्पणंकुर्यान्नपात्रेतुकदाचन ॥ पात्राद्वाजलमादाय शुभेपात्रान्तरेक्षिपेत् ॥ जलपूर्णेऽथवागर्ते नस्थलेषुविबर्हिषु इति ॥ पात्रंचात्रपितामहेनोक्तम् ॥ हेमरूप्यमयंकार्य्यं ताम्रकांस्यसमुद्भवम्॥पितॄणांतर्पणेपात्रं मृन्मयंतुपरित्यजेदिति॥यत्रप्रतिपिद्धमशुचिवास्थलं तत्रजलेदद्यात्॥(तदाह विष्णुः) यत्राशु चिस्थलंतुस्यादुदकेदेवताःपितॄन् ॥ तर्पयेत्तुयथाकाममप्सुसर्वंप्रतिष्ठितम्॥ यदातूदकमध्यस्थितस्तर्पणंकुर्यात्तदातर्पणोदकंस्थलेननिक्षि

पेत् ॥ (तदुक्तंहेमाद्रौ षट्त्रिंशन्मते) नतर्पयेत्पितॄन्देवाञ्जलसंस्थःस्थलेक्वचित्॥स्थलस्थस्तुक्वचित्कुर्याज्जलेप्यशुचिचेत्स्थलमिति ॥
(असंस्कृतप्रमीतांजलिस्तुसर्वदास्थलएवक्षेपणीयइत्याह कार्ष्णाजिनिः) देवतानांपितॄणांच जलेदद्याज्जलाञ्जलिम् ॥ असंस्कृतप्रमी
तानां स्थलेदद्याज्जलंपुनरिति॥इतितर्पणकालदेशनिरूपणम्॥अथतर्पणसाधनानि ॥ (तत्राह लौगाक्षिः) खड्गमौक्तिकहस्तेन कर्तव्यं
पितृतर्पणम् ॥ मणिकांचनयुक्तेन नशुद्धेनकदाचन इति ॥ शुद्धेनकेवलेन॥(योगियाज्ञवल्क्यः) अनामिकाधृतंहेम तर्जन्यांरूप्यमेवच॥
कनिष्ठिकाधृतंखड्गं तेनपूतोभवेन्नरः॥ (कात्यायनोपि) अशून्यंतुकरंकृत्वा सुवर्णरजतैःकुशैः॥प्रयतस्तर्पणंकुर्यान्मणिखड्गतिलैरपि
हेमाद्रौशंखोपि)विनारूप्यसुवर्णेन विनाताम्रतिलैस्तथा।विनादर्भैश्चमंत्रैश्च पितॄणांनोपपद्यते।सौवर्णराजताब्जाभ्यां खड्गेनोदुंबरेणवा।दत्त
मक्षयतांयाति पितॄणांतुतिलोदकम्।हिमेनसहयद्दत्तं क्षीरेणमधुनाथवा।तदप्यक्षयतांयाति पितॄणान्तुतिलोदकम् इति।उदुंबरेण ताम्रपात्रे
ण हिमं चंदनादि इत्यर्थः।(तत्रैव मरीचिः)रजतेमनसायायात्सुवर्णेहस्तनिर्गतम्।तिलेषुचक्षणाद्गच्छेत्ताम्रेतुद्विमुहूर्ततः।दर्भेसप्तमुहूर्तेन मंत्र
युक्तंतदक्षयम्।यत्रयत्रहियोयस्य तस्यतत्रोपतिष्ठते इति।नैतानिसुवर्णादिसमुच्चयार्थानिवचनानि।(यदाह मरीचिः)एषामन्यतमेनापिशुक्लपा
णिःसमाचरेत्॥द्वाभ्यांवाथत्रिभिर्वापि सर्वैर्वातर्पणंबुधः॥(याज्ञवल्क्योपि) तिलानामप्यलाभेतु सुवर्णरजतान्वितम् तदभावेनिषिंचेत्तु
दर्भैर्मंत्रेणवापुनः॥ (गौतमः) कुशानामप्यलाभेतु काशान्दूर्वामथापिवा ॥ संयोज्यतर्पणंकुर्यान्नतुशून्यकरःक्वचित् ॥ (अत्रविशेषमाह
प्रजापतिः) तर्पणादीनिकार्याणि पितॄणांयानिकानिचित्॥तानिस्युर्द्विगुणैर्दर्भैः सपवित्रैर्विशेषतः॥(हेमाद्रौ भृगुः) प्रागग्रैस्तर्पयेद्देवान्तु
दगग्रैस्तुमानुषान ॥ तानेवद्विगुणीकृत्य तर्पयेत्प्रयतःपितॄन् इति॥तानेवेतिदेवतर्पणविनियुक्तानामपितेषांपितृतर्पणयोग्यतेत्युक्तंगृह्यप

रिशिष्टे॥दर्भाःकृष्णाजिनंमंत्रा ब्राह्मणाहविरग्नयः॥अयातयामान्येतानि नियोज्यानिपुनःपुनः ॥ (छागलेयः)लघुपात्रंकरेकृत्वा सौवर्णं
खड्गमेवच ॥ राजतंताम्रजंवापि तेनसंतर्पयेत्पितॄन ॥ (मत्स्यपुराणे) यवैस्तुतर्पयेद्देवान्मनुष्यान्सनकादिकान् ॥ तिलैर्विशेषतः
कृष्णैरग्निष्वात्तादिकान्पितॄन् ॥ आत्मनश्चपितॄन्सर्वान्सुहृत्संबंधिभिःसह ॥ (योगियाज्ञवल्क्यः) नामगोत्रस्वधाकारैस्तर्पयेदनु
पूर्वशः ॥ मंत्रैश्चदेयमुदकं पितॄणांप्रीतिवर्द्धनम् इति ॥ (तत्रजलस्थस्यविशेषमाह शालंकायनः) बाहुंपूर्णंतिलैःकृत्वा जलस्थस्त
र्पयेत्पितॄन् ॥ स्थलस्थेननकर्त्तव्यं पितॄणांतृप्तिमिच्छता ॥ (कालिकापुराणे) रविशुक्रत्रयोदश्यां सप्तम्यांनिशिसंध्ययोः ॥ तिलतर्प
णसंयोगात्तज्जलंरुधिरंभवेदिति ॥ (अधिकारविशेषेणतिलतर्पणनिषेधमाह कौण्डिन्यः) दर्शश्राद्धंगयाश्राद्धं श्राद्धंचापरपा
क्षिकम् ॥ नजीवत्पितृकःकुर्यात्तिलैस्तर्पणमेव च इति ॥ अथाञ्जलिसंख्या (तत्र हेमाद्रौ व्यासः) एकैकमंजलिंदेवा द्वौद्वौतुसनका
दयः ॥ अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियस्त्वेकैकमंजलिम् ॥ (कूर्मपुराणेपि) देवतानांतुसर्वासामेकैकांजलिरिष्यते॥ऋषीणामेकएवस्यान्मनु
ष्याणांद्वयंतथा॥त्रयस्त्रयःपितॄणांतु स्त्रीणामेकैकएवहि ॥ (वृद्धशातातपः) मातृमुख्याश्चयास्तिस्रस्तासांदद्याज्जलांजलीन् ॥ त्रींस्त्रीनेव
तथान्यासान्दद्यादेकैकमंजलिम् इति ॥ अथहस्ततीर्थोपवीतजानुदिङ्नियमः (तत्र यमः) द्वौहस्तौयुग्मतःकृत्वा पूरयेदुदकाञ्जलिम् ॥
गोशृङ्गमात्रमुद्धृत्य जलमध्येजलंक्षिपेत्॥(मात्स्येपि)उभयोर्हस्तयोःकृत्वा सलिलैःपूर्णमंजलिम्॥देवानांचपितॄणांच शुचिस्तर्पणमाच
रेत्॥ (कूर्मपुराणे) अन्वारब्धेनसव्येन पाणिनादक्षिणेनतु ॥ देवर्षींस्तर्पयेद्धीमानुदकांजलिभिःपितॄन् ॥ (अग्निपुराणे) दैवेनैवहितीर्थे
न देवानांतर्पणंस्मृतम् ॥ प्राजापत्येनतीर्थेन तर्पयेद्ब्रह्मणःसुतान् ॥ पित्र्‍णामपितीर्थेन तेषामेवहितर्पणम् इति ॥ (तीर्थलक्षणमुक्तं योगि

याज्ञवल्क्येन)अंगुष्ठमूलेब्राह्मन्तु दैवंह्यंगुलिमूर्द्धनि।प्राजात्यन्तुमूलेषु मध्येसौम्यंप्रतिष्ठितम्।अंगुष्ठस्यप्रदेशिन्या मध्येपित्र्यंप्रकीर्त्तितम्॥
एवंज्ञात्वानमुह्यंति सर्वकर्मसुवैद्विजाः॥(जमदग्निः)यज्ञोपवीतीदेवेभ्यः प्रदद्यात्सतिलाञ्जलीन्॥निवीतीतुमनुष्याणां कुर्यात्तर्पणमादृतः॥
प्राचीनावीतसंयुक्तः पितृभ्योनिर्वपेज्जलम्॥(हेमाद्रौ सुमंतुः)न्युब्जंजानुनिवेश्याधो दक्षिणंतर्पयेत्सुरान्।तथैवसव्यंविन्यस्य पितॄणांतर्पणं
चरेत्॥(ब्रह्मवैवर्त्ते) पूर्वाशाभिमुखोभूत्वा पूर्वाग्रेषुकुशेषुच॥अपोनिषिंचेत्प्रयतो देवानुद्दिश्यधर्मवित्॥ सौम्याशाभिमुखोनित्यमुदगग्रेच
बर्हिषि।मनुष्याणांचतृप्त्यर्थं निर्वपेत्तुजलांजलीन्।।याम्याशासम्मुखः स्थित्वा दक्षिणाग्रकुशेषुच॥पितृभ्यःसलिलंदद्यात्तृप्त्यर्थंप्रीतमानसः।
अथतर्पणीयक्रमः ॥ (तत्र हेमाद्रौ शातातपः)देवेभ्यश्चऋषिभ्यश्च पितृभ्यश्चयथाक्रमम ॥(तत्रैव भविष्यपुराणे) प्रथमंतर्पयेद्देवानुपवी
तीविनायकान् ॥ मोदश्चैवप्रमोदश्च सुमुखोदुर्मुखस्तथा ॥ अविघ्नोविघ्नकर्त्ताच इत्येतेषड्विनायकाः ॥ (योगियाज्ञवल्क्यः) ब्रह्माणंतर्पये
त्पूर्वं विष्णुंरुद्रंप्रजापतिम् ॥ देवाञ्छंदांसिवेदांश्च ऋषींश्चैवतपोधनान्॥ आचार्यंश्चैवगंधर्वानाचार्यानितरांस्तथा॥संवत्सरंसावयवं देवी
रप्सरसस्तथा ॥ तथादेवानुगान्नागान्सागरान्पर्वतानपि ॥ सरितोऽथमनुष्यांश्च यक्षान्रक्षांसिचैवहि ॥ पिशाचांश्चसुपर्णांश्च भूतान्यथप
शूंस्तथा ॥ वनस्पतीनोषधींश्च भूतग्रामंचतुर्विधम् ॥ सनकश्चसनंदश्च तृतीयश्चसनातनः ॥ कपिलश्चासुरिश्चैव वोढुःपंचशिखस्तथा ॥
एतेब्रह्मसुताःसप्त मनुष्याःपरिकीर्त्तिताः ॥ कव्यवाडनलंसोमं यममर्यमणंतथा ॥ अग्निष्वात्तान्सोमपांश्च तथाबर्हिषदःपितॄन् ॥ यदि
स्याज्जीवत्पितृक एतान्दिव्यान्पितॄंस्तथा ॥ येभ्योवापिपितादद्यात्तेभ्योवापिप्रदापयेत् ॥ एतांश्चवक्ष्यमाणांश्च प्रमीतपितृकोद्विजः ॥
वसून्रुद्रांस्तथादित्यान्नमस्कारस्वधान्वितान् ॥ एतेसर्वस्यपितर एवायत्ताश्चमानुषाः ॥ आचार्यांश्चपितॄन्स्वांश्च पितृप्रभृतिनामतः

इति ॥ यदिजीवत्पितृकस्तर्प्पणंकुर्यात्तदा देवऋषिमनुष्यतर्प्पणानन्तरं कव्यवाडग्निप्रभृतीनष्टौदेवपितॄन्सन्तर्प्य तर्प्पणं समापयेत ॥ येभ्यः पितादद्यात् तेभ्योवापि तर्प्पणं कुर्यात् ॥ प्रमीतपितृकस्त्वेतान् कव्यवाडग्निप्रभृतीन् वक्ष्यमाणान् वसून् रुद्रादित्यान स्वान् पितृपितामहांश्चतर्प्पयेत् ॥ (कात्यायनपरिशिष्टसूत्रेऽपि) ब्रह्माणंतर्प्पयेत्पूर्वं विष्णुंरुद्रंप्रजापतिम् ॥ देवाञ्छन्दांसिवेदानृषीन्पुराणाचार्यान् गंधर्वानितराचार्यान्संवत्सरंसावयवंदेवीरप्सरसोदेवानुरगान्नागान् सागरान्पर्वतान्सरितोमनुष्यान्यक्षान्रक्षांसिपिशाचान्सुपर्णान् भूतानिपशून्वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामित्योङ्कारपूर्वंततोनिवीती मनुष्यान्सनकंसनंदनंसनातनं कपिलमासुरिंयममर्यमणमग्निष्वात्तान्सोमपोबर्हिषदोयमांश्चैकेयमायधर्मराजायमृत्यवेचान्तकायच।वैवस्वतायकालायसर्वभूतक्षयायच।औदुंबरायदध्नायनीलायपरमेष्ठिने।वृकोदरायचित्राय चित्रगुप्तायवैनमः। इत्येकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन्। यावज्जीवकृतंपापंतत्क्षणादेवनश्यतीति। जीवत्पितृकोप्येतानन्यांश्चेतरउदीरताङ्गिरस आयन्तुनऊर्जंवहन्तीपितृभ्योयेचेहमधुवाता इतित्र्यृचंजपन्नप्रासिंचेत्तृप्यध्वमितित्रिर्नमोवइत्युक्त्वामातामहानांचैवंगुरुशिष्यर्त्विग्ज्ञातिबांधवानतर्पिंतादेहाद्रुधिरंपिबन्तिवासोनिष्पीड्याचम्यअद्दश्रमस्यहंसइत्युपस्थायप्रदक्षिणीकृत्यदिशश्च देवताश्चनमस्कृत्योपविश्यब्रह्माग्निपृथिव्योषधीर्वाग्वाचस्पतिर्विष्णुर्महद्भ्योऽपांपतयेवरुणायनमइतिसंवर्चसेतिमुखंविमृष्टेदेवागातुविद इति विसर्जयेदिति (हेमाद्रौ ब्रह्मपुराणेविशेषः) प्रथमंतर्पयेद्देवान्ब्रह्मादीन्सुसमाहितः ॥ ततःसंतर्पयेद्विद्वान्मरीचिप्रमुखानृषीन् ॥ वसून्रुद्रांस्तथादित्यान्क्रमशस्तदनन्तरम् ॥ यक्षान्पशून्सुपर्णांश्च भूतग्रामंचतुर्विधम् ॥ आचार्यानितरांश्चैव कालस्यावयवानपि ॥ सनकप्रमुखांश्चैव मनुष्यांस्तदनंतरम् ॥ कव्यवाडनलादींश्च ततःपितृगणानपि ॥ स्वपितृभ्यस्ततोदद्यान्मातृभ्यस्त

स्यचाप्यनु ॥ ततोमातामहानांच पितृव्याणांततःपरम् ॥ पत्नीनांचसुतानांच पितृमातृष्वसुस्ततः ॥ मातुलानीचदुहिता स्वसाचार्यर्त्वि जस्तथा ॥ शिष्याश्चज्ञातयश्चैव सुहृत्संबंधिनस्तथा ॥ एतेषांतर्पणंकार्यं यथावदनुपूर्वशः ॥ ज्ञाताज्ञातान्समुद्दिश्य प्रदेयश्चांज लिस्ततः ॥ असंस्कृतप्रमीतानां पृथग्देयोंजलिस्ततः ॥ इतिक्रमेणयःकुर्याद्देवादीनांतुतर्पणम् ॥ तेनस्युस्तर्पितास्तेतु सुधाभिर्नात्रसं शयः ॥ इति ॥ (योगियाज्ञवल्क्यः) अन्वारब्धेनसव्येन पाणिनादक्षिणेनतु ॥ तृप्यतामितिसेक्तव्यं नाम्नातुप्रणवादिना ॥ इति तृप्यता मित्यत्र तर्पणीयव्यापारस्य प्रतीयमानत्वात् अभिहितेकर्त्तरिप्रथमैवयुक्तेति प्रणवादिप्रथमान्तंनामसंकीर्त्य तदन्तेतृप्यतामिति वक्तव्यं इति प्रयोगंदार्शितवान् ॥ जातूकर्ण्यस्तुपरस्मैपदेनापिप्रयोगंदर्शितवान् ॥ तृप्यत्वितिसमुच्चार्य्यं तृप्यतामित्यथापिवा ॥ विधिज्ञःप्र क्षिपेत्तोयं देवादीनामशेषतः इति ॥ (कात्यायनस्तु) उत्तमपुरुषांतस्याख्यानपदस्यप्रयोगमुक्तवान् ॥ अथाद्भिस्तर्पयेद्देवान्स तिलाभिःपितॄनपि ॥ नामांतेतर्पयामीति आदावोमितिचब्रुवन् इति ॥ तर्पयामीत्यत्रतर्पणीयस्यकर्म्मत्वेनाभिसंबन्धात् प्रण वादिदेवतानाम द्वितीयान्तमुच्चार्य तर्पयामिनमः इत्यन्तेसमुच्चारयेत् ॥ ततश्चॐब्रह्मातृप्यतां ॐब्रह्मातृप्यतु ॐब्रह्माणं तर्पयामिनम इतिवा एकवचनेन ॐवेदास्तृप्यंतां ॐवेदास्तृप्यन्तु ॐवेदांस्तर्पयामि इति वा बहुवचनेनप्रयोगः कर्त्तव्य इत्युक्तंभवति अत्र यथास्वशाखंव्यवस्था ॥ तत्र तृप्यतामितियजुर्वेदिनां तृप्यतामितिसेक्तव्यमितियोगियाज्ञवल्क्येनोक्तत्वात भूतग्रामश्चतुर्विधस्तृ प्यतामितिपरिशिष्टसूत्रे कात्यायनेनोक्तत्वाच्च इति ॥ तृप्यतु इति आश्वलायनशाखिनांचतेषांस्मृतिग्रंथेषुदर्शनात ॥ तर्प यामीति छंदोगानांवेदितव्यम् ॥ नामांतेतर्पयामीति छंदोगपरिशिष्टेकात्यायनेनविहितत्वादिति ॥ अत्रवस्त्रादितर्पणेयमतर्पणेतुन.

॥ ७० ॥

मोन्तपदेन ॥ ॐवसुभ्योनमः ॐयमायनमः इत्यादयएवप्रयोगा विधेयाः ॥ (तथाच हेमाद्रौकश्यपः) ॥ वसून्रुद्रांस्तथा
दित्यान्नमस्कारसमन्वितान्॥ अद्भिःसंतर्पयेन्नित्यं नामभिःप्रणवादिभिः ॥ तर्पयन्यमराजंच नमस्कारंप्रकीर्त्तयेत् ॥ कात्यायनपरिशिष्टसू
त्रेपियमायधर्मराजायइत्यादि ॥ अत्रपितृतर्पणेयमतर्पणेच एकैकस्य पुरुषस्यत्रींस्त्रीन् जलांजलीन्दद्यात् ॥ (तथाच पैठीनसिः) सनामगोत्र
ग्रहणंपुरुषंपुरुषंप्रति ॥ तिलोदकांजलींस्त्रींस्त्रीनुच्चैरुच्चोर्वि निक्षिपेत् ॥इति॥(नामादिग्रहणेविशेषमाह बोधायनः)शर्मांतंब्राह्मणस्योक्तंवर्मांतं
क्षत्रियस्यच॥ गुप्तांतंचैववैश्यस्य दासांतंशूद्रजन्मनः॥चतुर्णामपिवर्णानां पितॄणांपितृगोत्रता॥ पितृगोत्रंकुमारीणामूढानांभर्तृगोत्रता ॥
इति ॥ अत्रसंबंधानुकीर्त्तनमपिकर्त्तव्यम् ॥ गोत्रसंबंधनामानि पितृकर्मणिकीर्त्तयेदितिभृगुस्मरणात् ॥(योगियाज्ञवल्क्यः)मंत्रैश्चदेयमुदकं
पितॄणांप्रीतिवर्द्धनैरिति ॥ तेचमंत्रास्तेनैवदर्शिताः उदीरतामङ्गिरस आयंत्वित्यूर्जमित्यपि ॥ पितृभ्यइतियेचेह मधुवाताइतित्र्यृचम्॥
पितॄन्ध्यायन्प्रसिंचेद्द्विजपन्मंत्रानिमान्क्रमात् ॥तृप्यध्वमितितुत्रिर्वै ततःप्रांजलिरानतः ॥इति॥ अस्यार्थःउदीरतामितिमन्त्रांतेअमुकगो
त्रअस्मात्पिताऽमुकशर्मातृप्यतामिदंतिलोदकंतस्मैस्वधाइति ॥ अमुकगोत्रपितरमुकशर्मन्नेतत्तेतिलोदकम् ॥ स्वधाइतिवाप्रथमंतिलांज
लिंदद्यात् ॥ततश्चाङ्गिरसोनइतिमंत्रांतेतथैववाक्यमुच्चार्य्यद्वितीयम् ॥ततआयंतुनइतिमंत्रेणतथवतृतीयमित्येवंपित्रेऽजलित्रयंदद्यात्॥तत
ऊर्जंवहंतीरितिमंत्रांतेअमुकगोत्रास्मत्पितामहामुकशर्मातृप्यतामिदंतिलोदकंतस्मैस्वधाइतिप्रथमम्ॐपितृभ्यःस्वधाइतितथैवद्वितीयम्।
येचेहपितरइतितथैवतृतीयंचपितामहायांजलित्रयंदद्यात् ॥ ततोमधुवाताइतिमंत्रांतेअमुकगोत्राऽस्मत्प्रपितामहाऽमुकशर्मातृप्यतामिति
तिलोदकंतस्मैस्वधाइतिप्रथमम्।मधुनक्तमितितथैवद्वितीयम् मधुमान्न इतितथैवतृतीयं चप्रपितामहायांजलित्रयंदद्यात् इत्यर्थः॥अत्रावसरे

प्रथमंमात्रादीनांतर्पणंततोमातामहादीनाम्॥पूर्वंपित्रादयस्तर्प्यास्ततोमात्रादयोपिच ॥ ततोमातामहाश्चैव मातामह्यस्ततःपरमितिहेमाद्रौ
न्यायस्स्मरणात् ॥ ॐअमुकगोत्रास्मन्माताऽमुकीदेवीतृप्यतामिदंतिलोदकंतस्यैस्वधाइतिमात्रेएवमेवपितामह्यैप्रपितामह्यै चएकैकमंजलिं
स्वधाकारवतानाममंत्रेणदद्यात् इति ॥ तदनंतरंनमोवइतिमंत्रांतेॐअमुकगोत्रास्मन्मातामहाऽमुकशर्मातृप्यतामिदंतिलोदकंतस्मैस्वधा
इतिप्रथमंतथैवद्वितीयतृतीयावित्येवंमातामहायांजलित्रयंदद्यात्॥एवमेवप्रमातामहवृद्धप्रमातामहयोस्त्रींस्त्रीनंजलीन्दद्यात् ॥ मंत्रस्तुनमो
वइत्येकएवपुनःपुनरावर्त्तते(तथाचयोगियाज्ञवल्क्यः)नमोवइतिजप्त्वावैततोमातामहानपि॥तर्पयेदानृशंस्यार्थंधर्मंपरममाश्रितः॥इति । अथ
मातृवत्प्रयोगमुच्चार्यमातामह्यादीनामेकैकांजलिर्देयः।अत्रअंतर्मातामहान्कृत्वामातृभ्योञ्जलिदानम्आचारादर्शेश्रीदत्तलिखनंप्रमाणशून्य
म्॥(तथाच मरीचिः)अन्तर्मातामहान्कृत्वा मातॄणांयःप्रयच्छति॥उदकंपिंडदानंच नरकंसतुगच्छति॥(हेमाद्रौ उशनापि)अन्तर्मातामहा
न्कृत्वा मातृणांयःप्रयच्छति॥उदकंपिंडदानंवा पितॄणांनोपतिष्ठते इति॥एवमेवहेमाद्रिमहीधरप्रभृतयः॥ततोज्येष्ठतातपितृव्यपुत्रपौत्रदौहित्र
भ्रातृपुत्रजामातृमातुलभागिनेयपितृस्वस्रीयमातृभगिनीमातुलानीपत्नीभगिनीभ्रातृपत्नीभागिनेयीदुहिताश्वश्रूश्वशुरबंधुबांधवादीनांमध्ये
पुरुषाणांजलांजलित्रयंस्त्रीणामेकैकांजलिंदद्यात् ॥ (तथाच हेमाद्रौ ब्रह्मपुराणे) ततोमातामहानांच पितृव्याणांततःपरम् ॥ पत्नीनांचसुता
नांच पितृमातृस्वसुस्तत इत्यादिपूर्वोक्तम् ॥ कामोदकाख्यमन्यमप्यंजलिंदद्यात् ॥ (तदुक्तं विष्णुपुराणे) इदंचापिजपेदम्बु दद्यादात्मे
च्छयानृप ॥ उपकारायभूतानां सकृद्देवादितर्पणः ॥ देवासुरास्तथायक्षा गंधर्वोरगराक्षसाः ॥ पिशाचागुह्यकाःसिद्धाःकूष्मांडा
स्तरवः खगाः ॥ जलेचराभूनिलया वाय्वाधाराश्चजन्तवः ॥ तृप्तिमेतेनयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥ नरकेषुसमस्तेषु यातनासुचये

गताः॥तेषामाप्यायनायैव दीयतेसलिलंमया॥येबांधवाऽबांधवावा येऽन्यजन्मनिबांधवाः॥तेतृप्तिमखिलायांतु यश्चास्मत्तोऽभिवांछती
ति ॥ इदंचकाम्यतर्पणंदेवविधिनाकर्त्तव्यमितिमैथिलश्रीदत्तः ॥ शिष्टास्तुपैतृककर्म्मांङ्गत्वात्पैतृकविधिना।एवइतिवदंतितस्माद्यथाचार
कार्यम् ॥ अत्रावसरेस्नानवस्त्रनिष्पीडनंकर्त्तव्यम् ॥ (तदाह वसिष्ठः) तीरेजलाशयस्यैवं निर्वर्त्यपितृतर्पणम् ॥ निष्पीडयेत्स्नानवस्त्रं
दक्षिणाभिमुखःस्थले इति ॥ (अत्रमंत्रउक्तो गोभिलीये) येकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृताः॥तेगृह्णन्तुमयादत्तं वस्त्रनिष्पीड
नोदकमिति ॥ (अनंतरमाह योगियाज्ञवल्क्यः (निष्पीड्यस्नानवस्त्रन्तु आचम्यप्रयतःशुचिः ॥ देवानामर्चनंकुर्याद्ब्रह्मादीनाममत्सरः ॥इति॥ (एवंकुर्वतः फलमाहुर्मनुशातातपयोगियाज्ञवल्क्याः) यदेवतर्पयत्यद्भिः पितृन्स्नात्वाद्विजोत्तमः ॥ तेनैवसर्वमाप्नोति
पितृयज्ञक्रियाफलम् ॥ (कौर्मेपि) एवंयःसर्वभूतानि तर्पयेदन्वहंद्विजः॥सगच्छेत्परमंस्थानं तेजोमूर्त्तिरनामयः इति ॥ तर्पणाऽकरणे
दोषउक्तो ब्रह्मवैवर्त्ते) देवतांश्चमुनींश्चैव पितृन्वैयोनतर्पयेत् ॥ देवादीनामृणीभूत्वा नरकंसव्रजत्यधः ॥ इति तर्पणप्रयोगनिर्णयः॥ ॥
(अथसंन्यासाङ्गश्राद्धप्रयोगः हेमाद्रौ बोधायनः) अथातः संन्यासविधिंव्याख्यास्यामः ॥ तत्रसन्न्याससंकल्पकमष्टम्या आरभ्य
श्राद्धादिककुर्यात् ॥ अग्निमान्पार्वणविधिनाष्टौश्राद्धानि अनग्निमानेकोद्दिष्टविधिनाच कुर्यात् ॥ पौर्णमास्याममावास्यायांवा देवश्राद्धं
ऋषिश्राद्धं दिव्यश्राद्धं मानुष्यश्राद्धं भूतश्राद्धं पितृश्राद्धं मातृश्राद्धं आत्मनः श्राद्धंचेति ॥ देवश्राद्धे देवतात्रयं ब्रह्मविष्णुमहेश्वराः ॥
ऋषिश्राद्धे देवतात्रयं देवर्षिब्रह्मर्षिक्षत्रर्षयः॥दिव्यश्राद्धे देवतात्रयं वसुरुद्रादित्याः ॥ मनुष्यश्राद्धे सनकसनन्दनसनातनाः॥भूतश्राद्धे पृथि
व्यादीनि भूतानि चक्षुरादीनिकरणानि चतुर्विधोभूतग्रामः॥पितृश्राद्धे पितृपितामहप्रपितामहाः मातामहप्रमातामहवृद्धप्रमातामहाश्च ॥

मातृश्राद्धे देवतात्रयं मातृपितामहीप्रपितामह्यः ॥ आत्मनः श्राद्धे देवतात्रयं आत्मपितृपितामहा इति ॥ (विशेषमाह तत्रैव शौनकः)
पूर्वेद्युर्नांदीमुखंश्राद्धं कुर्य्यात् देवर्षिदिव्यमनुष्यभूतपितृमातृआत्मनश्च पृथक् पिंडदानैर्युग्मैर्ब्राह्मणैः पिंडोदकं कुर्यात ॥ तच्च
पूर्ववत् नामगोत्रसंबंधात् पिंडोदकं दत्त्वाऽनंतरं पुण्याहं वाचयेत् ॥ इति संन्यासाङ्गश्राद्धप्रयोगः ॥ अथजीवच्छ्राद्धप्रयोगः ॥
(हेमाद्रौ आदित्यपुराणे) देशकालधनश्रद्धाव्यवसायसमुच्छ्रये ॥ जीवतेवाथजीवाय दद्याच्छ्राद्धंस्वयंनरः ॥ इति ॥ वाश
ब्दाच्छ्राद्धकर्त्रंतराभावे स्वयमेवस्वस्यश्राद्धंकर्त्तव्यमिति हेमाद्रिः (बोधायनीयेपि) अथाप्युदाहरंति ॥ जीवन्नेवात्मनः श्राद्धं
कुर्यादन्येषुसत्स्वपि ॥ यथाविधिप्रवृत्त्याशु सपिंडीकरणादृते ॥ (आदित्यपुराणे) कृतोपवास सुस्नातस्त्रयोदश्यांसमाहितः ॥
कर्त्तारमथभोक्तारं विष्णुंसर्वेश्वरंयजेत् ॥ जलेस्थलेंबरेमूर्त्तौ कलशेपुष्करेरवौ ॥ त्रयोदश्यां कृष्णपक्षत्रयोदश्याम् ॥ रवौ रविप्रतिमाया
मित्यर्थः ॥ चंद्रार्कगुरुगोविप्रमातापितृषुसर्वगम् ॥ दक्षिणास्तुसतिलास्तिस्रस्तुजलधेनवः ॥ निवेदयेत्पितृभ्यश्च तदग्रेषुसमाहितः ॥
एवंसंपूज्यपितुरुद्देशेनतिस्रोजलधेनूर्दद्यात्॥ (तत्र मंत्रानाह) सोमायत्वापितृमतेस्वधानमइतिस्मरन् ॥ अग्नयेकव्यवाहनायस्वधानमइति
स्मरन् ॥ दक्षिणेतुनिदध्याच्च तृतीयांदक्षिणाधुताम्॥यमायांगिरसेचाथ स्वधानमइतिस्मरन्॥तयोर्मध्येतुनिक्षिप्य विप्रान्पंचोपवेशयेत्॥
प्रथमामुत्तरतःद्वितीयांदक्षिणतःतृतीयांमध्येनिक्षिपेदित्यर्थः॥आवाहनादिनापूर्वं विश्वान्देवान्प्रपूज्यच॥ अहंवसुभ्यस्त्वाविप्ररुद्रेभ्यस्त्वा
महन्ततःसूर्येभ्यस्त्वामहंविप्र भोजयामीतितान्वदेत्॥ आवाहनादिकंसर्वं कुर्याच्चपितृकर्मवत्॥वसुभ्यस्त्वामहंविप्र भोजयामि॥एवंरुद्रे
भ्यःसूर्येभ्यइत्युक्त्वाऽऽवाहनादिश्राद्धविधिनाभोजयित्वावस्त्रादिभ्यस्त्रीन्पिंडान्दद्यादित्यर्थः॥ सौम्यधेनुस्ततोदेया वासवायद्विजायतु॥

आग्नेयीचाथरौद्राय याम्यासुर्यद्विजायतु॥विश्वेभ्यश्चाथदेवेभ्यस्तिलपात्रंनिवेदयेत्॥तिलपात्रं कांस्यस्य॥स्वस्त्युदकमथाक्षय्यं जलंदत्त्वा
क्षतान्द्विजान् ॥ विसर्जयेत्स्मरन्विष्णुं देवमष्टाक्षरंविभुम्॥ॐ नमोनारायणायेत्यष्टाक्षरः ॥ ततःकामकुलेशानं निशिनागयणंस्मरेत्॥
कामकुलेशानविशेषणकं नारायणमित्यर्थः॥(अत्रोक्तजलधेनुविधिधर्मोत्तरे) जलधेनुंप्रवक्ष्यामि प्रीयतेदत्तयायया॥देवदेवोहृषीकेशः
सर्वेशःसर्वभावनः॥जलकुंभंनरव्याघ्र सुवर्णरजतान्वितम्॥रत्नगर्भमशेषैस्तु याम्यैर्धान्यैःसमन्वितम् ॥ सितवस्त्रयुगच्छन्नं दूर्वापल्लवशो
भितम्॥कुशमांसीमुरोशीरवालकामलकैर्युतम् ॥ प्रियंगुपत्रसहितं सितवस्त्रोपवीतिनम् ॥ सच्छत्रंसदुपानत्कं दर्भविष्टरसंस्थितम् ॥
चतुर्भिःसंवृतंभूप तिलपात्रैश्चतुर्दिशम् ॥ स्थगितंदधिपात्रेण घृतक्षौद्रवतामुखे ॥ उपोषितःसमभ्यर्च्य वासुदेवंजलेशयम् पुष्पधूपोपहारै
श्च यथाविभवमादृतः॥संकल्प्यजलधेनुंच कुंभंतदाभिपूज्यच।पूजयेद्वत्सकंतद्वत्कृतंजलमयंबुधः।एवंसंपूज्यगोविंदजलधेनुंसवत्सकाम् ॥
दद्याद्विजाथराजेंद्र प्रीत्यर्थंजलशायिनः॥जलशायीजगद्योनिः प्रीयतांममकेशवः॥इत्युच्चार्यचभूनाथ विप्रायप्रतिपाद्यताम्॥अपक्वान्नाशि
नास्थेयमहोरात्रमतःपरम् ॥ अनेनविधिनादत्त्वा जलधेनुंनराधिप॥सर्वान्कामानवाप्नोति येदिव्यायेचमानुषाः॥शरीरारोग्यमाबाधाप्रश
मःसार्वकामिकः॥नृणांभवतिदत्तायां जलधेन्वांसमाहितः॥इति जलधेनुविधिः॥एवंकृष्णत्रयोदश्यामेतत्सर्वं विधायद्वितीयेऽहनियत्कर्त
व्यंतदाह॥चतुर्दश्यांततोगच्छेद्यथाप्राप्तांसरिद्वराम्॥पूर्वेणविप्रःसौम्येन राजावैश्योऽपरेणच ॥ दक्षिणेनतथाशूद्रो मार्गेणविकिरन्यवान् ॥
सौम्येन उत्तरेण अपरेण पश्चिमेन। यवान्विकिरन् प्रक्षिपन् गच्छेदित्यर्थः॥वस्त्राणिलोहखंडानि जितंतइतिसंस्मरेन्॥जितंतेपुंडरीकाक्ष
जितंतेविश्वभावन ॥ नमस्तेस्तुहृषीकेश महापुरुषपूर्वज ॥इति॥ तत्रगत्वायत्कर्त्तव्यं तदाह॥दक्षिणाभिमुखोवह्निं ज्वालयेत्तत्रचस्वयम्॥

पंचाशताकुशैर्ब्राह्मीं कृत्वाप्रतिकृतिंदहेत् ॥ अस्यार्थः ॥ ततोनदीतीरेदक्षिणामुखःस्मार्त्तंलौकिकंवाग्निंपंचभूसंस्कारकृतेदेशेस्वयंप्रज्वा
ल्यचित्यर्थंगर्त्तखननभूमिप्रार्थनादिप्रत्यक्षमरणवत्सर्वंकुर्यात् ॥ जीवच्छ्राद्धेसर्वत्रप्रेतशब्दोनप्रयोज्यः ॥ ततःस्वशाखोक्तंपूर्णाहुत्यंतंहोमं
कृत्वाप्रधानहोमस्थाने ॐपृथिव्यैस्वाहा।ॐयमायस्वाहा।ॐरुद्रायस्वाहा।इतिसंस्कृताज्येनाहुतित्रयंहुत्वापंचाशत्कुशैरात्मप्रतिकृतिमन्येन
क्रव्यादमग्निमितिमंत्रेणदाहयेत्।ततोमुद्गमिश्रंतिलमिश्रंचतंडुलचरुद्वयमन्यस्मिन्नग्नौसपवित्रकंश्रपयेत् इत्यर्थः॥तथा॥श्रपयेच्चापरेवह्नौमुद्ग
मिश्रंचरुंततः।तिलतंडुलमिश्रंतु द्वितीयंसपवित्रकमिति।अपरग्रहणंयत्रप्रतिकृतिदाहःकृतस्ततोऽन्यस्मिन्नित्यर्थः।(चरुश्रपणानन्तरंकर्त्तव्य
माह)मधुक्षीरघृतांभोभिः पूरयेत्कर्षुकात्रयम्॥तदुपान्तेतुसमुद्गपात्राणित्रीणिपूरयेत् इति॥ तदग्निसमीपेकर्षूत्रयंकृत्वाप्रत्येकमधुक्षीरघृतो
दकैः पूरयेत॥तथाते मुद्गपूरितानि त्रीणिशरावाणीत्यर्थः ॥ततः॥ॐपृथिव्यैनमस्तुभ्यमितिचैकंनिवेदयेत्॥ॐयमायनमश्चेति द्वितीयंतद
नन्तरम्॥ॐनमश्चाथरुद्राय श्मशानपतयेतथा।ततोदीप्तंसमिद्धाग्निं भूमौप्रकृतिदाहकम्।क्रव्यादमग्नितप्तायै भूम्यैनमइतिस्मरन्।क्षीराक्तंज
लकुंभंतु विकिरेत्तत्प्रशान्तये।नाभिमात्रंततस्तोयं प्रविश्ययमदिङ्मुखः।सप्तभ्योयमसंज्ञेभ्यो दद्यात्सप्तजलांजलीन्।यमायधर्मराजाय मृ
त्यवेचान्तकायच॥वैवस्वतायकालाय सर्वप्राणहरायच॥ स्वधाकारनमस्कारप्रणवैःसहसप्तधा॥ ॐनमश्चाथरुद्राय श्मशानपतयेस्मरन्॥
लाजोदकाभ्यांपूर्णंतु कुंभंचविकिरेद्भुवि॥याम्योन्मुखेषुदर्भेषु प्रदद्याच्चावनेजनम्।ॐस्वधायैचस्वधारूपिरुद्रायनमइतिस्मरन्।अमुकामुकगो
त्रैतत्तुभ्यमस्तुतिलोदकम्॥सूक्ष्मदेहैषतेपिंडस्त्वर्घ्यंपुष्पसुगंधिमान्।धूपदीपोबलिर्वाथस्वग्र्यैषातुभ्यमक्षया॥दशपिंडांस्ततोदत्त्वा विष्णोः
सौम्यमुखान्स्मरेत्॥निरुष्मणस्तुतत्तोयं नाभिमात्रंप्रविश्यच॥प्रक्षिपेत्पूर्णकुंभंतु जलमध्येपृथक्पृथक् ॥ प्रदद्यात्पंचपंचाशत्कुंभां

श्चाथजलांजलीन्॥द्वारोपान्तेगृहेवाथ क्षीरतोयंचनिक्षिपेत्॥जीवात्रस्नाहिदुग्धंच पिबेदंचाप्यनुस्मरन्॥याम्योन्मुखेषुदर्भेषु स्वपेत्पश्च दु
दङ्मुखः॥अमावास्यायांकुर्यांच्चजीवच्छ्राद्धमतःपरम्॥घृतान्नमांसदधिभिःपूरयेत्कर्षुकात्रयम्॥कुर्याच्चमासिकंमासिसपिंडीकरणंततः॥आ
शौचान्तेततःसर्वमात्मनोवापरस्यवा॥कुर्यादस्थिरतांज्ञात्वा भक्त्यारोग्यधनायुषाम् इति।(हेमाद्रौ लिंगपुराणेविशेषः जीवच्छ्राद्धविधिंव
क्ष्ये समासाच्छ्रुतिसम्मतम्॥मुनयेदेवदेवेन कथितंब्रह्मणापुरा ॥ विशिष्टायवसिष्ठाय भार्गवायचसांप्रतम्॥शृण्वंतुसर्वभावेन सर्वसिद्धिक
रंपरम् ॥ श्राद्धमार्गक्रमंसाक्षाच्छ्राद्धाहाणामपिक्रमम् ॥ विशेषमपिवक्ष्यामि जीवच्छ्राद्धेषुयःस्मृतः॥ पर्वतेवानदीतीरे वनेदेवालयेपिवा ॥
जीवच्छ्राद्धंप्रकर्त्तव्यं मृत्युकालेप्रयत्नतः ॥ जीवच्छ्राद्धेकृतेजीवो जीवन्नेवविमुच्यते॥कर्मकुर्वन्नकुर्वन्वा अज्ञानोज्ञानवानपि ॥ श्रोत्रियोऽश्रो
त्रियोवापि ब्राह्मणःक्षत्रियोऽपिवा ॥ वैश्योवानात्रसंदेहो योगमार्गरतोथवा॥परीक्ष्यभूमिंविधिना गंधवर्णरसादिभिः॥स्वल्पमुद्धृत्ययत्नेन
स्थंडिलंसैकतंभुवि ॥ मध्यतोहस्तमात्रेण कुंडंचैवाग्रतःशुभम् ॥ स्थंडिलंवाप्रकर्त्तव्यं इषुमात्रंपुनःपुनः ॥ उपलिप्यविधानेन चोल्लिख्या
ग्निंनिधायच॥अन्वाधानंयथाशाखं परिसमुह्यसर्वतः॥परिस्तीर्यस्वशाखोक्तं पारम्पर्य्यक्रमागतम्॥समाप्याग्निमुखंसर्वं मंत्रैस्तैर्यथाक्रमम्।
संपूज्यस्थंडिलेवह्निं होमयेत्समिदादिभिः ॥ आदौकृत्वासमिद्धोमं चरुणाचपृथक्पृथक्॥घृतेनचपृथक्पात्रे शोभितेनपृथक्पृथक् ॥ जुहु
यादात्मनोद्धृत्य तत्त्वभूतानिसर्वतः ॥ॐभूःब्रह्मणेस्वाहा ॥ ॐभुवःविष्णवेस्वाहा ॥ ॐस्वःरुद्रायस्वाहा॥ॐमहःईश्वरायस्वाहा॥ ॐजनः
प्रकृतयेस्वाहा॥ॐतपः मुद्गलाय० ॐऋतं पुरुषाय० ॐ सत्यंशिवाय० एवंसर्वत्रप्रणवादिस्वाहान्तेनज्ञेयः ॥ ॐ सर्वधरांमेगोपायघ्राणेगंधं
सर्वस्यदेवायभूः स्वाहा ॥ ॐसर्वधरांमेगोपायघ्राणेगंधंसर्वस्यदेवस्यपत्न्यैभूःस्वाहा॥ॐभवजलंमेगोपायजिह्वायां रसंभवाय देवायभुवः

स्वाहा ॥ भवजलंमे०रसंभवस्यपत्न्यैभुवः स्वाहा ॥ रुद्राग्निंमेगोपायनेत्ररूपं रुद्रायदेवायस्वःस्वाहा॥रुद्राग्निंमे०रुद्रस्यदेवस्यपत्न्यैस्वः
स्वाहा ॥ उग्रवायुंमेगोपायत्वचिस्पृशम् उग्रायदेवायमहःस्वाहा ॥ उग्रवायुं० उग्रस्य देवस्य पत्न्यैमहःस्वाहा ॥ भीमसुषिरंमेगोपाय
श्रोत्रेशब्दभीमायदेवायजनःस्वाहा ॥ भीमसुषि० भीमस्यदेवस्यपत्न्यैजनःस्वाहा ॥ ईशरजोमेगोपायद्रव्ये तृष्णाम् ईशायदेवायतपः
स्वाहा॥ईशरजोमेगोपायद्रव्येतृष्णाम् ईशस्यदेवस्यपत्न्यैतपःस्वाहा॥महादेवसत्यंमेगोपाय श्रद्धांधर्मेमहादेवाय ऋतं स्वाहा॥महादेव०
महादेवस्य पत्न्यै ऋतं स्वाहा ॥ ॐ पशुपते पाशंमेगोपाय भोक्तृत्वं भोग्येपशुपतयेदेवाय सत्यं स्वाहा ॥ ॐपशुपते०पशुपतेर्देवस्य
पत्न्यै सत्यं स्वाहा ॥ ॐशिवायसत्यं स्वाहा ॥ इति ॥ एवंशिवादिहोतव्यं विरिंश्चान्तंचपूर्ववत् ॥ विरिंचांतंपुराप्रोक्तं सृष्टिमार्गेण
सुव्रताः ॥ पुनःपशुपतेःपत्नीं तथापशुपतिंक्रमात् ॥ संपूज्यपूर्ववन्मंत्रैर्होतव्यंवैक्रमेणच ॥ सर्वान्तमाज्यंपूर्वंच समिदन्तंसमाहितः ॥
ॐसर्वंधरांमेछिंधिप्राणोगंधंछिंधिमेऽघंजहिभूः स्वाहा भूर्भुवःस्वः स्वाहा॥एवंपृथक्पृथग्हुत्वा केवलेनघृतेनच ॥सहस्रंवातदर्द्धंवा शतमष्टो
त्तरंतुवा॥विधायैवंघृतेनैव शतमष्टोत्तरंपृथक्॥प्राणादिभ्यश्चजुहुयाद् घृतेनैवतुकेवलम्॥ॐप्राणेनिविष्टोऽमृतजुहोमिशिवोमाविशाप्रदाह
यप्राणाय स्वाहा ॥ प्राणाधिपतयेरुद्राय वृषातकाय स्वाहा ॥भूःस्वाहा॥ भुवःस्वाहा ॥स्वः स्वाहा॥ भूर्भुवःस्वःस्वाहा ॥ एवंक्रमेणजुहुया
द्यथोक्तंचयथाक्रमम्॥सप्तमेऽहनिविप्रेंद्रान्छाद्धार्हान्विप्रभोजयेत्॥सर्वेषांचैवविप्राणां वस्त्राभरणसंयुतम् ॥ वाहनंशयनंकांस्यमासनादिच ॥ ७४ ॥
भाजनम्॥हैमंवाराजतंधेनुं तिलक्षेत्रंचवैगृहम॥दासीदासगणश्चैव दातव्योदक्षिणाअपि ॥ पिंडंचपूर्ववद्देयं पृथग्युक्तप्रकारतः ॥ ब्राह्मणानां
सहस्रंच भोजयेच्चसदक्षिणम् ॥ एकवायोगनिरतं ब्रह्मनिष्ठंजितेंद्रियम् ॥ त्र्यहंचैवतुरुद्रस्यमहाचरुनिवेदनम् ॥ विशेषमेतत्कथितम

शेषंश्राद्धचोदितम् ॥ मृतेकुर्य्यान्नकुर्याद्वा जीवन्मुक्तोयतःस्वयम् ॥ नित्यनैमित्तिकादीनि कुर्याद्वासंत्यजेतवा ॥ बांधवेपिमृते तस्य नैवाशौचंनविद्यते ॥ सूतकंचनसंदेहः स्नानमात्रेणशुध्यति ॥ पश्चाज्जाते कुमारेच स्वक्षेत्रे वात्मनोयदि ॥ तस्यसर्वंप्रकर्त्तव्यं पुत्रोपिब्रह्मविद्भवेत् ॥ कन्यकायदिसंजाता पश्चात्तस्यमहात्मनः ॥ एकवर्णाथवाप्यन्या सवर्णासाचसुव्रता ॥ भवत्येवनसंदेहः तस्य स्वान्वयजाअपि ॥ मुच्यन्तेनात्रसंदेहः पितरोनरकादपि ॥ मुच्यंतेसर्वकर्माणि मातृतः पितृतस्तथा ॥ कालकृतेद्विजेभूमौ खने द्वापिदहेतवा ॥ पुत्रकृत्यमशेषंवा कृत्वादोषोनविद्यते ॥ कर्मणाचोत्तरेणैव गतिरस्यमहात्मनः ॥ ब्रह्मणाकथितंसर्वं मुनीनांभावितात्म नाम् ॥ पुरासनत्कुमाराग्राच्छ्रुतंचैवनियोगतः ॥ एतद्वःकथितंसर्वं घृणयातेनधीमता ॥ कृष्णद्वैपायनायैवकथितंब्रह्मसूनुना ॥ प्रसादात्त स्यदेवस्य वेदव्यासस्यधीमतः ॥ ज्ञातंमयाकृतंचैव नियोगाद्देवतस्यतु ॥ एतद्वःकथितंसर्वं रहस्यंसर्वसिद्धिदम् ॥ नैवदुष्टायदातव्यं नचाभक्तायसुव्रत इति॥अस्यलिंगपुराणोक्तप्रयोगस्यव्याख्याहेमाद्रिणोक्तावक्ष्यते॥सूतःश्रोतॄन्प्रत्याह॥श्राद्धमार्गेजीवच्छ्राद्धाद्यधिकारे क्रमंप्रकारंविशेषदेशकालादिरूपंमृत्युकालेमरणकाले ॥ समासन्नेजीवन्नेवेतिसत्त्वशुद्धिद्वारेणतत्त्वज्ञानलाभान्मुच्यतएव इत्यर्थः॥ अग्रत इतिमध्येस्थंडिलादिभ्योऽर्चार्चनार्थात्प्राग्दिशि॥मध्यस्थंडिलाद्देवार्चनात्प्राग्दिशीत्यर्थः॥ कुंडंस्थंडिलानंतरं वा होमार्थंकार्यम्॥एतैर्व क्ष्यमाणैर्ब्रह्मादिमंत्रैः स्थंडिले ब्रह्मादीन्संपूज्य ॥ तैरेवाग्नौसमिदादीन्जुहुयात्॥ आत्मनोद्धृत्येति आत्मस्थानितत्त्वानिभूतानिचतत्त न्मंत्रप्रकाशितान्यनेकशः ॥ समुद्धृत्यपृथक्कृतानीवभावयित्वा ॥ ततोदेवतामुद्दिश्यजुहुयात्॥ततस्तत्तत्त्वंशुद्धं भावयेत्॥अत्रनमोंतः पूजायांस्वाहांतोहोमेमंत्रः ॥ तत्रब्रह्मादित्रि प्रथमाष्टकेतत्तद्देवानांपूजाहोमौ तथासर्वादिपशुपत्यंतानांसपत्नीकानांधरादितत्त्वयुक्तानांच

पूजाहोमौ एवंसृष्टिक्रमे द्विचतुर्विंशतिमंत्रानुक्त्वा संहारे तद्वैपरीत्यप्रदर्शनायग्रथमाष्टकप्रान्तमंत्रमाद्यत्वेनोदाहरतिॐशिवायसत्यमित्या
दिएवमितिसृष्टिक्रमेणप्रागुक्तविरिंच्यादिशिवान्तदेवताष्टकमंत्रेषु पुनःसंहारक्रमेणाग्निशिवायसत्यंस्वाहा इत्यादि ब्रह्मणेस्वाहेत्यंततथा
पशुपतिपत्न्यादिसर्वान्तमुक्तक्रमेणसंपूज्य घृतचरुसमित्क्रमात प्रत्येकंहोतव्यम् ॐ सर्वैत्यादिकेवलाज्यहोममंत्रस्तत्रसर्वंधरामितिवा
क्यत्रयान्तेभुवः स्वाहेतितृतीयः ॐ भूर्भुवः स्वाहेतिचतुर्थोमंत्रः ॥ एवंपृथक् पृथगिति तथा शिवस्यपत्नीत्येते चत्वारोमंत्राऊह्याःएवं
भवजलंमेछिंधिजिह्वायांरसंभवमेऽघंजहि भूःस्वाहेत्यादिभिरूहितैश्चतुर्भिमंत्रैर्होमः ॥ तथाविरजमंत्रैश्च तथाप्राणेनिविष्ट इत्यादिषण्मं
त्रैश्चश्राद्धोक्तः स्वगृह्योक्तः पितृपितामहप्रपितामहाद्युद्देशेनहोमश्च॥एवंसप्ताहं प्रत्यहंहुत्वासप्तमेदिने भुवादितत्तद्देवतोद्देशात् विप्रानभ्य
र्च्यसर्वादिभ्योऽष्टौपिंडादेयाः।एवंकृतेजीवच्छ्राद्धेस्वबांधवेमृतेनाशौचंनसूतकम्।एवंतस्मादुत्पन्नःपुत्रोपिपित्रादिजातकर्मादिनासंस्कार्य्यः
सचज्ञानीभवेत्व एवंदुहिताच तथाचैतत्सन्ततौयोगिनोजायन्तेइति॥इतिजीवच्छ्राद्धप्रयोगःसमाप्तः॥अथकुष्ठिमरणविधानं तत्रयमः॥मृत
स्यकुष्ठिनोदेहं निखनेद्गोष्ठभूमिषु॥वासरत्रितयंपश्चादुद्धृत्यान्यत्रतंदहेत्॥नगंगाप्लवनंकार्यंनिक्षेपेविधिरुच्यते॥षडब्दव्रतपूर्णेनविधानांत्यं
कर्तुंचरेत्।ततोस्थिसंचयंतस्यगंगायांप्रक्षिपेत्सुधीः।मासिमासिततःकुर्यान्मासिश्राद्धानिपार्वणात्।इत्येतत्कुष्ठिमरणेकथितंशास्त्रकोविदैः
इति ॥ अस्यदाहकरणेप्रायश्चित्तमुक्तं (भविष्ये)शृणुकुष्ठगणंविप्र उत्तरोत्तरतोगुरुम्॥विचार्चिकाद्दुश्चर्मा चर्चरीयस्तृतीयकः॥विकचूर्व्र
णताम्रौचकृष्णश्वेतेतथाष्टकम्॥इत्युक्त्वा॥मृतेतुप्रापयेत्तीर्थमथवातरुमूलकम्।नपिंडंनोदकंकार्यंनचदानक्रियांचरेत्॥षण्मासीयत्रिमासी
यमृतःकुष्ठीकदाचन ॥ यदिस्नेहाच्चरेद्दाहं यतिश्चांद्रायणंचरेत्॥(कौर्मे)क्रियाहीनस्यमूर्खस्य महारोगिणएवच॥यथेष्टाचरणस्याहुर्मरणां

तमशौचकम् ॥ महारोगास्तु॥वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः॥अर्शांसिग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः।इतिकुष्ठिमरणविधानम्॥
(अथरजस्वलामृतौ मदनरत्नेस्मृत्यन्तरे) उदक्यासूतिकावापि मृतास्याद्यदितांतदा ॥ अशौचेत्वनतिक्रान्ते दाहयेदन्तरायदि॥उद्धृते
नतुतोयेन स्नापयित्वातुमंत्रतः ॥ आपोहिष्ठेतितिसृभिर्हिरण्यवर्णाश्चतसृभिः ॥ पवनानुवाकेन यदंतीतिचसप्तभिः ॥ ततोयज्ञपवित्रे
ण गोमूत्रेणाथतेद्विजाः ॥ स्नापयित्वान्यवसनेनाच्छाद्यशवधर्मतः ॥ दाहादिकंततःकुर्यात्प्रजापतिवचोयथा ॥ इति ॥ यज्ञपवित्रं
आपोअस्मानिति ॥ गृह्यकारिकायाम् ॥ अन्तरिक्षमृतायेच वह्नावप्सुप्रमादतः ॥ उदक्यासूतिकानारी चरेच्चान्द्रायणत्रयम् इति ॥
(अथगार्भिणीमृतौ मदनरत्ने शौनकः) गर्भिण्युदक्यासंस्कारं शिशुसंस्कारमेवच ॥ प्रवक्ष्यामिसमासेन शौनकोहंद्विजन्मनाम् ॥
गर्भिणीमरणेप्राप्ते गोमूत्रेणजलैःसह ॥ आपोहिष्ठादिभिर्मंत्रैः प्रोक्ष्यभर्तासमास्थितः ॥ प्रेतंश्मशानेनीत्वाऽथोल्लिख्यसव्योदरंततः ॥
पुत्रमादायजीवंश्चेत्स्तनंदत्त्वाप्रसुतायतु ॥ यस्तेस्तनःशशइत्यृचाग्रामेनिधायच ॥ उदरंचाऽव्रणंकुर्यात्पृषदाज्येनपूर्यच ॥ मृद्भस्मकुशगो
मूत्रैरापोहिष्ठादिभिस्त्रिभिः ॥ स्नाप्यचाच्छाद्यवासोभिः शवधर्मेणदाहयेत् ॥ इति (तत्रैव षडशीतिमते) गार्भिण्यांमृतायांदक्षिणाशिर
संनिधायतस्यानाभिरंध्रात्सव्यमुदरंचतुरंगुलंहिरण्यगर्भेतिमंत्रांतेछित्त्वागर्भश्चेदप्राणस्तंप्रक्षाल्यनिखनेत्सयदिजीवन् ॥ जीवत्वंममपुत्रक
इत्युक्त्वाक्षेत्रयेत्वेतिपंचभिर्मंत्रैः स्नापयित्वाहिरण्यमन्तर्धायप्रमोनिवायव्याहृतिभिरभिमंत्र्य ॥ यस्तेस्तनः शशयइतिस्तनंपाययित्वा
शिशुंग्रामंप्रापयेत् ॥ गर्भच्छेदस्थलेशतायुधायेतिपंचाहुतीर्हुत्वा प्राणायस्वाहापूष्णेस्वाहा इत्यनुवाकाभ्यां व्याहृत्यावाज्यंहुत्वा
भिन्नमुदरंसूत्रेणसंग्रथ्यघृतेनानुलिप्यब्राह्मणायतिलान्गांभूमिंसुवर्णंदद्यादथयथोक्तेनकल्पनेनदहेत् ॥ (गृह्यकारिकायामपि)यदागर्भवती

नारी सशल्यासंस्थिताभवेत् ॥ कुक्षिभित्त्वाततःशल्यंनिर्हरेद्यदिजीवति ॥ प्रमीतनिखनेत्तंतु प्रायश्चित्तमतःपरम् ॥ सात्रयस्त्रिंशताकृच्छ्रै
शुद्ध्यतेशल्यदोषतः ॥ सगर्भदहनेतस्या वर्णजंवधपातकम् ॥ प्रायश्चित्तंचरित्वातु शुद्ध्यन्तिपापकारिणः ॥ दग्ध्वातुगर्भसंयुक्तां
त्रिरब्दंकृच्छ्रमाचरेत् इति ॥ गर्भिणीमृतविधानम् ॥ ॥ (चतुर्दश्यां शस्त्रहतानामेकोद्दिष्टमेवकर्त्तव्यमित्यत्र कारणमुक्तं हेमाद्रौ
नागरखण्डे) ॥ आनर्त्त उवाच ॥ कस्माच्छस्त्रहतानांच प्रोक्ताश्राद्धेचतुर्दशी ॥ एकोद्दिष्टंकुतःश्राद्धं कारणंप्रब्रवीहिमे॥भर्तृयज्ञउवाच ॥
बृहत्कल्पेपुराराजन्हिरण्याक्षोमहासुरः ॥ बभूवबलवाञ्छूरः सर्व्वदेवभयंकरः ॥ ब्रह्माप्रतोषितस्तेन विधायविविधंतपः ॥ कृष्णपक्षे
चतुर्दश्यां नभस्येमासिसंस्थिते ॥ ब्रह्मोवाच ॥ परितुष्टोस्मितेवत्स प्रार्थयस्वयथेप्सितम् ॥ अदेयमपिदास्यामि दुर्लभंयत्सुरासुरैः ॥ हि
रण्याक्षउवाच॥ भूताःप्रेताःपिशाचाश्च राक्षसादैत्यदानवाः॥ बुभुक्षिताःप्रधावन्ति मांनित्यंपद्मसंभव ॥ पितृपक्षेकृतेश्राद्धेकन्यासंस्थेदिवा
करे ॥ एतस्मिन्नहनिप्रायस्तृप्तिःस्याद्वर्षसंभवा ॥ तदेषामत्रदिवसे तृप्त्युपायंकुरुप्रभो ॥ ब्रह्मोवाच ॥यःकश्चिन्मानव श्राद्धं स्वपितृभ्यः
प्रदास्यति ॥ पितृपक्षेचतुदश्यां नभस्येमासिसंस्थिते ॥ प्रेतानांराक्षसानांच भूतानांतद्भविष्यति ॥ एवमुक्त्वाततोब्रह्मा गतश्चादर्शनं
नृप ॥ हिरण्याक्षोपिसंहृष्टः स्वीमयेवगृहंययौ ॥ यच्चशस्त्रहतानांच तस्मिन्नहनिदीयते ॥ एकोद्दिष्टंनरै श्राद्धं तत्तेवक्ष्यामिकारणम् ॥
संख्येशस्त्रहतायेच निर्विकल्पेनचेतसा ॥ युध्यमानानतेमर्त्यं जायन्तेमनुजाःपुनः ॥ प्राङ्मुखायेनहन्यन्ते पलायनपरायणाः ॥ तेभ
वंतिनराःप्रेता एतदाहपितामहः ॥ सम्मुखाअपियेदैन्यं हन्यमानावदंतिच ॥ पश्चात्तापंचवाकुर्य्युःप्रहारैर्जर्जरीकृताः ॥ तेऽपिप्रेताभवं
तीह मनुःस्वायंभुवोब्रवीत् ॥ कदाचिच्चित्तचलनं शूराणांसंप्रजायते ॥ तेषामपिदिनेतत्र देयंप्रेतत्वशंकया ॥ अपमृत्युगतानांच सर्वैं

षामेवदेहिनाम् ॥ प्रेतत्वंजायतेयस्मात्तस्मात्तेषांहितदिनम् ॥ श्राद्धार्हंपार्थिवश्रेष्ठ विशेषेणप्रकीर्त्तितम् ॥ एकोद्दिष्टंप्रकर्त्तव्यं तस्मात्तत्र
दिनेनरैः॥ सपिंडीकरणादूर्ध्वं तत्तेवक्ष्यामिकारणम् ॥ यदिप्रेतत्वमापन्नः कदाचित्तत्पिताभवेत् ॥ तृप्त्यर्थंतस्यकर्त्तव्यं श्राद्धंतस्यदिनेनृप।
पितामहाद्यास्तत्राह्नि श्राद्धंनार्हंतिकुत्रचित् ॥ अथचेद्भ्रान्तितोद्याद्भ्रियतेराक्षसैस्तुतत् ॥ ब्रह्मणोवचनाद्राजन्भूतप्रेतैश्चदानवैः ॥
तेनैकोद्दिष्टमेवात्र कर्त्तव्यंनतुपार्वणम् ॥ पितृपक्षेचतुर्दश्यां कन्यासंस्थेदिवाकरे ॥ एतस्मात्कारणाच्छ्राद्धं पार्वणंनविधीयते ॥ तस्मिन्नह
निसंप्राप्ते व्यर्थंश्राद्धंभवेद्यतः ॥ इतिचतुर्दशीश्राद्धनिरूपणीयइतिहासः ॥ ॥ अथजीवत्पितृकश्राद्धकालाः (तत्र कात्यायनः)
सपितुःपितृकृत्येषु अधिकारोनविद्यते ॥ नजीवन्तमतिक्रम्य किंचिद्द्यादितिश्रुतिरिति ॥ (अत्रापवादोमैत्रायणीयपरिशिष्टे) उद्वा
हेपुत्रजनने पित्र्येष्ट्यांसौमिकेमखे ॥ तीर्थेब्राह्मणआयाते षडेतेजीवत पितुःइति ॥ जीवत्पितृकस्यषडेतेश्राद्धकाला इत्यर्थः॥पित्र्येष्ट्यां
चातुर्मास्येषुतथापिंडपितृयज्ञेच सौमिकेमखे सोमादौपुरोडाशात्पिंडदानेच। इति (अन्योपिविशेषस्तत्रैव) अन्वाष्टक्येगयाप्राप्तौ सत्यां
यच्चमृतेहनि ॥ मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति । यत्तुदर्शश्राद्धंगयाश्राद्धं श्राद्धंचापरपाक्षिकम् । नजीवत्पितृकःकुर्यात्तिलैःकृष्णै
स्तुतर्पणमितिगयाश्राद्धनिषेधकंवचनम् ॥ तत्तु गयाश्राद्धोद्देशेनगत्वागयाश्राद्धंनकर्त्तव्यमित्येतत्परम् ॥ पूर्वोक्तवाक्यंतुदैवाद्गयाप्राप्तौ
सत्यां श्राद्धविधायकम् इति ॥ अथजीवत्पितृककर्तृकश्राद्धविचारः ॥ (तत्र पारिजातनिर्णयामृतयोर्मनुः) ध्रियमाणेतुपितरि पूर्वेषा
मेवनिर्वपेत् ॥ विप्रवद्वापितंश्राद्धे स्वकंपितरमाशयेत् ॥ इतिपूर्वेषांपितामहादीनामित्यर्थः ॥ पितामहेजीवति पितृप्रपितामहयोर्मृतयो
स्तत्रैवसएवाह ॥ पितायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः । पितुःसनामसंकीर्त्य कीर्त्तयेत्प्रपितामहम् । पितामहोवातच्छ्राद्धे भुंजीतेत्यत्र

वीन्मनुः। इति । वृत्तः मृतः । पितुः स नामसंकीर्त्यैति अस्मत्पितुः पितामहः पितुः प्रपितामहः पितुर्वृद्धप्रपितामह इति स्वप्रपितामहा दिनाम पिंडदानादिषु गृह्णीयादित्यर्थः।अत्र मनुनाजीवतः पितामहस्य भोजनमुक्तं तथापि प्रत्यक्षार्चनस्यनिषिद्धत्वात् पितामहंविहाय पितृप्रपितामहवृद्धप्रपितामहेभ्यो देयमिति ॥ पितरिपितामहेचजीवतिप्रपितामहादीनांत्रयाणांश्राद्धं कुर्यात् ॥ (तदुक्तं हेमाद्रिपारिजात निर्णयामृतेषु विष्णुना) ॥ पितरि जीवति यः श्राद्धं कुर्यात् ॥ येषांपिताकुर्यात्तेषांकुर्यात् पितरि पितामहेचजीवति येषां पितामहःपित रिपितामहे प्रपितामहेचजीवतिनैवकुर्य्यात् ॥ यस्यपिताप्रेतःस्यात् सपित्रेपिण्डंनिधाय प्रपितामहात्पराभ्यांद्वाभ्यांदद्यात् ॥ यस्यपिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिण्डंनिधाय पितामहात्पराभ्यांदद्यात् यस्यपितामहः प्रेतःस्यात्सतस्मै पिण्डंनिधाय प्रपितामहात् पराभ्यांदद्यात्॥यस्य पितापितामहश्चप्रेतौस्यातां सताभ्यां पिण्डौदत्त्वापितामहाय प्रपितामहायदद्यात् इति॥मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ॥ मंत्रोहेनयथान्याय्यं शेषाणांमंत्रवर्जितम् इति ॥ अत्र पितृवन्मातामहेजीवति तत्पित्रादिभ्यः यथा तत्र त्रिषु जीवत्सु नैवकुर्यादिति ॥ एवं मातृजीवनेपीतिशूलपाणिकालादर्शप्रभृतयः ॥ (अत्र विशेषः) मृतमातृमातामहकोपिजीवत्पितृकः स्वसंस्का रेपितुर्मातृपितामहीप्रपितामह्यः पितुःपितृपितामहप्रपितामहाः पितुर्मातामहप्रमातामहवृद्धप्रमातामहाः इतिपार्वणत्रयमुद्दिश्य श्राद्धंकुर्य्यात् ॥ नतुस्वमातृमातामहपार्वणोद्देशः ॥ पितरिमातामहेचजीवति स्वसंस्कारे पितामहस्यमातृपितामहीप्रपितामह्य इत्याद्युद्देशः ॥ एवंप्रपितामहेपियोज्यम् इति ॥ माणवकपितुः प्रवासादिना असन्निधाने भ्रात्रादि माणवकस्य पितुर्मातृपितामही प्रपितामह्य इत्याद्युद्देशः कार्य्यः ॥ मृतपितृकमाणवकसमावर्त्तने पितृव्यभ्रात्रादिरस्य माणवकस्य मातृपितामहीप्रपितामह्य

इत्यादि उच्चारयेत् ॥ भ्रात्रादेरभावेस्वयमेवस्वपितृभ्योदद्यात् ॥ एवंजीवत्पितृकोपि पितुरसन्निधाने भ्रात्रादेरभावेपितुः पि
तृभ्यःस्वयमेवदद्यात् ॥ एवंविवाहादिष्वपिज्ञेयम् ॥ मृतपितृकस्योपनयनादिसंस्कारंपितृव्यमातुलादिः कुर्वंस्तस्यसंस्कार्य्यस्यपितृ
पितामहेत्याद्युच्चार्यश्राद्धंकुर्यात् ॥ जीवतः पितुरसन्निधानेन कुर्वन्मातुलादिरस्यसंस्कार्यस्यपितुर्जनकादीनुद्दिश्यकुर्यान्नतुसंस्कार्यस्य
मृतानपिमात्रादीनिति ॥ इति जीवत्पितृककर्तृकाभ्युदयिकश्राद्धनिर्णयः ॥ अथमलमासेश्राद्धनिर्णयः ॥ मलमासोनामसंक्रान्तिविर
हितोमासः संक्रांतिद्वययुतोवा॥(तथाच हेमाद्रौकाठकगृह्ये) यस्मिन्मासेनसंक्रांतिः संक्रांतिद्वयमेववा ॥ मलमासःसविज्ञेयो मासेत्रिं
शत्तमेभवेदिति ॥ अत्रद्विविधेपिमलमासे महालयादिश्राद्धंनकुर्यात्॥(तथाचहेमाद्रिपारिजातयोः काठकगृह्यपरिशिष्टम्) तथामलेऽ
नन्यगतिं नित्यांनैमित्तिकींक्रियाम्॥सोमयागादिकर्म्माणि नित्यान्यपिमलिम्लुचे॥पुष्टीष्ट्याग्रहणाधानचातुर्मास्यादिकान्यपि।महाल
याष्टकाश्राद्धोपाकर्मोत्सर्गकर्म्मयत्॥स्पष्टंमासविशेषाख्यं विहितंवर्जयेन्मले इति (तत्रैव भृगुरपि) वृद्धिश्राद्धंतथासोममग्न्याधेयंमहा
लयम्॥राज्याभिषेकंकाम्यंच नकुर्य्याद्भानुलंघिते इति॥अथमलमासेश्राद्धकर्म्मणांप्रतिप्रसवाः॥(तत्र हेमाद्रौयमः) गर्भेवार्द्धुषिकेकृत्ये श्रा
द्धकर्म्मणिमासिके॥सपिंडीकरणेनित्येनाधिमासोविधीयते॥तीर्थस्नानंजपोहोमो यवव्रीहितिलादिभिः॥जातकर्मान्त्यकर्म्माणि नवश्राद्धं
तथैवच॥मघात्रयोदशीश्राद्धं श्राद्धान्यपिचषोडश ॥ चंद्रसूर्यग्रहेस्नानं श्राद्धदानजपादिकम् ॥ कार्याणिमलमासेपि नित्यंनैमित्तिकं
तथा इति ॥ अत्रतीर्थस्नानश्राद्धादिप्रासंगिकं नत्वपूर्वंतस्यमलमासेस्मृत्यन्तरेनिषेधात्॥ (हेमाद्रौ मात्स्ये) चंद्रसूर्यग्रहेचैव मरणेपुत्रज
न्मनि ॥ मलमासेपिदेयंस्यादत्तमक्षय्यकारकम् ॥ (सौरपुराणे) एकोद्दिष्टंतुयच्छ्राद्धं तन्नैमित्तिकमुच्यते॥तत्कार्यंमलमासेपि काला

धिक्येपिधर्मतः॥(हेमाद्रौ व्यासः) जातकर्मणियच्छ्राद्धं दशश्राद्धंतथैवच ॥ मलमासेपिकर्त्तव्यं व्यासस्यवचनं यथा॥ (शातातपः) प्रतिसंवत्सरेश्राद्धे नाधिमासंविवर्जयेत्॥मलमासेपिकर्त्तव्यं श्राद्धंयत्प्रतिवत्सरम्॥इति॥एतदाद्यसांवत्सरिकविषयंमलमासेसांवत्सरिकं कृत्वातदुत्तरमासेपुनस्तदहर्वर्त्तनीयमित्येवंविधमतानुसारि चेदंवचनमत्रवचनानि ॥ (तत्र हेमाद्रौ वृद्धवसिष्ठः) असंक्रांतेपिकर्त्तव्य माब्दिकंप्रथमंद्विजैः॥ तथैवमासिकंश्राद्धं सपिंडीकरणंतथा॥ (पैठीनसिः) मलमासमृतानांच श्राद्धंयत्प्रतिवत्सरम् ॥ मलमासेपिकर्त्त व्यं नान्येषांतुकदाचन॥(यमः) आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे॥त्रयोदशेतुसंप्राप्ते कुर्वीतपुनराब्दिकम्(वसिष्ठोपि)आब्दि काद्यनिसंप्राप्ते अधिमासोभवेद्यदि ॥ श्राद्धद्वयंप्रकुर्वीत एवंकुर्वन्नमुह्यति इति॥तदेवंसपिंडीकरणान्तानिप्रेतश्राद्धानि॥पुत्रजन्मनिमित्त कमुपरागनिमित्तकमाद्यंसांवत्सरिकमनाद्यपि मलमासमृतानांवत्सरिकंगजच्छायाश्राद्धममावास्याश्राद्धंप्रत्यहमनुष्ठीयमानंचनित्यश्राद्धं वर्जयित्वाऽन्यच्छ्राद्धंमलमासेनानुष्ठेयमितिस्थितम् ॥ इतिमलमासश्राद्धनिर्णयः ॥ अथपिंडशब्देपुन्नपुंसकयोर्विचारः ॥ अत्रयद्यपि सूत्रस्मृतिपुराणेषुसर्वत्रपिंडशब्दस्यपुँल्लिंगताएवदृश्यते ॥ तथापि पिंडपितृयज्ञेकात्यायनेन असावेतत्ते इति नपुंसकदर्शनात् यजुर्वेदि नांदर्शमहालयप्रभृतिश्राद्धेषु एतत्तेऽन्नंठपिंडंवा इतिगम्यते ॥ प्रविश्यपिंडींकुडचस्यपिंडंपतति इतिमहाभाष्यादौपिंडशब्दस्यस्त्रीनपुंस कयोरपिप्रयोगदर्शनात्।विरूपाआमगर्भाश्चज्ञाताज्ञाताःकुलेमम॥तेभ्यः पिंडंमयादत्तमक्षय्यमुपतिष्ठतामितिहेमाद्रौलौगाक्षिणाविशेषोपा दानात् हेमाद्रियजुर्वेदीयश्राद्धतत्त्वप्रभृतिमहानिबंधेषूक्तत्वाच्चनपुंसकेन निर्देशोनविरुध्यते॥(उपाध्यायकर्कस्तु)एतत्तेऽन्नम् इत्यध्याहारः कार्य्य इत्युक्तवान्॥ तत्तु पिंडपितृयज्ञीयदर्शश्राद्धविषयकम्॥दर्शव्यतिरिक्तेषुतु एतत्तेपिंडमितिअध्याहारःकार्य्यः॥ (अनयोश्चव्यवस्था

माह हेमाद्रौ लौगाक्षिः) महालयेगयायांच प्रेतश्राद्धेदशाहिके। पिंडशब्दप्रयोगःस्यादन्नमन्यत्रकीर्त्तयेत् इति । महालये भाद्रपदापरपक्षेती
र्थविशेषेवाप्रेतश्राद्धे इति सपिंडीकरणान्तेषुश्राद्धेषु दशाहिकेश्राद्धव्यतिरेकेणापिदशाहनिर्वर्त्येपिंडदाने अन्नशब्दस्यचानन्तरंस्वधाश
ब्दःप्रयोज्यइत्यर्थः ॥ तत्रेदंप्रयोगवाक्यम् ॥ ॐअमुकगोत्राऽस्मत्पितरमुकशर्मन्एतत्तेऽन्नंपिंडंवास्वधानमः ॥ इति ॥ प्रेतश्राद्धेतुसर्वत्र
एषपिंडइतिपुँल्लिंगत्वेनएवउच्चारःकार्य्यः ॥ सर्वनिबंधेषुपुँल्लिंगत्वेनैवोपदेशात् इति विवेकः ॥ इतिपिंडशब्देपुन्नपुंसकयोर्विचारः ॥ अथरु
चिस्तवः ॥ (हेमाद्रौ मार्कण्डेयपुराणे) रुचिरुवाच ॥ नमस्येऽहंपितॄन्श्राद्धे येवसन्त्यधिदेवताः॥देवैरपिहितर्प्यन्ते येचश्राद्धेस्वधोत्तरैः॥
॥१॥ नमस्येऽहंपितॄन्स्वर्गे येतर्प्यन्तेमहर्षिभिः ॥ श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः॥२॥नमस्येहंपितॄन्स्वर्गे सिद्धाःसंतर्पय
न्तियान् ॥ श्राद्धेषुदिव्यैःसकलैरुपहारैरनुत्तमैः ॥३॥ नमस्येऽहंपितॄन्भक्त्या येऽर्च्यन्तेगुह्यकैरपि । तन्मयत्वेनवाञ्छद्भिर्ऋद्धिमात्यंति
कींपराम् ॥ ४ ॥ नमस्येहंपितॄन्मर्त्यैरर्च्यन्तेभुवियेसदा ॥ श्राद्धेषुश्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः ॥ ५ ॥ नमस्येऽहंपितॄन्विप्रैरर्च्यन्ते
भुवियेसदा ॥ वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥६॥ नमस्येऽहंपितॄन्येवै तर्प्यन्तेऽरण्यवासिभिः ॥ वन्यैःश्राद्धैर्यताहारैस्तपो
निर्धूतकिल्बिषैः ॥७॥ नमस्येऽहंपितॄन्विप्रैर्नैष्ठिकब्रह्मचारिभिः ॥ येसंयतात्मभिर्नित्यं संतर्प्यन्तेसमाधिभिः ॥८॥ नमस्येहंपितॄन्श्राद्धै
राजन्यास्तर्पयन्तियान् ॥ कव्यैरशेषैर्विधिवल्लोकत्रयफलप्रदान् ॥ ९ ॥ नमस्येऽहंपितॄन्वैश्यैरर्च्यन्तेभुवियेसदा ॥ येचकर्माभिरतै
र्नित्यंपुष्पधूपान्नवारिभिः ॥१०॥ नमस्येहंपितॄन्श्राद्धैर्यैःशूद्रैरपिभक्तितः ॥ संतर्प्यन्तेजगत्यत्र नाम्नाज्ञाताः सुकालिनः ॥११॥ नमस्येऽ
हंपितॄन्श्राद्धैः पातालेयेमहासुरैः ॥ संतर्प्यन्तेस्वधाहारास्त्यक्तदंभमदैःसदा ॥१२॥ नमस्येऽहंपितॄन्श्राद्धैरर्च्यन्तेयेरसातले ॥ भोगैरशेषै

र्विधिवन्नागैः कामानभीप्सुभिः ॥१३॥ नमस्येऽहंपितॄञ्छ्राद्धैः सपैंःसन्तार्पितान्सदा ॥ तत्रैवविधिवन्मंत्रभोगसंपत्समन्वितैः ॥ १४ ॥
पितॄन्नमस्येनिवसन्तिसाक्षाद्येदेवलोकेचतथान्तरिक्षे ॥ महीतलेयेचसुरादिपूज्यास्तेमेप्रयच्छंतुमयोपनीतम् ॥ १५ ॥ पितॄन्नमस्येपरमा
त्मभूता येवैविमानेनिवसंतिमूर्त्ताः ॥ यजन्तियानस्तमलैर्मनोभिर्योगीश्वराः क्लेशविमुक्तिहेतून् ॥१६॥ पितॄन्नमस्येदिविदेवदत्त स्वधा
भुजः काम्यफलाभिसंधौ ॥ प्रदानशक्ताः सकलेप्सितानां विमुक्तिदायेऽनभिसंहितेषु ॥१७॥ तृप्यंतुतेऽस्मिन्पितरःसमस्ता इच्छावतांये
प्रदिशंतिकामान् ॥ सुरत्वमिंद्रत्वमतोऽधिकंवा सुतान्पशून्स्वानिबलंगृहाणि ॥१८॥ सोमस्ययेरश्मिषुयेऽर्कबिम्बे शुक्लेविमानेचसदाव
सन्ति ॥ तृप्यन्तुतेऽस्मिन्पितरोऽन्नतोयैर्गंधादिनापुष्टिमितोव्रजन्तु ॥१९॥ येषांहुतेऽग्नौहविषाचतृप्तिर्येभुञ्जतेविप्रशरीरभाजः ॥ येपिंड
दानेनमुदंप्रयांति तृप्यन्तुतेऽस्मिन्पितरोऽन्नतोयैः ॥२०॥ येखड्गिमांसेनसुरैरभीष्टैः कृष्णैस्तिलैर्दिव्यमनोहरैश्च ॥ कालेनशाकेनमहर्षिव
र्यैः संप्रीणितास्तेमुदमत्रयान्तु ॥२१॥ कव्यान्यशेषाणिचयान्यभीष्टान्यतीवतेषाममरार्चितानाम् ॥ तेषांतुसान्निध्यमिहास्तुपुष्पगंधान्न
भोज्येषुमयाकृतेषु ॥२२॥ दिनेदिनेयेप्रतिगृह्णतेर्चां मासान्तपूज्याभुवियेऽष्टकासु ॥ येवत्सरान्तेऽभ्युदयेचपूज्याः प्रयान्तुतेमेपितरोत्रतृ
प्तिम् ॥२३॥ पूज्याद्विजानांकुमुदेंदुभासो येक्षत्रियाणांचनवार्कवर्णाः॥ तथाविशांयेकनकावदाता नीलीनिभाःशूद्रजनस्ययेच ॥२४॥ तेऽ
स्मिन्समस्तामम पुष्पगंधधूपान्नतोयादिनिवेदनेन।तथाग्निहोमेनचयांतुतृप्तिं सदापितृभ्यः प्रणतोस्मितेभ्यः ।२५। येदेवपूर्वाण्यतितृप्ति
हेतोरश्नंतिकव्यानिशुभाहुतानि ॥ तृप्ताश्चयेभूतिसृजोभवंति तृप्यन्तुतेऽस्मिन्प्रणतोऽस्मितेभ्यः ॥२६॥ रक्षांसिभूतान्यसुरांस्तथोग्रान्निर्णा
शयन्तस्त्वशिवंप्रजानाम् । आद्याःसुराणाममरेशपूज्यास्तृप्यन्तुतेस्मिन्प्रणतोस्मितेभ्यः ॥२७॥ अग्निष्वात्ताबर्हिषदआज्यपाःसोमपा

स्तथा॥व्रजन्तुतृप्तिंश्राद्धेऽस्मिन्पितरस्तर्पितामया ॥२८॥ अग्निष्वात्ताःपितृगणाःप्राचींरक्षन्तुमेदिशम्॥तथाबर्हिषदःपान्तुयाम्यांयेपितर
स्तथा ॥२९॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥३०॥ सर्वतश्चाधिपस्तेषां यमोरक्षांकरो
तुमे ॥ विश्वोविश्वभुगाराध्यो धर्म्योधन्यःशुभाननः ॥ ३१ ॥ भूतिदोभूतिकृद्भूतिः पितॄणांयेगणानव ॥ कल्याणःकल्पांतकर्त्ता कल्पः
कल्पतराश्रयः ॥ ३२ ॥ कल्पताहेतुरनघः षडिमेतेगणाःस्मृताः ॥ वरोवरेण्योवरदः पुष्टिदस्तुष्टिदस्तथा ॥ ३३ ॥ विश्वपातातथाधाता
सप्तैवैतेतथागणाः ॥महान्महात्मामहितो महिमावान्महाबलः ॥ ३४ ॥ गणाःपंचतथैवैते पितॄणांपापनाशनाः॥सुखदोधनदश्चान्यो धर्म
दोऽन्यश्चभूतिदः ॥ ३५ ॥पितॄणांकथ्यतेचैतत्तथागणचतुष्टयम् ॥ एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलंजगत् ॥ ३६ ॥ तेमेऽनुतृप्तास्तुष्यं
तु यच्छंतुचसदाहितम् ॥ इतिश्रीमार्कंडेयपुराणेरुचिकृतपितृस्तवः ॥ अथसप्तार्चिस्तोत्रम् (तत्रैव) ॥ रुचिरुवाच॥अमूर्त्तानांचमूर्त्तानां
पितॄणांदीप्ततेजसाम्॥नमस्यामिसदातेषां ध्यानिनांदिव्यचक्षुषाम् ॥ १ ॥ इंद्रादीनांचनेतारो दक्षमारीचयोस्तथा ॥ सप्तर्षीणांतथान्येषां
तान्नमस्यामिकामदान् ॥ २ ॥ मन्वादीनांमुनींद्राणां सूर्य्याचंद्रमसोस्तथा॥ तान्नमस्याम्यहंसर्व्वान्पितरश्चार्णवेषुये ॥ ३ ॥ नक्षत्राणां
ग्रहाणांच वाय्वग्न्योनभसस्तथा ॥ द्यावापृथिव्योश्चतथा नमस्यामिकृतांजलिः ॥४॥ देवर्षीणांग्रहाणांच सर्वलोकनमस्कृतान् ॥ अक्ष
य्यस्यसदादातॄन्नमस्येऽहंकृतांजलिः ॥ ५ ॥ नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु ॥ स्वयंभुवेनमस्यामि ब्रह्मणेयोगचक्षुषे ॥
॥ ६ ॥ सोमाधारान्पितृगणान्योगमूर्त्तिधरांस्तथा ॥ नमस्यामितथासोमं पितरंजगतामहम् ॥७॥ अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄ
नहम् ॥ अग्नीषोममयंविश्वं यतएतदशेषतः॥८॥येतुतेजसियेचैते सोमसूर्य्याग्निमूर्त्तयः॥जगत्स्वरूपिणश्चैव तथाब्रह्मस्वरूपिणः ॥ ९ ॥

तेभ्योखिलेभ्योयोगिभ्यः पितृभ्योयतमानसाः॥नमोनमोनमस्तेमे प्रसीदन्तुस्वधाभुजः॥१०॥पितरऊचुः॥स्तोत्रेणानेनचनरो योस्मास्तो
ष्यतिभक्तितः ॥ तस्यतुष्टावयंभोगानात्मज्ञानंतथोत्तमम्॥११॥शरीरारोग्यमर्थंच पुत्रपौत्रादिकंतथा॥प्रदास्यामोनसंदेहो यच्चान्यदभिवा
ञ्छितम्॥ १२ ॥ तस्मात्पुण्यफलंलोके वाञ्छद्भिःसततंनरैः ॥ पितृणांचाक्षयांतृप्तिं स्तव्याःस्तोत्रेणमानवैः ॥ १३ ॥ वाञ्छद्भिःसततंस्त
व्याः स्तोत्रेणानेनवैयतः॥श्राद्धेचयइमंभक्त्या अस्मत्प्रीतिकरंस्तवम्॥१४॥पठिष्यंतिद्विजाग्र्याणां भुंजतांपुरतःस्थिताः॥स्तोत्रश्रवणसं
प्रीत्या सन्निधानेपरेकृते ॥ १५ ॥ अस्माकमक्षयंश्राद्धं तद्भविष्यत्यसंशयम्॥यद्यप्यश्रोत्रियंश्राद्धं यद्यप्युपहतंभवेत् ॥१६॥ अन्यायोपा
त्तवित्तेन यदिवाकृतमन्यथा॥अश्राद्धार्हैरुपहतैरुपहारैस्तथाकृतम् ॥१७॥ अकालेऽप्यथवाऽदेशे विधिहीनमथापिवा ॥ अश्रद्धयावापु
रुषैर्दंभमाश्रित्यवाकृतम् ॥ १८ ॥ अस्माकंतृप्तयेश्राद्धं तथाप्येतदुदीरणात् ॥ यत्रैतत्पठ्यतेश्राद्धे स्तोत्रमस्मत्सुखावहम् ॥ १९ ॥
अस्माकंजायतेतृप्तिस्तत्रद्वादशवार्षिकी ॥ हेमंतेद्वादशाब्दानि तृप्तिमेतत्प्रयच्छति ॥२०॥ शिशिरेद्विगुणाब्दांश्च तृप्तिंस्तोत्रमिदंशुभम्॥
वसंतेषोडशसमास्तृप्तयेश्राद्धकर्मणि ॥२१॥ ग्रीष्मेचषोडशैवैतत्पठितंतृप्तिकारकम् ॥ विकलेपिकृतेश्राद्धे स्तोत्रेणानेनसाधिते ॥ २२ ॥
वर्षासुतृप्तिरस्माकमक्षयाजायतेरुचे ॥ शरत्कालेऽपिपठितं श्राद्धकालेप्रयच्छति ॥ २३ ॥ अस्माकमेतत्पुरुषैस्तृप्तिंपंचदशाब्दिकाम् ॥
यस्मिन्गृहेचलिखितमेतत्तिष्ठतिनित्यदा॥२४॥सन्निधानंकृतेश्राद्धे तत्रास्माकंभविष्यति॥तस्मादेतत्त्वयाश्राद्धे विप्राणांभुंजतांपुरः॥२५॥
श्रावणीयंमहाभाग अस्माकंपुष्टिहेतुकम् ॥ इत्युक्त्वापितरस्तस्य स्वर्गता मुनिसत्तम ॥ इतिमार्कंडेयपुराणोक्तंपितृस्तोत्रम् ॥ इति
श्रीबीकानेरस्यविषयान्तंगतश्रीरत्नगढनगरनिवासिना श्रीवसिष्ठकुलोद्भवेनश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचन्द्रसूनुना श्रीमहादेवभक्त
वाजसनेयिनागौडपंडितश्रीचतुर्थीलालशर्मणाविरचितेगौडीयश्राद्धप्रकाशेपूर्वखंडेमिश्रप्रकरणम्।३।समाप्तोयंनिर्णयविधायकःपूर्वखण्डः।

श्रीगणेशायनमः ॥ अथमुख्यकल्पानुकल्पपद्धतिखण्डोद्वितीयः प्रारभ्यते॥तत्रतावद्दर्शश्राद्धमधिकृत्यपूर्वदिनकृत्यम्॥तत्रकर्त्ता पूर्वेद्युरन
रामिषमेकवारंभुक्त्वा तद्दिने रात्रौप्रदोषान्ते असंभवे श्राद्धदिनेप्रातर्वा श्राद्धारंभसमयेवा यथावकाशंविप्रगृहंगत्वाब्राह्मणनिमंत्रणंकुर्यात्।
ततः निमंत्रितोविप्रः श्राद्धकर्त्ताच द्विर्भोजनं वेदाध्ययनं दूरगमनं भारोद्वहनं मैथुनं श्रमं हिंसां क्रोधं त्वरां प्रमादं कलहं क्षौरं च वर्जयेत्॥
शुचिःसत्यवादी क्षमी ब्रह्मचारीच भवेत् ॥ पूर्वमङ्गीकृतनिमंत्रणे नान्यन्निमंत्रणमिच्छेत् ॥ नान्यंप्रतिग्रहंगृह्णीयात् ॥ नान्यत्रगमनादि
नाकुतपादिश्राद्धकालातिक्रमंकुर्यात् ॥ नचाऽस्नातः श्राद्धेभुंजीत॥अथश्राद्धदिनपूर्वाह्णकृत्यम्॥कर्त्ताब्राह्मेमुहूर्त्ते उत्थाय यथोपदेशं शौच
विधिंकृत्वाऽऽचम्य दंतधावनंतुनकुर्यात्॥ततोनद्यादौस्नात्वा प्रक्षालितनूतनश्वेतवाससीपरिधाय संध्यादिनित्यावश्यकंसमा य विविक्तां
पाकभूमिं गोमयादिना संस्कुर्यात् ॥ तत्रनूतनताम्रादिपात्रेषु यथाशक्त्युत्कृष्टमन्नंभक्ष्यभोज्यादिनानाप्रकारमनेकव्यंजनयुतं स्वयंयज
मानः पक्तुमारभेत्॥अशक्तश्चेद्यदि बांधवैः स्त्रीद्वारा वापाचयेत्॥अमातृपितृवंशजां पाखण्डां पुंश्चलीं पतितां वंध्यां विधवाम् अन्यगो
त्रजां व्यंगकर्णीं चतुर्थदिनेस्नातामपि गर्भिणींच पाकार्थेवर्जयेत् ॥ पाकस्थानंशुद्धवस्त्रादिभिर्वेष्टयेत् ॥ एवंसमाप्तेचपा
के श्राद्धभूमिंगोमयोदकेनोपलिप्य ज्वलदंगारैःसंशोध्य गौरमृत्तिकयाऽऽच्छाद्यतिलान्सर्षपांश्चविकिरेत्॥तत्रश्राद्धसामग्रींसंपाद्य दिनस्य
षण्मुहूर्त्तानंतरं द्विजानाहूय तेभ्योदंतधावनंतैलमुद्वर्त्तनंस्नानोपकरणंच नानाविधताम्रपात्रस्थं यथाचारं स्वयमुपगम्यवैश्वदेविकब्राह्मणपू
र्वकंदद्यात् ॥ ततः श्राद्धगृहाग्रतो गोमयोपलिप्तायांभूमौगोमूत्रेणद्विहस्तमात्रदीर्घविस्तारमुदक्प्लवमेकंचतुरस्रंमंडलंविधाय तद्दक्षिणतो
दक्षिणप्लवं चतुर्हस्तदीर्घविस्तारमपरं चतुरस्रंचकुर्यात् ॥ एतत्तुविप्रस्यक्षत्रियवैश्ययोस्तुत्रिकोणवर्तुलौज्ञेयौ॥अथसव्येनउत्तरमंडलेसय

वकुसुमौप्रागग्रौद्वौद्वौकुशौ विन्यस्यमण्डलमभ्यर्च्य तत्र ब्राह्मणार्थं पीठेविन्यसेत्॥ ततोदक्षिणमंडले अपसव्येन सतिलकुसुमानिदक्षि
णाग्रैकैककुशानि विन्यस्य नेपालकंबलादीन्यासनानिस्थापयेत्॥ ततोऽपराह्ने ब्राह्मणान्स्नातान् यजमानसवर्णैनाहूतान् प्रांगणे शुचिः
शुक्लद्विवासाः कृतांजलिर्दर्भेषुतिष्ठन् स्वागतमितिब्रूयात् ॥ सुस्वागतमितितैरुक्ते ॥ पूर्वकृतमण्डलद्वये आसनेषु प्राङ्मुखान् देवब्राह्म
णान् उदङ्मुखान्पितृब्राह्मणानुपवेशयेत्॥ अथ श्राद्धारंभसमयमधिकृत्यनिमंत्रणप्रकारोलिख्यते॥ तत्रादौ आचम्य सव्येन दक्षिणंजा
न्वाच्य विप्रकरे पुष्पचंदनतांबूलानिदत्त्वा ॥ दक्षिणकरेण ब्राह्मणदक्षिणजानुस्पृष्ट्वा॥देशकालौसंकीर्त्य ॥ अद्यकरिष्यमाणपार्वणश्राद्धे
पित्रादित्रयसंबंधिविश्वेदेवश्राद्धार्थंयुवामहमामंत्रये ॥ इतिपित्रादित्रयसंबंधिविश्वेदेवश्राद्धार्थं द्वौविप्रौनिमंत्र्य एवमेव मातामहादिदेवसं
बंध्यर्थमपिद्वौविप्रौनिमंत्रयेत॥ अथवा पित्रादित्रयसंबंधि मातामहादित्रयसंबंधि विश्वेदेवश्राद्धार्थं युवामहमामंत्रये इतिब्राह्मणद्वयंनिमं
त्रयेत् ॥ निमंत्रितोस्मीतिप्रतिवचनम् ॥ ततः ॥ अक्रोधनैःशौचपरैः सततंब्रह्मचारिभिः ॥ भवितव्यंभवद्भिश्च मयाचश्राद्धकारि
णा ॥१॥ पूर्वदिननिमंत्रणपक्षेतु सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यंभवद्भिर्नः श्वोभूतेश्राद्धकर्मणीति जपेच्छृणुयाद्वा॥
भवितव्यमिति प्रतिवचनम्॥ततोऽपसव्येनवामंजान्वाच्य ब्राह्मणदक्षिणजानुस्पृष्ट्वा ॥ ॐ अद्यकरिष्यमाणपार्वणश्राद्धे पितृश्राद्धार्थं
त्वामहमामंत्रये।इतिपितृब्राह्मणंनिमंत्र्यएवंपितामहादिपंचानामपिश्राद्धार्थंचनिमंत्रयेत्।सर्वत्रनिमंत्रितोस्मीतिप्रतिवचनम्।ततःअक्रोधनैः
शौचपरैः सततंब्रह्मचारिभिः ॥ भवितव्यंभवद्भिर्नोऽद्यतनेश्राद्धकर्मणीत्यादिनियमाञ्छ्रावयेत् ॥ भवितव्यमितिप्रतिवचनम् ॥
एवमस्मिन्पक्षे दशाऽष्टौवा ब्राह्मणाभवंति अत्राऽशक्तौ देवे उभयत्रैकैकं पित्रादित्रिके एकं मातामहादित्रिकेचैकं निमंत्रयेत्॥अत्रपक्षे च

त्वारः ॥ एकोदैवेतंत्रेण पित्रादावेको मातामहादौचैक इतित्रयोवा ॥ यद्वा षण्णामेकः दैवेचैक इतिद्वोवानिमंत्रयेत् ॥ अथपादप्रक्षाल
नादिप्रयोगः ॥ यज्ञोपवीती उदङ्मुखः ॥ ॐपुरूरवार्द्रवसंज्ञका विश्वेदेवा इदंवः पाद्यंस्वाहानमः ॥ इतिपाद्यमुपनीय वारंवारमभिनंद्य
विनीतः स्वयमेवतेषांक्रमेणपादौप्रक्षालयेत् ततोऽपसव्येन ॐ अद्यामुकगोत्र पितरमुकशर्मन् वसुरूप इदंतेपाद्यंस्वधानम इत्युच्चार्य्य
विनीतः सन्पुनः पुनरभिनंद्यपितृब्राह्मणपादौप्रक्षालयेत् ॥ एवंपितामहादिब्राह्मणपादावपिप्रक्षालयेत् ॥ ततःसव्येनाऽर्घ्यपात्रंगृहीत्वा
ॐपुरूरवार्द्रवसंज्ञकाः विश्वेदेवा इदमर्घ्यंवः स्वाहानमः ॥ इत्युभयत्र ब्राह्मणहस्तयोर्यवपुष्पगंधोदकयुतमर्घ्यंदद्यात् ॥ ततोऽपसव्येन
ॐ अद्यामुकगोत्रपितरमुकशर्मन् वसुरूप इदमर्घ्यंते स्वधानम इत्युच्चार्य्य ब्राह्मणहस्तयोरर्घ्यंदद्यात् ॥ एवमेवपितामहादिपंचभ्यः ॥
ततः ॐ पुरूरवार्द्रवसंज्ञका विश्वेदेवा इदमाचनीयंवः स्वाहानमः ॥ इत्याचमनार्थंजलंब्राह्मणेभ्योदद्यात् ॥ततोऽपसव्येनॐअद्यामुकगो
त्रपितरमुकशर्मन् वसुरूप इदमाचनीयंते स्वधानम इतिपितृब्राह्मणायाऽऽचमनार्थं जलंदत्त्वा पितामहादिपंचभ्योपिदद्यात्॥ततःसव्ये
नस्वयमप्याचामेत्॥ततो ब्राह्मणैः सह श्राद्धभूमिमागत्य ॥ अन्नाभिप्रायेण सिद्धमित्युक्त्वाब्राह्मणान्गृहीत्वा पूर्वकल्पितान्यासनानि उप
स्पृश्य अत्रासध्वमिति देवान्प्राङ्मुखान् पितृनुदङ्मुखानुपवेशयेत् ॥ ततस्तेषांपादयोरधस्ताद्दक्षिणाग्रंकुशत्रयंप्रत्येकंदत्त्वा प्रत्यासन
समीपेतिलतैलेनश्राद्धाऽपवर्गस्थायिनोदीपान्दद्यात्।।तेषांरक्षाद्विजैरेवकार्य्या।काककुक्कुटादीञ्छ्राद्धापहंतॄनपसारयेत्॥श्राद्धदेशावरणंच
कुर्यात् ॥ अथश्राद्धप्रयोगप्राक्कालीनश्राद्धदिनकृत्यम् ॥ तत्रकर्त्ताब्राह्मणानांपुरतः स्वासनेप्राङ्मुखउपविश्यपवित्रधारणंकृत्वासव्येनाऽऽ
चम्यकर्मपात्रद्वयं जलेनापूर्यतत्रगंधपुष्पयवतिलकुशान्निक्षिप्यॐकर्मपात्रंसंपन्नमितिब्रूयात्।सुसंपन्नमित्यनुज्ञातः।ॐअपवित्रःपवित्रोवास

र्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरःशुचिः ॥ ॐ पुंडरीकाक्षः पुनात्त्विवितिपठित्वाकुशत्रयेण श्राद्धदेयद्रव्याणिस्वा
त्मानंचसिंचेत् ॥ ततःॐवैष्णव्यैनमः ॥ॐकाश्यप्यैनमः ॥ ॐअक्षयायैनमः ॥ ॐभूम्यैनमः इतिनत्वाश्राद्धदेशंगयात्मकत्वेन तदेकदे
शस्थंगदाधरंचध्यात्वा तयोः ॐभगवत्यैगयायैनमः ॥ ॐभगवतेगदाधरायनमः ॥ इति मनोवाक्कायैर्नमस्कारंकुर्यात् ॥ ततःकुशत्र
यतिलजलान्यादाय देशकालौसंकीर्त्य ॐअद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणांसपत्नीकानांवसुरुद्रा
दित्यस्वरूपाणां तथाऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानांवसुरुद्रादित्यस्वरूपाणां सदैवं
पार्वणश्राद्धं पितृतृप्तिकामोहंकरिष्ये इतिसंकल्प्य ॐ कुरुष्व इतिब्राह्मणानुज्ञातःसप्रणवव्याहृतिकांगायत्रींत्रिर्जपित्वा ॥ ॐ देव
ताभ्यःपितृभ्यश्च महायोगिभ्यएवच नमःस्वाहायैस्वधायै नित्यमेवनमोनम इतित्रिर्जपेत् ॥ ततः सव्यापसव्याभ्यां दैवपै
तृकप्रदेशयोः यवान्तिलगौरसर्षपांश्चविकिरेत् ॥ (तत्रमंत्रः) ॐनमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्ष
तांसर्वतोदिशः ॥ ततः ॐ तिलारक्षंतुअसुराद्दर्भारक्षंतुराक्षसात् ॥ वह्निर्वैश्रोत्रियंरक्षेदतिथिःसर्वरक्षक इतिमंत्रेणतिलकुशान्
द्वारदेशेक्षिप्त्वा ॐ अग्निष्वात्ताःपितृगणाः प्राचींरक्षंतुमेदिशम् ॥ तथाबर्हिषदःपांतु याम्यांयेपितरःस्थिताः ॥ प्रतीची
माज्यपास्तद्वदुदीचीमपिसोमपाः ॥ अधोर्ध्वमपिकोणेषु विकोणेषुचसर्वशः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधि
पस्तेषां यमोरक्षांकरोतुमे ॥ वायुभूतपितॄणांच तृप्तिर्भवतुशाश्वती ॥ इत्यनेनाऽधस्तादूर्ध्वकोणेषुचसर्वत्रतिलान्गौरसर्षपांश्चविकी
र्यदक्षिणेवामेवाकटिभागेयथाचारंनीवीबंधंकुर्यात् ॥ ततः सव्येनकस्मिंश्चित्पात्रेजलंगृहीत्वा दर्भैरालोड्य ॥ॐयद्देवादेवहेडनंदेवासश्चकृ

मावयम्॥अग्निर्मातस्मादेनंसोविश्वान्मुंचत्वꣳहंसः॥१॥ यदिदिवायदिनक्तमेनांꣳसिचकृमावयम्॥वायुर्मातस्मादेनंसोविश्वान्मुंचत्वꣳहंसः॥२॥यदिजाग्रत्यदिस्वप्नएनांꣳसिचकृमावयम्॥सूर्योमातस्मादेनंसोविश्वान्मुंचत्वꣳहंसः॥३॥ इतिकूष्मांडसूक्तेनाऽभिमंत्र्य ॥ ॐउदक्यादिदुष्टदृष्टिपातात्शूद्रादिसंपर्कदोषाच्चपाकादीनांपवित्रताऽस्तुदेशकालपाकपात्रद्रव्योपहारश्रद्धासंपदस्तु इति पाकादीन् संप्रोक्ष्यहरयेनिवेदयेत् ॥ अथासनादिदानम्॥तत्रतावत्॥उदङ्मुखःसजघनंदक्षिणंजान्वाच्ययज्ञोपवीत्यंतर्जानुकरोजलयवसमन्वितम् कुशत्रयमृज्वेवादाय ॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाः विश्वेदेवा इदमासनं वोनम इत्युच्चार्य्य द्विजहस्ते जलमासिच्य कंबलाद्यासनदक्षिणभागस्योपरि देवतीर्थेन पूर्वाग्रंकुशत्रयंप्रक्षिपेत्॥एवंमातामहादिदेवेभ्योपिदद्यात्॥ततोदक्षिणामुखः प्राचीनावीती पातितवामजानुर्द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् सपत्नीकवसुरूप इद मासनं ते स्वधा इत्युच्चार्य्यविप्रहस्तेजलंदत्त्वा कंबलाद्यासनवामभागस्योपरि पितृतीर्थेन मोटकं दक्षिणाग्रमुत्सृजेत् ॥ एवमेवपिता महादिपंचभ्योपिदर्भासनानिदद्यात् ॥ ततः सव्यादिना ॐपुरूरवार्द्रवसंज्ञकान् विश्वान्देवानहमावाहयिष्ये ॥ इति देवब्राह्मणान्पृष्ट्वा ॐआवाहयेत्यनुज्ञातःसयवकरो देवब्राह्मणाङ्गुष्ठौगृहीत्वा॥ॐविश्वेदेवासऽआगंतशृणुतामऽइमꣳहवम्॥ एदंबर्हिर्निषीदत।इत्यनेनावाह्य ॐयवोसियवयास्मद्द्वेषोयवयारातीःइत्यनेनयवान्विकीर्य ॥ ॐविश्वेदेवाःꣳशृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ॥ येऽअग्निजिह्वाऽउ तवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ इतिजपेत् विश्वेदेवोत्पत्तिनाम्नोरज्ञाने।ॐआगच्छंतुमहाभागा विश्वेदेवामहाबलाः।येय

१ दक्षप्रजापतेर्दुहितृरिविश्वविद्यार्पाधर्माद्विश्वेदेवाः सम्भुत्पन्नाइतिवैश्वदेविकीसुत्पत्तिमद्धस्मरन् ॥

त्रयोजिताःश्राद्धेसावधानाभवन्तुते ॥ इतिश्लोकोऽप्युच्चारणीयः ॥ ततोऽपसव्यादिना ॥ ॐपितॄनहमावाहयिष्ये ॐमातामहानावाहयिष्येइतिपृष्ट्वा ॐआवाहयेत्यनुज्ञातः॥सतिलकरोब्राह्मणाङ्गुष्ठंक्रमेणगृहीत्वा ॐउशंतंस्त्वानिधीमह्युशन्त सामिधीमहि॥उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे इत्यावाह्य ॥ ॐ अपहताऽअसुरारक्षाᳬंसिव्वेदिषदः ॥ इतितिलान्श्राद्धदेशे विकीर्य्य ॐ आयन्तुनःपितरःसोम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः॥अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवंतुतेऽवंत्वस्मान्॥इतिजपेत्॥ततःसव्याऽपसव्याभ्यांअर्घपात्रेष्ववद्धसुपवित्रमेकैकमुपरिधृत्वा ॥ ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥शंयोरभिस्रवन्तुनः ॥ इतिप्रत्येकंजलंप्रक्षिप्य ॥ देवपात्रेषु ॐ यवोऽसियवयास्मद्द्वेषो युवयारातीः ॥ इतियवान्विकीर्य॥पित्रादिपात्रषट्के ॐ तिलोऽसिसोमदैवत्यो गोसवोदेवनिर्मितः ॥ प्रत्नमद्भिः पृक्तःस्वधयापितॄँल्लोकान् प्रीणाहिनःस्वधानमः ॥ इतितिलान्प्रक्षिपेत् ॥ ततोऽष्टसुपात्रेषुतूष्णीमेवगंधपुष्पतुलसीदलानिनिक्षिपेत् ॥ ततःसव्येनदेवार्घपात्रसंपत्तिरस्तुइति कृतांजलिर्देवब्राह्मणाम् पृच्छेत् ॐअस्तुदेवार्घ्यपात्रसंपत्तिरित्यनुज्ञातः पात्रं वामहस्तेकृत्वा तत्रस्थंपवित्रंदेवविप्रदक्षिणकरेदत्त्वाकिंचिदुदकंचदत्त्वा॥ ॐयादिव्याआपःपयसासंबभूवुर्य्याऽअन्तरिक्षा उतपार्थिवीर्याः॥हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सᳬंस्योनाः सुहवाभवंतु ॥ इतिमंत्रंपठित्वा ॥ कुशत्रयगवजलान्यादाय ॐ अद्यास्मत्पित्रादित्रयसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवा एषवोहस्तार्घः स्वाहानमः ॥ इतिदक्षिणहस्तेन देवतीर्थेन पवित्रोपरि अर्घंदत्त्वा पवित्रसहितमर्घपात्रं पुरतःस्थापयेत् ॥ एवमेवमातामहादिदेवेभ्योप्यर्घंदद्यात् ॥ ततोऽपसव्यादिना पितृपात्रसंपत्तिरस्त्वितिकृतांजलिःपितृब्राह्मणान्पृच्छे

त् ॥ अस्तुपैत्र्यार्घ्यपात्रसंपत्तिरितिप्रतिवचनानन्तरंपात्रं गृहीत्वाविप्रदक्षिणकरेपवित्रंदत्त्वा ॥ ॐयादिव्याऽआपइतिपठित्वा द्विगुणभु
ग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्र अस्मत्पितरमुकशर्मन्सपत्नीक वसुरूपएषतेहस्तार्घःस्वधाइतिदक्षिणहस्तपितृती
र्थेन यथाजलंपततितथा ब्राह्मणहस्तस्थपवित्रोपरि अर्घंदद्यात् ॥ साऽवशेषमर्घपात्रंचपुरतः स्थापयेत् ॥ एवमेवपितामहादिपंचभ्यो
पिदद्यात् ॥ ततः सव्यंकृत्वा ॐविश्वेभ्योदेवेभ्यः स्थानमसीत्युक्त्वापवित्रजलयुतंदेवार्घपात्रद्वयं ब्राह्मणदक्षिणपार्श्वेऽसंचरदेशेउत्तानमे
वस्थापयेत् ॥ ततोऽपसव्यादिनापितामहप्रपितामहार्घपात्रस्थानिजलतिलगंधपुष्पादीनिपितृपात्रेकृत्वाएवमेव प्रमातामहादिपात्रस्थ
जलादीनि मातामहपात्रेकुर्यात् ॥ ततः सव्यंकृत्वा प्राङ्मुखः पुत्रकामः पितृपात्रस्थजलेन मुखमार्जनम् ॥ आयुष्कामो दक्षिणपाणिनाने
त्रांजनंचकुर्यात् ॥ अथवा यजमानः स्वयमन्योवा ॐ आपःशिवाः शिवतमाःशांताः शांततमास्ते कृण्वंतुभेषजम् ॥१॥ इत्यनेनाभिषिं
चेत् ॥ ततोऽपसव्यंकृत्वा ॐ पितृभ्यः स्थानमसीति प्रथमंपितृपात्रं पितृब्राह्मणवामप्रदेशभूमावधोमुखं स्थापयेत् तदुपरि पितामह
पात्रं तदुपरिप्रपितामहपात्रंचदद्यात् ॥ एवम् ॐ मातामहेभ्यः स्थानमसीत्युक्त्वामातामहपात्रंन्युब्जीकृत्य प्रमातामहवृद्धप्रमातामहपात्रा
भ्यामाच्छादयेत् ॥ एतानिचषट्कपात्राणि दक्षिणादानपर्यंतंनोद्धरेन्नचालयेत् ॥ अथगंधादिदानम् ॥ सव्यादिकृत्वा विप्रकरेषुजलमा
सिच्य गंधपुष्पधूपदीपवस्त्रादिप्रत्येकंधृत्वा ॥ कुशत्रययवजलान्यादाय ॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रवसंज्ञका विश्वे
देवा एतानिगंधपुष्पधूपदीपतांबूलवासांसिवोनम इत्युच्चार्य्ययथाविभवंदद्यात् ॥ एवमेवमातामहादिदेवेभ्योपिसंकल्प्यदद्यात् ॥ ततः अयं
वोगंध इत्यभिधाय ब्राह्मणहस्तेषु प्रत्येकमर्पयेत् ॥ ॐसुगंध इतितैरुक्ते ॥ ॐइमानिवःपुष्पाणि इतिपुष्पाणिनिवेदयेत् ॥ ॐसुपुष्पाणीति

तैरुक्ते ॥ ॐअयंवोधूपः ॥ ॐसुधूपः ॥ ॐअयंवोदीपः ॥ ॐसुदीपः। ॐएतानिवोवासांसि ॥ ॐसुवासांसि इति तैरुक्ते ॥ इत्यादिक्रमेण प्रत्येकं ब्राह्मणेभ्यः प्रतिपादयेत् ॥॥तैश्चपुष्पंशिखातिरिक्तदेशेनाधार्यम्॥ अत्रावसरे अन्यदपि तांबूलयज्ञोपवीताभरणकमंडलुप्रभृतीनि फलार्थितयादद्यात् ॥ततः कृतांजलिः कर्त्ता विश्वेषां देवानामर्चनं संपूर्णमस्त्विति द्विजान्प्रति ब्रूयात्ॐअस्त्वर्चनं संपूर्णमितिद्विजा ब्रूयुः ॥ततोऽपसव्यादिनापितृद्विजकरेषु जलमासिच्य गंधपुष्पादि प्रत्येकंसन्निधाय ॥ द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐअद्यामुक गोत्र अस्मत्पितरमुकशर्मन् सपत्नीक वसुरूप एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितुभ्यंस्वधा इति पित्रेगंधाद्युत्सृज्य एवमेव पितामहादिपंचभ्योपिदद्यात् ॥ ततः ॐएषवोगंध इति ब्राह्मणहस्तेषु गंधंनिवेदयेत्॥ॐसुगंध इति तैरुक्ते॥ॐएतानिवःपुष्पाणि॥ ॐसुपुष्पाणि ॥ॐएषवोधूपः ॥ ॐसुधूपः ॥ॐएषवोदीपः ॥ ॐसुदीपः ॥ ॐइमे यज्ञोपवीते॥ ॐसुयज्ञोपवीते॥ ॐएतानिवोवासांसि ॥ ॐसुवासांसि इति तैरुक्ते॥ इत्यादिक्रमेण पित्रादिषट्कब्राह्मणेभ्यःप्रत्येकं गंधादिप्रतिपाद्यकृतांजलिर्भूत्वा ॐ पितॄणामर्चनं संपूर्णमस्त्वितिद्विजान्प्रतिब्रूयात्ॐअस्त्वर्चनं संपूर्णमितिविप्राः वदेयुः ॥एवंगंधाद्यर्चनं विधाय सव्याऽपसव्याभ्यां भोजनपात्रस्थापनदेशंसंमार्ज्य ॥ नीवारचूर्णेनगौरमृत्तिकयावाप्रणीताग्निभस्मनावारिणावा ब्राह्मणादिषु चतुरस्रत्रिकोणवर्तुलमंडलानिविप्रान्वेष्टयित्वाकुर्यात् ॥ ततोभोजनपात्राणिदत्त्वाहस्तप्रक्षालनार्थंप्रत्येकंजलंदद्यात् ॥ अथाग्नौकरणम्॥(तत्रसाग्निनाऽग्नौनिरग्निना।स्वाहादिदैविकधर्मयुक्तेनयज्ञोपवीतिना देवविप्रकरे ॥ अथवास्वधादिपैतृकधर्मयुक्तेनप्राचीनावीतिनापितृविप्रकरेहोमःकार्य्यः ॥ तत्रयजुर्वेदिनांतुनियमेनएवप्राचीनावीतिनास्वाहाकारेणहोमः) ॥ अथव्यंजनक्षारवर्जितंघृताक्तमुष्णंश्राद्धान्नाग्रभागंकांस्यपात्रेणसमुद्धृत्य अपसव्यंकृत्वा पातितवामजानुदक्षिण

मुखः। ॐअग्नौकरणंकरिष्ये इतिपितृब्राह्मणंपृष्ट्वा ॐकुरुष्वइत्यनुज्ञातोभयक्रोधत्वरारहितःस्वदक्षिणकरेणपितृविप्रकरे।ॐअग्नयेकव्य
वाहनायस्वाहा इदमग्नयेकव्यवाहनाय ॥ ॐसोमायपितृमतेस्वाहा इदंसोमायपितृमते इत्याहुतिद्वयंजुहुयात् ॥ ततोऽग्नौकरणार्थोद्धृत
हुतशेषमन्नंपितामहादिपंचसुपात्रेषुदत्त्वापिंडार्थंचावशेषयेत् ॥ ततःसव्येनदेवपात्रेषु ॥ अपसव्येनपितृपात्रेषुच उष्णमन्नंसघृतम् अनेक
व्यञ्जनयुतंयथावत् परिविष्यसुशीतलजलसहितंपात्रंचसंस्थाप्याऽन्नंमधुनाऽभिघार्य्य ॐमधुव्वाताऽऋतायतेमधुंक्षरन्तिसिंधवः॥माद्ध्वी
र्न्नःसन्त्वोषधीः॥१॥ ॐमधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः मधुद्यौरस्तुनःपिता॥२॥ॐमधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः॥मा
द्ध्वीर्गावोभवन्तुनः॥३॥ॐमधुमधुमध्वित्यभिमंत्रयेत्। ततःसव्येनउत्तानपाणिभ्यांपित्रादिदेवपात्रमालभ्य। ॐ पृथिवीतेपात्रंद्यौरपिधानं
ब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा इतिजप्त्वा ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहाइत्येतांवैष्णवी
मृचमुच्चार्य्याऽधोमुखेनस्वदक्षिणकरेण अधोमुखमेवद्विजाङ्गुष्ठमन्नेगृहीत्वा ॥ ॐ विष्णोहव्यꣳरक्षइतियजुषाऽन्नेनिवेश्य ॥ इदमन्नं
इमाआपः इदमाज्यम् इदंहविरित्युक्त्वा ॐ अपहताऽअसुराराक्षाꣳसिवेदिषदः इतियवान् अन्नपात्रपरितोविकीर्य्यवामेनकरेणपात्रंस्पृशन्
दक्षिणकरेण कुशत्रययवजलान्यादाय ॐअद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवाः इदमन्नं हव्यं सोपस्करं परि
विष्ट परिवेक्ष्यमाणंचब्राह्मणतृप्तिपर्य्यंतम्अमृतरूपंवःस्वाहानमःइत्युदकंदेवतीर्थेनविप्रदक्षिणभागेभूमौनिक्षिपेत् एवमेवमातामहादिदे
वेभ्योप्युत्सृजेत्।ततोऽपसव्यादिना पितृपात्रंन्युब्जपाणिभ्यांन्यस्ताभ्यांस्पृष्ट्वाॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहो

मिस्वधाइतिपठित्वा ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपाँ सुरेइत्येतामृचंचजस्वाब्राह्मणाङ्गुष्ठमनखमधोमुखं ॐविष्णो
कव्यँ रक्ष इतियजुषाऽन्नेनिवेश्य। इदमन्नम् इमाआपः इदमाज्यम् इदंहविरित्युक्त्वा ॐ अपहताऽअसुरारक्षाँसि वेदिषदः इति तिलान्
अन्नंपात्रपरितोऽप्रदक्षिणेनविकीर्य्य। वामकरेणपात्रंस्पृशन्। ॐ अद्यामुकगोत्र अस्मत् पितरमुकशर्मन् सपत्नीक वसुरूप इदमन्नं कव्यं सोप
स्करंपरिविष्टं परिवेक्ष्यमाणं ब्राह्मणतृप्तिपर्य्यंतममृतरूपंतुभ्यंस्वधाइत्युदकं पितृतीर्थेनविप्रवामभागेभूमौक्षिपेत्।एवमेवपितामहादिपंच
भ्योप्युत्सृजेत्। ततः ॐअन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत्।।तत्सर्वमच्छिद्रमस्तुइतिप्रार्थ्य।।जुषध्वमिच्छातः।।इतिचोक्त्वा।।भवंतःप्राश
यन्तुइतिब्राह्मणेभ्यःसकृत्सकृदापोशानंदद्यात्।।तेचवाग्यमादिनियमवंतः ॐकारपूर्वंभुंजीरन्।श्राद्धकर्त्तातुतेष्वश्नत्सुव्याहृतित्रयपूर्वांसप्र
णवांगायत्रींत्रिःसकृद्वाजपेत्।तथापवित्रपाणिर्दर्भेष्वासीनः ॐमधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः माध्वीर्नःसन्त्वोषधीः।।१।।ॐमधुनक्त
मुतोषसोमधुमत्पार्थिवँरजः मधुद्यौरस्तुनः पिता।।२।।ॐमधुमान्नोवनस्पतिर्म्मधुमाँ २।। ऽअस्तुसूर्य्यः माध्वीर्गावोभवन्तुनः।।३।।इति
त्र्यृचम् ॐमधुमधुमध्वितिचजपेत्।। ततःसव्यंकृत्वादक्षिणामुखः।। ॐकृणुष्वपाजः प्रसितिन्नपृथ्वीं याहिराजेवामवाँऽइभेन।तृष्वीमनु
प्रसितिन्द्रूणानोऽस्तासिविध्यरक्षसस्तपिष्ठैः।।१।। ॐ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः।।तपूँष्यग्नेजुह्वापतङ्गान
सन्दितोविसृजविष्वगुल्काः।। २ ।। प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः।।योनोदूरेऽअघशंसोयोऽअन्त्य

ग्नेमाकिंष्टे॑व्यथिरादधर्षीत्॥३॥उदंग्नेतिष्ठुप्प्रत्यातनुंष्ष्वन्युमित्राँ २ऽओषतात्तिग्महेते॥योनोऽअरांतिर्ठ्ठसमिधानचक्क्रेनीचातंधक्ष्यतसन्न
शुष्कंम्॥४॥ऊर्द्धोभंवप्प्रतिंविद्ध्याद्ध्यस्म्मदाविष्कृणुष्ष्वदैव्यांन्यग्ने॥अवंस्थिरातनुंहियातुजूनांञ्जामिमजांमिम्प्रमृंणीहिशत्रून् ५॥अग्ग्ने
ष्ट्वातेजंसासादयामिइतिरक्षोघ्नीःपञ्चऋचःपठित्वा भूमिंतिलैरास्तीर्य्यपित्रादिकरूपतया ब्राह्मणान्ध्यायेत्॥ततःॐउदीरंतामवंरऽउत्परांसऽ
उन्न्मंद्ध्यमाः पितरंः सोम्म्यासंः॥असुंय्यऽईयुरंव्वृकाऽऋंतज्ञास्तेनोंवन्तुपितरोहवेंषु ॥ १ ॥ अङ्गिरसोनः पितरोनवंग्वाऽअथंवार्व्वाणो
भृगंवःसोम्यासंः ॥ तेषांवयर्ठ्ठसुंमतौयज्ञियांनामपिंभद्रेसौंमनसेस्यांम ॥२॥ येनंः पूर्व्वेपितरंः सोम्म्यासोंऽनूहिरे सोमपीथंव्वसिंष्ठाः॥तेभिं
र्य्यमःसंर्ठ्ठ रराणोहवीर्ठ्ठष्ष्युशन्नुशद्भिंः प्प्रतिकाममंत्तु ॥ ३ ॥ त्वर्ठ्ठ सोमप्प्रचिंकितोमनीषात्वर्ठ्ठ रजिष्ठमनुंनेषिपन्थांम् ॥ तवप्प्रणी
तीपितरोनऽइन्दोदेवेषुरत्नंमभजन्तधीरांः ॥४॥ त्वयाहिनंः पितरंः सोमपूर्व्वेकर्म्माणिचक्रुः पंवमानधीरांः॥व्वन्न्वन्नवांतःपरिधींऽरऽ
पोंर्णुव्वीरेभिरश्वैर्म्मघवांभवानः॥५॥त्त्वर्ठ्ठ सोमपितृभिंः संव्विदानोनुद्यावांपृथिवीऽआतंतन्थ॥तस्म्मैतऽइन्दोहविषांव्विधेमव्वयर्ठ्ठस्यां
मपतंयोरयीणाम्॥६॥ बर्हिषदःपितरऽऊत्यार्व्वागिमावोहव्याचंकृमाजुषद्ध्वंम् ॥ तऽआगतावंसा शन्तंमेनाथांनःशंयोरंरपोदंधात ॥७॥
आहम्पितॄन्त्सुविंत्राँ २ऽअवित्सिनपांतञ्चव्विक्रमेणञ्चव्विष्णोः॥बर्हिषदोयेस्वधयांसुतस्यभजंन्तपित्त्वस्तऽइहागंमिष्ठाः॥८॥ उपंहूताः
पितरंः सोम्म्यासोंबर्हिष्येषुनिधिषुंप्प्रियेषुं ॥ तऽआगंमन्ततऽइहश्श्रुंवन्त्वधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ९ ॥ आयन्तुंनः पितरंः

सोम्यासोग्निष्ष्वात्ताःपथिभिर्द्देवयानैः ॥ अस्मिन्न्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ॥ १० ॥ अग्निष्ष्वात्ताःपि
तरऽएहगच्छतसदःसदःसदतसुप्प्रणीतयः॥अत्ताहवीᳫंषिप्प्रयतानिबर्हिष्यथारयिᳫंसर्व्ववीरन्दधातन ॥११॥ येऽअग्निष्ष्वात्तायेऽ
अनग्निष्ष्वात्तामद्ध्येदिवःस्वधयामादयन्ते।तेभ्यःस्वराडसुनीतिमेतांयथावशन्तन्न्वङ्कल्पयाति।१२।अग्निष्ष्वात्तानृतुमतोहवामहे
नाराशᳫंसेसोमपीथंयऽआशुः ॥ तेनोव्विप्प्रासःसुहवाभवन्तुव्वयᳫंस्यामपतयोरयीणाम् ॥ १३ ॥ इतिपितृमन्त्राः ॥ ॐ
सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिᳫंसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदᳫंसर्व्वंय्यद्भूतंय्यच्चभाव्यं
म् ॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः ॥ पादोस्यव्विश्वाभूतानि
त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्व्यक्क्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततो
व्विराडजायतव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥५॥ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥
पशूँस्ताँश्चक्क्रेव्वायव्व्यानारण्या ग्राम्याश्चये ॥६॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे॥छन्दाᳫंसिजज्ञिरे तस्माद्यजुस्तस्मादजा
यत ॥ ७ ॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्ष
न्पुरुषञ्जातमग्ग्रतः॥तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषव्व्यदधुः कतिधाव्व्यकल्पयन् ॥ मुखङ्किमस्यासीत्कि

म्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः ॥ ऊरूतदस्ययद्वैश्यः पद्भ्याᳪशूद्रोऽअजायत ॥ ११ ॥
चंद्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥१२॥ नाभ्याऽआसीदन्तरिक्षᳪशीर्ष्णोद्यौः सम
वर्तत ॥ पद्भ्यांभूमिर्दिशः श्रोत्रात्तथालोकाँऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषा देवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्ज्य
ङ्ग्रीष्मइध्मः शरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५॥
यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानः सचन्तयत्र पूर्व्वेसाद्ध्याः सन्ति देवाः ॥१६॥ इतिपुरुष
सूक्तंच ॥ ॐ आशुःशिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषएकवीरःशतᳪसेनाऽअजयत्साकमिन्द्रः
॥१॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेण दुश्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहध्वंय्युधोनरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽ
इषुहस्तैः सनिषङ्गिभिर्व्वशीसᳪस्रष्टासयुधऽइन्द्रो गणेन ॥ सᳪसृष्टजित्सोमपाबाहुशर्द्ध्युग्ग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पते
परिदीयारथेनरक्षोहामित्राँऽअपबाधमानः ॥ प्रभञ्जन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेद्ध्यविताराथानाम् ॥ ४ ॥बलविज्ञायस्थविरः
प्रवीरःसहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽअभिसत्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिदङ्गोविदंव
ज्रबाहुञ्जयन्तमज्ज्मप्रमृणन्तमोजसा॥इमᳪसजाताऽअनुवीरयध्वमिन्द्रᳪसखायोऽअनुसᳪरभध्वम्॥६।अभिगोत्राणिसहसागाहमानोद

योव्वीरः शतमंन्युरिन्द्रः॥दुश्च्यवनःपृतनाषाडयुद्ध्योस्माकं सेनाऽअवतुप्प्रयुत्सु ॥७॥ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपुरऽए
तुसोमः॥देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥८॥इन्द्रस्यवृष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताᳬंशर्द्धऽउग्ग्रम्॥
महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात्॥९॥उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाᳬंसि। उद्वृत्रहन्वाजिनां
व्वाजिनान्युद्रथानाञ्जयतांयन्तुघोषाः॥१०॥ अस्माकमिन्द्रः समृतेषुध्वजेष्वस्माकंय्याऽइषवस्ताजयन्तु ॥ अस्माकंव्वीराऽउत्तरेभवन्त्व
स्म्मा ᳬंऽउदेवाऽअवताहवेषु॥११॥अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥ अभिप्रेहिनिर्द्दहहृत्सुशोकैरन्धेनामित्रास्तमसास
चन्ताम्॥१२॥अवसृष्टापरापतशरव्व्येब्रह्मसᳬंशिते॥गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः ॥१३॥ प्रेताजयतानरऽइन्द्रोवःशर्म्मय
च्छतु।उग्ग्रावःसन्तुबाहवोनाधृष्यायथासथ॥१४॥असौयो नामरुतःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना।ताङ्गूहततमसापव्रतेनयथामी
ऽअन्योऽअन्यन्नजानन्॥१५॥यत्रबाणाःसम्पतन्तिकुमाराव्विशिखाऽइव।तन्नऽइन्द्रोबृहस्पप्तिरदितिः शर्म्मयच्छतु व्विश्वाहाशर्म्म
यच्छतु ॥१६॥ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्।उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥
॥१७॥ इत्यप्रतिरथम्॥ॐसप्तव्याधादशार्णेषु मृगाःकालंजरेगिरौ ॥ चक्रवाकाःशरद्वीपे हंसाःसरसिमानसे॥तेऽभिजाताःकुरुक्षेत्रे ब्राह्म
णावेदपारगाः॥प्रस्थितादूरमध्वानं यूयंतेभ्योऽवसीदत ॥ इतिहविःस्तोत्रम् ॥ ॐयोगीश्वरंयाज्ञवल्क्यमित्यादियाज्ञवल्कीयगाथांचपठि

त्वासप्तार्चिस्तवादिकंपठेत् ॥अथसप्तार्चिस्तवम् ॥ मूर्तिंतानाममूर्त्तानां पितॄणाममितौजसाम् ॥ नमस्यामिसदातेषां ध्यायिनांदिव्यचक्षु षाम् ॥ १ ॥इन्द्रादीनांजनेतारो दक्षमारीचयोस्तथा ॥ सप्तर्षीणांतथाऽन्येषां तान्नमस्यामिकामदान् ॥२॥ मन्वादीनांजनेतॄँश्च सूर्याचंद्र मसोस्तथा ॥ तान्नमस्याम्यहंसर्वान्पितरश्चार्णवेषुच ॥ ३ ॥ नक्षत्राणांग्रहाणांच वाय्वग्निनभसान्तथा ॥ द्यावापृथिव्योश्चतथा नमस्या मिकृतांजलिः ॥४॥ देवर्षीणांजनेतॄंश्चसर्वदेवनमस्कृतान् ॥ अभयस्यसदादातॄन्नमस्येहंकृतांजलिः ॥५॥प्रजापतेःकश्यपस्य सोमायवरु णायच ॥ योगेश्वरेभ्यश्चतथा नमस्यामिकृतांजलिः ॥६॥ नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु ॥ स्वयंभुवेनमस्यामि ब्रह्मणेयोगचक्षु षे ॥ ७ ॥ यदाधाराःपितृगणा योगमूर्तिधराहिते ॥ नमस्यामिततःसोमं पितरंजगतामहम् ॥ ८ ॥ अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄन हम् ॥ अग्नीषोममयंविश्वं यतएतदशेषतः ॥९॥ येतुतेजोमयाश्चैते सोमसूर्याग्निमूर्तयः ॥ जगत्स्वरूपिणश्चैव तथाब्रह्मस्वरूपिणः ॥१०॥ तेभ्योऽखिलेभ्योयोगिभ्यःपितृभ्योयतमानसः॥नमोनमोनमस्तेमे प्रसीदंतुस्वधाभुजः॥ ११ ॥इत्यादीनिपवित्राणि अन्यान्यपिरुचिस्तव ब्रह्मादिस्तोत्राणिचयथारुचियथाशक्तिब्राह्मणान्श्रावयेत् ॥ वेणुवीणाप्रभृतिभिर्ब्राह्मणान्हर्षयन्माधुर्यादीन्व्यंजनगुणाननुकीर्त्तयन्यद्यत्ते च्छोपलभ्यतेतस्यतदुपनयन् मंदंमंदं भोजयेत्।अथतृप्तान्ज्ञात्वा अपसव्येन उच्छिष्टसन्निधौविप्राणामग्रतोभूमिं प्रोक्ष्यतत्रदक्षिणाग्रकुशा त्रयमास्तीर्य्यसर्वप्रकारमन्नंसव्यञ्जनमुद्धृत्यसतिलमेकीकृत्य ॥ ॐअग्निदग्धाश्चयेजीवायेऽप्यदग्धाःकुलेमम ॥भूमौदत्तेनतृप्यन्तुतृप्तायाा तुपरांगतिम् ॥ १ ॥ इतिमंत्रेणकुशोपरितदन्नंविकिरेत् ॥ ततःसव्यंकृत्वा आचम्यहरिंस्मृत्वाततोऽपसव्येनविप्रेभ्यःप्रत्येकं पितृब्राह्मणपूर्वकंसकृत्सकृदपोदत्त्वागायत्रीम् ॐमधुव्वाताऽऋतायतेइतित्र्यृचंमधुमधुमध्विवतिचजप्त्वा ॥ ॐतृप्ताःस्थइतिपृष्ट्वा

१ जनयितार इत्यर्थः ।

ॐतृप्ताःस्मः इतितैरुक्तेशेषमन्नंकिंक्रियतामितिपृच्छेत् ॥ इष्टैःसहभुज्यतामित्युक्ते ॥ पिंडानहंकरिष्ये इति पृच्छेत् ॥ ॐ कुरुष्वे त्यनुज्ञातः ॥ पित्रादिब्राह्मणोच्छिष्टसन्निधौ चतुरस्रंदक्षिणप्लवंरमणीयंहस्तमात्रंचतुरङ्गुलोच्छ्रितंपित्रादित्रयपिंडपातनार्थं स्थानं निर्माय ॥ तथा मातामहादिब्राह्मणोच्छिष्टसन्निधौ मातामहादिपिंडपातनार्थं तादृशमेवस्थानंकुर्यात् ॥ ततः उभयत्र मध्यदेशे दर्भपिंजूलीमूलेन ॥ ॐअपहताऽअसुरारक्षांᳪंसिवेदिषदः ॥ इतिमंत्रेणसव्योपगृहीतदक्षिणहस्तेनदक्षिणाग्रांरेखांसकृदुल्लिख्यदर्भपिंजूलीमुत्तरस्यांदिशिनिक्षिप्य ॥ ॐयेरूपाणिप्रतिमुञ्चमानाऽअसुराः सन्तःस्वधयाचरंति ॥ पुरापुरो निपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ इतिमंत्रेणज्वलदुल्मुकं प्रत्येकंरेखोपरिभ्रामयित्वा दक्षिणतोनिदध्यात् ॥ ततःउपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयं रेखोपरिप्रत्येकंस्तीर्त्वा सव्येनदेवताभ्य इतित्रिर्जपेत् ॥ ततोऽपसव्यंकृत्वा पुटकषट्केजलतिलगंधपुष्पाणिकृत्वा एकंपात्रंवामहस्तेकृत्वा ॥ द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ अमुक गोत्रास्मत्पितरमुकशर्मन् सपत्नीकवसुरूपात्रावनेनिक्ष्वतेस्वधा इति कुशमूलेपित्रेपितृतीर्थेन अवनेजनंकिंचिदवशिष्यदद्यात् एवंपितामहायकुशत्रयमध्ये प्रपितामहाय कुशाग्रे अवनेजनंदद्यात् ॥ एवमेवमातामहादिभ्योपिदद्यात् ॥ततःसर्वस्माच्छ्राद्धशेषान्नादुष्णंकिंचित्किंचिदन्नमुद्धृत्य मध्वाज्यतिलसर्वव्यंजनहुतशेषान्नयुतंरजतादिपात्रेकृत्वाबिल्वोपमान्षट्पिंडान्निर्माय मधुघृताभ्यामभिघार्य्य पित्रादिभ्योदद्यात् तत्रप्रथमंपिंडंकुशादीनिचादाय ॐअद्यामुकगोत्रअस्मत्पितरमुकशर्मन् सपत्नीक वसुरूप एतत्तेपिंडंस्वधा इतिप्रथमावनेजनस्थाने सव्योपगृहीतदक्षिणहस्तेन

पितृतीर्थेनदद्यात्॥एवमेवपितामहादिभ्यः पंचभ्यः प्रत्येकंतत्तदवनेजनस्थानेपिंडंदद्यात् ॥ ततःप्रपितामहादूर्ध्वंत्रयाणांलेपभुजांतृप्तिमु
द्दिश्य पित्रादिकपिंडाधारकुशमूले ॐलेपभागभुजःपितरस्तृप्यंतु इतिपठित्वादक्षिणहस्तंप्रोञ्छ्यचजलेनहस्तौप्रक्षालयेत । ततःसव्यंकृ
त्वात्रिराचम्य हरिंस्मरेत्॥ततोऽपसव्येन ॐअत्रपितरोमादयध्वंयथाभागमावृषायध्वम् ॥ इति पितुद्देशेनपठित्वा वामावर्त्तेनोदङ्मुखी
भूयप्रीतमनाः॥मनाक् श्वासंनियम्य तेनैवयथापरावृत्य ॐअमीमदन्तपितरो यथाभागमावृषायिषत इतिजपेत् ॥ एवमेवमातामहपक्षे ॥
ततःपूर्ववद्दत्तावनेजनजलेन ॐअद्यामुकगोत्र अस्मत्पितरमुकशर्मन् सपत्नीकवसुरूप अत्रप्रत्यवनेनिक्ष्वतेस्वधा इति प्रथमपिंडोपरिप्रत्यवने
जनंदत्वा एवमेवपितामहादिपंचपिंडोपरि तत्तदवनेजनपात्रेणप्रत्येकं प्रत्यवनेजनंदद्यात् ॥ ततोनीवींविस्रंस्य सव्येन आचम्य ॥ अप
सव्यं कृत्वा ॐनमोवःपितरोरसाय नमोवः पितरः शोषाय नमोवः पितरोजीवाय नमोवः पितरःस्वधायै नमोवः पितरोघोराय नमोवः
पितरोमन्यवे नमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म इति कृताञ्जलिः पठेत् ॥ ततः ॐएतद्वःपितरोवास
इतिपठित्वा षट्स्वपिंडेषु सूत्राणि प्रतिपिंडमूर्णादशावा पंचाशदूर्ध्ववयस्कयजमानहृदयलोमानिवा दत्त्वा॥ततः कुशतिलजलान्यादाय
ॐअद्यामुकगोत्र अस्मत्पितरमुकशर्मन् सपत्नीक वसुरूप एतत्तेवासः स्वधा इति सूत्रमुत्सृजेत् ॥ एवमेवपितामहादिपंचस्वपि पिंडेषु
सूत्राणिदत्त्वातत्तन्नाम्नोत्सृजेत् ॥ ततः पितॄनुद्दिश्यतदीयपिंडेषु तूष्णीं गंधपुष्पधूपदीपतांबूलदक्षिणादीनिदद्यात्॥पिंडशेषान्नंचपिंडस
मीपेविकिरेत्।ततःपितृब्राह्मणानाचमय्य देवद्विजानाचामयेत्।ततःसर्वेषां ब्राह्मणानांदक्षिणकरेॐअपांमध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठित

म्॥ब्राह्मणस्यकरेन्यस्ताः शिवाआपोभवन्तुमे इति सकृत्सकृज्जलंदद्यात्॥ॐलक्ष्मीर्वसतिपुष्पेषु लक्ष्मीर्वसतिपुष्करे।लक्ष्मीर्वसतिगोष्ठेषु सौमनस्यंसदास्तुमे इति पुष्पाणि ॥ ॐअक्षतंचास्तुमेपुण्यं शांतिःपुष्टिर्धृतिश्चमे ॥ यद्यच्छ्रेयस्करंलोके तत्तदस्तुसदामम इतियवांश्चदद्यात् ॥ ततः ॐअद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुरूपस्य दत्ततदन्नपानादिकमक्षय्यमस्तु इतिसतिलमक्षय्योदकंपितृविप्रकरेदद्यात् एवमेव पितामहादीनां नामगोत्राभ्यां तदीयविप्रकरेषु अक्षय्योदकंदद्यात् ॥ ततः सव्यंकृत्वा प्राङ्मुखस्तन्मनाः सुमनाः कृतांजलिर्दक्षिणांदिशंपश्यन् पितृविप्रेभ्यः आशिषोगृह्णीयात्॥ॐअघोराःपितरः सन्तु इतिवदेत् सन्त्वितितैरुक्ते समाचाराव पिंडोपरि पूर्वाग्रां जलधारां दद्यात्तत :ॐगोत्रंनोवर्द्धताम् इत्युक्तौॐवर्द्धतां वोगोत्रम् इतिप्रत्युक्तिः॥ॐदातारो नोऽभिवर्द्धताम्॥ॐअभिवर्द्धतांवोदातारः॥ॐवेदाश्चनोऽभिवर्द्धताम् ॥ ॐअभिवर्द्धतांवोवेदाः॥ॐसंततिर्नोभिवर्द्धताम् ॥ अभिवर्द्धतांवः संततिः॥ॐश्रद्धाचनोमाव्यगमत् ॥ ॐमाव्यगमद्वः श्रद्धा ॥ ॐबहुदेयंचनोऽस्तु ॥ ॐअस्तुवोबहुदेयम्॥ॐअन्नंचनो बहुभवेत्॥ॐभवत्वन्नंवो बहु। ॐअतिथींश्चलभेमहि॥ॐलभध्वं चातिथीन् ॥ ॐयाचितारश्चनः सन्तु ॥ ॐसंतु वो याचितारः॥माचयाचिष्मकंचन॥ॐमायाचध्वं कंचन ॥ ॐएताः सत्याः आशिषःसंतु॥ॐसंत्वेताः सत्याः आशिषः॥इत्येवं प्रार्थनाप्रतिवचनेभ्योऽनन्तरं द्विजैर्दत्तमक्षतपुष्पं गृहीत्वाशिरसि धारयेत्।ततोऽपसव्यंकृत्वापिंडोपरिसपवित्रान्कुशानास्तीर्य स्वधांवाचयिष्येइतिब्रूयात्ॐवाच्यतामितिविप्रानुज्ञातः।पितृभ्यःपितामहेभ्यःप्रपितामहेभ्योमातामहेभ्यःप्रमातामहेभ्योवृ.प्रमातामहेभ्यश्चस्वधोच्यतामितिवदेत्।अस्तुस्वधेतितैरुक्ते।ॐऊर्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्पयतमेपितॄनितिसपवित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात् ॥ ततः स्वयंयजमानोर्घ्यपात्राण्युत्तानीकृ

त्य सव्येनदेवदक्षिणांदद्यात्। ॐ अद्यकृतैतत्पार्वणश्राद्धांगभूतास्मत्पित्रादित्रयसंबंधिनांपुरूरवार्द्रवसंज्ञकविश्वेदेवानांश्राद्धप्रतिष्ठार्थमिदं
हिरण्यमग्निदैवतंयथानामगोत्रायब्राह्मणायदक्षिणात्वेनतुभ्यमहं संप्रददे। ॐस्वस्तीतिइति प्रतिवचनम्।एवंमातामहादिदेवश्राद्धार्थमपि
हिरण्यंदद्यात्।ततोऽपसव्यादि कृत्वा ॐअद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्यवसुरूपस्य कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदं
रजतंचंद्रदैवतम् अमुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनतुभ्यमहं संप्रददेइतिपितृब्राह्मणहस्तेरजतदक्षिणांदद्यात्।एवंपितामहादिपंच
श्राद्धप्रतिष्ठार्थमपिरजतंदद्यात्।सर्वत्रस्वस्तीतिवाचयेत्।दैवेरजतनिषेधः।असंभवेफलमूलादिकंदद्यात्।ततः पिंडानुत्थापयामि।। उत्थापय
इत्यनुज्ञातः पिंडानुत्थाप्यस्थाल्यांनिधायाऽवघ्राणंकृत्वापिंडाधारसकृदाच्छिन्नान्दर्भान् उल्मुकंचवह्नौ निक्षिपेत् ॥ ततः ॐ विश्वेदे
वाः प्रीयन्तामितिभवन्तोऽधिब्रुवन्तु इतिदेवद्विजान्प्रार्थयेत्।तेच ॐप्रीयंतांवोविश्वेदेवा इतिप्रतिब्रूयुः। ततोऽपसव्यंकृत्वा ॐवाजेवाजेवत
वाजिनोनोधनेषु विप्राऽअमृताऽऋतज्ञाः।अस्यमध्वः पिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः। इतिमंत्रेणपितृब्राह्मणानुत्थाप्य पङ्क्ति
मूर्द्धन्यमङ्गुष्ठेनगृहीत्वागृहीतोदकपात्रोविसर्जयेत्।ततस्तथैवदेवब्राह्मणानपिविसर्जयेत्।ततस्तान्कृतपादादिशौचानुभयान् बहिःस्थितान्
प्रदक्षिणीकुर्वन्ॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे।आमागंतांपितरामातराचामासोमोऽअमृतत्वेनगम्यात्९ ॥१९
इतिमंत्रेण सीमांतमष्टौवापदानि बंधुभार्यासहितोऽनुव्रज्य उदकधारयाप्रदक्षिणीकृत्यगृहंप्रविशेत् ततःसव्यंकृत्वादेवताभ्यइतित्रिर्जपेत्।।
ततोऽपसव्येनरक्षादीपान्निर्वाप्यसव्येनहस्तौपादौचप्रक्षाल्याचम्य ॐप्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत्।स्मरणादेवतद्विष्णोः संपूर्णं
स्यादितिश्रुतिरितिपठित्वाकर्मपूर्त्तिकामोविष्णुंस्मरेत्।ततःपिंडानगामजंविप्रादिवायसान्वाखादयेत्।अग्नौजलेवाक्षिपेत्विप्रांतिकेवावि

किरेत् जलस्थोदक्षिणामुखोऽम्भसिवाक्षिपेत् ॥ पुत्रकामःपितामहपिंडं ॐअपांत्वौषधीनांरसंप्राशयामि भूतकृतंगर्भंधत्स्व इतिमंत्रेण ऋतुस्नातायै पितृभक्तायै साध्व्यैधर्मपत्न्यैदद्यात् ॥ सा शुचिर्वाग्यता पुत्रकामा ॐआधत्तपितरो गर्भंकुमारंपुष्करस्रजम् ॥ यथेहपुरुषोऽसत् इतिमंत्रेणाऽश्नीयात् ॥ ततोवैश्वदेवबलिकर्मणीकुर्यात् ॥ तत्रप्रयोगः ॥ तत्रादावग्नेः पश्चात्प्राङ्मुख उदङ्मु खोवाउपविश्यआचम्यदक्षिणजान्वाच्यमणिकोदकेनाऽग्निंपर्युक्ष्यहस्तेनाद्रामलकमात्रमोदनमादायसुसमिद्धेऽग्नौ।ॐब्रह्मणेस्वाहाइदंब्रह्मणे॥ ॐप्रजापतयेस्वाहा इदंप्रजापतये ॥ ॐगृह्याभ्यःस्वाहा इदंगृह्याभ्यः ॥ ॐकश्यपायस्वाहा इदंकश्यपाय ॥ ॐअनुमतयेस्वाहा इदमनुमतये ॥ इतिदेवयज्ञः ॥ इतिपंचाहुतीर्हुत्वा मणिकसमीपे प्राक्संस्थमुदक्संस्थंवाबलित्रयंदद्यात ॥ तद्यथा ॥ ॐपर्जन्यायनमः इदंपर्जन्याय। ॐअद्भ्योनमः इदमद्भ्यः ॥ ॐ पृथिव्यै नमः इदं पृथिव्यै ॥ इतिदद्यात् ॥ ततोद्वारशाखयोर्दक्षिणोत्तरयोर्यथाक्रमम् ॥ ॐ धात्रे नमः इदंधात्रे । ॐविधात्रेनमः इदंविधात्रे । इतिद्वौबलीदत्त्वा । प्रतिदिशम् । ॐवायवेनमः । इत्यनेनैव चतसृषुदिक्षुचतुरोबलीन दद्यात् ॥ इदंवायवेइतित्यागः ॥ ततोदिशांच ॐ प्राच्यैदिशेनमः इदंप्राच्यैदिशे ॥ ॐदक्षिणायैदिशेनमः इदंदक्षिणायैदिशे ॥ ॐ प्रतीच्यैदिशेनमः इदंप्रतीच्यैदिशे ॥ ॐउदीच्यैदिशेनमः इदमुदीच्यैदिशे ॥ इतिदिग्भ्योबलीन्दद्यात् ॥ दत्तानांबलीनामंतराले ॐ ब्रह्मणेनमः इदंब्रह्मणे ॥ ॐअंतरिक्षायनमः इदमंतरिक्षाय ॥ ॐसूर्यायनमः इदंसूर्याय ॥ इतिप्राक्संस्थंबलित्रयंदद्यात् ॥ ततोब्रह्मादीनां बलित्रयाणामुत्तरप्रदेशे ॐविश्वेभ्योदेवेभ्योनमः इदंविश्वेभ्योदेवेभ्यः॥ॐविश्वेभ्योभूतेभ्योनमः इदंविश्वेभ्योभूतेभ्यः ॥ इतिद्वौबलीन्दद्यात् ॥ तयोरुत्तरतः ॐ उषसेनमः इदमुषसे ॥ ॐभूतानांपतयेनमः इदंभूतानांपतये इतिद्वौबलीदद्यात् ॥ इतिभूतयज्ञः ॥ ततोब्रह्मादी

नांबलीनां दक्षिणप्रदेशे॥अपसव्येन ॐपितृभ्यः स्वधानमः इदंपितृभ्यः ॥ इतिपितृतीर्थेन दक्षिणामुखः एकंबलिंदद्यात्॥इतिपितृयज्ञः॥
ततःसव्येन तत्पात्रंप्रक्षाल्य निर्णेजनजलम् ब्रह्मादीनांबलीनांवायव्ये ॐयक्ष्मैतत्तेनिर्णेजनंनमःइदंयक्ष्मणे इतिक्षिपेत्॥ ततोदेवादिबलीन्
बहिर्दद्यात् ॥ ॐ देवामनुष्याःपशवोवयांसि सिद्धाःसयक्षोरगदैत्यसंघाः ॥ प्रेताःपिशाचास्तरवःसमस्ता येचान्नमिच्छंतिमयाप्रदत्तम् ॥
॥ १ ॥ इदमन्नंदेवादिभ्यः ॐ पिपीलिकाःकीटपतंगकाद्याः बुभुक्षिताःकर्मनिबंधबद्धाः ॥ तृप्त्यर्थमन्नंहिमयाप्रदत्तं तेषामिदंतेमुदिताभ
वंतु ॥ २ ॥ इदंपिपीलिकादिभ्यः ॥ ॐ ऐंद्रवारुणवायव्याः सौम्यावैनैर्ऋतास्तथा ॥ वायसाःप्रतिगृह्णंतु भूमावन्नंमयार्पितम् ॥३॥ इदंवा
यसेभ्यः ॥ॐ सौरभेयाःसर्वहिताः पवित्राःपुण्यराशयः ॥ प्रतिगृह्णन्तुमेग्रासं गावस्त्रैलोक्यमातरः ॥४॥ इदंगोभ्यः॥ ॐ श्वानौद्वौश्यामश
बलौ वैवस्वतकुलोद्भवौ ॥ ताभ्यामन्नंप्रदास्यामि स्यातामेतावहिंसकौ ॥५॥ इदंश्वभ्याम् ॥ इतिवैश्वदेवबलिकर्म ॥ ततोवैश्वदेवांते सुत
भृत्यबांधवातिथिसंयुक्तः पितृशेषितमन्नमश्नीयात् ॥ तद्दिने श्राद्धभुक्दानप्रतिग्रहहोमस्वाध्यायभारान् वर्जयेत् ॥ कर्तृभोक्तारौ द्यूता
ध्वगमनमैथुनायासस्वाध्यायकलहंचपुनर्भोजनहिंसादीनिनकुर्यात् ॥ एषएवविधिरुपरागसंक्रांतित्रयोदश्यादिनिमित्तकश्राद्धेषुज्ञेयः ॥
महालयेतुमातृपक्षोमध्येपृथक्कार्यः ॥ विधिस्तुएषएव ॥ इतिगौडीयश्राद्धप्रकाशेमध्यमखंडे (मुख्यकल्पे) दर्शपार्वणश्राद्धपद्धतिःसमा
प्ता।१। अथसपात्रकैकोद्दिष्टश्राद्धपद्धतिः॥ तत्रपूर्वदिने एकभक्तादिनियमंविधाय श्राद्धदिने प्रातः स्नात्वानित्यकर्मसमाप्यमध्याह्नेब्राह्मणं
स्नातं यजमानसवर्णेनाहूतं शुचिःशुक्लद्विवासाः कृतांजलिर्दर्भेष्वासीनःॐस्वागतमितिपृच्छेत्। ॐसुस्वागतमितिप्रतिवचनम्।ततोगोमय
मंडलेपीठाद्यासने उदङ्मुखमुपवेश्य अपसव्यादिधर्मयुक्तो विप्रजानु दक्षिणकरेणस्पृष्ट्वा देशकालौसंकीर्त्य ॐ अद्यामुकगोत्रस्यपितुर

मुकशर्मणःसांवत्सरिकैकोद्दिष्टश्राद्धार्थं त्वामहमामंत्रये इतिनिमंत्रणंकुयात् ॐनिमंत्रितोस्मीतिप्रतिवचनम्॥ततः ॐ अक्रोधनेन शौच परेणसततं ब्रह्मचारिणा ॥ भवितव्यंभवतानोऽद्यतनेश्राद्धकर्म्मणि ॥ इतिनियमान् श्रावयेत् ॥ सवायासविनिर्मुक्तेनकामक्रोधविवर्जिते नभवितव्यंभवताचमयाचश्राद्धकारिणा ॥ इतिप्रार्थयेत् ॥ भवितव्यमितिप्रतिवचनम् ॥ (पूर्वदिननिमंत्रणपक्षे अद्यतनपदस्थानेश्वोभू तपदंदातव्यम्) ॥ तत इदंतेपाद्यंस्वधा ॥ इतिपाद्यमुपनीयविनीतः स्वयं विप्रपादौप्रक्षालयेत्॥ ततः ॐअद्यामुकगोत्र पितरमुकशर्मन् एषते पादार्घः स्वधानम इति जलतिलगंधपुष्पैः विप्रपादयोरर्घंदद्यात् ॥ ततः ॐइदंतेआचमनीयम् इति विप्रायआचमनार्थं जलंदत्त्वासव्येनस्वयमप्याचामेत् ॥ ततः पूर्वकल्पितं दक्षिणाप्रवणं सुसमावृतंगोमयानुलिप्तं श्राद्धदेशमागत्य यथाविहितंनेपाल कंबलाद्यासनं स्पृशन् ॐ अत्रास्यताम् इति ब्राह्मणमासने उपवेशयेत् ॥ ततस्तत्पादयोरधः कुशत्रयंदक्षिणाग्रंदत्त्वा आसन समीपेतिलतैलेनदीपंप्रज्वाल्यस्थापयेत् ॥ श्राद्धसमाप्तिंयावद्द्विजेनरक्षणीयः ॥ काककुक्कुटादीन्श्राद्धहत्तॄनपसारयेत्॥ततः कर्त्ता ब्राह्मण स्यपुरतःस्वासने प्राङ्मुखउपविश्यपवित्रधारणंकृत्वा ॥सव्येनआचम्य॥ कर्मपात्रंजलेनापूर्यगंधपुष्पतिलादिभिः संपूज्य॥ ॐअपवित्रः पवित्रोवा सर्वावस्थांगतोपिवा॥ यः स्मरेत्पुडरीकाक्षं सबाह्याभ्यंतरः शुचिः ॥ ॐपुंडरीकाक्षः पुनातु इति पठित्वाकुशत्रयानीतजलेन श्राद्धद्रव्याणिस्वात्मानंचसिंचेत् ततः ॥ॐभूम्यैनमः॥ॐगयायैनमः॥ॐगदाधरायनमः इतिनत्वा॥ कुशत्रयतिलजलान्यादाय ॐअद्या मुकगोत्रस्यअस्मत्पितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्यइति संकल्प्य ॐकुरुष्वइति ब्राह्मणानुज्ञातो गायत्रींत्रिर्जपित्वा ॐदेवताभ्यः पितृभ्यश्च इतित्रिर्जपेत् ॥ ततोऽपसव्यंकृत्वा ॥ ॐनमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतो

दिश इति सर्वत्र गौरसर्षपान्विकीर्य ॥ ॐअग्निष्वात्ताःपितृगणाः प्राचींरक्षंतुमेदिशम् ॥ तथाबर्हिषदःपांतु याम्यांयेपितरःस्थिताः॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोपमाः ॥ अधऊर्ध्वमपिकोणेषु विकोणेषुचसर्वशः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चा धिपस्तेषां यमोरक्षांकरोतुमे ॥ वायुभूतपितॄणांच तृप्तिर्भवतुशाश्वती॥इत्यनेनाऽधस्तादूर्ध्वंकोणेषुच सर्वत्रतिलान्गौरसर्षपांश्चविकीर्य्यद क्षिणेवामेवाकटिभागेनीवीबंधंकुर्यात् ॥ ततः सव्येन कस्मिंश्चित्पात्रेजलंगृहीत्वादर्भैरालोड्य ॥ ॐयद्देवादेवहेडनंदेवासश्चकृमावयम् ॥ अग्निर्म्मातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ १ ॥ यदिदिवायदिनक्तमेनांसिचकृमावयम् ॥ वायुर्मातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ ॥ २ ॥ यदिजाग्रद्यदिस्वप्न एनांसिचकृमावयम् ॥ सूर्य्योमातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ ३ ॥ इति कूष्मांडमंत्रैरभिमंत्र्यदुष्टदृष्टि निपातदूषितंपाकादिपूतं भवतु इत्युक्त्वातेनपाकादीन्प्रोक्षयेत् ॥ ततोऽपसव्यादिनाद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐअद्यामुक गोत्रअस्मत्पितरमुकशर्मन् इदमासनंतेस्वधाइत्युक्त्वा विप्रहस्तेजलंदत्त्वाकंबलाद्यासनवामभागस्योपरि पितृतीर्थेनमोटकंदक्षिणाग्र मुत्सृजेत् ॥ ततः ॐअपहताऽअसुरारक्षाꣳसिवेदिषदः इति तिलान्विकीर्य॥अर्घपात्रोपरिपवित्रंधृत्वा॥ॐशन्नोदेवीरभिष्टयऽआपोभ वन्तुपीतये॥शंयोरभिस्रवन्तुनः इति तत्रजलंप्रक्षिप्य ॐतिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः॥ प्रत्नमद्भिःपृक्तःस्वधयापितॄँल्लोकान् प्रीणाहिनःस्वधा॥इतितिलान् तूष्णीमेव गंधपुष्पेप्रक्षिपेत्॥ततोऽर्घपात्रंसंपन्नंसुसंपन्नमित्यनुज्ञातोवामकरे अर्घपात्रमादायविप्रक्षिणकरे पवित्रंदत्त्वा ॐयादिव्याऽआप इति मंत्रंपठित्वा ॐअद्याऽमुकगोत्रास्मत्पितरमुकशर्मन् वसुरूप एषते हस्तार्घःस्वधाइतिदक्षिणहस्तेन

पितृतीर्थेन यथाजलं पतति तथा ब्राह्मणकरे सपवित्रेऽर्घंदद्यात् ॥ततः॥ ॐपित्रे स्थानमसीतिमंत्रेणार्घपात्रंन्युब्जंपितृवामपार्श्वेनिदध्या
त् ॥ एवंस्थितमर्घपात्रंदक्षिणादानपर्यंतंनचालयेत्॥ततो गंधादि दद्याव ॥ तत्र विप्रकरे जलमासिच्य गंधपुष्पधूपदीपवस्त्रादिसन्नि
धायद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐ अद्याऽमुकगोत्र अस्मत्पितरमुकशर्मन् वसुरूप एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीता
च्छादनानितुभ्यंस्वधाइत्युच्चार्य्यंदद्यात ॥ ॐअयंतेगंधइतिनिवेदयेत्॥ॐसुगंध इति तेनोक्ते॥ॐएतानिते पुष्पाणि॥ ॐसुपुष्पाणि ॥
ॐएषतेधूपः॥ॐसुधूपः ॥ ॐएषतेदीपः ॥ ॐसुदीपः ॥ ॐइमेयज्ञोपवीते ॥ ॐसुयज्ञोपवीते॥ॐएतानितेवासांसि॥ॐसुवासांसि इत्यादि
क्रमेण ब्राह्मणायप्रत्येकंप्रतिपाद्य कृतांजलिर्भूत्वा ॐअर्चनंसंपूर्णमस्त्वितिब्रूयात्।ॐअस्त्वर्चनं संपूर्णमितिविप्रः ततो भोजनपात्रस्थापन
देशंसंमार्ज्यब्राह्मणंवेष्टयित्वा गौरमृत्तिकादिनामंडलंकुर्यात् ॥ [परकीयभूमौश्राद्धकरणपक्षे] ॐइदमन्नंभूस्वामिपितृभ्योनमः इतिघृता
दियुक्तमन्नंदर्भेषूत्सृजेत् ॥ ततः उष्णमन्नंसघृतं यथावत् कराभ्यामादाय पितरं ध्यायन् मंदंमंदं परिविश्यसुशीतलजलमने
कव्यंजनघृतंचपात्रांतरस्थं तत्रोपनीय अन्नं मधुनाभिघार्य ॐ मधुवाताऽऋतायते इतित्र्यृचेनाभिमंत्र्यन्युब्जकराभ्यांपात्रमालभेत् ॥
ततः ॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेंऽअमृतंजुहोमिस्वधाइतिपठित्वा।ॐइदंविष्णुर्विचक्रमेत्रेधानिदंधेपदम्॥समूढमस्य
पांॅसुरे इत्येतामृचंचजप्त्वा ब्राह्मणाङ्गुष्ठमनखमधोमुखम् आत्महस्तधृत ॐ विष्णोकव्यॅरक्षइतियजुषाऽन्नेनिवेश्य ॐइदमन्नम्
इमाआपः इदमाज्यम् इदंहविरित्युक्त्वा ॐअपहताऽअसुरारक्षाॅंसिवेदिषदः इतितिलान्विकीर्य॥वामकरेणपात्रंस्पृशन् द्विगुणभुग्नकुश
त्रयतिलजलान्यादायॐअद्यामुकगोत्रअस्मत्पितरमुकशर्मन् वसुरूप इदमन्नं कव्यं सोपस्करं परिविष्टंपरिवेक्ष्यमाणं ब्राह्मणतृप्तिपर्य्यंतम

मृतरूपंतुभ्यंस्वधा इत्युदकंपितृतीर्थेनविप्रवामभागेभूमौक्षिपेत् ॥ ततः ॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥तत्सर्वमच्छिद्रमस्तु
इतिप्रार्थ्यजुषस्वइत्युक्त्वा॥ भवान् प्राशयतु इत्यापोशानंविप्रायदद्यात्॥स यथाविधिभुंजीत॥श्राद्धकर्त्तातुसव्याहृतिकांसप्रणवांगायत्रीं
त्रिःसकृद्वाजपेत् कृतांजलिर्दर्भेष्वासीनः ॥ ॐमधुवाताऽऋतायतेमधुंक्षरंतिसिंधवः॥माध्वीर्न्नःसन्त्वोषधीः ॥ १ ॥ ॐ मधुनक्तमुतोषसो
मधुंमत्पार्थिवंरजः॥मधुद्यौरस्तुनःपिता ॥ २ ॥ ॐमधुमान्नोव्वनस्पतिर्मधुंमा२ँऽअस्तुसूर्य्यः॥माध्वीर्गावोभवन्तुनः॥३॥इतित्र्यृचम्॥
ॐ मधुमधुमध्विवतिचजपेत् ॥ ततःसव्येन ॐकृणुष्वपाजःप्रसितिन्नपृथ्वीँय्याहिराजेवामंवाँऽइभेन॥तृष्वीमनुप्रसितिन्द्रूणानोस्तासि
विद्ध्यरक्षसस्तपिष्ठैः ॥ १ ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुंचानः ॥ तपूंष्यग्ग्नेजुह्वापतङ्गानसंन्दितोविसृजविष्वगु
ल्काः॥२॥ प्रतिस्प्पशोव्विसृजतूर्णितमोभवापायुर्व्विशोऽअस्याऽअदब्धः॥ योनोंदूरेऽअघशंसोयोऽअन्त्यग्ग्नेमाकिष्टेव्यथिरादधर्षीत्
॥३॥ उदग्ग्नेतिष्ठप्प्रत्यान्तनुष्वन्यमित्राँ२ऽओषतात्तिग्महेते॥योनोऽअरातिंसमिधानचक्रेनीचातंधक्ष्यतसन्नशुष्कम्॥४॥ऊर्द्ध्वोभव
प्प्रतिविद्ध्याद्ध्यस्मदाविष्कृणुष्वदैव्यान्न्यग्ग्ने ॥ अवस्थिरातनुहियातुजूनांजामिमजामिम्प्रमृणीहिशत्रून् ॥ अग्ग्नेष्ट्वातेजसासादयामि
॥५॥ इतिरक्षोघ्नीः ऋचःपठित्वाभूमौतिलान् विकीर्यपितृरूपतयाब्राह्मणंध्यायेत्॥ततः ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरः
सोम्यासः ॥ असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु॥१॥अङ्गिरसोनःपितरोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्यासः॥तेषांवयंसु
सुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ २ ॥ येनःपूर्वेपितरःसोम्यासोनूहिरेसोमपीथंवसिष्ठाः ॥ तेभिर्य्यमःसंरराणोहवींष्युश

न्तुशार्द्धं प्रतिकाममंत्तु ॥ ३ ॥ त्वꣳसोमप्प्रचिकितोमनीषात्वꣳरंजिष्ठमनुनेषिपंथांम् ॥ तवप्प्रणीतीपितरोनऽइन्दोदेवेषुरत्नंमभजन्त
धीराः ॥ ४ ॥ त्वयाहिनः पितरःसोमपूर्व्वेकर्म्माणिचक्रुःपवमानधीराः॥ व्वन्वन्नवातपरिधीꣳरऽपोर्णुवीरेभिरश्वैर्मघवाभवानः ॥ ५ ॥
त्वꣳसोमपितृभिः संव्विदानोनुद्यावापृथिवीआततन्थ ॥ तस्मैतऽइन्दोहविषाव्विधेमव्वयꣳस्यामपतयोरयीणाम्॥६॥बर्हिषदःपितरऽ
ऊत्यर्व्वागिमावोहव्याचकृम।जुषद्ध्वम्॥ तआगतावसाशन्तमेनाथानःशंय्योररपोदधात ॥७॥ आहम्पितॄन्त्सुविदत्रां २ अवित्सि
नपातञ्चव्विक्रमणञ्चव्विष्णोः ॥ बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः ॥८॥ उपहूताःपितरः सोम्म्यासोबर्हिष्येषुनिधि
षुप्प्रियेषु॥तऽआगमन्तुतऽइहश्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्मान्॥९॥आयन्तुनःपितरः सोम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः॥ अस्मि
न्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्॥१०॥अग्निष्वात्ताःपितरऽएहगच्छतसदः सदःसदतसुप्प्रणीतयः ॥ अत्ताहवीꣳषिप्प्रयं
तानिबर्हिष्यथारयिꣳसर्व्ववीरन्दधातन ॥ ११ ॥ येऽअग्निष्वात्तायेऽअनग्निष्वात्तामध्येदिवःस्वधयामादयन्ते ॥ तेभ्यः स्वराडसु
नीतिमेतांय्यथावशन्तन्वङ्कल्पयाति ॥ १२ ॥ अग्निष्वात्तानृतुमतोहवामहे नाराशꣳसेसोमपीथंयऽआशुः ॥ तेनोव्विप्प्रासःसु
हवाभवन्तुव्वयꣳस्यामपतयोरयीणाम् ॥ १३ ॥ इतिपितृमंत्रान् ॥ ॐसहस्रशीर्षापुरुषइत्यादिषोडशर्चात्मकंपुरुषसूक्तंच ॥
ॐआशुःशिशानोवृषभानभीमोघनाघनःक्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रः ॥ १ ॥

इत्यादिसप्तदशमंत्रात्मकमप्रतिरथंचपठेत् ॥ ततः ॐसप्तव्याधादशार्णेषु मृगाःकालंजरेगिरौ ॥ चक्रवाकाःशरद्वीपे हंसाः सरसिमानसे ॥ तेऽभिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः ॥ प्रस्थितादूरमध्वानं यूयंतेभ्योऽवसीदत ॥ इतिपौराणीयं हविःस्तोत्रम् ॥ ॐयोगीश्वरं याज्ञवल्क्यमित्यादियाज्ञवल्कीयगाथांचपठेत ॥ ॐमूर्त्तितानाममूर्त्तानां पितॄणाममितौजसाम् ॥ नमस्यामिसदातेषां ध्यायिनां दिव्यचक्षुषाम् ॥१॥ इंद्रादीनां जनेतारो दक्षमारीचयोस्तथा ॥ सप्तर्षीणांतथाऽन्येषां तान्नमस्यामिकामदान् ॥२॥ मन्वादीनांजनेतॄंश्च सूर्याचंद्रमसोस्तथा ॥ तान्नमस्याम्यहंसर्वान्पितरश्चार्णवेषुच ॥ ३ ॥ नक्षत्राणांग्रहाणांच वाय्वग्निनभसांतथा ॥ द्यावापृथिव्योश्चतथा नमस्यामिकृतांजलिः ॥ ४ ॥ देवर्षीणांजनेतॄंश्चसर्वदेवनमस्कृतान् ॥ अभयस्यसदादातॄन्नमस्येहंकृतांजलिः ॥५॥ प्रजापतेःकाश्यपस्य सोमायवरुणायच ॥ योगेश्वरेभ्यश्चतथा नमस्यामिकृतांजलिः ॥ ६ ॥ नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु ॥ स्वयंभुवेनमस्यामि ब्रह्मणेयोगचक्षुषे ॥ ७ ॥ यदाधाराःपितृगणा योगमूर्तिधराह्यिते ॥ नमस्यामिततःसोमं पितरंजगतामहम् ॥८॥ अग्निरूपांस्तथैवान्या न्नमस्यामिपितॄनहम् ॥ अग्नीषोममयंविश्वंयतएतदशेषतः॥ ९ ॥ येतुतेजोमयाश्चैतेसोमसूर्याग्निमूर्त्तयः॥जगत्स्वरूपिणश्चैवतथाब्रह्मस्वरूपिणः ॥१०॥ तेभ्योऽखिलेभ्योयोगिभ्यः पितृभ्योयतमानसः ॥ नमोनमोनमस्तेमे प्रसीदंतुस्वधाभुजः ॥११॥ इतिसप्तार्चिस्तोत्रंपठेत्॥ अन्यान्यपिरुचिस्तवविष्णवादिस्तोत्राणि ब्राह्मणं श्रावयेत् ॥ ततः तृप्तंज्ञात्वाअपसव्यादिना उच्छिष्टसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयां भूमिंप्रोक्ष्यतत्रॐअग्निदग्धाश्चयेजीवायेऽप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिम्॥१॥इतिमंत्रेणअन्नंप्रकीर्यसव्येनाचम्यहरिंस्मरेत्॥ततोऽपसव्यादिना ब्राह्मणाय जलगंडूषंदत्त्वा पूर्ववत् गायत्रींजप्त्वाॐमधुवाताऽऋतायते इतित्र्यृचंमधुमधुमध्वितिचजपेत् ॥

ततः ॐस्वदितम् पृष्ट्वा ॐ इतिसुस्वादितम् इतितेनोक्ते॥शेषमन्नंकिंक्रियतामितिपृष्टेइष्टैः सहभोक्तव्यमितिविप्रोवदेत्॥ततः पिंडमहंकरिष्ये
इतिपृष्टे कुरुष्वइत्यनुज्ञातः ॥ उच्छिष्टसन्निधौपिंडार्थस्थानंसैकतंचतुरस्रंदक्षिणाप्लवंनिर्माय तन्मध्ये दर्भपिंजूलीमूलेन ॐ अपहताऽअसु
रारक्षांᳬसिवेदिषदः इतिजान्वारब्धदक्षिणहस्तेन प्रादेशमितां रेखां दक्षिणाग्रां सकृदुल्लिख्य दर्भपिंजूलीमुत्तरस्यांदिशि निक्षिपेत् ॥
ततो येरूपाणिप्रतिमुंचमानाऽअसुराः सन्तः स्वधयाचरंति । परापुरोनिपुरोयेभरंन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् इतिमंत्रेणोल्मुकंरेखायां
भ्रामयित्वा दक्षिणतोनिदध्यात् ॥ ततः उपमूलसकृल्लूनकुशत्रयं रेखोपरिस्तृणुयात् ॥ ततः सव्येन ॐ देवताभ्यःपितृभ्यश्च महा
योगिभ्यएवच ॥ नमःस्वाहायैस्वधायै नित्यमेवनमोनम इति त्रिर्जपेत् ॥ ततोऽपसव्यंकृत्वा तिलजलगंधपुष्पाणिपात्रेकृत्वा
तत्पात्रं वामहस्तेधृत्वा दक्षिणहस्ते द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नवनेनिक्ष्वतेस्वधा
इतिकुशोपर्य्यवनेजनंदद्यात् ॥ ततः सर्वस्मादन्नात्किंचित्किंचिदन्नमुद्धृत्य मध्वाज्यतिलसहितमेकत्रपात्रेकृत्वा बिल्वोपमंपिंडंनिर्माय
मधुघृताभिघारितं सतिलसव्योपगृहीतदक्षिणहस्तेनाऽवनेजनस्थाने ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेतत्तेपिंडं स्वधा इतिदद्यात् ॥
ततोलेपभागभुजस्तृप्यंतु इतिदर्भमूलेकरंप्रोञ्छ्य सव्येनहस्तौप्रक्षाल्य आचम्य हरिंस्मरेत्ततोऽपसव्यादिकृत्वाॐअत्रपितर्मादयस्वयथा
भागमावृषायिष्ट इतिपठित्वा वामावर्त्तेनउदङ्मुखीभूयप्रीतमनाःश्वासंनियम्यतेनैवयथापरावृत्यॐअमीमदन्तपितर्यथाभागमावृषायिष्ट
इतिजपेत् । ततोऽवनेजनावशिष्टजलयुतपात्रमादायॐअद्यामुकगोत्रअस्मत्पितरमुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिपिंडोपरिप्रत्यवने
जनंदद्यात्॥ततोनीवींविस्रंस्य सव्येनाचम्य अपसव्यादिकृत्वा कृतांजलिः ॐनमस्तेपितारसायनमस्तेपितः शोषाय नमस्तेपितर्जीवाय

नमस्तेपितःस्वधायै नमस्तेपितर्घोराय नमस्तेपितर्म्मन्यवे नमस्ते पितःपितर्नमस्तेगृहान्नःपितर्दत्तसतस्तेपितर्द्धष्म इतिप्रार्थ्य ततःॐएत
त्तेपितर्वासः इतिमंत्रपठित्वाॐअद्यामुकगोत्रपितरमुकशर्मन्नेतत्तेवासः स्वधा इति श्वेतवस्त्रदशां ऊर्णासूत्राणिवा पंचाशद्वर्षोपरियजमान
हृदयलोमानिवा पिंडोपरिदद्यात् ॥ ततस्तूष्णीमेवपितरमुद्दिश्य गंधपुष्पधूपदीपतांबूलदक्षिणादिकंदद्यात ॥ ततो ब्राह्मणमाचमय्य
तदीयहस्ते ॐअपांमध्येस्थितादेवाः सर्वमप्सुप्रतिष्ठितम् ॥ ब्राह्मणस्यकरेन्यस्ताः शिवाआपोभवंतुमे इति सकृज्जलंदद्यात् ॐ ल
क्ष्मीर्वसतिपुष्पेषु लक्ष्मीर्वसतिपुष्करे ॥ लक्ष्मीर्वसतिगोष्ठेषु सौमनस्यंसदास्तुमे इतिपुष्पाणि ॥ ॐ अक्षतंचास्तुमेपुण्यं शांतिःपुष्टि
र्धृतिश्चमे ॥ यद्यच्छ्रेयस्करंलोके तत्तदस्तुसदामम इतियवान् तिलांश्च दत्त्वा ॐअद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणोदत्तैतदन्नपा
नादिकमक्षय्यमुपतिष्ठताम् ॥ इति तिलयुक्तमक्षय्योदकंविप्रकरे दद्यात् ॥ ततः सव्यं कृत्वा प्राङ्मुखः कृतांजलिराशिषोगृह्णीयात् ॥
ॐअघोरःपिताऽस्तु॥अस्तु इतिविप्रः ॥ गोत्रन्नोवर्द्धताम्इतिकर्त्ता॥वर्द्धतामितिप्रतिवचनम्॥ १॥दातारोनोऽभिवर्द्धतां वेदाःसंततिरेवच ॥
श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि॥याचितारश्चनःसंतु माचयाचिष्मकंचन॥ एताःसत्याआशिषः
संतु इतिवदेत् संतु इति तेनोक्ते ॥ ततोऽपसव्येन पिंडोपरि सपवित्रदर्भानास्तीर्य ॥ ॐस्वधांवाचयिष्ये ॥ इतिपृष्ट्वा ॥ वाच्यतामित्य
नुज्ञातः ॥ ॐ पित्रे स्वधोच्यतामिति वदेत् अस्तुस्वधा इत्युच्यमाने सपवित्रदर्भांतरितपिंडोपरि ॐऊर्ज्जंवहंतीरमृतं घृतंपयः की
लालं परिस्रुतं स्वधास्थ तर्पयतमेपितरम्॥इतिमंत्रेण वारिधारांदद्यात् ॥ ततोर्घपात्रमुत्तानीकृत्ययथाशक्तिरजतदक्षिणां दद्यात् ॥
ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिमांरजतदक्षिणांचंद्रदैवत्यामभुकगोत्रायाऽमुकशर्मणेब्रा

ह्मणायतुभ्यमहंसंप्रददे इतिदद्यात् ॐस्वस्तीतिविप्रोवदेत्।असंभवेफलमूलादिकंदद्यात्॥ततः पिंडमुत्थाप्यस्थाल्यांनिधायआघ्रायपिंडा
धःस्तृतदर्भंचोल्मुकमग्नौनिक्षिपेत् ॥ अतो विप्रमुत्थाप्याऽङ्गुष्ठंगृहीत्वा गृहीतोदकपात्रो अभिरम्यतामितिविसर्जयेत् अभिरतोस्मीति
प्रतिवचनम्॥ततः प्रदक्षिणीकृत्यॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवी विश्वरूपे॥आमांगंतांपितरामातराचामा सोमोऽअमृत
त्वेनंगम्यतात् इतिमंत्रेण सीमांतमष्टौवापदानि अनुव्रज्यगृहं प्रविशेत्॥ ततो रक्षादीपनिर्वापणंकृत्वासव्येनहस्तौपादौप्रक्षाल्य आचम्य
ॐदेवताभ्यः पितृभ्यश्चेतित्रिः पठेत्॥ततःॐप्रमादात्कुर्वतांकर्म प्रच्यवेताध्वरेषुयत्॥स्मरणादेवतद्विष्णोः संपूर्णस्यादितिश्रुतिरितिपठि
त्वाकर्मपूर्त्तिकामो विष्णुंस्मरेत्॥ततःपिंडं गामजं वायसान्वाखादयेत् अग्नौजलेवाक्षिपेत् ततो वैश्वदेवबलिकर्मणीकुर्यात् वैश्वदेवांतेसुतभृ
त्यबांधवातिथिसंयुक्तःपितृशेषितमन्नमश्नीयात् एवमेव मातृश्राद्धंकुर्यात्॥ततः कर्तृभोक्तारौद्यूताऽध्वगमनमैथुनायासस्वाध्यायकलहं पुन
र्भोजनहिंसादीनिनकुर्याताम्।एवमेवपितृव्यभ्रातृभगिनीपुत्रपत्नीश्वशुरमातुलगुरुशिष्यादीनामपुत्राणामपि कुर्यात् विषशस्त्रश्वापदाऽहितिर्य
ग्ब्राह्मणघातिनाम् अनशनाग्निपुवानोद्बंधनादीनांच आश्विनकृष्णचतुर्दश्यामप्यैकोद्दिष्टमेव कर्त्तव्यम्॥तत्रसांवत्सरिकपदं न दातव्यम् ॥
इति श्रीगौडीयश्राद्धप्रकाशे प्रतिवर्षक्षयाहसपात्रैकोद्दिष्टपद्धतिः समाप्ता ॥ छ ॥ ॥ अथाभ्युदयिकश्राद्धम् ॥ एतच्च गर्भाधानपुंसवनसीमं
तोन्नयनजातकर्मनामकर्मान्नप्राशनचौलोपनयनविवाहादिसंस्कारेषु तुलादानव्रतनवान्नभोजनप्रथमार्तवकूपारामतडागाद्युत्सर्गदेवप्रतिष्ठा
राज्याभिषेकयज्ञोत्सववृषोत्सर्गतीर्थयात्रानिमित्तिकादिषुच कर्त्तव्यम्।तत्र श्राद्धदिनेप्रातरेव निमंत्रणपूर्वंद्युः।प्राङ्मुखउदङ्मुखेभ्योदद्या
त्॥उदङ्मुखोवाप्राङ्मुखेभ्यः॥सर्वकर्म देवतीर्थेन ऋजुपाणिनापातितदक्षिणजानुना उपवीतिना प्रदक्षिणं देवकर्मवत्कार्यम् आसनादौसर्वं

त्रऋजवोदर्भाः॥विकिरणार्थंयवाःस्वधास्थानेस्वाहानमःशब्दोवाप्रयोक्तव्यः॥नाऽत्रापसव्यकरणंनपितृतीर्थंननवामजानुपातनंअन्येपि
दक्षिणाप्लवादयोऽसाधारणाःपित्र्याधर्मा निवर्त्तंते किंतु दैवेनधर्मेणाऽत्रपितॄणामुपचारः।इतरे विशेषाःप्रयोगएवव्यक्ताभविष्यन्तिअत्रच॥
प्रथमं मातृपूजनम् ततोमातृपितामहीप्रपितामहीनांश्राद्धम् ततः पितृपितामहप्रपितामहश्राद्धम् ततो मातामहप्रमातामहवृद्धप्रमातामहा
नांसपत्नीकानांश्राद्धं श्राद्धत्रयेऽप्यष्टौ ब्राह्मणान् देवपूर्वकान्पूजयेत ॥ अथपद्धतिः ॥ तत्रतावद्ब्राह्ममुहूर्त्ते उत्थाय यथोपदेशंस्नानसंध्या
दिनित्यकर्मप्रातःसमाप्य ॥ वेद्यां गणपतिसहिता गौर्य्यादिषोडशमातृकाः प्रतिमाक्षतपुंजलंखान्यतमेष्वधिष्ठानेषुस्थापयेत् तद्यथा ॥
कर्त्ताप्रक्षालितकरचरणःस्वाचांतःसकुशोपग्रहपाणिः शुद्धासने प्राङ्मुखउपविश्य॥कुशाग्रयवजलान्यादाय देशकालौसंकीर्त्य ॥ अमु
ककर्माङ्गभूतगणपतिसहितषोडशमातृपूजनमहंकरिष्ये इतिसंकल्पयेत्॥ततःपुष्पाक्षतानादायॐगणानांन्त्वागणपतिꣳहवामहेप्रियाणां
न्त्वाप्रियपतिꣳहवामहेनिधीनांत्वांनिधिपतिꣳहवामहेव्वसोममआहमंजानिगर्ब्भधमात्वमंजासिगर्ब्भधम्।ॐभूर्भुवः स्वर्गणपतेइहागच्छ
इहतिष्ठ इतिगणपतिंस्थापयेत् ॥ ततःप्रदक्षिणक्रमेणगौर्य्यादिस्थापनम् ॥ ॐभूर्भुवःस्वः गौरि इहागच्छइहतिष्ठ ॥ १ ॥ ॐभूर्भुवःस्वः
पद्मेइहागच्छ इहतिष्ठ ॥२॥ ॐभूर्भुवःस्वःशचि इहागच्छ इहतिष्ठ ॥३॥ ॐभूर्भुवःस्वर्मेधेइहागच्छ इहतिष्ठ ॥ ४ ॥ ॐभूर्भुवःस्वःसावि
त्रिइहागच्छ इहतिष्ठ ॥५॥ ॐभूर्भुवः स्वर्विजये इहागच्छ इहतिष्ठ ॥६॥ ॐभूर्भुवःस्वर्जये इहागच्छ इहतिष्ठ ॥७॥ ॐभूर्भुवःस्वर्देवसेने
इहागच्छ इहतिष्ठ ॥ ८ ॥ ॐभूर्भुवःस्वःस्वधे इहागच्छ इहतिष्ठ ॥९॥ ॐभूर्भुवःस्वःस्वाहे इहागच्छ इहतिष्ठ ॥१०॥ ॐभूर्भुवःस्वर्मा

तर इहागच्छत इहतिष्ठत ॥११॥ ॐभूर्भुवःस्वर्लोकमातर इहागच्छत इहतिष्ठत ॥१२॥ ॐभूर्भुवःस्वः हृष्टे इहागच्छ इहतिष्ठ ॥ १३ ॥
ॐभूर्भुवःस्वःपुष्टे इहागच्छ इहतिष्ठ ॥१४॥ ॐभूर्भुवःस्वस्तुष्टे इहागच्छ इहतिष्ठ ॥१५॥ ॐभूर्भुवःस्वःआत्मकुलदेवते इहागच्छ इहतिष्ठ
॥१६॥ॐभूर्भुवःस्वःश्रीरिहागच्छ इहतिष्ठ इतिगणपतिसहिताएतामातरःप्रत्येकामोंकारव्याहृतिपूर्वकमावाह्यस्थापयित्वाॐमनोजुतिर्जुष
तामाज्यंस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञंठंसमिमंदधातु विश्वेदेवासंऽइहमादयंतामोंप्रातिष्ठाइत्यक्षतान्विकीर्यप्रतिष्ठांकुर्यात्ाततः
पाद्यार्घाचमनीयमधुपर्कपुनराचमनीयस्नानवस्त्रगंधपुष्पधूपदीपतांबूलादिभिर्नैवेद्यैः पृथग्विधैश्चप्रणवादिनमोंतेनस्वस्वनाम्नापूजयेत् ॥
तद्यथा॥ॐगणपतयेनमः पादयोरिदंपाद्यम्॥ॐगणपतयेनमः॥इदमर्घ्यम्॥इदमाचमनीयम्इदंस्नानार्थंजलम्॥ॐगणपतयेनमःइमंगंधम्
इमानिपुष्पाणि ॐगणपतयेनमःएतानि धूपदीपनैवेद्यतांबूलानि दक्षिणां च समर्पयामि॥एवमेव ॐ गौर्य्यैनमः॥१॥ॐपद्मायैनमः॥२॥
ॐशच्यैनमः ॥३॥ ॐमेधायैनमः ॥४॥ ॐसावित्र्यैनमः ॥५॥ ॐविजयायैनमः ॥ ६ ॥ ॐजयायैनमः ॥७॥ ॐदेवसेनायैनमः ॥
॥८॥ ॐस्वधायैनमः ॥९॥ ॐस्वाहायैनमः ॥१०॥ ॐमातृभ्योनमः ॥११॥ ॐलोकमातृभ्योनमः ॥१२॥ ॐहृष्टचैनमः ॥ १३ ॥
ॐपुष्टचैनमः ॥१४॥ ॐतुष्टचैनमः ॥ १५ ॥ ॐआत्मकुलदेवतायैनमः ॥ १६ ॥ ॐश्रियेनमः ॥ १७ ॥ इति प्रत्येकमर्चयेत्॥ततः
केनचित्पात्रेण विलीनघृतंसगुडमादाय ॐव्वसोःपवित्रमसिशतधारं व्वसोः पवित्रमसिसहस्रधारं देवस्त्वासविता पुनातुव्वसोःपवित्रेणश
तधारेणसुप्वाः कामंधुक्षः ॥ इति मंत्रेण मातृणामुपरिभित्तिलग्नाः सप्त पंच तिस्रोवाधाराउत्तरोत्तरक्रमेणपातयेत ताश्चपूजयेत्॥ततोवृद्धि

सूक्तं पठेत् ॥ ॐ आयुष्यंवर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम् ॥१॥ नतद्रक्षाꣳसिनपिशाचास्तरन्ति
देवानामोजः प्रथमजꣳह्येतत्। योबिभर्तिदाक्षायणꣳहिरण्यꣳसदेवेषु कृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः॥२॥ यदाबध्नन्दाक्षायणा
हिरण्यꣳशतानीकायसुमनस्यमानाः तन्मऽआबध्नामिशतशारदायायुष्मान्जरदृष्टिर्यथासम् ३ अथसपात्रकाऽभ्युदयिकश्राद्धप्रयोगः। तत्रकर्त्ता
पूर्वाह्णेसुस्नातः प्रक्षालितकरचरणःस्वाचांतःसपवित्रोपग्रहकुशःसुस्नातान् स्वाचांतान् अष्टौ संख्यकान्ब्राह्मणानाहूय गोमयोपलिप्तेमंडले
ॐ स्वागतंवः सुस्वागतमितिप्रश्नोत्तरपूर्वकंप्रागग्रकुशोत्तरेष्वासनेषु प्राङ्मुखान्॥दक्षिणोपक्रमानुदगपवर्गानुपवेश्य स्वयमुदङ्मुखउपवि
श्यसजघनं दक्षिणंजान्वाच्यतांबूलादिकमादाय विप्रजानुनीस्पृशन्॥ॐ अद्यकरिष्यमाणाऽमुककर्मनिमित्तकाभ्युदयिकश्राद्धे अस्मन्मा
त्रादित्रयास्मन्मातामहादित्रयनांदीश्राद्धसंबंधिसत्यवसुसंज्ञकविश्वेदेवस्थाने भवंतौ मयानिमंत्रितौ ॥ इति तांबूलादिनाद्वौविप्रौनि
मंत्रयेत् ॥ ॐ निमंत्रितौस्वः इतिप्रतिवचनम्॥पुनस्तांबूलादीन्यादाय तदुत्तरयोर्विप्रयोर्जानुनीस्पृशन्॥ॐ अद्यामुकगोत्राणामस्मन्मातृ
पितामहीप्रपितामहीनाममुकामुकदेवीनां नांदीमुखीनाममुककर्मनिमित्ताभ्युदयिकश्राद्धेभवंतौमया निमंत्रितौ ॥ ॐ निमंत्रितौस्व इतिता
भ्यामुक्ते तद्वदेव पित्राद्यर्थंमातामहाद्यर्थंचप्रतिवर्गंद्विजद्वयं निमत्रयेत्॥एवमष्टौब्राह्मणान्निमंत्र्य ततः ॐ अक्रोधनैःशौचपरैःसततंब्रह्मचा
रिभिः ॥ भवितव्यंभवद्भिश्च मयाचश्राद्धकारिणा ॥ इतिनियमान् सर्वान्द्विजान् श्रावयेत् ॥ ततोदेवद्विजपूर्वकंचरणप्रक्षालनंविधाय
गंधपुष्पादियुतंपाद्यंगृहीत्वा॥ॐ अद्यनांदीमुखमात्रादित्रयपित्रादित्रयमातामहादित्रयसंबंधिनः सत्यवसुसंज्ञकाविश्वेदेवाएतत्पादार्घंवः

स्वाहानमः इति देवद्विजपादयोरर्घ्यं दद्यात्। पुनः ॐ अद्यामुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यो नांदीमुख्य एतत्पादार्घं त्रेधा विभज्य वः स्वाहानम इति मातृवर्गब्राह्मण चरणयोर्दत्त्वा पित्रादित्रये मातामहादित्रयेऽप्येवमेव दद्यात्। ततो ब्राह्मणानाचमय्य स्वयमप्याचम्य श्राद्धदेशे द्विजान्प्रवेश्य स्वयमपि प्रविश्य ॥ अत्रासध्वमिति प्रागग्रकुशासनेषु उदगपवर्गान्देवपूर्वकमुपवेश्य स्वयमुदङ्मुख उपविश्य प्रत्यासनसमीपे दीपं प्रज्वाल्य काककुक्कुटादीन् श्राद्धापहं तृनपसारयेत् ॥ श्राद्धदेशावरणं च कुर्यात् ॥ इति निमंत्रणप्रकारः ॥ अथोपवीती आचम्य प्राणानायम्य स्वपुरतः कर्म्मपात्रं जलेनापूर्य्य दूर्वादधियवहरितकुशांस्तत्र निक्षिप्य ॐ कर्मपात्रं संपन्नमिति ब्रूयात् ॐ सुसंपन्नमित्यनुज्ञातः ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यंतरः शुचिः । ॐ पुंडरीकाक्षः पुनात्विति पठित्वा कुशानीतजलेन श्राद्धीयोपकरणानि प्रोक्षयेत् ॥ ततः ॐ वैष्णव्यै नमः ॥ ॐ काश्यप्यै नमः ॥ ॐ भूम्यै नमः ॥ इति भूमिं संपूज्य विष्णवे नमः इति विष्णुं मनोवाक्कायैर्नमस्कारं कुर्यात्। ततो दूर्वाकुशयवजलान्यादाय देशकालौ संकीर्त्य ॐ अद्यामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनां नांदीमुखीनाम् अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां नांदीमुखानां तथा चामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां नांदीमुखानाम् अमुककर्मनिमित्तकं सत्यवसुसंज्ञकविश्वेदेवपूर्वकं सपिंडकमाभ्युदयिकश्राद्धं भवदनुज्ञयाहं करिष्ये इति संकल्प्य ॐ कुरुष्व इति ब्राह्मणानुज्ञातः सप्रणवव्याहृतिकां गायत्रीं त्रिर्जपित्वा विष्णुं स्मरेत्। ततः ॐ नमो नमस्ते गोविंद पुराणपुरुषोत्तम इदं श्राद्धं हृषीकेश रक्षतां सर्वतो दिशः । इति सर्वत्र यवान् गौरसर्षपांश्च विकीर्य वामकटिभागे नीवीबंधं कुर्यात् ॥ ततः कस्मिंश्चित्पात्रे जलं गृहीत्वा हरितैः कुशैरालोडच ॐ यद्देवा देवहेडनम् ॥ इत्यादि कूष्मांडसूक्तेन ॐ

पुनन्तुमादेवजना०इति पावमानेनचाऽभिमंत्र्यपाकादीनांपवित्रताऽस्त्विइतिपाकादीन् संप्रोक्षयेत्। अथासनादिप्रयोगः॥तत्रतावत् कुशत्रय
यवजलान्यादाय।ॐअद्याऽस्मन्मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञकाविश्वेदेवाइदंकौशमासनंवोनमः।इति
देवद्विजकरयोर्जलंदत्त्वाकुशत्रयरूपंसयवंब्राह्मणासनदक्षिणभागस्योपरि देवतीर्थेनपूर्वाग्रमुत्सृजेत्।नद्विजकरयोर्दद्यात्।ततःॐअद्यामुकगो
त्राऽस्मन्मातृपितामहीप्रपितामह्यःनांदीमुख्यः इदमासनंत्रेधाविभज्य वःस्वाहा ॥इत्युच्चार्य्यमातृवर्गविप्रकरयोर्जलंदत्त्वा कंबलाद्यासनद
क्षिणभागस्योपरिदेवतीर्थेनपूर्वाग्रं कुशत्रयमुत्सृजेत् ॥ एवमेवपित्रादिमातामहादिवर्गद्वयब्राह्मणासनोपरिदद्यात् ॥ ततः ॐ सत्यवसुसं
ज्ञकविश्वान्देवानावाहयिष्ये ॥ इतिदेवद्विजौपृष्ट्वा ॥ आवाहयइत्यनुज्ञातः सयवकरो द्विजांगुष्ठौगृहीत्वा ॥ ॐविश्वेदेवासऽआगंतशृ
णुतामंऽइमठंहवंम् ॥ एदंबर्हिर्न्निषींदत ॥ इत्यावाह्य ॐयवोसियवयास्मद्द्वेषोयवयारातीत्यनेनयवान्विकीर्य॥ॐ विश्वेदेवा ं शृणुतेमठं
हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ट॥येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् इतिजपेत्॥विश्वेदेवोत्प ि नाम्नोरज्ञाने॥
ॐआगच्छंतुमहाभागा विश्वेदेवामहाबलाः॥येयत्रयोजिताःश्राद्धे सावधानाभवंतुते॥इतिश्लोकंपठेत्॥ततःॐनांदीमुखीमातृरावाहयिष्ये
इतिमातृवर्गब्राह्मणौपृष्ट्वा आवाहयेत्यनुज्ञातःसयवकरो ब्राह्मणयोर्दक्षिणकरांगुष्ठौगृहीत्वाॐउशन्तंस्त्वानिधीमह्युशन्तःसमिधीमहि।उश
न्नुशतऽआंवहमातृर्हविषेऽअत्तंवे॥इत्यावाह्य प्रदक्षिणकर्मणा यवान् विकीर्य ॥ एवमेवपित्रादिब्राह्मणयोश्चपूर्व्वोक्तप्रयोगेनॐ पितृन् हविषे
अत्तंवे ॥ मातामहान्हविषेऽअत्तवे इतिमंत्रोहेन यथाक्रमंपित्रादीन्मातामहादींश्चावाह्य प्रदक्षिणं यवान्विकिरेत्॥ततोदेवपूर्वकंदशसुस्वर्णा

घर्घपात्रेषु प्रतिपात्रं पवित्रंनिधाय ॐशन्नोदेवीरभिष्टय आपाभवंतुपीतये शंय्योरभिस्रवंतुनः इतिप्रत्येकंपात्रेष्वपोनिषिच्य ॐयवो
सियवयास्म्मद्वेषोयुवयारांतीरितिदेवपात्रेषु यवान्निक्षिप्य।ॐयवोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिःपृक्तःपुष्ठ्यानांदीमुखाँल्लो
क न् प्रीणाहिनः स्वाहा इतिमंत्रेणमात्राद्यर्घपात्रेषु यवान् क्षिपेत् ॥ ततः सर्वत्र तूष्णीगंधपुष्पेचदत्त्वा द्वितीयब्राह्मणहस्तेप्रथमदेवविप्र
करं निधायतत्रप्रागग्रेदैवार्घपात्रस्थपवित्रेविन्यस्यदक्षिणहस्तेनाऽर्घपात्रमादायॐयादिव्याऽआपःपयसासंबभूवुर्याअंतरिक्षाऽउतपार्थिवी
र्याः॥हिरण्यवर्णायज्ञियास्तानऽआपः शिवाः सꣳस्योनाः सुहवाभवंतु इत्यभिमंत्र्य ॐअस्मन्मात्रादिपित्रादिमातामहादित्रयनांदी
श्राद्धसंबंधिनः सत्यवसुसंज्ञकाविश्वेदेवा एषवोर्घोनमः ॥ इति दैवतीर्थेनपवित्रोपरि अर्घंदद्यात् ॥ एवमेव मातृवर्गद्वितीयब्राह्मणकरे
प्रथमब्राह्मणकरं निधाय तत्र प्रागग्रंमात्रर्घपात्रस्थंपवित्रंन्यस्य ॥ अर्घपात्रमादाय ॐयादिव्याऽआपइत्यभिमंत्र्यॐअद्यामुकगोत्रेऽस्म
न्मातरमुकदेविनांदीमुखिएषतेऽर्घः स्वाहानमइतिदैवतीर्थेनार्घंदत्त्वातत्रैवपितामहीपात्रस्थंपवित्रंप्रागग्रंनिधाय।ॐयादिव्याइत्यभिमंत्र्यगो
त्राद्युच्चारणपूर्वकंपितामह्यैप्राग्वदर्घंदत्त्वाएवमेवप्रपितामह्यै चार्घंदद्यात्॥ततः पित्रादिद्वितीयद्विजकरेप्रथमद्विजकरंनिधाय तत्रक्रमेणप्राग
ग्रपवित्रनिधानादिपूर्वोक्तप्रकारेणपितामहायप्रपितामहायचार्घंप्रत्येकंदत्त्वा तेनैवक्रमेणमातामहादिभ्यः पवित्रदानपूर्वकं प्रत्येकमर्घ्यं
दद्यात् ॥ ततः ॐ विश्वेभ्योदेवेभ्यः स्थानमसीत्युक्त्वापवित्रजलयुतंदेवार्घपात्रंप्रथमब्राह्मणदक्षिणपार्श्वेउत्तानंस्थापयेत्॥ततः पितामही
प्रपितामहीपात्रद्वयस्थितंपवित्रादिमात्रर्घपात्रेकृत्वा। ॐनांदीमुखीभ्योमातृभ्यः स्थानमसीतिमातृपात्रंविप्रदक्षिणपार्श्वेन्युब्जं कुर्यात् एव

मेवपितृपात्रेपितामहादिसंस्रवान् ॥ मातामहपात्रे प्रमातामहादिसंस्रवांश्चसमवनीय ॐनांदीमुखेभ्यः पितृभ्यः स्थानमसि ॐनांदीमुखेभ्योमातामहेभ्यःस्थानमसीति चोक्त्वा स्वस्वविप्रदक्षिणपार्श्वेन्युब्जं कुर्यात् ॥ ततः स्वस्वपात्रद्वयेनाच्छादयेत् ॥ एतानिस्थापितान्यर्घपात्राणिदक्षिणादानपर्यंतनोद्धरेन्नचालयेत् ॥ ततोगंधादिदानम् ॥ तत्र अष्टसुब्राह्मणेषुगंधपुष्पधूपदीपवस्त्रादिप्रत्येकंसन्निधायतदीयकरेषुप्रत्येकंजलमासिच्यकुशत्रययवजलान्यादाय ॐ अद्यास्मन्मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञका विश्वेदेवाः एतानिगंधपुष्पधूपदीपतांबूलवासांसिवोनमइत्युच्चार्यगंधादिदद्यात् ॥ ततः अयं वोगंधइत्यभिधाय ब्राह्मणहस्तेषुप्रत्येकंगंधमर्पयेत् ॐ सुगंध इतितैरुक्ते ॥ ॐ इमानिवः पुष्पाणि इति पुष्पाणि निवेदयेत् ॐ सुपुष्पाणीतितैरुक्ते ॥ॐ अयंवोधूपः ॐ सुधूपः ॥ॐ अयंवोदीपः ॐसुदीपः ॥ ॐएतानिवोवासांसि ॐसुवासांसि इतितैरुक्ते ॥ इत्यादिक्रमेणप्रत्येकंब्राह्मणेभ्यो गंधादिप्रतिपादयेत् ॥ तैश्चपुष्पं शिखातिरिक्तदेशे न धार्यम् ॥ अत्रावसरे अन्यदपितांबूलयज्ञोपवीताभरणकमंडलुप्रभृतीनिफलार्थितया दद्यात् ॥ ततः कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्राः मातृपितामहीप्रपितामह्यः नांदीमुख्यः एतानि गंधपुष्पधूपदीपतांबूलसिंदूरवासांसित्रेधाविभज्य वः स्वाहा इत्यभिधाय गंधादिदत्त्वा एवमेव पित्रादिमातामहादिब्राह्मणेषु द्वयोर्द्वयोः क्रमेणगोत्राद्युच्चारणपूर्वकं सकुशयवजलेनगंधादीनिसंकल्प्यपूर्ववद्दद्यात् ॥ एवंगंधादि दत्त्वा कृतांजलिर्भूत्वा अर्चनंसंपूर्णमस्त्विति द्विजान्प्रतिब्रूयात् अस्त्वर्चनंसंपूर्णमिति विप्रावदेयुः ॥ ततोभोजनपात्रस्थापनदेशंसंमार्ज्य तत्र गौरमृत्तिकाभस्मतंडुलचूर्णादिभिर्मंडलं प्रत्येकं कृत्वा भोजनपात्राणि च दत्त्वा हस्तप्रक्षालनार्थं प्रत्येकं जलं दद्यात् ॥ ततोघृतप्लुतमन्नं पात्रे कृत्वा आर्द्रामलकमात्रं गृहीत्वा ॐ अग्नौकरिष्ये

इतिपृष्ट्वा ॥ कुरुष्वेत्यनुज्ञातोऽग्निमानग्नौ निरग्निकस्तु पित्र्यपंक्तिमूर्द्धन्यहस्ते प्राङ्मुखः अग्नय कव्यवाहनायस्वाहा इदमग्नयेकव्य
वाहनाय ॥ सोमायपितृमतेस्वाहा इदं सोमायपितृमते इत्याहुतिद्वयंदत्त्वाशेषं दैवपात्रवर्ज्जमात्रादिपात्रेषु किंचित् किंचिद्दद्यात्॥नहि
स्मृताः शेषभाजोविश्वेदेवाः पुराणगैरितिवायुपुराणवाक्यात् ॥ ततोऽष्टस्वपिपात्रेषुयथासंभवमन्नं परिविष्य पात्रांतरस्थंजलंघृतंव्यंजनं
चोपनीय ॥ उत्तानाभ्यांपाणिभ्यां पात्रमालभ्यजपति ॥ ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा इतिॐ
इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपाꣳसुरे स्वाहा।इतिचपठित्वाॐविष्णोहव्यꣳरक्ष इत्यनया विप्रांगुष्ठमन्नेऽवगाह्य इदमन्नमूइमा
आपः इदमाज्यम् इदंहविरित्युक्त्वा। ॐअपहताऽअसुरारक्षाꣳसिवेदिषदः॥इतियवान्पात्रपरितो विकीर्य्य एवमेव द्वितीयपात्रस्थमन्नंसंस्कृत्य
वामकरेण भोजनपात्रद्वयमालभ्य कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रास्मन्मात्रादित्रयमातामहादित्रयनांदीश्राद्धसंबंधि
नःसत्यवसुनामानोविश्वेदेवाः इदमन्नंघृताद्युपस्करसहितंपरिविष्टंपरिवेक्ष्यमाणंचद्विजयोस्तृप्तिपर्यंतम् अमृतरूपं वोनम इतिसंकल्प्य विप्रदक्षि
णभागेजलंसमुत्सृजेत्।एवमेवमात्रादिपात्रद्वयंक्रमेण विप्रांगुष्ठाऽवगाहनयवविकिरणैःसंस्कृत्य भोजनपात्रद्वयमालभ्यॐअमुकगोत्रास्म
न्मातृपितामहीप्रपितामह्योऽमुकाऽमुकदेव्योनांदीमुख्य इदमन्नंघृताद्युपस्करसहितं परि विष्टंपरिवेक्ष्यमाणंचद्विजयोस्तृप्तिपर्य्यंतममृतरू
पंत्रेधाविभज्यवःस्वाहानमः॥इत्युत्सृजेत् ॥ एवमेवपित्रादिपात्रद्वयंमातामहादिपात्रद्वयंचक्रमेण पात्रालंभना पूर्व्वकंसंकल्प्यदद्यात् ॥
ततःॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य।विप्रान्नांदीमुखान्मात्रादिरूपान्ध्यात्वा देवपूर्वकं ब्राह्मणा

नामापोशानंदत्त्वायथासुखंजुषध्वमित्युक्त्वाभोजयेत्। ततः अश्नत्सु विप्रेषु प्रागग्रकुशोत्तरासनोपविष्टः प्रणवव्याहृतिपूर्विकां सकृत्त्रिर्वा गायत्रीं जप्त्वा ॐ मधुमधुमध्विति च जपेत् न मधुवाता इति तृचं न पिङ्क्तमन्त्रान् ततः ॐ कृणुष्वपाजः प्रसितिन्नपृथ्वीं याहि राजेवामवाँ२ऽइभेन॥ तृष्वीमनु प्रसितिन्द्रूणानोस्तासि विध्यरक्षसस्तपिष्ठैः ॥ १ ॥ ॐ तवभ्रमासऽआशुयापतन्त्यनुस्पृश धृषता शोशुचानः॥ तपूंष्यग्ने जुह्वापतङ्गानसंन्दितो विसृज विष्वगुल्काः ॥२॥ प्रतिस्पशो विसृज तूर्णितमो भवापायुर्विशोऽअस्याऽअदब्धः॥ यो नो दूरेऽअघशंसो योऽअन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्। ३। उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२ऽओषतात्तिग्महेते। यो नोऽअरातिं समिधानचक्रेनीचातंधक्ष्यतसन्नशुष्कम्॥४॥ ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अवस्थिरातनुहियातुजूनां जामिमजामिं प्रमृणीहि शत्रून्॥ अग्नेष्ट्वा तेजसा सादयामि ॥ ५ ॥ इति रक्षोघ्नसूक्तम्॥ ॐ पुनन्तु मा देवजना इत्यादि पवमानम् ॥ ॐ सहस्रशीर्षा पुरुष इत्यादि पुरुषसूक्तम् ॥ अन्यानि शिवसंकल्पमस्त्वित्यादि पवित्राणि च जपेत् ॥ ततस्तृप्तान् ज्ञात्वा सर्वव्यञ्जनोपेतमन्नाद्यमादाय वारिणाप्लाव्य प्रागग्रास्तृतकुशोपरि ॥ ॐ अग्निदग्धाश्चये जीवा येप्यदग्धाः कुलेमम ॥ भूमौदत्तेन तृप्यन्तु तृप्तायांतु परांगतिमिति विकीर्य द्विराचम्य विष्णुमनुस्मृत्य विप्रेभ्यः सकृत्सकृदपो दत्त्वा पूर्ववत् गायत्रीं मधुमधुमध्विति जप्त्वा ॐ संपन्नम् इति ब्राह्मणान्पृष्ट्वा ॥ सुसंपन्नमिति तैरुक्ते ॥ शेषमन्नं किं क्रियतामिति पृष्ट्वा ॥ इष्टैः सह भुज्यतामित्यनुज्ञातः पिंडानहं करिष्ये इति पृच्छेत् ॥ कुरुष्व इत्युक्ते भोजनशालाया बहिः चतुरस्रं प्राक्प्लवं सिकताभिर्मंडलत्रयं कृत्वा तन्मध्ये ॐ अपहताऽअसुरा रक्षांसि वेदिषदः॥ इति प्रागग्रं रेखात्रयं कृत्वा

प्रत्येकंरेखोपरि ॐयेरूपाणिप्रतिमुञ्चमाना असुराः संतः स्वाहयाचरंति परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान् प्रणुदात्यस्मादित्यं
गारंभ्रामयेत् ॥ तत्ररेखात्रयोपरि सकृदाच्छिन्नान् प्रागग्रान्कुशानास्तीर्य ॥ ॐ देवताभ्यइतित्रिर्जप्त्वाप्रथममंडलस्थदर्भ
मूले ॐ अद्यामुकगोत्रे मातरमुकदेविनांदीमुखि अत्राऽवनेनिक्ष्वतेस्वाहा इतियवसहितजलेन मात्रे अवनेजनंदत्त्वाएवमेव पितामही
प्रपितामहीभ्यांमध्याग्रयोःक्रमेण दद्यात् ॥ ततः ॐअद्यामुकगोत्रपितरमुकशर्मन् नांदीमुखात्रावनेनिक्ष्वतेस्वाहा इतिद्वितीय
मंडलस्थितकुशत्रयमूलेऽवनेजनंदत्त्वा एवंपितामहप्रपितामहयोस्तत्तत्कुशमध्याग्रयोरवनेजनंदद्यात् एवमेव मातामहादिदर्भमूलम
ध्याग्रेषुदद्यात् ॥ ततःसर्व्वव्यंजनोपेतं सर्व्वविधमन्नमुद्धृत्यदधिबदरयवैः संमिश्र्य नवपिंडान् बिल्वोपमान्निर्माय एकंपिंडं कुशादौश्वा
दाय ॐअद्यामुकगोत्रे मातरमुकदेवि नांदीमुखि एषदधिबदराक्षतमिश्रः पिंडस्तेनमः॥ इत्यवनेजनक्रमेणावनेजनस्थानेषु मात्रादिभ्यः
पिंडान्दद्यात् ॥ ततः ॐअद्यामुकगोत्र पितरमुकशर्मन् नांदीमुख एषदधिबदराक्षतमिश्रः पिंडस्तेनमः॥ इति पितृस्थानेदद्यात्॥एवमेव
पितामहादिभ्यः पंचभ्यस्तत्तदवनेजनस्थाने पिंडान् दद्यात्॥ततोदर्भमूलेषु पाणिस्थं पिंडलेपंनिमृज्य ॥ हस्तौप्रक्षाल्याचम्य हरिंस्म
रेत् ॥ ततो मात्रादिपिंडाभिमुखोंजलिंबद्ध्वा ॥ ॐअत्रमातरोमादयध्वंयथाभागमावृषायध्वमितिजापित्वा उदङ्मुखीभूयश्वासंनियम्यप्र ॥१००॥
दक्षिणंपरावृत्य।ॐअमीमदंतमातरोयथाभागमावृषायिषतेतिजपेत् एवं पित्रादिपिंडाभिमुखः ॐअत्रपितरोमादयध्वमित्यादिजपित्वा॥
मातामहादिपिंडाभिमुखोभूत्वाॐअत्रमातामहादयोमादयध्वमित्यादिचजपित्वा प्रदक्षिणंपरावृत्योदङ्मुखोऽसून्नियम्य तथैवपरावृत्य

ॐअमीमदंतपितरोयथाभागमावृषायिषतपित्रादिपिंडसमीपेॐअमीमदंतमातामहायथाभागमावृषायिषतेति मातामहादिपिंडसमीपेच क्रमेणजपेत् ॥ ततोऽवनेजनपात्रजलेन ॐअद्यामुकगोत्रे मातरमुकदेविनांदीमुखि अत्रप्रत्यवनेनिक्ष्वतेस्वाहा इतिमातृपिंडोपरिप्रत्यव नेजनंदद्यात् ॥ एवंपितामहीप्रपितामहीभ्यां तथा ॐअद्यामुकगोत्रपितरमुकशर्मन् नांदीमुख अत्रप्रत्यवनेनिक्ष्वतेस्वाहा इति पितृपिंडो परि दद्यात् । एवमेव पितामहादिभ्यः पंचभ्यस्तत्तत्पिंडोपरिदद्यात् । ततोनीवींविस्रंस्य आचम्य। ॐनमोवोमातरोरसायनमोवोमातरः शोषाय नमोवोमातरोजीवाय नमोवोमातरः स्वाहायै नमोमातरोघोराय नमोवोमातरोमन्यवे नमोवोमातरोमातरो नमोवोगृहान्नोमा तरो दत्तसतोवोमातरोदेष्म । इति मात्रादिवर्गंनमस्कृत्य ॥ ॐनमोवः पितरोरसाय नमोवः पितरः शोषाय नमोवः पितरोजीवायनमोवः पितरःस्वाहायै नमोवःपितरोघोरायनमोवः पितरोमन्यवे नमोवः पितरःपितरो नमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म इति पित्रा दिमातामहादिवर्गद्वयं नमस्कुर्यात्॥ततः ॐएतद्वोमातरोवाम इति मात्रादिपिंडेषु सूत्राणिदत्त्वा ॐएतद्वःपितरोवास इति पित्रादिषट्पिं डेषुप्रतिपिंडं सूत्रत्रयंदद्यात् ॥ ततो गंधपुष्पधूपदीपद्राक्षामलकमूलयवतांबूलादिभिः प्रत्येकंपिंडानभ्यर्च्यब्राह्मणानाचामयेत् ॥ ततो वाचंविसृज्य सुप्रोक्षितमस्त्विति जलेन पिंडाग्रभूमिं प्रोक्ष्य द्विजकरेषु शिवा आपःसंत्स्विति पवित्रोपग्रहार्थंकुशान्जलंदत्त्वा सौमनस्य मस्त्वितिपुष्पाणि ॥ अक्षतं चारिष्टं चास्तु इति यवान् दद्यात् ॥ ततो देवद्विजौ स्वस्तिभवंतोब्रुवंतामितिस्वस्तिवाचयित्वा कर्मपात्रस्थजलेन कुशैः स्वमूर्द्धानमभिषिंचति दीर्घमायुष्यमस्तु शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयस्तदस्त्वित्यादिना ॥

ततोयत्पापं तत्प्रतिहतमस्त्विति भूमौनिषिच्यद्विपदचतुष्पदेभ्यः शांतिर्भवत्वित्युक्त्वा ॥ मात्रादि प्रथमब्राह्मणकरं द्वितीय ब्राह्मणकरे कृत्वा ॥ नांदीमुख्योमातरः पितामह्यः प्रपितामह्यः प्रीयंतामितिक्षीरयवोदकमक्षय्यस्थाने दत्त्वैवमेवपितरः पितामहाः प्रपितामहाः प्रीयंतामिति पित्रादिद्विजद्वयकरे दत्त्वा ॥ मातामहाः प्रमातामहाः वृद्धप्रमातामहाः सपत्नीकाः प्रीयंतामितिमातामहादित्रयद्विजद्वयकरेच प्रत्येकं दद्यात् ॥ ततःकृतांजलिः प्रार्थयेत् ॥ ॐअघोरामातरः संतु ॥ संत्विति ब्राह्मणाब्रूयुः ॥ ॐअघोराः पितरः संतु ॥ ॐअघोरामातामहाःसंत्वितिचोक्त्वा ॥ सन्त्वित्यनुज्ञातः ॐगोत्रंनोवर्द्धतामितिप्रार्थयेत् ॥ वर्द्धतामितिविप्राब्रूयुः॥दातारोनोभिवर्द्धताम् ॥ वेदाःसंततिरेवच ॥ श्रद्धाचनोमाव्यगमत् ॥ बहुदेयंचनोऽस्तु ॥ अन्नंचनोबहुभवेत् ॥ अतिथींश्चलभेमहि॥याचितारश्चनःसंतु॥ माचयाचिष्मकंचन॥एताःसत्याआशिषःसंतु इतिब्रूयात्॥संत्वितितैरुक्ते॥सपवित्रान्कुशान् प्रत्येकंमात्रादित्रयपिंडेपित्रादित्रयपिंडे मातामहादित्रयपिंडेचधृत्वानांदीमुखीमातृपितामहीप्रपितामहीःनांदीमुखान्पितृपितामहप्रपितामहान् नांदीमुखान् मातामहप्रमातामहवृद्धप्रमातामहान्सपत्नीकान्स्वाहावाचयिष्यइतिपृष्ट्वावाच्यतामित्यनुज्ञातः।ॐनांदीमुख्योमातृपितामहीप्रपितामह्योनांदीमुखाःपितृपितामहप्रपितामहाःनांदीमुखामातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाश्चप्रीयंतामितिप्रार्थयेत् ॥ प्रीयंतामितिद्विजैरुच्यमानेपिंडेषुजलंनिषिंचेत् । ततःसंस्रवपात्राण्युत्तानीकृत्यदेवादक्षिणांदद्यात्।कुशत्रययवजलान्यादाय ॐ अद्यास्मन्मात्रादित्रयपित्रादित्रयमातामहादित्रयाभ्युदयिकश्राद्धसंबंधिवैश्वदेविकश्राद्धप्रतिष्ठार्थमिमांद्राक्षामलकार्द्रकमूलकादिरूपांदक्षिणांविष्णुदैवत्याममुकामुकगोत्राभ्याममुकामुकशर्मभ्यांभवद्भ्यांदातुमहमुत्सृजे इत्युच्चार्य देवविप्रद्वयकरयोदद्यात्।ततःॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनांनांदीमुखीनांकृते

तदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमांद्राक्षामलकार्द्रकमूलकादिरूपांदक्षिणां विष्णुदैवत्यामसुकामुकगोत्राभ्याममुकामुकशर्मभ्यांब्राह्मणाभ्यांदातुमह
मुत्सृजे॥इतिमात्रादिवर्गद्विजाभ्यांदत्त्वाएवमेवपितृवर्गद्विजाभ्यांमातामहवर्गद्विजाभ्यांचदक्षिणांदद्यात्॥ततःपिंडानुत्थापयामिइतिपृष्ट्वा
उत्थापयइत्यनुज्ञातः पिंडानुत्थाप्यस्थाल्यांनिधायाग्रायदर्भानुल्मुकंचवह्नौक्षिपेत् ॥ ततोजलदानपूर्वकं विश्वेदेवाः प्रीयंतामित्युक्त्वा
प्रीयंतामित्यनुज्ञातः स्वस्तिभवंत्विति भवंतोब्रुवंतुइतिब्रूयात्॥तैःस्वस्तीत्युक्ते ब्राह्मणान्प्रणिपत्य प्रसाद्यॐवाजेवाजेवतवाजिनो नोधनेषु
विप्राऽअमृताऽऋतज्ञाः अस्यमध्वः पिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः।इतिमंत्रेणमात्रादिपित्रादिमातामहादिवर्गत्रयद्विजान् विसृज्य
देवद्विजान्विसृजेत्।ततःॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे॥आमांगंतांपितरामातराचामासोमोऽमृतत्वेनगम्याइ
तिमंत्रेण विप्रान् प्रदक्षिणीकृत्याऽनुव्रज्यगृहंप्रविश्यततोरक्षादीपान्पाणिभ्यांनिर्वाप्यहस्तौपादौप्रक्षाल्याचम्यपिंडान् गवादिभ्योदत्त्वोच्छि
ष्टमार्ज्जनादिकारयेत्॥ततोवैश्वदेवबलिकर्मणीकृत्वाॐप्रमादात्कुर्वतांकर्मइत्यादिपठित्वाकर्मपूर्त्तिकामोविष्णुंस्मरेत्॥ ततोवैश्वदेवांतेसुत
भृत्यबांधवातिथिसंयुक्तोऽश्नीयात् ॥ इतिपण्डितश्रीचतुर्थीलालगौडप्रणीतेगौडीयश्राद्धप्रकाशेमदनरत्नोक्तसपात्रकाभ्युदयिकश्राद्धपद्धतिः
समाप्ता॥अथाऽन्वष्टकाश्राद्धम्।एतच्चाऽऽश्विनपौषमाघफाल्गुनमासेषुकृष्णपक्षेनवम्यांकार्यम्॥अशक्तौमहालयेमाघमासे वाकुर्यात्।तत्र स
पात्रकनवदैवत्यश्राद्धपद्धतिः॥श्राद्धकर्त्तापूर्वेद्युर्निरामिषमेकवारंभुक्त्वातद्दिनेप्रदोषान्तेब्राह्मणान्निमंत्रणंदत्त्वाश्राद्धदिनेनित्यावश्यकंसमाप्य
पूर्वोक्तपार्वणवत्पाकंकृत्वाश्राद्धस्थानंसामग्रींचसंपादयेत्।ततोदिनस्यषण्मुहूर्त्तानंतरंपुनःस्नात्वाद्विजानाहूयतेभ्योयथाचारंस्नानोपकरणं

दत्त्वाअपराह्ण ब्राह्मणानस्नातानशुचिः शुक्लद्विवासाः कृतांजलिः स्वागतं भवतामितिब्रूयात्व सुस्वागतमितितैरुक्ते पूर्वकृतगोमयमंडलद्वये आसनेषुप्राङ्मुखान् देवब्राह्मणान् उदङ्मुखान् पितृब्राह्मणानुपवेशयेत्॥ततः सव्येनाऽऽचम्य सजघनं दक्षिणंजान्वाच्य विप्रकरे पुष्पचं 'दनतांबूलानिदत्त्वादक्षिणकरेण ब्राह्मणदक्षिणजानुस्पृष्ट्वा । देशकालौसंकीर्त्य अद्यकरिष्यमाणाऽन्वष्टकाश्राद्धेऽस्मत्पित्रादित्रयसंबंधि विश्वेदेवश्राद्धार्थं त्वामहमामंत्रये इतिब्राह्मणमेकंनिमंत्र्य एवमेवमात्रादित्रयमातामहादित्रयसंबंधिविश्वेदेवश्राद्धार्थंच विप्रद्वयंनिमंत्रयेत्॥ निमंत्रितोस्मीतिप्रतिवचनम्॥ततः अक्रोधनैःशौचपरैः सततंब्रह्मचारिभिः ॥ भवितव्यंभवद्भिश्च मयाचश्राद्धकारिणा ॥ इतिप्रार्थयेत् ॥ ततोऽपसव्येनवामंजान्वाच्य पितृब्राह्मणकरे पुष्पचंदनतांबूलानिदत्त्वा दक्षिणकरेण विप्रदक्षिणजानुस्पृष्ट्वाॐअद्यकरिष्यमाणान्वष्ट काश्राद्धे अस्मत्पित्रादित्रयश्राद्धार्थंत्वामहमामंत्रये निमंत्रितोस्मीतिप्रतिवचनम् ॥ एवंमात्रादित्रयमातामहादित्रयश्राद्धद्वयार्थं च द्वौ विप्रौनिमंत्र्य ततः अक्रोधनैः शौचपरैरितिनियमान्श्रावयेत् ॥ एवमस्मिन्पक्षेषड्ब्राह्मणाभवंति ॥ मुख्यकल्पशक्तस्तु पंचदशद्वादश एकादशवाविप्रान्निमंत्रयेत्॥ततः सव्येनॐ विश्वेदेवाः इदंवः पाद्यंस्वाहानमंइति देवविप्रपादौक्रमेणप्रक्षाल्यपादयोरर्घ्यंदत्त्वातेभ्यआचा मनार्थंजलंदद्यात् ॥ ततोऽपसव्येनॐअमुकगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणोवसुरुद्रादित्यरूपाः इदंवः पाद्यंस्वधा नमः इत्युच्चार्यपितृब्राह्मणपादौप्रक्षाल्यएवमेव मात्रादित्रयमातामहादित्रयब्राह्मणद्वयस्यक्रमेणपादौप्रक्षालयेत् ॥ ततोनामगोत्राभ्यामर्घ्य माचमनीयंच पूर्व त्तपार्वणवद्दत्त्वा सव्येनस्वयमाचम्य ब्राह्मणैःसहश्राद्धस्थानमागत्याऽऽसनेषु अत्रासध्वमिति देवान्प्राङ्मुखान् पितृनुद ङ्मुखानुपवेशयेत्॥ततः प्रत्यासन्नसमीपेतिलतैलेनदीपंप्रज्वाल्य काककुक्कुटादीनपसारयेत् ॥ श्राद्धदेशावरणंचकुर्यात्॥इतिनिमंत्रणप्र

कारः ॥ ततः श्राद्धकर्त्तास्वासनेप्राङ्मुखउपविश्य सव्येनाचम्य ॐ अपवित्रः पवित्र इति ॐ पुंडरीकाक्षः पुनात्वितिच पठित्वाश्राद्धीय द्रव्याणिस्वात्मानंचसिंचेत् ॥ ततः ॐ वैष्णव्यैनमः ॐकाश्यप्यैनमः ॐ अक्षयायैनमः ॐपृथ्व्यैनमः इतिनत्वा ॐभगवत्यैगयायै नमः ॥ ॐ भगवतेगदाधरायनमः इतितयोर्नमस्कारंकुर्यात् ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य ॐ अद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणाममुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीना ममुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां सपत्नीकानां विश्वेदेवपूर्वकं सपिंडकमन्वष्टकाश्राद्धं पिंड पितृयज्ञव्यतिरिक्तपार्वणविधानेनपितृतृप्तिकामोहंकरिष्ये इतिसंकल्प्य ॐ कुरुष्व इतिब्राह्मणानुज्ञातो गायत्रींत्रिर्जपित्वा ॐ देवताभ्यइतित्रिर्जपेत् ॥ ततः ॐ नमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः इति ॥ दैवकप्रदेशेयवगौरसर्षपान्विकीर्य अपसव्येन ॐ तिलारक्षंतु असुराद्भारक्षंतुराक्षसात् ॥ वह्निवैश्रोत्रियंरक्षेदतिथिःसर्व्वरक्षक इति तिलकुशान्द्वारदेशेक्षिप्त्वा ॐ अग्निष्वात्ताः पितृगणा इत्यादिमंत्रैः सर्वत्रपैतृकप्रदेशेतिलान् गौरसर्षपांश्चविकीर्य्यदक्षिणेवामेवाकटि भागेनीवीबंधंकुर्यात् ॥ ततःसव्यंकृत्वा ॐ यद्देवा देवहेडनमित्यादिकूष्मांडमंत्रैर्जलमभिमंत्र्यतेनदर्भैःपाकादीन्प्रोक्ष्य हरयेनिवे दयेत् ॥ अथासनादिदानम्॥तत्रतावत् उदङ्मुखोदक्षिणंजान्वाच्ययज्ञोपवीतीजलयवसमन्वितमृजुकुशत्रयमादाय ॐअद्यपित्रादित्रय श्राद्धसंबंधिनोविश्वेदेवाइदमासनंवोनमइत्युच्चार्य्यद्विजहस्तेजलमासिच्य आसनदक्षिणभागस्योपरिदेवतीर्थेनपूर्वाग्रंकुशत्रयंप्रक्षिपेत् ॥ एवंमात्रादित्रयमातामहादित्रयसंबंधिदेवेभ्योपिदद्यात् ॥ ततोदक्षिणामुखः प्राचीनावीती पातितवामजानुः द्विगुणभुग्नकुशत्रय

तिलजलान्यादाय ॐ अद्यामुकगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणोवसुरुद्रादित्यरूपा इदमासनंत्रेधाविभज्ययुष्मभ्यं
स्वधा ॥ इत्युच्चार्य्य विप्रहस्तेजलंदत्त्वाकंबलाद्यासनवामभागस्योपरि पितृतीर्थेनमोटकं दक्षिणाग्रमुत्सृजेत् ॥ एवमेवमात्रादिमातामहा
दिवर्गद्वयब्राह्मणासनोपरिदद्यात् ततः सव्यादिना ॐ विश्वेदेवानावाहयिष्ये इतिदेवब्राह्मणंपृष्ट्वा ॐ आवाहय इत्यनुज्ञातः सयवकरोद्वि
जाङ्गुष्ठंगृहीत्वा ॐ विश्वेदेवासऽआगतशृणुतामऽइमर्ठ॒ंहवम् एदंबर्हिर्न्निषीदत।इत्यावाह्यॐयवोसियवयास्मद्द्वेषोयवयारातीरित्यनेनयवान्
विकीर्यॐविश्वेदेवाःशृणुतमेर्ठ॒ंहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठायेऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् इतिजपेत्॥
ॐआगच्छंतुमहाभाग।विश्वेदेवामहाबलाः॥येयत्रयोजिताःश्राद्धे सावधानाभवंतुतेइतिश्लोकंचपठेत्॥ ततोऽपसव्यादिना ॐ पितृनावाह
यिष्ये इतिपितृवर्गब्राह्मणंपृष्ट्वा ॐआवाहयेत्यनुज्ञातः सतिलकरो ब्राह्मणदक्षिणांगुष्ठंगृहीत्वा ॐउशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि॥
उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे।इत्यावाह्यॐअपहताऽअसुरारक्षार्ठ॒ंसिवेदिषदः।इतितिलान् विकीर्य्यएवमेव मात्रादिमातामहादिवर्ग
ब्राह्मणयोश्चपूर्वोक्तप्रयोगेण ॐमातर्हविषेऽअत्तवे॥मातामहान्हविषेऽअत्तवे इति मंत्रोहेनयथाक्रमं मात्रादीन्मातामहादींश्चावाह्य॥तिलान्
विकीर्य्य ॐआयन्तुनःपितरः सोम्यासोऽग्निष्वात्ताःपथिभिर्द्देवयानैः॥अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेऽवंत्वस्मान्॥इतिजपेत्।ततः
सव्यापसव्याभ्यांदेवपूर्वकंषट्सुपात्रेषुप्रतिपात्रंपवित्रमेकैकंनिधायॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये।शंय्योरभिस्रवन्तुनः।इतिप्रत्येकं
पत्रिष्वपोनिषिच्यॐयवोसियवयास्मद्द्वेषोयवयारातीरितिदेवपात्रेषुयवान्निक्षिप्य पित्रादिपात्रत्रयेॐतिलोसिसोमदैवत्यो गोसवोदेवनिर्मि
तः॥प्रत्नमद्भिःपृक्तःस्वधयापितॄँल्लोकान्प्रीणाहिनस्वधानमः इति तिलान्प्रक्षिपेत् ॥ ततःसर्वत्र तूष्णींगंधपुष्पाणिदत्त्वा सव्येनअर्घपात्रं

संपन्नमिति ब्रूयात् सुसंपन्नमित्यनुज्ञातो देवार्घपात्रं वामहस्ते कृत्वा तत्रस्थपवित्रं देवविप्रकरे प्रागग्रं धृत्वा पात्रं दक्षिणहस्तेनाच्छाद्य ॐ या दिव्या
ऽआपः पयसा संबभूवुर्याऽअन्तरिक्षाऽउत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सऽस्योनाः सुहवा भवन्तु। इत्यभिमंत्र्य कुश
त्रययवजलान्यादाय ॐ अस्मत्पित्रादित्रयश्राद्धसंबंधिनो विश्वेदेवा एष वो हस्तार्घो नमः इति देवतीर्थेन पवित्रोपरि अर्घं दद्यात् ॥ एवमेव मातृ
वर्गमातामहवर्गदेवेभ्योऽप्यऽवदद्यात् ॥ अर्घपात्राणि सपवित्राणि पुरतः स्थापयेत् ॥ ततोऽपसव्यादिना अर्घपात्रं संपन्नं सुसंपन्नमित्यनंतरं पि
तृपात्रं गृहीत्वा विप्रदक्षिणकरे पवित्रमुत्तराग्रं दत्त्वा पात्रं दक्षिणहस्तेनाच्छाद्य ॐ या दिव्याऽआप इति पठित्वा द्विगुणभुग्नकुशत्रयतिलजलान्या
दाय ॐ अमुकगोत्रास्मत्पितृपितामहप्रपितामहामुकामुकशर्माणो वसुरुद्रादित्यरूपा एष हस्तार्घस्ते धावि भज्य युष्मभ्यं स्वधा इति पितृतीर्थे
न पवित्रोपरि अर्घं दद्यात् ॥ अर्घपात्रं च पुरतः स्थापयेत्॥ एवमेव मात्रादिभ्यो मातामहेभ्यश्च दद्यात्॥ ततः सव्येन पित्राद्यर्घपात्रजलेन शिरः
संमृज्य ॐ विश्वेभ्यो देवेभ्यः स्थानमसीत्युक्त्वा पवित्रजलयुतं देवार्घपात्रत्रयं क्रमेण ब्राह्मणदक्षिणपार्श्वे उत्तानमेव स्थापयेत् ॥ ततोऽपसव्येन
ॐ पितृभ्यः स्थानमसीति पितृपात्रं विप्रवामप्रदेशभूमावधोमुखं स्थापयेत् ॥ एवम् ॐ मातृभ्यः स्थानमसि॥ ॐ मातामहेभ्यः स्थानमसीति
चोक्त्वा स्वस्वविप्रवामपार्श्वे न्युब्जं कुर्यात् ॥ एतानि स्थापितान्यर्घपात्राणि दक्षिणादानपर्यंतं नोद्धरेन्न चालयेत् ॥ अथ गंधादिदानम् ॥ तत्र
सव्यादि कृत्वा देवविप्रकरेषु जलमासिच्य गंधपुष्पधूपदीपवस्त्रादि प्रत्येकं धृत्वा कुशत्रययवजलान्यादाय ॐ अद्याऽस्मत्पित्रादित्रयश्राद्ध
संबंधिनो विश्वेदेवा एतानि गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि वो नमः इत्युच्चार्य यथाविभवं दद्यात् ॥ एवमेव मात्रादि मातामहादि देवे
भ्योऽपि सकल्प्य दद्यात्॥ ततः अयं वो गंधः इत्यभिधाय ब्राह्मणहस्तेषु प्रत्येकं गंधमर्पयेत् ॥ ॐ सुगंध इति तेरुक्ते ॥ ॐ इमानि वः पुष्पाणि

इतिपुष्पाणिनिवेदयेत् ॥ ॐ सुपुष्पाणीतितैरुक्ते ॥ ॐ अयंवोधूपः ॥ ॐसुधूपः ॥ॐ अयंवोदीपः॥ ॐ सुदीपः ॥ ॐ एतानिवोवासांसि ॥ ॐ सुवासांसि इतितैरुक्ते ॥ इत्यादिक्रमेणप्रत्येकं ब्राह्मणेभ्यः प्रतिपादयेत् ॥ तैश्चपुष्पंशिखातिरिक्तदेशे न धार्यम् ॥ ततःकृतांजलिः कर्त्ता विश्वेषांदेवानामर्चनंसंपूर्णमस्त्विवतिद्विजान् प्रतिब्रूयात् ॐ अस्त्वर्चनंसंपूर्णमितिद्विजाब्रूयुः॥ ततोऽपसव्यादिना पित्रादिविप्रकरेषुजलमासिच्यगंधपुष्पादिप्रत्येकंसन्निधाय द्विगुणभुग्नकुशत्रयतिलजलान्यादायॐ अमुकगोत्रास्मत्पितृपितामहप्रपितामहाअमुकशर्माणोवसुरुद्रादित्यरूपाएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसित्रेधाविभज्ययुष्मभ्यंस्वधा ॥ इति पत्रादिभ्योगंधाद्युत्सृज्य एवमेव मात्रादिभ्योमातामहादिभ्यःसपत्नीकेभ्यश्चदद्यात्॥ततःॐएषवोगंधः ॥ ॐ एतानिवःपुष्पाणीत्यादिपूर्वोक्तक्रमेणपित्रादिब्राह्मणेभ्यःप्रत्येकंगंधादिप्रतिपाद्यप्रतिवचनानन्तरं कृतांजलिर्भूत्वा ॐपितृणामर्चनंसंपूर्णमस्त्विवतिद्विजान्प्रतिब्रूयात्।ॐअस्त्वर्चनंसंपूर्णमितिविप्रावदेयुः ॥ एवंगंधाद्यर्चनंविधायसव्याऽपसव्याभ्यां भोजनपात्रस्थापनदेशंसंमार्ज्य गौरमृत्तिकयाजलेनवाभस्मनीवारचूर्णादिभिर्वामंडलंप्रत्येकंकृत्वाभोजनपात्राणिचदत्त्वाहस्तप्रक्षालनार्थंप्रत्येकंजलंदद्यात् ॥ ततोघृतप्लुतमन्नंकांस्यपात्रेकृत्वा आर्द्रामलकमात्रंगृहीत्वा ॐ अग्नौकरणंकरिष्य इति पितृब्राह्मणंपृष्ट्वा कुरुष्वेत्यनुज्ञातः पितृवर्गविप्रकरे अपात्रकेजलेएवअपसव्येन दक्षिणाभिमुखः ॥ ॐ अग्नयेकव्यवाहनायस्वाहा इदमग्नयेकव्यवाहनाय॥ॐसोमायपितृमतेस्वाहा इदं सोमायपितृमते इत्याहुतिद्वयंजुहुयात्॥ ततोहुतशेषितमन्नं दैवपात्रवर्ज्जमात्रादिपात्रेषुकिंचित्किंचिद्दत्त्वापिंडार्थंचावशेषयेत्॥नहिस्मृताः शेषभाजो विश्वेदेवाः पुराणगैरितिवायुपुराणात् ॥ ततः सव्येनदेवपात्रेषु अपसव्येन पितृपात्रेषुचाऽपूपाद्युष्णमन्नंसघृतम् अनेकव्यञ्जनयुतं यथावत्परिविष्यसजलंपात्रंचसंस्थाप्यमधुनाभि

घार्घ्यं ॐ मधुव्वाताऽऋतायते इत्यादिमंत्रत्रयेण ॐ मधुमधुमध्विति चाभिमंत्रयेत् ॥ ततः सव्येनउत्तानपाणिभ्यां पित्रादिदेवपात्रमाल
भ्य ॐ पृथिवीते पात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा इति। ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम्॥ समूढमस्यपाᳬं
सुरेस्वाहा। इतिचपठित्वा। ॐ विष्णोहव्यᳬंरक्ष इत्यनयाविप्रांगुष्ठमन्नेऽवगाह्य इदमन्नम् इमाआपः इदमाज्यम् इदंहविरित्युक्त्वा ॐ अप
हताऽअसुरारक्षाᳬंसिवेदिषद इतियवान् अन्नपात्रपरितोविकीर्य्य वामेनकरेणपात्रंस्पृशन् दक्षिणकरेण कुशत्रययवजलान्यादाय ॐ अद्याऽ
स्मत्पित्रादित्रयश्राद्धसंबंधिनोविश्वेदेवाः इदमन्नंहव्यंसोपस्करं परिविष्टंपरिवेक्ष्यमाणंचब्राह्मणतृप्तिपर्य्यंतम् अमृतरूपं वःस्वाहानम ॥
इत्युदकंविप्रदक्षिणभागेभूमावेवोत्सृजेत् ॥ एवमेव मात्रादिमातामहादिभ्योप्युत्सृजेत् ॥ ततोऽपसव्यादिना पितृपात्रंन्युब्जपा
णिभ्यांन्यस्ताभ्यांस्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतं जुहोमिस्वधा इति पठित्वा ॐ इदंविष्णुर्व्विचक्रमे
त्रेधानिदधेपदम् ॥ समूढमस्यपाᳬंसुरे ॥ इत्येतामृचंचजप्त्वा ब्राह्मणांगुष्ठमनखमधोमुखम् ॐ विष्णोकव्यᳬंरक्षइतियजुषाऽ
न्नेनिवेश्य ॥ इदमन्नम् इमाआपः इदमाज्यं इदंहविरित्युक्त्वा ॥ ॐ अपहताऽअसुरारक्षाᳬंसिवेदिषदः॥ इतितिलान् अन्नपात्रंरितोप
वामावर्त्तेनविकीर्य्य वामकरेणपात्रंस्पृशन् ॥ ॐ अमुकगोत्रास्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्म्माणोवसुरुद्रादित्यरूपाः इद
मन्नंकव्यंसोपस्करंपरिविष्टंपरिवेक्ष्यमाणंब्राह्मणतृप्तिपर्य्यंतममृतरूपंत्रेधाविभज्ययुष्मभ्यंस्वधा इत्युदकंपितृतीर्थेनविप्रवामभागेभूमौक्षिपे
त् ॥ एवमेवमात्रादिभ्योमातामहेभ्यःसपत्नीकेभ्यश्चाप्युत्सृजेत्॥ ततः ॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥ तत्सर्वमच्छिद्रमस्तु इति
प्रार्थ्यविप्रान्पित्रादिरूपान् ध्यात्वाब्राह्मणानामापोशानंदत्त्वा। यथासुखंजुषध्वमित्युक्त्वा भोजयेत्। ततः अश्नत्सु विप्रेषु प्रणवव्याहृति पूर्वि

कांसकृत्त्रिर्वागायत्रींजप्त्वा ॐमधुवाताऽऋतायते।इतित्र्यृचम् ॐमधुमधुमध्विति चजपेत्।ततः सव्येनदक्षिणामुखः।ॐकृणुष्वपाजःप्रसि
तिम् इत्यादिरक्षोघ्नीः पंचऋचःपठित्वाभूमिंतिलैरास्तीर्य ॐउदीरतामवरइत्यादित्रयोदशपितृमंत्रान् ॐसहस्रशीर्षा इत्यादिपुरुषसूक्तंच
ॐ आशुः शिशानो इत्यादिसप्तदशमंत्रात्मकमप्रतिरथम् ॐ सप्तव्याधाइत्यादिस्तोत्रंचपठित्वा पूर्वोक्तंसप्तार्चिस्तवंपठेत्।अन्यान्यपि
वैष्णवादिस्तोत्राणियथाशक्तिब्राह्मणान् श्रावयेत्॥ततस्तृप्तान् ज्ञात्वा अपसव्येन उच्छिष्टसन्निधौविप्राणामग्रतोभूमिंप्रोक्ष्यतत्रदक्षिणाग्र
कुशत्रयमास्तीर्य्यसर्वप्रकारमन्नंसव्यंजनमुद्धृत्यसतिलमेकीकृत्य ॐ अग्निदग्धाश्चयेजीवा येऽप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यन्तु तृप्ता
यान्तुपरांगतिम् इतिमंत्रेणकुशोपरितदन्नंविकिरेत्॥ततःसव्यंकृत्वा आचम्यहरिंस्मृत्वा अपसव्येनविप्रेभ्यःप्रत्येकंपितृपूर्वकं सकृत्सकृ
दपोदत्त्वा गायत्रीम् ॐमधुव्वाताऽऋतायते इतित्र्यृचंमधुमधुमध्विति चजप्त्वाउभयान् विप्रान्ॐतृप्ताःस्थइतिपृष्ट्वा।ॐतृप्ताःस्मः इतितैरु
क्तेशेषमन्नंकिंक्रियतामितिपृष्ट्वा॥ इष्टैःसहभुज्यतामित्यनुज्ञातः पिंडानहंकरिष्ये इति पृच्छेत्॥ॐकुरुष्व इत्युक्ते पित्रादिभोजनपात्रस
न्निधौचतुरस्रंदक्षिणप्लवस्थानत्रयंनिर्माय तेषुमध्येदर्भपिंजूलीमूलेन ॐ अपहताऽअसुरारक्षाᳬंसिवेदिषदः इतिदक्षिणाग्ररेखात्रयंकृत्वा
प्रत्येकंरेखोपरि ॐ येरूपाणिप्रतिमुंचमानाऽअसुराः संतःस्वधयाचरंति ॥ परापुरोयेभरन्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्मादित्यंगारंभ्रामये
त् ॥ तत्ररेखोपरिसकृदाच्छिन्नदक्षिणाग्रकुशत्रयंप्रत्येकंस्तीर्त्वा सव्येन ॐदेवताभ्य इतित्रिर्जपेत् ॥ ततोऽपसव्येनपुटकनवसुजलतिलगं
धपुष्पाणिकृत्वा एकंपात्रवामहस्तेकृत्वा।द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐ अमुकगोत्रास्मत्पितरमुकशर्मन्वसुरूपअत्राऽवनेनि
क्ष्वत्तेस्वधाइत्ति कुशमूलेपितृतीर्थेनपित्रे अवनेजनजलंकिंचिदवशिष्यदद्यात् ॥ एवंपितामहायकुशत्रयमध्येप्रपितामहायकुशाग्रेअवने

जनंदद्यात्।एवमेवमात्रादिभ्योमातामहेभ्यश्चदद्यात् ततःसर्वप्रकारमन्नमुद्धृत्यपात्रेकृत्वामध्वाज्यतिलसर्वव्यंजनैःहृतशेषान्नेनचसंमिश्र्यनव पिण्डान्‌ बिल्वोपमान्निर्माययमधुघृताभ्यामभिघार्य्यएकंपिंडंकुशादींश्चादाय ॐ अमुकगोत्रास्मत्पितरमुकशर्मन्वसुरूपएतत्तेपिंडंस्वधा इतिप्रथमावनेजनस्थानेपितृतीर्थेनदद्यात् ॥ एवमेवपितामहायप्रपितामहायचदद्यात् ॥ ततः ॐअमुकगोत्रेऽस्मन्मातरमुकदेविएतत्ते पिंडंस्वधा इतिमातृस्थानेदद्यात् ॥ एवमेवपितामह्यादिभ्यः पंचभ्यस्तत्तदवनेजनस्थानेपिंडान्दद्यात ॥ ततोदर्भमूलेषुपाणिस्थं पिंडलेपम् ॐ लेपभागभुजः पितरस्तृप्यन्तुइति निमृज्य जलेनहस्तौप्रक्षाल्यसव्येनत्रिराचम्यहरिंस्मरेत् ॥ ततोऽपसव्यादिना पित्रादिपिंडाभिमुखोंजलिबद्धा ॥ ॐ अत्रपितरोमादयध्वं यथाभागमावृषायध्वमितिपठित्वा वामावर्त्तेनोदङ्मुखीभूयप्रीतमनाः मना कृश्वासंनियम्य तथैवपरावृत्य ॥ ॐ अमीमदन्तपितरोयथाभागमावृषायिपत इतिजपेत् एवंमात्रादिपिंडेषु॥ अत्रमातरोमादयध्वंयथा भागमावृषायध्वमितिजपित्वा मातामहादिपिंडाभिमुखोभूत्वा।ॐअत्रमातामहादयोमादयध्वंयथाभागमावृषायध्वमित्यादिपिंडसमीपे जपेत् ॥ ततोऽवनेजन पात्रजलेन ॐअमुकगोत्रास्मत्पितरमुकशर्मन्नवसुरूप अत्रप्रत्यवनेनिक्ष्वतेस्वधा ॥ इतिपितृपिंडोपरिप्रत्यवनेजनं दत्त्वाएवंपितामहप्रपितामहाभ्यां०॥ततः ॐअमुकगोत्रेऽस्मत् मातरमुकदेवि अत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिमातृपिंडोपरि दद्यात्॥एवमे वपितामह्यादिभ्यः पंचभ्यस्तत्तत्पिंडोपरिदद्यात् ॥ ततोनीवींविस्रंस्य सव्येन आचम्य अपसव्यंकृत्वा ॐ नमोवः पितरोरसायनमोवः पितरः शोषायनमोवः पितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवःपितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म इतिपितृवर्गंनमस्कृत्य ॐ नमोवोमातरोरसाय इतिमातृवर्गम् ॐनमोवः पितरोरसाय इति पूर्वोक्तेनमाता

महवगचनमस्कुर्यात् ॥ तत ॐ एतद्वः पितरोवास इति पितृपिंडेषु सूत्राणिदत्त्वा ॐ एतद्वोमातरोवासः ॥ ॐएतद्वोमातामहादयोवास इतिच मात्रादिषट्पिंडेषुप्रतिपिंडं सूत्रत्रयं दद्यात् ॥ ततः कुशतिलजलान्यादाय ॥ ॐ अमुकगोत्राऽस्मत्पितृपितामहप्रपितामहामुकामुकशर्माणोवसुरुद्रादित्यरूपाएतानिवासांसित्रेधाविभज्ययुष्मभ्यं स्वधा इतिसूत्रमुत्सृजेत्। एवमेवमात्रादिभ्यः मातामहादिभ्य सपत्नीकेभ्यश्चोत्सृजेत्॥ततः पित्रादीनुद्दिश्य तदीयपिंडेषु तूष्णींगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदद्यात् ॥ पिंडशेषान्नंचपिंडसमीपेविकिरेत्॥ ततः पितृब्राह्मणपूर्वकं सर्वानाचमय्यवाचंविसृज्यद्विजकरेषु ॐ शिवाआपःसंतु इतिसकृत्सकृज्जलंदत्वा ॐसौमनस्यमस्त्वितिपुष्पाणि। अक्षतंचारिष्टंचास्तु इतियवांश्चदद्यात्।ततः ॐअमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांदत्तैतदन्नपानादिकमक्षय्यमस्तु॥इतिसतिलमक्षय्योदकंपितृविप्रकरेदद्यात्। एवमेव मात्रादीनांमातामहादीनांसपत्नीकानांचनामगोत्राभ्यांतदीयविप्रकरयोरक्षय्योदकंदद्यात् ॥ ततःसव्यादिनाकृतांजलिःप्रार्थयेत्।ॐ अघोराःपितरःसंतु इति। ॐअघोरामातरः संतु। ॐअघोरामातामहाःसपत्नीकाश्चसंतुइतिचोक्तासंत्वितिब्राह्मणानुज्ञातःप्राङ्मुखः।ॐगोत्रंनोवर्द्धतामितिवदेत्।वर्द्धतामितिब्राह्मणाब्रूयुः।दातारोनोभिवर्द्धन्ताम् वेदाःसंततिरेवच।श्रद्धाचनोमाव्यपगमत् बहुदेयंचनोऽस्तु।अन्नंचनोबहुभवेत् अतिथींश्चलभेमहि।याचितारश्चनःसन्तु।माचयाचिष्मकंचन।एताःसत्याआशिषःसंतुइतिवदेत्॥संन्त्वितितैरुक्ते॥अपसव्यंकृत्वा।पिंडोपरिसपवित्रान्कुशानास्तीर्यस्वधांवाचयिष्येइतिब्रूयात्।ॐवाच्यतामिति विप्रानुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्योमातृभ्यः प्रमातृभ्योवृद्धप्रमातृभ्योमातामहेभ्यः प्रमातामहेभ्योवृद्धप्रमातामहेभ्यःसपत्नीकेभ्यश्चस्वधोच्यतामितिवदेत्॥अस्तुस्वधा इतितैरुक्ते ॥ ॐऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतम्॥स्वधास्थतर्प्पयतमेपितॄनितिसप

वित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात्॥ततःस्वयंयजमानोऽर्घ्यपात्राण्युत्तानीकृत्यसव्येन देवदक्षिणांदद्यात्॥कुशत्रययवजलानिहिरण्यं चादाय ॐअद्यास्मत्पित्रादित्रयसंबंधिविश्वेदेवानांश्राद्धप्रतिष्ठार्थमिदंहिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मण।यदक्षिणात्वेनतुभ्यमहंसंप्रददे इत्युच्चार्य देवविप्रकरेदद्यात्॥एवमेव मात्रादिमातामहादिदेवश्राद्धार्थमपिदद्यात् ॥ ततोऽपसव्यादिकृत्वा ॐअद्यामुकगोत्राणांमस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांवसुरुद्रादित्यरूपाणांकृतैतदन्वष्टकानिमित्तकपार्वणश्राद्धकर्मणःप्रतिष्ठार्थमिदंरजतंचंद्रदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मण।यदक्षिणात्वेनतुभ्यमहं संप्रददे॥ इतिपितृब्राह्मणकरेदद्यात्॥एवममुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांकृतैतत्०॥ अमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानांकृतैतत्०इति॥ मात्रादिमातामहादिवर्गद्वयब्राह्मणकरयोरपिदक्षिणांदद्यात् ॥ सर्वत्रस्वस्तीतिवाचयेत्॥दैवेरजतनिषेधः ॥ असंभवेफलमूलादिकंदद्यात्॥पिंडानुत्थापयामित्युत्थापयइत्यनुज्ञातःपिंडानुत्थाप्यस्थाल्यांनिधायावघ्राणंकृत्वासकृदाच्छिन्नान्दर्भानुल्मुकंचवह्नौक्षिपेत्॥ ततःसव्येनजलदानपूर्वकं ॐविश्वेदेवाः प्रीयंतामितिदेवद्विजान्प्रार्थयेत्॥तेच ॐप्रीयंतांवो विश्वेदेवा इति ब्रूयुः॥ततोऽपसव्यादिनाॐवाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः॥१॥ इति मंत्रेणपितृब्राह्मणानुत्थाप्यतथैवदेवद्विजान्विसृजेत्। ततः कृतपादादिशौचाननुभयान् ॥ ॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागंतांपितरोमातराचामासोमोऽमृतत्वेनगम्यादितिमंत्रेणविप्रान् प्रदक्षिणीकृत्याऽनुव्रज्यगृहंप्रविशेत् ॥ ततः सव्येन ॐ देवताभ्यः पितृभ्यश्चेतित्रिर्जपित्वा अपसव्येनरक्षादीपनिर्वापणंकृत्वासव्येनहस्तौपादौप्रक्षाल्याचम्य पिंडान् गवादिभ्योदत्त्वोच्छिष्टमार्जनादिकारयेत् ॥ ततो वैश्वदेवबलिकर्मणीकृत्वा

प्रमादात्कुर्वतांकर्म इति पठित्वाकर्मपूर्तिकामोविष्णुंस्मरेत् ॥ ततोवैश्वदेवांतेसुतभृत्यबांधवातिथिसंयुक्तः पितृशेषितमन्नमश्नीयात् ॥
तद्दिनेश्राद्धकर्तृभोक्तारौद्यूताध्वगमनमैथुनायासस्वाध्यायकलहपुनर्भोजनहिंसादीनिचनकुर्यांताम् ॥ एषएवविधिः तीर्थश्राद्धेषुज्ञेयः ॥
तत्र केषांचित्पदार्थानामननुष्ठानम्। तेचयथा अर्घ्यदानमावाहनं विसर्जनं द्विजांगुष्ठनिवेषनम् तृप्तिप्रश्नः विकिरं दिग्बंधं पाकप्रोक्षणंच
वर्ज्जयेत्॥अन्यत्सर्वं पूर्ववदिति [मृतमातृकोजीवत्पितृकस्तु महालयेऽन्वष्टकायांच मात्रादित्रिदैवत्यं पार्वणंकुर्यात् तच्चाऽपात्रकप्रकरणे
वक्ष्यामि]॥इत्यन्वष्टकाश्राद्धपद्धतिःसमाप्ता॥इति श्रीबीकानेरस्यविषयान्तर्गतरत्नगढनगरनिवासिनाश्रीवसिष्ठकुलोद्भवेनश्रीरामकृष्ण
पौत्रेणश्रीकस्तूरीचन्द्रसूनुनाश्रीमहादेवभक्तवाजसनेयिनागौडपंडितश्रीचतुर्थीलालशर्मणाविरचिते गौडीयश्राद्धप्रकाशेमुख्यकल्पपद्धति
खंडे पार्वणादिसपात्रकपद्धतिकथनंनामचतुर्थप्रकरणम् ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अथापात्रकपार्वणादिश्राद्धप्रकरणम्॥ तत्रादौमहालयनिमित्तनवदैवत्यापात्रकपार्वणपद्धतिः॥कर्त्तापूर्वेद्युर्निरामिषंसकृद्भुक्तातद्दिनेरात्रौ
प्रदोषांते विप्रगृहेषुगत्वाब्राह्मणेभ्योनिमंत्रणंदद्यात्॥ततः श्राद्धदिनेप्रातर्नित्यावश्यकंसमाप्य पाकभूमिंमृद्गोमयोदकेनसंस्कृत्य तत्रस्वयं
यजमानः पाकंकुर्यात् ॥ अशक्तश्चेद्यदिसुस्नातैर्बांधवैःस्त्रीद्वारावापाचयेत्॥ततोदिनस्यषण्मुहूर्त्तानन्तरं श्राद्धभूमिंगोमयोदकेनोपलिप्य
ज्वलदङ्गारैःसंशोध्यगौरमृत्तिकयाऽऽच्छाद्यतिलगौरसर्षपैश्वविकीर्य्य तत्रश्राद्धसामग्रींसंपाद्यतिलतैलेनश्राद्धापवर्गस्थायिनंदीपंप्रज्वाल्य
संस्थाप्यश्राद्धदेशावरणंचकुर्य्यात् ॥ ततोऽपराह्णेपुनःस्नात्वा गौरमृत्तिकयाश्राद्धदेशे पश्चिमतएकमुदक्प्लुवंचतुरस्रं अपरंदक्षिणतोदक्षि
णप्रवणंच मंडलंविधाय गोमयोदकेनोपलिप्य तत्रसव्येनपश्चिममण्डले सयवकुसुमौ प्रागग्रौ द्वौकुशौविन्यस्य तत्रकुशमयौद्वौ दर्भबटू

स्थापयेत् ॥ ततोऽपसव्येन दक्षिणमण्डले सतिलकुसुमानि दक्षिणाग्रैकैककुशत्रयाणिविन्यस्य तत्रदर्भबटुत्रयंदक्षिणाग्रं स्थापयेत् ॥
अथनिमन्त्रणप्रकारः।तत्रादौसव्येनाचम्यप्राणानायम्य उदङ्मुखोदक्षिणंजान्वाच्यंदक्षिणकरे पूगीफलतांबूलान्यादाय देशकालौसंकीर्त्य
ॐ अद्याऽस्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनो धूरिलोचनसंज्ञकावा पुरूरवार्द्रवसंज्ञाकाविश्वेदेवाः पार्वणश्राद्धे अनेन
सपूगीफलेनतांबूलेन कुशबटुरूपाभवन्तोमयानिमंत्रिताः॥आमंत्रिताःस्मः।इतिपठित्वातांबूलंमंडलेक्षिपेत्।ततःअक्रोधनैःशौचपरैः सततं
ब्रह्मचारिभिः॥भवितव्यंभवद्भिश्च मयाचश्राद्धकारिणा॥इतिप्रार्थ्यस्वागतंभवताम्॥सुस्वागतमितिब्रूयात् ॥ ततोऽपसव्यंकृत्वादक्षिणामु
खोवामजानुनिपात्य पूगीफलतांबूलंगृहीत्वा ॐअमुकगोत्राऽस्मत्पितृपितामहप्रपितामहामुकामुकशर्माणः पार्वणश्राद्धे अनेनसपूगीफले
नतांबूलेनकुशत्रयबटुरूपाभवन्तोमयानिमंत्रिताः ॥ आमंत्रिताःस्मः ॥ अक्रोधनैरितिप्रार्थ्यस्वागतंभवतांसुस्वागतमितिब्रूयात्॥ततः ॐ
अमुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योमुकामुकदेव्यःपार्वणश्राद्धेअनेनसपूगीफलेनतांबूलेनकुशत्रयबटुरूपाभवत्योमयानिमंत्रिताः ॥
ॐ आमंत्रिताः स्मः ॥ अक्रोधनैरितिप्रार्थ्यस्वागतं भवतांसुस्वागतमितिब्रूयात् ॥ ततः ॐ अमुकगोत्राऽस्मन्मातामहप्रमातामहवृ
द्धप्रमातामहामुकाऽमुकशर्माणः सपत्नीकाः पार्वणश्राद्धे अनेनसपूगीफलेनतांबूलेन कुशत्रयबटुरूपा भवंतोमयानिमंत्रिताः ॥
॥ आमंत्रिताःस्मः ॥ ॐ अक्रोधनैरितिप्रार्थ्यस्वागतंभवतां सुस्वागतमितिपठेत् ॥ ततःसव्यादिना ॐ अद्याऽस्मत्पित्रादि
त्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनोधूरिलोचनसंज्ञकावापुरूरवार्द्रवसंज्ञकाविश्वेदेवाः एषपादार्घोवोनमः ॥ इति दद्यात् ॥
अमुकगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणः एषपादार्घस्त्रेधाविभज्ययुष्मभ्यंस्वधा इति । ॐ ततोऽपसव्यादिना

अमुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योमुकामुकदेव्यः एषपादार्घस्त्रेधाविभज्ययुष्मभ्यंस्वधा इति ॥ ॐ अमुकगोत्राऽस्मन्मा
तामहप्रमातामहवृद्धप्रमातामहाऽमुकामुकशर्माणः सपत्नीकाः एषपादार्घस्त्रेधाविभज्य युष्मभ्यंस्वधाइत्युत्सृजेत् ॥ ततःसव्येन
ॐअस्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनः धुरिलोचनसंज्ञकाःवा पुरूरवार्द्रवसंज्ञकाविश्वेदेवाः इदमाचमनंवोनमः॥
इत्युत्सृजेत् ॥ ततोऽपसव्येन ॐ अद्याऽमुकगोत्राऽस्मत्पितृपितामहप्रपितामहाः इदमाचमनंत्रेधाविभज्ययुष्मभ्यं स्वधा ॥ ॐ
अमुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्यः अमुकामुकदेव्यइदमाचमनंयुष्मभ्यंस्वधा।ॐ अद्याऽमुकगोत्राऽस्मन्मातामहप्रमातामहवृद्ध
प्रमातामहामुकामुकशर्माणःसपत्नीकाःइदमाचमनंत्रेधाविभज्ययुष्मभ्यंस्वधाइत्युत्सृजेत्।ततःसव्येनॐअद्यास्मत्पित्रादित्रयमात्रादित्रय
मातामहादित्रयश्राद्धसंबंधिनःधुरिलोचनसंज्ञकाःवापुरूरवार्द्रवसंज्ञकाविश्वेदेवाःइदकौशमासनंवोनमः।इत्यासनंदद्यात्।ततोऽपसव्येनॐअ
द्यामुकगोत्रास्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणः इदंकौशमासनं त्रेधा विभज्ययुष्मभ्यंस्वधा इति।ॐअमुकगोत्राऽस्मन्मातृपिता
महीप्रपितामह्योऽमुकामुकदेव्यइदंकौशमासनं त्रेधाविभज्य युष्मभ्यं स्वधा ॥ ॐअद्यामुकगोत्रास्मन्मातामहप्रमातामहवृद्धप्रमातामहाऽ
मुकामुकशर्माणः सपत्नीकाः इदंकौशमासनंत्रेधा विभज्ययुष्मभ्यंस्वधा इत्युत्सृजेत् इतिनिमंत्रणप्रकारः ॥ ततः सव्यापस
व्याभ्यांकर्मपात्रद्वयंजलेनापूर्य्य तत्रदर्भपवित्रौ यवतिलचंदनपुष्पाणिचयथाक्रमं निक्षिप्य ॥ कर्मपात्रंसंपन्नम् सुसंपन्नमिति ब्रूयात् ॥
ततः श्राद्धकर्त्ता स्वासने प्राङ्मुखउपविश्य सव्येनाचम्य ॐ अपवित्रः पवित्रोवा इति ॐ पुण्डरीकाक्षःपुनात्विति चपठित्वाश्राद्धी
यद्रव्याणिस्वात्मानंचसिंचेत्॥ततःॐवैष्णव्यैनमः। ॐकाश्यप्यैनमः।ॐअक्षय्यायैनमः।ॐभूम्यैनमः।इतिनत्वाॐभगवत्यैगयायैनमः

ॐ भगवतेगदाधरायनमः इतितयोर्नमस्कारंकुर्यात् ॥ ततःकुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य ॥ ॐ अद्यामुकगोत्राणामस्म
त्पितृपितामहप्रपितामहानाममुकामुकशर्मणांवसुरुद्रादित्यरूपाणां तथाचास्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांगंगायमुनास
रस्वतीरूपाणाम् अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानांवसुरुद्रादित्यरूपाणां विश्वेदेवपूर्व
कंसपिंडकं महालयनिमित्तकंपार्वणश्राद्धंपितृतृप्तिकामोहंकरिष्य इतिसंकल्प्यकुरुष्वेत्यनुज्ञातोगायत्रींत्रिर्जपित्वा ॐदेवताभ्यःपितृभ्यश्च
महायोगिभ्यएवच । नमःस्वाहायैस्वधायै नित्यमेवनमोनमः इति त्रिर्जपेत्।ततोऽपसव्यंकृत्वा । ॐनमोनमस्तेगोविंद पुराणपुरुषोत्तम।
इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः॥ १॥तिलारक्षंतुअसुराद्दर्भारक्षन्तुराक्षसात्।वह्निर्वैश्रोत्रियंरक्षेदतिथिःसर्व्वरक्षकः॥२॥इतितिलकुशान्
द्वारदेशेक्षिप्त्वा । ॐअग्निष्वात्ताःपितृगणाःप्राचींरक्षंतुमेदिशम् । तथाबर्हिपदःपांतुयाम्यांयेपितरःस्थिताः ॥ १॥ प्रतीचीमाज्यपास्तद्वदुदी
चीमपिसोमपाः।अधोर्ध्वमपिकोणेषुविकोणेषुचसर्वशः॥२॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः।सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुवै॥वा
युभूतपितृणांचतृप्तिर्भवतुशाश्वती॥३॥ इतिमंत्रैःसर्वत्रतिलान्गौरसर्षपांश्चविकीर्यदक्षिणेवामेवाकटिभागेनीवींबध्नीयात्॥ततःसव्येनॐयद्दे
वादेवहेडनं देवासश्चकृमावयम्।अग्निर्मातस्मादेनसोविश्वान्मुंचंत्वꣳहस १॥यदिदिवायदिनक्तमेनाꣳसिचकृमावयम्॥वायुर्मातस्मादेनसो वि
श्वान्मुञ्चंत्वꣳहसः॥२॥यदिजाग्रद्यदिस्वप्नएनांसिचकृमावयम् । सूर्योमातस्मादेनसोविश्वान्मुञ्चंत्वꣳहसः॥३॥इतिकूष्मांडसूक्तेनजलमभिमं
त्र्यतेनदर्भैःउदक्यादिदुष्टदृष्टिपातातशूद्रादिसंपर्कदोषाच्चपाकादीनांपवित्रताऽस्तुदेशकालपाकपात्रद्रव्योपहारश्रद्धासंपदस्त्विइतिपाकादीन्
प्रोक्षयेत् । ततः उदङ्मुखउपविश्यसजघनंदक्षिणंजान्वाच्य सव्येनजलयवसमन्वितमृजुकुशत्रयमादाय । ॐअद्यास्मत्पित्रादित्रयमात्रा

दित्रयमातामहादित्रयश्राद्धसंबंधिन धुरिलोचनसंज्ञकाःवापुरूरवार्द्रवसंज्ञकाविश्वेदेवाइदमासनंवोनमः॥ इत्यासनार्थं देवतीर्थेनपूर्वाग्रकुशत्रयं
दद्यात्।ततोदक्षिणामुखः पातितवामजानुःअपसव्येनद्विगुणभुग्नकुशत्रयतिलजलान्यादायॐअद्यामुकगोत्राऽस्मत्पितृपितामहप्रपितामहा
मुकामुकशर्माणोवसुरुद्रादित्यरूपाः।इदमासनंत्रेधाविभज्ययुष्मभ्यंस्वधा।इत्युच्चार्य्यपितृतीर्थेनमोटकंदक्षिणाग्रमुत्सृजेत्एवमेवमात्रादिभ्यो
मातामहादिभ्यः सपत्नीकेभ्यश्चापिदद्यात्।ततःसव्येन ॐविश्वान्देवानावाहयिष्ये।आवाहय इत्यनुज्ञातःसयवकरः॥ॐविश्वेदेवाःशृणुतेम
ठंहवम् एदंबर्हिर्निषीदत॥ इत्यावाह्य ॐयवोसियवयास्मद्द्वेषोयवयारातीरित्यनेनयवान विकीर्यॐविश्वेदेवाःशृणुतेमठंहवम्मेयेऽअन्तरि
क्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन् बर्हिषिमादयध्वमितिजपेत् ॥ ॐआगच्छंतुमहाभागाविश्वेदेवामहाबलाः।
येयत्रयोजिताः श्राद्धेसावधानाभवंतुते ॥१॥ इति श्लोकमपिपठेत्। ततोऽपसव्यादिनाॐपितृनावाहयिष्ये।आवाहयइत्यनुज्ञातः।सतिलक
रोञ्जलिना।ॐउशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि।उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे ॥ इत्यावाह्यॐअपहताऽअसुरारक्षाᳪंसिव्वे
दिषदः॥ इतितिलान्विकीर्य्य।एवंमातृर्हविषेऽअत्तवे।मातामहान्हविषेऽअत्तवे इतिमंत्रोहेनमात्रादीन् मातामहांश्चावाह्य तिलान् विकीर्य्य
ॐआयन्तुनःपितरःसोम्यासोऽअग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेऽवंत्वस्मान् इतिजपेत्॥ततःसव्या
पसव्याभ्यांदेवपूर्वकंपात्रचतुष्टयेषुप्रतिपात्रंपवित्रमेकैकंनिधाय ॥तत्र ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥शंय्योरभिस्रवन्तुनः।इति
प्रत्येकंपात्रेष्वपोनिषिच्य। ॐयवोसियवयास्मद्द्वेषोयवयारातीरितिदेवपात्रेयवान्निक्षिप्यपित्रादिपात्रेषु ॐतिलोसिसोमदैवत्योगोसवो
देवनिर्मितः ॥ प्रत्नमद्भिः पृक्तःस्वधयापितॄँल्लोकान्प्रीणाहिनः स्वधा । इतितिलान्प्रक्षिपेत् ॥ ततः सर्वत्रतूष्णींगंधपुष्पाणिदत्त्वासव्येन

ॐ अर्घपात्रं संपन्नम्।सुसंपन्नमित्यनुज्ञातो देवार्घपात्रंवामहस्तेकृत्वा तत्रस्थंपवित्रंपलाशादिपत्रेपुरतःपूर्वाग्रंधृत्वाऽर्घपात्रंदक्षिणहस्तेनाच्छा
द्य॥ॐ यादिव्याआपःपयसासंबभूवुर्याऽअन्तरिक्षाउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःसꣳस्योनाःसुहवाभवन्तु॥
इत्यभिमंत्र्य कुशत्रययवजलान्यादायॐ अद्यास्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनःधूरिलोचनसंज्ञका वा पुरूरवार्द्रव
संज्ञका विश्वेदेवाएषवोहस्तार्घोनमः॥इति देवतीर्थेनपवित्रोपर्य्यर्घंदद्यात् ॥अर्घपात्रंसपवित्रंपुरतःस्थापयेत् ॥ ततोऽपसव्यादिना ॐ अर्घ
पात्रंसंपन्नम्॥सुसंपन्नमितिपठित्वा।पितृपात्रंवामहस्तेकृत्वा॥पवित्रंपलाशादिपत्रेउत्तराग्रंदत्त्वा पात्रंदक्षिणकरेणाच्छाद्य।ॐयादिव्याऽआप
इत्यभिमंत्र्यद्विगुणभुग्नकुशत्रयतिलजलान्यादाय।ॐ अमुकगोत्राऽस्मत्पितृपितामहप्रपितामहामुकाऽमुकशर्माणःवसुरुद्रादित्यरूपाएषह
स्तार्घंत्रेधा विभज्ययुष्मभ्यंस्वधाइतिपितृतीर्थेनपवित्रोपरिअर्घंदद्यात्।एवमेवमात्रादिभ्योमातामहादिभ्यःसपत्नीकेभ्यश्चाऽपिदद्यात्।अर्घ
पात्रत्रयंचसावशेषंपुरतःस्थापयेत्॥ततःसव्येनॐविश्वेभ्योदेवेभ्यः स्थानमसीत्युक्त्वापवित्रजलयुतंदेवार्घपात्रमासनदक्षिणपार्श्वे उत्तानमे
वस्थापयेत्॥ततःपित्राद्यर्घपात्रजलेनॐआपःशिवाःशिवतमाःशांताःशांततमास्तेकृण्वन्तुभेषजम् १इतिमंत्रेण शिरः संमृज्य अपसव्येन
ॐपितृभ्यः स्थानमसीतिपितृपात्रम् आसनवामपार्श्वेभूमावधोमुखं स्थापयेत्।एवंमात्रादिभ्यः।ॐमातामहेभ्यश्चस्थानमसीतिचोक्त्वान्यु
ब्जंकुर्यात्॥एतानिस्थापितानिपात्राणिदक्षिणादानपर्यंतंनोद्धरेन्नचालयेत् ॥अथगंधादिदानम् ॥ तत्रसव्यादिकृत्वा गंधपुष्पधूपदीपवस्त्रा
दिदेवासनेधृत्वा।कुशत्रययवजलान्यादाय॥ॐअद्यास्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनःधूरिलोचनसंज्ञकाःवापुरू
रवार्द्रवसंज्ञकाविश्वेदेवाःएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीताच्छादनानिवोनमःइत्युच्चार्ययथाविभवंदद्यात्।ततःकृतांजलिःकर्त्ताविश्वे

षांदेवानामर्चनंसंपूर्णमस्त्विति अस्त्वर्चनसंपूर्णमिति चब्रूयात्॥ततोऽपसव्यादिना पित्राद्यासनत्रयेगंधपुष्पधूपदीपादिप्रत्येकंसन्निधायद्वि
गुणभुग्नकुशत्रयादीनिचादायॐअमुकगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणःवसुरुद्रादित्यरूपाः।एतानिगंधपुष्पधूपदीपवां
बूलयज्ञोपवीताच्छादनानित्रेधाविभज्ययुष्मभ्यंस्वधा इतिपित्रादिभ्योगंधाद्युत्सृज्यएवमेवमात्रादिभ्यो मातामहादिभ्यःसपत्नीकेभ्यश्चोत्सृजे
त्॥ततःकृताञ्जलिःॐपितृणामर्चनंसंपूर्णमस्त्विति॥अस्त्वर्चनंसंपूर्णमितिचब्रूयात् ॥ एवंगंधाद्यर्चनंविधायभोजनपात्रस्थापनदेशं संमा
र्ज्यपात्राणिदत्त्वागोरमृत्तिकया जलादिना वा मंडलंप्रत्येकंकुर्यात् ॥ ततोग्नौकरणम् ॥ तावत् सव्यादिना घृतप्लुतमन्नंव्यंजनक्षारवार्जि
तंकांस्यपात्रेकृत्वा ॐ अग्नौकरणंकरिष्य इतिश्राद्धकर्ता ब्राह्मणं पृष्ट्वाकुरुष्वेत्यनुज्ञातः आर्द्रामलकमात्रमन्नंगृहीत्वा रजतादिपात्रस्थ
जले प्राङ्मुखः ॐ अग्नयेकव्यवाहनायस्वाहा इदमग्नयेकव्यवाहनाय॥ ॐ सोमायपितृमतेस्वाहा इदंसोमायपितृमते इत्याहुतिद्वयंजुहु
यात् ॥ ततोहुतशेषितमन्नं देवपात्रेऽपसव्येनपित्रादिपात्रत्रयेचकिंचित्किंचिद्दत्त्वापिंडार्थंचावशेषयेत् ॥ [अत्रपरकीयभूमौश्राद्धकरण
पक्षे (अपसव्येन)ॐइदमन्नमेतद्भूस्वामिपितृभ्योनमइतिदर्भेष्वन्नमुत्सृजेत्]॥ ततः सव्येनदेवपात्रे अपसव्येनपित्रादिपात्रत्रयेच उष्ण
मन्नंसघृतम् अनेकव्यंजनयुतं पुरुषैकतृप्तिजनकंयथावत् प्रतिपात्रंपरिविष्यसजलंपात्रंचसंस्थाप्याऽन्नेमधुदत्त्वाॐमधुव्वाताऽऋतायतेइत्या
दिमंत्रत्रयेणॐमधुमधुमध्विति चाभिमंत्रयेत् ॥ ततः सव्येन उत्तानपाणिभ्यां देवपात्रमालभ्यॐ पृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखे
ऽअमृतेऽअमृतंजुहोमिस्वाहा इतिॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपाᳫंसुरेस्वाहा इतिचपठित्वाॐविष्णोहव्यᳫंरक्षइत्य
नयास्वाङ्गुष्ठमधोमुखमनखमन्नेऽवगाह्यॐइदमन्नम्।ॐइमा आपः।ॐइदमाज्यम्।ॐइदंहविरित्युक्त्वाॐ अपहताऽअसुरारक्षाᳫंसिवेदिषदः।

॥११०॥

इतियवान् अन्नपात्रपरितोविकीर्य्य वामेनकरेणपात्रंस्पृशन् दक्षिणकरेणकुशत्रययवजलान्यादाय ॐ अद्याऽस्मत्पित्रा दिव्यपित्रा दिव्यमाता
महादिव्यश्राद्धसम्बंधिनः धुरिलोचनसंज्ञकाः वा पुरूरवार्द्रवसंज्ञका विश्वेदेवाः इदमन्नंहव्यं सोपस्करं परिविष्टम् अमृतरूपंवः स्वाहा नमः इत्यु
दकंदक्षिणभागेभूमावेवोत्सृजेत्॥ततोऽपसव्यादिकृत्वा पितृपात्रंन्युब्जपाणिभ्यांव्यास्ताभ्यांस्पृष्ट्वा ॐपृथिवीतेपात्रंद्यौः पिधानं ब्राह्मणस्यमुखेऽ
अमृतेऽअमृतंजुहोमिस्वधाइतिपठित्वा ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपाᳫंसुरे इत्येतामृचंचजप्त्वा स्वांगुष्ठमनखमधोमुख
म् ॐविष्णोकव्यᳫंरक्षइतियजुषाऽन्नेनिवेश्य॥ॐइदमन्नम् ॐइमाआपः ॐइदमाज्यम् ॐइदंहविरित्युक्त्वा ॐअपहताऽअसुरारक्षाᳫंसिवे
दिषदः इतितिलानन्नपात्रपरितोवामावर्त्तेनविकीर्य्य॥वामकरेणपात्रमत्यजन्दक्षिणकरेणद्विगुणभुग्नकुशत्रयादीन्यादाय ॐ अद्यामुकगोत्राऽस्म
त्पितृपितामहप्रपितामहाऽमुकामुकशर्माणः वसुरुद्रादित्यरूपाः इदमन्नंकव्यंसोपस्करंपरिविष्टममृतरूपंत्रेधाविभज्ययुष्मभ्यंस्वधा इत्युदकंपि
तृतीर्थेनवामभागेभूमौक्षिपेत्॥एवमेवमात्रादिभ्योमातामहेभ्यः सपत्नीकेभ्यश्चाप्युत्सृजेत् ॥ ततः ॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥ त
त्सर्वंमच्छिद्रमस्त्वितिप्रार्थ्य॥प्रणवव्याहृतिपूर्विकांसकृत्त्रिर्वागायत्रींजप्त्वा ॐमधुवाताऽऋतायतेइतित्र्यृचम् ॐमधुमधुमध्वितिचजपेत् ॥ ततः
सव्येनदक्षिणामुखः॥ॐकृणुष्वपाजः प्रसितिन्नपृथ्वींयाहिराजेवामवाँऽइभेन॥तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः॥१॥ तव
भ्रमासऽआशुया पतन्त्यनुस्पृशधृषताशोशुचानः॥तपूᳫंष्यग्नेजुह्वापतङ्गानसंदितोविसृजविष्वगुल्काः।२।प्रतिस्पशोविसृजतूर्णितमोभवा
पायुर्विशोऽअस्याऽअदब्धः॥योनोदूरेऽअघशᳫंसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ३ ॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँ २ऽओषता
तिग्महेते॥योनोऽअरातिᳫंसमिधानचक्रेनीचातंधक्ष्यतसन्नशुष्कम् ॥४॥ ऊर्द्ध्वोभवप्रतिविध्यध्यास्मदाविष्कृणुष्वदैव्यान्यग्ने॥ अवस्थिरा

तनुहियातुजूनाञ्जामिमजामिप्प्रमृणीहिशत्रून् ॥ अग्नेष्वात्तेजसासादयामि ॥६॥ इतिरक्षोघ्नीर्ऋचःपठित्वा॥भूमौतिलान्विकीर्य्य॥ॐउदी
रतामवर इत्यादित्रयोदशपितृमंत्रान्।ॐसहस्रशीर्षा इत्यादिपुरुषसूक्तंच।ॐआशुःशिशानो इत्यादिसप्तदशमंत्रात्मकमप्रतिरथंच।ॐसप्त
व्याधादशार्णेषु इत्यादिस्तोत्रंचपठित्वा॥सपात्रकपद्धत्युक्तं सप्तार्चिस्तोत्रंपठेत् ॥ ततःॐनमस्येहंपितृन्भक्त्या येचसन्त्यधिदेवताः॥देवै
रपिहि तर्प्यन्ते येचश्राद्धेस्वधोत्तरैः॥१॥नमस्येहंपितृन्स्वर्गे येतर्प्यन्तेमहर्षिभिः॥श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः॥२॥ नमः
स्येहंपितृन्स्वर्गे सिद्धाःसंतर्पयन्तितान्॥श्राद्धेषुदिव्यैःसकलैरुपहारैरनुत्तमैः ॥३॥ इत्यादिरुचिस्तवंपठित्वा अन्यान्यपिवैष्णवादिस्तो
त्राणियथाशक्तिपठेत्॥ततोऽपसव्यादिना उच्छिष्टपात्रसन्निधौभूमिंप्रोक्ष्य तत्रदक्षिणाग्रंकुशत्रयमास्तीर्य्य दक्षिणहस्तेसर्वप्रकारमन्नंसव्यंजनमु
द्धृत्य सतिलमेकीकृत्यॐअग्निदग्धाश्चयेजीवा येऽप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यन्तु तृप्तायान्तुपरांगतिम्॥१॥इतिमंत्रेणकुशोपरिपितृती
र्थेनतदन्नं विकिरेत्॥ततःसव्यंकृत्वाहस्तौप्रक्षाल्य आचम्य हरिंस्मृत्वा अपसव्येनॐमधुव्वाताऽऋतायते इतित्र्यृचं मधुमधुमध्वितिचजपेत्
ॐतृप्ताःस्थॐतृप्ताःस्मःइतिपठित्वापिंडानहंकरिष्ये इतिपृच्छेत्॥कुरुष्वइत्यनुज्ञातःपित्रादिभोजनपात्रसन्निधावुत्तरतो हस्तांतरे वालुका
भिश्चतुरस्रं दक्षिणप्लवंरमणीयंस्थानत्रयंनिर्मायतन्मध्येदर्भपिंजूलीमूलेनॐअपहताऽअसुरारक्षाᳪंसिव्वेदिषदःइति दक्षिणाग्रंरेखात्रयं कृत्वा
प्रत्येकंरेखोपरि ॐयेरूपाणिप्रतिमुंचमानाऽअसुराःसंतः स्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादित्यंगारं भ्रम
यित्वादक्षिणतोनिदध्यात् ॥ ततः उपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयंप्रत्येकं रेखोपरिस्तीर्त्वा सव्येनदेवताभ्य इतित्रिर्जपेत्॥ ततोऽपस
व्येन पुटकनवके जलतिलगंधपुष्पाणिकृत्वा एकंपात्रंवामहस्तेकृत्वा द्विगुणभुग्नकुशत्रयतिलजलान्यादायॐअद्यामुकगोत्रास्मत्पितर

मुकशर्मन्वसुरूपाऽत्रावनेनिक्ष्वतेस्वधा इतिकुशमूले पित्रेपितृतीर्थेनसावशेषमवनेजनंदद्यात् ॥ एवंपितामहायकुशत्रयमध्ये प्रपिताम हायकुशाग्रेअवनेजनंदद्यात्एवमेवमात्रादिभ्योमातामहादिभ्यश्चापिदद्यात्।ततःसर्वस्माच्छ्राद्धशेषान्नादुष्णंकिञ्चित्किञ्चिदन्नमुद्धृत्यहुत्शे षान्नं मध्वाज्यतिलसर्वव्यञ्जनयुतंरजतादिपात्रेकृत्वाबिल्वोपमान्नवपिण्डान्निर्म्माय मधुघृताभ्यामभिघार्य्यपित्रादिभ्योदद्यात्॥तत्रप्रथम पिण्डमादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् वसुरूप एतत्ते पिण्डं स्वधा इतिप्रथमावनेजनस्थाने सव्योपगृहीतदक्षिणहस्तेन पितृतीर्थेनदद्यात् ॥ एवमेवपितामहादिभ्योऽष्टभ्यः प्रत्येकं तत्तदवनेजनस्थानेपिण्डं दद्यात् ॥ ततःप्रपितामहादूर्ध्वंत्रयाणां लेपभाग भुजां तृप्तिमुद्दिश्य पित्रादिकपिण्डाधारकुशमूले ॐ लेपभागभुजः पितरस्तृप्यन्तु इतिपठित्वा हस्तंप्रोञ्छ्य ॥ जलेन हस्तौ प्रक्षालयेत् ॥ ततः सव्यंकृत्वा त्रिराचम्य हरिंस्मरेत् ॥ ततोऽपसव्येन ॐ अत्रपितरोमादयध्वं यथाभागमावृषायध्वम् इति पित्रुद्देशेन पठित्वा वामावर्त्तेनोदङ्मुखीभूय प्रीतमनाः मनाक् श्वासंनियम्य तेनैव यथापरावृत्य ॐ अमीमदन्तापितरो यथाभागमावृषा यिषत इतिजपेत् ॥ एवमेवमातामहपक्षे ॐअत्रमातरोमादयध्वमितिमंत्रोहेनश्वासधारणंकुर्यात् ॥ ततः पूर्वदत्तावनेजनजलेन ॐअद्या मुकगोत्राऽस्मत्पितरमुकशर्मन् वसुरूप अत्रप्रत्यवनेनिक्ष्व तेस्वधा इतिप्रथमपिण्डोपरिप्रत्यवनेजनंदत्त्वा एवमेवपितामहादिअष्टपिण्डो परि तत्तदवनेजनपात्रेण प्रत्येकं प्रत्यवनेजनंदद्यात्॥ततोनीवीं विस्रंस्य सव्येन आचम्य अपसव्यं कृत्वा॥ ॐनमोवः पितरोरसाय नमो वःपितरः शोषाय नमोवःपितरोजीवाय नमोवः पितरःस्वधायै नमोवः पितरोघोराय नमोवःपितरोमन्यवे नमोवः पितरः पितरोनमोवो गृहान्नः पितरोदत्तसतोवः पितरो देष्म॥इतिकृताञ्जलिः पठेत् ॥ ततःॐएतद्वः पितरोवास इतिपठित्वानवसु पिण्डेषुसूत्राणि प्रतिपिण्डं

ऊर्णादशावा पञ्चाशदूर्ध्ववयस्कयजमानहृदयलोमानिवा दत्त्वा ततःकुशतिलजलान्यादाय॥ॐ अद्यामुकगोत्राऽस्मत्पितृपितामहप्रपि
तामहाअमुकामुकशर्म्माणः वसुरुद्रादित्यरूपाएतानिवासांसित्रेधा विभज्ययुष्मभ्यंस्वधाइत्युत्सृजेत्। एवमेवमात्रादिभ्योमातामहादिभ्यश्चो
त्सृजेत्॥ततः पित्रादीनुद्दिश्यतदीयपिंडेषु गंधपुष्पधूपदीपतांबूलदक्षिणादीनिदत्त्वा॥ तच्छेषान्नंपिंडसमीपेविकीर्य्यॐपिंडार्चनंसर्वं परि
पूर्णमस्तु इतिब्रूयात्॥ततःसव्यापसव्याभ्यां भोजनपात्रेषुॐशिवाआपःसन्तु इतिसकृत्सकृज्जलंदत्त्वाॐसौमनस्यमस्तु इतिपुष्पाणिॐ
अक्षतंचारिष्टंचास्त्विवतियवान्पितृपात्रेषुतिलांश्चक्रमेणदद्यात्।ततोऽपसव्येनॐअमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुक
शर्मणांवसुरुद्रादित्यरूपाणांदत्तैतदन्नपानादिकमक्षय्यमस्त्वित्यक्षय्योदकंदद्यात्।एवमेवमात्रादिभ्योमातामहादिभ्यःसपत्नीकेभ्योऽपिदद्या
त्।ततःसव्यंकृत्वाप्राङ्मुखस्तन्मनाः सुमनाःकृतांजलिर्दक्षिणांदिशंपश्यन्आशिषोगृह्णीयात्।ॐअघोराः पितरः संतु ॐअघोरामातरः
संतुॐअघोरामातामहाःसपत्नीकाश्चसंतुइतिवदेत्।संत्वित्यनुज्ञातःॐगोत्रंनोवर्द्धतामितिवदेत्।वर्द्धतामित्यनुज्ञातः। दातारोनोभिवर्द्धन्तां
वेदाःसंततिरेवच।श्रद्धाचनोमाव्यपगमत् ।बहुदेयंचनोऽस्तु।अन्नंचनोबहुभवेत् ।अतिथींश्चलभेमहि।याचितारश्चनःसंतु॥माचयाचिष्मकंच
न॥एताः सत्या आशिषः संत्वितिवदेत्। ततोऽपसव्यं कृत्वा पिंडोपरिसपवित्रान्कुशानास्तीर्य स्वधांवाचयिष्ये इतिब्रूयात्।वाच्यतामि
त्युक्तेॐपितृभ्यःपितामहेभ्यःप्रपितामहेभ्योमातृपितामहीप्रपितामहीभ्योमातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यःसपत्नीकेभ्य
श्चस्वधोच्यतामितिवदेत् ॥ अस्तुस्वधा इत्यनुज्ञातः ॥ ॐऊर्जंवहन्तीरमृतंपयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्प्पयतमेपितॄनितिसप
वित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात्॥ततः स्वयंयजमानोऽर्घ्यपात्रत्रयमुत्तानीकृत्यसव्येनदेवदक्षिणांदद्यात् ॥ तत्रकुशत्रययवजलानि

हिरण्यंचादाय।ॐ अद्याऽस्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनांधुरिलोचनसंज्ञकानांवापुरूरवार्द्रवसंज्ञकानां विश्वेदेवानां श्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे।इतिसंकल्प्यदद्यात्।ततोऽपसव्यादिना ॐअमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यरूपाणांकृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतम मुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इतिपितृदक्षिणांदद्यात् ॥ एवमेवमात्रादिमातामहादिश्राद्धप्रतिष्ठार्थमपिरजतद क्षिणांदद्यात्॥ दैवेरजतनिषेधः असंभवेफलमूलादिकंदद्यात् ॥ ततःॐपिंडानुत्थापयामि॥ उत्थापय इत्युक्ते पिंडानुत्थाप्यस्थाल्यांनि धायाऽवघ्राणंकृत्वा सकृदाच्छिन्नान्दर्भांनुल्मुकं च वह्नौ क्षिपेत् ॥ ततः सव्येन ॐ विश्वेदेवाः प्रीयंतामिति प्रार्थ्य ॥ अपसव्येन ॐ वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैरिति पितॄन्विसृजेत् ॥ ततःॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे॥ आमागंतांपितरामातराचामासोमोऽअमृतत्वेनगम्यतादितिमंत्रपठित्वाप्रद क्षिणीकृत्यसव्येन ॐदेवताभ्यः पितृभ्यश्चेतित्रिर्जपेत्॥ ततः अपसव्येनरक्षादीपंनिर्वाप्यसव्येनहस्तौपादौप्रक्षाल्याऽऽचम्यॐप्रमादात्कु र्वतांकर्म० इतिपठित्वाकर्मपूर्त्तिकामोविष्णुंस्मरेत्॥ततः पिंडान् गामजं वायसान्वा खादयेत् ॥ अगाधेजलेवाक्षिपेत्॥पुत्रकामः पितामह पिंडंसाध्व्यैधर्मपत्न्यैवादद्यात्॥ साचशुचिर्वाग्यतापुत्रकामा ॐआधत्तपितरोगर्भंकुमारंपुष्करस्रजम् । यथेहपुरुषोऽसत्।इतिमंत्रेपठितेऽ श्नीयात् ॥ततोदेशकालौसंकीर्त्य ॐअद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यरूपाणां तथाचा स्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनाममुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानां

वसुरुद्रादित्यरूपाणांकृतैतन्महालयनिमित्तपार्वणश्राद्धप्रतिष्ठार्थममुकसंख्याकान् ब्राह्मणान् भोजयिष्ये इतिसंकल्प्यदशाष्टौषट्चतुरो
वाब्राह्मणान् पायसाद्यन्नेन भोजयेत् ॥ ततोवैश्वदेवबलिकर्मणीकृत्वासुतभृत्यबांधवातिथिसंयुक्तः पितृशेषितमन्नमश्नीयात् ॥ तद्दिने
श्राद्धकर्ताद्यूताध्वगमनमैथुनायासकलहपुनर्भोजनहिंसादीनिनकुर्यात ॥ इत्यपात्रकनवदैवत्यपार्वणश्राद्धपद्धतिःसमाप्ता ॥ ॥ छ ॥
अथापात्रकषड्दैवत्यपार्वणश्राद्धपद्धतिः। तत्रतावत्पूर्वदिनकृत्यम्। कर्त्तापूर्वेद्युर्निरामिषमेकवारंभुक्त्वातद्दिनेरात्रौप्रदोषान्ते असंभवेप्रातर्वा
श्राद्धारंभसमयेवा यथाऽवकाशं विप्रगृहं गत्वा ब्राह्मणनिमंत्रणंकुर्यात्। ततो निमंत्रितोविप्रःश्राद्धकर्ताच द्विर्भोजनं वेदाऽध्ययनंदूरगमनं
मैथुनं भारोद्वहनं श्रमं हिंसां क्रोधं त्वरां प्रमादं कलहं क्षौरं च वर्जयेत्शुचिःसत्यवादीक्षमी ब्रह्मचारी च स्यात् ॥पूर्वमङ्गीकृतनिमंत्रणो
नान्यन्निमंत्रणमिच्छेत् नान्यदन्नं प्रतिगृह्णीयात् ॥ नान्यत्रगमनादिनाकुतपादिश्राद्धकालातिक्रमंकुर्य्यात नचास्नातः श्राद्धेभुञ्जीत ॥
अथश्राद्धदिनकृत्यम्। कर्ताब्राह्मेमुहूर्ते उत्थाययथोपदेशं शौचविधिंकृत्वा आचम्यदंतधावनं नकुर्यात्। ततोनद्यादौस्नात्वा प्रक्षालिततनुः
श्वेतवाससी परिधाय संध्यादि नित्यावश्यकं समाप्यपाकभूमिंगोमयादिना संस्कुर्यात्॥तत्रनूतनताम्रादिपात्रादिषुयथाशक्त्युत्कृष्टमन्नं
भक्ष्यभोज्यादिनानाप्रकारमनेकव्यञ्जनयुतं स्वयं यजमानः पक्तुमारभेत अशक्तश्चेद्बांधवैः स्त्रीद्वारावापाचयेत्।अमातृपितृवंशजांपाषंडां
पुंश्चलीं पतितां वंध्यां अन्यगोत्रजाम् व्यंगकर्णीं चतुर्थदिने स्नातामपि गर्भिणीं चपाकार्थं वर्जयेत्।एवंसमाप्तेच पाके श्राद्धभूमिंगोमयो
दकेनोपलिप्य ज्वलदंगारैः संशोध्य गौरमृत्तिकयाच्छाद्य तिलैर्गौरसर्षपैश्चविकिरेत् ॥ तत्र श्राद्धसामग्रीं संपाद्याऽपराह्णे स्नात्वा शुक्लवास
सीद्वेपरिधाय ब्राह्मणैः सह श्राद्धभूमिमागत्य अन्नाभिप्रायेण सिद्धमित्युक्त्वा॥आसनानि उपस्पृश्य अत्राध्वमिति देवब्राह्मणान्प्राङ्मुखा

न्पितृब्राह्मणानुदङ्मुखानुपवेशयेत् [तदभावे कुशमयद्विजान्वा स्थापयेत्] ततस्तेषांपादयोरधस्ताद्दक्षिणाग्रंकुशत्रयं प्रत्येकं दत्त्व ।
प्रत्यासनसमीपेतिलतैलेन श्राद्धापवर्गस्थायिनो दीपान्दद्यात्॥तेषांरक्षा द्विजैरेवकार्य्या काककुक्कुटादीन्श्राद्धापहंतॄनपसारयेत्॥श्राद्धदे
शावरणं चकुर्यात्॥ततःकर्ता स्वासने प्राङ्मुखउपविश्य सव्येनाचम्य॥ॐअपवित्रः पवित्रोवासर्वावस्थांगतोपिवा॥यःस्मरेत्पुण्डरीका
क्षंसबाह्याभ्यंतरःशुचिः॥ॐपुण्डरीकाक्षःपुनात्वितिपठित्वाकुशत्रयानीतजलेन श्राद्धदेयद्रव्याणिस्वात्मानंचसिंचेत्॥ततःॐवैष्णव्यैनमः
ॐकाश्यप्यैनमः ॐअक्षय्यायैनमः ॐभूम्यैनमः ॥ इतिनत्वा॥श्राद्धदेशं गयात्मकत्वेन तदेकदेशस्थं गदाधरं चध्यात्वातयोःॐभगव
त्यैगयायैनमः ॐभगवतेगदाधरायनमः॥इतिमनोवाक्कायैर्नमस्कारंकुर्य्यात्॥ततःकुशत्रययवजलान्यादाय देशकालौ संकीर्त्य ॐअद्या
ऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्यरूपाणां तथाऽस्मन्मातामहप्रमातामहवृद्ध
प्रमातामहानाममुकामुकशर्म्मणां सपत्नीकानां वसुरुद्रादित्यरूपाणां सदैवं प.र्वणश्राद्धं पितृतृप्तिकामोऽहंकरिष्ये॥इतिसंकल्प्य।गायत्रीं
त्रिर्जपित्वा ॐदेवताभ्यःपितृभ्यश्च महायोगिभ्यएवच॥नमःस्वाहायैस्वधायै नित्यमेवनमोनमः॥इतित्रिर्जपेत् ततोयवतिलगौरसर्षपां
श्चगृहीत्वा ॐनमोनमस्तेगोविंद पुराणपुरुषोत्तम॥इदंश्राद्धंहृषीकेश रक्षतांसर्वतो दिशः॥ १॥इतिपठित्वा॥ॐतिलारक्षंत्वसुराद्दभ रक्षंतुरा
क्षसात्॥वह्निवैंश्रोत्रियंरक्षेदतिथिःसर्वरक्षकः॥इतिमंत्रेण तिलकुशान्द्वारदेशेक्षिप्त्वा॥ॐअग्निष्वात्ताःपितृगणाःप्राचींरक्षंतुमेदिशम् ॥ इति
मंत्रेणप्राच्याम्॥ ॐतथाबर्हिषदःपान्तुयाम्यांयेपितरःस्थिताः॥इतिमंत्रेणयाम्याम् ॥ ॐप्रतीचीमाज्यपास्तद्वत् ॥ इत्यनेनप्रतीच्याम् ॥
ॐउदीचीमपिसोमपाः॥इत्यनेनोदीच्याम् ॥ ॐअधोर्ध्वमपिकोणेषु हविष्मंतश्चसर्वदा । इति॥ ॐरक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः॥

सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुवै ॥ वायुभूतपितॄणांच तृप्तिर्भवतुशाश्वती ॥ इत्यनेनअधस्तादूर्ध्वंकोणेषु चसर्वत्रतिलान्गौरसर्षपांश्च
विकीर्य्य अपसव्येन वामेदक्षिणकटिभागे वा यथाचारं नीवीबंधोविधेयः॥ततःसव्येनकस्मिंश्चित्पात्रे जलंगृहीत्वा दर्भैरालोड्य ॥ ॐ
यद्देवादेवहेडनंदेवासश्चकृमावयम् ॥ अग्निर्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः ॥१॥ यदिदिवायदिनक्तमेनांसिचकृमावयम् ॥ वायुर्म्मा
तस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ २ ॥ यदिजाग्रद्यदिस्वप्नएनाꣳसिचकृमावयम् ॥ सूर्य्योमातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥३॥
इतिकूष्मांडसूक्तेनाभिमंत्र्य॥ॐउदक्यादिदुष्टदृष्टिपातात शूद्रादिसंपर्कदोषाच्चपाकादीनांपवित्रताऽस्तु॥इतिपाकादीन्संप्रोक्ष्यहरयेनिवेद
येत् ॥ अथआसनादिदानम्॥तत्रतावत् उदङ्मुखःसजघनंदक्षिणं जान्वाच्य यज्ञोपवीत्यन्तर्जानुकरो जलयवसमन्वितं कुशत्रयमृज्वेवा
दाय ॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवाइदमासनवोनमः इत्युच्चार्यदेवतीर्थेनपूर्वाग्रं कुशत्रयमुत्सृजेत् ॥
एवंमातामहादिदेवेभ्योऽपिदद्यात्॥ततोदक्षिणामुखःप्राचीनोपवीती पातितवामजानुःद्विगुणभुग्नकुशत्रयतिलजलान्यादाय॥ॐअद्यामुक
गोत्रास्मत्पितरमुकशर्म्मन्सपत्नीक वसुरूपइदमासनं तुभ्यंस्वधा इत्युच्चार्य पितृतीर्थेन मोटकं दक्षिणाग्रमुत्सृजेत ॥ एवमेवपितामहा
दिपञ्चभ्योऽपिदर्भासनानिदद्यात् ॥ ततःसव्यादिना सयवकरः॥ ॐपुरूरवार्द्रवसंज्ञकान्विश्वान्देवानहमावाहयिष्ये इत्युच्चार्यॐविश्वेदेवा
सऽआगत शृणुतामऽइमꣳहवम् ॥ एदंबर्हिर्निषीदत॥इत्यनेनावाह्य ॐयवोसियवयास्मद्द्वेषोयवयारातीः इत्यनेनयवान्विकीर्य॥ ॐविश्वे
देवाः शृणुतेम ꣳ हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्याऽस्मिन्बर्हिषिमादयध्वम् ॥ इतिजपेत् ॥
विश्वेदेवोत्पत्तिनाम्नोरज्ञाने ॐआगच्छन्तुमहाभागा विश्वेदेवामहाबलाः ॥ येयत्रयोजिताःश्राद्धे सावधानाभवन्तुते ॥ १ ॥इतिश्लोको

प्युच्चारणीयः॥ततोऽपसव्यादिना सतिलहस्तः ॥ ॐपितॄनहमावाहयिष्ये॥इत्युच्चार्य्य ॥ ॐउशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॥
उशन्नुशतऽआवह पितॄन्ह विषेऽअत्तवे॥इत्यावाह्य॥ॐअपहताऽअसुरारक्षाᳬसिवेदिषदः ॥ इतितिलान् श्राद्धदेशे विकीर्य्य॥ॐआयन्तुनः
पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् इति जपेत् ॥ ततः सव्यापसव्याभ्या
मर्घ्यपात्रेष्वष्टसुदर्भपवित्रमेकैकमुपरिधृत्वा॥ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥शंयोरभिस्रवन्तुनः॥इतिप्रत्येकंजलंप्रक्षिप्य देवपात्रे
षुॐयवोसियवयास्मद्द्वेषोयवयारातीः॥इतियवान्विकीर्य पित्रादिपात्रषट्केॐतिलोसिसोमदेवत्यो गोसवोदेवनिर्मितः॥प्रत्नमद्भिःप्रक्तःस्व
धयापितॄँल्लोकान्प्रीणाहिनः स्वधानमः इतितिलान्प्रक्षिपेत्॥ततोऽष्टसुपात्रेषुतूष्णीमेवगंधपुष्पादि निक्षिपेत् ॥ ततः सव्येनदेवार्घपात्रसंप
त्तिरस्तु इतिपठित्वा प्रथमंदेवार्घपात्रं वामहस्तेकृत्वा॥तत्रस्थंपवित्रंदेवपात्रेपूर्वाग्रंदत्त्वा किंचिदुदकंचदत्त्वाॐयादिव्याआपः पयसासंब
भूवुर्य्याऽअन्तरिक्षाऽउतपार्थिवीर्य्याः हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशᳬस्योनाःसुहवाभवंतु। इतिमंत्रेणाभिमंत्र्यकुशत्रययवजला
न्यादाय॥ॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवाएषवोहस्तार्घः स्वाहानमः॥इतिदक्षिणहस्तेनदेवतीर्थेनपवि
त्रोपरि अर्घ्यंदत्त्वापवित्रसहितमर्घ्यपात्रंदेवपुरतःस्थापयेत्॥एवमेवमातामहादिदेवेभ्योऽप्यर्घ्यंदद्यात्॥ततोऽपसव्यादिना॥ॐपित्राद्यर्घपा
त्रसंपत्तिरस्तुइतिपठित्वा॥पितृपात्रंगृहीत्वा पवित्रंभोजनपात्रेदक्षिणाग्रं दत्त्वाॐयादिव्याऽआपइत्यनेनाभिमंत्र्य ॥ द्विगुणभुग्नकुशत्रयति
लजलान्यादायॐअद्यामुकगोत्र अस्मत्पितरमुकशर्मन् सपत्नीक वसुरूप एषतेहस्तार्घः स्वधानमःइतिदक्षिणहस्तस्थपितृतीर्थेन यथाज
लंपतिततथापवित्रोपरिसावशेषमर्घंदद्यात् अर्घपात्रंचपितृपुरतः स्थापयेत् एवमेव पितामहादिपञ्चभ्योपिदद्यात्।ततः सव्यंकृत्वा ॐविश्वे

भ्योदेवेभ्यःस्थानमसीत्युक्त्वापवित्रजलयुतदेवार्घपात्रद्वयमासनदक्षिणपार्श्वेउत्तानं क्रमेण स्थापयेत्।ततोऽपसव्यादिनापितामहप्रपितामहा
र्घपात्रस्थजलादीनि पितृपात्रेकृत्वा। एवमेववृद्धमातामहप्रमातामहयोःपात्रस्थजलादीनि चमातामहपात्रेकुर्यात्ततः सव्यंकृत्वाप्राङ्मुखः
पुत्रकामःपितृपात्रस्थजलेनमुखमार्ज्जनम् आयुष्कामोदक्षिणपाणिना नेत्राञ्जनञ्चकुर्यात्॥अथवाॐआपःशिवाःशिवतमाःशांताःशांततमा
स्तेकृण्वन्तु भेषजमित्यनेनाभिषेकं कुर्यात् ततोऽपसव्यंकृत्वाॐ पितृभ्यः स्थानमसीतिपठित्वा प्रथमं पितृपात्रंपित्रासनवामप्रदेशभूमा
वधोमुखं संस्थाप्य तदुपरि पितामहपात्रंतदुपरि प्रपितामहपात्रं चदद्यात्॥ एवं मातामहेभ्यः स्थानमसीत्युक्त्वा मातामहपात्रंन्युब्जीकृत्य
प्रमातामहवृद्धप्रमातामहपात्राभ्यामाच्छादयेत्।एतानिषट्कपात्राणिदक्षिणादानपर्य्यंतंनोद्धरेन्नचालयेत्।अथगंधादिदानम्।सव्यादिकृत्वा
गंधपुष्पधूपादिकंधृत्वाकुशत्रययवजलान्यादायॐअद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रवसंज्ञकाविश्वेदेवाएतानिगंधपुष्पधूपदीप
तांबूलयज्ञोपवीतवासांसिवोनमः इत्युच्चार्यगंधाद्युत्सृजेत् एवमेवमातामहादिदेवेभ्योऽपिदद्यात्॥ ततःकृतांजलिः कर्ताविश्वेषांदेवानामर्च्चनं
संपूर्णमस्त्वितिब्रूयात्॥ततःअपसव्यादिनापितृपक्षेगंधादिकंधृत्वा द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितर
मुकशर्मन्सपत्नीकवसुरूपएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितुभ्यंस्वधा।इति पित्रेगंधादिदत्त्वा एवमेवमातामहादिपंचभ्योपि
दद्यात्।ततःकृतांजलिर्भूत्वाॐपितॄणामर्चनंसंपूर्णमस्त्वितिब्रूयात् एवंगधाद्यर्चनंविधायसव्यापसव्याभ्यांभोजनपात्रस्थापनदेशं संमार्ज्य ॥ ११८ ॥
पात्राणिदत्त्वा गौरमृत्तिकयाजलेनवाब्राह्मणादिषुचतुरस्रत्रिकोणवर्तुलमंडलानि आसनानिवेष्टयित्वा कुर्य्यात्॥अथाग्नौकरणम्॥तत्रव्यंज
नक्षारवर्जितंघृताक्तमुष्णंश्राद्धान्नाग्रभागंकांस्यपात्रेसमुद्धृत्य ॥सव्येन (अपसव्येनवा) ॐअग्नौकरणंकरिष्ये इतिपठित्वा कुरुष्वेति ब्राह्म

णानुज्ञातो भयक्रोधत्वरारहितः स्वदक्षिणकरेण रजतादिपात्रस्थजले ॐ अग्नयेकव्यवाहनायस्वाहा इदमग्नयेकव्यवाहनाय ॥ ॐ सो
मायपितृमतेस्वाहा इदंसोमायपितृमते ॥ इत्याहुतिद्वयंजुहुयात ततोहुतशेषमन्नंदेववपात्रद्वये पित्रादिपात्रेषुचदत्त्वा पिंडार्थमवशेषयेत
[अत्रपरकीयभूमौश्राद्धकरणे ॐइदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिघृताक्तमन्नंदर्भेषुदद्यात] ततः सव्येनदेवपात्रयोः अपसव्येनपितृ
पात्रेषुच उष्णमन्नंसघृतमनेकव्यंजनयुतंसुशीतलजलसहितंयथावत्परिविष्य मधुनाभिघार्य्य ॐमधुवाताऽऋतायते मधुक्षरंतिसिंधवः ॥
माध्वीर्नःसंत्वोषधीः॥ १॥ॐमधुनक्तमुतोषसो मधुमत्पार्थिवर्ठरजः मधुद्यौरस्तुनःपिता॥ २॥ॐमधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यःमा
ध्वीर्गावोभवन्तुनः ॥३॥ ॐमधुमधुमध्वित्यभिमंत्रयेत् ॥ ततः सव्येन उत्तानपाणिभ्यां पित्रादिदेवपात्रमालभ्य ॥ ॐ पृथिवीतेपात्रंद्यौ
रपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमि स्वाहा॥इतिजप्त्वा ॐइदंविष्णुर्विचक्रमेत्रेधा निदधेपदम्॥समूढमस्यपार्ठंसुरेस्वाहा इत्येतां
वैष्णवीमृचमुच्चार्य्याऽधोमुखंस्वांगुष्ठमनखम् ॥ ॐविष्णोहव्यर्ठरक्ष इतियजुषाऽन्नेनिवेश्य॥इदमन्नम् इमाआपःइदमाज्यम् एतत्सर्वंहवि
रित्युक्त्वाॐअपहताऽअसुरारक्षार्ठसिवेदिषदइतियवान् अन्नपात्रपरितोविकीर्य्य वामेनकरेणपात्रंस्पृशन्दक्षिणकरेण कुशत्रययवजलान्या
दायॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रवसंज्ञकाविश्वेदेवाइदमन्नं हव्यंसोपस्करंपरिविष्टममृतरूपंवःस्वाहानमःइत्युदकंदेव
तीर्थेनदेवदक्षिणभागेभूमौनिक्षिपेत्। एवमेव मातामहादिदेवेभ्योऽप्युत्सृजेत्॥ततोऽपसव्यादिना पितृपात्रंन्युब्जपाणिभ्यां व्यस्ताभ्यांस्पृष्ट्वा
ॐपृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वधा इतिपठित्वाॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपार्ठं
सुरे॥इत्येतामृचंचजप्त्वास्वाङ्गुष्ठमधोमुखमनखम्ॐविष्णोकव्यर्ठरक्ष इतियजुषाऽन्नेनिवेश्य इदमन्नम् इमाआपः इदमाज्यम् एवत्सर्वंकव्यम्

इतिपठित्वा ॐअपहताऽअसुरा रक्षाᳬसिवेदिषद् इतितिलानन्नपात्रपरितोऽप्रदक्षिणेन विकीर्य्य वामकरेण पात्रंस्पृशन् दक्षिणकरेण
द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐअद्यामुकगोत्र अस्मत्पितरमुकशर्मन्सपत्नीकवसुरूप इदमन्नंकव्यं सोपस्करं परिविष्टममृतरूपंतुभ्यं
स्वधाइत्युदकंपितृतीर्थेन पित्रासनवामभागेभूमौ निक्षिपेत्। एवमेव पितामहादिपंचभ्योऽप्युत्सृजेत्॥ततः ॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तुइतिप्रार्थ्य सव्येन व्याहृतित्रयपूर्वां सप्रणवां गायत्रीं त्रिः सकृद्वाजपेत् ॥ तथा पवित्रपाणिर्दर्भेष्वा
सीनः ॥ ॐमधुव्वाताऽऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नः संत्वोषधीः ॥१॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवᳬरजः॥ मधुद्यौरस्तुनः
पिता ॥ २ ॥ ॐमधुमान्नोवनस्पतिर्मधुमाँऽअस्तुसूर्य्यः माध्वीर्गावोभवन्तुनः॥३॥ इतित्र्यृचम् ॥ ॐमधुमधुमध्विति च जपेत् ॥ ततः
ॐकृणुष्वपाजःप्रसितिन्नपृथ्वींय्याहि राजेवामवाँऽइभेन तृष्वीमनुप्रसितिन्द्रूणानोऽस्तासिविध्यरक्षसस्तपिष्ठैः॥१॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः॥ तपूᳬंष्यग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः॥२॥प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्या
ऽअदब्धः॥योनोदूरेऽअघशᳬसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥३॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँ२ऽओषतात्तिग्महेतेयोनोऽअराति
ᳬसमिधानचक्रे नीचातं धक्ष्यतसन्नशुष्कम्॥४॥ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने।अवस्थिरातनुहियातुजूनाञ्जामिम
जामिम्प्रमृणीहिशत्रून्॥अग्नेष्ट्वातेजसा सादयामि॥५॥इतिरक्षोघ्नीःपंचऋचःपठित्वा भूमिंतिलैरास्तीर्य्यपित्रादीन्ध्यायेत्॥ततःॐउदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्यासः।असुंयईयुरवृकाऽऋतज्ञास्तेनोऽवन्तुपितरोहवेषु॥ १॥अङ्गिरसोनःपितरोनवग्वाऽअथर्वाणोभृगवः
सोम्यासः ॥ तेषांवयᳬसुमतौ यज्ञियानामपिभद्रे सौमनसे स्याम ॥२॥ येनःपूर्वेपितरःसोम्यासोनूहिरे सोमपीथं वसिष्ठाः ॥ तेभिर्य्यमः

सꣳरराणोहवीꣳष्युशन्तुशद्भिःप्रतिकाममत्तु॥३॥त्वꣳसोमप्रचकितोमनीषात्वꣳरजिष्ठमनुनेषिपंथाम् ॥ तवप्रणीतीपितरोनऽइंदोदेवेषुरत्न
मभजन्तधीराः॥४॥त्वयाहिनः पितरः सोमपूर्वेकर्म्माणिचक्रुः पवमानधीराः।वन्वन्नवातःपरिधीꣳरपोर्णुवीरेभिरश्वैर्मघवाभवानः॥५॥त्व
ꣳसोमपितृभिःसंविदानोनुद्यावा पृथिवीऽआततंथ। तस्मैतऽइन्दोहविषाविधेम।वयꣳस्यामपतयोरयीणाम्॥६॥बर्हिषदःपितरऽऊत्यर्वा
गिमावोहव्याचकृमाजुषध्वम्।तऽआगतावसा शन्तमेनाथानः शंय्योररपोदधात॥७॥आहम्पितॄन्त्सुविदत्राँ२ऽअवित्सिनपातञ्चविक्रमणं
चविष्णोः।बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः।८।उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु।तऽआगमन्तुतऽइह
श्रुवन्त्वधिब्रुवन्तुतेवन्त्वस्मान् ॥९॥ आयन्तुनः पितरः सोम्यासोग्निष्वाताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुते
वन्त्वस्मान्॥१०।अग्निष्वाताःपितरऽएहगच्छतसदःसदःसदतसुप्रणीतयः।अत्ताहवीꣳषिप्रयतानिबर्हिष्यथारयिꣳसर्ववीरंदधातन।११।
येऽअग्निष्वात्तायेऽअनग्निष्वात्तामध्येदिवःस्वधयामादयन्ते।तेभ्यःस्वराडसुनीतिमेतांयथावशन्तन्वङ्कल्पयाति।१२।अग्निष्वात्तानृतुमतो
हवामहेनाराशꣳससोमपीथंयऽआशुः॥तेनोविप्रासःसुहवाभवन्तुव्वयꣳस्यामपतयोरयीणाम् ॥१३॥इतिपितृमंत्रान्।ॐसहस्रशीर्षापुरुषः
सहस्राक्षः सहस्रपात् ॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशांगुलम्। इत्यादिषोडशऋचात्मकं पुरुषसूक्तम्। ॐआशुः शिशानोवृषभीनभीमो
घनाघनः क्षोभणश्चर्षणीनाम्॥संक्रंदनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रःइत्यादिसप्तदशमंत्रात्मकमप्रतिरथंचपठेत् ॥ततः
ॐसप्तव्याधादशार्णेषु मृगाःकालंजरेगिरौ ॥ चक्रवाकाःशरद्वीपे हंसाः सरसिमानसे ॥१॥तेभिजाताःकुरुक्षेत्रे ब्राह्मणावेदपारगाः॥प्रस्थि
तादूरमध्वानं यूयंतेभ्योऽवसीदत॥२॥इतिहविःस्तोत्रम्ॐयोगीश्वरंयाज्ञवल्क्यं संपूज्यमुनयोब्रुवन्॥वर्णाश्रमेतराणांनो ब्रूहिधर्मानशेषतः॥

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः । यमापस्तंबसंवर्ताः कात्यानबृहस्पती । पराशरव्याससशंखलिखितादक्षगौतमौ।शातातपोव
सिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥ इतियाज्ञवल्कीयगाथां चपठित्वा सप्तार्चिस्तवं च पठेत् ॥ ॐअमूर्त्तानांचमूर्त्तानां पितृणांदीप्ततेजसाम्॥
नमस्यामिसदातेषां ध्यायिनांदिव्यचक्षुषाम् ॥ १ ॥ इंद्रादीनांचनेतारो दक्षमारीचयोस्तथा ॥ सप्तर्षीणां तथान्येषां तान्नमस्या
मिकामदान् ॥ २ ॥ मन्वादीनांमुनींद्राणां सूर्याचंद्रमसोस्तथा ॥ तान्नमस्याम्यहंसर्वान्पितरश्चार्णवेषुच ॥ ३ ॥नक्षत्राणां ग्रहाणांच
वाय्वग्न्योर्नभसस्तथा ॥ द्यावापृथिव्योश्चतथा नमस्यामिकृताञ्जलिः ॥ ४ ॥ देवर्षीणांग्रहाणांच सर्वलोकनमस्कृतान् ॥ अभयस्य
सदादातॄन्नमस्येहंकृताञ्जलिः ॥ ५ ॥ प्रजापतयेकश्यपाय सोमायवरुणायच ॥ योगीश्वरेभ्यश्चसदा नमस्यामिकृताञ्जलिः ॥ ६ ॥
नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु ॥ स्वयंभुवेनमस्यामि ब्रह्मणेयोगचक्षुषे॥७॥ सोमाधारान्पितृगणान्योगमूर्तिधरांस्तथा॥नमस्या
मितथासोमं पितरंजगतामहम् ॥८॥ अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄनहम् ॥ अग्नीषोममयंविश्वं यतएतदशेषतः ॥९॥ येतुतेजसि
येचैते सोमसूर्याग्निमूर्त्तयः ॥ जगत्स्वरूपिणश्चैव तथाब्रह्मस्वरूपिणः॥१०॥ तेऽभ्योखिलेभ्योयोगिभ्यः पितृभ्योयतमानसः ॥ नमोनमो
नमस्तेमेप्रसीदंतु स्वधाभुजः ॥ ११ ॥ पितर ऊचुः ॥ स्तोत्रेणानेन चनरो योस्मान्स्तोष्यतिभक्तितः ॥ तस्यतुष्टावयंभोगानात्मज्ञा
नंतथोत्तरम् ॥१२॥ शरीरारोग्यमर्थंच पुत्रपौत्रादिकंतथा ॥ प्रदास्यामोनसंदेहो यच्चान्यदपिवांछितम् ॥ १३ ॥ तस्मात्पुण्यफलंलोके
वाञ्छद्भिःसततंनरैः ॥ पितृणांचाक्षयांतृप्तिं स्तव्यास्स्तोत्रेणमानवैः ॥ १४ ॥ पठिष्यंतिद्विजाद्याणां भुंजतांपुरतःस्थिताः ॥ अस्माक
मक्षयंश्राद्धं तद्भविष्यत्यसंशयम्॥१५॥इति ॥ ततोन्यान्यपिरुचिस्तोत्रब्रह्मविष्णुस्तवप्रभृतीनियथारुचियथाशक्तिपठेत् ॥ ततोऽपसव्या

दिनाऽच्छिष्टसन्निधौभूमिंप्रोक्ष्यतत्रदक्षिणाग्रंकुशत्रयमास्तीर्यसर्वप्रकारमन्नंसव्यंजनमुद्धृत्यसतिलमेकीकृत्य ॐ अग्निदग्धाश्चयेजीवायेऽप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यंतु तृप्तायांतुपरांगतिम् ॥ इति मंत्रेणकुशोपरिअन्नंविकिरेत् ॥ ततः सव्यंकृत्वा आचम्यहरिंस्मृत्वा पूर्ववद्गायत्रीं मधुव्वाताऽऋतायते इत्यादिऋचं मधुमधुमध्विति चपठेत् ततोऽपसव्येनपित्राद्युच्छिष्टसन्निधौचतुरस्रंदक्षिणप्लवं रमणीयंहस्तमात्रंचतुरंगुलोच्छ्रितंपित्रादित्रयपिंडपातनार्थंसिकताभिःस्थानंनिर्मायतथामातामहाद्युच्छिष्टसन्निधौ मातामहादिपिंडपातनार्थंतादृशमेवस्थानं कुर्यात् तत्रउभयत्र मध्यदेशेदर्भपिंजुलीमूलेन ॥ ॐ अपहताऽअसुरारक्षाᳫंसिवेदिषद इतिमंत्रेण सव्योपगृहीतदक्षिणहस्तेन दक्षिणाग्रांरेखां सकृत्सकृल्लिखित्वा दर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्य॥ ॐ येरूपाणिप्रतिमुंचमानाऽअसुराःसंतःस्वधया चरंति॥ परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ इतिमंत्रेणज्वलदुल्मुकप्रत्येकंरेखोपरिभ्रामयित्वादक्षिणतोनिदध्यात्ततउपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयंरेखोपरिस्तीर्त्वासव्येनदेवताभ्य इतित्रिर्जपेत् ॥ ततोऽपसव्येनपुटकषट्केजलतिलगंधपुष्पाणिकृत्वाएकंपात्रंवामहस्तेकृत्वा द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्सपत्नीकवसुरूप अत्राऽवनेनिक्ष्वतेस्वधा इति कुशमूले पित्रे पितृतीर्थेन अवनेजनंदद्यात्॥ एवंपितामहायकुशत्रयमध्येप्रपितामहायकुशाग्रेअवनेजनंचदद्यात् ॥ एवमेवमातामहादिभ्योऽपिदद्यात्॥ ततःसर्वस्माच्छ्राद्धशेषान्नादुष्णंकिंचित्किंचिदन्नमुद्धृत्यमध्वाज्यतिलसर्वव्यंजनयुतंरजतादिपात्रेकृत्वाबिल्वोपमान्षट्पिंडान्निर्मायमधुघृताभ्यामभिघार्यपित्रादिभ्योदद्यात्।तत्रप्रथमंपिंडंद्विगुणभुग्नकुशत्रयादीनिचादाय ॐ अद्यामुकगोत्रअस्मत्पितरमुकशर्मन्सपत्नीकवसुरूपएतत्तेपिंडंस्वधाइतिप्रथमावनेजनस्थाने सव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनदद्यात् एवमेवपितामहादिभ्यःपंचभ्यःप्रत्येकंतत्त

दवनेजनस्थानेपिंडदद्यात्ततः प्रपितामहादूर्ध्वंत्रयाणांलेपभुजांतृप्तिमुद्दिश्यपित्रादिकपिंडाधारकुशमूले ॐलेपभागभुजःपितरस्तृप्यन्तु
इतिपठित्वाहस्तंप्रोञ्छ्यजलेनहस्तौप्रक्षालयेत् ततः सव्यंकृत्वा त्रिराचम्य हरिंस्मरेत्ततोऽपसव्येन ॐ अत्रपितरो मादयध्वं यथाभा
गमावृषायध्वम् ॥ इतिपित्रुद्देशेनपठित्वावामावर्त्तेनोदङ्मुखीभूयप्रीतमनाः मनाक् श्वासं नियम्य तेनैव यथापरावृत्त्यॐअमीमदंतपि
तरो यथा भागमावृषायिषत इति जपेत् एवंमातामहपक्षेपिमंत्रोहेन कुर्यात् ततः पूर्वदत्तावनेजनपात्रस्थजलेन ॐअद्यामुकगोत्र अस्म
त्पितरमुकशर्मन्सपत्नीक वसुरूप अत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिप्रथमपिंडोपरि प्रत्यवनेजनंदत्त्वाएवमेवपितामहादिपिंडोपरि तत्तद
वनेजनपात्रेणप्रत्येकं प्रत्यवनेजनंदद्यात् ततोनीवींविस्रस्य सव्येनआचम्यअपसव्यंकृत्वाॐनमोवः पितरो रसायनमोवःपितरःशोषाय
नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरोमन्यवे नमोवः पितरःपितरोनमोवोगृहान्नःपितरो
दत्तसतोवः पितरोदेष्म इतिकृताञ्जलिःपठेत् । ततः ॐ एतद्वः पितरोवासइतिपठित्वाषट्सुपिंडेषुसूत्राणिप्रतिपिंडमूर्णादशावापंचाश
दूर्ध्ववयस्कयजमानहृदयलोमानि वा दद्यात् ॥ ततोद्विगुणभुग्नकुशत्रयतिलजलान्यादायॐअद्यामुकगोत्रअस्मत्पितरमुकशर्मन् सपत्नी
कवसुरूप एतत्तेवासः स्वधा इति सूत्रमुत्सृजेत् एवमेवपितामहादिपंचस्वपिपिंडेषुतत्तन्नाम्नोत्सृजेवततःपित्रादीनुद्दिश्यतदीयपिंडेषुतू
र्णांगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदद्यात् पिंडशेषान्नंचपिंडसमीपेविकिरेत्॥ततःसव्यापसव्याभ्यां देवपितृभोजनपात्रेषुॐशिवाआ
पः संतु इति सकृत्सकृज्जलं दद्यात्॥ॐसौमनस्यमस्तु इतिपुष्पाणि॥ॐअक्षतंचारिष्टमस्त्वितियवांश्चदद्यात् (नतंडुलान्) ॥ ततः
ॐअमुकगोत्रस्यअस्मत्पितुरमुकशर्मणः सपत्नीकस्यवसुरूपस्यदत्तैतदन्नपानादिकमक्षय्यमस्त्वितिम तिलमक्षय्योदकंभोजनपात्रेदद्यात्॥

एवमेवपितामहीनांनामगोत्राभ्यांतदीयभोजनपात्रेषु अक्षय्योदकं दद्यात्॥ततः सव्यंकृत्वा प्राङ्मुखस्तन्मनाः कृतांजलिर्दक्षिणां दिशंपश्यन् ॐअघोराःपितरःसंत्विति पठित्वासमाचारात्पूर्वाग्रां जलधारांदत्त्वाआशिषोगृह्णीयात्॥ॐगोत्रंनोवर्द्धताम् दातारोनोभिवर्द्धताम् वेदाः संततिरेवच श्रद्धाचनोमाव्यगमत् बहुदेयंचनोऽस्तु अन्नंचनो बहुभवेत् अतिथींश्चलभेमहि याचितारश्चनः सन्तु माचयाचिष्मकंचन॥ एताः सत्याआशिषःसंतुइतिवदेत्॥ततोऽपसव्यकृत्वापिंडोपरिसपवित्रान्कुशानास्तीर्य स्वधांवाचयिष्ये इतिब्रूयात्॥ॐपितृभ्यःपितामहेभ्यः प्रपितामहेभ्यः सपत्नीकेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यश्च स्वधोच्यतामित्युक्त्वा॥ॐउर्ज्जं वहंतीरमृतंघृतंपयः कीलालंपरिस्रुतम्।स्वधास्थतर्प्पयतमेपितृनितिसपवित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात्॥ ततःस्वयंयजमानोऽर्घ्यपात्राण्युत्तानीकृत्यसव्येनदेवदक्षिणांदद्यात्॥हिरण्यकुशत्रयादीनिचादाय॥ ॐअद्याऽस्मत्पित्रादित्रयश्राद्धसंबंधिनांपुरूरवार्द्रवसंज्ञकानां विश्वेषांदेवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे॥इति संकल्प्य दद्यात्॥एवमेवमातामहादिदेवश्राद्धदक्षिणामपिदद्यात्।ततोऽपसव्यंकृत्वारजतदक्षिणांजलकुशादीनिचादाय॥ॐअद्यामुकगोत्रस्यअस्मत्पितुरमुकशर्मणः सपत्नीकस्यवसुरूपस्य कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे।इतिपितृदक्षिणांदद्यात् एवमेव पितामहादिपंचभ्योपिश्राद्धदक्षिणामपिदद्यात[दैवेरजतनिषेधःरुद्राश्रुसंभवात्] असंभवेफलमूलादिकंदद्यात् ततःब्राह्मणानुज्ञातः पिंडानुत्थाप्य स्थाल्यां निधायावघ्राणंकृत्वा पिंडाधःस्थान्सकृदाच्छिन्नान्दर्भानुल्मुकद्वयंचवह्नौक्षिपेत्। ततः सव्येन ॐविश्वेदेवाःप्रीयंतामितिप्रार्थ्य ॥ अपसव्यंकृत्वा ॥ कुशत्रयेण ॐ वाजेवाजेऽवतवाजिनो नोधनेषु विप्राअमृताऋतज्ञाः ॥

अस्यमद्धः पिबत मादयध्वंतृप्तायातपथिभिर्देवयानैः॥१॥ इतिमंत्रेणपितॄन्विसृज्य॥ॐआमावाजस्यप्रसवोजगम्याद्देमेद्यावापृथिवी विश्व
रूपे ॥ आमागंतांपितरामातरासोमोऽअमृतत्वेनगम्यतात्॥२॥इतिप्रदक्षिणीकृत्यनमस्कृत्योपविशेत् ॥ ततः सव्येनॐदेवताभ्यइतित्रिर्ज
पित्वा अपसव्येन रक्षादीपंनिर्वाप्यहस्तौपादौप्रक्षाल्यसव्येनआचम्य॥ॐप्रमादात्कुर्वतांकर्म० इतिपठित्वाकर्म्मपूर्तिकामोविष्णुंस्मरेत्॥
ततः पिंडान् गां वायसान् अजंवाखादयेत् अग्नौजलेवाक्षिपेत् ॥ पुत्रकामः पितामहपिंडम् ॐ अपांत्वौषधीनांरसंप्राशयामि भूत
कृतंगर्भंधत्स्व ॥ इतिमंत्रेणऋतुस्नातायैपितृभक्षायैसाध्व्यैधर्म्मपत्न्यैदद्यात्॥साशुचिर्वाग्यता पुत्रकामा ॐ आधत्तपितरोगर्भंकुमारंपु
ष्करस्रजम् यथेहपुरुषोसत् ॥ इतिमंत्रेपठितेऽश्नीयात् ॥ ततोवैश्वदेवबलिकर्मणीकृत्वा ॥ दशाऽष्टौ संख्याकान् ब्राह्मणान्भोजयेत् ॥
ततः॥यस्यस्मृत्याचनामोक्त्या तपोयज्ञक्रियादिषु॥न्यूनंसंपूर्णतांयाति सद्योवंदेतमच्युतम्॥इतिपठित्वा अतिथिसुतभृत्यबांधवादिभिः
सहस्वयमपिभोजनंकुर्यात् ॥ तद्दिनेश्राद्धकर्ताद्यूताध्वगमनं मैथुनायासस्वाध्यायकलहंपुनर्भोजनहिंसादीनिचनकुर्यात् ॥ इतिगौडीय
श्राद्धप्रकाशे अपात्रकषड्दैवत्यपार्वणश्राद्धपद्धतिः समाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥अथ महालयादिषु जीवत्पितृककर्तृकमातृपार्वणश्राद्धप्रयोगः कर्त्तापूर्वेद्युर्निरामिषमेकवारंभुक्त्वा तद्दिनेरात्रौप्रदोषांते विप्रगृहेषुगत्वाब्राह्म
णेभ्योनिमंत्रणंकुर्यात् ततःश्राद्धदिनेप्रातर्नित्यावश्यकं समाप्य पाकभूमिंमृद्गोमयोदकेनसंस्कृत्य ॥ तत्रस्वयंसुस्नातबांधवैर्वास्त्रीद्वाराव
पाकंकुर्यात्॥ततोदिनस्यषण्मुहूर्त्तानंतरं श्राद्धभूमिंगोमयोदकेनोपलिप्य ज्वलदंगारैः संशोध्यगौरमृत्तिकयाच्छाद्य तिलैर्गौरसर्षपैश्चविकी
र्य्यतत्रश्राद्धसामग्रींसंपाद्यतिलतैलेनदीपंप्रज्वाल्य संस्थाप्यश्राद्धस्थानं वस्त्रेणवेष्टयेत्॥ततोऽपराह्णेपुनःस्नात्वा शुक्लधौतवाससीपरिधाय

श्राद्धदेशमागत्य स्वासनेप्राङ्मुखउपविश्य सव्येन आचम्य प्राणानायम्य ॐ अपवित्रः पवित्रोवा ॐपुंडरीकाक्षःपुनात्विति पठित्वाश्राद्धो
यद्रव्याणिस्वात्मानं च सिंचेत्।ततःॐवैष्णव्यैनमः॥ॐ काश्यप्यैनमः॥ ॐअक्षय्यायैनमः॥ ॐभूम्यैनमः ॥ इति नत्वा ॥ ॐ भगवत्यै
गयायैनमः ॥ ॐभगवतेगदाधरायनमः॥ इतितयोर्नमस्कारंकुर्यात् ॥ ततः कुशत्रययवजलान्यादाय देशकालौसंकीर्त्य ॐअद्यामुक
गोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनां गंगायमुनासरस्वतीरूपाणां विश्वेदेवपूर्वकं सपिंडकंपार्वणश्राद्धमहंकरिष्ये।
इतिसंकल्प्य ॥ गायत्रींत्रिर्जपित्वा ॐदेवताभ्यःपितृभ्यश्च महायोगिभ्यएवच ॥ नमःस्वाहायैस्वधायै नित्यमेवनमोनमः ॥ इतित्रिर्ज
पेत्॥ततोयवांस्तिलगौरसर्षपांश्चगृहीत्वा ॥ ॐतिलारक्षंत्वसुराद्दर्भारक्षंतु राक्षसात् ॥ वह्निर्वैश्रोत्रियंरक्षेदतिथिःसर्वरक्षकः इतितिलकुशान्
द्वारदेशे क्षिप्त्वा। ॐअग्निष्वात्ताः पितृगणाः प्राचींरक्षंतुमेदिशम्।तथाबर्हिषदःपांतु याम्यांयेपितरः स्थिताः॥१॥ प्रतीचीमाज्यपास्तद्वदु
दीचीमपिसोमपाः॥ अधोर्ध्वमपिकोणेषु हविष्मंतश्चसर्वदा ॥ २ ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमोरक्षां
करोतुवै ॥ ३ ॥ वायुभूतपितृणांच तृप्तिर्भवतुशाश्वती ॥ इतिमंत्रैर्दिक्षुअधस्तादूर्ध्वंकोणेषुचसर्वत्रतिलान्गौरसर्षपांश्चविकीर्य्य अपसव्ये
नवामेदक्षिणेवाऽकटिभागे नीवीबंधोविधेयः॥ततः सव्येनकस्मिंश्चित्पात्रे जलंगृहीत्वा दर्भैरालोडयॐयद्देवादेवहेडनंदेवासश्चकृमावयम्॥
अग्निर्म्मातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ १ ॥ यदिदिवायदिनक्तमेनांसिचकृमावयम् ॥ वायुर्म्मातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः
॥ २ ॥ यदिजाग्रद्यदि स्वप्नएनाꣳसिचकृमावयम्।सूर्योमातस्मादेनसोविश्वान्मुञ्चत्वꣳहसः ॥ ३ ॥ इतिकूष्मांडसूक्तेनाभिमंत्र्य
ॐउदक्यादिदुष्टदृष्टिनिपातात शूद्रादिसंपर्कदोषाच्चपाकादीनांपवित्रताऽस्तु इतिपाकादीन्संप्रोक्षयेत् ॥ अथआसनादिदानम् ॥ तत्रादौ

उदङ्मुखः पातितदक्षिणजानुः सव्यंकृत्वाजलयवसमन्वितमृजुकुशत्रयमादाय ॥ ॐ अद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रव
संज्ञकाविश्वेदेवाइदमासनंवोनमः ॥ इतिदेवतीर्थेनपूर्वाग्रंकुशत्रयमुत्सृजेत् ॥ ततोऽपसव्यंकृत्वादक्षिणामुखः पातितवामजानुःद्विगुणभुग्न
कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रेऽस्मन्मातरमुकदेविगंगारूपेइदमासनंतुभ्यंस्वधाइति सर्वतः पश्चिमगतं पितृतीर्थेन द्विगुण
भुग्नकुशत्रयंदक्षिणाग्रमुत्सृजेत् ॥ एवमेवपितामहीप्रपितामहीभ्यांदद्यात् ॥ ततः सव्यादिना सयवकरः ॥ ॐ पुरूरवार्द्रवसंज्ञकान्विश्वा
न्देवानहमावाहयिष्ये ॥ इत्युच्चार्य ॥ ॐ विश्वेदेवासऽआगतशृणुतामऽइमर्ठंहवम् ॥ एदंबर्हिर्निषीदत इत्यनेनावाह्य ॥ ॐ यवो
सियवयास्मद्द्वेषोयवयारातीः इत्यनेनयवान्विकीर्य्य । ॐविश्वेदेवाः शृणुतेमर्ठंहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ।येऽअग्निजिह्वाऽउतवाय
जत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम्॥इतिजपेत्॥ॐआगच्छंतुमहाभागा विश्वेदेवामहाबलाः ॥ येयत्रयोजिताःश्राद्धे सावधानाभवंतुते
इतिश्लोकोऽप्युच्चारणीयः ॥ ततोऽपसव्यादिनातिलहस्तःॐमातृरावाहयिष्ये॥इत्युच्चार्य्य॥ॐउशन्तस्त्वानिधीमह्युशन्तः समिधीमहि॥
उशन्नुऽतशआवहमातॄर्हविषेऽअत्तवे॥इत्यावाह्य ॥ ॐअपहताऽअसुरारक्षाᳬंसिवेदिषदः ॥इतितिलान्श्राद्धदेशेविकीर्य्य॥ ॐ आयन्तुनः
पितरःसोम्यासोऽअग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदंतोधिब्रुवंतुतेवन्त्वस्मान् ॥ इतिजपेत् ॥ ततः सव्यादिनादे
वार्घ्यपात्रेपूर्वाग्रंपवित्रंधृत्वा॥ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥इतिजलंप्रक्षिप्य ॥ ॐयवोसियवयास्मद्द्वेषोयव
यारातीः ॥ इतियवान् तूष्णीमेवगंधपुष्पाणि चनिक्षिपेत् ॥ ततोदेवार्घपात्रसंपत्तिरस्तु ॥ इतिपठित्वा ॥ देवार्घपात्रंवामहस्ते कृत्वातत्र
स्थंपवित्रंपलाशपत्रेपुरतः पूर्वाग्रंधृत्वा किंचिदुदकंचदत्त्वा॥ॐयादिव्याऽआपःपयसासंबभूवुर्य्याऽअन्तरिक्षाऽउतपार्थिवीर्याः॥हिरण्यवर्णा

यज्ञियास्तानऽआपः शिवाःशर्ठंस्योनाःसुहवाभवंतु। इत्यभिमन्त्र्य ॥ कुशत्रययवजलान्यादाय ॐअद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवाएषवोहस्तार्घःस्वाहानमः।इतिदेवतीर्थेनपवित्रोपरिअर्घ्यंदत्त्वापवित्रसहितमर्घ्यपात्रंदेवपुरतःस्थापयेत्॥ ततोऽपसव्यादिना मात्रादिपात्रत्रयेषुप्रत्येकंदक्षिणाग्रंपवित्रंधृत्वा ॥ ॐ शंनोदेवीरितिजलंक्षिप्त्वा ॐतिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तःस्वधयापितॄँल्लोकान्प्रीणाहिनःस्वधा ॥ इतितिलान् तूष्णीमेवगंधपुष्पाणिचनिक्षिपेत् ॥ ततोमात्राद्यर्घपात्रसम्पत्तिरस्तु इतिपठित्वा मातृपात्रंगृहीत्वातत्रस्थं पवित्रंदक्षिणाग्रंपलाशपत्रेधृत्वा किंचिदुदकंचदत्त्वा ॥ ॐ यादिव्याऽआपइत्यभिमंत्र्यद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्रेऽस्मन्मातरमुकदेविगंगारूपेएषतेहस्तार्घःस्वधानमः ॥ इतिपितृतीर्थेनपवित्रोपरि सावशेषमर्घंदद्यात्॥ अर्घपात्रंचपुरतःस्थापयेत्।एवमेवपितामहीप्रपितामहीभ्यांदद्यात् ततः सव्यंकृत्वा ॐविश्वेभ्योदेवेभ्योः स्थानमसीत्युक्त्वापवित्रजलयुतमासनदक्षिणपार्श्वे उत्तानं पात्रंस्थापयेत् ॥ ततोऽपसव्यादिना ॥ वृद्धपितामहीप्रपितामह्योःपात्रस्थजलादीनिमातृपात्रेकृत्वा [सव्येन प्राङ्मुखःपुत्रकामोमुखमार्जनमायुष्कामोनेत्रांजनंचकुर्यात्] ततोऽपसव्येन ॥ ॐ मातृभ्यः स्थानमसीति आसनवामप्रदेशभूमावधोमुखंस्थापयेत् ॥ एतत्पात्रत्रयंदक्षिणादानपर्यंतंनोद्धरेन्नचालयेत् ॥ अथगंधादिदानम् ॥ सव्यादिनागंधादिकंधृत्वाकुशत्रययवजलान्यादाय ।ॐअद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रवसंज्ञकाविश्वेदेवाएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसिवोनमः ॥ इत्युच्चार्य्यगंधाद्युत्सृजेत् ॥ ततःकृतांजलिः कर्ता ॐविश्वेषांदेवानामर्चनंसंपूर्णमस्त्वितिब्रूयात् ॥ततोऽपसव्यादिना पितृपक्षेगंधादिकंधृत्वाद्विगुणभुग्नकुशत्रयतिलजलान्यादाय।ॐअद्यामुकगोत्रेऽस्मन्मातरमुकदेविगंगारूपेएतानिगंधपुष्पधूपदीपतांबूलसिंदूरवासां

सितुभ्यंस्वधानमः ॥ इत्युत्सृजेत् ॥ ततः ॐमातॄणामर्चनंसंपूर्णमस्त्वितिप्रार्थयेत् ॥ एवंगंधाद्यर्चनंविधायसव्यापसव्याभ्यां भोजनपात्र
स्थापनदेशं सम्मार्ज्यपात्राणिदत्त्वा जलादिनाविप्रादिषुचतुरस्रत्रिकोणवर्तुलमंडलमासनादिवेष्टयित्वाप्रत्येकंकुर्य्यात् ॥ अथाग्नौकरणम् ।
तत्रव्यंजनक्षारवर्जितंघृताक्तमुष्णंश्राद्धान्नाग्रभागंकांस्यपात्रेसमुद्धृत्यसव्यंकृत्वाप्राङ्मुखः ॐअग्नौकरणंकरिष्येइतिपठित्वा । कुरुष्वेतिब्राह्म
णानुज्ञातोऽस्वदक्षिणकरेण रजतादिपात्रस्थजले ॥ ॐअग्नयेकव्यवाहनायस्वाहा ॥ इदमग्नयेकव्यवाहनाय ॥ ॐसोमायपितृमतेस्वाहा ॥
इदंसोमायपितृमते । इत्याहुतिद्वयंजुहुयात् । ततोहुतशेषमन्नंदेवपात्रे [अपसव्यादिना] मात्रादिपात्रत्रयेषु च पितृतीर्थेन किंचित्किंचिद्दत्वा ।
पिंडार्थमवशेषयेत ॥ [परकीयभूमौश्राद्धकरणे ॐइदमन्नमेतद्भूस्वामिपितृभ्योनमः ॥ इति घृताक्तमन्नंदमेभ्युदद्यात्] ततः सव्यंकृत्वा
आचम्य उभाभ्यांकराभ्यांपात्रांतरेणदेवपात्रे उष्णमन्नं सघृतमनेकव्यंजनयुतंसुशीतलजलसहितंयथावत्परिविश्य मधुनाभिघार्य्य
ॐमधुव्वाताऽऋतायते० इतिमंत्रत्रयंपठित्वा ॐमधुमधुमध्वित्यभिमंत्रयेत् । ततः उत्तानपाणिभ्यांदेवपात्रमालभ्य ॐपृथिवीतेपात्रंद्यौरपि
धानंब्राह्मणस्यमुखेऽअमृतेऽअमृतं जुहोमिस्वाहा । ॐइदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् । समूढमस्यपाऽंसुरेस्वाहाइत्युच्चार्य्य ॥ ॐविष्णो
हव्यर्ठंरक्ष ॥ इतियजुषाऽन्नेस्वांगुष्ठमधोमुखमनखंनिवेश्य ॐइदमन्नमित्यन्ने ॥ ॐइमाआपइतिजले ॥ ॐइदमाज्यमितिघृते ॐएतत्सर्वंह
विरितिपुनरन्नेचांगुष्ठंनिवेश्य ॥ ॐ अपहताऽअसुरारक्षाऽंसिवेदिषदइत्यन्नपात्रपरितोयवान्विकीर्यवामकरेणपात्रंस्पृशन् ॥ दक्षिणकरेण
कुशत्रययवजलान्यादाय । ॐअद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवा इदमन्नंहव्यंसोपस्करंपरिविष्टममृतरूपंवः
स्वाहानमः । इत्युदकंदेवतीर्थेनदेवदक्षिणभागेभूमौनिक्षिपेत् । ततोपसव्यादिनामात्रादिपात्रत्रयेप्रत्येकमुष्णमन्नंसघृतमनेकव्यंजनयुतंब्राह्मणतृ

त्तिक्षमंसुशीतलजलयुतं च यथावत्परिविष्यमधुनाभिघार्य्य ॥ ॐमधुव्वाताइतिमंत्रत्रयेण ॐमधुमधुमध्विति चाभिमंत्रयेत् ॥ ततोमातृपात्रं
न्युब्जाभ्यांव्यस्ताभ्यांपाणिभ्यांस्पृष्ट्वा ॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वधा ॥ १ ॥ ॐइदंविष्णुर्विचक्रमेत्रे
धानिदधेपदम् ॥ समूढमस्यपांᳮसुरेस्वधा ॥ २ ॥ इतिजप्त्वा स्वांगुष्ठमधोमुखमनखम् ॥ ॐ विष्णोकव्यर्ठंरक्षइतियजुषाऽन्नेनिवेश्य ॥ ॐ
इदमन्नम् ॐइमाआपः ॐइदमाज्यम् ॐएतत्सर्वंकव्यमित्युक्त्वा ॥ ॐअपहताऽअसुरारक्षांᳮसिवेदिषदः ॥ इत्यन्नपात्रपरितस्तिलान्विकी
र्य्य ॥ वामकरेणपात्रमत्यजन्दक्षिणकरेणद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐ अद्यामुकगोत्रेऽस्मन्मातरमुकदेविगंगारूपेइदमन्नं
कव्यंसोपस्करंपरिविष्टमम्मृतरूपंतुभ्यंस्वधानमः ॥ इत्युदकंपितृतीर्थेनमातृवामभागेभूमौक्षिपेत् ॥ एवमेवपितामहीभ्यामुत्सृजेत् ॥
ततः ॥ ॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत ॥ तत्सर्वमच्छिद्रमस्त्विति प्रार्थ्यगायत्रींत्रिर्जपित्वा ॥ ॐमधुव्वाताइतित्र्यृचम् ॥ ॐ
मधुमधुमध्वितिचजपेत ॥ ततः ॐकृणुष्वपाजइत्यादिरक्षोघ्नीः ॥ पंचऋचः ठित्वाभूमौतिलान्विकीर्य ॥ ॐ उदीरतामवरइतित्रयोद
शपितृमंत्रान् ॥ ॐसहस्रशीर्षाइतिपुरुषसूक्तम् ॥ ॐआशुःशिशानोइत्यादिसप्तदशमंत्रात्मकमप्रतिरथंच ॥ अन्यान्यपिपूर्वोक्तरुचिस्त
वप्रभृतीनियथाशक्तिपठेत् ॥ ततःउच्छिष्टपात्रसन्निधौ भूमिंप्रोक्ष्य तत्रदक्षिणाग्रंकुशत्रयमास्तीर्य्य दक्षिणहस्तेसर्वंप्रकारमन्नंसव्यंजनंजल
तिलसहितंगृहीत्वा ॐअग्निदग्धाश्चयेजीवा येऽप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृप्यंतु तृप्ता यांतुपरांगतिम् ॥ इतिमंत्रेणपितृतीर्थेनकुशोप
रितदन्नंविकिरेत् ॥ ततः सव्यंकृत्वा हस्तौप्रक्षाल्य आचम्य हरिंस्मृत्वा अपसव्येन मधुव्वाताइतित्र्यृचं मधुमधुमध्विति चजपेत ॥ तत
उच्छिष्टसन्निधौ हस्तांतरेवालुकाभिश्चतुरस्रंदक्षिणप्लवंस्थानमेकंनिर्माय तन्मध्येदर्भंपिंजूलीमूलेन ॐ अपहताऽअसुरारक्षांᳮसिव्वेदिषद

इतिदक्षिणाग्रांसकृद्रेखां कृत्वातदुपरि ॐ येरूपाणिप्रतिमुंचमानाऽअसुराःसंतः स्वधयाचरंति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान्
प्रणुदात्वस्मादित्यंगारंभ्रामयित्वादक्षिणतोनिदध्यात्।ततःउपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयंरेखोपरिस्तीर्त्वा सव्येनदेवताभ्यइतित्रि
र्जपेत् ॥ ततोऽपसव्येनपुटकत्रये जलतिलगंधपुष्पाणिकृत्वाएकंपात्रंवामहस्तेकृत्वाद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐअद्यामुक
गोत्रेऽस्मन्मातरमुकदेविऽअत्रावनेनिक्ष्वतेस्वधा॥इतिकुशमूलेमात्रेअवनेजनंदत्त्वा एवमेवकुशत्रयमध्येपितामह्यै कुशाग्रे प्रपितामह्यै चाव
नेजनंदद्यात् ॥ ततः सर्वस्माच्छ्राद्धशेषान्नादुष्णंकिंचित्किंचिदन्नमुद्धृत्यहुतशेषान्नमध्वाज्यतिलसर्वव्यंजनयुतं रजतादिपात्रेकृत्वाबिल्वो
पमान् त्रिपिंडान्निर्माय मधुघृताभ्यामभिघार्यप्रथमपिंडमादाय द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ ॐअद्यामुकगोत्रेऽस्मन्मातरमु
कदेविगंगारूपेएषतेपिंडः स्वधानमः ॥ इतिप्रथमावनेजनस्थानेसव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनपिंडंदद्यात ॥ एवमेवपितामही
प्रपितामहीभ्यांक्रमेणतत्तदवनेजनस्थानेपिंडंदद्यात्॥ततः पिंडाधारकुशमूले ॐ लेपभागभुजोमातरस्तृप्यंतु इतिपठित्वा हस्तंप्रोञ्छ्य
जलेनहस्तौप्रक्षालयेत् ॥ ततः सव्येनत्रिराचम्यहरिंस्मरेत् ततोऽपसव्यंकृत्वा ॥ ॐअत्रमातरोमादयध्वमितिपठित्वावामावर्तेनोदङ्मुखी
भूय प्रीतमनाः मनाक्श्वासंनियम्यतेनैवयथापरावृत्त्य ॥ ॐअमीमदंतमातरोयथाभागमावृषायिषतइतिजपन्श्वासमुत्सृजेत्॥ ततः पूर्व
दत्तावनेजनपात्रजलेन।ॐअद्यामुकगोत्रेऽस्मन्मान्तरमुकदेविगंगारूपेऽत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिप्रथमपिंडोपरिप्रत्यवनेजनंदत्त्वाएव
मेवपितामहीप्रपितामह्योः पिंडोपरिप्रत्यवनेजनंक्रमेणदद्यात् ॥ ततोनीवींविस्रंस्यसव्येनाऽऽचामेत् ॥ ततोऽपसव्यंकृत्वा ॐनमोवोमा
तरोरसायनमोवोमातरःशोषायनमोवोमातरोजीवायनमोवोमातरःस्वधायैनमोवोमातरोघोरायनमोवोमातरोमन्यवे नमोवोमातरोमातरो

नमोवोगृहान्नोमातरोदत्तसतोवोमातरोदेष्म ॥ १ ॥ इतिकृतांजलिःपठेत् ॥ ॐएतद्वोमातरोवासःइतिपठित्वा ॥ त्रिषुपिंडेषुसूत्राणि दत्त्वा द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐअद्यामुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्योगंगायमुनासरस्वतीरूपाएता निवासं सियुष्मभ्यंस्वधाइत्युत्सृजेत् ॥ ततः पिंडेषुगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदत्त्वापिंडशेषान्नंपिंडसमीपेविकीर्य्य ॐपिंडार्चनंसर्वंप रिपूर्णमस्तु इतिप्रार्थयेत् ॥ ततःसव्येनदेवपात्रे अपसव्येनमात्रादिभोजनपात्रेषुचक्रमेण ॥ ॐ शिवाआपःसंतुइतिजलम् ॥ ॐसौमन स्यमस्तु इतिपुष्पाणि॥ॐअक्षतंचारिष्टंचास्त्विति दैवेयवान्॥मात्रादिपात्रेषु चयवतिलांश्चक्रमेणदद्यात् ॥ ततोऽपसव्येन ॐअद्यामुगोत्रा या अस्मन्मातुरमुकदेव्यागंगारूपायाःदत्तैतदन्नपानादिकमक्षय्यमस्त्वित्यक्षय्योदकंदद्यात्॥एवमेवपितामहीप्रपितामह्योरप्यक्षय्योदकंदद्या त्॥ततः सव्यंकृत्वा प्राङ्मुखस्तन्मनाः सुमनाः कृतांजलिर्दक्षिणांदिशंपश्यन्ॐअघोरामातरःसंतु इतिपठित्वासमाचारात्पिंडोपरिपूर्वा ग्रांजलधारांदत्त्वाऽऽशिषोगृह्णीयात् ॥ ॐगोत्रंनोवर्द्धतां दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि॥याचितारश्चनःसंतु माचयाचिष्मकंचन ॥ एताः सत्याआशिषः संतुइतिवदेत् ॥ ततोऽपसव्यंकृत्वा पिंडोपरिसपवित्रान्कुशानास्तीर्य्य स्वधांवाचयिष्ये इतिब्रूयात्॥वाच्यतामित्युक्ते ॐमातृपितामहीप्रपितामहीभ्यः स्वधोच्यतामितिवदे त्॥अस्तुस्वधाइत्यनुज्ञातः॥ॐऊर्ज्जंवहंतीरमृतंघृतम्पयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्पयतमेमातृरितिसपवित्रकुशोपरिदक्षिणाग्रांजल धारांदद्यात् ॥ ततोऽर्घपात्राण्युत्तानीकृत्य॥सव्येनदेवदक्षिणांदद्यात् ॥ कुशत्रययवजलानिहिरण्यंचादाय॥देशकालौसंकीर्त्य ॥ ॐअद्या स्मन्मात्रादित्रयश्राद्धसंबंधिनांपुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानांकृतैतच्छ्राद्धकर्मणः प्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे

ब्राह्मणायदक्षिणात्वेनतुभ्यमहंसंप्रददे इतिसंकल्प्यदद्यात्॥ततोऽपसव्यंकृत्वाॐअद्याऽमुकगोत्रायाअस्मन्मातुरमुकदेव्या गंगारूपिण्याः
कृतैतत्पार्वणश्राद्धकर्मणःप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनतुभ्यमहंसंप्रददे इतिसंकल्प्यमातृदक्षिणां
दद्यात्॥एवमेव पितामहीप्रपितामहीभ्यांषष्ठ्याविभक्त्यासंकल्प्यक्रमेणरजतदक्षिणांदद्यात्॥दैवेरजतनिषेधः ॥ असंभवेफलमूलादिकंदद्या
त्॥ततःपिंडानुत्थापयामि ॥ उत्थापय इत्युक्ते पिंडानुत्थाप्यस्थाल्यांनिधायावघ्राणं कृत्वा सकृदाच्छिन्नान्दर्भान् उल्मुकंचवह्नौक्षिपेत् ॥
ततः सव्येनॐविश्वेदेवाःप्रीयंतामितिप्रार्थ्य अपसव्येनॐवाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः।अस्यमध्वःपिबतमादय
ध्वंतृप्तायातपथिभिर्देवयानैरितिमात्रादीन्विसृजेत् ततःॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे।आमागंतांपितरामावरा
चामासोमोऽअमृतत्वेनगम्यतादितिप्रदक्षिणीकृत्य नमस्कृत्योपविशेत्॥ततः सव्येन ॐदेवताभ्य इतित्रिर्जपित्वा ॥ अपसव्येनहस्ताभ्यां
रक्षादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्यसव्येनाचम्य ॥ॐप्रमादात्कुर्वतांकर्म प्रत्यवेताध्वरेषुयत्॥स्मरणादेवतद्विष्णोः संपूर्णस्यादितिश्रुतिः१
इतिपठित्वाकर्मपूर्तिकामोविष्णुंस्मरेत्॥ततःपिंडान् गवादिभ्योदत्त्वा दशाष्टौचतुरोवाब्राह्मणान् भोजयेत्॥ततोवैश्वदेवबलिकर्मणीकृत्वा
सुतभृत्यबांधवातिथिसंयुतः श्राद्धशेषितमन्नमश्नीयात् ॥ तद्दिनेश्राद्धकर्ताद्यूताध्वगमनमैथुनायासकलहपुनर्भोजनहिंसादीनिनकुर्य्यात् ॥
एवमेव प्रसंगतोगयांगत्वा अर्घ्यावाहनादिवर्ज्यंसर्वंत्रिदैवत्यंपार्वणंकुर्यात् ॥ एषएवविधिर्दौहित्रोप्याश्विनशुक्लप्रतिपदिमातामहश्राद्धंत्रि
दैवत्यंकुर्यात् ॥ तत्रपुँल्लिंगेनसर्वत्रोच्चारः कार्यः ॥ ॥ इतिगौडीयश्राद्धप्रकाशेजीवत्पितृककर्तृकत्रिदैवत्यमातृपार्वणश्राद्धप्रयोगः॥ छ ॥

॥अथाऽपात्रकनांदीश्राद्धपद्धतिः॥ तत्रतावद्ब्राह्मेमुहूर्त्तेउत्थाययथोपदेशंस्नानसंध्यादिनित्यकर्मसमाप्यप्रातरष्टौचतुरोवाब्राह्मणान्निमंत्र
येत्॥ ततोवेद्यांगणपतिसहितागौर्य्यादिषोडशमातृकाः प्रतिमाक्षतपुंजलेखान्यतमेष्वधिष्ठानेषुस्थापयेत्॥ तद्यथा॥ कर्त्ताप्रक्षालित
करचरणः स्वाचान्तःसकुशोपग्रहपाणिः शुद्धासनेप्राङ्मुख उपविश्यकुशत्रययवजलान्यादाय देशकालौसंकीर्त्य॥ ॐअद्यामुककर्मांग
भूतगणपतिसहितषोडशमातृपूजनमहंकरिष्ये इतिसंकल्पयेत्॥ ततःपुष्पाक्षतानादाय॥ॐगणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वा
प्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम।आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम्।ॐभूर्भुवःस्वर्गणपतेइहागच्छ
इहतिष्ठ इतिगणपतिंस्थापयेत्।ततःप्रदक्षिणक्रमेणगौर्य्यादिस्थापनम्।ॐभूर्भुवःस्वर्गौरिइहागच्छइहतिष्ठ।१।ॐभूर्भुवःस्वःपद्मेइहागच्छ
इहतिष्ठ२।ॐभूर्भुवःस्वःशचिइहागच्छइहतिष्ठ।३।ॐभूर्भुवःस्वर्मेधेइहा०।४।ॐभूर्भुवःस्वःसावित्रीहा०॥५॥ॐभूर्भुवःस्वर्विजयेइहा०॥६॥
ॐभूर्भुवःस्वर्जयेइहा०॥७॥ॐभूर्भुवःस्वर्देवसेने०॥८॥ॐभूर्भुवःस्वःस्वधेइहा०॥९॥ॐभूर्भुवःस्वःस्वाहेइहा०।१०। ॐभूर्भुवःस्वर्मातरइहा
गच्छतइहतिष्ठत॥११॥ॐभूर्भुवःस्वःलोकमातर इहागच्छतइहतिष्ठत॥१२॥ॐभूर्भुवःस्वःहृष्टेइहा०॥१३॥ॐभूर्भुवःस्वःपुष्टेइहा०॥१४॥
ॐभूर्भुवःस्वस्तुष्टेइहा०॥१५॥ॐभूर्भुवःस्वरात्मकुलदेवतेइहागच्छइहतिष्ठ १६ ॐभूर्भुवःस्वःश्रीरिहागच्छइहतिष्ठ १७ इतिगणपतिसहि
ताएतामातॄःप्रत्येकमोंकारव्याहृतिपूर्वकमावाह्यस्थापयित्वा।ॐमनोजूतिर्जुषतामाज्यस्येतिप्रतिष्ठांकृत्वा। प्रणवादिनमोंतेनस्वस्वनाम्नाषो
डशोपचारैः पूजयेत्॥ततः केनचित्पात्रेणसगुडंविलीनघृतमादाय ॐव्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसिसहस्रधारंदेवस्त्वास
वितापुनातुव्वसोः पवित्रेणशतधारेणसुप्वाः कामधुक्षः॥१॥ इतिमंत्रेणमातॄणांमुपरिभित्तिलग्नाः सप्तपंचवाधारारुत्तरोत्तरक्रमेणपातयेत्

ताश्चपूजयेत् ॥ ततः ॐआयुष्यंवर्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यं वर्चस्वज्जैत्रायाविशतादुमाम् ॥ १ ॥ नतद्र
क्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत् योबिभर्तिदाक्षायणꣳ हिरण्यꣳ सदेवेषु कृणुतेदीर्घमायुः ॥ २ ॥ य
दाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः।तन्मऽआबध्नामिशतशारदायायुष्मान्जरदष्टिर्यथासम्॥३॥ इतिवृद्धिसूक्तंपठेत्॥
अथ नांदीश्राद्धप्रयोगः ॥ तत्रादौ गोमयोपलिप्तेदेशेश्राद्धसामग्रींसंपाद्य प्रागग्रकुशोत्तरेष्वासनेषु प्राङ्मुखान् दक्षिणाप
क्रमानुदगपवर्गान्षट्दर्भबटून्निवेश्य प्रत्यासनसमीपे तिलतैलेनदीपंप्रज्वालयेत् ॥ ततः कर्त्ताप्रक्षालितकरचरणः स्वास
नेउदङ्मुखउपविश्यसपवित्रोपकुशः सव्येन आचम्यप्राणानायम्य ॥ सजघनंदक्षिणंजान्वाच्य ॥ तांबूलादिकमादाय ॥ ॐअद्यकरि
ष्यमाणामुककर्मनिमित्तकाभ्युदयिकश्राद्धे अस्मन्मात्रादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञकाविश्वेदेवाः अनेनतांबूलादिद्रव्येण कुशब
टुरूपा भवन्तोमयानिमंत्रिताः ॥ ॐआमंत्रिताःस्मः॥इति सर्वतोदक्षिणगतं मात्रादिदेवदर्भबटुंनिमंत्र्य एवमेव तदुत्तरगौ पित्रादिमाता
महादिदेवदर्भबटूच क्रमेण निमंत्र्य ततःॐअक्रोधनैःशौचपरैरितिपठित्वास्वागतंभवतां सुस्वागतमितिप्रार्थयेत्॥ततःपुनस्तांबूलादिक
मादायॐअद्यामुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्योनांदीमुख्यः अनेन तांबूलादिद्रव्येण कुशबटुरूपाभवत्योमयानि
मंत्रिताः॥ ॐआमंत्रिताःस्मः इतिनिमंत्र्य एवमेव पित्रादिमातामहादिदर्भबटुद्वयंक्रमेणनिमंत्रयेत ॥ ततः ॐअक्रोधनैः शौचपरैरितिप
ठित्वा ॥ स्वागतंभवतां सुस्वागतमितिप्रार्थयेत् ॥ ततोगंधपुष्पादियुतंपाद्यंगृहीत्वा ॐअद्याऽस्मन्मात्रादित्रयसंबंधिनःसत्यवसुसंज्ञका
विश्वेदेवा एतत्पादार्घं वः स्वाहानमः ॥ इति दत्त्वा एवमेवपित्रादिमातामहादिदेवेभ्योप्यर्घंदद्यात् ॥ पुनः ॐअमुकगोत्राऽस्मन्मातृपिता

महीप्रपितामह्योऽमुकामुकदेव्योनांदीमुख्य एतत्पादार्घंत्रेधाविभज्य वः स्वाहानमः इतिमातृवर्गेऽर्घंदत्त्वा पित्रादिमातामहादिवर्गद्वयेप्य र्घंक्रमेणदद्यात्॥ ततः ॐ अद्याऽस्मन्मात्रादित्रयसंबंधिनः सत्यवसुसंज्ञकाविश्वेदेवाः इदमाचमनंवःस्वाहानमःइतिमातृवर्गेदेवेभ्यआच मनार्थंजलंदत्त्वा एवमेव पितृवर्गमातामहवर्गेदेवेभ्योप्याचमनंदद्यात्॥पुनः ॐ अमुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदे व्योनांदीमुख्यइदमाचमनंत्रेधाविभज्यवःस्वाहानमःइतिमात्रादिभ्यआचमनंदत्त्वापित्रादिभ्योमातामहेभ्यश्चाचमनंदद्यात्।ततःॐअत्रा सध्वमितिपठेत्।इतिनिमंत्रणम्।ततः कर्त्तास्वपुरतः कर्म्मपात्रंजलेनापूर्य्यगंधपुष्पदूर्वादधियवहरितकुशांस्तत्रनिक्षिप्य।ॐकर्मपात्रंसंपन्न मितिब्रूयात् ॐसुसंपन्नमित्यनुज्ञातःॐअपवित्रः पवित्रोवा॰ॐपुंडरीकाक्षः पुनात्वितिपठित्वाकुशानीतजलेनश्राद्धीयोपकरणानिप्रोक्ष्य ॐवैष्णव्यैनमः॥ॐकाश्यप्यैनमः॥ॐभूम्यैनमः॥ इति भूमिंसंपूज्य ॐविष्णवेनमः इति विष्णुंमनोवाक्कायैर्नमस्कारंकुर्यात् ॥ ततो दूर्वा कुशयवजलान्यादाय।देशकालौसंकीर्त्यॐअद्यामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनां अमुकगोत्रा णामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणांनांदीमुखानामृतथाच अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममु कामुकशर्मणां सपत्नीकानाममुककर्मनिमित्तकं सत्यवसुसंज्ञकविश्वेदेवपूर्वकं सपिंडकमाभ्युदयिकश्राद्धमहं करिष्ये इतिसंकल्प्य ॥ ॐकुरुष्वेति ब्राह्मणानुज्ञातः सप्रणवव्याहृतिकां गायत्रींत्रिर्जपित्वा विष्णुंस्मरेत्।ततः ॐनमोनमस्ते गोविंद पुराणपुरुषोत्तम।इदंश्राद्धं हृषीकेश रक्षतांसर्वतोदिशः इतिसर्वत्रयवान्गौरसर्षपांश्चविकीर्य॥वामकटिसंलग्नवस्त्रांचलेनीवींबध्नीयात्॥ततःकूष्मांडसूक्तेनपावमानेनच जलमभिमंत्र्यतेनहरितैःकुशैः पाकंप्रोक्षयेत्।अथासनादिदानम्।तत्रतावदुदङ्मुखः कुशत्रययवजलान्यादाय।ॐ अद्याऽस्मन्मात्रादित्रयश्चा

द्धसंबंधिनः सत्यवसुसंज्ञका विश्वेदेवाः इदमासनं वो नमः इतिकुशत्रयरूपं सयवं सर्वतोदक्षिणगतमासनं पूर्वाग्रमुत्सृजेत्॥ एवमेव पित्रादि
मातामहादिदेवेभ्योप्यासनमुत्तरोत्तरंदद्यात्॥ततः ॐ अद्यामुकगोत्रास्मन्मातृपितामहीप्रपितामह्यो नांदीमुख्य इदमासनं त्रेधा विभज्य वः स्वाहा।
इत्युच्चार्य्य मातृवर्गे देवतीर्थेन पूर्वाग्रं कुशत्रयमुत्सृजेत्। एवमेव पित्रादिमातामहादिवर्गद्वयोरपिदद्यात्।ततः ॐ सत्यवसुसंज्ञकविश्वान्देवानावाह
यिष्ये इतिब्रूयात् आवाहय इत्यनुज्ञातः सयवकरः।ॐ विश्वेदेवासऽआगतशृणुतामऽइमर्ठ्ंहवम्। एदंबर्हिर्न्निषीदत इत्यावाह्यॐ यवोसियवय।
स्मद्द्वेषोयवयारातीरित्यनेन यवान्विकीर्य ॐ विश्वेदेवाः शृणुतेमर्ठ्ंहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठयेऽअग्निजिह्वाऽउतवायजत्राऽआसद्याऽस्मिन्
बर्हिषिमादयध्वम् इति जपेत्॥ विश्वेदेवोत्पत्तिनाम्नोरज्ञाने।आगच्छंतुमहाभागा विश्वेदेवामहाबलाः।येयत्रयोजिताः श्राद्धे सावधानाभवंतुते॥
इति श्लोकंपठेत् ॥ ततः ॐ नांदीमुखीर्मातॄरावाहयिष्ये इत्युच्चार्य्य आवाहयेत्यनुज्ञातः सयवकरः ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधी
महि॥उशन्नुशतऽ आवह मातॄर्हविषेऽअत्तवे ॥ इत्यावाह्ययवान्विकिरेत् ॥ एवमेव ॐ पितॄनहविषेऽअत्तवे ॐ मातामहान्हविषेऽअत्तवे
इतिमंत्रोहेनयथाक्रमं पित्रादीन्मातामहादींश्चावाह्य॥प्रदक्षिणं यवान्विकिरेत्।ततोदेवपूर्वकं षट्सुस्वर्णादिपात्रेषु प्रतिपात्रं पवित्रद्वयं पवित्रं
वानिधाय ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये।शंय्योरभिस्रवन्तुनः।इतिप्रत्येकंपात्रेष्वपो निषिच्य। ॐ यवोसियवयास्मद्द्वेषोयवयारा
तीरितिदेवपात्रत्रयेषुयवान्निक्षिप्य ॐ यवोसि सोमदैवत्योगोसवोदेवनिर्मितः।प्रत्नमद्भिः पृक्तः पुष्ट्यानांदीमुखाँल्लोकान्प्रीणाहिनः स्वाहा
इतिमंत्रेणमात्राद्यर्घपात्रेषुयवान्क्षिपेत् ॥ ततः सर्वत्र तूष्णींगंधपुष्पाणिचदत्त्वा ॥ ॐ अर्घपात्रसंपत्तिरस्त्विति ॥ अस्त्वर्घपात्रसंपत्तिरि
त्यनुज्ञातोदेवार्घपात्रंवामहस्तेकृत्वापवित्रे पलाशादिपत्रेपूर्वाग्रेविन्यस्य ॐ यादिव्याऽआपःपयसासंबभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः।

हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सर्ठंस्योनाः सुहवाभवंतु इत्यभिमंत्र्य कुशत्रययवजलान्यादाय ॥ ॐअद्यास्मन्मात्रादित्रयश्राद्ध
संबंधिनः सत्यवसुसंज्ञकाविश्वेदेवा एषवोऽर्घोनमः इतिदेवतीर्थेनार्घंपवित्रोपरिदत्त्वा ॥ एवमेव पित्रादिमातामहादिदेवेभ्योपिदद्यात्॥ततो
मात्राद्यर्घपात्रंवामहस्तेकृत्वापवित्रं पलाशादियत्नेपूर्वाग्रंधृत्वाॐया॥दिव्याऽआपःपयसाइत्यभिमंत्र्यॐअद्यामुकगोत्राऽस्मन्मातृपितामहीप्र पि
तामह्योनांदीमुख्यएषोऽर्घस्त्रेधाविभज्य वःस्वाहानमः।इतिदेवतीर्थेनार्घ्यंपवित्रोपरिदत्त्वातेनैवक्रमेणपित्रादिभ्योमातामहेभ्यःसपत्नीकेभ्य
श्चपवित्रदानपूर्वकंप्रत्येकमर्घ्यंदद्यात् । ततःॐविश्वेभ्योदेवेभ्यःस्थानमसीत्युक्त्वापवित्रजलयुतंदेवार्घपात्रत्रयंप्रत्येकमासनदक्षिणपार्श्वेउत्तानं
स्थापयेत् ॥ ततः ॐनांदीमुखीभ्योमातृभ्यः स्थानमसीतिमात्रादिपात्रम् ॐनांदीमुखेभ्यः पितृभ्यः स्थानमसीतिपित्राद्यर्घपात्रम् ॐ नांदी
मुखेभ्योमातामहेभ्यः स्थानमसीतिचोक्त्वामातामहाद्यर्घपात्रंचस्वस्वाऽऽसनदक्षिणपार्श्वेक्रमेणन्युब्जंकुर्यात् ॥ एतानिस्थापितान्यर्घपात्रा
णिदक्षिणादानपर्यंतंनोद्धरेन्नचालयेत्॥ततोगंधादिदानम् ॥ ततःषट्स्वासनेषुप्रत्येकंगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवस्त्राणिसन्निधाय॥कुश
त्रयादीन्यादाय ॥ ॐअद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञकाविश्वेदेवाएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसिवोनमः
इत्युत्सृजेत॥एवमेवपित्रादिमातामहादिदेवेभ्योप्युत्सृजेत् ॥ ततःकुशत्रययवजलान्यादाय ॐअद्यामुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्यो
नांदीमुख्यएतानिगंधपुष्पधूपदीपतांबूलसिंदूरवासांसित्रेधाविभज्यवःस्वाहानमः॥इत्युत्सृज्य॥ एवमेव पित्रादिमातामहादिभ्यःसपत्नीकेभ्यश्च
गोत्राद्युच्चारणपूर्वकं सकुशयवजलेनगंधाद्युत्सृजेत् ॥ एवंगंधाद्यर्चनंविधाय कृतांजलिर्भूत्वा ॐअर्चनंसंपूर्णमस्त्विति ब्रूयात् ॥ अस्त्वर्चनंसं
पूर्णमितिविप्रावदेयुः ॥ ततो भोजनपात्रस्थापनदेशं संमार्ज्यपात्राणिदत्त्वागोरमृत्तिकयाजलादिनावामंडलंप्रत्येकंकुर्यात्। अथाग्नौकरणम्

तत्रादौ घृतप्लुतमन्नपात्रेकृत्वाॐअग्नौकरणंकरिष्येइतिपृष्ट्वा। कुरुष्वेतिब्राह्मणानुज्ञातःआर्द्रामलकमात्रमन्नंगृहीत्वा ताम्रादिपात्रस्थितजले
प्राङ्मुखःदक्षिणंजान्वाच्यॐअग्नयेकव्यवाहनायस्वाहाइदमग्नयेकव्यवाहनाय।ॐसोमायपितृमतेस्वाहाइदंसोमायपितृमतेइत्याहुतिद्वयं
हुत्वाशेषंदैवपात्रत्रयेमात्रादिपात्रेषुचकिंचित्किंचिद्दद्यात् ॥ अत्र परकीयगृहश्राद्धकरणपक्षे सव्येनएव ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो
नमइतिघृतादियुक्तमन्नंदर्भेषूत्सृजेत् ॥ ततः षट्स्वपिपात्रेषु यथासंभवमन्नं परिविष्य पात्रांतरस्थंजलंघृतंव्यंजनंचोपनीय ॥ उत्ता
नपाणिभ्यां प्रथमान्नपात्रमालभ्यजपति ॥ ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतं जुहोमिस्वाहा इति ॥ ॐ इदंविष्णु
र्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपाᳬंसुरेस्वाहा इतिचपठित्वा।ॐविष्णोहव्यᳬंरक्षइत्यनयास्वाङ्गुष्ठमधोमुखमनखमन्नेऽवगाह्यइदम
न्नम्‌इमाआपःइदमाज्यम् इदंहविरित्युक्त्वा॥ॐअपहताऽअसुरारक्षाᳬंसिवेदिषदः॥इतियवान् विकीर्य वामकरेणपात्रंस्पृशन् कुशत्रययवज
लान्यादायॐअद्यास्मन्मात्रादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञकाविश्वेदेवा इदमन्नंघृताद्युपस्करसहितंपरिविष्टंहव्यममृतरूपंवोनमः।इति
संकल्प्यासनदक्षिणभागेजलमुत्सृजेत्। एवमेवपित्रादिमातामहादिदेवेभ्योप्यन्नमुत्सृजेत। पुनःमात्रादिपात्रमालभ्यॐपृथिवीतेपात्रंद्यौरपि
धानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा॥ॐइदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाᳬंसुरेस्वाहा इतिपठित्वाॐविष्णो
हव्यᳬंरक्ष इत्यन्नेऽङ्गुष्ठंनिवेश्यॐअपहता इत्यन्नपात्रपरितोयवान्विकीर्य कुशयवजलान्यादायॐअमुकगोत्राऽस्मन्मातृपितामहीप्रपिता
मह्योऽमुकामुकदेव्योनांदीमुख्य इदमन्नंघृताद्युपस्करसहितंपरिविष्टंहव्यममृतरूपंत्रेधाविभज्यवःस्वाहानमःइत्युत्सृजेत ॥ एवमेवपित्रादिपा
त्रं मातामहादिपात्रंचक्रमेणपात्रालंभनादिपूर्वकंसंकल्प्यदद्यात् ॥ ततःॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु

इतिप्रार्थ्य नांदीमुखान्मात्रादीन्ध्यायन् दैवपूर्वकं भोजनपात्रेषु किंचित्किंचिदपोदत्त्वा यथासुखंजुषध्वमितिब्रूयात् ॥ ततःप्रागग्रकुशो त्तरासनोपविष्टः प्रणवव्याहृतिपूर्विकांसकृत्त्रिर्वागायत्रींजप्त्वाॐमधुमधुमध्वितिचजपेत ॥ नमध्रुवाताइतित्र्यृचंनपितृमंत्रान्॥ततः ॐ कृणुष्वपाजःप्रसितिन्नपृथ्वींय्याहिराजेवामवाँऽइभेन ॥तृष्वीमनुप्प्रसितिन्द्रूणानोस्तासिव्विद्ध्यरक्षसस्तपिष्ठैः ॥ १ ॥ तवभ्र्रमासऽआ शुयापतन्त्यनुस्पृशधृषताशोशुचानः॥तपूꣳष्यग्नेजुह्वापतङ्गानसन्दितोव्विसृजविष्ष्वगुल्काः ॥२॥ प्रतिस्प्पशोव्विसृजतूर्णितमोभवा पायुर्व्विशोऽअस्याऽअदब्धः॥योनोदूरेऽअघशꣳसोयोऽअन्त्यग्नेमाकिष्टे व्व्यथिरादधर्षीत्॥३॥उदग्नेतिष्ठप्रत्त्यातनुष्वन्यमित्राँ२ऽओष तात्तिग्महेते॥योनोऽअरातिꣳसमिधानचक्केनीचातंधक्ष्यतसन्नशुष्कम्॥४॥ऊर्द्ध्वोभवप्प्रतिविद्ध्याद्ध्यस्मदाविष्कृणुष्ष्व्दैव्यान्यग्ने॥अव स्थिरातनुहि यातुजूनाञ्जामिमजामिम्प्रमृणीहिशत्रून्॥अग्नेष्ट्वातेजसासादयामि॥५॥इतिरक्षोघ्नसूक्तम् ॥ॐपुनंतुमादेवजनाःपुनन्तुमनसा धियः॥पुनन्तुव्विश्वाभूतानिजातवेदः पुनीहिमा ॥१॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं भवावाजस्यसङ्गथे ॥२॥ शिरोमेश्रीर्यशो मुखंत्त्विषिः केशाश्चश्मश्रूणि ॥ राजामेप्राणोऽअमृतꣳसम्म्राट्चक्षुर्विराट्श्रोत्रम्॥ ३॥जिह्वामेभद्रंवाङ्महोमनोमन्युः स्वाराड्भामःमोदाः प्रमोदाऽअङ्गुलीरंगानिमित्रम्मेसहः ॥ ४ ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मवीर्यम् ॥ आत्माक्षत्रमुरोमम ॥५॥ पृष्टीर्म्मेराष्ट्रमुदरमꣳ सौग्रीवाश्चश्रोणी ॥ ऊरूऽअरत्नीजानुनीविशोमेंगानिसर्वतः ॥६॥ नाभिर्म्मेचित्तंविज्ञानम्पायुर्म्मेऽपचितिर्भसत् ॥ आनंदनंदावांडौमेभगः सौभाग्यंपसः जंघाभ्यांपद्भ्यांधर्मोऽस्मिविशिराजाप्रतिष्ठितः।७ पयःपृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः।पयस्वतीःप्प्रदिशः संतुमह्यम्।८।इतिपवमानसूक्तम्।ॐसहस्रशीर्षापुरुष इत्यादि षोडशर्चंपुरुषसूक्तमन्यानि शिवसंकल्पप्रभृतीनिपवित्राणिमङ्गलानिचजपेत्

ततः सर्वव्यंजनोपेतमन्नाद्यंसयवमादाय वारिणाप्लाव्य प्रागग्रास्तृतकुशोपरि॥ॐअग्निदग्धाश्चयेजीवा येप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृ
प्यन्तु तृप्तायान्तुपरांगतिमिति विकीर्य।आचम्यविष्णुंस्मृत्वापुनःकिंचित्किंचिदपोदत्त्वा गायत्रींमधुमधुमध्विति च जप्त्वाॐसंपन्नमितिब्रूयात्
सुसंपन्नमित्यनुज्ञातःपिंडानहं करिष्ये॥इतिपृच्छेत् ॥ कुरुष्वेत्यनुज्ञातोवालुकाभिश्चतुरस्रंप्राक्प्लवमुदक्प्लवंवामंडलत्रयंकृत्वातन्मध्ये ॥
ॐअपहताऽअसुरारक्षाᳬंसिवेदिषद इतिप्रागग्रंरेखात्रयंकृत्वाप्रत्येकंरेखोपरिॐयेरूपाणिप्रतिमुंचमानाऽअसुराःसंतःस्वाहयाचरन्ति॥परा
पुरोनिपुरोयेभरन्त्यग्निष्टाह्लोकान्प्रणुदात्यस्मादित्यंगारान् भ्रामयेत्॥तत्र रेखात्रयोपरि समूलान्प्रागग्रानुदगग्रान्वाकुशानास्तीर्य ॐदे
वताभ्यइतित्रिर्जपेत॥ततो नवपुटकेषु जलयवगंधपुष्पाणिकृत्वाएकंपुटकं वामहस्तेकृत्वाकुशादीन्यादाय॥ॐअद्यामुकगोत्रेऽस्मन्मातर
मुकदेविनांदीमुखि अत्रावनेनिक्ष्वतेस्वाहा इतिदर्भमूलेमात्रेअवनेजनंदत्त्वा एवमेवपितामहीप्रपितामहीभ्यांमध्याग्रयोःक्रमेणदद्यात्।ततः
ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् नांदीमुखाऽत्रावनेनिक्ष्वतेस्वाहा इतिद्वितीयमंडलस्थितकुशत्रयमूले पित्रेऽवनेजनंदत्त्वाएवमेव
पितामहप्रपितामहयोस्तत्तत्कुशमध्याग्रयोरवनेजनंदद्यात ॥ एवमेवमातामहादिवर्गदर्भमूलमध्याग्रेषुदद्यात ॥ ततःसर्वव्यंजनोपेतं
सर्वविधमन्नमुद्धृत्यहुतशेषान्नंदधिबदरयवैःसंमिश्र्यनवपिंडान् बिल्वोपमान्निर्माय एकंपिंडंकुशादींश्चादाय ॐअमुकगोत्रेऽस्मन्मातरमुक
देविनांदीमुखिएषदधिबदराक्षतमिश्रः पिंडस्तेनमः ॥ इत्यवनेजनक्रमेणावनेजनस्थानेषुमात्रादिभ्यः पिंडान्दद्यात् ॥ ततः ॐ अमुकगो
त्राऽस्मत्पितरमुकशर्मन्नांदीमुखएषदधिबदराक्षतमिश्रः पिंडस्तेनमः ॥ इतिपितृस्थानेदद्यात् एवमेवपितामहादिभ्यः पंचभ्य
स्तत्तदवनेजनस्थानेपिंडान्दद्यात् ॥ ततोदर्भमूलेषुपाणिस्थंपिंडलेपंनिमृज्य हस्तौप्रक्षाल्याचम्यहरिंस्मरेत् ॥ ततोमात्रादिपिंडाभि

मुखोंजलिंबद्धा ॥ ॐ अत्रमातरोमादयध्वंयथाभागमावृषायध्वमितिजपित्वा उदङ्मुखीभूयश्वासं नियम्यप्रदक्षिणंपरावृत्य ॐ अमीम
दन्तमातरोयथाभागमावृषायिषत इतिजपेत् ॥ एवंपित्रादिपिंडाभिमुखोभूत्वा ॐ अत्रपितरोमादयध्वमित्यादिजपित्वा मातामहादि
पिंडाभिमुखोभूत्वा ॐ अत्रमातामहादयोमादयध्वमित्यादिजपित्वाऽसून्नियम्य ॐ अमीमदन्तपितरो यथाभागमावृषायिषत॥ॐअमी
मदंतमातामहायथाभागमावृषायिषतेतिजपेत् ॥ ततोऽवनेजनपात्रजलेन ॐ अमुकगोत्रेमातरमुकदेविनांदीमुखिअत्रप्रत्यवनेनिक्ष्वतेस्वा
हा ॥ इतिमातृपिंडोपरिप्रत्यवनेजनंदत्त्वा ॥ एवमेवपितामहीप्रपितामहीभ्यां तथा ॐअमुकगोत्र पितरमुकशर्मन्नांदीमुख अत्रप्रत्यवनेनि
क्ष्वतेस्वाहा इतिपितृपिंडोपरिदद्यात् ॥ एवमेव पितामहादिभ्यः पंचभ्यस्तत्तत्पिंडोपरिदद्यात् ॥ ततोनीवींविसंस्य आचम्य ॐ नमो
वोमातरोरसायनमोवोमातरः शोषायनमोवो मातरोजीवायनमोवोमातरःस्वाहायै नमोवोमातरोघोरायनमोवोमातरोमन्यवेनमोवोमातरो
मातरोनमो वोगृहान्नो मातरोदत्तसतोवोमातरोदेष्म ॥ इतिमात्रादिवर्गंनमस्कृत्य ॥ ॐनमोवः पितरोरसायनमोवः पितरः शोषायनमोवः
पितरोजीवायनमोवः पितरःस्वाहायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोगृहान्न पितरोदत्तसतोवः पित
रोदेष्म इतिपित्रादिमातामहादिवर्गद्वयंनमस्कुर्यात् ॥ ततः ॐ एतद्वोमातरोवास इतिमात्रादिपिंडेषुसूत्राणिदत्त्वा ॐ एतद्वः पितरोवास
इतिपित्रादिषट्पिंडेषुप्रतिपिंडं सूत्रत्रयंदद्यात् ॥ ततोगंधपुष्पधूपदीपद्राक्षामलकमूलयवतांबूलदक्षिणादिभिः प्रत्येकं पिंडानभ्यर्च्य ॥ ॐ
शिवाआपः संतु इति भोजनपात्रेषुकिंचित्किंचिज्जलंदत्त्वा ॐ सौमनस्यमस्त्वितिपुष्पाणि ॥ अक्षतंचारिष्टंचास्तु इतियवांश्चदद्यात् ॥
ततः ॐ नांदीमुख्योमातरः पितामह्यः प्रपितामह्यः प्रीयंतामितिक्षरियवोदकमक्षय्यस्थानेदत्त्वा॥ एवमेव पितरः पितामहाः प्रपितामहाः
प्रीयंतामितिपित्रादिवर्गेमातामहाःप्रमातामहाःवृद्धप्रमातामहाःसपत्नीकाश्चप्रीयन्तामितिमातामहादिवर्गेचप्रत्येकमक्षय्योदकंदद्यात ततः

कृतांजलिः प्रार्थयेत् ॥ ॐअघोरा मातरः संतु ॐ अघोराः पितरः संतु ॥ ॐ अघोराः मातामहाःसपत्नीकासन्त्विति चोक्त्वा ॥ संत्वित्यनु
ज्ञातः ॥ ॐगोत्रंनोवर्द्धतां दातारोनोभिवर्द्धतां वेदः संततिरेवच ॥ श्रद्धाननोमाव्यगमत् बहुदेयंचनोऽस्तु ॥ अन्नंचनोबहुभवेदतिथीं
श्चलभेमहि॥याचितारश्चनः संतुमाचयाचिष्मकंचन॥ एताःसत्याआशिषःसंत्वितिब्रूयात्संत्वित्युक्तेसपवित्रान्कुशान्प्रत्येकंमात्रादित्रय
पिंडेपित्रादित्रयपिंडेमातामहादित्रयपिंडेचधृत्वा॥नांदीमुखीर्मातृपितामहीप्रपितामहीःनांदीमुखान्पितृपितामहप्रपितामहान्नांदीमुखा
न्मातामहप्रमातामहवृद्धप्रमातामहान् सपत्नीकान् स्वाहावाचयिष्य इतिपृष्ट्वावाच्यतामित्यनुज्ञातः ॐनांदीमुख्योमातृपितामहीप्रपिता
मह्यो नांदीमुखाःपितृपितामहप्रपितामहाःनांदीमुखामातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाश्चप्रीयन्तामितिप्रार्थ्य प्रीयंतामितिद्विजै
रुच्यमानेपिंडेषुजलंनिषिंचेत्॥ ततःसंस्रवपात्राण्युत्तानीकृत्यदेवदक्षिणांदद्यात् कुशत्रययवजलान्यादाय ॐअद्यास्मन्मात्रादित्रयश्राद्धः
संबंधिवैश्वदेविकश्राद्धप्रतिष्ठार्थमिमांद्राक्षामलकार्द्रकमूलकादिरूपांदक्षिणांविष्णुदैवत्याममुकगोत्रायामुकशर्मणेब्राह्मणायदातुमहमुत्सृजे
इत्युच्चार्य्यदद्यात् एवमेवपित्रादिमातामहादिवर्गेदेवदक्षिणांदद्यात्॥ततःॐअद्यामुकगोत्राणांमातृपितामहीप्रपित महीनांनांदीमुखीनांकृतै
तदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमांद्राक्षामलकार्द्रकमूलकादिरूपांदक्षिणांविष्णुदैवत्याममुकगोत्रायामुकशर्मणेब्राह्मणायदातुमहमुत्सृजे। इति
मात्रादिवर्गदक्षिणांदद्यात्॥एवमेवपितृवर्गमातामहवर्गयोरपिदक्षिणांचदद्यात्॥ ततःपिंडानुत्थापयामिइतिपृष्ट्वाउत्थापयइत्यनुज्ञातःपिंडानु
त्थाप्यपात्रेकृत्वाऽऽघ्रायदर्भानुल्मुकंचवह्नौक्षिपेत्॥ततोजलदानपूर्वकम्ॐविश्वेदेवाःप्रीयंतामित्युक्त्वाप्रीयन्तामित्यनुज्ञातःस्वस्तिभवंतो
ब्रुवन्तु इतिब्रूयात् स्वस्तीत्युक्ते प्रणिपत्य ॐ वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः॥ अस्यमध्वः पिबतमादयध्वंतृप्तायात

पथिभिर्देवयानैः॥इतिमात्रादीन्पित्रादीन् मातामहादींश्च विसृजेत् ॥ ततः ॥ ॐ आमावाजस्य प्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे॥ आमागंतांपितरामातराचामासोमोऽअमृतत्वेनगम्यतात ॥ इतिपठित्वाप्रदक्षिणीकृत्यरक्षादीपनिर्वापणंपाणिभ्यांकृत्वा हस्तौपादौप्रक्षाल्याचम्यपिंडान्गवादिभ्योदत्त्वाऽष्टौषड्वाविप्रान्प्रभूतघृतान्नेनभोजयेत् ॥ ततउच्छिष्टमार्जनादिकरणानन्तरंवैश्वदेवबलिकर्मणीकृत्वा ॐप्रमादात्कुर्वतांकर्मइतिपठित्वाकर्मपूर्त्तिकामोविष्णुंस्मरेत्।ततोवैश्वदेवान्तेसुतभृत्यबांधवातिथिसंयुक्तोऽश्नीयात्।इत्यपात्रकाभ्युदयिक श्राद्धपद्धतिः॥अथसांकल्पिकनांदीश्राद्धपद्धतिः॥ तत्रतावत् गणपतिसहितषोडशमातृकापूजनंघृतधारापूजनंचपूर्वोक्तवत् कृत्वा ॐ आयुष्यं वर्चस्यमितिमंत्रत्रयंपठेत्॥ततःउदङ्मुखउपविश्य आचम्य प्राणानायम्य।देशकालौसंकीर्त्यअद्यकर्त्तव्यामुककर्मनिमित्तकसांकल्पिकनांदीमुखश्राद्धंकरिष्ये ॥ इतिसंकल्पयेत् ॥ ततः दक्षिणोत्तरक्रमेण ॐसत्यवसुसंज्ञकाःविश्वेदेवानांदीमुखाःॐभूर्भुवःस्वःइदंवःपाद्यं पादावनेजनंपादप्रक्षालनंवृद्धिः ॥ ततः ॐअमुकगोत्रामातृपितामहीप्रपितामह्यःनांदीमुख्यः ॐभूर्भुवःस्वःइदंवःपाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॐ अमुकगोत्राःपितृपितामहप्रपितामहाः नांदीमुखाः ॐ भूर्भुवःस्वःइदंवः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ अमुकगोत्रामातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ॐभूर्भुवःस्वःइदंपाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ अथासनदानम् ॥ सत्यवसुसंज्ञकानां विश्वेषांदेवानांनांदीमुखानाम् ॐभूर्भुवःस्वःइदमासनंसुखासनंस्वाहा इतिकुशत्रयं सर्वतोदक्षिणगतं पूर्वाग्रमुत्सृजेत्। एवंसर्वत्र ॥ ॐनांदीश्राद्धेक्षणौ क्रियेताम् तथाप्राप्नुतांभवंतौ प्राप्नवाव इतिपठेत् ॥ ततः ॐ अमुकगोत्राणांमातृपितामहीप्रपितामहीनां नांदीमुखीनाम् ॐभूर्भुवःस्वः इदमासनम् सुखासनंस्वाहाॐ नांदीश्राद्धेक्षणौक्रियेतांतथाप्राप्नुतां भवंतोप्राप्नवाव॥ॐअमुकगोत्राणांपितृ

पितामहप्रपितामहानांनांदीमुखानाम् ॐभूर्भुवःस्वः इदमासनंसुखासनंस्वाहा ॐनांदीश्राद्धेक्षणौक्रियेतां तथा प्राप्नुतां भवंतौ प्राप्नवाव ॥
ॐअमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानां नांदीमुखानाम्ॐभूर्भुवःस्वः इदमासनंसुखासनं स्वाहाॐनांदीश्राद्धे
क्षणौक्रियेतां तथाप्राप्नुतांभवंतौप्राप्नवाव ॥ ततोगंधादिदानम् ॥ ॐसत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यः नांदीमुखेभ्यःॐभूर्भुवः स्वःइदं
गंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः॥ॐअमुकगोत्राभ्योमातृपितामहीप्रपितामहीभ्यः नांदीमुखीभ्यः ॐभूर्भुवः स्वः इदंगंधाद्यर्चनंस्वाहासं
पद्यतांवृद्धिः ॥ ॐअमुकगोत्रेभ्यःपितृपितामहप्रपितामहेभ्योनांदीमुखेभ्यः ॐभूर्भुवः स्वः इदंगंधाद्यर्चनंस्वाहा संपद्यतांवृद्धिः॥ॐअमुक
गोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्योनांदीमुखेभ्यः ॐभूर्भुवःस्वः इदंगंधाद्यर्चनंसंपद्यतांवृद्धिः।ततोभोजननिष्क्रय
द्रव्यदानम्॥ॐसत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाःॐभूर्भुवः स्वः इदंवोयुग्मब्राह्मणभोजनपर्याप्तं दास्यमानमन्नं वा तन्निष्क्रयीभूत
किंचिद्धिरण्यममृतरूपेणस्वाहासंपद्यतांवृद्धिः ॥ अमुकगोत्रामातृपितामहीप्रतितामह्यः नांदीमुख्यः ॐभूर्भुवःस्वः इदं वोयुग्मब्राह्मण
भोजनपर्याप्तंदास्यमानमन्नं वा तन्निष्क्रयीभूतंकिंचिद्धिरण्यममृतरूपेणस्वाहा संपद्यतांवृद्धिः ॐअमुकगोत्रापितृपितामहप्रपितामहाः नां
दीमुखाः ॐभूर्भुवः स्वः इदंवोयुग्मब्राह्मण० ॥ ॐअमुकगोत्रामातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाःनांदीमुखाः ॐभूर्भुवः
स्वः इदंवोयुग्मब्राह्मण० ॥ ततः सक्षीरमुदकदानम् ओंनांदीमुखाःसत्यवसुसंज्ञका विश्वेदेवाः प्रीयंताम् ओंअमुकगोत्रामातृपितामहीप्र
पितामह्योनांदीमुख्यः पितृपितामहप्रपितामहानांदीमुखाः द्वितीयगोत्रा मातामहप्रमातामहवृद्धप्रमातामहाः नांदीमुखाः सपत्नीकाश्च
प्रीयंताम् ॥ ततः ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाइतिमंत्रंपठेत् ॥ अथदक्षिणादानम् ॥ ॐसत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यो

नांदीमुखेभ्यः कृतस्यनांदीश्राद्धस्यफलप्रतिष्ठासिद्ध्यथद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे ॥ ॐअमुकगोत्राभ्योमातृ पितामहीप्रपितामहीभ्योनांदीमुखीभ्यः कृतस्यनांदीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजेॐ अमुकगोत्रेभ्यःपितृपितामहप्रपितामहेभ्यः नांदीमुखेभ्यःकृतस्यनांदीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे ॥ ॐ अमुकगोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः नांदीमुखेभ्यःकृतस्यनांदी श्राद्धस्यफल प्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥ॐमाता पितामही चैव तथैवप्रपितामही॥पिता पितामहश्चैव तथैवप्रपितामहः ॥१॥मातामहस्तत्पिताच प्रमातामहकादयः ॥ एतेभवंतुमेप्रीताः प्रयच्छंतुसुमंगलम् ॥२॥इतिप्रार्थयेत् ॥ अस्यनांदीश्राद्धस्यकर्माङ्गदेवताः प्रीयन्ताम्॥अस्मिन्नांदीश्राद्धेन्यूनातिरिक्तोयोविधिः सउपविष्टब्राह्मणानांवचनात् नांदीमुखप्रसादात्सर्वःपरिपूर्णोऽस्तु अस्तुपरिपूर्ण इतिविप्राः ॥ इतिसांकल्पिकनांदीश्राद्धपद्धतिः समाप्ता ॥ ॥छ॥ ॥छ॥ ॥

अथ नित्यश्राद्धपद्धतिः ॥ तत्रादौ आचम्य प्राणानायम्य कुशपवित्रादिधारणंकृत्वा प्राङ्मुखः सव्येन ॐअपवित्र इतिमंत्रेणॐपुण्डरीकाक्षःपुनातु इत्यनेनच कुशैः श्राद्धद्रव्याणिजलेन सिक्त्वाॐभूम्यैनमः ॐगयायेनमःॐगदाधरायनमः इतिनमस्कारंकुर्य्यात् ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य ॐअद्याऽमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकाऽमुकशर्म्मणां सपत्नीकानां तथाच अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां तृप्तिकामा नित्यश्राद्धमहं करिष्ये इति संकल्प्य गायत्रींत्रिर्जपित्वादेवताभ्य इतित्रिर्जपेत्॥ततोऽपसव्यंकृत्वा दक्षिणामुखःपातितवामजानुःद्विगुणभुग्नकुशत्रयतिलजलान्यादायॐअद्यामुकगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकाधुकशर्माणः सपत्नीकाः इदमासनंत्रेधाविभज्ययुष्मभ्यस्वधाइत्युच्चार्य्य पितृतीर्थेनजलति

लसमेतंद्विगुणभुग्नकुशत्रयरूपं पित्रादिभ्यआसनंदद्यात।पुनः ॐअद्यामुकगोत्राऽस्मन्माता।महप्रमातामहवृद्धप्रमातामहाऽमुकामुकशर्माणः
सपत्नीकाइदमासनंत्रेधाविभज्ययुष्मभ्यंस्वधा इतिमातामहादिभ्यः पूर्ववदासनंदद्यात्॥ततः ॐ अपहताऽअसुरारक्षाᳬसिंवेदिषदः॥
इति तिलान् विकीर्य्य ॐ आयंतुन इतिपठेन्नवा॥ ततोगंधपुष्पधूपदीपवस्त्रादि आसनद्वयेप्रत्येकंधृत्वा कुशतिलजलान्यादाय ॐ
अद्यामुकगोत्राऽस्मत्पितृपितामहप्रपितामहाअमुकामुकशर्माणःसपत्नीकाःएता।निगंधपुष्पधूपदीपवासांसित्रेधाविभज्ययुष्मभ्यंस्वधाइति
संकल्प्ययथासंभवंदद्यात्॥ पुनः ॐअद्यामुकगोत्रास्मन्मातामहवृद्धप्रमातामहाऽमुकामुकशर्माणः सपत्नीकाः एता।निगंधपुष्पधूप
दीपवासांसि त्रेधाविभज्य युष्मभ्यंस्वधा इत्युच्चार्य्यंदद्यात्॥ ततः ॐ अर्चनंसंपूर्णमस्त्वितिवाचयित्वा॥पात्रयोरन्नंतदभावे द्विगुणमामान्नं
वाप्रत्येकंसंस्थाप्यजलपात्रंचधृत्वाप्रथम पात्रमालभ्य ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतं जुहोमिस्वधा इति ॐ
इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् समूढमस्यपाᳬसुरे इतिचपठित्वाॐविष्णोकव्यᳬरक्षइत्यन्नेस्वाङ्गुष्ठमनखमधोमुखंनिवेश्यॐअप
हताऽअसुरारक्षाᳬसिंवेदिषदः॥ इत्यन्नपात्रपरितस्तिलान् विकीर्य वामकरेणपात्रंस्पृशन् ॐ अद्यामुकगोत्राऽस्मत्पितृपितामहप्रपि
तामहाऽमुकामुकशर्माणः सपत्नीका इदंमन्नं कव्यं सोपस्करम् अमृतरूपं युष्मभ्यंस्वधा इत्युत्सृजेत॥ पुनः द्वितीयपात्रमालभ्य ॐपृथिवी
ते० इदंविष्णु० इत्यभिमंत्र्यांगुष्ठंनिवेश्यतिलान् विकीर्य्य ॐ अद्यामुकगोत्राऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहाऽमुकामुकशर्माणःस
पत्नीका इदमन्नं कव्यं सोपस्करम् अमृतरूपं युष्मभ्यंस्वधाइत्युत्सृजेत्॥ततो गायत्रींत्रिर्जपित्वायथाशक्तिमधुव्वाताइत्यादिकंचपठेत॥
ततस्तदन्नंकिंचिद्दक्षिणाद्रव्यंचब्राह्मणायप्रतिपादयेत्॥ब्राह्मणोपवेशनपक्षेतुस्वागतप्रश्नाद्यधिकंकुर्यात्।इतिनित्यश्राद्धप्रयोगःसमाप्तः॥छ॥

अथतीर्थश्राद्धपद्धतिः ॥ तत्रतावत्तीर्थप्राप्तिदिने पादचारेणयावद्गंतुंशक्यते तावतः स्थानात् यानोपानहौपरित्यज्यगच्छेत् ॥ ततस्तीर्थेसं
प्राप्ते पाणिपादौप्रक्षाल्याचम्यॐअमुकतीर्थायनमः इतिसाष्टाङ्गं प्रणम्यगंधपुष्पादिभिः संपूज्य देशकालौसंकीर्त्य अमुकगोत्रोऽमुकशर्मा
ममेहजन्मनि जन्मान्तरेवाकृतकायिकवाचिकमानसिकसांसर्गिकदोषपरिहारार्थं श्रीपरमेश्वरप्रीत्यर्थममुकतीर्थप्राप्तिनिमित्तकंस्नानमहं
करिष्ये ॥ इतिसंकल्प्य॥यथाविधिनासूर्याभिमुखः स्थित्वास्नानंकुर्यात् ॥ ततःस्नानानन्तरं धौतवाससीपरिधाय ॥ चंदनभस्मादिना
तिलकंकृत्वा॥संध्यांब्रह्मयज्ञंचविधायतत्रस्थोदर्भवत्यां भूमौस्वशाखोक्तं देवर्षिपितृतर्प्पणंकुर्यात्॥तत्रकातीयतर्पणप्रयोगः॥तत्रादौकुशत्रय
तिलजलान्यादाय ॥ देशकालौसंकीर्त्य अद्यसमस्तपितॄणां विष्णुलोकादिप्राप्तये आत्मनश्चमुक्तिप्राप्तये अमुकतीर्थप्राप्तिनिमित्तंनि
त्यंच देवऋषिपितृतर्पणं तंत्रेणाहंकरिष्ये इतिसंकल्प्य उपवीतीप्राङ्मुख उदङ्मुखो वादेवतीर्थेनयवोदकेन ब्रह्मादींस्तर्प्पयेत्॥यथा ॐ
ब्रह्मातृप्यताम् १ॐविष्णुस्तृप्यताम १ॐरुद्रस्तृप्यताम् १ॐप्रजापतिस्तृप्यताम् १ॐदेवास्तृप्यन्ताम् १ ॐछंदांसितृप्यंताम् १ ॐ वे
दास्तृप्यन्ताम् १ ॐऋषयस्तृप्यताम् १ ॐपुराणाचार्यास्तृप्यंताम् १ ॐगंधर्वास्तृप्यंताम् १ ॐइतराचार्यास्तृप्यंताम् १ ॐ
संवत्सरः सावयवस्तृप्यताम् १ॐदेव्यस्तृप्यंताम् १ ॐअप्सरसस्तृप्यंताम् १ ॐदेवानुगास्तृप्यंताम १ ॐनागास्तृप्यंताम् १ॐ साग
रास्तृप्यंताम् १ ॐपर्वतास्तृप्यंताम् १ ॐसरितस्तृप्यंताम् १ ॐमनुष्यास्तृप्यंताम् १ ॐयक्षास्तृप्यंताम १ ॐरक्षांसितृप्यंताम् १ॐ
पिशाचास्तृप्यंताम् १ ॐसुपर्णास्तृप्यंताम् १ ॐभूतानितृप्यंताम् १ ॐपशवस्तृप्यंताम् १ॐवनस्पतयस्तृप्यंताम् १ॐओषधयस्तृप्यं
ताम् १ ॐभूतग्रामश्चतुर्विधस्तृप्यताम् १ एवमेवओंमरीचिस्तृप्यताम् १ ॐअत्रिस्तृप्यताम् १ओंअंगिरास्तृप्यताम् १ ओं पुलस्त्यस्तृ

ओंनारदस्तृप्यताम्
प्यताम् १ ॐपुलहस्तृप्यताम् १ ओंक्रतुस्तृप्यताम् १ ओंप्रचेतास्तृप्यताम् १ ओंवसिष्ठस्तृप्यताम् १ ओंभृगुस्तृप्यताम् १ ओंनारदस्तृप्यताम्
१ ततोनिवीती उदङ्मुखउत्तराग्रेणकुशेनप्रजापतितीर्थेनयवोदकेनचसनकादीन् प्रत्येकंद्विवारम् ओंसनकस्तृप्यताम् २ ओंसनंदनस्तृ० २
ओंसनातनस्तृप्यताम् २ ओंकपिलस्तृप्यताम् २ ओंआसुरिस्तृ० २ ओंवोढुस्तृ० २ ओं पंचशिखस्तृप्यताम् २ ततःप्राचीनावीतीद
क्षिणामुखःपितृतीर्थेनद्विगुणभुग्नकुशत्रयेणतिलचंदनोदकेनकव्यवाडादीन् प्रत्येकंत्रिः ओंकव्यवाडस्तृप्यतामिदतिलोदकंतस्मैस्वधानमः
३ओंअनलस्तृप्यतामिदंतिलोदकंतस्मै स्वधानमः ३ ओंसोमस्तृप्यतामिदं० ३ ओंयमस्तृप्यतामिदं० ३ ओंअर्यमातृप्यतामिदं० ३ ॐअग्नि
ष्वात्तास्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः ३ ओंसोमपास्तृप्यंतामिदं तिलोदकंतेभ्यः स्वधानमः ३ ओं बर्हिषदस्तृप्यंतामिदंतिलोद
कंतेभ्यः स्वधानमः ३ ततः ॐयमायनमः ३ ॐ धर्मराजायनमः ३ ॐ मृत्यवेनमः ३ ॐ अंतकायनमः ३ ॐ वैवस्वतायनमः ३ ॐ
कालायनमः ३ ॐ सर्वभूतक्षयायनमः ३ ॐ उदुंबरायनमः ३ ॐ दध्नायनमः ३ ॐ परमेष्ठिनेनमः ३ ॐ वृकोदरायनमः ३ ॐ चित्रा
यनमः ३ ॐ चित्रगुप्तायनमः ३ इतिचतुर्दशयमांस्तर्पयेत ॥ ततः ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः॥
असुंयऽईयुरं वृकाऽऋतज्ञास्तेनोऽवन्तु पितरो हवेषु॥ॐ अमुकगोत्रोस्मत्पिताऽमुकशर्मावसुरूपस्तृप्यतामिदं तिलोदकं तस्मैस्वधानमः
३ इतिमंत्रेणवाक्येन च प्रथमाञ्जलिं पित्रेदद्यात् १ ॐ अङ्गिरसोनः पितरोनवग्वाऽअथर्वाणोभृगवः सोम्यासः ॥ तेषां वयर्ठं
सुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ इतिमंत्रेणवाक्येनचद्वितीयांजलिम्० २ ॐ आयंतुनः पितरः सोम्यासोग्निष्वात्ताः

पृथिविंदेवयानैः॥अस्मिन् यज्ञेस्वधयामदंतोधिंब्रुवन्तुतेवन्त्वस्मान् ॥ इतिमन्त्रेणवाक्येनचतृतीयांजलिंपित्रेदद्यात् ३ ॐऊर्जंवहंतीर
मृतंघृतंपयः कीलालंपरिस्रुतंम्।स्वधास्थतर्पयंतमेपितॄन्ॐअमुकगोत्रोऽस्मत्पितामहोऽमुकशर्मारुद्ररूपस्तृप्यतामिदंतिलोदकं तस्मैस्व
धानमः ॥ इतिमंत्रेणवाक्येनचपितामहाय प्रथमांजलिंदद्यात् १ ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधा
यिभ्यःस्वधानमः प्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः।अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुंधध्वम् इति पितामहाय
द्वितीयांजलिंदद्यात् २ येचेहपितरोयेचनेहयाँश्चंविद्मयाँऽउंचनप्रविद्म।त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञठंसुकृतंजुषस्व इतिपितामहा
यतृतीयांजलिंदद्यात् ३ ॐमधुवाताऽऋतायते मधुंक्षरंतिसिंधवःमाध्वीर्न्नःसंत्वोषधीः ॥ अमुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा आदि
त्यरूपस्तृप्यतामिदंतिलोदकंतस्मैस्वधानमः ॥ इतिमंत्रेणवाक्येनचप्रपितामहायप्रथमांजलिंदद्यात १ ॐ मधुनक्तमुतोषसोमधुम
त्पार्थिवठंरजंःमधुद्यौरस्तुनःपिता॥इतिप्रपितामहायद्वितीयांजलिं० २ ॐमधुमान्नोवनस्पतिर्मधुमाँऽअस्तुसूर्यः माध्वीर्गावाभवंतुनः॥
इतिप्रपितामहायतृतीयांजलिंदद्यात् ३ ॐ तृप्यध्वं तृप्यध्वं तृप्यध्वमिति पित्रादिभ्योंऽजलित्रयंदद्यात् ततः ॐ अमुकगोत्रास्मन्माता
मुकदेवीगंगारूपातृप्यतामिदंजलं सतिलंतस्यैस्वधानमः इतिमातरं० १ ॐ अमुकगोत्राऽस्मत्पितामही अमुकदेवीयमुनारूपातृप्यता
मिदंजलंसतिलं तस्यैस्वधानमः इतिपितामहीं० १ ॐ अमुकगोत्राऽस्मत्प्रपितामही अमुकदेवीसरस्वतीरूपातृप्यतामिदंजलंसतिलंत

स्यैस्वधानमः १ इतिप्रपितामहींचतर्पयेत् एवंसापत्नमातरम्॥ततः ॐनमोवःपितरोरसाय नमोवःपितरःशोषाय नमोवःपितरोजीवाय नमोवःपितरःस्वधायै नमोवःपितरोघोराय नमोवःपितरोमन्यवे नमोवःपितरःपितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मैतद्वः पितरोवासः ॥ ॐ अमुकगोत्रोऽस्मन्मातामहोऽमुकशर्मावसुरूपस्तृप्यतामिदं जलंसतिलंतस्मैस्वधानमः ॥ इति मातामहायांजलित्रयंदद्यात्३ ॐअमुकगोत्रोऽस्मत्प्रमातामहोऽमुकशर्मारुद्ररूपस्तृप्यतामिदंजलंसतिलंतस्मैस्वधानमः॥इतिप्रमातामहायांजलित्रयंदद्यात्॥३॥ ॐ अमुकगोत्रोऽस्मद्वृद्धप्रमातामहोऽमुकशर्मा आदित्यरूपस्तृप्यतामिदंजलंसतिलंतस्मैस्वधानमः ॥ इतिवृद्धप्रमातामहायांजलित्रयं दद्यात् ३ॐतृप्यध्वमित्यंजलित्रयंमातामहादिभ्योपिदद्यात्॥ततःॐअमुकगोत्राऽस्मन्मातामही अमुकदेवीगंगारूपातृप्यतामिदंजलंसतिलंतस्यैस्वधानमः १ इति मातामह्यौ० ॐअमुकगोत्राऽस्मत्प्रमातामही अमुकदेवीयमुनारूपातृप्यतामिदंजलं सतिलंतस्यैस्वधानमः १ इति प्रमातामह्यौ० ॥ ॐ अमुकगोत्राऽस्मद्वृद्धप्रमातामहीअमुकदेवीसरस्वतीरूपातृप्यतामिदंजलं सतिलंतस्यैस्वधानमः १ इतिवृद्धप्रमातामह्यै चदद्यात्॥ॐअमुकगोत्राऽस्मत्पत्नी अमुकदेवीलक्ष्मीरूपा तृप्यतामिदंजलं सतिलं तस्यैस्वधानमःइति १स्वपत्नींतर्पयेत् ॥ ॐ अमुकगोत्रोऽस्मत्पितृव्योऽमुकशर्मावसुरूपः सपत्नीकस्तृप्यतामिदंजलं सतिलंतस्मैस्वधानमः ३ ॐ अमुकगोत्रोऽस्मद्भ्राता अमुकशर्मा वसुरूपः सपत्नीकस्तृप्यतामिदंजलं सतिलंतस्मैस्वधानमः ३ ॐ अमुकगोत्राऽस्मत्पितृष्वसाऽमुकदेवी सभर्तृका तृप्यतामिदंजलं सतिलंतस्यैस्वधा० १ ॐ अमुकगोत्रोऽस्मन्मातुलोऽमुकशर्मावसुरूपः सपत्नीकस्तृप्यतामिदंजलं

सतिलंतस्मैस्वधा० ३ ॐ अमुकगोत्राऽस्मन्मातृष्वसाऽमुकदेवी सभर्तृका तृप्यतामिदंजलं सतिलंतस्यैस्वधा० १ ॐ अमुकगोत्रोऽस्मच्छ्वशुरोऽमुकशर्मावसुरूपस्तृप्यतामिदंजलं सतिलंतस्मैस्वधा० ३ ॐ अमुकगोत्राऽस्मच्छ्वश्रूरमुकदेवी गंगारूपातृप्यतामिदंजलं सतिलंतस्यैस्वधा० १ ॐ अमुकगोत्रोऽस्मदाचार्योऽमुकशर्मावसुरूपः सपत्नीकस्तृप्यतामिदंजलं सतिलं तस्मैस्वधा० ३ ॐ अमुकगोत्रोऽस्मत्पुत्रोऽमुकशर्मा सपत्नीकस्तृप्यतामिदंजलं सतिलंतस्मैस्वधा० ३ ॐ अमुकगोत्राऽस्मत्पुत्रीअमुक देवीतृप्यतामिदंजलं सतिलंतस्यैस्वधा० १ ॐ अमुकगोत्राऽस्मद्भगिनी अमुकदेवीयमुनारूपा तृप्यतामिदंजलं सतिलंतस्यैस्वधा० १ ॐ अमुकगोत्रोऽस्मदुपाध्यायोऽमुकशर्मावसुरूपः सपत्नीकस्तृप्यतामिदंजलं सतिलंतस्मैस्वधानमः ३ ॥ इत्युपाध्यायंचतर्पयेत् ॥ एवंपितृव्यपुत्रं० भ्रातृपुत्रं० मातुलपुत्रं० श्यालकं० गुरुपुत्रं० जामातरं० पौत्रं० भागिनेयं० दौहित्रं० शिष्यं० मित्रं तत्पत्नीपुत्रादीं श्चमृतानपितर्पयेत्। ततः [विष्णुपुराणोक्तकाम्यतर्पणंयथाचारकार्यम्] ॐदेवासुरास्तथायक्षानागागंधर्वराक्षसाः।पिशाचागुह्यकाःसिद्धाः कूष्मांडास्तरवःखगाः॥१॥ जलेचराभूनिलया वाय्वाधाराश्चजंतवः ॥ प्रीतिमेतेप्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥२॥ नरकेषुसमस्तेषु यातनासुचयेस्थिताः ॥ तेषामाप्यायनायैतद्दीयतेसलिलंमया॥३॥ येऽबांधवाबांधवाये येऽन्यजन्मनिबांधवाः॥तेतृप्तिमखिलायांतु यश्चा स्मत्तोभिवांछति ॥४॥ येमेकुलेलुप्तपिंडाः पुत्रदारविवर्जिताः ॥ तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकम् ॥५॥ आब्रह्मस्तंबपर्य्यंतं देवर्षि पितृमानवाः ॥ तृप्यन्तुपितरःसर्वे मातृमातामहादयः ॥६॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तुति लोदकम् ॥७॥ एतैर्मंत्रैःपृथक्पृथक्सतिलजलंदद्यात् ॥ ततः ॥ येकेचास्मत्कुलेजाता अपुत्रागोत्रिणोमृताः ॥ तेगृह्णंतुमयादत्तं वस्त्रनिष्पी

डनोदकम् । इतिस्नानवस्त्रंबहिःस्थलेनिष्पीडचसव्येनाऽऽचम्यतर्पणोत्तरकर्मंकुर्यात् । तद्यथा ॐनमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे।
जगत्सवित्रेशुचयेनमस्तेकर्मदायिने ॥१॥ इतिमंत्रेणसूर्यायाघ्र्यंदत्त्वाब्रह्मादीन्पुष्पांजलिभिरर्चयेत् ॥ ॐब्रह्मजज्ञानं॰ ॐब्रह्मणेनमः ॥१॥
ॐइदंविष्णु॰ ॐविष्णवेनमः ॥२॥ ॐनमस्तेरुद्र॰ ॐरुद्रायनमः ॥३॥ ॐआकृष्णेन॰ ॐसूर्यायनमः ॥ ४ ॥ ॐमित्रस्यचर्षणी॰
ॐमित्राय॰ ॥५॥ ॐइमम्मे॰ ॐवरुणायनमः ॥६॥ ततउत्थाय ॐअदृश्रमस्य॰ ॥ १ ॥ हꣳसःशुचि॰ ॥ २ ॥ इतिसूर्यमुपस्थाय
ॐआदित्यायनमः ओंदिग्भ्योनमः ओंदिग्देवताभ्योनमः ओंब्रह्मणे॰ ओंपृथिव्यै॰ ओंओषधिभ्योनमः ओंवाचेनमः ओंवाचस्पतये॰
मरुद्भ्यो॰अद्भ्योन॰इतिनमस्कृत्योदकंचदत्त्वा ओंसंवर्चसा॰॥१॥देवागातु॰॥२॥इतिजपेत्।इतितर्पणप्रयोगः।एवंतर्पणंविधाय श्रीमहावि
ष्णुंषोडशोपचारैःसंपूज्यमाध्याह्निकंकर्म्मसमाप्यतीर्थप्राप्तिनिमित्तकंपित्रादीनांनवदैवतंद्वादशदैवतंवापार्वणं पितृव्यादीनांचैकोद्दिष्टंपिंड
मात्रंवा अन्नेन आमान्नेनहेम्नावाब्राह्मणेषुदर्भबटुषुवायथासंभवंकुर्य्यात्। तत्रब्राह्मणपरीक्षानकार्य्या।तत्रत्या विप्रदेवमातृकानाऽवमंतव्याः।
श्राद्धंचपित्रादिषड्दैवत्यंनवदैवत्यं वा यथासभवंकुलाचारानुसारेणपूर्वोक्तपार्वणविधिनाकर्त्तव्यम् परंतुएतद्वर्ज्यम् ।अर्घ्यदानम्आवाहनं
द्विजाङ्गुष्ठनिवेशनं तृप्तिप्रश्नं विकिरं दिग्बंधनंदृष्टिदोषकृताऽपवित्रताशोधनार्थंकूष्मांडादिसूक्तजपंविसर्जनंचनकुर्यात्।अत्रकुतपादिका
लावश्यकताऽपि न इति। अथतीर्थनिमित्तनवदैवत्यश्राद्धप्रयोगः।तत्रतावत्कर्त्तास्वासनेप्राङ्मुखउपविश्यदर्भपवित्रादिधारणंकृत्वासव्ये
नाचम्यप्राणानायम्य।ओंअपवित्रः पवित्रोवाइति ओंपुंडरीकाक्षःपुनात्वितिपठित्वाकुशत्रयानीतजलेनश्राद्धद्रव्याणिस्वात्मानंचसिंचेत्।
ततःओंभूम्यैनमःओंभगवत्यैगयायैनमःओंभगवतेगदाधरायनमःओंअमुकतीर्थायनमःओंतीर्थदेवताभ्योनमः।इतिनत्वा। कुशत्रयतिलज

लान्यादायदेशकालौ संकीर्त्यॐअमुकगोत्रोऽमुकशर्मा ममसमस्तपितॄणांविष्णुलोकप्राप्तये अमुकतीर्थप्राप्तिनिमित्तकममुकगोत्राणामस्म
त्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्यरूपाणाम् अमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांगं
गायमुनासरस्वतीरूपिणीनां तथा अमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्नीकानां वसुरुद्रा
दित्यरूपाणां सदैवंपार्वणश्राद्धंपितृतृप्तिकामोहंकरिष्ये ॥ इतिसंकल्प्य ॥ ॐ कुरुष्वइत्यनुज्ञातोगायत्रींत्रिर्जपित्वा ॥ ॐ
देवताभ्यःपितृभ्यश्च महायोगिभ्यएवच ॥ नमः स्वाहायैस्वधायै नित्यमेवनमोनमः ॥ इतित्रिःपठेत् ॥ ततउदङ्मुखो
दक्षिणंजान्वाच्य सव्येनजलयवसमन्वितमृजुकुशत्रयमादाय॥ॐअद्यास्मत्पित्रादित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिनांविश्वेषां
देवानामिदमासनमस्तु इतिजलयवसहितं कुशत्रयरूपमासनंपूर्वाग्रमुत्सृजेत्॥१॥ ततोदक्षिणामुखःप्राचीनावीती पातितवामजानुः द्विगु
णभुग्नकुशत्रयतिलजलान्यादायॐअमुकगोत्रास्मत्पितृपितामहप्रपितामहाअमुकामुकशर्माणोवसुरुद्रादित्यरूपाः इदमासनंयुष्मभ्यंस्व
धाइत्युच्चार्य्यपितृतीर्थेनमोटकरूपंदक्षिणाग्रमुत्सृजेत ॥ १ ॥ ततः ॐ अमुकगोत्रास्मन्मातृपितामहीप्रपितामह्यःअमुकामुकदेव्योगंगाय
मुनासरस्वतीरूपिण्यः इदमासनंयुष्मभ्यंस्वधा इतिमोटकरूपासनंदद्यात् ॥ २ ॥ पुनः ॐ अमुकगोत्राऽस्मन्मातामहप्रमातामह
वृद्धप्रमातामहाअमुकामुकशर्माणः सपत्नीकाःवसुरुद्रादित्यरूपाःइदमासनंयुष्मभ्यंस्वधा इतितृतीयंमोटकरूपमासनंसर्वतःपूर्वगतमुत्सृजे
त्[द्वादशदैवत्यपक्षेमातामह्यादीनांपृथगासनदानम्]।३।ततः सव्यादिकृत्वा गंधादिकंधृत्वा कुशत्रययवजलान्यादाय।ॐअद्यास्मत्पित्रा
दित्रयमात्रादित्रयमातामहादित्रयश्राद्धसंबंधिविश्वेभ्योदेवेभ्यःएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसिवोनमः।इत्युच्चार्य्य गंधादी

न्युत्सृजेत् ॥ ततः कृतांजलिः कर्त्ता विश्वेषांदेवानामर्चनंसंपूर्णमितिब्रूयात् अस्त्वर्चनंसंपूर्णमितिद्विजाब्रूयुः ॥ ततोऽपसव्यादिना
पित्राद्यासनेषुगंधादिधृत्वा ॥ द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐ अमुकगोत्राऽस्मत्पितृपितामहप्रपितामहाअमुकामुकशर्मा
णोवसुरुद्रादित्यरूपाः एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि युष्मभ्यंस्वधा इतिपित्रादिभ्यउत्सृज्य ॥ १ ॥ ॐ अमुकगोत्रा
ऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्य एतानिगंधपुष्पधूपदीपतांबूलसिंदूरवासांसियुष्मभ्यंस्वधा इतिमात्रादिभ्यः० ॥ २ ॥
ॐअमुकगोत्राऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहाअमुकामुकशर्माणः सपत्नीकाःवसुरुद्रादित्यरूपाः एतानिगंधपुष्पधूपदीपतांबूल
यज्ञोपवीतवासांसियुष्मभ्यंस्वधा इतिमातामहेभ्यश्चगंधादीन्युत्सृजेत् ॥ ३ ॥ ततः कृताञ्जलिर्भूत्वा ॐ पितृणामर्चनंसंपूर्णमस्त्विति
पठेत् ॐ अस्त्वर्चनंसंपूर्णमितिप्रतिवचनम् ॥ ततो गौरमृत्तिकयाजलेनवाप्रत्येकंमंडलंकृत्वा भोजनपात्राणिदद्यात् ॥ अथाग्नौकर
णम् ॥ व्यंजनक्षारवर्जितं घृताक्तमुष्णमन्नं श्राद्धीयान्नाग्रभागं कांस्यपात्रेकृत्वा ॐ अग्नौकरणंकरिष्ये इतिपृष्ट्वा॥ कुरुष्व इत्यनुज्ञातोऽ
पसव्यादिनाएव सपात्रके पितृब्राह्मणहस्ते अपात्रकेताम्रपात्रादिस्थजलेवाॐअग्नयेकव्यवाहनायस्वाहा ॥ इदमग्नयेकव्यवाहनाय ॥ ॐ
सोमाय पितृमतेस्वाहा॥इदं सोमाय पितृमते॥इत्याहुतिद्वयं जुहुयात॥ततोहुतशेषमन्नंपित्रादिपात्रेषुकिंचिद्दत्त्वापिंडार्थं चावशेषयेत्॥ततः
सव्यादिना देवपात्रे अपसव्यादिनापित्रादिपात्रत्रयेषु उष्णमन्नंसघृतमनेकव्यंजनयुतं सुशीतलजलसहितं यथावत् परिविष्य मधुमयंकृत्वा
ॐमधुव्वाताऽऋतायुते इतित्र्यृचेन ॐमधुमधुमध्विति चाभिमंत्रयेत्॥ततः सव्यादिना उत्तानपाणिभ्यां देवपात्रमालभ्य ॐपृथिवीतेपात्रं

द्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा।ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाꣳसुरेस्वाहा।इतिपठित्वा
ॐअपहताऽअसुरारक्षाꣳसिवेदिषदः इतियवान् पात्रपरितोविकीर्य॥ दक्षिणकरेणकुशत्रयादीन्यादाय॥ ॐअद्यास्मत्पित्रादित्रयमात्रा
दित्रयमातामहादित्रयश्राद्धसंबंधिनोविश्वेदेवाः इदमन्नं सोपस्करं हव्यम् अमृतरूपं वः स्वाहानमः॥ इत्युदकंदेवतीर्थेनदक्षिणभागेभूमौ
क्षिपेत्॥ ततोऽपसव्यादिना।पित्रादिपात्रंन्युब्जपाणिभ्यां व्यस्ताभ्यांस्पृष्ट्वा॥ ॐ पृथिवीतेपात्रं० ॐ इदम्विष्णुर्विचक्रमे इतिजप्त्वा॥
ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः इतितिलान् अन्नपात्रपरितो विकीर्य्यवामकरेणपात्रंस्पृशन् दक्षिणकरेण द्विगुणभुग्नकुशत्रयादी
न्यादाय॥ॐअद्यामुकगोत्राऽस्मत्पितृपितामहप्रपितामहाअमुकामुकशर्माणोवसुरुद्रादित्यरूपाः इदमन्नंसोपस्करं कव्यम् अमृतरूपंयुष्म
भ्यं स्वधा॥इत्युदकंपितृतीर्थेन वामभागेभूमौक्षिपेत्॥ततोमात्रादिपात्रमालभ्यपूर्ववज्जप्त्वाॐ अमुकगोत्राऽस्मन्मातृपितामहीप्रपितामह्यो
मुकामुकदेव्यःइदमन्नं सोपस्करं कव्यम्अमृतरूपंयुष्मभ्यंस्वधा इत्युत्सृजेत्॥एवं मातामहादिपात्रमपिस्पृष्ट्वापूर्ववज्जप्त्वाॐअद्यामुकगो
त्राऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहाअमुकामुकशर्माणःसपत्नीकाःवसुरुद्रादित्यरूपाःइदमन्नंसोपस्करंकव्यम्अमृतरूपंयुष्मभ्यं
स्वधा इत्युत्सृजेत्॥ततःॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥ तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य प्रणवव्याहृतित्रयपूर्वांगायत्रींत्रिः
सकृद्वा जपेत्॥ततःॐमधुवाताऽऋतायतेमधुक्षरन्ति सिन्धवः माध्वीर्नःसन्त्वोषधीः॥१॥मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः मधुद्यौर

स्तुनः पिता ॥२॥ मधुमान्नोवनस्पतिर्मधुमाँऽअस्तुसूर्यः माध्वीर्गावोभवन्तुनः ॥३॥ इतित्र्यृचम्॥ ॐमधुमधुमध्विवितिचपठेत्॥ ततःसव्ये
न॥ ॐकृणुष्वपाजःप्रसितिन्नपृथ्वीमित्यादिपंचऋचः पठित्वा ॐ उदीरतामवर इत्यादिपितृमंत्रान् पुरुषसूक्तमप्रतिरथं रुचिस्तवादिकं
चयथाशक्तिपठेत्॥ ततः उच्छिष्टसन्निधौअपसव्यादिनाचतुरस्रंदक्षिणप्लवंहस्तमात्रंचतुरङ्गुलोच्चंरमणीयंपित्रादित्रयपिंडपातनार्थंस्था
नं निर्माय तत्प्राङ्मात्रादित्रयमातामहादित्रयपिंडपातनार्थं तादृशमेवस्थानद्वयंकुर्यात् ॥ ततः सर्वत्र अनन्तर्गर्भसाग्रपत्रद्वय
रूपदर्भपिंजुलीमूलेन ॐ अपहता इतिमंत्रेण दक्षिणाग्रां रेखांसकृत्सकृदुल्लिख्यदर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्य ॥ ॐ येरूपाणिप्र
तिमुंचमानाऽअसुराःसन्तःस्वधयाचरन्ति॥ परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ इतिमंत्रेणउल्मुकंप्रत्येकंरेखोपरिभ्रामयित्वा
दक्षिणतोनिदध्यात्॥ ततः उपमूलसकृदाच्छिन्नंदक्षिणाग्रकुशत्रयंरेखोपरिस्तीर्त्वानवसुपात्रेषु जलतिलगंधपुष्पाणिक्षिप्त्वा एकंपात्रंगृहीत्वा
ॐ अमुकगोत्र अस्मत्पितरमुकशर्मन् अत्रावनेनिक्ष्वतेस्वधाइतिकुशमूले पितृतीर्थेन अवनेजनंदद्यात् ॥ एवंपितामहाय कुशत्रयमध्ये
प्रपितामहाय कुशाग्रे अवनेजनंसावशेषंदद्यात्॥ एवमेव मात्रादिभ्योमातामहेभ्यश्चदद्यात्॥ ततःसर्वस्मात्पायसादिश्राद्धशेषान्नात्किंचि
त्किंचिदन्नमुद्धृत्यरजतादिपात्रेकृत्वाहुतशेषा नं मध्वाज्यतिलव्यंजनादिनासंयोज्य॥ अथवा चरुणा सक्तुना वा पिण्याकगुडतंडुलय
वगाधूमपिष्टकानामन्यतमेनवा नवपिडान् बिल्वोपमान्निर्माय मधुघृताभ्यामवघार्य्य पित्रादिभ्योदद्यात्॥ तत्रप्रथमंपिंडंमोटकादिचादा
यॐअमुकगोत्रअस्मत्पितरमुकशर्मन् वसुरूप एतत्ते पिंडंस्वधा इतिप्रथमाऽवनेजनस्थाने सव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेन दद्या

॥१३६॥

त्॥एवंपितामहाय प्रपितामहायचदद्यात् ॥ ततः ॐ अमुकगोत्रेऽस्मन्मातरमुकदेवि एतत्ते पिंडंस्वधा ॥ इतिद्वितीयवेदिकायां प्रथमाऽवने
जनस्थानेमात्रे पिंडंदत्त्वा पितामह्यैप्रपितामह्यै चदद्यात् ॥ पुनः ॐ अमुकगोत्र अस्मन्मातामहामुकशर्मन् वसुरूप एतत्तेपिंडंस्वधा इति
तृतीयवेदिकायांमातामहायपिंडंदत्त्वा प्रमातामहायवृद्धप्रमातामहायचदद्यात् ॥ ततः सर्वत्रपिंडाधारकुशमूले ॐ लेपभागभुजः पितर
स्तृप्यन्तु इतिपठित्वा हस्तंप्रोञ्छ्यजलेनहस्तौप्रक्षालयेत् ॥ ततः सव्येनत्रिराचम्य विष्णुंस्मृत्वा अपसव्यादिना ॐ अत्रपितरोमादय
ध्वंयथाभागमावृषायध्वम् ॥ इतिपित्राद्युद्देशंपठित्वावामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाः॥मनाक्श्वासं नियम्य तेनैवयथापरावृत्यॐअमी
मदतपितरोंयथाभागमावृषायिषत इतिजपेत्॥एवंमात्राद्युद्देशेन ॐ अत्रमातरोमादयध्वंयथाभागमावृषायध्वं इतिपठित्वाश्वासंनियम्यपू
र्ववत् ॥ ॐ अमीमदंतमातरोंयथाभागमावृषायिषत इतिजपित्वाएवमेव ॥ ॐ अत्रमातामहादयो मादयध्वं यथाभागमावृषायध्वमिति
ॐ अमीमदंतमातामहाः यथाभागमावृषायिषत इतिजपेत् ॥ ततः पूर्वदत्तावनेजनपात्रस्थजलेन ॐ अमुकगोत्र अस्मत्पितरमुक
शर्मन् वसुरूप अत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिप्रथमपिंडोपरिप्रत्यवनेजनंदत्त्वा एवमेव पितामहायप्रपितामहायचदद्यात् ॥ ततः ॐ
अमुकगोत्रेऽस्मन्मातरमुकदेवि अत्रप्रत्यवनेनिक्ष्वतेस्वधाइतिमातृपिंडोपरि प्रत्यवनेजनंदत्त्वा पितामह्यादिपंचपिंडोपरि क्रमेणप्र
त्येकं दद्यात् ॥ ततो नीवींविस्रंस्य सव्येनाचम्य अपसव्यं कृत्वा॥ॐ नमोवःपितरो रसायनमोवःपितरःशोषायनमोवःपितरोजीवाय
नमोवःपितरःस्वधायै नमोवः पितरो घोरायनमोवः पितरोमन्यवेनमोवः पितरःपितरो नमोवोगृहान्नः पितरोदत्तसतोवः पितरो

देष्मइतिकृतांजलिः पठित्वा ॐ नमोवोमातरोरसाय इत्यादिमंत्रोहेन मात्रादीर्मातामहादीश्चप्रणमेत् ॥ ततः ॐ एतद्व ÷ पितरो
वासः ॥ ॐएतद्वोमातरोवासः ॥ ॐ एतद्वोमातामहादयो वासः ॥ इतिपठित्वा नवसुपिंडेषुसूत्राणिदद्यात् ॥ ॐ अमुकगोत्र
अस्मत्पितरमुकशर्मन् वसुरूप एतत्तेवासः स्वधा ॥ इतिसूत्रमुत्सृजेत् ॥ एवमेव पितामहादिपिंडेषु तत्तन्नाम्नोत्सृजेत् ॥ ततः पितृनु
द्दिश्य तदीयपिंडेषु तूष्णीं गंधपुष्पतुलसीधूपदीपतांबूलपूगीफलदक्षिणादीनिदद्यात् ॥ पिंडशेषान्नंपिंडसमीपे विकिरेत् ॥ ततः
सव्याऽपसव्याभ्यां देवपितृभोजनपात्रेषु ॐ शिवाआपः संतु इतिजलम् ॐ सौमनस्यमस्तु इतिपुष्पाणि ॐ अक्षतंचारिष्टंचास्तु इति
यवांश्चदद्यात् नतंडुलान् ॐ अमुकगोत्रस्यास्मत्पितुरमुकशर्मणोवसुरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्तु इतिसतिलमक्षय्योदकंपि
त्रेदत्त्वा एवंपितामहाय प्रपितामहायचदद्यात् ततः ॐ अमुकगोत्रायाअस्मन्मातुरमुकदेव्या दत्तैतदन्नपानादिकमक्षय्यमस्तु इतिमात्रे
दत्त्वापितामह्यादीनांमातामहादीनांचप्रत्येकमक्षय्योदकंदद्यात्।ततःसव्यंकृत्वाप्राङ्मुखस्तन्मनाःकृतांजलिर्दक्षिणांदिशंपश्यन् ॐ अघोराः
पितरःसंतु ॐ अघोरामातरःसंतु ॐ अघोरामातामहादयश्चसंतु इतिवदेत्॥ततः ॐ गोत्रंनोवर्द्धताम् दातारोनोऽभिवर्द्धताम् वेदाःसंततिरेवच।
श्रद्धाचनोमाव्यगमत बहुदेयंचनोऽस्तु अन्नंचनोबहुभवेत् अतिथींश्चलभेमहि॥याचितारश्चनःसन्तु माचयाचिष्मकंचन॥एवाःसत्या आशि
षःसन्तु इति प्रार्थयेत्॥ततोऽपसव्यंकृत्वा पिंडोपरिसपवित्रान्कुशानास्तीर्य स्वधांवाचयिष्ये इतिब्रूयात् ॐ पितृभ्यः पितामहेभ्यःप्रपिता
महेभ्यो मातृभ्यः पितामहीभ्यः प्रपितामहीभ्यो मातामहेभ्यःसपत्नीकेभ्यः प्रमातामहेभ्यःसपत्नीकेभ्योवृद्धप्रमातामहेभ्यःसपत्नीकेभ्यश्च

स्वधोच्यतामितिपठेत् ॥ ततः ॐ ऊर्जंवहन्तीरमृतं घृतंपयः कीलालंपरिस्रुतम् ॥ स्वधास्थतर्पयतमे पतॄन् इतिसपवित्रकुशोपरि
दक्षिणाग्रांजलधारांदद्यात्॥मात्रादिपिंडेषु स्वधास्थतर्पयतमेमातॄःस्विधास्थतर्पयत मे मातामहादीन् इतिमंत्रोहेनदद्यात् ॥ ततोदक्षिणा
दानम् ॥ तत्र उदङ्मुखः सव्येन हिरण्यदक्षिणामादाय ॐ अद्यास्मत्पित्रादित्रयमात्रादित्रयश्राद्धसंबंधिनां विश्वेषांदेवानांकृतै
तत्तीर्थप्राप्तिनिमित्तकपार्वणश्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेनदातुमहमुत्सृजे इति देवे
भ्योदद्यात्॥ततोऽपसव्यादिनारजतद्रव्यंगृहीत्वा॥ॐअद्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणां वसुरुद्रादित्य
रूपाणां कृतैतत्तीर्थप्राप्तिनिमित्तकपार्वण श्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणाय दक्षिणात्वेनदातुमहमुत्सृजे ।
इति पित्रादिभ्योरजतदक्षिणांदत्त्वा ॥ ॐअमुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनां गंगायमुनासरस्वतीरूपिणीनां कृतैतत्तीर्थप्रा
प्तिनिमित्तकपार्वणश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवत्यममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इतिमात्रादिभ्यः । ॐअ
मुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानां वसुरुद्रादित्यरूपाणां कृतैतत्तीर्थप्राप्तिनिमित्तकपार्वणश्राद्धप्रतिष्ठार्थम्
इदंरजतंचंद्रदैवत्यममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इतिमातामहादिभ्यश्चदक्षिणांदद्यात् ॥ दैवेरजतनिषेधः॥
ततः पिंडानुत्थाप्यस्थाल्यांनिधाय अवघ्राणंकृत्वा सकृदाच्छिन्नकुशानुल्मुकंचवह्नौक्षिपेत्॥ततः ॐदेवताभ्यः पितृभ्यश्च इतित्रिर्जपि
त्वादीपान्निर्वाप्य सव्येनहस्तौपादौप्रक्षाल्य आचम्य ॐ प्रमादात्कुर्वतांकर्म्म प्रच्यवेताध्वरेषुयत्।स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रु
तिः । इतिपठित्वा कर्म्मपूर्तिकामो विष्णुंस्मरेत् ॥ ततः पिंडान् तीर्थजलेदक्षिणाभिमुखः क्षिप्त्वा उच्छिष्टमार्जनादिकंकुर्यात् ततोवैश्वदेव

बलिकर्मणीकृत्वा यथाशक्तितीर्थब्राह्मणान्भोजयित्वातेभ्योदक्षिणांदत्त्वा ॐ अमुकतीर्थप्राप्तिनिमित्तंपार्वणश्राद्धंपरिपूर्णमस्तु इति तान् प्रार्थ्य ॥ अस्तुपरिपूर्णमित्यनुज्ञातः स्वयंभोजनंकुर्यात् ॥ द्वादशदैवत्यश्राद्धकरणेतुमातामह्यादिपक्षः पृथक्कार्यः ॥ अन्यत्सर्वंसमानम् ॥ एवमेव पितृव्यादीनामेकोद्दिष्टविधिनाकुर्यात् ॥ पार्वणाद्यसंभवे सर्वेषांपिंडदानमात्रमपितीर्थश्राद्धंकर्त्तव्यम् ॥ इतिश्राद्धप्रकाशेतीर्थनिमित्तकनवदैवत्यपार्वणश्राद्धपद्धतिः समाप्ता॥छ॥ अथपिंडमात्रतीर्थश्राद्धपद्धतिः ॥ तत्रतावत्स्वासनेप्राङ्मुखउपविश्य दर्भपवित्रधारणं कृत्वा सव्येन आचम्य प्राणानायम्य पुडरीकाक्षस्मरणं द्रव्यप्रोक्षणंचकुर्यात् ॥ ततः ॐभूम्यैनमः ॥ ॐ तीर्थदेवताभ्योनमः॥ॐभगवत्यैगयायैनमः। ॐ भगवतेगदाधरायनमः ॥ इति नमस्कारः ॥ ततोदेशकालौ संकीर्त्य ॐ अद्यममसमस्तपितृणामसद्गतीनांसद्गतिप्राप्तये सद्गतीनांचविष्णुलोकावाप्तये अमुकतीर्थप्राप्तिनिमित्तकं पिंडदानमात्रश्राद्धमहंकरिष्ये ॥ इतिसंकल्प्य ॥ गायत्रींत्रिर्जपित्वा ॐ देवताभ्य इति त्रिः पठेत् ॥ ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवामजानुः स्वपुरतः पिंडदानार्थं चतुरस्त्रं दक्षिणाप्लवंहस्तमात्रं चतुरङ्गुलोच्छ्रितंस्थानं निर्माय ॥ तन्मध्येदर्भपिंजूलीमूलेन ॐ अपहताऽअसुरारक्षा७ंसिवेदिषद इति रेखाकरणम् ॐ येरूपाणि प्रतिमुंचमानाऽअसुराःसन्तः स्वधयाचरन्ति। परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्मादिति मंत्रेण उल्मुकंभ्रामयित्वाउपमूल सकृदाच्छिन्नदक्षिणाग्रकुशास्तरणंकुर्यात् ॥ ततः पत्रपुटकेषु जलतिलगंधपुष्पाणिक्षिप्त्वा एकंपुटकंगृहीत्वा ॐअद्यामुकगोत्र अस्मत्पितरमुकशर्मन्वसुरूप अत्रावनेनिक्ष्वतेस्वधा इतिकुशमूलेपितृतीर्थेनपित्रे अवनेजनंदद्यात् ॥ १ ॥ पुनः द्वितीयपुटकंगृहीत्वा ॐ अमुकगोत्र अस्मत्पितामहामुकशर्मन्रुद्ररूपअत्रावनेनिक्ष्वतेस्वधा इतिकुशमध्येपितामहायदद्यात् ॥ २ ॥ पुनः ॐ अमुकगोत्र अस्मत्प्र

पितामहामुकशर्मन् आदित्यरूप अत्रावनेनिक्ष्वतेस्वधाइतिकुशाग्रेप्रपितामहायदद्यात्।३।एवं द्वितीयादिकुशेषुमातृपितामहीप्रपितामही
मातामहप्रमातामहवृद्धप्रमातामहमातामहीप्रमातामहीवृद्धप्रमातामहीभ्योपिदद्यात्॥एवमेव स्वपत्नी–पितृव्य–तत्पत्नी–भ्रातृ–भ्रातृपत्नी
पितृष्वसृ–तद्भर्तृ–मातुल–मातुलानी–मातृष्वसृ–तत्पति श्वशुर–श्वश्रा·ऽऽचार्या·ऽऽचार्योन्युपाध्याय-पुत्र–स्नुषा–पुत्री–जामातृ-भ
गिनी–भाम–भागिनेय–पौत्र–दौहित्र–शिष्य–श्यालक–मित्र-तत्पत्नीप्रभृतीनांपृथक्पृथक्कुशेष्ववनेजनंदद्यात्॥ततः पायसेनचरुणावा
सक्तुना तंडुलैस्तंडुलपिष्टकेनवा यवगोधूमचूर्णगुड तिलफलमूलपिण्याकानामन्यतमेनवा तिलघृतमधुदधिशर्करामिश्रितेन आर्द्रामलक
मात्रान्पिंडान्कृत्वाक्रमेणदर्भेषुतत्तदवनेजनस्थानेदद्यात् ॥ तत्रएकंपिंडंवामहस्तेकृत्वा दक्षिणहस्तेनद्विगुणभुग्नकुशत्रयादीन्यादाय ॐ
अमुकगोत्र अस्मत्पितरमुकशर्मन्वसुरूप एतत्तेपिंडंस्वधानमः इति प्रथमकुशमूले पितृतीर्थेनपित्रेदद्यात् १ पुनः पिंडं कुशादीं
श्चादाय ॐ अमुकगोत्रास्मत्पितामहामुकशर्मन्रुद्ररूपएतत्तेपिंडंस्वधानमः इतिकुशमध्येपितामहायदद्यात् २ पुनः ॐ अमुकगोत्र
अस्मत्प्रपितामहामुकशर्मन्नादित्यरूपएतत्तेपिंडंस्वधानमः इतिकुशाग्रेप्रपितामहायदद्यात् ३ एवंद्वितीयादिकुशेषुक्रमेण ॐ अमुक
गोत्रेऽस्मन्मातरमुकदेविगंगारूपे एतत्तेपिंडंस्वधानमः इतिदद्यात् ४ एवंसापत्नमात्रेऽपिदद्यात्॥ॐ अमुकगोत्रेऽस्मत्पितामहि अमुकदेवि
यमुनारूपे एतत्ते पिंडंस्वधानमः ५ ॐ अमुकगोत्रेऽस्मत्प्रपितामहि अमुकदेविसरस्वतीरूपे एतत्ते पिंडंस्वधानमः ६ ॐ अमुकगोत्र
अस्मन्मातामहामुकशर्मन्वसुरूप एतत्ते पिंडंस्वधानमः ७ ओं अमुकगोत्रअस्मत्प्रमातामहामुकशर्मन्रुद्ररूपएतत्तेपिंडंस्वधानमः ८
ओं अमुकगोत्रास्मद्वृद्धप्रमातामहामुकशर्मन् आदित्यरूपएतत्तेपिंडंस्वधानमः ९ ओं अमुकगोत्रेऽस्मन्मातामहि अमुकदेवि एतत्तेपिंड

स्वधानमः १० ॐ अमुकगोत्रेऽस्मत्प्रमातामहि अमुकदेविएतत्तेपिंडंस्वधानमः ११ ॐ अमुकगोत्रेऽस्मद्वृद्धप्रमातामहि अमुकदेवि एतत्तेपिंडंस्वधानमः १२ ॐ अमुकगोत्रेऽस्मत्पत्निअमुकदेविश्रीरूपिणिएतत्ते पिंडंस्वधानमः १३ ॐ अमुक० पितृव्यामुकशर्मन् एतत्ते० १४ ॐ अमुकगोत्रेऽस्मत्पितृव्यपत्नि० एतत्ते० १५ ॐ अमुक० भ्रातरमुकशर्मन् एतत्ते० १६ ॐ अमुकगोत्रे० भ्रातुः पत्नि अमुकदेविएतत्ते० १७ ॐ अमुकगोत्रेऽस्मत्पितृष्वसरमुकदेविएतत्ते० १८ ॐ अमुक० पितृष्वसुर्भर्तरमुकशर्मन् एतत्ते० १९ ॐ अमुकगोत्र अस्मन्मातुलामुकशर्मन्एतत्ते० २० ॐ अमुकगोत्रेऽस्मन्मातुलानि०एतत्ते० २१ ॐ अमुकगोत्रेऽस्मन्मातृष्वसरमुकदेवि एतत्ते०२२ ॐ अमुक० मातुः स्वसुर्भर्तरमुकशर्मन् एतत्ते० २३ ॐ अमुकगोत्र अस्मच्छ्वशुर अमुकशर्मन् वसुरूप एतत्ते० २४ ॐ अमुकगोत्रेऽस्मच्छ्वश्रोऽमुकदेविएतत्ते० २५ ॐ अमुक० आचार्यामुकशर्मन् वसुरूपएतत्ते० २६ ॐ अमुकगोत्रे आचार्यानि अमुकदेवि एतत्ते० २७ अमुक० उपाध्यायगुरोऽमुकशर्मन् वसुरूप एतत्ते० २८ ॐ अमुक० पुत्रामुकशर्मन् एतत्ते० २९ ॐ अमुकगोत्रेऽस्मत्स्नुषेऽमुकदेविएतत्ते पिंडंस्वधा० ३० ओं अमुकगोत्रेऽस्मत्पुत्रि अमुकदेविएतत्ते० ३१ ओं अमुक० जामातरमुकशर्मन् एतत्ते० ३२ अमुकगोत्रेऽस्मद्भगिनिअमुकदेविएतत्ते० ३३ ओं अमुक० भाम अमुकशर्मन् एतत्ते० ३४ ओं अमुक० भागिनेयामुकशर्मन् एतत्ते०३५ ओंअमुकगोत्रास्मत्पौत्रामुकशर्मन् एतत्ते० ३६ ओं अमुक० दौहित्र अमुकशर्मन् एतत्ते०३७ ॐअमुकगोत्र शिष्यामुकशर्मन् एतत्ते० ३८ ओं अमुक० श्यालकअमुकशर्मन्नेतत्ते० ३९ ओं अमुकगोत्रास्मन्मित्रामुकशर्मन्नेतत्तेपिंडंस्वधा ४० एवंमित्रपत्नीप्रभृतीनांमृतानामपिपिंडान्दद्यात् ॥ ततः पिंडाधारकुशमूले ओंलेपभागभुजस्तृप्यन्तु इतिहस्तंप्रोञ्छ्यजलेनहस्तौप्रक्षा

लयेत् ॥ ततः सव्येन आचमनंविष्णुस्मरणंचकृत्वाअपसव्यादिना ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वम् इतिपठित्वा वामा
वर्तेनोदङ्मुखोभूत्वाप्रीतमनाः मनाक्श्वासंनियम्य तेनैवयथापरावृत्य ॐ अमीमदन्तपितरोयथाभागमावृषायिषतइतिजपेत् ॥ एवंमा
त्रादिपक्षेषुज्ञेयम् ततःप्रत्यवनेजनम् ॐ अमुकगोत्रअस्मत्पितरमुकशर्मन् अत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिप्रथमपिंडोपरिप्रत्यवनेजनंदत्त्वा
एवमेवपितामहादिपिंडेषुप्रत्यवनेजनंक्रमेणपूर्ववद्दद्यात् ।ततोनीवीविस्रंसनम् ।ओंनमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपितरोजी
वायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरोमन्यवेनमोवःपितरःपितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मइति
कृतांजलिः प्रार्थयेत् ॥ ततः ओंएतद्वः पितरोवासः ॥ ओंएतद्वोमातरोवासः ॥ ओंएतद्वोमातामहादयोवासः ॥ ओंएतद्वोमातामह्यादयो
वासः ॥ ओंएतद्वःपितृव्यादयोवासः ॥ इतिप्रतिपिंडसूत्रदानंकृत्वा ततः पिंडान् गंधपुष्पतुलसीधूपदीपतांबूलपूगीफलदक्षिणाभिःसंपू
ज्य॥ओंउर्जंवहन्तीरमृतंघृतंपयः कीलालंपरिस्रुतम् ॥ स्वधास्त्थतर्पयतमेपितॄन् ॥ इतिपिंडेष्वपोनिषिच्यदक्षिणांदद्यात् ॥ तत्रदक्षिणा
द्रव्यंमोटकादीनिचादायॐअद्यामुकगोत्राणांममसमस्तपितॄणामसद्गतीनांस्वर्गतयेसद्गतीनांचविष्णुलोकप्राप्तयेअमुकतीर्थप्राप्तिनिमित्तक
पित्रादीनां पितृव्यादीनांचकृतैतच्छ्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवत्यममुकगोत्राय अमुकशर्मणे ब्राह्मणाय दक्षिणात्वेन दातुमहमुत्सृजे
इतिसंकल्प्ययथाशक्तिरजतद्रव्यंब्राह्मणायदद्यात्॥ततःपिंडोद्धरणम् अवघ्राणंचकृत्वादक्षिणामुखःपिंडान्तीर्थजलएवनिक्षिपेत्॥ ततोदेश
कालौसंकीर्त्य ॐ अमुकगोत्रोऽमुकशर्माहमद्यकृतैतदमुकतीर्थनिमित्तकास्मत्समस्तपित्रादीनांपितृव्यादीनांचश्राद्धकर्मणःसाङ्गतासिद्ध्यर्थं

मसुकसंख्याकान्ब्राह्मणान्भोजयिष्ये॥इतिसंकल्प्ययथाशक्तितीर्थब्राह्मणान्भोजयेत्॥ततस्तेभ्योदक्षिणांदत्त्वाप्रणम्य ॐ अमुकतीर्थप्रा
प्तिनिमित्तंपिंडदानंपरिपूर्णमस्तुइतिप्रार्थ्य॥ॐअस्तुपरिपूर्णमित्यनुज्ञातः॥ॐदेवताभ्यइतित्रिर्जपित्वा ॥ यस्यस्मृत्याचनामोक्त्या तपो
यज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयाति सद्योवंदेतमच्युतमिति कर्मपूर्त्तिकामोविष्णुंस्मरेत् ॥ इतिपिंडमात्रतीर्थश्राद्धपद्धतिः ॥ ॥ छ ॥
॥अथगयाश्राद्धपद्धतिः॥तत्रवावत्गयायात्राप्रयोगः॥ यात्रादिनात्प्राक् तृतीयदिनेएकभक्तहविष्यभोजनब्रह्मचर्यादिनियमंविधाय तदु
त्तरदिनेप्रातः कृतस्नानादिनित्यक्रियः ॥ देशकालौसंकीर्त्य अद्यकरिष्यमाणगयायात्राङ्गतयोपवासंकरिष्ये इतिसंकल्प्य उपवासंच
कृत्वा तत्परदिनेचंद्रताराऽनुकूलेश्राद्धनिषिद्धव्यतिरिक्तेकाले स्नानादिनित्यकर्म्मसमाप्यपूजोपकरणंसंपाद्य आसनेप्राङ्मुखउपविश्य
आचम्य प्राणानायम्य देशकालौस्मृत्वा ॐअद्यकरिष्यमाणगयायात्रानिर्विघ्नपरिसमाप्त्यर्थं गणेशनवग्रहेष्टदेवतानांयथाशक्तिपूजन
महंकरिष्ये इतिसंकल्प्य ॐ सुमुखश्चैकदंतश्च इत्यादियथाविधिना गणेशनवग्रहान्स्वेष्टदेवतांचपूजयेत् ॥ ततः कुशत्रययवज
लान्यादाय देशकालौसंकीर्त्य ॐ अद्यममसमस्तपितॄणांनिष्कृतिकामोगयातीर्थयात्राङ्गभूतम्आभ्युदयिकंश्राद्धंकरिष्ये इति संकल्प्य
प्रभूतघृतान्नेनमातृपूजापूर्वकमाभ्युदयिकं नवदैवत्यंश्राद्धंविधायब्राह्मणान्हिरण्यादिभिः संतोष्य यात्रासंकल्पंकुर्यात् ॥ तद्यथा अद्ये
त्यादिदेशकालौस्मृत्वाममसमस्तपितॄणां सप्तसुगोत्रेषुचैकोत्तरशतपुरुषाणांदशपूर्व्वदशाऽपरस्ववंश्यानांचपदेपदेस्वर्गारोहणसिद्धयेनर
कोद्धारपूर्वकशाश्वतब्रह्मभावप्राप्तयेचगयाश्राद्धाधिकरणाय गयायात्रामहंकरिष्ये ॥ इतिसङ्कल्प्य ॥ काषायादिवस्त्रपरिधानरूपंकार्प
टीवेषंविधायश्राद्धशेषंसघृतमन्नमादायज्योतिषोक्तयात्रासमयेग्रामान्निर्गत्यग्रामं प्रदक्षिणीकृत्यक्रोशाभ्यन्तरस्थं ग्रामांतरमासाद्यश्राद्ध

शेषघृतान्नेनपारणंकुर्यात् ॥ ततोद्वितीयदिने तमपि ग्रामं प्रदक्षिणीकृत्य प्रातः स्नानसंध्यादिनित्यकर्म्मसमाप्य प्रतिग्रहनिवृत्त्यादि नियमवान् तीर्थाभिमुखमामध्याह्नंगच्छेत् ॥ ततोमध्याह्नसमयेनद्यादिकमवगाह्यमाध्याह्निकसंध्यादिकं विधायपाकानुष्ठानपूर्व्वकंपं चमहायज्ञभोजनादिकंकृत्वासायंसंध्यामुपास्य तत्रैवतिष्ठेत् ॥ ततस्तृतीयदिनेऽपितथैवसर्व्वंकुर्यात् ॥ एवंप्रतिदिनमातीर्थप्राप्ति गच्छेत्मार्गेयदिप्रयागोवाराणसीपुनःपुनःशोणोवाप्राप्यतेतदातत्रस्नानतर्पणेविधायपूर्वोक्ततीर्थश्राद्धवत्नवदैवत्यंश्राद्धंकुर्यात्।अथगया प्राप्तिदिनकृत्यम् ॥ यदियानारूढः सोपानत्कोवागच्छेत् तदागयाप्राप्तिदिनेपादचरेण यावद्गंतुंशक्यते तावतःस्थानात् यानोपानहौपरि त्यज्यगच्छेत्॥तीर्थेदृष्टिगोचरतांगते साष्टाङ्गंप्रणम्य शिरोऽवगुंठनशस्त्रमाल्यकंचुकादिकंपरित्यज्यतीर्थं गच्छेत्॥तत्रतावत् गयापूर्वतः फल्गुतीर्थेसंप्राप्ते उद्धृतोदकेनतीर्थदूरे पाणीपादौप्रक्षाल्याचम्य ॐ गयातीर्थायनमः॥इतिगंधपुष्पादिभिरभ्यर्च्य तत्रजलान्ततः पंचवा लुकापिंडान्बहिर्निष्कास्यतीर्थजलंप्रणवेनालोडचसचैलस्नानंकुर्यात्॥ ततोजलाद्बहिरागत्यपवित्रेकुशांश्चधृत्वा आचम्य नारिकेलंससु वर्णंगृहीत्वा ॐदेवदेवजगन्नाथ शङ्खचक्रगदाधर॥ देहिविष्णो अनुज्ञांमे तवतीर्थावगाहने॥१॥फल्गुतीर्थनमस्तुभ्यं सर्वतीर्थोत्तमोत्तम॥ गृहाणेदंनारिकेलं सुवर्णेनसमन्वितम् ॥ २ ॥ इतितीर्थंनत्वासंस्पृश्य ब्राह्मणहस्तेदद्यात् ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौ संकीर्त्य अद्यसमस्तपितॄणां विष्णुलोकावाप्तये आत्मनश्चभुक्तिमुक्तिप्राप्तयेफल्गुतीर्थेस्नानमहंकरिष्ये ॥ इतिसंकल्प्य ॥ ॐ फल्गुतीर्थे विष्णुजले करोमिस्नानमादृतः ॥ पितॄणांविष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये॥१॥ इति पठित्वा यथाविधि स्नात्वा धौते वाससीपरिधाय चंदनादिनातिलकंकृत्वा संध्यांकुर्यात् ॥ ततोदेशकालौस्मृत्वा ॐ अद्यसमस्तपितॄणामसद्गतीनांसद्गतिप्राप्तये सद्गतीनांचशाश्वतब्रह्मलो

कादिप्राप्तयेगयातीर्थप्राप्तिनिमित्तं नित्यंचदेवऋषिपितृतर्पणं तंत्रेणाहंकरिष्ये इतिवाक्यंकृत्वा॥पूर्वोक्तंकातीयतर्पणंकृत्वा स्नानवस्त्रंजला द्वहिःस्थलेनिष्पीड्य आचम्य ब्रह्मादीन्प्रणमेत्॥ततःश्रीमहाविष्णुंषोडशोपचारैः संपूज्य तत्रैव गयाप्राप्तिनिमित्तकंपूर्वोक्ततीर्थश्राद्धवत् द्वादशदैवत्यंनवदैवत्यंवापार्वणं तदसंभवेपिंडदानमात्रंवापूर्वोक्तरीत्यैव अर्घावाहनादिरहितं कुर्यात्॥इतिगयाप्राप्तिदिनकृत्यम्॥ ॥ अथ द्वितीयदिनकृत्यम्॥ तत्रादौफल्गुतीर्थेप्रातः स्नानादिकृत्वा गयावायव्यदिशिस्थितंप्रेतपर्व्वतं गत्वातन्मूलसंलग्ने ईशानकोणस्थिते ब्रह्मकुंडे ॐ पितॄणांसंभावितप्रेतत्वनाशपूर्व्वकशाश्वतब्रह्मलोकप्राप्तये स्नानमहंकरिष्ये इतिसंकल्प्य स्नानतर्पणेविधाय पूर्वोक्ततीर्थश्राद्धं नवदैवत्यं पिंडमात्रंवाकार्य्यम्॥ ततःश्राद्धार्थंजलादिकमादाय प्रेतपर्वतमवरुह्यसुवर्णरेखाङ्कितशिलासन्निधौगत्वापादशौचादिविधाय उपविश्य तत्रशिलायां पंचगव्यैः श्राद्धपर्य्याप्तस्थानं शोधयेत्॥ततः आचम्य अपसव्यंकृत्वा दक्षिणामुखोभूत्वा पितॄन्ध्यायन् ॐ कव्यवाडनलः सोमो यमश्चैवार्य्यमातथा॥अग्निष्वात्ताबर्हिषदः सोमपाः पितृदेवताः॥आगच्छंतुमहाभागा युष्माभीरक्षितास्त्विह॥मदीयाःपितरोयेच कुलेजाताः सनाभयः॥तेषांपिंडप्रदानाय आगतोऽस्मिगयामिमाम्॥तेसर्व्वेतृप्तिमायान्तु श्राद्धेनानेनशाश्वतीम्॥इति पठित्वा॥देशकालौ संकीर्त्य ॐअद्यपित्रादीनांपुनरावृत्तिरहितब्रह्मलोकप्राप्तिकामः प्रेतपर्वतश्राद्धमहंकरिष्ये ॥ इति संकल्प्यपूर्वोक्तंपार्वणं पिंडदानमात्रंवा कुर्यात्॥ एवंपार्वणंविधाय तद्वेदीदक्षिणतःकुशानास्तीर्य ॐ कव्यवाडनलः सोम इत्यादि श्राद्धेनानेनशाश्वतीमित्यंतंप्रार्थ्य॥ॐपित्रादिभ्योनम इति पंचोपचारैः संपूज्य॥ ॐआब्रह्मस्तंबपर्य्यंतं देवर्षिपितृमानवाः॥तृप्यंतुपितरःसर्व्वे मातृमातामहादयः॥१॥अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्॥२॥ इतिद्वाभ्यां कुशेषुतिलोदकंदत्त्वा ॐ पितापितामहश्चैव ॥१४०॥

१अत्र यद्यपि मैथिलवाचस्पतिना प्रेतशिला (रामशिला) श्राद्धमुक्तं तथापि मूलभूतवायुपुराणोक्तक्रमोऽस्माभिरंगीकृत एवमेवचन्द्रशेखरतारानाथैरपिस्वकृतगयाश्राद्धपद्धतैर्युक्तम्।

तथैवप्रपितामहः॥माता पितामहीचैव तथैवप्रपितामही॥मातामहस्तत्पिताच प्रमातामहकादयः॥तेषांपिंडोमयादत्तो ह्यक्षय्यमुपतिष्ठतु॥ इत्युच्चार्य्य तिलघृतदधिमधुयुतमुष्टिमितसक्तुकृतंपिंडं मिलितेभ्योद्वादशभ्योदद्यात् ॥ ततः प्रेतत्वविमुक्तिकामनयायथास्मृतिबंधुवर्गादी नां पिंडदानंकुर्यात् ॥ ॥ अथषोडशीकर्म ॥ तद्यथा ॥ ऊनविंशतिदास्यमानपिंडस्थानानि निर्मायतेषुपंचगव्यं लिख्वाप्रत्येकं दक्षिणाग्रं कुशत्रयंदद्यात् ॥ ततः ॐ अस्मत्कुलेमृतायेच गतिर्येषांनविद्यते ॥ आवाहयिष्येतान्सर्व्वान्दर्भपृष्ठेतिलोदकैः॥ १ ॥ मातामहकुलेयेच गतिर्येषांनविद्यते ॥ आवाहयिष्येतान्सर्व्वान्दर्भपृष्ठेतिलोदकैः ॥ २ ॥ बंधुवर्गकुलेयेच गतिर्येषांनविद्यते ॥ आवाहयिष्येतान्सर्व्वान् दर्भपृष्ठेतिलोदकैः ॥ ३ ॥ इतित्रिभिर्मंत्रैरावाह्य गंधादिभिरभ्यर्च्य पिंडान्दद्यात् (तत्रमंत्राः) ॐ अस्मत्कुलेमृतायेच गतिर्येषांनविद्य ते ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्यहम् ॥१॥ मातामहकुलेयेच गतिर्येषांनविद्यते ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्यहम् ॥ २ ॥ बंधुवर्गकुलेयेच गतिर्येषांनविद्यते ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्यहम् ॥३॥ अजातदन्तायेकेचिद्येचगर्भेप्रपीडिताः ॥ तेषामुद्धरणा र्थाय इमंपिंडंददाम्यहम् ॥४॥ अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे ॥ विद्युच्चौरहतायेच तेभ्यः पिंडंददाम्यहम् ॥५॥ दावदाहेमृताये च सिंहव्याघ्रहताश्चये ॥ दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यःपिंडंददाम्यहम्॥६॥उद्बंधनमृतायेच विषशस्त्रहताश्चये ॥ आत्मापघातिनोयेच ते भ्यःपिंडंददाम्यहम् ॥७॥ अरण्यवर्त्मनिवने क्षुधयातृष्णयाहताः ॥भूतप्रेतपिशाचाद्यैस्तेभ्यःपिंडंददाम्यहम् ॥ ८ ॥ रौरवेचांधतामिस्रे कालसूत्रेचयेगताः ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्यहम् ॥९॥ असिपत्रवनेघोरे कुंभीपाकेचयेगताः ॥ तेषामुद्धरणार्थाय इमंपिंडंददा म्यहम् ॥१०॥ पशुयोनिगतायेच पक्षिकीटसरीसृपाः ॥ अथवावृक्षयोनिस्थास्तेभ्यःपिंडंददाम्यहम् ॥११॥ अनेकयातनासंस्थाःप्रेतलो

केचयेगताः ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्यहम् ॥ १२ ॥ नरकेषुसमस्तेषु यातनासुचयेस्थिताः ॥ तेषामुद्धरणार्थाय इमंपिंडंददाम्य
हम् ॥ १३ ॥ जात्यन्तरसहस्त्रेषु भ्रमन्तःस्वेनकर्मणा ॥ मानुष्यंदुर्लभंयेषां तेषांपिंडंददाम्यहम् ॥ १४ ॥ दिव्यन्तरिक्षभूयिष्ठाः पितरोबां
धवादयः ॥ मृताअसंस्कृतायेच तेभ्यःपिंडंददाम्यहम् ॥१५॥ येकेचित्प्रेतरूपेण वर्ततेपितरोमम ॥ तेसर्वेतृप्तिमायन्तु पिंडेनानेनसर्व
दा॥येऽबांधवाबांधवावा येऽन्यजन्मनिबांधवाः ॥ तेषांपिंडोमयादत्तो ह्यक्षय्यमुपतिष्ठताम् ॥१६॥ पितृवंशेमृतायेच मातृवंशेतथैवच ॥
गुरुश्वशुरबंधूनां येचान्येऽबांधवामृताः।येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः॥क्रियालोपगताश्चैव जात्यंधाःपङ्गवस्तथा।विरूपाआमगर्भा
श्च ज्ञाताज्ञाताःकुलेमम ॥ तेषांपिंडोमयादत्तो ह्यक्षय्यमुपतिष्ठताम् ॥१७॥ आब्रह्मणोयेपितृवंशजाता मातुस्तथावंशभवामदीयाः ॥ वंश
द्वयेस्मिन्ममदासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ १८ ॥ मित्राणिसर्वेपशवश्चवृक्षाः स्पृष्टाश्चदृष्टाश्चकृतोपकाराः ॥ जन्मान्तरेयेमम
संगताश्च तेभ्यःस्वधापिंडमहंददामि ॥ १९ ॥ इति ऊनविंशतिमंत्रैरूनविंशतिपिंडान्पुरुषेभ्योदत्त्वा तैरेवमंत्रैः स्त्रीलिंगतयासमूहि
तैश्चस्त्रीभ्योदद्यादिति ॥ तद्यथा ॥ अस्मत्कुलेमृतायाश्च गतिर्यासांनविद्यते ॥ तासामुद्धरणार्थाय इमंपिंडंददाम्यहम् इत्यादि ॥
ये इत्यत्र या इतिविशेषः ॥ येषामित्यत्रयासामिति॥तेभ्य इत्यत्रताभ्यः॥घातिन इत्यत्रघातिन्यः इतिविशेषः॥अन्यत्सर्वंपुंषोडशीवत्॥
अथमातृषोडशीलिख्यते ॥ ॐआगर्भज्ञानपर्यंतं पालितोयत्त्वयाह्यहम् ॥ आवाहयामितामातॄर्दर्भपृष्ठे तिलोदकैः ॥ इतिप्रार्थ्य ॥ गर्भ
स्योद्गमनेदुःखं विषमेभूमिवर्त्मनि ॥ तस्यनिष्क्रमणार्थाय मातृपिंडंददाम्यहम् ॥ १ ॥ मासिमासिकृतंकष्टं वेदनाप्रसवेषुच ॥ तस्य
निष्क्रमणार्थाय मातृपिंडंददाम्यहम्॥२॥संपूर्णेदशमेमासि चात्यन्तंमातृपीडनम्॥तस्य०॥३॥ पद्भ्यांप्रजायतेपुत्रो जननन्याःपरिवेदनम्॥

तस्य०॥४॥शैथिल्येप्रसवेप्राप्ते माताविंदतिदुष्कृतम् ॥ तस्य०॥५॥ पिबेच्चकटुद्रव्याणि क्काथानिविविधानिच॥तस्य०॥ अग्निनाशोषये देहंत्रिरात्रोपोषणेनच॥तस्य०॥७॥रात्रौमूत्रपुरीषाभ्यांभिद्यन्तेमातृकर्पटाः॥तस्य०॥८॥दिवारात्रौयदामातातदाऽतिनिर्भरस्तनम्॥तस्य० ॥९॥माघेमासिनिदाघेच शिशिरेऽत्यन्तदुःखिता॥तस्य०॥१०॥क्षुधयाविह्वलंपुत्रं ह्यन्नंमाताप्रयच्छति॥तस्य०॥११॥पुत्रोव्याधिसमायुक्तो माताहाक्रन्दकारिणी॥ तस्य० ॥ १२ ॥यमद्वारेमहाघोरे पथिमाताचशोचति ॥ तस्य० ॥ १३ ॥ पिंडैःषोडशभिर्विद्वान्यः पुत्रःश्राद्धमाचरेत् ॥ तस्य०॥ १४ ॥ अल्पाहारस्यकरणी यावत्पुत्रश्चबालकः ॥ तस्य० ॥ १५ ॥ गात्रभङ्गाभवेन्माता मृत्युरेवनसंशयः ॥ तस्यनिष्क्रमणार्थाय मातृपिंडंददाम्यहम् ॥ १६ ॥ इतिषोडशपिंडान्मात्रेदद्यात ॥ यस्याःपुत्रोगयांगत्वा श्राद्धंकुर्याच्चभक्तितः ॥ तस्यपुत्रस्यपौत्रस्य माताचाशीः प्रयच्छति ॥ इतिमातृषोडशी समाप्ता ॥ पुत्रकामश्चेत्तदा ॐ योमेप्रजांनाशयति जीवोनश्यतिवास्वयम् ॥ तस्यकाश्यपगोत्रस्य वायुरूपस्यदेहिनः ॥ प्रेतस्योद्धारविधये तस्मै पिंडंददाम्यहम् ॥ १ ॥ योमेप्रजांनाशयति जीवोनश्यतिवास्वयम् ॥ तस्यप्रेतस्यदत्तोत्र पिंडोऽयमुपतिष्ठताम् ॥ २ ॥ योमेप्रजांनाशयति जीवोनश्यतिवास्वयम् ॥ विष्णुरूपःसलभतां यस्मैपिंडार्पणाहुतिः ॥ ३ ॥ ओं तस्यकाश्यपगोत्रस्य वसुरूपस्यदेहिनः ॥ अयंपिंडोमयादत्तो यः पीडांकुरुतेमम ॥ ४ ॥ ओं इमंतिलमयंपिंडं मधुसर्पिःसमन्वितम्॥ददामितस्मैप्रेताय यःपीडांकुरुतेमम ॥५॥ इति मंत्रैश्चतुरः पिंडान् दद्यात्॥ततः सर्वेषुपिंडेषु तिलजलपूर्णपात्रेणप्रदक्षिणंवारत्रयं परिषेचनंकृत्वा ॐ येचवोयेचास्मांश्चासन्याश्चवोयाश्चास्मांश्चास्मांश्चासंस्ते चावाहंतां ताश्चावाहतांतृप्यन्तुभवंतस्तृप्यंतु भवन्त्यस्तृप्यतगोत्रान्पुत्रानभितर्पयन्तीरापोमधुमतीरिमाः स्वधापितृभ्योमातृभ्योऽ

अमृतंदुहाना आपोदेवीरभयास्तर्पयंतुतृप्यततृप्यत इति प्रणिपत्य ओं पित्रादयः क्षमध्वम् इति क्षमाप्य विसृजेत् ॥ ततः सव्येनाचम्य
ॐ साक्षिणःसंतुमेदेवा ब्रह्मेशानादयस्तथा॥मयागयांसमासाद्य पितॄणांनिष्कृतिःकृता॥आगतोस्मिगयांदेव पितृकार्येगदाधर ॥ त्वमेव
साक्षीभगवन्ननृणीऽहमृणत्रयात् ॥ इति साक्षितया ब्रह्मादीन्कल्पयित्वाश्रावयेत् ॥ एवं प्रेतपर्वतेश्राद्धंपिंडदानमात्रंकृत्वा ॐ अद्यपि
त्रादीनांप्रेतत्वविमुक्तिस्वगतप्रेतत्वाभावकामः प्रेतपर्वते तिलमिश्रसक्तुनिक्षेपं तिलमिश्रजलांजलिदानंचकरिष्ये इतिसंकल्प्य ॐ येके
चित्प्रेतरूपेण वर्त्ततेपितरोमम ॥ तेसर्व्वेतृप्तिमायांतु सक्तुभिस्तिलमिश्रितैः॥इतिदक्षिणामुखः तिलमिश्रसक्तून् क्षिप्त्वा ॐ आब्रह्मस्तंब
पर्यंतं यत्किंचित्सचराचरम् ॥ मयादत्तेनतोयेन तृप्तिमायांतुसर्व्वशः इतिमंत्रेण तिलसंयुतंजलांजलीन्दद्यात्॥ततोयथाशक्ति ब्राह्मणा
यदक्षिणांदद्यात् ॥ इतिप्रेतपर्वतकृत्यम् ॥ ततः प्रेतपर्वतादवरुह्यमहानदीपश्चिमतीरस्थां गयोत्तरस्थांप्रेतशिलांगत्वापादशौचादिकृत्वा
ओं अद्यसमस्तपितॄणांप्रेतत्वविमुक्तिकामः प्रेतशिलायांश्राद्धमहंकरिष्य इतिसंकल्प्य पूर्वोक्तपार्वणं पिंडदानमात्रं वा श्राद्धंकुर्यात्॥ततः
प्रेतशिलायांपंचगव्यशोधितायामुपविश्य अपसव्येनदक्षिणाभिमुखोभूत्वा ओं कव्यवाडोनलः सोमो यमश्चैवार्य्यमातथा॥अग्निष्वात्ता
बर्हिषदः सोमपाःपितृदेवताः ॥ आगच्छंतुमहाभागा युष्माभीरक्षितास्त्विह ॥ मदीयाःपितरोयेच कुलेजाताःसनाभयः ॥ तेषांपिंडप्रदा
नार्थमागतोऽस्मिगयामिमाम्॥तेसर्वेतृप्तिमायांतु श्राद्धेनानेनशाश्वतीम् ॥ इतिपठित्वा प्रेतपर्व्वतप्रकरणदर्शितेनप्रयोगेण साक्षिश्रवणा
न्तं कृत्वा प्रेतशिलायांसमाचारादेवनवभांडस्फोटनं कुर्य्यात्॥अथप्रेतशिलाधः प्रभासाद्रिसङ्गतायांमहानद्यां रामतीर्थत्वेनप्रसिद्धेराम
ह्रदे प्रभासह्रदे देशकालादिकीर्त्तनांते ओं जन्मान्तरकृतदुष्कृतविनाशकामो रामतीर्थे स्नानमहंकरिष्ये इतिसंकल्प्य ओं जन्मान्तर

शतं साग्रं यन्मयादुष्कृतं कृतम् ॥ तत्सर्व्वं विलयंयातु रामतीर्थाभिषेचनादिति मंत्रेणस्नानंविधाय पितॄन्संतर्पयेत्॥ततोदेशकालौ संकीर्त्य ॐ स्वस्यविष्णुलोकप्राप्तिकामः पितॄणांचप्रेतत्वविमुक्तिपूर्व्वकपितृपदप्राप्तिकामो रामतीर्थे श्राद्धं पिंडदानमात्रंवाहंकरिष्ये इतिसंकल्प्यपूर्वोक्तं पार्वणं पिंडदानमात्रंवाश्राद्धंकुर्यात् ॥ ततः कव्यवाडनल इत्याद्यावाहनादिसाक्षिश्रवणान्तं कृत्वा ततः स्वगतपापनाशकामः ॐ रामरामहाबाहो देवानामभयंकर॥त्वांनमाम्यत्रदेवेश ममनश्यतुपातकम् ॥ इतिमंत्रेणरामनत्वा ॐ अद्यभासमानस्वकर्तृकशिवपुरगमनकामः प्रभासेशनमस्कारमहंकरिष्ये इतिवाक्यंकृत्वाप्रभासेशंप्रणमेत् ॥ ततः मानसवाचिककायिककर्म्मजपापनाशकामः ॐ आपस्त्वमसिदेवेश ज्योतिषांपतिरेवच ॥ पापंनाशयदेवेश मनोवाक्कायकर्म्मजम् ॥ इतिमंत्रेण रामंप्रभासेशंचयुगपन्नत्वा तत्र ॐयमराजधर्मराजौ निश्चलार्थंहिसंस्थितौ॥ताभ्यांबलिंप्रयच्छामि पितॄणांमुक्तिमुक्तये॥इतिमंत्रान्ते ॥ ॐयमराजधर्म्मराजाभ्यामेषतिलजलमिश्रितो बलिर्नमम इत्युक्त्वाभक्तादिरूपंबलिंदद्यात् ॥ ततः प्रभासपर्वतदक्षिणदिगवस्थितप्रेतशिलाजघनस्थलगतनगनाम्निपर्वते ॐद्वौश्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ ॥ ताभ्यांबलिंप्रयच्छामि रक्षेतांपथिसर्व्वदा इति ॥ ॐ एषबलिर्यमराजधर्म्मराजानुचराभ्यांश्वभ्यांनममइतिश्वबलिंदद्यात्इदंचबलिदानंनित्यंकार्यम् । अकरणेऽनिष्टश्रवणात्॥इतिद्वितीयदिनकृत्यम्॥अथतृतीयदिनेपंचतीर्थीकृत्यमुच्यते ॥ ततोगयाप्राप्तितृतीयादिने फल्गुतीर्थेप्रातःस्नानादिदेवार्चनान्तंकर्म्मकृत्वाउत्तरमानसं गत्वादर्भपाणिस्तीर्थोदकेनाचम्यशिरस्यभ्युक्ष्य ॐ आत्मशुद्धिसूर्य्यलोकादिप्राप्तिपितृमुक्तिकाम उत्तरमानसेस्नानंकरिष्येइतिसंकल्प्यस्नानीयमंत्रान्पठित्वा ॐ उत्तरेमानसेस्नानं करोम्यात्मविशुद्धये ॥ सूर्य्यलोकादिसंसिद्धिसिद्ध्येपितृमुक्तये ॥ १ ॥ इतिमंत्रेणस्नायात् ॥ ततस्तर्पणंकु

त्वातर्पणांते॥आब्रह्मस्तंबपर्य्यंतं देवर्षिपितृमानवाः॥तृप्यन्तुपितरःसर्व्वे मातृमातामहादयः॥अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्॥
आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ इत्यनेनैकोऽञ्जलिर्द्देयः॥ ततः ॐ पितॄणामक्षय्यतृप्तिकामउत्तरमानसेश्राद्धंपिंडदानमात्रंवाक
रिष्ये इतिसंकल्प्यपूर्वोक्तंश्राद्धंकृत्वा तद्दक्षिणदिशिउपविष्यसमूलान् दक्षिणाग्रान्कुशानास्तीर्य्य ॐकव्यवाडनलइत्यादिनावाहनादिसा
क्षिश्रवणांतंकृत्वा।ॐ पितॄणांसूर्य्यलोकनयनकाम उत्तरार्कस्य पूजनंप्रणामंचकरिष्ये इतिसंकल्प्य ॐनमोभगवतेभर्त्रे सोमभौमज्ञरूपिणे॥
जीवभार्गवसौरेयराहुकेतुस्वरूपिणे ॥ इतिमंत्रेण उत्तरार्कस्यनतिपूजनेकुर्यात् ॥ ततोमौनेनदक्षिणमानसंगत्वातत्रोदीच्याम् ॐ
आत्मविशुद्धिसूर्य्यलोकादिप्राप्तिब्रह्महत्यादिपापसमूहनाशकामः पितृमुक्तिकामश्च उदीचीतीर्थेस्नानमहंकरिष्ये इतिसंकल्प्य ॐ
ब्रह्महत्यादिपापौघयातनाया।विमुक्तये ॥ दिवाकरकरोमीह स्नानंदक्षिणमानसे ॥ नमामिसूर्य्यंतृप्त्यर्थं पितॄणांतारणायच ॥ पुत्रपौत्र
धनैश्वर्य्यायायुरारोग्यवृद्धये ॥ इतिमंत्रेणदक्षिणमानसेस्नात्वा पितॄन्संतर्प्यॐ पितृमुक्तिकाम उदीचीतीर्थेश्राद्धमहंकरिष्ये इतिसंकल्प्य
पार्वणं पिंडदानमात्रंवाश्राद्धंकृत्वा ॐकव्यवाडनलइत्यादिसाक्षिश्रवणांतंकुर्यात् ॥ ततोमध्यमंकनखलतीर्थंगत्वातत्रापि ॐ अद्यपितृ
विमुक्तिकामः कनखलतीर्थेस्नानमहंकरिष्ये इतिसंकल्प्य स्नानतर्पणे कृत्वापितृमुक्तिकामनयातत्रश्राद्धंपिंडमात्रंकुर्य्यात् ॥ ततोदक्षिण
मानसेॐ अद्यपितृमुक्तिकामोदक्षिणमानसेस्नानमहंकरिष्ये इतिसंकल्प्यस्नानीयमंत्रांते ॐ दक्षिणेमानसेस्नानं करोम्यात्मविशुद्धये ॥
सूर्य्यलोकादिसंसिद्धिसिद्धयेपितृमुक्तये इतिमंत्रेण स्नात्वापूर्ववत्तर्पणश्राद्धंचकृत्वापितृमुक्त्यादिकामनया ॐ नमामिसूर्य्यंतृप्त्यर्थं
पितॄणांतारणायच॥पुत्रपौत्रधनैश्वर्य्यायायुरारोग्यवृद्धये ॥इतिमंत्रेणमौनेनदक्षिणार्कस्यनतिःपूजनंचकार्यम् ॥ [मौनेनपूजनीयत्वादयमे

वमौनार्कः] ततः कव्यवाडनल इत्यादिश्लोकद्वयंदक्षिणमानसाग्रएवपठेत् ॥ ततोगदाधरपूर्व्वदेशेसर्व्वतीर्थोत्तमंफल्गुतीर्थंगत्वा ॐ पितॄणाविष्णुलोकप्राप्तये आत्मनश्चभुक्तिमुक्तिसिद्धयेफल्गुतीर्थेस्नानमहंकरिष्ये इतिसंकल्प्य॥फल्गुतीर्थेविष्णुजले करोमिस्नानमादृतः ॥ पितॄणांविष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये ॥ इतिमंत्रेणस्नात्वातर्प्पणंकुर्य्यात्॥ततःॐपितॄणांमोक्षप्राप्तिकामःफल्ग्वांश्राद्धमहंकरिष्येइतिसंकल्प्यपूर्व्ववदेवश्राद्धंपिंडदानमात्रंवाकुर्य्यात्॥ततोमधुस्रवादक्षिणकूलस्थंपितामहम् ॐनमःशिवायदेवाय ईशानपुरुषायच ॥ अघोरवामदेवाय सद्योजातायशंभवे ॥ इतिमंत्रेणप्रणमेत्पूजयेच्च ॥ ततःपुनःफल्गुतीर्थमागत्य ॐअद्यपित्रादिसहितात्मवैष्णवपदनयनकामोगदाधरपूजाङ्गतयापुनःफल्गुतीर्थेस्नानंगदाधरदर्शनंचकरिष्ये इतिसंकल्प्य यथाविधिस्नानतर्पणेकृत्वागदाधरदर्शनंचविधेयम् ॥ [गदाधरश्चप्रतिमारूपस्तदधिकरणीभूतोमुंडपृष्ठाद्रिरूपश्चेति] ततोदर्शनानंतरंपंचामृतैः स्नपनम्ॐनमोवासुदेवाय नमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायश्रीधरायचविष्णवे॥इतिपठित्वागंधपुष्पवस्त्राद्यलंकारादिभिर्यथाशक्तिपूजनंचकृत्वाप्रणमेत्।ततःउत्तरमानसंगत्वापंचतीर्थ्यांस्नानंकृत्वायथाविधितर्पणंकुर्यात् ॥ [इदंचगदाधरपूजनंनित्यमकरणेगयाश्राद्धानर्थक्यश्रवणात्] इतितृतीयदिनेपंचतीर्थीकृत्यम् ॥ अथचतुर्थदिनकृत्यम्॥तत्रफल्ग्वांस्नानादिप्रातःकृत्यंकृत्वाधर्म्मारण्यंगत्वा ॐसर्व्वपापविशुद्धिकामोमतङ्गवाप्यांस्नानमहंकरिष्येइतिसंकल्प्यस्नानतर्पणेकृत्वा ॐ अद्याक्षय्यतृप्तिकामोमतङ्गवाप्यांश्राद्धमहंकरिष्येइतिसंकल्प्यप्रेतपर्व्वतत्पार्वणंपिंडमात्रंवाश्राद्धंकुर्यात् ॥

---

१ ॐपितापितामहश्चैव तथैवप्रपितामहः । माता पितामही चैव तथैव प्रपितामही । मातामहस्तत्पिता च प्रमातामहकादयः । तेषांपिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतु । इत्येकं पिंडं सर्वत्र दद्यात ।

ततोमतङ्गवाप्यामेध उत्तरदिगवस्थितंमतङ्गेशंदृष्ट्वा प्रणम्यॐप्रमाणंदेवताःसंतु लोकपालाश्चसाक्षिणः॥मयागत्यमतङ्गेऽस्मिन्पितॄणांनिष्कृतिः कृता ॥ इति पठित्वा ततो ब्रह्मतीर्थसंज्ञकंब्रह्मकूपंगत्वापित्राद्युद्धारकामनया स्नानतर्पणश्राद्धानिपूर्ववत्कार्य्याणि॥कूपश्चायमेतद्वाप्या आग्नेयकोणेक्षेत्रमध्येरहःकूपोऽस्ति तत्तीरे श्राद्धंपिंडदानंवापतितस्यापिकिंतु गर्भहंतृगुरुगतिनिर्देशात् ॥ ततोब्रह्मकूपयूपयोर्मध्येपितृतारणकामनयाप्रेतपर्व्वतवच्छ्राद्धकार्य्यम् ॥ ततो धर्मस्यधर्म्मेश्वरस्यचप्रणामः ॥ ततोमहाबोधितरोरधः स्वस्यस्वर्गलोकप्राप्तिकामनयाप्रेतपर्व्वतवच्छ्राद्धं पिंडदानमात्रंवाकृत्वाॐचलद्दलायवृक्षाय सर्व्वदास्थितिहेतवे॥बोधितत्त्वाययज्ञाय अश्वत्थायनमोनमः॥ ॥१॥एकादशोऽसिरुद्राणां वसूनांपावकस्तथा॥नारायणोऽसिदेवानां वृक्षराजोऽसिपिप्पल ॥ २ ॥ अश्वत्थयस्मात्त्वयिवृक्षराज नारायणस्तिष्ठतिसर्व्वकालम्॥अतःशुभस्त्वंसततंतरूणां धन्योऽसिदुःस्वप्नविनाशनोऽसि ॥ ३ ॥ अश्वत्थरूपिणंदेवं शंखचक्रगदाधरम् ॥ नमामिपुंडरीकाक्षं वृक्षंरूपधरंहरिम् ॥ ४ ॥ बोधिरूपंमहावृक्षं नारायणमनःप्रियम्॥गयांसमागत्यमया पितृभ्योनिष्कृतिंकुरु ॥५॥ येऽस्मत्कुलेमातृवंशे बांधवादुर्गतिंगताः॥त्वद्दर्शनात्स्पर्शनाच्च स्वर्गतिंयांतुतेऽक्षयाम् ॥६॥ ऋणत्रयंमयादत्तं गयामागत्यवृक्षराट्॥त्वत्प्रसादान्महापापाद्विमुक्तोऽहंभवार्णवात् ॥७॥ इतिमंत्रैर्विष्णुंप्रणमेत् ॥ इतिचतुर्थदिनकृत्यम् ॥ अथपंचमदिनकृत्यम् ॥ तत्रफल्ग्वांप्रातःस्नानादिनित्यंकर्म्मकृत्वा ब्रह्मसरो गत्वा ॐ ऋणत्रयविमुक्तिकामः करिष्यमाणतर्पणश्राद्धपिंडदानोपयोग्यात्मशुद्धिकामश्चब्रह्मसरसिस्नानमहंकरिष्ये इतिसंकल्प्य ॐ स्नानंकरोमितीर्थेऽस्मिन्नृणत्रयविमुक्तये॥श्राद्धायपिंडदानाय तर्पणायात्मशुद्धये॥ इतिमंत्रेणस्नानंकृत्वा तर्पणंकार्य्यम् ॥ ततः ॐ पितॄणांब्रह्मलोकनयनकामनया ब्रह्मकूपयूपयोर्मध्येश्राद्धमहंकरिष्ये इतिसंकल्प्य पार्वणंपिंडदानमात्रंवाश्राद्धं

कृत्वाऽक्षय्यपिंडदत्त्वाॐपितॄणांमोक्षप्राप्तिकामो ब्रह्मकल्पिताम्रवृक्षसेचनंकरिष्ये इतिसंकल्प्यॐआम्रं ब्रह्मसरोभूतं सर्व्वदेवमयंतरुम्॥ विष्णुरूपंप्रसिंचामि पितॄणांचविमुक्तये॥ इतिमंत्रेण कुशयुतेन ब्रह्मसरोजलेन गोप्रचारसमीपस्थान्ब्रह्मकल्पितानाम्रान्सिंचेत्॥ततःॐ वाजपेयजन्यफलप्राप्तिकामनया ब्रह्मयूपप्रदक्षिणांकरिष्ये इतिसंकल्प्य तत्प्रदक्षिणांकुर्यात् ॥ ततः ॐ अद्यपितॄणां ब्रह्मपुरनयनकामो ब्रह्मनमस्कारमहंकरिष्येइतिसंकल्प्यॐनमोब्रह्मणेऽजायजगज्जन्मादिकारिणे॥भक्तानांचपितॄणांचतारणायनमोनमः॥इतिब्रह्मसरोवायव्य कोणस्थं ब्रह्माणंप्रणमेत्॥ततःपितृमुक्त्यैयमबलिदानंकरिष्येइतिसङ्कल्प्यॐयमराजधर्म्मराजौ निश्चलार्थेस्थिरीकृतौ ॥ ताभ्यांबलिंप्रय च्छामि पितॄणांमुक्तिहेतवे॥इतिपठित्वाएषबलिर्यमराजधर्म्मराजाभ्यांनमः॥इतिमंत्रेणसव्येनाऽपसव्येनवादर्भोदकसहितभक्तादिनाबलिंद द्यात् ॥ ततः द्वौश्वानौश्यामशबलौ वैवस्वतकुलोद्भवौ ॥ ताभ्यांबलिंप्रयच्छामि स्यातामेतावहिंसकौ ॥ इतिपठित्वा एषबलिः श्व भ्यांनमः इतिश्वभ्यां बलिंदत्त्वा ॐ ऐंद्रवारुणवायव्या याम्यावैनैर्ऋतास्तथा ॥ वायसाःप्रतिगृह्णंतु भूमौपिंडमयोज्झितम् ॥ इतिमंत्रेण काकेभ्यो बलिदानं कार्य्यम् ॥ काकबल्यनन्तरं स्नानं कर्त्तव्यमितिपंचमदिनकृत्यम् ॥ अथषष्ठदिनकर्म्म ॥ तत्र ॐ दशलक्षाश्वमेधजन्यफलकामः फल्गुतीर्थे स्नानमहंकरिष्ये इतिसङ्कल्प्य ॐ फल्गुतीर्थे इत्यादिमंत्रेणस्नात्वा तर्पणंकृत्वा पदे षुश्राद्धानिकुर्य्यात् । तत्रयद्यपिब्रह्मविष्णुरुद्रकश्यपपदानामन्यतमपदे आरम्भसमाप्ती कार्य्ये मध्येषुत्वनियम एव तथापि वायुपुराणा न्तर्गतगयामाहात्म्यपाठक्रममनुसृत्यक्रमेणश्राद्धान्युच्यंते तत्रादौविष्णुपदसमीपंगत्वा ॐ आत्मनः सर्व्वपापनाशकामो विष्णुपद दर्शनंकरिष्ये इतिसङ्कल्प्य ॥ अत्रविष्णुपदंदिव्यं दर्शनात्पापनाशनम् ॥ स्पर्शनात्पूजनाच्चैव पितॄणांमुक्तिहेतवे॥इतिमंत्रेणविष्णुपद

स्यदर्शनंकृत्वा ॐ पितृविमुक्तिकामो विष्णुपूजनंकरिष्ये इतिसंकल्प्य विष्णुं पंचोपचारैः पूजयेत् ॥ ततः आत्मसहितसद्दसकु
लोद्धारपूर्व्वकविष्णुलोकनयनकामोविष्णुपदेश्राद्धंकरिष्ये इतिसंकल्प्य पार्वणं पिंडदानमात्रंवाश्राद्धंकृत्वा कव्यवाडनल इत्यावाह
नादिसाक्षिश्रवणांतंकुर्यात् ॥१॥ ततोरुद्रपदे ॐ आत्मसहितकुलशतस्य शिवपुरनयनकामोरुद्रपदेश्राद्धंकरिष्ये इतिसंकल्प्यपूर्ववद्रुद्र
श्राद्धंकुर्य्यात् ॥ २ ॥ एवं ब्रह्मपदे कुलशतसमुद्धारपूर्व्वकब्रह्मलोकनयनकामो० ॥ ३ ॥ दक्षिणाग्निपदेस्वस्यवाजपेययागफलसमफल
प्राप्तिकाम० ॥४॥ गार्हपत्यपदे स्वस्यअश्वमेधयज्ञसमफलप्राप्ति० ॥५ ॥ आहवनीयपदेस्वस्यराजसूययज्ञफल० ॥६॥ सभ्याग्निपदे
स्वस्यज्योतिष्टोमयज्ञसमफल० ॥७॥ आवसथ्याग्निपदेस्वस्य सोमलोकप्राप्ति० ॥८॥ सूर्य्यपदेपंचशतकुलानां सूर्य्यपुरयनकाम० ॥
॥ ९ ॥ कार्त्तिकेयपदेपितॄणांशिवलोकनयन० ॥१०॥इंद्रपदे पितणामिद्रलोकप्राप्ति० ॥११॥ अगस्त्यपदे पितॄणां ब्रह्मलोकनयन० ॥
॥१२॥ चंद्रगणेशक्रौंचमातंगपदेषु पितॄणां ब्रह्मपुरनयन० ॥ १३ ॥ १४ ॥ १५ ॥१६॥ कश्यपपदे पितॄणां ब्रह्मपुरनयनकामः कश्य
पपदेश्राद्धंकरिष्ये ॥ १७ ॥ इति संकल्प्य सप्तदशसुपदेषु तत्तत्फलोद्देशेनश्राद्धानिकार्य्याणि तत्तद्देवतानांपूजाचकार्य्या ॥ ततःपदशि
लायामेवोत्तरभागस्थायां गजकर्णिकायां पितॄणां स्वर्गनयनकामनया शुद्धोदकेनपितृतर्पणं पूर्वोक्तविधानेन कार्य्यम् ॥ततः पितॄणांता
रणार्थं पदशिलोत्तरभागस्थमार्गसमीपस्थानां कनकेश्वरकेदारेश्वरनारसिंहवामनानापञ्चोपचारैः पूजाकार्य्या ॥ संन्यासिभिस्तुगयां
गत्वाविष्णुपदेदंडस्पर्शनमात्रंकार्य्यम् ॥ इतिषष्ठदिनकर्म्म ॥ अथसप्तमदिनकृत्यम् ॥ तत्रफल्गुतीर्थे स्नानानि प्रातःकृत्यंनिर्वर्त्य गदा
लोलंतीर्थंगत्वाॐआत्मनः शुद्धये अक्षय्यस्वर्गप्राप्तये च गदालोलेस्नानमहंकरिष्यइतिसङ्कल्प्य॥गदालोलमितिख्यातंसर्व्वेषामुत्तमोत्त

मम्॥गदालोलेमहातीर्थे गदाप्रक्षालनाद्धरेः॥स्नानंकरोमितीर्थेऽस्मिन्नक्षय्यंपदमाप्नुयाम्॥इतिपठित्वास्नानतर्पणेकृत्वा ॐ पितॄणां तृप्ति ब्रह्मलोकावाप्तिकामो गदालोलेश्राद्धमहंकरिष्ये इतिसंकल्प्य पूर्ववत् श्राद्धं पिंडदानमात्रंवाकुर्य्यात् ॥ ततोऽक्षयवटेगत्वा तन्मूलसन्नि हिते आचारादुत्तरदिग्भागे ॐपितॄणां ब्रह्मलोकप्राप्तिकामोऽक्षयवटच्छायायां श्राद्धंकरिष्ये इति संकल्प्य अन्नेनैवपूर्व्ववच्छ्राद्धं कृत्वा ॐपितॄणां ब्रह्मलोकनयनकामोऽक्षयतृप्तिकामश्च ब्रह्मकल्पितान्ब्राह्मणान्भोजयिष्य इति संकल्प्य त्रीन्विप्रान्भोजयेत् ॥ तदलाभे एकंब्राह्मणमपिभोजयेत् ॥ ततः ॐ पितृब्रह्मलोकनयनकामोवटेशदर्शनं करिष्य इति संकल्प्य ॥ वटेशंप्रतिमारूपंपश्यन्॥एकार्णवेवट स्याग्रे यः शेतेयोगनिद्रया॥बालरूपधरस्तस्मै नमस्तेयोगशायिने॥इति प्रणम्यसंपूज्यॐसंसारवृक्षशस्त्राय सर्व्वपापक्षयायच॥अक्षयाय ब्रह्मदात्रे नमोऽक्षयवटायते॥इति मंत्रेणाक्षयवटंनमस्कुर्यात्॥ततः शक्त्यौसत्यां तत्र षोडशदानानि गयातीर्थपुरोधसे दत्त्वावस्त्रगंधादिभिः सम्यक् संपूज्य ॐपितृबंधनमोचनकामःप्रपितामहनमस्कारंकरिष्ये इति संकल्प्य ॐकलौमाहेश्वरालोका येनतस्माद्गदाधर॥लिंगरूपो भव त्वंच वंदे श्रीप्रपितामहम् ॥ १ ॥ इतिमंत्रेण तंनमस्कुर्यात्॥इति सप्तदिनात्मकगयाकार्यकृत्यम् ॥ छ ॥ छ ॥ छ ॥

अथ मासेसार्द्धमासे वा वा सेतु अनियतदिनकृत्यानि लिख्यंते॥तत्रादौ पूर्वदिने उपोष्य पराह्ने प्रातर्गयास्थगायत्रीसंमुखस्थं गायत्रीतीर्थं गत्वा तत्कूलेप्रातः स्नात्वा प्रातःसंध्योपासनंकृत्वा तर्पणंविधाय ॐअद्यकुलब्राह्मण्यतानयनकामोगायत्रीतीर्थे श्राद्धमहं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण सपिंडकंश्राद्धं कुर्य्यात्॥ततः सावित्र्याः पुरतःसमुद्यंतनामकेतीर्थे मध्याह्ने यथाविधिस्नात्वा तत्रैव कुलशत स्वर्गनयनकामनया मध्याह्नसंध्योपासनतर्पणश्राद्धानि कार्य्याणि ॥ ततः एवमेव सरस्वत्याः पुरतः सायाह्नेप्राच्यांसरस्वत्यांस्नात्वा

कुलसहस्रमुक्तिकामनया सायंसंध्योपासनतर्पणश्राद्धानि कार्याणि ॥ एवमेव धर्म्मशिलायां, लेलिहाने, भरताश्रमे, मुंडपृष्ठे, गदाधरसमीपे, आकाशगंगायां, गिरिकर्णमुखेच क्रमेण कुलशतब्रह्मलोकनयनकामनया श्राद्धं पिंडदानमात्रंवा कार्य्यम् ॥ ततः ॐत्रिसप्तकुलोद्धारकामो वैतरण्यां स्नानमहं करिष्ये इति संकल्प्य स्नानं तर्पणंच कृत्वा पूर्वोक्तं श्राद्धं कुर्यात्॥ततः यमद्वारे महाघोरे यासावैतरणीनदी ॥ तामहं तर्त्तुमिच्छामि कृष्णांगांप्रददन्निमाम्॥इति मंत्रेण तत्र गोदानंकार्य्यम् ॥ तद्यथा ॥ यासावैतरणीनाम नदीत्रैलोक्यविश्रुता ॥ सावतीर्णामहाभागा पितॄणांतारणायच ॥ १ ॥ इतितांस्मृत्वागांपुरतः संस्थाप्य ॐ गवेनमः इतित्रिः संपूज्य ॐब्राह्मणायनमःइति ब्राह्मणंत्रिःसंपूज्य गां प्रोक्ष्य कुशत्रयतिलजलान्यादाय ॥ ॐ अद्यत्रिसप्तकुलोद्धारणकाम इमां गांरुद्रदैवत्याम् अमुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहं संप्रददे इतिदद्यात् ॥ ततो दाता ॐ अद्यकृतैतद्गोदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इतिदक्षिणांदद्यात्॥ ग्रहीताच गृहीतसुवर्णो गोपुच्छंगृहीत्वायथाशास्त्रम् ॐ कोदात्कामइत्यादिकामस्तुतिंपठेत् ॥ ततः ॐ अद्यपितृस्वर्गलोकनयनकामो देवनद्यांपिंडदानमहंकरिष्ये॥इतिसंकल्प्यपूर्वोक्तंपार्वणम् पिंडदानमात्रंवाश्राद्धंकुर्यात् ॥ एवमेव गोप्रचारे घृतकुल्यांमधुकुल्यां गदालोले कोटितीर्थे रुक्मिणीकुंडेच पितृस्वर्गकामनयाश्राद्धंपिंडदानमात्रं वा कार्य्यम् ॥ ततः ॐअद्यपितृतारणकामोमार्कंडेयेश्वरकोटीश्वरयोर्नमस्कारंकरिष्ये ॥ इतिसंकल्प्य तयोर्नमस्कारं कुर्यात् ॥ ततः पितामहसन्निहितपारिजातवनस्थपांडुशिलायांपितॄणामक्षय्यतृप्तिकामनयाश्राद्धंपिंडदानमात्रंवा कार्य्यम् ॥ एवमेव घृतकुल्यामधुकुल्यादेविकामहानदी सरस्वती चेतिचतस्रो यत्र पांडुशिलयामिलिताः सा मधुस्रवा तस्यांस्नानतर्पणे अश्वमेधफलके ॥

श्राद्धंचकुलसहस्रस्यनरकाद्युद्धारपूर्व्वकविष्णुपुरनयनफलकम् ॥ एवं पितामहाद्दक्षिणस्यांमहानद्यां दशाश्वमेधहंसतीर्थे प्रणमेत् ॥ ततः
उद्यंतपर्वतसमीपस्थे मखकुंडेमुक्तिकामनयास्नानं पितृतृप्तिकामनयातर्पणश्राद्धेकार्य्ये ॥ संगमे तारकेश्वरप्रणामे पितृस्वर्गः ॥ अश्वमेध
फलकामनया गयाकूपे श्राद्धम्॥अत्रपतितदुर्म्मरणादिमृतानामपिस्वर्गकामनया वर्षोत्तरंश्राद्धंकार्य्यम्॥ततः पितृसंतारणकामनयाभस्म
कूपे भस्मनास्नानम्॥गयाग्राममध्येसुषुम्णायां महाकालीसमीपे ॐ त्रिः सप्तकुलसमुद्धारकामः सुषुम्णायांश्राद्धमहंकरिष्ये॥इतिसंकल्प्य
श्राद्धंकार्य्यम् ॥ ततो गृध्रवटोत्तरभागस्थेवसिष्ठाश्रमेवसिष्ठतीर्थे स्नात्वा वसिष्ठेश्वरंनमस्कृत्य धेनुकारण्यजलाशयेस्नात्वाकामधेनुंप्रणम्य
पितृब्रह्मलोकनयनकामनया कामधेनुपदे श्राद्धंकार्य्यम्॥एवं कर्दमाले गयानाभौ मुंडपृष्ठसमीपेचस्नानश्राद्धेकार्य्ये ॥ ततःफल्गुचंडी
श्मशानाक्षीमंगलादीनांपितृस्वर्गकामनयानतिपूजनेकार्य्ये ॥ ततो गयागजे गयादित्ये गायत्र्यां गदाधरसमीपे गयायां गयाशिरसि
चेतिगकारवतिस्थानषट्के मुक्तिकामनया पूजापितृश्राद्धादिकंचकार्य्यम् ॥ ततोगयायांयत्नक्वापियदाकदाचित् ॥ ॐएकविंशतिकुलो
द्धारकामनया वृषोत्सर्गमहंकरिष्ये॥ इतिसंकल्प्य वृषोत्सर्गःकार्य्यः॥ततो गयायामादिगदाधरंध्यात्वापितृणां कुलशतस्यनरकाद्युद्धार
ब्रह्मलोकनयनकामनया श्राद्धंपिंडदानमात्रंवाकार्य्यम्॥ भस्मकूटस्थितं जनार्द्दनंनत्वातत्समीपे वामजानुनिपात्यात्मनो विष्णुलोकका
मनयापितृणांश्राद्धंकृत्वा तंचषोडशोपचारैः पंचोपचारैर्वासंपूज्यदध्योदनं नैवेद्यंदत्त्वातच्छेषेण तिलंविना ॐ विष्णुलोककामनयाअपुत्र
स्यासंभावितपुत्रस्यममवाऽन्यस्यमरणोत्तराक्षय्यसुखप्राप्त्यर्थंमेभिर्मंत्रैर्जनार्द्दनहस्तेपिंडदानमहंकरिष्ये॥इतिसंकल्प्य॥ एषपिंडोमयादत्त
स्तवहस्ते जनार्द्दन॥गयाशीर्षेत्वयादेयो मह्यंपिंडोमृतेमयि॥ १॥यस्तुपिंडोमयादत्तोयमुद्दिश्यजनार्द्दन॥देहिदेवगयाशीर्षे तस्मैतस्मैमृतेतु

तम् ॥२॥ जनार्द्दननमस्तुभ्यं नमस्तेपितृरूपिणे ॥ पितृपित्रेनमस्तुभ्यं नमस्ते मुक्तिहेतवे ॥३॥ गयायांपितृरूपेण स्वयमेवजनार्द्दनः ॥
तंदृष्ट्वापुंडरीकाक्षं मुच्यतेचऋणत्रयात् ॥ ४ ॥ एतैर्मंत्रैर्जनार्द्दनवामहस्ते पिंडंदद्यात् ॥ (अग्निपुराणेतु पिंडत्रयदानमुक्तम्) तत्रत्योयं
मंत्रः ॥ त्रयःपिंडा मयादत्तास्तवहस्तेजनार्दन ॥ परलोकगतेमह्यमक्षय्यमुपतिष्ठताम् ॥ १ ॥ इत्येकंमंत्रंपठित्वापिंडत्रयंदद्यात् ॥ तत
स्तदधोभागे पुंडरीकाक्षमर्चयेत् ॥ ॐ ऋणत्रयमुक्तिकामनयास्वर्गकामनयाच पुंडरीकाक्षस्यदर्शनपूजनंकरिष्ये ॥ इतिसंकल्प्य ॐ नम
स्तेपुंडरीकाक्ष ऋणत्रयविमोचन ॥ लक्ष्मीकान्तनमस्तेऽस्तु नमस्तेपितृमोक्षद ॥ १ ॥ इतिमंत्रेणदर्शनंकृत्वासंपूज्यनतिंकुर्यात् ॥
तदधोभागेभीमगयास्थलमुपगत्यपितृमुक्तिकामः श्राद्धंपिंडदानंवाकृत्वा प्रेतकुंडे पितॄणांप्रेतत्वविमुक्तिकामः श्राद्धंपिंडदानं
वाकुर्य्यात् ॥ ततोमहानदीपरपारगतभरताश्रमसन्निधौमहानद्यांस्नात्वा रामेश्वरं सीतासहितंरामंच ॐ रामराममहाबाहो दे
वानामभयंकर ॥ त्वांनमस्येऽत्रदेवेशं ममनश्यतुपातकम् ॥ इतिमंत्रेणनत्वातत्रस्थेरामपदे ॐ पितृकुलशतसहितस्यात्मनोविष्णुपुर
गमनकामोरामेशसन्निधानेरामपदेश्राद्धमहंकरिष्येइतिसंकल्प्यश्राद्धंपिंडदानमात्रंवाकुर्यात ॥ ततोधर्म्मशिलादक्षिणहस्तस्थापितकुंड
पर्व्वतेपितॄणांब्रह्मपुरनयनकामनयाश्राद्धंकार्य्यम् ॥ धर्म्मशिलावामहस्तस्थापितेउद्यन्तपर्व्वतेपितणांब्रह्मलोकप्राप्तिकामनयाश्राद्धम् ॥
तत्रैवोद्यन्तकुंडेमध्याह्नेस्नात्वामध्याह्नसंध्योपासनं ततः स्वस्यकोटिजन्मावधिधनाढ्यवेदवेदाङ्गपारगविप्रत्वकामनया तत्रत्यसावित्रीपू
जाकार्य्या ॥ ततःअगस्त्यपदेस्नात्वातत्रश्राद्धंकृत्वा ॐ जन्मनिवारणपूर्व्वकब्रह्मभावप्राप्तिकामोब्रह्मयोनिप्रवेशनिर्गमावहंकरिष्ये ॥ इति
संकल्प्य ॥ ब्रह्मयोनिंप्रविश्यततोनिर्गमंकार्य्यम् ॥ततोगयाकुमारंनमस्कृत्य पितॄणांचंद्रलोकप्राप्तिकामनया सोमकुंडेस्नानतर्पणश्राद्धानि

काय्र्याणि॥ततः ऋणमोक्षकामनया ॐयमोऽसियमदूतोऽसि वायसोसिमहाबल ॥ सप्तजन्मकृतंपापं बलिंभुक्त्वाविनाशय ॥१॥ इतिमं
त्रेणकाकशिलायांकाकबलिदानम् ॥ ततःस्वर्गप्राप्तिपूर्व्वकब्रह्मलोकगमनकामनयास्वर्गद्वारेशस्यप्रणामः ॥ पितृनिष्पापतार्थमाकाश
गंगायांश्राद्धंकार्य्यम्।धर्म्मशिलादक्षिणहस्तगतेभस्मकूटाद्रौस्वर्गप्राप्तिकामनयातत्रत्यभस्मनास्नानम्।अक्षयवटसमीपेवटेश्वरःप्रपितामहश्च
तदग्रेरुक्मिणीकुंडं तत्पश्चिमतः कपिलानदी तत्तीरेकपिलेश्वरश्चैतेपूज्याः ॥ कपिलायांसोमामायोगेस्वर्गकामनयास्नानश्राद्धेकार्य्ये
स्वर्गकामनयामाहेश्वरीकुंडसमीपेमंगलागौरीपूज्या॥धर्म्मशिलादक्षिणपादस्थापितप्रेतकूटाद्रौ पितृमुक्तिकामनयाश्राद्धंकार्य्यम्॥तत्रत्य
एवप्रेतकुंडेपितृणांप्रेतत्वमुक्तिकामनयाश्राद्धादिकार्य्यम् ॥ पितॄणांब्रह्मपुरप्राप्तिकामनयावैकुंठस्यहेमकूटपर्व्वतेगयायांलोहदंडतयाख्याते
गिरौश्राद्धंकार्य्यम् धर्म्मशिलादक्षिणभागस्थगृध्रकूटगिरौशिवपुरप्राप्तिकामनयागृध्रेश्वरदर्शनम् ॥ स्वर्गकामनयातत्रत्यगृध्रवटप्रणामः ॥
पितृलोकप्राप्तिकामनयातत्रत्यायांगृध्रगुहायांश्राद्धम्॥तत्रत्यायांमाहेश्वरीधारायांचपितृस्वर्गकामनयाश्राद्धम्।ब्रह्मलोकप्राप्तिकामनयामूल
क्षेत्रसरसिस्नानम्।स्वस्यशिवत्वकामनयाऋणमोक्षेश्वरपापमोक्षेश्वरदर्शनंकार्य्यम्। धर्म्मशिलायामुत्तरस्थदिक्पालस्थितस्यगजरूपिविघ्ने
शस्यनिजमुक्तिपितृशिवपुरप्राप्तिकामनयादर्शनंकार्य्यम् ॥ स्वर्गकामनयास्नात्वागायत्रीगयादित्योर्दर्शनम्।पितृतारणकामनयातत्पर्व्वत
स्थब्रह्मदर्शनम्॥पितॄणांब्रह्मपुरप्राप्तिकामनयागयानाभौश्राद्धंपापनाशकामनयामुंडपृष्ठाद्रौरवेरिंद्रादेश्चदर्शनम्॥ क्रौंचपादाद्रिगतजलाशये
पितृमातामहश्वशुरकुलानांस्वर्गकामनयाश्राद्धंकार्य्यम्॥ततोगयाप्रदक्षिणाकार्य्या॥ततोवित्तानुसारेणगदाधरंसंपूज्य ॥ ॐगदाधरंकलिग
तकल्मषापहं गयागतंविदितगुणंगुणातिगम्॥गुहागतंगिरिवरगेहगोपितं सुरार्च्चितंवरदमहंनमामितम्॥१॥शुभश्रियंत्रिदशगणादिसुश्रियं

यशःश्रियंदितिभयदारणश्रियम् ॥ कलागतंकलिकलमर्दनश्रियं दृढादृढंपरिवृढगाढशक्तिभिः ॥ २ ॥ विदेहकंकरणकलाविराजतं विय
न्मरुद्धिमकरवारिभूषितम्॥गदाधरंध्वनिमुखवर्जितंपरं नमाम्यहंपरममनादिदेवम् ॥ ३ ॥ मनोगतंमतिगतिवर्जितंत्वजं शमात्मकंश्रुति
शिरसिस्थितंबुधम्॥चिदात्मकंकलिगतकारणातिगं गदाधरंहृदयगतंनमाम्यहम् ॥४॥ इतिब्रह्मकृतेनस्तोत्रेण ॥ ॐ अव्यक्तरूपोयोदेवो
मुंडपृष्ठाद्रिरूपकृत ॥ फल्गुतीर्थादिरूपेण तंनमामिगदाधरम् ॥ १ ॥ व्यक्तरूपोहियोदेवो जनार्दनस्वरूपतः ॥ मुंडपृष्ठेस्वयंह्यस्ति
तंनमामिगदाधरम् ॥ २ ॥ शिलायांब्रह्मरूपिण्यां स्थितंब्रह्मादिभिःसुरैः ॥पूजितंसत्कृतंदेवैस्तंनमामिगदाधरम् ॥ ३ ॥ महादेवंचजगतो
व्यक्तस्यैकंहिकारणम् ॥ अव्यक्तज्ञानरूपंतं नमाम्यादिगदाधरम् ॥४॥ यंचदृष्ट्वातथास्पृष्ट्वा पूजयित्वाप्रणम्यच ॥ श्राद्धादौब्रह्मलोकाप्ति
स्तंनमामिगदाधरम् ॥ ५ ॥ देहेंद्रियमनोबुद्धिप्राणाहंकारवर्जितम्॥ जाग्रत्स्वप्नविनिर्मुक्तं नमाम्यादिगदाधरम् ॥६॥ नित्यानित्यविनि
र्मुक्तं सामान्यानंदवर्जितम् ॥ तुरीयंज्योतिरात्मानं तंनमामिगदाधरम् ॥७॥ इतिरुद्रकृतेनचस्तवेनस्तुवीत ॥ ततः ॐआगतोस्मिगयां
देव पितृकार्य्येगदाधर॥त्वमेवसाक्षी भगवन्ननृणोऽहमृणत्रयात्॥इतिप्रार्थयेत्॥एवंगयायात्रां कृत्वास्वगृहमागत्यकृतगयायात्रायाःपरि
पूर्णकामोगणेशस्वेष्टदेवतानांपूजनंविधायघृतान्नेनवृद्धिश्राद्धंकुर्य्यात् ॥ ततोब्राह्मणान्भोजयित्वादक्षिणाभिस्तान्संतोष्यइष्टैःसहस्वयंभो
जनंकुर्य्यात्॥ॐतत्सच्छ्रीगदाधरायनमः॥इतिवाय्वग्निपुराणवाचस्पतिमिश्रादिकृतपद्धत्युक्तगयाश्राद्धपद्धतिःसमाप्ता ॥ इतिश्रीबीकानेर
विषयांतर्गतश्रीरत्नगढनगरनिवासिनाश्रीवसिष्ठकुलोद्भवश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुनाश्रीमहादेवभक्तवाजसनेयिनागौडपण्डित
श्रीचतुर्थीलालशर्मणाविरचितेगौडीयश्राद्धप्रकाशेमहानिबंधेपद्धतिखंडस्यपूर्वार्धेचतुर्थप्रकरणंसमाप्तम्॥४॥समाप्तोयंपद्धतिखंडस्यपूर्वार्द्धः॥

अथ प्रेततृप्तिकरः पद्धतिकल्पः ॥ अत्रमरणसमयादारभ्यसांवत्सरिकान्तंकर्म्मउच्यते ॥ तत्रतावत्पुत्रादिरासन्नमृत्युं पित्रादिकंज्ञात्वा पापानुसारेण षडब्दं वात्र्यब्दं सार्द्धाब्दंवाप्राजापत्यंवातत्प्रत्याम्नायांश्चप्रतिप्राजापत्यंगायत्र्ययुतजपंवासहस्रगायत्र्यातिलहोमंधेनुदानं पादचारेण तीर्थयात्रा वाद्वादशब्राह्मणभोजनं सुवर्णरूप्ययोर्निष्कं तदर्द्धंवा गोवृषमूल्यं यथाशक्त्यनुरूपंप्रायश्चितं तद्द्वाराकारयेत्॥तद शक्तौस्वयंवाकुर्यात्।तत्रप्रयोगः॥गंगादितीर्थेगत्वायथाविधिस्नात्वाशुद्धेशुक्लवाससीपरिधाय।बद्धशिखःकृततिलकःसपवित्रकरः पूर्वाभिमु खउपविश्य।आचम्यप्राणानायम्य।देशकालौसंकीर्त्यसकलपातकनिवृत्तिकामः श्रीविष्णुपूजनपूर्वकंदेहशुद्ध्यर्थंप्रायश्चित्तमहंकरिष्ये।इति संकल्प्य॥ॐसहस्रशीर्षापुरुषइतिपुरुषसूक्तेनदेहन्यासंकृत्वाषोडशोपचारैःश्रीमहाविष्णुंसंपूज्यविप्रपूजांकुर्यात्॥ ततःपुनर्देशकालौसंकी र्त्य ॥ ॐ अमुकगोत्रोऽमुकशर्माहंममजन्मप्रभृतिअद्यदिनंयावत् ज्ञाताऽज्ञातकामाऽकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिक स्पृष्टाऽस्पृष्टभुक्ताऽभुक्तपीताऽपीतमहापातकोपपातकसङ्करीकरणमलिनीकरणाऽपात्रीकरणजातिभ्रंशकरणप्रकीर्णानां सकलपातकानां निरासार्थंश्रीपरमेश्वरप्रीत्यर्थममुकप्रायश्चित्तममुकप्रत्याम्नायद्वारायथाकालंकरिष्ये ॥इतिसंकल्प्य॥यथाशक्तिषडब्दादिपूर्वोक्तंप्रायश्चित्तं कुर्यात्॥अस्मिन्दिनेउपवासः॥अशक्तस्यहविष्यान्नेननक्तव्रतम् ॥ ततोदशदानानिकुर्यात् ॥यथा॥ गोभूतिलहिरण्याज्यवासोधान्यगुडा निच॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमात् ॥१॥ एतानिदशदानानिविप्रेभ्योयथाशक्तिदद्यात् ॥ निर्द्धनश्चेत्तीर्थयात्रादिकुर्यात्॥ततो वैतरणीधेनुदानम्॥तद्यथा॥देशकालौसंकीर्त्य ॥ ममयमद्वारस्थितवैतरणीनद्याः सुखोत्तारणार्थं वैतरणीधेनुदानंकरिष्ये ॥ इतिसङ्कल्प्य

१ षडब्दे प्राजापत्यानि १८० त्र्यब्दे ९० सार्द्धाब्दे ४५ अब्दे प्राजापत्यानि ३०

द्रोणप्रमाणकार्पासशिखरोपरिताम्रपात्रेहैमंयमंस्थाप्यषोडषोपचारैः संपूज्यतत्रेक्षुदंडमयींनौकांपट्टसूत्रेणबद्धातत्रस्थांकृष्णांधेनुंसवत्सांसं
पूज्यब्राह्मणंवृत्वासंपूज्यप्राङ्मुखोगोपुच्छंसतिलजलयुतंगृहीत्वादेशकालौसंकीर्त्यॐअमुकगोत्रोऽमुकशर्माहंममपरलोकेवैतरणीतरणार्थमि
मांगांसवत्सांसुवर्णशृङ्गरौप्यखुरकांस्यपानीयपात्रपैत्तलदोहेनकृष्णवस्त्रयुगसप्तधान्यच्छत्रोपानहाद्युपस्करयुतामसुकगोत्रायामुकशर्मणेब्राह्म
णायतुभ्यमहंसंप्रददे ॥ इत्युक्त्वाविप्रहस्तेजलंक्षिप्त्वामंत्रौपठेत्॥ॐयमद्वारेमहाघोरेकष्टांवैतरणींनदीम्॥ततुंकामोददाम्येतांतुभ्यंवैतरणीं
चगाम् ॥१॥ विष्णुरूपद्विजश्रेष्ठ भूदेवपङ्क्तिपावन॥सदक्षिणामयातुभ्यं दत्तावैतरणीचगौः॥इतिप्रार्थ्य ॥ ॐअद्यकृतैतद्धेनुदानप्रतिष्ठासि
द्धयर्थमिदंहिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे॥इतिसुवर्णदक्षिणांदत्वानमस्कृत्यप्रदक्षिणांकुर्यात्॥ ततः
ॐधेनुकेत्वंप्रतीक्षस्व यमद्वारेमहाभये ॥ उत्तितीर्षुरहंदेवि वैतरण्यैनमोनमः॥इतिनत्वा यमप्रतिमादि सर्वनिवेद्य अनुगत्वा विसृजेत्॥
स्वयमशक्तोपुत्रादिद्वारावाकारयेत्॥इति वैतरणीधेनुदानम् ॥अथमहाष्टौदानानि॥तिलालोहं हिरण्यंच कार्पासं लवणं तथा॥सप्तधान्यं
क्षितिर्गावो महादानानिचाष्टवै॥१॥तत्र विधिः ॥ देशकालौसंकीर्त्य॥अमुकगोत्रोऽमुकशर्माहं इमानितिलादीन्यष्टौमाहादानानिसोमादि
दैवतानिसदक्षिणाकानि तत्तत्प्रदानफलावाप्तये श्रीविष्णोः प्रीतयेनानानामगोत्रेभ्योब्राह्मणेभ्योऽहंसंप्रददे॥इतिसंकल्प्ययथाचारंदद्यात्॥
ततः ॥ शक्तौपत्यां तिलपूर्णताम्रपात्रं मोक्षधेनुम् ऋणधेनुम् पापधेनुम् उत्क्रान्तिधेनुंचदद्यात् दुर्मरणमृतेप्रायश्चित्तंसंकल्प्यकुर्यात ॥ ॥ १४९ ॥
अथदुर्मरणनिमित्तप्रायश्चित्तानि ॥ शृङ्गि, दंष्ट्रि,नखि,शस्त्रघात,सर्प,जलेमग्न,कण्ठेग्राह,विषभक्षण,अग्निदग्ध,विप्रमारित,आत्मघात,
चांडालहस्तमरण, चौरशत्रुम्लेच्छादिनामारित, वृक्षारोहणादि, बंदिगृहेमरण, पाशमरण, विषूचिकाभूतशाकिनीक्षेत्रपालादिग्र

हैर्ग्रस्त, गजशकटादिभिर्हत, कुष्ठक्षयापस्मारभगंदरजलोदरगंडमालापांडुरोगादिमहारोगैः पीडितमरण, मूत्रपुरीषस्थाशौच मरणाद्यनेकदुष्टमरणान्यतममरणे कृच्छ्रचांद्रायणद्वयम् ॥ अथवा पंचदशप्राजापत्यं शक्तौसत्यां प्रतिप्राजापत्यमेकैकांवा ग म् ॥ अथवाप्रतिप्राजापत्यमयुतगायत्रीजपं प्राणायामशतद्वयंवा तीर्थयात्रायोजनं ब्राह्मणभोजनादिद्वारावाशुद्धिंसंपाद्य दाहादिकं कुर्यात् ॥ एवमेवऊर्द्ध्वोच्छिष्टाधोच्छिष्टोभयोच्छिष्टास्पृष्टाऽस्पृष्टे खट्वान्तरिक्षमरणेचांडालक्रव्यादस्पर्शैरात्र्यन्तरितेशवेकृमिकीटोद्भवेदोषशक्त्य नुसारेणत्रीन्षट् द्वादश पंचदश वाप्राजापत्यानि चांद्रायणत्रयंवातत्प्रत्याम्नायभूतधेन्वादिकं प्रायश्चित्तं संकल्प्य॥ सूतकान्तेकुर्यात् ॥ एवंकर्ताप्यधिकाराभावेयथाशक्तिकृच्छ्ररूपप्रायश्चित्तप्रत्याम्नायेनआत्मनः शुद्धिंसंपाद्यदहनादि कुर्यात्॥तत्रैवंप्रयोगः ॥ अमुकगोत्रस्य अमुकप्रेतस्य सर्पदष्टमृतस्यसर्पदष्टमरणजनितपापनिवृत्त्यर्थं दाहाद्यौर्द्ध्वदेहिककर्मयोग्यताप्राप्त्यर्थं पंचदशप्राजापत्यानां प्रत्याम्नायेन प्रतिपाजापत्यमयुतगायत्रीजपं ब्राह्मणभोजनादिद्वारावाप्रायश्चित्तंसूतकान्तेकरिष्यामि इतिमनस्युद्दिश्यसूतकान्ते कुर्यात्॥एवमेवपूर्वो क्तशृंग्यादिदुर्मरणेषुज्ञेयम् ॥ एवंपुत्रादिर्मृतस्यदक्षिणपार्श्वेदक्षिणामुखउपविश्य देशकालौ संकीर्त्य ॥ अमुकगोत्रस्यामुकप्रेतस्यऊर्द्ध्वो च्छिष्टाऽधोच्छिष्टोभयोच्छिष्टस्पृष्टास्पृष्टमरणखट्वान्तरिक्षमरणादिजनितदोषप्रत्यवायपरिहारार्थंपंचदश द्वादश षट्त्रीन् वाकृच्छ्रान् यथाशक्ति प्रायश्चित्तममुकप्रत्याम्नायेनसूतकान्ते करिष्यामि ॥ इति संकल्प्य सूतकान्तेकुर्यात्॥इतिदुर्मरणप्रायश्चित्तम्॥अथमरणसमय कृत्यम् ॥ तत्र तावत्स्वयं गोमयोपलिप्तायांभूमौतिलकुशगंगादितीर्थरजऊर्णावस्त्रा दयुतायाम् उपविष्टो दक्षिणशिरःशायितोवा गोपी चंदनादिकृततिलकःश्रीविष्णुंस्मरन् ईशावास्यं पुरुषसूक्तंगीतांसहस्रनामादिस्तोत्राणिपठेत् शृणुयाद्वा ॥ तद्यथा ॥ देशकालौ संकीर्त्य

मम अमृतत्वप्राप्त्यर्थं पुरुषसूक्तस्तोत्रादीनांपाठं श्रवणंवा करिष्ये ॥ इति संकल्पः ॥ श्रोतुःसंकल्पाशक्तौ॥श्रावयिता॥ ॐ अस्यामुकशर्म
णोऽमृतत्वप्राप्तये अमुकंश्रावयिष्ये इति संकल्प्यपुरुषसूक्तम् ईशावास्यमुपनिषद्भगवतानिगीतासहस्रनामादीनिपुण्यस्तोत्राणिरामकृष्ण
माधवनारायणादिनामानिच श्रावयेत्॥ततःप्राणोत्क्रमणसमये पुत्रादिरधिकारी गंगादितीर्थसमीपे अथवास्वगृहे तुलसीशालग्रामसमी
पे गोमयोपलिप्तायांभूमौ गंगोदकादिशुद्धजलेनसंस्नाप्य॥अहतधौतशुक्लवाससीपरिधाप्य नूतनयज्ञोपवीतपुष्पमालारुद्राक्षधात्रीतुलसीप
त्राद्यैरलंकृत्यचंदनगंगामृत्तिकादिनाऽनुलेपयेत् ततःपुत्रादिःस्वोत्संगस्थापितशिरसः अपगतप्राणस्य मुखे नासिकाद्वये चक्षुर्द्वये श्रोत्रद्व
येच पंचरत्नानिसुवर्णशकलानिवा तदभावेघृतबिंदून्वाक्षिप्त्वा वस्त्रेणाच्छाद्यदर्भवत्यांभूमौतिलान् विकीर्य तत्र उदक्शिरसंस्थापयेत्॥अथ
प्राणोत्क्रमणानन्तरं कर्त्ताऽन्येचकनिष्ठपुत्रादयो दक्षिणमुखाः स्वनखकक्षोपस्थवर्जंलोमानिवापयेयुः॥ कर्त्तुर्व्यतिरिक्तानां दशमेहनिवाव
पनम्॥ततोवपनानन्तरंस्नात्वा ॥ अहतेवाससीपरिधाय (गतासुंघृतेनाभ्यज्य) नूतनजलपूतेकुंभे ॥ ॐ गयादीनिचतीर्थानि येचपुण्याः
शिलोच्चयाः।कुरुक्षेत्रंचगंगांचयमुनांचसरिद्वराम्॥कौशिकांचंद्रभागांचसर्वपापप्रणाशिनीम्॥भद्रावकाशांसरयूंगंडकींतमसांतथा।वैणवंच
वराहंच तीर्थंपिंडारकंतथा ॥ पृथिव्यांयानितीर्थानि चतुरःसागरांस्तथा॥एतानि मनसा ध्यायञ्जले सर्वतीर्थान्यावाह्यतेनजलेनशवंसंस्ना
प्य॥अहतवस्त्रपरिधानंगंगोदकमिश्रितचंदनादिनासर्वाङ्गप्रोक्षणं पुष्पैरलंकरणंचकृत्वाशुचिदेशेविहितकाष्ठरचितचितायामास्तीर्णकुशायामु
त्तानं शवंस्थापयेत॥अथ पिंडप्रयोगः॥पुत्रादिरपसव्यादिकृत्वामृतदक्षिणपार्श्वे दक्षिणाभिमुख उपविश्यदेशकालौ संकीर्त्य॥अद्यामुकगो
त्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्याउत्तमलोकप्राप्त्यर्थंमौर्ध्वदेहिकंकरिष्येइत्युक्त्वादक्षिणाग्रंकुशत्रयमास्तीर्य॥ अद्यामुकगोत्रामुकप्रेतअत्रावनेनि

॥१६०॥

क्ष्वतेमयादीयतेतवोपतिष्ठतामित्यवनेजनंदत्त्वा।यवादिचूर्णनिर्मितं पिंडंगृहीत्वाअद्यामुकगोत्रअमुकप्रेतमृतिस्थानेशवनिमित्तब्रह्मदैवतोव। एषतेपिंडोमयादीयतेतवोपतिष्ठताम् इत्येकंपिंडं प्रत्यवनेजनंचदत्त्वा प्रेतवस्त्रेपिंडंबद्धागृहद्वारानयेत्।तत्रपूर्ववत्कुशास्तरणमवनेजनंचदत्त्वा।अद्यामुकगोत्राऽमुकप्रेत द्वारदेशेपांथनिमित्तविष्णुदैवतोवा एषतेपिंडोमयादीयतेतवोपतिष्ठतामितिपिंडंदद्यात्।अथानन्तरंपुत्राऽनुजादयश्च कृतापसव्यामुक्तकेशाबालपुरःसराः मृन्मयादिस्थालीस्थं यथाचारं लौकिकाग्नियवपिंडादिकंचगृहीत्वा यमगाथांगायन्तः शवंप्रच्छादितमुखंप्राक्शिरसमूर्ध्वमुखम् अरण्येश्मशानदेशंप्रतिनयेयुः।अथचत्वरेखेचरनिमित्तपिंडदानम्।तत्रदक्षिणाग्रंकुशत्रयास्तरणमवनेजनंच कृत्वा॥अद्यामुकगोत्राऽमुकप्रेत चत्वरेखेचरनिमित्तएषतेपिंडोमयादीयतेतवोपतिष्ठतामितिपिंडंप्रत्यवनेजनंचदद्यात् ॥एवमेवग्रामश्मशानयोर्मध्येविश्रामे ॥ अद्यामुकगोत्राऽमुकप्रेतविश्रान्तौ भूतनाम्ना रुद्रदैवतोवा एषतेपिंडोमयादीयतेतवोपतिष्ठतामितिविश्रामपिंडंदद्यात्॥ ततः सर्वेबांधवाः अप्रावरणा वृद्धादयः प्रेतमनुगच्छेयुः ॥ मृतद्विजंस्वजातीयेषुतिष्ठत्सुनशूद्रानयेयुः ॥ नमृतंशूद्रंद्विजाश्च ॥ अनाथविप्रप्रेतनिर्हरणेपदेपदेऽश्वमेधयज्ञसमफलम् ॥ द्विजसंस्कारेपयुक्ताग्नितृणकाष्ठघृतादिशूद्रानयनंनिषिद्धम् ॥ द्विजशवंशूद्रोनस्पृशेत् ॥ स्वगृहेमृते ब्राह्मणोनगरपश्चिमद्वारेण क्षत्रियः उत्तरेण वैश्यः पूर्वेण शूद्रोदक्षिणेनद्वारेणनेयः॥अथश्मशानदेशंप्राप्यशुचिदेशे शनैर्दक्षिणशिरसंशवंस्थापयेत् ॥ ततश्चितास्थाने वायुनाम्ना पिंडदानम् ॥ तत्रादौकुशत्रयंधृत्वा॥अद्यामुकगोत्र अमुकप्रेत अत्रावनेनिक्ष्वते

१ (यमस्मृतौ) यस्यानयति शूद्रोग्निं तृणकाष्ठहवींषि च ॥ प्रेतत्वं च सदा तस्य स चाधर्मेण लिप्यते ॥ (देवलः) चाण्डालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् ॥ पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः ॥ (मनुः) अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंपर्कदूषिता ॥ अथ प्रायश्चित्तं कृच्छ्रत्रयम् ।

मयादीयतेतवोपतिष्ठतामित्यवनेज्य ॥ अद्यामुकगोत्राऽमुकप्रेतचितास्थानेवायुनिमित्तकयमदैवतोवा एषपिंडोमयादीयतेतवोपतिष्ठता मितिपिंडंदत्त्वाप्रत्यवनेजनंदद्यात्॥ततः खननसंप्लावनादिभिः शोधनोपायैर्भूमिंसंशोध्य गोमयोदकेनप्रोक्ष्य तत्रगंगादीनितीर्थानिमनसा ध्यात्वातदुपरिकुशतिलानास्तीर्य तत्रचंदनादियज्ञियकाष्ठैः श्रीफलादिभिश्चदहनपर्याप्तंदक्षिणोत्तरायतं दारुचयंकारयेत् ॥ ततश्चिताकाष्ठं जलेनप्रोक्ष्यतत्रदक्षिणशिरसं सवस्त्रमुत्तानमुखंशवंचितौनिदध्यात् ॥ ततः शिरःप्रदेशेशुद्धभूमौवेदींकृत्वा पंचसंस्कारान्संपाद्यतत्रक्रव्यादसंज्ञकमग्निंप्रज्वाल्यक्रव्यादायनम इतिगंधमाल्यादिभिः संपूज्य ॥ लोमभ्यइत्याद्यनुवाकेनप्राचीनावीतिनाएवआज्यहोमंकुर्यात्॥ [1]लोमभ्यः स्वाहा २इदंलोमभ्योनमम । त्वचेस्वाहा २ इदंत्वचे०। लोहिताय० २इदं०।मेदोभ्यः०२इदं०।मांसेभ्यः०२इदं०।स्नायुभ्यः०२ इदं०। अस्थिभ्यः० २ इदं०। मज्जाभ्यः० २ इदं०। रेतसे० १ इदं०। पायवे० १ आयासाय० १ प्रायासाय० १ संय्यासाय० १ वियासाय० १ उद्यासाय० १ शुचे० १ शोचते० १ शोचमानाय० १ शोकाय० १ तपसे० १ तप्यते० १ तप्यमानाय० १ तप्ताय० १ घर्माय० १ निष्कृत्यै० १ प्रायश्चित्यै० १ भेषजाय० १ यमाय० १ अन्तकाय० १ मृत्यवे० १ ब्रह्मणे० १ ब्रह्महत्यायै० १ विश्वेभ्योदेवेभ्यः० १ द्यावापृथिवीभ्याᳲस्वाहा १इदंद्यावापृथिवीभ्यांनमम ३४ इत्याज्याहुतीर्हुत्वा शवहस्तेसाधकनाम्नापिंडदानम् ॥ अद्यामुकगोत्रअमुकप्रेतशवहस्तेसाधकनिमित्तप्रेतदैवतोवा एषतेपिंडोमयादीयतेतवोपतिष्ठतामितिदद्यात् ॥ ततः पुत्राः पौत्राश्चयथाचारं बहुलतृणानिगृहीत्वा अग्नौप्रज्वाल्यप्रदक्षिणंपरिक्रम्यमंत्रद्वयेनशिरःस्थानेअग्निंदद्यात् ॥ तत्रमंत्रः ॥ कृत्वातुदु

१ अयं होमः कासुचित्पद्धतीषु नोक्तस्तथाऽपि दाल्भ्यकृतपद्धतावुक्तत्वाच्छिष्टैरङ्गीकृतत्वाच्चास्माभिर्लिखितः ॥

॥१६१॥

ष्कृतंकर्म्मंजानतावाप्यजानता ॥ मृत्युकालवशंप्राप्य नरंपंचत्वमागतम् ॥१॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम्॥दहेयंसर्वगात्राणि दिव्याँल्लोकान्सगच्छतु ॥ २ ॥ इतिप्रज्वाल्य ॥ त्वंभूतकृज्जगद्योने त्वंलोकपरिपालकः ॥ उक्तःसंहारकस्तस्मादेनंस्वर्गंमृतंनय ॥ इतिप्रार्थ्य गाढंरोदनंकुर्यात्॥ततोऽर्धेदग्धे काष्ठेन शवमस्तकंभित्त्वा अस्मात्त्वमधिजातोऽसि त्वदयंजायतांपुनः ॥ असौस्वर्गायलोकाय स्वाहाज्वलतुपावके॥इतिसतिलाज्याहुतिंदत्त्वासजलंकुंभमादायपादतोऽप्रदक्षिणंत्रिःपरिक्रम्ययथाचारमश्मनाकुंभंभित्त्वाततःप्रेतदाहानन्तरंसर्वैंशवस्पृशः शवानुगमनकर्त्तारश्चचितांवामावर्तेन परावृत्यन्यावर्त्यप्रेतमनवेक्ष्यमाणाः कनिष्ठपूर्वाः स्नानार्थं नद्यादिकेगच्छेयुः ॥ तत्रोदकसमीपंगत्वा परिहितवस्त्रंप्रक्षाल्यतदेवपरिधाय समीपस्थंश्यालकमन्यंवा उदकंकरिष्यामहे इत्युदकंयाचेत्।कुरुध्वमितिप्रत्युक्ते पुत्रादयः सपिंडाः सामानोदकाश्चयथावृद्धमुदकंप्रविश्य एकवस्त्राः प्रकीर्णकेशाः प्राचीनावीतिनः वामानामिकया अपनःशोशुचदघमिति जलमालोडयदक्षिणमुखास्तूष्णींसकृन्निमज्जेयुः अंगंचनविघर्षैयुः ॥ अथसूक्तम् ॥ अपनः शोशुचदघमग्नेशुशुग्ध्यारयिम् ॥ अपनः शोशुचदघम् १ सुक्षेत्रियासुगतायावसूयाचयजामहे ॥ अप० २ प्रयद्भन्दिष्ठएषांप्रास्माकासश्चसूरयः ॥ अप० ३ प्रयत्तेअग्नेसूरयोजायेमहिप्रतेवयम् ॥ अप० ४ प्रयदग्नेःसहस्वतोविश्वतोयांतिभानवः ॥ अप० ५ त्वंहिविश्वतोमुखविश्वतःपरिभूरसि ॥ अप० ६ द्विषोनोविश्वतोमुखातिनावेवपारय ॥ अप० ७ सनःसिंधुमिवनावयातिपर्षास्वस्तये ॥ अपनः शोशुचदघमिति ८ ऋग्वेदोक्तम् ॥ ततोद्विवाससआचम्य ॥ जलेपाषाणपृष्ठेवाशुचितीरदेशेदक्षिणाग्रकुशत्रयोपरिऋजुंदर्भतिलपूर्णांजलिनापितृतीर्थेनप्रेतमु

१ मैथिलरुद्रधरेणात्र मोटकं लिखितं तन्निर्मूलत्वादसत ॥ प्रेतश्राद्धेषु भ्रांत्यापि मोटकं न ग्राह्यम् ॥

द्दिश्य ॥ अद्यामुकगोत्राऽमुकप्रेतएषतिलतोयांजलिस्तेमयादीयतेतवोपतिष्ठतामितिसर्व्वेंएकैकमंजलित्रयोदशवा।यथाचारंनिषिंचेयुः ॥ गोत्रस्त्रियोऽपिदद्युः॥इयंजलदानक्रिया।दशमपुरुषपर्यंतंकर्त्तव्या॥समानग्रामवासेयावद्वासंबंधमनुस्मरेयुस्तावत्तर्प्पयेयुः॥ श्वशुरमातामह मातुलाचार्यशिष्यसहाध्यायिमित्रदुहितृभगिनीभागिनेयराजर्त्विजांतद्धितैषिभिःकाम्यमुदकदानंकर्त्तव्यम्।क्लीबभर्तृगर्भहर्तृस्त्रीपतितैरुद कंनकार्य्यम्।ततःसव्यंकृत्वाऽऽचम्यशिखांबद्ध्वाउदकादुत्तीर्यस्नानवस्त्रंनिष्पीडचशुचौदेशेशाड्वालवत्युपविष्टान् सपिंडान् अन्येसुहृदः। इतिहासपुराणादि विविधकथाभिः संसाराऽनित्यतांदर्शयन्तोवदेयुः। माशोकंकुरुतानित्ये सर्वस्मिन्प्राणधर्मणि।धर्म्मंकुरुतयत्नेनयोवःसह गमिष्यति ॥१॥ मानुष्येकदलीस्तंभनिःसारेसारमार्गणम् ॥ यःकरोतिससंमूढो जलबुद्बुदसन्निभे ॥२॥ गंत्रीवसुमतीनाशमुदधिर्दैवता निच ॥ फेनप्रख्यःकथंनाशं मर्त्यलोकोनयास्यति ॥ ३ ॥ पंचधासंभृतःकायो यदिपंचत्वमागतः ॥ कर्मभिःस्वशरीरोत्थैस्तत्रकापरिदेव ना ॥४॥ सर्वेक्षयान्तानिचयाः पतनांताःसमुच्छ्रयाः ॥ संयोगाविप्रयोगांता मरणांतंहिजीवितम् ॥५॥ ततः पश्चादनवलोकयंतोऽधोमु खाः कनिष्ठानग्रतःकृत्वा ॥ अहरहर्नयमानो गामश्वंपुरुषंपशून्। वैवस्वतोनतृप्यति सुरापइवदुर्मतिरिति यमगाथांगायंतोयमसूक्तंचजपंतः पङ्क्तीभूताःग्रामंप्रत्यायान्ति ॥ (रात्रौमृतानां रात्रावेवदाहः रात्र्यन्तरितेदोषश्रवणात्) ॥ ततोगृहद्वारसमीपेस्थित्वा निंबपत्राणिदंतैर्विदश्या चम्यगोमयसर्षपवृषांबुदूर्वाग्नीन्स्पृष्ट्वापादेनपाषाणमाक्रम्यगृहंप्रविशेयुः॥वृद्धाःशोकापनोदनंकुर्युः ॥ अथज्ञातीनांयमनियमाः॥ब्रह्मचारिण अधःशायिनःअधउपवेशिनःपरस्परमसंस्पृष्टाःदानाध्ययनवर्जिताःमलिनादीनाःअधोमुखाःसर्वभोगवर्जिताः अंगसंवाहनं केशसंमार्जनं

१ अपेताध्यायो यमसूक्तम् ॥ २ रात्रौदाहो देशाचाराऽविरोधेन कार्यः।

चाकुर्वंतः प्रेतक्रियावर्जमनावश्यकंनकिंचित्कुर्युः ॥ शक्त्यात्रिरात्रमेकरात्रंवाउपवसेयुः ॥ अशक्तौएकान्नव्रीहियवाद्यक्षारलवण
माषान्नापूपपायसवर्जितम् एकवारं कृत्वालब्ध्वावादिनात्थयेदिवैवाल्पमश्नीयुः नरात्रौ ॥ भोजनकालेभोज्यौदनाद्भुक्तमुच्छिष्टमादाय प्रेत
स्यनामगोत्रमुच्चार्य प्रेतोद्देशेनभूमौक्षिपेत् ॥ एतेनियमाः त्रिरात्रपर्यंतंसपिंडानांभवंति ॥ पुत्रादीनान्तु मातापिताऽऽचार्यनिपातनेदशरात्र
मेतेनियमाभवंति॥इच्छयाप्रथमादिदशाहपर्यंतंकुटुंबैःसहभोजनंचतुष्पथश्मशानगृहेषुदीपदानम्॥प्रथमदिनमारभ्यदशदिनपर्य्यंतंग्रामा
द्बहिररण्यादिषु प्रेतस्यमूर्द्धादिनिष्पत्त्यर्थंपिंडदानंकुर्यात् ॥ अथसूर्यास्तमयादूर्ध्वंरात्रावन्तरिक्षेक्षीरोदकदानम् ॥ तत्रत्रिकाष्ठिकायामेक
स्मिन्नपक्वेमृन्मयेपात्रेउदकंद्वितीयेचक्षीरंकृत्वाप्राचीनावीतीदक्षिणामुखउपविश्य।अमुकगोत्रस्यामुकप्रेतस्यआप्यायनार्थंतापोपशमनार्थं
चाकाशेमृन्मयेपात्रेक्षीरोदकयोर्निधानमहंकरिष्ये इतिसंकल्प्य॥श्मशानानलदग्धोसि परित्यक्तोसिबांधवैः ॥इदंनीरमिदंक्षीरमत्रस्नाहि
इदंपिब ॥ इतिपठित्वा ॥ अमुकगोत्र अमुकप्रेत अनेनजलेनस्नाहि ॥ अमुकगोत्र अमुकप्रेत अत्रक्षीरंपिब इतिनिवेदयेत् ॥ एतत्क्षीरो
दकंनिधानमेकाहंवादिनत्रयंवादशाहंयथाचारंप्रत्यहंरात्रौकर्त्तव्यम् ॥ ततोगृहागमनम्॥इतिदाहप्रकरणम ॥ अथप्रथमदिनमारभ्यदशाह
पर्य्यंतकर्म्मोच्यते ॥ तत्रतावदस्थिसंचयनम् ॥ तच्चप्रथमतृतीयचतुर्थसप्तमनवमेषु भौमार्कमंदतिथियुग्मैकपादद्विपादत्रिपादकर्तृ
नक्षत्रधनिष्ठादिपंचकवर्जंदिनेषुकार्यम्॥तत्रविप्राणांविशेषतश्चतुर्थेऽह्नि राज्ञांपंचमेविशानांनवमेशूद्राणांदशमदिनेकार्यम्॥ असंभवेसर्वेषां
प्रथमादिदिवसेष्वप्यस्थिसंचयः कर्त्तव्यः॥(त्र्यहाशौचेतुद्वितीयेह्निसर्वेषांसद्यःशौचेदाहानन्तरमेवकर्त्तव्यः)॥ अथास्थिसंचयनिमित्तके

कोद्दिष्टंश्राद्धम् ॥ तत्र श्राद्धदिनेसामग्रींसंपाद्य श्मशानसमीपेगत्वा शुचिभूमौश्राद्धस्थानंप्रकल्प्य गोमयोदकाभ्यामुपलिप्य गौरमृत्ति कयाऽऽच्छाद्यतिलरविकिरणंकुर्यात् ततोनद्यादिकेस्नात्वाचरुश्रपणं कृत्वा सिद्धेऽन्नेतिलतैलेनदीपंप्रज्वाल्य स्थापयेत् ॥ ततः प्राङ्मुख उपविश्य आचम्य तूष्णींप्राणानायम्य कुशोपग्रहः ॥ अपवित्रः पवित्रोवा०पुंडरीकाक्षः पुनात्वितिजलेनश्राद्धसामग्रींस्वात्मानंचप्रोक्ष येत्॥ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवामजानुः ॥ कुशत्रयतिलजलान्यादाय ॥ अमुकगोत्रस्य अमुकप्रेतस्यप्रेतत्वनिवृत्तिपूर्वक सद्गतिप्राप्त्यर्थं अस्थिसंचयननिमित्तकश्राद्धमहंकरिष्ये इति संकल्प्य॥कुशबटुंनिधाय०॥इहलोकंपरित्यज्य गतोसिपरमांगतिम् ॥ मन सावायुरूपेण चटेत्वाहंनिमंत्रये॥इति नियोजयेत्॥ततःकुशत्रयादीन्यादाय ॥ अमुकगोत्र अमुकप्रेत इदमासनं ते मयादीयते तवोपतिष्ठता मित्यासनार्थम् ऋजुकुशत्रयमुत्सृजेत् [न मोटकरूपम्] ततस्तिलान्विकीर्य एकस्मिन्पत्रपुटे पवित्रंधृत्वातत्रजलतिलगंधपुष्पाणिप्र क्षिप्य तदर्घपात्रंवामहस्तेकृत्वा पवित्रम् आसनसमीपेपलाशपत्रेधृत्वा ॥ अमुकगोत्र अमुकप्रेत एषते हस्तार्घोमयादीयतेतवोपतिष्ठता मितिपवित्रोपरि अर्घ्यंदत्त्वा अर्घपात्रं पवित्रयुतम् आसनवामपार्श्वेस्थापयेत् (न न्युब्जम्) ततोगंधादिकमासनेधृत्वा॥अमुकगोत्राऽमुक प्रेत एतानिगंधपुष्पधूपदीपतांबूलवासांसितेमयादीयंतेतवोपतिष्ठंतामित्युत्सृजेत् ॥ ततोघृताक्तमन्नमुद्धृत्यपात्रेपरिविष्यजलेनाभिषिच्य (नपात्रालंभागाहौ०नात्रपात्रालंभो नाशिषः प्रार्थयेदितिप्रचेतस्स्मरणात् तिलान्विकीर्य वामकरेणपात्रंस्पृशन् ॥ अमुकगोत्र अमुक प्रेत इदमन्नंघृताद्युपस्करसहितंतेमयादीयतेवोपतिष्ठतामित्युत्सृजेत् (नात्रपैतृकोजपः ॥ नपैतृकोजपः कार्यः इति प्रचेतस्स्मरणात्)

१ इदमेकोद्दिष्टं मंत्ररहितं कार्य्यम् ॥ मैथिलरुद्रधरेण श्राद्धविवेके समंत्रकमुक्तं तन्निर्मूलम् (तथा च हेमाद्र्यादित्यपुराणयोः) तिलमिश्रेषु दर्भेषु कर्त्ता वै दक्षिणामुखः ॥ नामगोत्रप्रमाणेन दद्यात्पिंडं त्वमंत्रकम् ॥ अशुद्धेष्वपि वर्णेषु इदं दद्यान्न संशयः ॥

ततोऽन्नपात्रसमीपेपिंडदानार्थंसिकताभिः वेदींनिर्माय गोमयोदकेनोपलिप्य कुशत्रयास्तरणंकृत्वा पत्रपुटके जलतिलगंधपुष्पाणिक्षिप्त्वा पुटकं गृहीत्वा॥अमुकगोत्र अमुकप्रेत अत्रावनेनिक्ष्वतेमयादीयते तवोपतिष्ठतामित्यवनेजनजलंकुशत्रयोपरिकिंचिद्दद्यात् ॥ ततो घृतमधुतिलयुक्तेनान्नेनपिंडनिर्मायवामहस्तेकृत्वादक्षिणहस्तेकुशत्रयादीन्यादायअद्यामुकगोत्राऽमुकप्रेतअस्थिसंचयनिमित्तकश्राद्धे एष तेपिंडोमयादीयतेतवोपतिष्ठतामिति कुशोपरिवामान्वारब्धदक्षिणहस्तेनपिंडंदद्यात् ॥ ततोहस्तौप्रक्षाल्य ॥ अमुकगोत्र अमुकप्रेत अत्र प्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामिति पूर्ववत्प्रत्यवनेजनंदद्यात् ॥ ततः पिंडोपरिसूत्रंदत्त्वा॥अमुक० प्रेत अत्र पिंडे एतद्वासस्ते मयादीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततः पिंडं गंधपुष्पधूपदीपतांबूलपूगीफलनैवेद्यादिभिः संपूज्य ॥ अमुकगोत्राऽमुकप्रेत अत्र पिंडे एतानि गंधपुष्पधूपदीपपूगीफलादीनितेमयादीयंतेतवोपतिष्ठंतामित्युत्सृजेत ॥ ततः एकस्मिन्पत्रपुटे शिवाआपः सन्तु इतिजलं सौमनस्यमस्त्वितिपुष्पम् अक्षतंचारिष्टंचास्तु इतितिलांश्चदत्त्वा ॥कुशत्रयादीन्यादाय॥अमुकगोत्रस्याऽमुकप्रेतस्ययद्दत्तमन्नपानादिकं तदुपतिष्ठतामित्यक्षय्योदकंदद्यात् ॥ ततः सपवित्रकुशत्रयंपिंडोपरिनिधाय ॥ सतिलदुग्धेनजलेनधारांदद्यात् ॥ अनादिनिधनोदेवः शङ्खचक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्ष प्रेतमोक्षप्रदोभव ॥१॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ येनमस्यंति गोविंदं नतेषां विद्यतेभयम् ॥२॥ कृष्णकृष्ण कृपालुस्त्वमगतीनांगतिर्भव ॥१॥ संसारार्णवमग्नानां प्रसीदपुरुषोत्तम ॥ ३ ॥ नारायणसुरश्रेष्ठ लक्ष्मीकान्तवरप्रद ॥ अनेनतर्पणेनाथ प्रेतमोक्षप्रदोभव ॥४॥ हिरण्यगर्भपुरुष व्यक्ताव्यक्तस्वरूपिणे ॥ अस्यप्रेतस्यमोक्षार्थं सुप्रीतोभवसर्वदा ॥ ५ ॥ इति पठित्वा अमुकगोत्र अमुकप्रेत अत्रपिंडेजलधारातेमयादीयतेतवोपतिष्ठतामिति दक्षिणाग्रांजलधारांदद्यात् ॥

ततो दक्षिणाद्रव्यंकुशत्रयादीनिचादाय ॥ अमुकगोत्रस्य अमुकप्रेतस्य कृतैतदस्थिसंचयनिमित्तकश्राद्धप्रतिष्ठार्थम् इमां रजतद
क्षिणांतन्मूल्योपकल्पितंवा द्रव्यम् अमुकगोत्रायामुकशर्मणे ब्राह्मणायदातुमहमुत्सृजे इतिदद्यात् ॥ ततः पिंडोद्धरणंचटविसर्जनं
चकृत्वा ॥ अनेनश्राद्धेन अमुकगोत्रस्यप्रेतस्यप्रेतत्वनिवृत्तिः सद्गतिप्राप्तिश्चभवतु इतिपठित्वापिंडंगवादिभ्योदत्त्वा कर्मपूर्त्तिका
मोविष्णुंस्मरेत् ॥ततःश्राद्धवस्तूनिविप्रायदद्यात॥जलेवाक्षिपेत्॥एवमस्थिसंचयनिमित्तकम्एकोद्दिष्टंविधायगंधपुष्पधूपदीपनैवेद्यादिकं
सर्वंगृहीत्वा श्मशानसमीपमागत्य चितायाउत्तरतउपविश्य ॥ क्रव्यादमुखेभ्योदेवेभ्योनमः ॥ इतिमंत्रेण श्मशानवासिदेवान्
गंधपुष्पधूपदीपादिभिः श्मशाने पूजयेत ॥ ततोबलिदानम् ॥ तत्रतावदष्टौपात्राणिनानाविधफलमूलभक्ष्यभोज्यपानादिभिः पूर
यित्वाप्रत्येकं गंधपुष्पधूपदीपादिभिरभ्यर्च्यबलीन्दद्यात ॥तत्रमंत्रः॥ येऽस्मिन्श्मशानेदेवाः स्युर्भगवंतःसनातनाः ॥ तेऽस्मत्सकाशा
द्गृह्णन्तु बलिमष्टाङ्गमक्षयम् ॥ प्रेतस्यास्यशुभाँल्लोकान्प्रयच्छंतुचशाश्वतान् ॥ अस्माकमायुरारोग्यं सुखंचददताक्षयम् ॥ इतिपठि
त्वा ॥ एषोऽष्टांगबलिः शंकरादिश्मशानवासिदेवताभ्योनमः ॥इत्युत्तरस्यामेकंबलिंदत्त्वा ॥ एवंप्रदक्षिणक्रमेण अपरबलित्रयंपूर्वादिषु
दिक्षुदद्यात् ॥ ततस्तान्बलीन्क्रमेण क्षीरेणाभ्युक्ष्य शंकरादिदेवताः स्वीयंस्वीयंस्थानंगच्छंतुइतिविसृज्यततोऽपसव्यंकृत्वावाग्यतःक्षीरो
दकेनचितिंप्रोक्ष्य शमीपलाशशाखाभ्यांचितेर्भस्मापोह्यांगुष्ठकनिष्ठाभ्यां शिरसो वक्षसोः पाण्योःपार्श्वयोःपादयोश्चअस्थीन्यादाय पंच
गव्येनप्रोक्ष्यगंगोदकेनसुगंधवारिणाचप्रक्षाल्यगंधाद्यर्चितानि॥ पलाशपुटेनिक्षिप्यपीतक्षौमवस्त्रेणावेष्ट्यचमृन्मयेनूतनकुंभेनिधायशरावेण

१ अथ ब्रह्मपुराणे पिंडत्रयदानमुक्तम् ॥ एकंश्मशानवासिभ्यः प्रेतायमध्यमं तृतीयं तस्सखिभ्यश्च इतितद्यथाचारं ज्ञेयम् ॥

पिधायतद्भांडमरण्ये वृक्षमूलेवाशैवालयुतगर्त्तेंधारयेत् ॥ ततश्चिताभस्मादिसर्व्वंनद्यादितोयेनिक्षिप्यचिताभूमिंगोमयेनविलिप्य तत्र पूर्वो
क्तप्रकारेणगंधादिपूजांकृत्वा बलिमंत्रेण बलिचतुष्टयंदद्यात् ॥ तान्बलीन्क्षीरेणाभ्युक्ष्य देवताविसृजेत् ॥ ततश्चिताभूमेराच्छादनार्थं
लोकाचारात्कुटीं विश्रामार्थंवृक्षंवापाषाणकाष्ठादिभिः स्थानंकारयेत्॥ ततोगृहमागत्यसचैलोबंधुभिः सहस्नायात् ॥ अथगंगायामस्थिक्षे
पणविधिः॥तत्र कदाचित्तद्दिनेवा पुत्रपौत्रसहोदरादिः अस्थिकुंभमुत्पाट्यादायगंगांगत्वास्नात्वातान्यस्थीनि पंचगव्येनप्रोक्ष्य हिरण्यमु
क्ताऽऽरूप्यमृगचर्मप्रवालमध्वाज्यतिलैः संयोज्य मृत्पिंडपुटेनिधायदक्षिणांदिशंपश्यन्॥ॐनमोस्तुधर्मराजायपितुःप्रेतत्वमुक्तये॥समेप्रीतः
शुभंदद्यादस्मिँल्लोकेपरत्रच ॥ इतिवदन् जलंप्रविश्य समेप्रीतोऽस्तु इत्युक्त्वागंगांभसिनिक्षिपेत् ॥ ततः स्नात्वा जलान्निष्क्रम्य॥सूर्यायन
म इति सूर्यंपश्यन् आचम्यविप्रमुख्याययथाशक्तिहिरण्यदक्षिणांदद्यात् ॥तद्यथा॥ ॐअद्यामुकगोत्रस्य अमुकप्रेतस्यस्वर्गलोकप्राप्त्यर्थं
कृतैतदस्थिप्रक्षेपप्रतिष्ठार्थम् इदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेन दातुमहमुत्सृजे इतिसंकल्प्यदद्यात्॥ततो
गृहमागत्ययथाचारंश्राद्धतर्पणब्राह्मणभोजनादिकुर्यात ॥ एवंकृतेप्रेतक्रियाकर्त्तोः स्वर्गःस्यात्॥एवंचमातृकुलपितृकुलवर्ज्यान्यकुलोत्थ
स्यास्थिनयने धर्मबुद्ध्याचदोषाऽभावः द्रव्यादिलोभेननयतश्चांद्रायणाच्छुद्धिःइत्यस्थिसंचयनविधिःसमाप्तः ॥६॥ अथदशगात्रश्राद्धानि॥
तत्रप्रयोगः ॥ पुत्रादिर्ग्रामाद्बहिर्दैवतायतने नदीतीरे अन्यतीर्थेंवातडागादितीरेवाऽरण्ये गृहद्वारिवा शुचिदेशे यथाचारं यत्रेच्छाभव
तितत्र प्रेतस्य मूर्द्धादिनिष्पत्त्यर्थं पिंडदानंकुर्य्यात् ॥ तत्रादौनूतनमृन्मयभांडेननद्यादिकंजलमानीयस्नात्वाशुद्धवस्त्रेपरिधायकुशो
पग्रहः शुचिभूमौ पिंडदानस्थानादैशान्यां दिशिअग्निंप्रज्वाल्य तत्रतंडुलप्रसृतिद्वयं प्रक्षाल्यसुशृतंपचेत् ॥ ततः आचम्य ॥

अद्येत्यादिदेशकालौसंकीर्त्य अपसव्यं कृत्वा दक्षिणाभिमुखउपविश्य पातितसजघनवामजानुः ॥ अद्यामुकगोत्रस्य अमुकप्रेतस्य प्रथमेहनि शिरोनिष्पत्त्यर्थम् अवयवश्राद्धमहंकरिष्ये इतिसंकल्प्य ॥ गौरमृत्तिकयापिंडार्थं दक्षिणप्लुवंस्थानंनिर्माय गोमयोदके नोपलिप्य तत्रदक्षिणाग्रंकुशत्रयास्तरणंकुर्यात् ॥ ततः पत्रपुटके जलतिलगंधपुष्पाणिकृत्वा तत्पुटकंवामहस्ते कृत्वा दक्षिणहस्ते ऋजुकुशत्रयतिलजलान्यादाय अद्यामुकगोत्र अमुकप्रेतशिरःपूरकप्रथमपिंडस्थाने अत्रावनेनिक्ष्वते मयादीयते तवोपतिष्ठतामिति कुशत्रयोपरि अवनेजनंदद्यात् ॥ ततस्तिलघृतमधुदुग्धसिक्तंतप्तमेवपिंडं कुशत्रयादीनिचादाय ॥ अमुकगोत्र अमुकप्रेत शिरःपूरकप्रथमपिंडस्ते मयादीयतेतवोपतिष्ठातामितिकुशोपरि पिंडंदद्यात् ॥ ततः प्रत्यवनेजनदानम् ॥ अमुकगोत्रामुकप्रेत शिरःपूरकप्रथमपिंडे अत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिपिंडोपरिपूर्ववद्दद्यात् ॥ ततः प्रेतमुद्दिश्य तूष्णीमेवोर्णासूत्रं गंधपुष्पधूपदीपनैवेद्यतांबूलपूगीफलानिपिंडेदत्त्वा अमुक० प्रेत शिरःपूरकप्रथमपिंडे एतानि ऊर्णासूत्रगंधपुष्पधूपदीपनैवेद्यतांबूलानितेमयादीयंतेतवोपतिष्ठंतामित्युत्सृजेत्॥ततः पिंडार्चनविधेःपरिपूर्णतास्तु इतिपठित्वा ततस्ताम्रादिपात्रेजलदुग्धतिलगंधपुष्पाणिकृत्वा अमुकगोत्रप्रेतदाहजनिततृषोपशमनार्थम् एषतिलतोयांजलिस्तेमयादीयतेतवोपतिष्ठतामित्येकंत्रयं वादशकंपिण्डोपरि अंजलीःर्दद्यात् ॥ ततस्तिलतोयपात्रं पिंडसमीपेधृत्वा अमुकगोत्रप्रेत एतत्तेतिलतोयपात्रंतेमयादीयते तवोपतिष्ठतामित्येकंतिलतोयपूर्णपात्रंदद्यात् ॥ ततः शेषजलेन पिंडोपरिजलधारांदद्यात् ॥ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्षप्रेतमोक्षप्रदोभव ॥१॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ येनमस्यंतिगोविंदं नतेषांविद्यतेभयम् ॥ कृष्णकृष्णकृपालुस्त्वमगती

नांगतिर्भव॥संसारार्णवमग्नानां प्रसीदपरमेश्वर ॥३॥ नारायणसुरश्रेष्ठ लक्ष्मीकान्तवरप्रद ॥ अनेनतर्पणेनाथ प्रेतमोक्षप्रदोभव ॥ ४ ॥
हिरण्यगर्भपुरुष व्यक्ताव्यक्तस्वरूपिणे ॥ अस्यप्रेतस्यमोक्षार्थं सुप्रीतोभवसर्वदा ॥ ५ ॥ इतिप्रार्थ्य काकेभ्योबलिंदद्यात् ॥ काकोसिय
मदूतोसि गृहाणबलिमुत्तमम् ॥ इति । यमद्वारेगतेप्रेते तमाप्यायितुमर्हसि ॥१॥ बलिंदत्त्वा पिंडमुदकेक्षिपेत् ॥गवादिभ्योवादद्यात्॥ततः
पुनः स्नात्वागृहमागत्यगोग्रासंदत्त्वा ब्राह्मणमेकंभोजयेत् ॥ इतिप्रथमदिनकृत्यम् ॥ एवमेवद्वितीयादिदिवसेषु द्वितीयादिपिंडदानम् ॥
(तत्र विशेषः)॥ द्वितीयदिने अमुकगोत्र अमुकप्रेत कर्णाक्षिनासिकपूरकोद्वितीयः पिंडस्ते मयादीयतेतवोपतिष्ठताम् ॥ अमुकगोत्र
अमुकप्रेत द्वितीयदिनेद्वेतिलतोयांजली द्वेतिलतोयपात्रेचतेमयादीयेतेतवोपतिष्ठतामिति० २ ॥ तृतीयदिने गलांसभुजवक्षः पूरकस्तृ
तीयः पिंडस्तेमयादीयतेतवोपतिष्ठताम् ॥ अमुक० प्रेततृतीयदिनेत्रयस्तिलतोयांजलयस्तेमयादीयंतेतवोपतिष्ठंताम् ॥ अमुक०प्रेत त्री
णि तिलतोयपात्राणि ते मयादीयन्ते० ३ ॥ चतुर्थदिने० अमुक० प्रेत नाभिलिंगगुदपूरकश्चतुर्थःपिंडस्तेमयादीयते० ॥ अमुक० प्रेत
चत्वारस्तिलतोयांजलयस्तेमयादीयन्ते०॥ अमुक० प्रेतचत्वारितिलतोयपात्राणितेमयादीयन्ते० ४ ॥ पंचमदिने० ॥ अमुक०प्रेत पं
चमदिने जानुजंघापादपूरकः पंचमः पिंडस्तेमया०॥ अमुक० प्रेतपंचतिलतोयांजलयस्तेमया०॥अमुक० प्रेत पंचतिलतोयपात्राणिते
मयादीयंते०५॥ षष्ठदिने० ॥ अमुक० प्रेत सर्वमर्मपूरकःषष्ठः पिंडस्तेमयादीयते० ॥ अमुक० प्रेत षट्तिलतोयांजलयस्ते०॥अमुक०
प्रेत०षट्तिलतोयपात्राणितेमयादीयंते० ६॥ सप्तमदिने०अमुक० प्रेत सर्वनाडीपूरकः सप्तमः पिंडस्तेमया०॥अमुक० प्रेत सप्त तिलतोयां
जलयस्तेमयादीयन्ते०॥अमुक० प्रेतसप्ततिलतोयपात्राणितेमयादीयंते० ॥७॥ अष्टमदिने अमुक० प्रेत दंतलोमादिपूरकोऽष्टमःपिंडस्ते

मयादीयते० ॥ अमुकप्रेत अष्टौतिलतोयांजलयस्तेमयादीयंते० ॥ अमुक० प्रेत अष्टौ तिलतोयपात्राणितेमयादीयंते० ॥ ८ ॥
नवमदिने० ॥ अमुक० प्रेत वीर्यपूरको नवमः पिंडस्तेमयादीयते० ॥ अमुक० प्रेत नवतिलतोयांजलयस्तेमयादीयंते० ॥
अमुक० प्रेत नवतिलतोयपात्राणितेमयादीयंतेतवोपतिष्ठंताम्० ९ ॥ दशमदिने० अमुक० प्रेत क्षुत्पिपासापूरकोदशमः
पिंडस्तेमयादीयते०॥अमुक० प्रेत दशतिलतोयांजलयस्तेमयादीयन्ते०॥ अमुक० प्रेत दशतिलतोयपात्राणितेमयादीयंतेतवोपतिष्ठंता
मिति दद्यात ॥ १० ॥ अन्यत्सर्वंसमानम् ॥ त्र्यहाशौचेतुप्रथमदिवसेत्रीन्पिंडान्द्वितीयदिने चतुरः तृतीयदिनेपि त्रीन्पिपिंडान्द
द्यात्॥सद्यःशौचपक्षे एकस्मिन्नेवदिनेदशपिंडान्दद्यात् ॥ पाकाभावेफलमूलशाकगुडदुग्धसक्तुयवपिष्टानामन्यतमेनपिंडादेयाः॥ येनद्रव्ये
णप्रथमःपिंडोदत्तस्तत्सजातीयेनएवपिंडान्तरंदद्यात् ॥ येनपुत्रादिनाप्रथमः पिंडोदत्तःसएवपिंडान्तरमपिदद्यात् ॥ अत्रकेचिन्नवश्राद्धंवि
षमदिवसेदशाहमध्येकुर्वंति॥तत्राधिकफलंभवति॥अकरणेप्रत्यवायोनास्तिइच्छाचेत्कर्त्तव्यम्॥ विधिस्तुपूर्व्ववत्॥इतिदशगात्रश्राद्धानि॥
अथाशौचान्तदिनकृत्यम्।आशौचान्तदिनेदशमंपिंडंसमाप्यप्रेतस्पृष्टवासांसिअन्त्यानामाश्रितानांचदत्त्वामृन्मयपाकादिभाण्डानिचत्य
क्त्वागृहशुद्धिंविधायस्नात्वाकेशलोमनखान्यथाचारं वापयित्वातिलगौरसर्षपकल्केनशिरश्चोन्मृज्यशुद्धस्नानंचकृत्वावासोयुगंपरिधायआच
म्यवाग्यतो वृषभं गां सुवर्णं गोरोचनं दधि दूर्वां च स्पृष्ट्वा ब्राह्मणोऽग्निं क्षत्रियोवाहनायुधं वैश्यःप्रतोदंरश्मीन्वा शूद्रोयष्टिंच संस्पृश्यशु
द्धोभवेत ॥ अथैकादशाहदिनकर्म ॥ तत्रतावद्वृषोत्सर्गः॥तस्यप्रयोगः॥तत्रादौप्रागुदक्प्रवणेविविक्ते निर्जनेवनेगोमध्येवत्सतरीचतुष्ट
येन द्वाभ्यामेकेनवासहितंत्रिहायन मनोज्ञंदर्शनीयमुक्तगुणविशिष्टवृषभंवस्त्रमाल्यकिंकिणीघंटाहेमपट्टिकादिभिर्वृषोचितभूषणैर्भूषयित्वा

तत्रानयेत् ततःआचम्य प्राणानायम्य पूर्वाभिमुखः कुशत्रयतिलजलान्यादायदेशकालौसंकीर्त्य ॥ अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व
विमुक्ति पूर्वकाक्षय्यस्वर्गकामोमरणदिनादेकादशेह्निवृषोत्सर्गंकरिष्ये। (कार्त्तिक्यांपौर्णमास्यामाश्वयुज्यांचैत्र्यांवा रेवत्यांवृषोत्सर्गंकरणे
तुमातृपूजापूर्वकमाभ्युदयिकंकृत्वा ॐ अद्यकार्त्तिक्यामसुकगोत्रस्यास्मत्पितुरमुकशर्मणः स्वर्गलोकप्राप्तिकामोवृषोत्सर्गंकरिष्ये इत्येवं सं
कल्पः कर्तव्यः॥सपिंडनात्प्राक्एकादशाहेवृषोत्सर्गकरणेवृद्धिश्राद्धंनकुर्य्यात्।सपिंडनंविनाकाम्याभ्युदयिकयोर्निषेधात इतिसंकल्प्य।
गणेशंसंपूज्य॥ईशान्यांकलशंस्थापयेत॥तद्यथा॥ॐभूरसिभूमिरसीतिभूमिंस्पृष्ट्वा ॥ ॐ धान्यमसिधिनुहि इतिधान्यंक्षिप्त्वा तस्योपरि
ॐआजिघ्रकलशंमितिमंत्रेणताम्रमयंमृन्मयंवाकलशंस्थापयेत् ॥ ततः ॐवरुणस्योत्तम्भनमसीतिजलेनापूर्य॥ॐयाऽऔषधीःपूर्व्वाजा
ताइतिसर्वौषधीः॥ॐकाण्डात्काण्डादितिदूर्वाः॥ॐअश्वत्थेवोनिषदनमितिपंचपल्लवान्॥ॐस्योनापृथिवीनो इतिसप्तमृदः॥ॐयाःफलिनी
रितिपूगीफलम्॥ॐपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत्॥दधद्रत्नानिदाशुषे इतिपंचरत्नानि॥ॐहिरण्यगर्भइतिहिरण्यंचक्षिपेत्॥ततः
ॐवसोःपवित्रमसीतिवस्त्रंरक्तसूत्रंवावेष्टयेत्॥ॐपूर्णादर्विपरापत इतितंडुलपूरितपात्रंन्यस्य॥ॐमनोजूतिर्जुषतामितिप्रतिष्ठांकृत्वा तत्रॐ
तत्वांयामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः ॥ १ ॥ ॐ भूर्भुवः
स्वःवरुण इहागच्छइहतिष्ठ वरुणंसांगमावाहयामि इत्यावाह्य ॐवरुणायनमः इतिषोडशोपचारैः संपूज्य ॐ कलशस्यमुखेविष्णुरित्या
दिप्रार्थयेत् ॥ ततस्तदुपरिताम्रमयींरुद्रमूर्तिम् अग्न्युत्तारणपूर्वकंरुदाध्यायंजपन्स्थापयेत्॥ अथावाहनम् ॥ ॐ नमस्तेरुद्रमन्यवऽउतोतऽ

इषंवेनमं॑ऽबाहुभ्यांमुततेनमं॑ऽ १ ॐ भूर्भुवःस्वःरुद्र इहागच्छइहतिष्ठ रुद्रमावाहयामि ॥ इत्यावाह्य ॥ ॐ मनोजूतिर्जुषंतामितिप्र
तिष्ठाप्य ॐरुद्रायनमः॥इतिषोडशोपचारैःपूजयेत् ॥ अथाग्निस्थापनम् ॥ तत्रादौ हस्तेपुष्पचंदनतांबूलवासांस्यादाय देशकालौसंकीर्त्य
अद्यकर्त्तव्यवृषोत्सर्गाङ्गभूतहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्म
त्वेनत्वामहंवृणेइतिब्रह्माणंवृणुयात् ॥ ॐ वृतोस्मीतिप्रतिवचनम् ॥ यथाविहितंकर्म्मकुरुइतियजमानोवदेत् ॥ ॐकरवाणीतितत्प्रतिवच
नम्॥पुनः पुष्पचंदनतांबूलवासांस्यादाय ॐ अद्यकर्त्तव्यवृषोत्सर्गाङ्गभूतहोमकर्म्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंदनतांबू
लवासोभिर्होतृत्वेनत्वामहंवृणे इतिहोतारंवृणुयात॥ॐवृतोस्मीतिप्रतिवचनम्॥ॐयथाविहितंकर्म्मकुरुइतिवदेत्।ॐकरवाणीतिप्रतिवच
नम्॥ततोहोतारुद्रकलशात्पश्चिमेवालुकाभिर्हस्तमात्रंचतुरस्रंस्थंडिलंकृत्वादेशकालौसंकीर्त्य।ॐअद्यकर्त्तव्यवृषोत्सर्गकर्मणिपंचभूसंस्का
रपूर्वकमग्निप्रतिष्ठापनंकरिष्ये॥इतिसंकल्प्यस्थंडिलंकुशैःपरिसमुह्य।तानैशान्यांपरित्यज्यगोमयोदकेनोपलिप्यस्रुवमूलेनप्रादेशमात्रमुत्त
रोत्तरक्रमेणप्रागग्रं त्रिरुल्लिख्य उल्लेखनक्रमेण अनामिकाङ्गुष्ठाभ्यांमृदंसमुद्धृत्य उदकेनाभ्युक्ष्य कांस्यपात्रेणाग्निमुपसमाधायॐअग्निंदूतं
पुरोदधे हव्यवाहमुपब्रुवे॥देवाँऽऽआसादयादिह इतिमंत्रेणस्थंडिलेस्थापयेत्॥ ततः अग्न्यानीतपात्रेसाक्षतोदकंनिषिच्याऽग्निंध्यायेत् ॐ
चत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ २ऽआविवेश ॥१॥ अग्नेवैश्वानर शांडि
ल्यगोत्रभूमिर्मातावरुणःपितामेषध्वजप्राङ्मुखममसम्मुखोभव ॥ इति रुद्रनामाग्निंप्रतिष्ठाप्य प्रोक्षितेंधनानिनिक्षिपेत्॥ ततोऽग्नेर्दक्षिणतः

शुद्धमासनंविधाय॥ ततदुपरिप्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीयतत्रउदङ्मुखंब्राह्मणं तदभावे पंचाशत्कुशनिर्मितंवा ॥
ॐअस्मिन्वृषोत्सर्गकर्मणित्वंमेब्रह्माभव इत्यभिधाय उपवेशयेत्॥ भवानीतिप्रतिवचनम्॥ततःप्रणीतापात्रंपुरतःकृत्वा जलेनापूर्य्य कुशैरा
च्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतः कुशोपरिनिदध्यात्॥ततः परिस्तरणम्॥बर्हिष (६४)श्चतुर्थभागमादायउत्तराग्रैश्चतुर्भिर्दर्भैः आग्ने
यादीशानांतमितिप्राच्याम् पूर्वाग्रैर्नैर्ऋत्यादाग्नेयांतंदक्षिणस्याम् उत्तराग्रैर्नैर्ऋत्याद्वायव्यांतंप्रतीच्याम्॥पुनःपूर्वाग्रैर्वायव्यादीशानांतमुदी
च्यां च परिस्तरणंकृत्वा॥ततोग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयम् पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयम् प्रोक्षणीपात्रम्
आज्यस्थाली चरुस्थालीसंमार्जनार्थंकुशत्रयम् उपयमनार्थंकुशत्रयंप्रादेशमात्राःसमिधस्तिस्रःपालाश्यःस्रुवःखादिरःआज्यंगव्यम् तंडुलान्
दुग्धं तंडुलपिष्टम् तंडुलाद्यन्नपूर्णपात्रम् यथाशक्तिहिरण्यादिद्रव्यम्।ततःपवित्रच्छेदनकुशानांपूर्वपूर्व देशिक्रमेणासादनीयम्।ततोवाग्यतः
आसादितकुशपत्रद्वयमादाय ॥ अग्रतःप्रादेशमात्रंप्रमाप्यपवित्रच्छेदनकुशैःपवित्रेछित्त्वातानपास्य पवित्राभ्यां प्रणीतोदकमुत्पूय सप
वित्रकरेणप्रणीतोदकंत्रिःप्रोक्षण्यांनिधाय ॥ प्रोक्षण्युदकंभूमौत्रिः क्षिप्त्वापवित्रेप्रोक्षण्यांनिधाय प्रणीतोदकेनप्रोक्षणीप्रोक्षणं प्रोक्षणी
जलेनासादितवस्तुसेचनम् ॥ अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय आज्यस्थाल्यामाज्यंनिरूप्य चरुस्थाल्यां तंडुलान् निक्षिप्य
प्रणीतोदकेनतांस्त्रिः प्रक्षाल्य तत्रप्रणीतोदकंदुग्धंचप्रक्षिप्य आज्यं पायसंचरुं श्रपणार्थं युगपदग्नौ निधाय तृणंप्रज्वाल्यप्रद
क्षिणमाज्यचर्व्वोः समंताद्भ्रामयित्वावह्नौतत्प्रक्षिप्य दक्षिणहस्तेनस्रुवमादायाधोमुखमग्नौतापयित्वा सव्येपाणौकृत्वादक्षिणहस्ते
नसंमार्जनकुशानामग्रैरग्रंमध्यैर्मध्यंमूलैर्मूलंस्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्यपुनः प्रतप्य स्रुवंदक्षिणतोनिदध्यात् ॥ ततः स्वयमाज्यंच

रुंच उद्वास्य स्वपुरत आज्यंतदुत्तरतश्चरुनिधाय आज्यंप्रोक्षणीवदुत्पूय अवेक्ष्यसत्यपद्रव्येतन्निरसनं पुनःप्रोक्षण्युत्पवनम् ॥ तत उत्थाय उपयमनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्ताः समिधस्तिस्रोऽग्नौप्रक्षिपेत ॥ ततः उपविश्य ॥ सप वित्रप्रोक्षण्युदकेनाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेनिधाय सजघनंदक्षिणजानु निपात्य कुशाग्रेणब्रह्मणान्वारब्धः सुसमिद्धतमेऽग्नौआज्येनजुहुयात् ॥ तत्रहोमः ॥ ॐइहरंतिंस्वाहा ॥इदमग्नयेनमम॥ १॥ ॐइहरमध्वंस्वाहा॥इदमग्नये० ॥२॥ ॐइहधृतिंस्वाहा॥इदमग्नये०॥ ॥३॥ ॐइहस्वधृतिंस्वाहा ॥ इदमग्नये० ॥४॥ उपसृजंधरुणंमात्रेधरुणोमातरंधयंन्स्वाहा॥इदमग्नये० ॥५॥ ॐरायस्पोषमस्मासुदीधरत्स्वाहा॥इदमग्नयेनमम॥६॥ततःअग्नावुत्तरतःॐप्रजापतयेस्वाहा॥इदंप्रजापतयेनमम॥१॥अग्नौदक्षिणतःॐइंद्रायस्वाहा इदमिंद्रा०॥२॥उत्तरपूर्वार्द्धेॐअग्नयेस्वाहा इदमग्नये०॥३॥दक्षिणपूर्वार्द्धेॐसोमायस्वाहा इदंसोमाय०॥४॥इत्याघारावाज्यभागौहुत्वाऽग्निंसंपूज्य पायसमादायअनन्वारब्धेन संस्रवंविनैवजुहुयात।ॐ अग्नयेस्वाहा इदमग्नये०॥१॥ॐरुद्रायस्वाहा इदंरुद्राय०॥२॥ॐशर्वायस्वाहा इदंशर्वाय०॥३॥ ॐ पशुपतयेस्वाहा इदंपशुपतये०॥४॥ॐउग्रायस्वाहा इदं०॥५॥ॐअशनयेस्वाहा इदं० ॥६॥ ॐभवायस्वाहा इदं० ॥७॥ ॐमहादेवायस्वाहा इदं०॥८॥ ॐईशानायस्वाहा इदमीशानायनमम॥९॥ इतिहुत्वा ॥ पिष्टकेन ॐ पुषागा अन्वेतुनः पूषारक्षुत्सर्वतः ॥ पूषावाजंसनोतुनः स्वाहा ॥ इदंपूष्णेनमम ॥ १ ॥ ततोब्रह्मणान्वारब्धःपायसपिष्टकाभ्याम् ॐ अग्नये स्विष्टकृतेस्वाहा इदमग्नये स्विष्टकृतेनमम इतिजुहुयात ॥ ततःआज्येनॐभूःस्वाहा इदंभूःअग्नये ॥१॥ ॐभुवःस्वाहा इदंभुवः वायवे ॥२॥ ॐस्वः स्वाहा इदंस्वः सूर्य्याय ॥३॥

ॐत्वन्नोऽअग्नेवरुणस्यव्विद्वान् देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोव्वह्नितमःशोशुचानो व्विश्वाद्वेषाᳬंसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ ४ ॥ ॐसत्वन्नोऽअग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ ॥ अवयक्ष्वनोव्वरुणᳬंरराणोव्वीहिमृडीकᳬं सुहवोनऽएधिस्वाहा इदमग्नीवरुणाभ्याम् ॥ ५ ॥ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्त्यमित्त्वमयाऽअसि ॥ अयानो यज्ञंवहास्ययानोधे हिभेषजᳬंस्वाहा इदमग्नये ॥ ६ ॥ ॐयेतेशतंवरुणयेसहस्रंयज्ञियाः पाशा व्विततामहान्तः ॥ तेभिर्नोऽअद्यसवितोतविष्णुर्व्विश्वेमुंचन्तु मरुतःस्वर्क्काःस्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॥ ७ ॥ ॐउदुत्तमंव्वरुणपाशमस्मदवाधमं व्विमध्यमᳬं श्रथाय ॥ अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा ॥ इदंवरुणाय ॥ ८ ॥ प्रजापतयेस्वाहा इदंप्रजाप तये नमम ॥९॥ इतिहुत्वा स्थंडिलपरितोदिक्पालेभ्योमाषभक्तबलीन्दद्यात् ॥ ततः संस्रवप्राशनम् आचमनंचकृत्वा॥ ॐअद्यकृतैतद्वृ षोत्सर्गहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहंसंप्र ददे ॥ इतिब्रह्मणेपूर्णपात्रंदद्यात् ॐ स्वस्तीतिप्रतिवचनानन्तरंब्रह्मग्रंथिविमोकः॥ ततो होत्रेसुवर्णदक्षिणांदत्त्वा ॐसुमित्रियानऽआपऽओष धयः सन्तु इतिपवित्राभ्यां जलमानीय तेनशिरः संमृज्य।ॐदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियंचवयंद्विष्मःइत्यैशान्यांप्रणीतान्युब्जी करणम् पवित्रेअग्नौ प्रतिपत्तिः॥ततस्तरणक्रमेणबर्हिरुत्थाप्यवह्नौक्षिपेत॥ततः ॐनमस्तेरुद्रमन्यवइत्यारभ्यासमाप्तेः रुद्राध्यायंजपित्वा

१ अत्र पूर्णाहुतिहोमो बर्हिर्होमश्च कृताकृतः ॥ केचिन्मैथिलग्रंथेपूक्तत्वात्कात्यायनसूत्रादावनुक्तत्वात ॥ विवाहादिक्रियायां च शालायां वास्तुपूजने ॥ नित्यहोमे वृषोत्सर्गे पूर्णाहुतिं न कारयेदिति प्रयोगरत्ने निषिद्धत्वाच्च विकल्पः ॥

(रुद्रजपाकरणेप्रत्यवायोभवति)आचार्यःकुंकुमेनवृषस्यदक्षिणपार्श्वेत्रिशूलंवामपार्श्वेचक्रमथवावामेत्रिशूलंदक्षिणेचक्रंयथाचारंविलिख्य
लोहकारमाहूय अंकयित्वा ततोवत्सतरीसहितंवृषभम्।हिरण्यवर्णाः शुचयः पावकायासुजातः कश्यपोयास्विन्द्रः। अग्निंयागर्भंदधिरेविरूपास्तानऽआपः शंस्योनाभवंतु।१।यासांराजावरुणोयातिमध्येसत्यानृतेऽअवपश्यन्जनानाम्।मधुश्चुतः शुचयोयाःपावकास्तानऽआपः
शंस्योनाभवन्तु॥२॥यासांदेवादिविकृण्वंतिभक्षंयाऽअंतरिक्षेबहुधाभवंति।याःपृथिवींपयसोंदंतिशुक्रास्तानऽ आपः शंस्योनाभवन्तु॥३॥
शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशतत्वचंमे॥ सर्वां२ऽअग्नीं२ऽरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त॥४॥ इति चतसृभिः॥
ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥ शंय्योरभिस्रवंतुनः॥१॥ इत्यनेनचस्नापयित्वा लोहघंटानूपुरकनकपट्टिकादिभिः सर्वानलं
कृत्य सावित्रीमघमर्षणंरुद्राध्यायं पुरुषसूक्तम्ॐयद्देवादेवहेडनंदेवासश्चकृमाव्वयम्॥अग्निर्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः।१।यदिदि
वायदिनक्तमेनाꣳसिचकृमाव्वयम्॥वायुर्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः।२॥यदिजाग्रद्यदिस्वप्नमेनाꣳसिचकृमाव्वयम्।सूर्योमातस्मा
देनसो विश्वान्मुंचत्वꣳहसःइतिऋक्त्रयम्।कूष्मांडसूक्तसंज्ञकंजपेत्।ततोवृषभस्यदक्षिणकर्णे ॐ पितावत्सानांपतिरघ्न्यानामथोपितामहतांगर्गराणांवत्सो जरायुः प्रतिधुक्पीयूषऽआयुष्याघृतंतदस्यरेतः॥ १ ॥ ॐ वृषोहिभगवान्धर्मश्चतुष्पादः प्रकीर्तितः॥ वृणोमि

१ अष्टांगुलं भवेच्चक्रं त्रिशूलं द्वादशांगुलम्॥ तर्जन्यास्तु प्रमाणेन दाहयित्वा जपेत्ततः॥ इति त्रिपेत्त्यजेदिति॥

तमहंभक्त्यासमारक्षतुसर्वतः ॥ २ ॥ इतिमंत्रद्वयंजपित्वा उदङ्मुखः सव्येनवृषपुच्छंगृहीत्वा कुशत्रयतिलजलान्यादाय ॥ देश कालौ संकीर्त्य० ॐ अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षय्यस्वर्गलोकप्राप्तिकामः एनंवृषं रुद्रदैवतं यथाशक्त्यलं कृतंगंधपुष्पाद्यर्चितं त्रिशूलचक्रांकितंवत्सतरीयुतम् अहमुत्सृजामि ॐ एतंयुवानंपतिवोददामि तेनक्रीडंतीश्चरथप्रियेण मानः साप्त्यजनुषासुभगारायस्पोषेणसमिषामदेम इत्युक्त्वासतिलमुदकंभूमौनिक्षिपेत् ॥ इत्युत्सृज्यचैशान्यांदिशिपंचपदानिचालयेत् ॥ ततो वत्सतरीसहित वृषभम् ॐ वत्सतरीसहितायवृषभायनमः इतिषोडशोपचारैः संपूज्य तासां मध्यगतं वृषभमभिमंत्रयेत् ॥ तत्रमंत्राः ॥ ॐ मयोभूरभिमांवाहिस्वाहामारुतोसिमरुतांगणऽ ॥ शंभूर्म्मयो भूरभिमांवाहिस्वाहावस्यूरंसिदुवस्वान्॥छंभूर्म्मयोभूरभि मावाहिस्वाहा ॥१॥ यास्तेऽअग्नेसूर्य्येरुचोदिवंमातन्वन्तिरश्मिभिः ॥ ताभिर्नोऽअद्यसर्व्वाभीरुचेजनायनस्कृधियावो देवाः सूर्य्ये रुचो गोष्वश्वेषुयारुचः इंद्राग्नीताभिः सर्व्वाभीरुचंनोधत्तबृहस्पते ३ रुचंनोधेहिब्राह्मणेषुरुचंराजसुनस्कृधिरुचंविश्वेषुशूद्रेषुमयिधे हिरुचारुचम् ॥२॥ तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः॥ ॥ ३ ॥ स्वर्णघर्म्मःस्वाहास्वर्णार्कःस्वाहास्वर्णशुक्रःस्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्य्यःस्वाहा ॥ ४ ॥ इति । ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवामजानुः ॥ यवतिलवृषपुच्छमोटकादीन्यादाय ॐ स्वधापितृभ्यो मातृभ्यो बंधुभ्यश्चापितृप्तये॥मातृपक्षाश्चयेके चिद्येचान्येपितृपक्षजाः॥ गुरुश्वशुरबंधूनां येकुलेषुसमुद्भवाः॥ येप्रेतभावमापन्ना येचान्येश्राद्धवर्जिताः॥ वृषोत्सर्गेणतेसर्वे लभंतांप्रीतिमु

त्तमामिति मंत्रेणांजलित्रयं दद्यात्॥ ततो दाता ब्राह्मणानाहूय वक्रोक्तिभिः पदैः॥ न चाज्यं न च तत्क्षीरं पातव्यं केनचित्क्वचित्॥ न वाह्योसौ वृषपृष्ठे
षामृते गोमूत्रगोमये ॥ १ ॥ इति श्रावयेत ॥ ततः पायसं श्रपयित्वा त्रिप्रभृतीन्यथाशक्ति यथासंभवं ब्राह्मणान्भोजयेत ॥ ततो बहुतोय
तृणेऽरण्ये अथवा बहुगोधनसंकुले गोकुले वत्सतरीयुतो गोपतिः क्षेपणीयः॥ निर्गते गोपतौ विप्रेभ्यो दक्षिणां रुद्रकुंभं च दत्त्वा विष्णुं स्मरेत्॥ एवं
वृषोत्सर्गविधिं नरो यः करोति भक्त्या निजपूर्वजानाम्॥ उद्धृत्य तान्दुर्गतिपंकमग्नान्स्वयं सलोकं समुपैति शंभोः॥ इति वृषोत्सर्गपद्धतिः समाप्ता।
अथ गोदानविधिः ॥ तत्र आशौचांते द्वितीयेह्नि पुण्यदेशे यथोक्तलक्षणवतीं कपिलां गां प्राङ्मुखीमवस्थाप्य ॥ यथोक्तलक्षणं स
त्पात्रं तदभावे अनिषिद्धब्राह्मणम् उपवेश्य स्वयं गोपुच्छदेशे प्राङ्मुखः कुशत्रयतिलजलान्यादाय ॥ अद्येत्यादिदेशकालौ संकीर्त्य ॥
अद्यैकादशेह्नि अमुकगोत्रस्य अमुकप्रेतस्य स्वर्गकामो गोदानमहं करिष्ये। तदंगतया गोब्राह्मणस्य च पूजनं करिष्ये। इति संकल्प्य ब्राह्मणं पाद्या
दिभिः संपूज्य हस्ते पुष्पचंदनतांबूलवासांस्यादाय करिष्यमाणगोदानार्थमनेन द्रव्येण त्वामहं वृणे इति वृणुयात्॥ वृतोस्मीति प्रतिवचन
म्॥ अथ गोपूजनम् ॥ ॐ आवाहयाम्यहं देवीं त्रैलोक्येषु च मातरम् ॥ यस्याः शरणमाविष्टः सर्वपापैः प्रमुच्यते ॥ इत्यावाहनम् ॥
त्वं देवी त्वं जगन्माता त्वमेवासि वसुंधरा ॥ सवित्री त्वं च गायत्री गंगा त्वं च सरस्वती ॥ तृणानि भक्षसे नित्यममृतं स्रवसे प्रभो ॥ भूत
प्रेतपिशाचांश्च पितृदैवतमानुषान्॥ सर्वांस्तारयसे देवि नरकात्पापसंकटात् ॥ ॐ भूर्भुवः स्वः धेनो इहागच्छ इह तिष्ठ ॥ इति प्रतिष्ठाप्य ॥
ॐ सर्वदेवप्रियं देवि चंदनं मलयोद्भवम् ॥ कस्तूरीकुंकुमाढ्यं च गोगंधः प्रतिगृह्यताम् ॥ इति गंधम् ॥ १ ॥ ऐरावतकुले जाता शतक्रतुप्रिया
सदा ॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ इति पुष्पाणि च निवेदयेत् ॥२॥ अथांगपूजा

ॐ आस्यायनमः ॥ ॐ शृङ्गाभ्यांनमः ॥ ॐपृष्ठाभ्यांनमः ॥ ॐ पुच्छायनमः ॥ॐपूर्वपद्भ्यांनमः॥ॐपश्चिमपद्भ्यांनमः ॥ ॐवनस्प
तिरसोद्भूतो गंधाढ्योगंध उत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् ॥ इतिधूपः ॥ ३ ॥ ॐ साज्यंचवर्तिसंयुक्तं वह्निनायोजितं
मया ॥ दीपंगृहाणसुरभे मयादत्तंहिभक्तितः ॥ इतिदीपम् ॥४॥ वैष्णविसुरभेमातर्नित्यंविष्णुपदेस्थिते ॥ नैवेद्यंहिमयादत्तं गृह्यतांपा
पहारिणि ॥ इतिनैवेद्यम् ॥५। आच्छादनंचकौशेयं शुद्धंचैवसुनिर्मलम् ॥ सुरभ्यैदीयमानंतु प्रीयतांकेशवःसदा ॥ इतिवस्त्रम् ॥ ६ ॥
यत्तेमयार्पितं शुद्धं घंटाचामरसंयुतम् ॥ सुरभेतद्गृहाणेदं मुनित्रिदशवंदिते ॥ इतिघंटाचामरम् ॥७॥एवंगंधादिभिः संपूज्य प्रदक्षिणां
कृत्वा उदङ्मुखोगोपुच्छंगृहीत्वा कुशत्रययवतिलजलैस्तर्पणंकुर्यात् ॥ (सव्यम्) ॐगणपतिस्तथाब्रह्मा केशवोरुद्रदेवताः ॥ लक्ष्मीः
सरस्वतीचैव येचान्येचनवग्रहाः ॥१॥ तेसर्वेंतृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥ देवाधिदेवताःसर्वास्तथाप्रत्यधिदेवताः ॥२॥ नक्षत्र
वसवोरुद्रा विश्वेदेवामरुद्गणाः ॥ तेसर्वेंतृप्तिमायांतु गोपुच्छोदकतर्पणैः ॥३॥ किन्नराश्चपिशाचाश्च यक्षगंधर्वराक्षसाः॥दैत्याश्चदानवाश्चैव
येचान्येप्सरसांगणाः ॥४॥ तेसर्वेंतृप्तिमायांतु गोपुच्छोदकतर्पणैः ॥ पुलस्त्यः पुलहश्चैव दत्तात्रेयोथभार्गवः ॥५॥ वसिष्ठांगिरसावापि
कश्यपश्चैवकाश्यपाः ॥ तेसर्वेंतृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥६॥ ऋषयोमनवोदेवा अधस्थाभूमिदेवताः ॥ वाय्वाधाराजलाधाराः
पाद्धचायक्षास्तथैवच ॥ तेसर्वेंतृप्ति० ॥७॥ सरितःसागराश्चैव पर्वतावनमेवच ॥ लताऔषधयश्चैव मृगाअरण्यवासिनः॥तेसर्वेंतृप्ति०
॥८॥ स्वाहास्वधातथालक्ष्मीर्वृद्धिः श्रद्धासरस्वती ॥ मेधाप्रीतिस्तथालज्जा कीर्तिश्चदशमीतथा ॥ ताःसर्वास्तृप्ति० ॥ ९ ॥ विश्वाद्याश्चै
वयेदेवा येचवैकुंठवासिनः॥गरुडासनमारूढाआगताःपुच्छगोचरे॥तेसर्वेंतृप्ति०॥१०॥आदित्याद्याग्रहाः सर्वे ऋक्षाश्चाश्विनिकादयः ॥

मेषाद्याराशयश्चैव योगाविष्टंभकादयः ॥ तेसर्वेंतृप्ति॰ ॥११॥ (कंठीं कृत्वायवोदकैः) सनकःसनंदनश्चैव तृतीयश्चसनातनः ॥ कपिल
श्चासुरिश्चैव वोढुःपंचशिखस्तथा ॥ तेसर्वेंतृप्ति॰ ॥१२॥(अपसव्यंकृत्वा दक्षिणामुखः कृष्णतिलोदकैः तापितामहश्चैव तथैव
प्रपितामहः ॥ मातामहस्तत्पिताच वृद्धमातामहस्तथा ॥ तेसर्वेंतृप्ति॰ ॥१३॥ मातृपितामहीचैव तथैवप्रपितामही ॥ मातामह्यादयः
सर्वास्तथैवान्याश्चगोत्रजाः ॥ तेसर्वेंतृप्ति॰॥१४॥ पितृवंशेमृतायेच मातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनां येचान्येबांधवाःस्मृताः ॥ तेसर्वें
तृप्ति॰ ॥१५॥ येमेकुलेलुप्तपिंडाः पुत्रदारविवर्ज्जिताः ॥ क्रियालोपगतायेच येचांधाःपंगवस्तथा ॥ ते सर्वेंतृप्ति॰ ॥१६॥ विरूपाआमग
र्भाये ज्ञाताऽज्ञातकुलेमम ॥ वृक्षयोनिगतायेच येचकीटपतंगकाः ॥ तेसर्वेंतृ॰ ॥१७॥ नरकेरौरवेसर्वे महारौरवसंस्थिताः असिपत्रेवने
घोरे कुंभीपाकेचयेगताः ॥ तेसर्वेंतृप्ति॰ ॥१८॥ स्वार्थबंधमृतायेच शस्त्रादिविषमोहिताः॥तेसर्वेंतृप्तिमायांतु गोच्पुछोदकतर्पणैः ॥१९॥
ब्रह्महस्तैर्मृतायेच सिंहसर्पैश्चशृङ्गिभिः ॥ चांडालेनमृतायेच पथिलोपगताश्चये ॥ तेसर्वेंतृप्ति॰ ॥२०॥ जलमध्येमृतायेच ह्यल्पमृत्युग
ताश्चये॥बंदीमध्येमृतायेच स्त्रीहस्तेनैवयेमृताः॥तेसर्वेंतृ॰॥२१॥येचब्रह्माण्डखण्डेच वसंतिपितृदेवताः॥सर्वेंचमानवानागा आगताःपुच्छ
गोचरे॥तेसर्वेंतृप्तिमायांतुगोपुच्छोदकतर्पणैः॥२२॥ देवासुरास्तथायक्षाः नागागंधर्वराक्षसाः॥पिशाचागुह्यकाःसिद्धाः कूष्मांडास्तरवः
खगाः ॥२३॥ जलेचराभूनिलया वाय्वाधाराश्चजंतवः ॥ प्रीतिमेतेप्रयांत्वाशु मद्दत्तेनाम्बुनाखिलाः ॥२४॥ आब्रह्मणोयेपितृवंशजाता
मातुस्तथावंशभवामदीयाः ॥ वंशद्वयेस्मिन्ममदासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥ तेसर्वेंतृप्तिमायांतु गोपुच्छोदकतर्पणैः ॥२५॥ ॥१६१॥
इतितर्पणं कृत्वा ॥ सव्येनाचम्य ॥ ॐ यालक्ष्मीःसर्वभूतानां याचदेवेष्ववस्थिता ॥ धेनुरूपेणसादेवी ममपापंव्यपोहतु ॥ १ ॥

गावोममाग्रतःसंतु गावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेसन्तु गवांमध्येवसाम्यहम् ॥२॥ इतिप्रार्थ्य ॥ गोपुच्छंकुशादीनिचादाय ॥ ॐ
अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्य अमुकप्रेतस्य स्वर्गकामः इमांगांसवत्सां सुपूजितां पयस्विनींसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठां
वस्त्रयुगच्छन्नां कांस्यपानीयपात्रां पैत्तिलदोहां रुद्रदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहं संप्रददे इतिसंकल्प्य गोपु
च्छंसाक्षतकुशोदकंविप्रहस्तेदद्यात् ॥ ॐ स्वस्तीतिप्रतिवचनम् ॥ ततः ॥ यज्ञसाधनभूतात्वं विश्वस्याघप्रणाशिनी॥विश्वरूपधरोदेवःप्री
यतामनयागवा ॥ १ ॥ इतिप्रार्थ्य ॥ हस्तेसुवर्णदक्षिणामादाय ॥ ॐ अद्यकृतैतद्गोदानप्रतिष्ठार्थामिमांसुवर्णदक्षिणामग्निदैवताममुकगोत्रा
यामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेइतिदद्यात्।ततःप्रतिग्रहीता।ॐस्वस्तीत्युक्त्वायथाशाखंकोदात्कस्माऽअदादितिकामस्तुतिंपठेत्।इतिगो
दानप्रयोगःसमाप्तः ॥ [इदमेवगोदानंशिष्टाः सपिंडनदिनेपिकुर्वंति] ॥छ॥ अथदुर्मरणमृतानांनारायणबलिप्रयोगःतत्रतावत्सूतकांतेस
र्वोपहारान्गृहीत्वा तीर्थेपुण्यक्षेत्रे वा तडागादिसमीपेगवांगोष्ठेगृहेदेवालयेवागत्वातत्रभूमिंपरिकल्प्य गोमयोदकाभ्यामुपलिप्य ज्वलदंगारैः
संशोध्यगौरमृत्तिकयाऽऽच्छाद्यतत्रसामग्रींस्थापयेत् ॥ततोयथाविधानम् ॥ अथनद्यादिस्नानप्रयोगः ॥ तत्रतावन्नदीतडागादिकंगत्वासुप्र
क्षालिततत्तीरे स्नानोपकरणानिसंस्थाप्य ततःपाणिपादंप्रक्षाल्य नाभिमात्रंजलंगत्वाकुशपवित्रहस्तोबद्धशिखआचामेत्।ततोदेशकालौसं
कीर्त्य॥ ममशरीरशुद्ध्यर्थंभस्मादिभिरष्टौस्नानानिकरिष्ये॥इतिसंकल्प्य॥ वामहस्तेदक्षिणहस्तेनयज्ञियभस्मगृहीत्वापश्चादुदकमिश्रणा
नंतरं दक्षिणहस्तेनसंमर्द्य अभिमंत्रयेत् ॥तत्रमंत्राः॥ ॐअग्निरितिभस्म ॥ ॐवायुरितिभस्म ॥ ॐजलमितिभस्म॥ ॐस्थलमितिभस्म
॥ॐ व्योमेतिभस्म ॥ ॐसर्वꣳहवाइदंभस्म ॥ ॐमनएतानिचक्षषिभस्मानीत्यभिमंत्र्य ॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूता

नाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवोमेऽअस्तुसदाशिवोम्॥१॥ ॐईशानायनमः॥ इतिशिरसिमर्दयेत् ॥ ॐतत्पुरुषायविद्महे
महादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥२॥ ॐतत्पुरुषायनमः॥इतिमुखेमर्दयेत्॥ ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥सर्व्वेभ्यः
सर्वशर्व्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यः ३॥ॐअघोरायनमः॥इतिहृदये०ॐवामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमः
कलविकरणायनमो बलविकरणायनमः ॥४॥ ॐवामदेवायनमः॥इतिगुह्ये०॥ ॐसद्योजातं प्रपद्यामिसद्योजातायवैनमोनमः ॥ भवे
भवेनातिभवे भवस्वमां भवोद्भवायनमः ॥ ५ ॥ॐसद्योजातायनमः॥इतिपादयोर्मर्दयेत्॥ॐ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥
सर्ठ० सृज्यमातृभिष्ट्वं ज्योतिष्मान्पुनरासदः ॥६॥ इतिमंत्रेणप्रणवेनवा सर्वाङ्गेचभस्मविलिम्पेत् ॥ ततःस्नात्वा आचम्य गोमयस्नानं
कुर्य्यात् ॥ तद्यथा ॥ शुद्धगोमयमादायप्रणवेनदिक्षुदक्षिणभागं तीर्थेचोत्तरभागं प्रक्षिप्य ॥ शेषम् ॐ अग्रमग्रश्चरंतीनामौषधीनांरसं
वने॥तासांवृषभपत्नीनां पवित्रंकायशोधनम्॥यन्मेरोगांश्चशोकांश्च पापंमेहरगोमय॥१॥ ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानो
ऽअश्वेषुरीरिषः॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वाहवामहे ॥ २ ॥ इत्यभिमंत्र्य ॥सूर्यायदर्शयित्वा॥ ॐ गंधद्वारांदुराध
र्षां नित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रियम् ॥ इतिमंत्रेणदक्षिणहस्तगृहीतेन गोमयेन शिरसोनाभ्यंतंवामहस्तगृही
तेनमंत्रावृत्त्या नाभितः पादपर्यंतंविलेपनमितिसर्वांगमालिप्यस्नात्वाद्विराचामेत् ॥ अथमृत्तिकास्नानम्॥शुद्धतीर्थमृत्तिकामादाय ॐ
अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ॥ मृत्तिकेहरमेपापं यन्मयाकायसंचितम् ॥ १ ॥ उद्धृतासिवराहेण कृष्णेनशतबाहुना ॥ मृत्तिकेह ॥१६२॥
रमेपापं यन्मयादुष्कृतंकृतम्॥२॥त्वयाहतेनपापेन सर्वपापैःप्रमुच्यते ॥ इत्यभिमंत्र्य ॥ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥समूढमरय

पाꣳसुरेस्वाहा ॥ ३ ॥ इतिमंत्रेणशिरःप्रभृत्यंगानिविलिंपेत् ॥ ततोद्विराचम्य शुद्धोदकस्नानंकुर्यात् ॥ ॐआपो हिष्ठामयोभुवस्तानऽ
ऊर्जेदधातन॥महेरणायचक्षसे।१।योवः शिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः।२।तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ॥
आपोजनयथाचनः॥३॥ इतिस्नात्वा आचम्यपंचगव्यस्नानंकुर्यात् ॥ तत्रमंत्राः ॥ ॐतत्सवितु० इतिगायत्र्यागोमूत्रस्नानम् ॥१॥ गंध
द्वारेतिगोमयस्नानम्॥ॐगंधद्वारांदुराधर्षां नित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रियम्॥२॥आप्यायस्वेतिपयःस्नानम्
ॐआप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम्।भवावाजस्यसंगथे॥३॥दधिक्राव्णेतिदधिस्नानम् ॐदधिक्राव्णोऽअकारिषंजिष्णोरश्वस्य
वाजिनः॥सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत्॥ ४ ॥तेजोसीत्याज्यस्नानम् ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवा
नामनाधृष्टंदेवयजनमसि ॥५॥ देवस्येतिकुशोदकस्नानम् ॐदेवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णाहस्ताभ्याम् ॥ ६ ॥ एवंपंचग
व्यस्नानंकृत्वा ॥ पौराणिकमंत्रैः शुद्धस्नानंकुर्यात् ॥ ॐनमोनारायणाय ॥ विष्णोः पादप्रसूतासि वैष्णवीविष्णुपूजिता ॥ पाहिनस्त्वेन
सस्तस्मादाजन्ममरणांतिकात् ॥ १ ॥ विष्णुपादाब्जसंभूते गंगेत्रिपथगामिनि॥धर्मद्रवेतिविख्याते पापंमेहरजाह्नवि ॥ २ ॥ तिस्रःको
टयोर्धकोटीश्च तीर्थानांवायुरब्रवीत् ॥ दिविभुव्यन्तरिक्षेच तानिते संतुजाह्नवि ॥ ३ ॥ नंदिनीत्येवतेनाम देवेषुनलिनीतिच॥वृंदापृथ्वी
चसुभगा विश्वकायाशिवासिता॥४॥विद्याधरीसुप्रसन्ना तथालोकप्रसादिनी ॥ श्यामाचजाह्नवीचैव शांताशांतिप्रदायिनी ॥ ५ ॥एता
निपुण्यनामानि स्नानकालेप्रकीर्तयेत् ॥ भवेत्सन्निहितातस्य गंगात्रिपथगामिनी ॥ ६ ॥ इतिस्नात्वा जले ॐऋतंचसत्यं० १ इत्यघमर्ष
णम् ३ ॐद्रुपदादिवेतिचवारत्रयमावर्तयेत ३॥ ततः स्नानाङ्गतर्पणम्। सव्येन॥ प्राङ्मुखः॥ ॐब्रह्मादयोदेवास्तृप्यंताम १ ॐगौतमाद

यक्षषयस्तृप्यंताम् १ इतिदेवतीर्थेनएकैकमंजलिंजलेक्षिपेत्॥ततउदङ्मुखोयज्ञोपवीतंकंटेकृत्वा ॐ सनकादयोमनुष्यास्तृप्यंताम्२इति
प्रजापतितीर्थेन अंजलिद्वयंदद्यात्॥ततोपसव्येन दक्षिणामुखः कृष्णतिलोदकैः ॥ ॐकव्यवाडनलादयोदेवपितरस्तृप्यंताम् ३ ॐ अस्म
त्पितृपितामहप्रपितामह्यास्तृप्यंताम्३ॐअस्मन्मातृपितामहीप्रपितामह्यस्तृप्यंताम्३ॐअस्मन्मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यं
ताम् ३ ॐअस्मन्मातामहीप्रमातामहीवृद्धप्रमातामह्यस्तृप्यंताम् ३ ॐआब्रह्मस्तम्बपर्यंतंजगत्तृप्यताम् ३ इतिपितृतीर्थेनत्रींस्त्रीनंजलीन्द
द्यात्॥एवंतर्पणंकृत्वा ॐयन्मयादूषितंतोयं मलैःशारीरसंभवैः।तस्यपापस्यशुद्ध्यर्थं यक्ष्मैतत्तेतिलोदकम्॥१॥इति यक्ष्मणेजलंदत्त्वातीर
मागत्य॥ॐअग्निदग्धाश्चयेजीवा येऽप्यदग्धाः कुलेमम ॥ भूमौदत्तेनतृप्यंतु तृप्तायांतुपरांगतिम्॥१॥इतिजलांजलिंतटेनिक्षिपेत् ॥ ततः
सव्येन आचम्य सूर्यायार्घ्यंदद्यात्॥ ॐएहिसूर्यसहस्रांशो तेजोराशेजगत्पते॥ अनुकंपयमांदेव गृहाणार्घ्यंनमोस्तुते ॥ १ ॥ ततो जला
द्बहिर्निष्क्रम्य अहतंश्वेतंसदशंधौतंवस्त्रंपरिधायउपवस्त्रंगृहीत्वा स्नानवस्त्रंस्थलेनिष्पीडयत्रिराचम्यगृहंगच्छेत ॥ (इदंस्नानंस्त्रीशूद्रव्रात्यैः
नकार्य्यम्) इतिनद्यादिस्नानप्रयोगः॥ एवंनदीतडागादौस्वगृहे उद्धृतोदकेनवास्नात्वास्वासनेप्राङ्मुखउपविश्यनूतनयज्ञोपवीतधारणंकु
र्यात् ॥तद्यथा॥ अद्येत्यादिदेशकालौसंकीर्त्य ममश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंसूतकान्तेनूतनयज्ञोपवीतधारणंकरिष्ये।इति संकल्प्य ॥
यज्ञोपवीतं प्रक्षाल्य दशधागायत्र्याभिमंत्र्य॥ॐतच्चक्षुर्देवहितमितिसूर्यायदर्शयित्वा॥ॐयज्ञोपवीतंपरमंपवित्रं प्रजापतेर्यत्सहजंपुरस्ता
दायुष्यमग्र्यंप्रतिमुंचशुभ्रं यज्ञोपवीतंबलमस्तुतेजः॥इतिमंत्रेणयज्ञोपवीतंधृत्वाजीर्णंविसृज्याचामेत्।ततश्चंदनादिनायथाचारंतिलकंकृत्वापं
चगव्यप्राशनंकुर्यात्॥तत्रादौपंचगव्यकरणप्रकारः ॥ गायत्र्या गोमूत्रम् १ ॐगंधद्वारेतिगोमयम् २ ॐ आप्यायस्वेतिक्षीरम् ३ ॐद

धिक्राव्णेतिदधि४ ॐतेजोसीत्याज्यम् ५ ॐदेवस्यत्वेतिकुशोदकम् ६ चदत्त्वा प्रणवेनालोड्य ॐयत्वगस्थिरतंपापं देहेतिष्ठतिमामके।
प्राशनात्पंचगव्यस्यदहत्यग्निरिवेंधनम् १ इतिप्राशयेत् इतिपंचगव्यप्राशनंकृत्वा॥आचमनंचकुर्यात् ॥ ततः संध्यादिनित्यक्रियांसमाप्य
गोमयादिसंस्कृतेदेशेपाकद्वयंकुर्यात् बांधवादिद्वारावाकारयेत् ॥ ततःकुशपवित्रादिधारणंकृत्वा आचम्यप्राणानायम्य ॥ ॐअपवित्रः
पवित्रोवा० १ ॐपुंडरीकाक्षः पुनात्वितिकुशत्रयानीतजलेनसंभारान्स्वात्मानंचप्रोक्ष्य।ॐसुमुखश्चैकदंतश्चेत्यादिस्मरणपूर्वकगणेशनवग्रहा
न्पूजयेत्॥ततो दुर्म्मरणनिमित्तप्रायश्चित्तंकार्य्यम् ॥तद्यथा—देशकालौसंकीर्त्य अमुकगोत्रस्य अमुकप्रेतस्य अमुकदुर्मरणदोषपरिहारार्थं
तथा रोगोत्पत्तिमरणावसानेऊर्द्धोच्छिष्टाऽधउच्छिष्टोभयोच्छिष्टाऽकृतस्नानमरणमरणसमयहरिनामोच्चारवर्जिते संध्याशौचलोपआशौच
मरणे तुलसीतिलकुशगोपीचंदनगंगोदकस्नानरहितेतथामार्गेशत्रवाहे अशौचदेशे खर्परास्थिचर्मामेध्यकेशमार्जारसंमार्जनीरजस्वलादिसं
स्पर्शेअतीर्थेदक्षिणायनेपंचकमध्ये त्रिपुष्करयमलयोगे रात्र्यंतरिते रात्रौकृष्णपक्षे परकाष्ठे पराग्निदाहे मुखे आज्याहुतिरहिते चितामध्येकी
टपतंगादिज्वलितादिदोषपरिहारार्थंकुगतिनिवारणार्थम् उत्तमगतिप्राप्त्यर्थं पंचदशप्राजापत्यात्मकंप्रायश्चित्तंतत्प्रतिनिधिरूपंप्रतिप्राजा
पत्यंगोमूल्यमथवा प्रतिप्राजापत्यममुकसहस्रपरिमितगायत्रीजपंब्राह्मणद्वारा यथाकालेनअद्यवाअहमाचरिष्ये इतिसंकल्प्य॥गोमूल्यगा
यत्रीजपतीर्थयात्राब्राह्मणभोजनादिद्वाराप्रायश्चित्तंसंपादयेत्॥इतिप्रायश्चित्तसंकल्पः॥एवंप्रायश्चित्तंकृत्वा आचम्य पुनर्देशकालौसंकीर्त्य अमु
कगोत्रस्य अमुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थम् अमुकदुर्मरणदोषपरिहारार्थंसद्गतिप्राप्त्यर्थंनारायणबलिकर्म्माहंकरिष्ये इतिसंकल्प्य ॥पुनःॐ
अमुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणदोषपरिहारार्थं ममनारायणबलिकर्माधिकारार्थं पुरुषसूक्तेन श्रीमहाविष्णुपूजनमहंकरिष्ये इतिसं

कल्प्य॥प्राक्संस्थेस्थंडिलेश्वेतवस्त्रोपरितंडुलैरष्टदलंकृत्वा तन्मध्येताम्रकलशंस्थापयेत्॥तद्यथा–ॐभूरंसिभूमिंरस्यदिंतिरसिविश्वधांया
व्विश्वंस्यभुवंनस्यधर्त्रीं॥पृथिवींयंच्छपृथिवींदृंᳪहपृथिवींमाहिंᳪसीःइतिकलशाधारभूमिंस्पृष्ट्वा॥ तत्रॐ धान्यमसिधिनुहिदेवान् प्राणा
यंत्वोदानायंत्वाव्व्यानायंत्वा दीर्घामनुप्रसिंतिमायुंषेधान्देवोवंःसविता हिरंण्यपाणिःप्रतिंगृभ्णात्वच्छिंद्रेणपाणिनाचक्षुंषेत्वामहीनांपयों
सि॥इति धान्यमभिमंत्र्य तस्योपरिॐआजिंघ्रकलशंमह्यात्वां व्विशंत्विंदवःपुनंरूर्ज्जांनिवर्तस्वसानःसहस्रंधुक्ष्वोरुधांरापयंस्वतीपुनर्मा
विंशताद्रयिरितिताम्रकलशंस्थापयेत् ॥ ततः ॐ व्वरुंणस्योत्तंभंनमसि व्वरुंणस्यस्कंभसर्ज्जंनीस्थोव्वरुंणस्यऽऋतसदंन्यसिव्वरुंणस्यऽ
ऋतसदंनमसिव्वरुंणस्यऽऋतसदंनमासीद ॥ इति कलशेजलमापूर्य ॥ ॐ त्वांगंधर्व्वा अंखनंस्त्वामिन्द्रस्त्वांबृहस्पतिंः ॥ त्वामोंषधे
सोमोराजां व्विद्वान् यक्ष्मांदमुच्यत ॥ इति गंधम् ॥ ॐयाऽओषंधीःपूर्व्वांजातादेवेभ्यंस्त्रियुगंपुरा ॥ मनैनुबभ्रूणांमहᳪ शतंधामांनि
सप्तचं इति सर्वौषधीः ॥ ॐ कांडांत्कांडात्प्ररोंहंतीपरुंषःपरुषस्परिं ॥ एवानोंदूर्व्वेप्रतंनुसहस्रेणशतेनंच ॥ इतिदूर्वाः ॥ ॐ अश्व
त्थेवोंनिषदंनं पर्णेवों व्वसतिष्कृता ॥ गोभाजऽइत्किलांसथयत्सनवथपूरुंषम् ॥ इति पंचपल्लवान् ॥ ॐ स्योनापृंथिविनोभवानृक्षरानि
वेशंनी ॥ यच्छांनःशर्म्मंसप्रथाः इतिसप्तमृदः ॥ ॐ याः फलिनीर्याऽअंफलाऽअंपुष्पायाश्चंपुष्पिणीः॥बृहस्पतिंप्रसूतास्तानों मुंचं

त्वर्ठ॑ हंस॑ः ॥ इतिपूगीफलम् ॥ ॐ परिवाजंपति॑ कविरग्निर्हव्यान्यंक्रमीत ॥ दधद्रत्नानिदाशुषे ॥ इति पंचरत्नानि॥ॐहिरण्यग
र्भ॑ समंवर्त्तताग्रेभूतस्यंजात॑पतिरेकंऽआसीत्॥सदांधारपृथिवींद्यामुतेमांकस्मैदेवायंहविषाव्विधेम॥इतिहिरण्यम्॥ॐसुजातोज्योतिषा
सहशर्मवरूथमासदत्स्वः॥व्वासोऽअग्नेविश्वरूपर्ठ॑संव्ययस्वव्विभावसो॥इतिवस्त्रम्॥ॐ पूर्णादर्विपरापतसुपूर्णापुनरापत॥व्वस्नेवव्विक्री
णावहाऽइषमूर्जर्ठ॑शतक्रतो॥इतितंडुलपूर्णपात्रंनिधाय॥ ॐ मनोजूतिर्ज्जुषताइतिप्रतिष्ठांकृत्वातत्र ॐ तत्वांयामिब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोध्युरुशर्ठ॑ समानऽआयुः प्रमोषीः ॥ ॐभूर्भुवः स्वः वरुण इहागच्छइहतिष्ठ इत्यावाह्य
ॐअपांपतिवरुणायनमःइतिवरुणंषोडशोपचारैःसंपूज्यकलशस्यमुखेविष्णुरित्यादितीर्थान्यावाह्य।देवदानवसंवादेइतिप्रार्थयेत्।ततःतदुप
रिपट्टवस्त्रंप्रसार्यतत्रशालग्रामप्रतिमाम् अथवासुवर्णमयींविष्णुमूर्तिम् अग्न्युत्तारणंकृत्वास्थापयेत्।तत्रस्वर्णमूर्तिश्चेन्मूर्तिंपात्रेनिधायतदुपरि
दुग्धधारांजलधारांचपातयेत्॥सूक्तंवारद्वयंपठेत्॥तत्रमंत्राः॥ॐसमुद्रस्यत्त्वाव्वकयाग्नेपरिव्ययामसि॥पावकोऽअस्मभ्यर्ठ॑शिवोभव॥१॥
ॐहिमस्यंत्वाजरायुणाग्नेपरिव्ययामसि॥पावकोऽअस्मभ्यर्ठ॑शिवोभव॥२॥ॐअपामिदंन्ययंनर्ठ॑समुद्रस्यंनिवेशनम् ॥ अन्यांस्तेऽअस्म
त्तपंतुहेतयः॥पावकोऽअस्मभ्यर्ठ॑शिवोभव।३॥ॐनमस्तेऽहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे॥अन्यांस्तेऽअस्मत्तपंतुहेतयः॥पावकोऽअस्म
भ्यर्ठ॑शिवोभव ॥४॥ ॐ प्राणदाऽअपानदाव्यानदावर्च्चोदाव्वरिवोदाः ॥ अन्यांस्तेऽअस्मत्तपंतुहेतयःपावकोऽअस्मभ्यर्ठ॑शिवोभव ॥

॥६॥ इत्यग्न्युत्तारणसूक्तम् ॥ ततः पंचामृतेनसंस्नाप्य॥ स्थापितकलशोपरिसंस्थाप्य ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्यज्ञमिमं
तंनोत्वरिष्टंयज्ञठंसमिमंदधातु ॥ विश्वेदेवासऽइहमादयंतामो३म्प्रतिष्ठ॥१॥एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजंते॥सर्वमेवप्रतिष्ठितंम
वति ॥२॥ इतिपुष्पाणि विकीर्य॥स्वशरीरे तथादेवांगेच पुरुषसूक्तन्यासंकुर्य्यात्॥तद्यथाॐसहस्रशीर्षा०इतिवामहस्ते ॥ पुरुषऽएवेदठं
इतिदक्षिणहस्ते॥एतावानस्य०वामपादे॥त्रिपादूर्ध्व०इतिदक्षिणपादे॥ततोविराडजायत०वामजानुनि ॥तस्माद्यज्ञात्सर्वहुतःसंभृतं०दक्षि
णजानुनि॥तस्माद्यज्ञात्सर्वहुतऽऋचः०वामकट्याम्॥तस्मादश्वा०दक्षिणकट्याम्॥तंयज्ञं०नाभौ॥यत्पुरुष०हृदये ॥ ब्राह्मणोस्य०कंठे ॥
चंद्रमामनसो०वामबाहौ॥नाभ्याऽआसीत्० दक्षिणबाहौ॥यत्पुरुषेण०मुखे॥सप्तास्यासन०नेत्रयोः॥यज्ञेनयज्ञमय०इतिमूर्ध्नि ॥एवंन्यासं
कृत्वापूजनंकुर्य्यात् ॥तद्यथाॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंठंसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ श्रीमहाविष्ण
वेनमः आवाहनंसमर्पयामि ॥ ॐपुरुषऽएवेदठंसर्व्वंयद्भूतंयच्चभाव्यम्॥उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥२॥ श्रीमहाविष्णवेनमः
आसनंसमर्पयामि०॥ॐएतावानस्यमहिमातोज्ज्यायांश्चपूरुषः॥पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि।३श्रीमहाविष्णवेनमःपाद्यं
सम०॥त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः।ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि।४।महाविष्णवेनमःअर्घ्यं०।ॐततोविराड

जायतग्विराजोऽअधिपूरुषः॥सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥५॥ श्रीमहाविष्णवे॰आचमनीयं॰॥ॐतस्माद्यज्ञात्सर्वहुतःसम्भृत
म्पृषदाज्यम्॥पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्म्याश्चये॥६॥श्रीमहाविष्णवेनमः॥स्नानंसमर्पयामि॥ततःॐपयःपृथिव्यांपयऽओषधीषु
पयोदिव्यन्तरिक्षेपयोधाः॥पयस्वतीःप्रदिशःसंतुमह्यम्॥ॐमहाविष्णवेनमःपयःस्नानंपुनःशुद्धोदकस्नानम्॥१॥ॐदधिक्राव्णोऽअकारिषं
जिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत्॥ॐमहाविष्णवे॰दधिस्नानंशुद्धोदकस्नानंच॥२॥ॐघृतंघृतपावानः
पिबतवसांवसापावनः पिबतांतरिक्षस्यहविरसिस्वाहा॥दिशः प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॐमहाविष्णवेनमःघृत
स्नानं शुद्धोदकस्नानंच ॥ ३ ॥ ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुम
त्पार्थिवरजः ॥ मधुद्यौरस्तुनः पिता ॥ मधुमान्नोवनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥ ३ ॥ ॐमहाविष्णवेनम
मधुस्नानं॰ शुद्धोदकस्नानंच ॥ ४ ॥ ॐ अपांरसमुद्वयसं सूर्येसन्तं समाहितम् । अपांरसस्ययोरसस्तंवोगृह्णाम्युत्तम
मुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॐ महाविष्णवेनमः शर्करोदकस्नानं॰ पुनःशुद्धोदकस्नानंचसम
र्पयामि ॥५॥ ॐ व्वरुणस्योत्तंभनमसिव्वरुणस्यस्कंभसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋत
सदनमासीद ॥ ॐमहाविष्णवेनमः शुद्धस्नानंसमर्पयामि ॥ ६ ॥ एवंपंचामृतेनसंस्नाप्यपुरुषसूक्तेनशंखोदकेन अभिषेकं कुर्य्यात् ॥
ॐतस्माद्यज्ञात्सर्वहुतऽऋचःसामानियज्ञिरे ॥ छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ श्रीमहाविष्णवेनमःवस्त्रं स॰

वस्त्रान्ते आचमनंस० ॥ ॐ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहयज्ञिरे तस्मात्तस्माज्जाताऽअजावय÷ ॥८॥ श्रीमहाविष्णवे०
उपवीतं० उपवीतांते आचमनंस० ॐ तंयज्ञम्बर्हिषिप्प्रौक्षंन्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ९ श्रीमहाविष्णवेनमः चंदनं
स० ॥ ॐ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किंबाहू किमूरूपादाऽउच्येते ॥ १० ॥ श्रीमहाविष्णवेनमः पुष्पाणितुलसीपत्रा
णिचस० ॥ ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्य÷कृतः ॥ ऊरूतदस्ययद्वैश्य÷पद्भ्यांशूद्रोऽअजायत ॥ ११ ॥ श्रीमहाविष्णवे० धूपं० ॥ ॐ
चंद्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत । १२ श्रीमहाविष्णवे० दीपंस ॥ नाभ्याऽआसीदन्तरिक्षꣳशी
र्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथालोकाꣳअकल्पयन् ॥ १३ ॥ श्रीमहाविष्णवेनमः नैवेद्यंस० ॥ नैवेद्यान्ते आचमनंस० ॥ ॐ
यत्पुरुषेणहविषादेवायज्ञमतन्वत । व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्ममऽइध्मःशरद्धविः १४ श्रीमहाविष्णवेनमः मुखवासतांबूलंस० ॥ ॐ हिरण्य
गर्भःसमवर्तत० इतिदक्षिणां० (ततोनीराजनम्) ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिध÷कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्प
शुम् ॥ १५ ॥ ॥ श्रीमहाविष्णवेनमः प्रदक्षिणांस० ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमान÷
सचन्तयत्रपूर्व्वेसाध्याः सन्ति देवाः ॥ १६ ॥ श्रीमहाविष्णवेनमः मंत्रपुष्पांजलिंसमर्पयामि ॥ अथनमस्कारः ॥ ॐ अद्भ्यःसम्भृतःपृथिव्यै

रसांश्च ॥ व्विश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्त्वमाजानमग्रे ॥ १ ॥ ॐव्वेदाहमेतम्पुरुषम्महां
तमादित्यवर्णन्तमसः परस्तात् ॥ तमेवव्विदित्त्वातिमृत्युमेतिनान्यः पंथाव्विद्यतेयनाय ॥ २ ॥ ॐप्रजापतिश्चरतिगर्ब्भेऽअन्तरजा
यमानोबहुधाव्विजायते॥तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिव्विश्वा॥३॥ ॐयोदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः॥
पूर्व्वोयोदेवेभ्योजातो नमोरुचायब्राह्मये ॥४॥ ॐरुचंब्राह्मञ्जनयन्तोदेवाऽअग्रेतदब्रुवन्॥यस्त्वैवंब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे॥५॥
श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥ ६ ॥ श्रीविष्णवे
नमः स्तुतिपाठंसमर्पयामि ॥ अनेनषोडशोपचारपूजनेन श्रीमहाविष्णुः प्रीयतामिति पठित्वाप्रायश्चित्तधेनुंदद्यात ॥ अशक्तश्चेत्प्रार्थना
मेवकुर्य्यात ॥ ॐपुराकृतंमयाघोरं ज्ञानविज्ञानकिल्बिषम् ॥ जन्मतोद्यदिनंयावत्तस्मात्पापात्पुनीहिमाम्॥विष्णोतवप्रसादेन स्वर्गलोकं
सगच्छतु ॥ अपराधसहस्राणि लक्षकोटिशतानिच ॥ नश्यंतितत्क्षणादेव तवपूजनमात्रतः ॥ नारायणनमस्तुभ्यं मूर्त्तामूर्त्तस्वरूपिणे॥
वासुदेवनृसिंहाख्यः कपिलोदिव्यभूधरः॥वाराहाच्युतयज्ञेश लक्ष्मीकान्तामृतेश्वर॥शार्ङ्गपाणेनमस्तुभ्यं यज्ञेशायनमोनमः।इतिप्रार्थना।
अथनालिकेरेणार्घ्यदानम् ॥ यज्ञेशाच्युतदेवेश सत्यरूपसनातन ॥ अनेनार्घ्यप्रदानेन सर्वपापाद्विमोचय॥१॥सत्येशायनमस्तुभ्यं पाप
घ्नः परमेश्वरः ॥ मयादत्तार्घ्यदानेन प्रेतमुक्तिप्रदोभव ॥२॥ इत्यर्घ्यंदत्त्वासाष्टांगंप्रणमेत ॥ अथविष्णुतर्पणम् ॥ ताम्रपात्रेजलदुग्धसर्वौ
षध्यक्षततिलसुवर्णंकृत्वा विष्णुमुद्दिश्यशंखेनतर्पयेत ॥ तत्र संकल्पः ॥ अमुकगोत्रस्याऽमुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थम् अमुकदुर्मरण

दोषविनाशार्थं सद्गतिप्राप्त्यर्थं श्रीविष्णुप्रसन्नार्थं विष्णुतर्पणमहंकरिष्ये इति संकल्प्य ॥ ॐ सहस्रशीर्षा इत्यादिपुरुषसूक्तनप्रत्यृचं
संतर्प्य मंत्रांते सर्वत्र भगवान्पापापहाविष्णुस्तृप्यतामिति पठेत् ॥ ततः ॐ विष्णुस्तृप्यताम् । ॐ गोविंदस्तृप्यताम्
ॐ केशवस्तृ० ॐ माधवस्तृ० ॐ श्रीधरस्तृ० ॐ हृषीकेशस्तृ० ॐ पद्मनाभस्तृ० ॐ पुरुषोत्तमस्तृ० ॐ अनिरुद्धस्तृ० ॐसं
कर्षणस्तृ० ॐ वासुदेवस्तृ० ॐ जनार्दनस्तृ० अच्युतस्तृ० ॐ वामनस्तृ० ॐ पुंडरीकाक्षस्तृ० ॐ मधुसूदनस्तृ० ॐ दामो
दरस्तृ० ॐ अनंतस्तृ० ॐ श्रीकृष्णस्तृ०ॐआदिदेवस्तृ० ॐ वैकुंठस्तृ० ॐ श्रीपतिस्तृ० ॐ गोपालस्तृ० ॐ त्रिविक्रमस्तृ०
ॐ नारसिंहस्तृ० ॐ रामचंद्रस्तृ० ॐ नारायणस्तृ० ॐ पीतांबरस्तृ० ॐ त्रिपुरान्तकस्तृ० ॐ चतुर्भुजस्तृ० ॐ परमेष्ठीतृ०
ॐ परमेश्वरस्तृ० ॐ हिरण्यगर्भस्तृ० ॐ जगन्नाथस्तृ० ॐ गदाधरस्तृ० ॐ गरुडवाहनस्तृ० ॐ मुकुन्दस्तृ०धरणीधरस्तृ० ॐ
देवकीनंदनस्तृप्यताम् ॥ ॐ पापापहामहाविष्णुस्तृप्यताम् ॥ ॐ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अक्षय्यःपुण्डरीकाक्षः
प्रेतमोक्षप्रदोभव ॥ १ ॥ ॐ विष्णुस्तृप्यताम् । कृष्णकृष्णकृपालोत्वमगतीनांगतिप्रद ॥ संसारार्णवमग्नानां प्रसीदपुरुषोत्तम ॥
॥ २ ॥ विष्णुस्तृ० ॥ नारायणसुरश्रेष्ठ लक्ष्मीकान्तवरप्रद ॥ अनेनतर्पणेनाथ प्रेतमोक्षप्रदोभव ॥ ३ ॥ जयत्वंदेवदेवेश जयाजन्मज
याक्षर ॥जयकामदभक्तानां प्रभोविष्णोनमोऽस्तुते॥४॥ हिरण्यगर्भपुरुष प्रधानव्यक्तिरूपिणे ॥ ॐनमो वासुदेवाय शुद्धज्ञानस्वरूपिणे॥
॥ ५ ॥ अच्युतानंतगोविंद विष्णोमाधवकेशव ॥ अस्यजीवस्यमोक्षार्थं सुप्रीतोभवतर्पणात् ॥ ६ ॥ अतसीपुष्पसंकाशं पीतवाससमच्यु
तम् ॥ येनमस्यंति गोविन्दं नतेषांविद्यतेभयम् ॥७॥ इति संतर्प्य अमुकगोत्रस्यप्रेतत्वनिवृत्त्यर्थं सद्गतिप्राप्त्यर्थम् अमुकदुर्मरणनिमित्त

नारायणबलौ कृतैतद्विष्णुतर्पणसांगतासिद्ध्यर्थं दास्यमानांपयस्विनीं धेनुम् अथवा तन्मूल्योपकल्पितं द्रव्यंमनसोद्दिष्टम् अमुकगोत्राय प्रेताय कस्मैचित् ब्राह्मणायमदत्तमुपतिष्ठतामिति गोदानं कुर्य्यात् ॥ अनेनतर्पणेनश्रीमहाविष्णुः प्रीयतामिति पठेत् ॥ इति विष्णुतर्पणम् ॥ ततोविष्णोर्दक्षिणभागेप्राक्संस्थितं पंचकलशस्थापनम् तत्रादौदेशकालौसंकीर्त्यॐअमुकगोत्रस्यामुकप्रेतस्यअमुकदुर्मरणनिमित्तनारायणबलिकर्मांगतया विहितं पंचकलशपंचदेवतानां स्थापनं प्रतिष्ठापूजनंचकरिष्येइति संकल्प्यस्थंडिलेपूर्वपश्चिमोत्तरदक्षिणमध्येषुपृथक्पृथक् भूरसिभूमिरसीत्यादिपूर्वोक्तैर्मंत्रैः क्रमेणपंचकलशान्संस्थाप्य तेषुब्रह्मादीनां पंचप्रतिमाअग्न्युत्तारणपूर्वकंसंस्थापयेत् ॥

ब्रह्मारौप्यमयःकार्यो विष्णुःस्वर्णमयोभवेत् ॥ रुद्रस्ताम्रमयःकुर्याद्यमोलोहमयःस्मृतः ॥ सीसकस्तुभवेत्प्रेतो ह्यथवादर्भकस्तथा ॥१॥

पंचकलशेपंचधान्यानांस्थापनम् ॥तत्रब्रह्मकलशेगोधूमाःश्वेतवस्त्रं विष्णुकलशे तंडुलाःपीतवस्त्रं रुद्रकलशे मुद्गाःरक्तवस्त्रं यमकलशेमाषाः कृष्णवस्त्रं प्रेतकलशे तिलाः कृष्णवस्त्रंच इति॥अथावाहनमन्त्राः । पूर्वकलशे ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥होतारंरत्नधातमम् ॥१॥ ॐ ब्रह्मजज्ञानं प्रथमम्पुरस्ताद्विसीमतःसुरुचो वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥२॥ ॐ अस्मिन्कलशे भगवन् ब्रह्मन् इहागच्छ इह तिष्ठ ब्रह्मणेनमः ब्रह्माणं स्थापयामि ॥ इति स्थापयेत् ॥ १ ॥ पश्चिमे० ॐ

१ अत्र केषुचित्पुस्तकेषु सत्येशपूजनं लिखितं तद्यथा–अद्येत्यादि० पठित्वा–सत्येशस्थापनप्रतिष्ठापूजां करिष्ये इतिसंकल्प्य पूर्वोक्ताष्टदलमध्ये ईशानादिक्रमेण ओं भूर्भुवः स्वः रुक्मिण्यै नमः रुक्मिणीमावाहयामि स्थापयामि १ एवं सत्यभामां २ जांबवतीं ३ नाग्निकीं ४ कालिंदीं ५ मित्रविंदां ६ लक्ष्मणां ७ चारुहासिनीं ८ च आवाह्यसंस्थाप्य मध्ये पूर्वोक्तस्थापिते कलशे सत्येशप्रतिमां संस्थाप्य पुरुषसूक्तेन षोडशोपचारैः पूजयेत ॥

इषेत्त्वोर्जेत्त्वा वायवस्थदेवोवः सविताप्रापयंतुश्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागंप्रजावंतीरनमीवाऽअयक्ष्मामावस्तेनऽईशत
माघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥१॥ ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् ॥ समूढमस्यपाꣳ
सुरे ॥२॥ॐ अस्मिन्कलशे भगवन्विष्णो इहागच्छ इहतिष्ठ इति स्थापयेत् ॥२॥ उत्तरे ॐ अग्नऽआयाहिवीतयेगृणानो हव्यदातये॥
निहोतासत्सिबर्हिषि ॥ १ ॥ ॐनमःशंभवायचमयोभवायच नमः शंकरायचमयस्करायचनमः शिवायचशिवतरायच ॥ २ ॥
अस्मिन्कलशेभगवन् रुद्र इहागच्छ इहतिष्ठ इतिस्थापयेत् ॥३॥ दक्षिणे ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥ शंय्योरभिस्रवन्तुनः
॥१॥ यमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वा सवितामध्वानक्तुःपृथिव्याः॥ꣳ स्पृशंस्पाहि अर्चिरसिशोचिरसितपोसि ॥ २ ॥
अस्मिन्कलशेभगवन् यम इहागच्छ॰इतिस्थापयेत्।४।मध्ये(अपसव्येन)ॐअक्रन्कर्म्मकर्म्मकृतः सहवाचामयोभुवा।देवेभ्यस्कर्म्मकृत्वा
स्तंप्रेतसचाभुवः॥ १॥ॐप्रेताजयतानरऽइन्द्रोवःशर्मयच्छतु॥उग्रावःसंतुबाहवोनाधृष्यायथासथ॥२॥ॐ अस्मिन्कलशेभगवन्तत्पुरुषइ
हागच्छइहतिष्ठ ॐतत्पुरुषायनमः तत्पुरुषंस्थापयामिइतिस्थापयेत्।५।एवंपंचदेवतानांस्थापनं कृत्वा। ॐमनोजूतिर्जुषतामाज्ज्यस्यबृह
स्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳ॰समिमंदधातु॥विश्वेदेवासऽइहमादयन्तामोꣳप्रतिष्ठइतिप्रतिष्ठाप्यॐसहस्रशीर्षाइतिपुरुषसूक्तेननामभंत्रेण

वा प्रत्येकं षोडशोपचारैर्गंधादिपंचोपचारैर्वा संपूज्य प्रार्थ्य पंचनारिकेलान्समर्प्य अनेनपूजनेनब्रह्मादयोदेवाः प्रीयंतामिति पठित्वा विष्णुंस्म
रेत्॥ जितंतेपुंडरीकाक्ष नमस्तेविश्वभावन ॥ नमस्तुभ्यंहृषीकेश महापुरुषपूर्वज ॥१॥ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अव्ययः
पुंडरीकाक्षः प्रेतमोक्षप्रदोभव॥२॥ इतिप्रार्थ्यपंचदेवतासूक्तपठनार्थंपंचब्राह्मणान्वृणुयात्। तेच—ब्रह्मकलशे ॐतेजोसिशुक्रममृतमित्यादिद्वा
विंशाध्यायेप्रोक्तंब्रह्मसूक्तम्॥१॥ विष्णुकलशे ॐसहस्रशीर्षा इत्यादिपुरुषसूक्तम्अ० ३१।२। रुद्रकलशे ॐनमस्तेरुद्रइतिरुद्राध्यायम्अ० १६
३॥ यमकलशे ॐतदेवाग्निस्तदादित्याइत्यादिद्वात्रिंशाध्यायेप्रोक्तंयमसूक्तम्॥४॥ तत्पुरुषकलशे ॐअपेतोयंतुपणयोइत्यादिपंचत्रिंशाध्याये
प्रोक्तंप्रेतसूक्तंचपठेयुः। गायत्री—पंचाक्षर—द्वादशाक्षर—अष्टाक्षर—महामृत्युंजय—सूक्तानि चजपेयुः ॥ अथपंचदेवतानांतर्पणम् ॥ ताम्रपात्रे
जलदुग्धतिलचंदनसर्वौषधिंकृत्वा देशकालौसंकीर्त्य ॐ अमुकगोत्रस्य अमुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंपरलोके महातृषानिवारणार्थममुक
दुर्मरणदोषनिवृत्त्यर्थं ब्रह्मादिदेवानांस्वैःस्वैर्मंत्रैस्तर्पणंकरिष्ये इति संकल्प्य पात्रस्थितब्रह्ममूर्त्तौशंखेनतर्पणंकुर्यात् ॥ तत्रमंत्राः ॥
ॐ ब्रह्मंजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥१॥ ॐब्रह्मातृप्य
ताम् ॥ ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः
पुरन्ध्रिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनः पर्ज्जन्योव्वर्षतुफलवत्योनऽओषधयः पच्यन्तांय्यो
गक्षेमोनः कल्पताम् ॥२॥ ब्रह्मातृ० ॥ ब्रह्मणे ब्राह्मणं क्षत्रायराजन्यम्मरुद्भ्योव्वैश्यन्तपसेशूद्रन्तमसेतस्करन्नारकायव्वीरहणम्पाप्मनेक्लीं

बमांक्रयायां॑ऽअयोगूढ्क्षामायपूँ॑श्चलूमतिंकुष्टयमागधम् ॥ ३ ॥ ब्रह्मातृ० ॥ ब्राह्मणमद्यविदेयम्पितृमन्तंम्पैतृमत्यमृषिमार्षेयर्ठं सु
धातुंदक्षिणम् अस्म्मद्राता देवत्रा गेच्छतत्प्रदातारमाविंशत ॥ ४ ॥ ब्राह्मंणासुः पितंरः सोम्म्यासः शिवेनोद्यावांपृथिवीऽअंनेहसां ॥
पूषानंः पातुदुरितादृंतावृधोरक्षामाकिंर्न्नोऽअघशंर्ठंसऽईशत ॥ ५ ॥ ब्रह्मंणस्पतेत्वमस्ययन्तासूक्तस्यंबोधितनंयञ्चजिन्व ॥ वि
श्श्वंतद्भद्रंय्यदवंन्तिदेवाबृहद्वदेम विदथेंसुवीरांः ॥ यऽइमाविश्श्वाविश्श्वकंर्म्मायोनंः पितान्नंपतेन्नस्यनोदेहि ॥६॥ ब्राह्मणोस्स्यमुखंमासी
द्वाहूराजन्न्यःकृतः ॥ ऊरूतदंस्ययद्वैश्यंः पद्भ्यार्ठंशूद्रोऽअंजायत॥७॥उत्तिष्ठब्रह्मणस्पतेदेवयन्तंस्त्वेमहे। उपप्रयंन्तुमरुतंः सुदानवऽइन्द्रं
प्राशूर्भवासचां ॥८॥ युजेवाम्ब्रह्मंपूर्व्व्यंन्नमोंभिर्व्विश्श्लोकंऽएतुपथ्येवसूरेः। शृण्वंतुविश्श्वेंऽअमृतंस्यपुत्राऽ आयेधामानि दिव्यानिंतस्थुः॥९॥
तत्वांयामिब्रह्मंणावन्दंमानस्तदाशांस्तेयजंमानोहविर्भिंः ॥ अहेडमानोव्वरुणेहबोध्युरुशर्ठंसमानऽआयुः प्रमोंषीः॥१०॥ ब्रह्मंक्षत्रम्पं
वतेतेजऽइन्द्रियर्ठंसुरंयासोमंः सुतऽआसुतोमदाय।शुक्रेणदेवदेवेतांःपिपृग्धिरसेनान्नंय्यजंमानायधेहि ॥११ ब्रह्मसूर्य्यसमञ्ज्योतिद्यौंः
संमुद्रसंमर्ठंसरंः।इन्द्रंः पृथिव्यैवर्षीयान्नोस्तुमात्रानविंद्द्यते।१२। रुचम्ब्राह्मञ्जनयंन्तोदेवाऽअग्ग्रेतदंब्रुवन्।यस्त्वैवम्ब्राह्मणो विद्यात्तस्य
देवाऽअंसन्न्वशें ॥१३॥ ब्रह्मांणिमेमतयःशर्ठंसुतासःशुष्म्मंऽइयर्तिंप्रभृंतोमेऽअद्रिंः आशांसतेप्रतिंहर्य्यन्त्युक्थेमाहरिंवहतस्तानोऽअ

च्छ॥१४॥ प्रैतुब्ब्रह्मणस्प्पतिःप्प्रदेव्व्यैतुसूनृता॥अच्छांव्वीरन्नर्य्यम्पङ्क्तिराधसन्देवा यज्ञन्नयन्तुनः ॥१५॥ अनेनतर्पणेनब्रह्माप्रीयताम् ॥
अथविष्णुतर्पणम् ॥ तत्रमंत्राः॥ॐइदंविष्णुर्व्विचक्रमे त्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे॥ॐ विष्णुस्तृप्यताम् ॥ १ ॥ ॐयुञ्जते
मनऽउतयुंजते धियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः।व्विहोत्रादधेवयुनाविदेकऽइन्न्महीदेवस्यसवितुःपरिष्टुतिः॥१॥इरावती धेनुमती
हिभूतꣳ सूयवसिनीमनवेदशस्या॥व्व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैः ॥२॥ देवश्रुतौ देवेष्वाघोषतम्प्राचीप्रेतमध्व
रङ्कल्पयन्तीऽऊर्द्ध्वं यज्ञन्नयतमाजिह्वरतम्। स्वङ्गोष्ठमावदतंदेवीदुर्य्येऽआयुर्म्मानिर्व्वादिष्टम्प्रजाम्मानिर्व्वादिष्टमत्ररमेथांवर्ष्मन्पृथिव्व्याः
॥ ३ ॥ दिवोवाव्विष्णऽउतवापृथिव्व्यामहोवाव्विष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्तावसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्व्याद्विष्णवे
त्वा ॥४॥ व्विष्णोर्नुकं वीर्य्याणिप्प्रवोचंयःपार्थिवानिव्विममेरजाꣳसि ॥योऽअस्कभायदुत्तरꣳसधस्थंव्विचक्रमाणस्त्रेधोरुगायो व्वि
ष्णवेत्वा ॥ ५ ॥ प्रतद्विष्णुस्तवतेव्वीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुव्विक्रमणेष्वधिक्षियन्तिभुवनानिव्विश्वा ॥६॥
व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्त्थोव्विष्णोः स्यूरसिव्विष्णोर्ध्रुवोसिव्वैष्णवमसिव्विष्णवेत्वा ॥७॥ तद्विष्णोःपरमंपदꣳ सदापश्य
न्तिसूरयः॥दिवीवचक्षुराततम् ॥८॥ व्विष्णोःकर्म्माणिपश्यतयतोव्व्रतानिपस्पशे ॥ इन्द्रस्ययुज्ज्यः सखा ॥९॥ त्रीणिपदाव्विचक्रमे

विष्णुङ्गोपाऽअदाभ्यः। अतोधर्माणिधारयन्॥ १०॥ तद्विप्रासोविपन्यवोजागृवाꣳसःसमिन्धते॥ विष्णोर्यत्परमम्पदम्॥ ११॥
दिविविष्णुर्व्यक्रꣳस्तजागतेनच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयन्द्विष्मोन्तरिक्षेविष्णुर्व्यक्रꣳस्तत्रैष्टुभेन च्छन्दसाततोनिर्भक्तो
योस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ पृथिव्यांविष्णुर्व्यक्रꣳस्तगायत्रेणच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टि यञ्चवयन्द्विष्मोस्मादन्नादस्यैप्रतिष्ठायाऽअगन्मस्वः सञ्ज्योतिषाभूम ॥ १२ ॥ अदित्यैव्यूदनमसिविष्णोस्तुपोस्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्थान्देवे
भ्योभुवपतये स्वाहाभुवनपतयेस्वाहाभूतानाम्पतयेस्वाहा १३॥ विष्णोःक्रमोसिसपत्नहागायत्रञ्छन्दऽआरोहपृथिवीमनुविक्रमस्वविष्णोःक्रमोस्यभिमातिहात्रैष्टुभञ्छन्दआरोहान्तरिक्षमनुविक्रमस्वविष्णोःक्रमोस्यरातीयतोहन्ताजागतच्छन्दऽआरोहदिवमनुविक्रमस्व
विष्णोः क्रमोसिशत्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनुविक्रमस्व ॥ १४ ॥ प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइयाना
ताऽआववृत्रन्नधरागुदक्ताऽअहिर्बुध्न्यमनुरीयमाणा॥१५॥ विष्णोर्विक्रमणमसिविष्णोर्विक्रान्तमसिविष्णोः क्रान्तमसि ॥ १६ ॥ अने
नतर्पणेनश्रीमहाविष्णुःप्रीयताम् ॥ ॐ अथरुद्रतर्पणम् ॥ ॐ विभ्राड्बृहत्पिबतु॰ रुद्रस्तृप्यताम् ॥ १ ॥ उदुत्यञ्जातवेदसं ॥ २ ॥
येनापावकचक्षसा॰ ॥३॥ दैव्यावध्वर्यू॰॥४॥ तम्प्रत्नथापूर्वथा॰ ॥५॥ अयंवेनश्चोदयत्पृश्निगर्भा॰॥६॥ चित्रन्देवाना॰॥ ७ ॥

आनऽइडाभिर्व्विदथे॰ ॥८॥ यदद्य कच्चवृत्रहन्नुदगा॰ ॥९॥ तरणिर्व्विश्वदर्शतो॰ ॥१०॥ तत्त्सूर्य्यस्य देवत्वन्तन्न्महित्वं॰ ॥११॥ तन्न्मि
त्रस्यव्वरुणस्य॰ ॥१२॥ बण्महाँऽअसि॰ ॥१३॥ बट्सूर्य्यश्रवसा॰ ॥१४॥ श्रायन्तऽइवसूर्य्यम्॰ ॥१५॥ अद्यादेवाऽउदिता॰ ॥१६॥
आकृष्णेनरजसावर्त्तमानो॰ ॥ १७ ॥ ३३ ॥ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः बाहुभ्यामुततेनमः ॥१॥ ॐ रुद्रस्तृप्यताम् ॥ यातेरु
शिवातनूरघोरापापकाशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ इमारुद्रायतवसेकपर्द्दिने क्षयद्वीरायप्रभरामहे
मतीः ॥ यथाशमसद्द्विपदेचतुष्प्पदे व्विश्वम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम् ॥ ३ ॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् ॥
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥४॥ नीलग्रीवाःशितिकण्ठादिवꣳरुद्राऽउपश्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥५॥
एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसः कृत्तिवासाऽअहिꣳसन्नः शिवोतीहि ॥६॥ अवरुद्रमदीमह्यव्वदेवन्त्र्यम्ब
कम् ॥ यथानोव्वस्यसस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात् ॥७॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभा
गऽआखुस्तेपशुः ॥८॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुः सुमङ्गलः येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडऽईमहे ॥ ९ ॥
मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोअश्श्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥ १० ॥

श्राद्ध- नमः॑ शम्भ॒वाय॑च मयोभ॒वाय॑च॒ नमः॑ शङ्क॒राय॑च मयस्क॒राय॑च॒ नमः॑ शि॒वाय॑च शि॒वत॑राय च ॥ ११ ॥ परि॑णो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑त्वे॒ष प्रकाशः
स्य॑ दु॒र्म्मति॑रघा॒योः॥ अव॑स्थि॒रा म॒घव॑द्भ्य॒स्तनु॒ष्व मीढ्व॑स्तो॒काय॒ तन॑याय मृड ॥ १२ ॥ पुन॑स्त्वादि॒त्या रु॒द्रा वस॑वः॒ समि॑न्धतां॒ पुन॑र्ब्र॒ह्माणो॑ व
॥ १७१ ॥ सुनीथ य॒ज्ञैः॥ घृ॒तेन॒ त्वन्त॒न्व॑ वर्द्धयस्व स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामाः॑ ॥ १३ ॥ वसु॑भ्यस्त्वा रु॒द्रेभ्य॑स्त्वादि॒त्येभ्य॑स्त्वा स॒ञ्जा॑नाथान्द्या
वापृथिवी मि॒त्रावरु॑णौ त्वा॒ वृष्ट्या॑वताम् व्यन्तु॒ वयो॒क्तꣳ रिहा॑णा म॒रुतां॒ पृष॑तीर्गच्छ व॒शा पृश्नि॑र्भू॒त्वा दिव॑ङ्गच्छ॒ ततो॑नो वृ॒ष्टिमा व॑ह चक्षु
ष्पा ऽअ॑ग्नेसि॒ चक्षु॑र्म्मे पाहि ॥ १४ ॥ रु॒द्राः सꣳसृज्य॑ पृथि॒वीम्बृ॒हज्ज्योति॒ः समी॑धिरे तेषां॒ भा॒नु॒रज॑स्र ऽइच्छु॒क्रो दे॒वेषु॑ रोचते ॥ १५ ॥ अनेन तर्प
णेन रुद्रः प्रीयताम् ॥ अथ यमतर्पणम् ॥ य॒माय॑ त्वाङ्गि॑रस्वते पितृ॒मते॒ स्वाहा॑ स्वाहा॑ घ॒र्म्माय॒ स्वाहा॑ घ॒र्म्मः पि॒त्रे ॥ १ ॥ ॐ यमस्तृप्यताम् ॥
य॒माय॒ स्वाहा॒न्तका॑य॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा॑ ब्र॒ह्मणे॒ स्वाहा॑ ब्रह्मह॒त्यायै॒ स्वाहा॒ विश्वे॑भ्यो दे॒वेभ्यः॒ स्वाहा॑ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॑ ॥ २ ॥
माय॑ त्वा म॒खाय॑ त्वा॒ सूर्य्य॑स्य त्वा॒ तप॑से दे॒वस्त्वा॑ सवि॒ता मद्ध्वा॑नक्तु पृथि॒व्याः स॒ꣳस्पृश॑स्पाहि॥ अ॒र्चिर॑सि शो॒चिर॑सि॒ तपो॑ऽसि ॥ ३ ॥ य॒मेन ॥ १७० ॥
द॒त्तन्त्रि॒त ऽए॑नमायुन॒गिन्द्र॑ ऽएणं प्रथ॒मो ऽअद्ध्य॑तिष्ठत् । ग॒न्ध॒र्व्वो॑ ऽअस्य रश॒नाम॑गृभ्णा॒त्सूरा॑दश्वं॒ वसवो॒ निर॑तष्ट ॥ ४ ॥ असि॑ य॒मो ऽअस्या॑दि॒
त्यो ऽअ॑र्व्व॒न्नसि॑ त्रि॒तो गुह्ये॑न व्र॒तेन॑। असि॒ सोमे॑न स॒मया॒ विपृ॑क्त ऽआ॒हुस्ते॒ त्रीणि॑ दि॒वि बन्ध॑नानि ॥ ५ ॥ म॒न्नय वै॑य॒स्ता पं॑को धा॒यनि स॒रं॒य्यो गा॑य॒ यो

क्तारꣳ शोकायाभिसतारं क्षेमाय विमोक्तारं मुत्कूलनिकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं यमाय
सूम् ॥६॥ यमाय यमसूमथर्वभ्योवतोकाꣳ संवत्सराय पर्य्यायिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीं व
त्सराय विजर्जराꣳ संवत्सराय पलिक्नीमृभुभ्योजिनसन्धꣳ साध्येभ्यश्चर्म्मम्म्नम् ॥७॥ येदेवाऽअग्निनेत्राः पुरः सदस्तेभ्यः स्वा
हायेदेवायमनेत्रा दक्षिणासदस्तेभ्यः स्वाहायेदेवा विश्वेदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहायेदेवा मित्रावरुणनेत्रावामरुन्नेत्रावोत्तरासदस्ते
भ्यः स्वाहायेदेवाः सोमनेत्राऽउपरिसदोदुवस्वन्तस्तेभ्यः स्वाहा ॥८॥ क्रव्यादमग्निम्प्रहिणोमिदूरंयमराज्यंगच्छतु रिप्रवाहः इ
हायमितरोजातवेदादेवेभ्योहव्यंवहतु प्रजाजनन् ॥ ९ ॥ अनेनतर्पणेनयमः प्रीयताम् ॥ अथतत्पुरुषतर्पणम् ॥ ॐ अक्रन्कर्म्मकर्म्म
कृतः सहवाचामयोभुवा ॥ देवेभ्यः कर्म्मकृत्वास्तम्प्रेतंसचाभुवः ॥१॥ ॐ तत्पुरुषस्तृप्यताम् ॥ प्रेताजयतानरऽइन्द्रोवः शर्म्मयच्छतु ॥ उ
ग्रावः सन्तुबाहवोनाधृष्याय्यथासथ ॥२॥ रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतुऽऋतस्यपथाप्रेतंचन्द्रदक्षिणाविस्वः पश्य
व्यन्तरिक्षंयतस्वसदस्यैः ॥३॥ यदाकूतात्समसुस्नोद्धृदोवामनसोवासम्भृतञ्चक्षुषोवा तदनुप्रेतसुकृतामुलोकंयत्रऽऋषयोजग्मुः प्रथ
मजाः पुराणाः ॥ ४ ॥ योऽअग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः ॥ प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यऽआ ॥ ५ ॥ प्रेदग्ने
ज्ज्योतिष्मान्पाहिशिवेभिरर्चिभिष्ट्वम् ॥ बृहद्भिर्भानुभिर्भासन्मासन्माहिꣳसीस्तन्वाप्रजाः ॥ ६ ॥ अपेतवीतविचसर्प्पतातोयेत्र

स्त्थपुराणा येचनूतनाऽ। अदांद्यमोवसानम्पृथिव्याऽ अक्रन्निमम्पितरोलोकमंस्म्मै ॥ ७ ॥ अपेतो यन्तुपणयोसुम्ना देव पीयवं÷ ॥ अस्यलोकऽसुतावंतऽद्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्ववसानमस्म्मै ॥ ८ ॥ येदेवाऽअग्निनेत्राऽपुरऽसदस्तेभ्यःस्वाहायेदे वायमनेत्रादक्षिणासदस्तेभ्यऽ स्वाहायेदेवाविश्वदेवनेत्राःपश्चात्सदस्तेभ्यः स्वाहायेदेवामित्रावरुणनेत्रावामरुन्नेत्रावोत्तरासदस्तेभ्यः स्वाहायेदेवाऽसोमनेत्राऽउपरिसदोदुवस्वन्तस्तेभ्यःस्वाहा ॥ ९ ॥ अनेनतर्पणेनश्रीतत्पुरुषः प्रीयताम् ॥ इति तत्पुरुषतर्पणम् ॥ ततः पंच देवतानां तर्पणपरिपूर्णतास्तु ॥ अनेनपंचदेवतानांतर्पणकृतेन अमुकगोत्रस्य अमुकप्रेतस्य असद्गतिविनाशः सद्गतिप्राप्तिश्चभवतु ॥ इति पठित्वाधेनुंतन्मूल्यदक्षिणांवादद्यात् ॥ अथाग्निस्थापनम्॥तत्रादौ आचम्य प्राणानायम्य देशकालौ संकीर्त्य ॥ अस्मिन्नाराय णबलिकर्मणि पंचभूसंस्कारपूर्वकाग्निप्रतिष्ठापनंकरिष्ये इति संकल्प्य तत्रहस्तपरिमितचतुरस्रंस्थंडिलंकृत्वाकुशैःपरिसमुह्यतानैशान्यां निक्षिप्य गोमयेनोपलिप्यस्रुवमूलेनप्रादेशमात्रमुत्तरोत्तरक्रमेणप्रागग्रंत्रिरुल्लिख्य उल्लेखनक्रमेण अनामिकांगुष्ठाभ्यांमृदंसमुद्धृत्य॥ उदके नाभ्युक्ष्य कांस्यपात्रेणाग्निमुपसमाधाय स्थंडिले ॐअग्निंदूतम्पुरोदधेहव्यवाहमुपब्रुवे॥ देवाँ२ऽआसादयादिह ॥ १ इति मंत्रेणस्थाप येत् ॥ ततः अग्न्यानीतपात्रेसाक्षतोदकंनिषिच्य अग्निंध्यायेत ॥ ॐचत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य॥त्रिधाबद्धो वृषभोरोरवीतिमहोदेवोमर्त्यांऽआविवेश ॥१॥ अग्नेवैश्वानर शांडिल्यगोत्र शांडिल्यासितदेवलेतित्रिप्रवरान्वित भूमिर्मातावरुणःपिता

मेषध्वज प्राङ्मुख मम सन्मुखो भव इति विटनामाग्निंप्रतिष्ठाप्यप्रेक्षितेन्धनानिनिक्षिपेत् ॥ ततः ॐ अद्य कर्तव्यनारायणबलिहोमकर्मणिकृ
ताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइति ब्रह्माणं वृणुयात् ॥वृतो
स्मीतिप्रतिवचनम् ॥ यथाविहितंकर्म्मकुर्वितियजमानोक्तेकरवाणीतितेनोक्ते ॥ अग्नेर्दक्षिणतः शुद्धमासनंनिधायतदुपरिप्रागग्रान्कुशाना
स्तीर्य अग्निप्रदक्षिणंकारयित्वाब्रह्माणमुदङ्मुखंतत्रोपवेश्य अस्मिन्नारायणबलिकर्मणित्वंमेब्रह्माभव इत्यभिधाय भवानीतितेनोक्ते प्रणी
तार्थंप्रागग्रैः[1]कुशैरग्नेरुत्तरतःआसनद्वयंकल्पयित्वाप्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्यपश्चिमासनेनिध
याऽऽलभ्यपूर्वासनेस्थापयेत् ॥ ततःपरिस्तरणम्॥बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्मणोग्निपर्य्यन्तं नैर्ऋत्याद्वायव्यांतमग्नितः[3]
प्रणीतांपर्य्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं पवित्रकरणार्थंसाग्रमनंतर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थालीचरु
स्थालीसंमार्जनार्थंकुशत्रयम् उपयमनार्थं कुशत्रयं प्रादेशमितपलाशसमिधस्तिस्रः स्रुवःस्रुचः आज्यंचर्वर्थास्तंडुलाः तंडुलपूर्णपात्रं दक्षि
णावरोवा एतानिपवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि॥ततः पवित्रच्छेदनकुशैःयजमानप्रादेशमितपवित्रच्छेदनम् सपवित्रकरे
णप्रणीतोदकं त्रिःप्रोक्षणीपात्रेनिधायद्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रे गृहीत्वा त्रिरुत्पवनम् ततः प्रोक्षणीपात्रंसव्यहस्तेगृहीत्वादक्षि
णाऽनामिकांगुष्ठाभ्यांपवित्रेगृहीत्वा त्रिरुद्दिङ्गनयनम्॥ततः प्रणीतोदकेनप्रोक्षणीपात्रमभ्युक्ष्यप्रोक्षणीजलेनासादितवस्तुसेचनम्आज्यस्था
ल्यादीनिपूर्णपात्रपर्यंतानि एकैकशःप्रोक्ष्य अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात ॥ ततः आज्यस्थाल्यामाज्यंनिरूप्यप्रणीतोदकेन

१ उत्तराग्रैः । २ पूर्वाग्रैः । ३ उत्तराग्रैः । ४ पूर्वाग्रैः । ५ उत्तराग्रम् । ६ उत्तराग्रम् ।

डुल ान्प्रक्षाल्य चरुपात्रेप्रणीतोदकंदत्त्वा तत्रतंडुलान्प्रक्षिप्य्यस्वयंचरुंगृहीत्वाब्रह्मा चाज्यंवह्न्युत्तरतश्चरुंदक्षिणतआज्यंनिदध्यात्॥ततः सिद्धेचरौतृणादिप्रज्वाल्यउभयोरुपरिप्रदक्षिणंभ्रामयित्वा वह्नौतत्प्रक्षेपः॥ ततस्त्रिः स्रुवप्रतपनंसमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रताप्यदक्षिणतोनिदध्यात् ॥ एवंस्रुक्प्रोक्षण्योरपिप्रतपनसंमार्जने कृत्वास्रुवादुत्तरतः स्थापयेत् ॥ ततः आज्यमग्नितश्चरोः पूर्वेणानीयअग्रेधृत्वा आज्यात्पश्चिमेचरुमानीयाज्यस्योत्तरतोनिदध्यात ॥ ततः आज्यस्यप्रोक्षणीवत्रिरुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनम् ॥ ततः प्रोक्षण्युत्पवनम् ततः उत्थाय उपयमनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताः समिधः प्रक्षिपेत् ॥ ततः उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निंपर्य्युक्ष्य प्रणीतापात्रेपवित्रनिधाय ब्रह्मणान्वारब्धः पातितसजघनदक्षिणजानुः समिद्धतमेग्नौजुहुयात्॥तत्रप्रथमाहुतिचतुष्टयेत त्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः॥ अग्नेरुत्तरभागे ॐ प्रजापतयेस्वाहा इदं प्रजापतये नमम ॥ अग्नेर्दक्षिणभागे ॐ इंद्राय स्वाहा इदमिंद्राय नमम इत्याघारौ॥ मध्येसमिद्धतमे ॐ अग्नये स्वाहा इदमग्नये नमम॥ ॐ सोमाय स्वाहा इदं सोमाय नमम इत्याज्यभागौ ॥ इति हुत्वा प्रायश्चित्ते विट्नामानंवैश्वानरंयज्ञपुरुषंबहिः षोडशोपचारैः संपूज्य ॐ वह्निपूजनविधेः परिपूर्णताऽस्तु इतिपठेत्॥ततोऽन्वारब्धंविना युंजतेइत्यनुवाकेनचतुर्गृहीताज्येनस्रुचाजुहुयात्॥ॐयुंजतेमनऽउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः। विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिःस्वाहा ॥१॥ इदं विष्णवे नमम इति सर्वत्र त्यागः॥ ॐइदंविष्णुर्विचक्रमे त्रेधानिदधेपदम्॥समूढमस्यपाᳪसुरेस्वाहा ॥२॥ इदं विष्णवे०

ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ।३। ॐ देवश्रुतौ देवे
ष्वाघोषतं प्राचीप्रेतमध्वरं कल्पयन्ती ॥ ऊर्ध्वं यज्ञं नयतं मा जिह्वरतं स्वं गोष्ठमावदतं देवी दुर्य्येऽ आयुर्म्मा निर्व्वादिष्टं प्रजां मा निर्व्वादिष्टमत्र रमेथां व
र्ष्मन् पृथिव्याः स्वाहा ।४। ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । योऽ अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रे
धोरुगायो विष्णवे त्वा स्वाहा ॥५॥ ॐ दिवो वा विष्णऽ उत वा पृथिव्या महो वा विष्णऽ उरोरन्तरिक्षात् ॥ उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षि
णादोत सव्याद्विष्णवे त्वा स्वाहा ॥६॥ ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि
विश्वा स्वाहा ॥७॥ ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा स्वाहा ॥८॥ इदं विष्णवे
नमम ॥ ततः पुरुषसूक्तेन षोडशाज्याहुतीर्जुहुयात् ॥ ॐ सहस्रशीर्षा० गुलꣳ स्वाहा ॥१॥ इदं विष्णवे नमम इति त्यागः सर्वत्र ॥ ॐ पु
रुषएवेदꣳ० तिस्वाहा ॥२॥ ॐ एतावां० दिविस्वाहा ॥३॥ ॐ त्रिपादूर्ध्व० अभिस्वाहा ॥४॥ ॐ ततो विराड० पुरःस्वाहा ॥ ५ ॥ ॐ
तस्माद्यज्ञात्सर्वहुतः सम्भृतं० येस्वाहा ॥६॥ ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० तस्वाहा ॥ ७ ॥ ॐ तस्मादश्वा० यतःस्वाहा ॥ ८ ॥ ॐ तं
यज्ञं० येस्वाहा ॥९॥ ॐ यत्पुरुषं० च्यतेस्वाहा ॥१०॥ ॐ ब्राह्मणोस्य० यतस्वाहा ॥११॥ ॐ चन्द्रमा० यतस्वाहा ॥ १२ ॥ ॐ

नाभ्याऽआसीदं॰यनुस्वाहा ॥१३॥ ॐ यत्पुरुषेण॰ द्धविःस्वाहा ॥१४॥ ॐसप्तास्यांसन्॰ पशुंस्वाहा ॥१५॥ ॐयज्ञेनंयज्ञ॰ देवाः
स्वाहा ॥१६॥ इदं विष्णवे नमम ॥ ततः उत्तरनारायणेनहोमः ॥ॐ अद्भ्यः सम्भृतःपृथिव्यैरसांच्चविश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्य
त्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे स्वाहा ॥१॥ इदं विष्णवे नमम । ॐवेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तात्।
तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायस्वाहा॥२॥ॐप्रजापतिश्चरतिगर्भेऽअन्तरजायमानोबहुधाव्विजायते।तस्ययोनिंपरि
पश्यंतिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वास्वाहा ॥३॥ ॐयोदेवेभ्यंऽआतपतियोदेवानाम्पुरोहितः ॥पूर्व्वोयोदेवेभ्योजातोनमोरुचायब्रा
ह्मये स्वाहा ॥ ४ ॥ ॐ रुचंब्राह्मंजनयंतोदेवाऽअग्रेतदब्रुवन् ॥ यस्त्वैवंब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशेस्वाहा ॥ ५ ॥ ॐश्रीश्चतेलक्ष्मी
श्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण स्वाहा ॥ ६ ॥ इदं विष्णवे नमम ।
ततः पुनः स्रुवेणाज्याहुतयः । ॐ लोमभ्यःस्वाहा २ इदं लोमभ्यो नमम ॥ ॐ त्वचे स्वाहा २ इदं त्वचे नमम ॥ त्यागः सर्वत्रयथा
दैवतम् ॥ ॐ लोहिताय स्वाहा २ इदं लो॰ ॥ ॐ मेदोभ्यः स्वाहा २ इदं॰ ॥ ॐमा७ंसेभ्यःस्वाहा २ इदं॰ ॥ स्नायुभ्यःस्वाहा
२ इदं॰॥ॐ अस्थिभ्यः स्वा॰ २ इदं॰॥ॐमज्जाभ्यःस्वाहा२इदं॰॥इति षोडशाहुतयः ॥ॐरेतसेस्वाहा १ इदं॰ ॥ ॐपायवे॰ १इदं॰॥

ॐआयासाय० १इदं०ॐप्रायासाय० १इदं०ॐसंय्यासाय० १इदंॐव्वियासाय१इदं०ॐउद्यासाय० १इदं०ॐशुचेस्वाहा १इदं०ॐशोचं
ते० १इदं०॥ॐशोंचमानायस्वाहा१ इदं० ॐशोकाय० १इदं०ॐतपसे० १इदं०ॐतप्यते० १ इदं० ॐतप्यमानाय० १इदं० ॐतप्ताय०
१इदं०ॐघर्माय० १इदं० ॐनिष्कृत्यै० १ इदं० ॐप्रायश्चित्यै० १ इदं० ॐभेषजाय० १ इदं०ॐयमाय० १ इदं ॐअन्तकाय०
१इदं०॥ॐमृत्यवे० १ इदं० ॐब्रह्मणे० १ इदं ॐब्रह्महत्यायै० १ इदं० ॐव्विश्वेभ्योदेवेभ्यःस्वाहा १ इदं०ॐद्यावापृथिवीभ्यां
स्वाहा१ इदंद्यावापृथिवीभ्यांनमम॥४२॥अथघृताक्तपायसचरुहोमः॥तावद्गणेशनवग्रहदिक्पालहोमःसमाचारात् कार्यः॥ततःॐइदंविष्णु
र्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढस्यपाᳯंसुरेस्वाहा॥१॥इदंविष्णवेनमम ॥ ॐ अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥
याभिर्म्मित्रावरुणाबभ्यषिंचन्न्याभिरिंद्रमनयन्नत्यरातीःस्वाहा॥२॥इदं०ॐप्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइयानाः॥ताऽआव
वृत्रन्नधरागुदक्ताऽअहिंबुध्न्यमनुरीयमाणाः विष्णोर्व्विक्रमणमसिविष्णोर्व्विक्रान्तमसिविष्णोः क्रान्तमसिस्वाहा ॥३॥ इदं०॥ॐविष्णो
र्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजाᳯंसि ॥ योऽअस्कभायदुत्तरᳯंसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णवेत्वास्वाहा॥४॥इदं०॥
ॐदिवोवाव्विष्णऽउतवापृथिव्यामहोवाविष्ण।उरोरंतरिक्षात।उभाहिहस्तावसुनापृणस्वप्रयच्छदाक्षिणादोतसव्याविष्णवेत्वास्वाहा॥५॥

इदं०॥ॐप्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुंचरोगिरिष्ठाः॥यस्योरुषुत्रिषुव्विक्रमणेष्वधिक्षियंतिभुवनानिविश्वास्वाहा ॥६॥ इदं०॥ॐ
विष्णोररराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वास्वाहा॥७॥इदं०।ॐतद्विप्रासोविपन्यवोजागृवा
ᳪसःसमिंधते ॥ विष्णोर्यत्परमंपदᳪस्वाहा ॥८॥ इदं०॥ॐविष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे॥इंद्रस्ययुज्यःसखास्वाहा ॥९॥
इदं ॥ ॐतद्विष्णोःपरमंपदᳪसदापश्यंतिसूरयः दिवीवचक्षुराततᳪस्वाहा ॥ १० ॥ इदं विष्णवेनमम ॥ ॐअग्न्यःसंभृतः० स्वाहा १
इदंविष्णवे० ॐवेदाहमेतंपुरुषं० स्वाहा २ इदं० ॐप्रजापति० स्वाहा ३ इदं० ॐयोदेवेभ्यऽआतपति० स्वाहा ४ इदं० ॐरुचंब्राह्म
जनयंतो०॥स्वाहा५इदं० ॐश्रीश्चतेलक्ष्मीश्च० स्वाहा६इदंविष्णवे नमम ॥ इतिषोडशचर्वाहुतयः ॥ १६ ॥ ततःकृष्णैस्तिलैःकार्योघृ
ताक्तैर्यवमिश्रितैःतिद्विप्रासेतिमंत्रेणजुहुयादष्टोत्तरंशतम्।ॐतद्विप्प्रासोव्विपन्न्यवोजागृवाᳪसःसमिन्धते।व्विष्णोर्य्यत्परमंपदᳪस्वाहा
॥१॥ इदंविष्णवे नमम इतिमंत्रेणाष्टोत्तरशतंतिलयवाहुतीर्दद्यात् ॥ १०८ ॥ ततोब्रह्मणान्वारब्धः ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नये
स्विष्टकृतेनममइतिचरुशेषंहुत्वा ॥ ततः आज्येन ॐभूः स्वाहा इदमग्नये नमम ॥ १ ॥ ॐभुवःस्वाहा इदंवायवे० ॥ २ ॥ ॐस्वःस्वाहा
इदंसूर्याय० ॥ ३ ॥ ॐत्वन्नोऽअग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोव्वह्नितमःशोशुचानोव्विश्वाद्वेषांᳪसिप्प्रमुमु

ग्ध्यस्मत्स्वाहा।४। इदमग्नीवरुणाभ्यांनमम ॥ ॐसत्वन्नोऽअग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ।अवयक्ष्वनोवरुणठंरराणोव्वीहि
मृडीकठंसुहवोनऽएधिस्वाहा ॥५॥ इदमग्नीवरुणाभ्याम् ॥ ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि॥अयानोयज्ञंवहास्य
यानोधेहिभेषजठंस्वाहा॥६॥ इदमग्नयेअयसे नमम॥येते शतंवरुणयेसहस्रंयज्ञियाः पाशाविततामहान्तः। तेभिर्नोऽअद्यसवितोतविष्णु
विंश्वे मुंचंतुमरुतःस्वर्काः स्वाहा ॥ ७ ॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च नमम ॥ ॐउदुत्तमंव्वरुणपाशमस्म
दवाधमंव्विमद्धयमठं श्रथाय ॥ अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा ॥ ८ ॥ इदंवरुणायादित्यायादितयेच नमम ॥
ॐप्रजापतयेस्वाहा ॥ ९ ॥ इदंप्रजापतयेनमम ॥ इतिप्राजापत्यम् इतिनवाहुतयः ॥ ततोदिक्पालेभ्योमाषभक्तेन हुतशेषचरुणावा
बलिदानम् ॥ तत्रदेशकालौसंकीर्त्य० इंद्रादिदिक्पालानां पूजापूर्वकबलिदानंकरिष्ये इतिसंकल्प्य ॐदिक्पालेभ्यो नम इतिगं
धादिसमर्प्यस्थंडिलपरितः पूर्वादिदिक्षुपृथक्पृथङ्नाममंत्रेणमाषभक्तबलीन्दत्त्वा आचामेत ॥ अथपूर्णाहुतिः ॥ तावत् आज्येन
स्रुचं पूरयित्वा तदुपरि गंधकुंकुमाक्षततांबूलकुसुमयुतंनालिकेरं पूगीफलंवाधृत्वाउत्थायस्रुचंहस्तेगृहीत्वा ॐस्वाहाप्राणेभ्यः साधि
पतिकेभ्यः पृथिव्यैस्वाहाऽग्नयेस्वाहान्तरिक्षायस्वाहा व्वायवेस्वाहा दिवेस्वाहा सूर्य्यायस्वाहा ॥ १ ॥ दिग्भ्यः स्वाहाचं

॥१७६॥

द्रायस्वाहा नक्षत्रेभ्यस्वाहाऽद्भ्यः स्वाहा व्वरुणायस्वाहा नाभ्यैस्वाहा पूतायस्वाहा ॥२॥ व्वाचेस्वाहा प्राणायस्वाहा प्राणायस्वाहा
चक्षुषेस्वाहा चक्षुषेस्वाहा श्रोत्रायस्वाहा श्रोत्राय स्वाहा ॥ ३ ॥ ॐ मूर्द्धानं दिवोऽअरतिंपृथिव्व्यावैश्वानरमृतऽआजातमग्निम्॥कविꣳ
सम्राजमतिथिंजनानामासन्नापात्रं जनयन्तदेवाः स्वाहा।४। इदंमृडाग्नये नमम इतित्यागः॥ततःॐआघारावादिपूर्णाहुतिपर्य्यन्तम् अस्मि
न्प्रायश्चित्तहोमकर्मणि स्वैःस्वैर्मंत्रैर्यस्यैयस्यैदेवतायैयावद्यावद् आहुतयः सासादेवता प्रीयताम्॥इत्युत्सृजेत॥ततः संस्रवप्राशनम् आच
मनंचकृत्वा ॐअद्यकृतैतन्नारायणबलिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायाऽमुकशर्म
णेब्राह्मणाय ब्रह्मणेवादक्षिणांतुभ्यमहं संप्रददे इतिपूर्णपात्रंदद्यात् ॥ ॐ स्वस्तीतिप्रतिवचनम् ॥ ततोब्रह्मग्रंथिविमोकः ॥ ॐ
सुमित्रियानऽआपऽओषधयꣳसन्तु इतिपवित्राभ्यांप्रणीताजलमानीय तेनयजमानशिरः संमृज्यॐदुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियंच
वयंद्विष्मꣳ इत्यैशान्यां प्रणीतान्युब्जीकरणं पवित्रे अग्नौप्रतिपत्तिः॥ततः ॐ देवागातुविदोगातुंवित्त्वागातुमितमनसस्पतऽइमंदेवयज्ञꣳ
स्वाहाव्वातेधाꣳ स्वाहा । इतिमंत्रेणबर्हिर्होमः ॥ ततः स्रुवेणभस्मानीयदक्षिणानामिकागृहीतभस्मना ॐ त्र्यायुषंजमदग्नेरितिललाटे।ॐ
कश्यपस्यत्र्यायुषम् इति ग्रीवायाम् ॐ यद्देवेषुत्र्यायुषम् इति दक्षिणबाहुमूले ॥ ॐ तन्नोऽअस्तुत्र्यायुषमितिहृदि इति त्र्यायुषं कुर्यात्।
ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिहवनकर्म्मणः सांगतासिद्ध्यर्थंयथासंपन्नेनान्नेनयथासंख्याकान्

ब्राह्मणान्भोजयिष्ये इतिसंकल्प्य विप्रान्संभोज्य अथवा आमान्नंदक्षिणांवादत्त्वा अनेनकर्म्मणाकर्माङ्गदेवताप्रीयताम् इत्युत्सृज्य नारायणबलिहवनकर्मणिन्यूनातिरिक्तं विष्णुप्रसादात्सर्वंपरिपूर्णमस्तु ॥ अनेनदुर्मरणप्रायश्चित्ताङ्गहोमकृतेनअमुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणदोषनिवृत्तिः असद्गतिविनाशः सद्गतिप्राप्तिः इतिपठेत् ॥ इतिप्रायश्चित्तहोमविधिः ॥ अथैकादशविष्णुश्राद्धप्रयोगः ॥ तत्रादौ स्नात्वाधौतश्वेतवाससीपरिधाय गोमयादिनासंस्कृतंश्राद्धदेशमागत्यतत्रतिलतैलेनश्राद्धापवर्गस्थायिनंदीपंप्रज्वाल्यस्थापयेत् ॥ काककुक्कुटादीञ्छ्राद्धापहंतॄनपसारयेत् ॥ श्राद्धदेशावरणंचकुर्यात् ॥ ततःस्वासनेप्राङ्मुखउपविश्य सव्येनकुशपवित्रादिधारणंकृत्वा आचम्य प्राणानायम्य कर्म्मपात्रंजलेनापूर्य्यगंधपुष्पयवकुशत्रयादि निक्षिप्य ॐ अपवित्रः पवित्रोवा० ॐ पुण्डरीकाक्षः पुनातु इति कुशत्रयानीत जलैःश्राद्धदेयद्रव्याणिस्वात्मानंचसिंचेत्॥ततःॐभूम्यैनमःॐभगवत्यैगयायैनमः ॐ भगवतेगदाधरायनमःइतिनत्वाकुशत्रय यवजलन्यादायअद्येत्यादिदेशकालौसंकीर्त्यॐअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थम्असद्गतिविनाशार्थं तद्गत्यक्षय्यविष्णुलोकप्राप्त्यर्थंषट्त्रिंशद्दुर्मरणांतर्गता-मुकदुर्मरणनिमित्तकनारायणबलिकर्म्मांगभूतम्एकादशविष्णुश्राद्धंविष्ण्वादिविष्णुपर्यंतानाम् एकोद्दिष्टविधिना एकतंत्रेणाहंकरिष्ये इतिसंकल्प्य गायत्रींत्रिर्जपित्वा ॐ देवताभ्य इतित्रिजपेत् ॥ ततोगौरसर्षपानगृहीत्वा पूर्वादिदिक्षु ॐ नमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥१॥ पूर्वेनारायणः पातु वारिजाक्षस्तुदक्षिणे ॥ प्रद्युम्नः पश्चिमेपातु वासुदेवस्तथोत्तरे ॥ २ ॥ ऐशान्यांरक्षतांविष्णुराग्नेय्यांचत्रिविक्रमः ॥ नैर्ऋत्यांपद्मनाभस्तु वायव्यांमाधवोऽ तु ॥ ऊर्ध्वंगोवर्द्धनोरक्षेदधस्ताच्चत्रिविक्रमः॥३॥इतिविकीर्य कस्मिंश्चित्पात्रेजलंगृहीत्वादर्भैरालोड्यॐयद्देवादेव हेडनंदेवासश्चकृमाव्वयम् ॥ अग्नि

र्मातस्मादेनंसोविश्वान्मुञ्चत्वर्ठ० हंसः ॥ १ ॥ यदिदिवायदिनक्तमेनांसिचकृमावयम् ॥व्वायुर्मातस्मादेनंसोविश्वान्मुञ्चत्वर्ठ०हंसः ॥२॥
यदिजाग्रद्यदि स्वप्नऽएनांसिचकृमावयम् ॥सूर्य्यो मातस्मादेनंसोविश्वान्मुञ्चत्वर्ठ०हंसः ॥३॥इतिकूष्मांडसूक्तेनाभिमंत्र्य एकादशविष्णु
श्राद्धेपिंडद्रव्योपहाराणां पवित्रताऽस्तु इतिपाकंप्रोक्ष्यॐदेशकालपाकपात्रद्रव्यश्रद्धासंपदस्तु इतिपठेत् ॥ अस्तुसंपत् । ततउदङ्मुख
उत्तरोत्तरक्रमेण एकादशचटान्स्थाप्य प्रथमचटे ॐ विष्णवे इदमासनम् इतिपूर्वाग्रंकुशत्रयमुत्सृजेत् ॥ १ ॥ एवमेवद्वितीयम् ॐ
शिवाय इदमासनं० ॥ २ ॥ ॐ यमायसपरिवाराय इदमासनं० ॥ ३ ॥ ॐ सोमराजाय इदमासनं० ॥ ४ ॥ ॐ हव्यवाहनाय इदमा
सनं० ॥ ५ ॥ ॐ कव्यवाहनाय इदमासनं० ॥ ६ ॥ ॐ मृत्यवे इदमासनं० ॥ ७ ॥ ॐ रुद्राय इदमासनं० ॥ ८ ॥ ॐ तत्पुरुषाय
इदमासनं० ॥९॥ अपसव्येन ॐ प्रेताय इदमासनम् इतिदक्षिणाग्रमुत्सृजेत् ॥१०॥ हस्तप्रक्षालनंसव्येन ॐ विष्णवे इदमासनम् ॥११॥
इतिएकादशासनान्युत्सृजेत् ॥ ततः एकादशार्घपात्राणिधृत्वातेषु एकैकंपवित्रंदत्त्वा ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवंतुपीतये शंय्यो
रभिस्रवन्तुनः इतिजलंप्रक्षिप्य ॐयवोसियवयास्मद्द्वेषोयवयारातीरितिदशसुयवान्निक्षिप्य प्रेतपात्रे ॐ तिलोसीतितिलान्निक्षिप्य गंधपु
ष्पाणिक्षिपेत् ॥ ततः एकादशार्घपात्राणाम् अर्घ्यार्चनविधेः परिपूर्णतास्तु इतिपठित्वाप्रथमार्घपात्रस्थपवित्रं पात्रेधृत्वा ॐ यादि
व्याऽआपः पयसासंबभूवुर्याऽआन्तरिक्षाऽउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानऽआपः शिवाः शर्ठ० स्योनाः सुहवाभवंतु इत्य
र्घ्यपात्रम् अभिमंत्र्य ॐ विष्णो एषतेऽर्घः इति पवित्रोपरिअर्घंदद्यात् ॥ एवंसर्वत्रशिवादिभ्योऽर्घदानम् ॥ अत्रनन्युब्जीकरणं

नार्घवंदनम् ॥ ततः एकादशचटेषु क्रमेण गंधपुष्पधूपदीपतांबूलादीनिधृत्वा ॐ एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि विष्णवे अक्षय्यमस्तु स्वाहा इतिप्रथममुत्सृजेत् ॥ १ ॥ एवं शिवाय० ॥ २ ॥ यमायसपरिवाराय० ॥ ३ ॥ सोमराजाय० ॥ ४ ॥ हव्यवाहनाय० ॥ ५ ॥ कव्यवाहनाय० ॥ ६ ॥ मृत्यवे० ॥ ७ ॥ रुद्राय० ॥ ८ ॥ तत्पुरुषाय० ॥९॥ अपसव्येन प्रेताय० ॥ १० ॥ पुनः सव्येन विष्णवे० ॥ ११ ॥ क्रमेणगंधादिउत्सृजेत् ॥ ततः ॐअमीषामेकादशश्राद्धानामर्चनविधेः परिपूर्णतास्तु इतिप्रार्थ्य हस्तौप्रक्षाल्य एकादशपात्रेषु पृथक्पृथक् पात्रेसोपस्करान्नपरिवेषणंकुर्य्यात्॥ततः प्रथमपात्रमालभ्य ॐपृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा।ॐइदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् समूढमस्यपाᳫंसुरे स्वाहा।इतिपठित्वाॐविष्णोहव्यंरक्षस्वइत्यंगुष्ठमन्नेनिवेश्य ॐ अपहताऽअसुरारक्षाᳫंसिवेदिषद इति परितोयवान्विकीर्य पात्रमत्यजन् ॐ एतदन्नंसोपस्करम् अमृतरूपंहव्यं विष्णवेस्वाहा संपद्यतांनमम इत्युत्सृजेत् ॥१॥ एवं शिवाय० ॥२॥ यमायसपरिवाराय०॥३॥ सोमराजाय०॥४॥हव्यवाहनाय०॥५॥ कव्यवाहनाय० ॥ ६ ॥ मृत्यवे० ॥७॥ रुद्राय० ॥ ८ ॥ तत्पुरुषाय० ॥ ९ ॥ असव्येन पात्रालंभनंविना प्रेताय० ॥ १० ॥ पुनः सव्येन विष्णवे अन्नमुत्सृजेत् ॥११॥ ततः पिण्डदानार्थमेकादशस्थानानिनिर्माय प्रेतवर्ज्यंसर्वत्र ॐ अपहतेतिसकृद्रेखाकरणम् ॐयेरूपाणीति उल्मुकभ्रामणंचकृत्वा प्रत्येकंकुशत्रयमास्तीर्य्यएकादशपात्रेषु जलयवगंधपुष्पाणिकृत्वाप्रथमपात्रेणॐविष्णवेअवनेनिक्ष्व इतिप्रथमदर्भोपरि अवनेजनंदद्यात्॥ एवं शिवादिभ्योपिक्रमेणदद्यात्॥ततःतिलघृतमधुयुक्तेनान्नेन एकादशपिण्डान्कृत्वाघृतमधुभ्यामभिघार्य्य

एकंपिण्डंकुशादीनिचादाय ॐविष्णो एषतेपिण्डोनम इतिप्रथमदर्भोपरिदद्यात्।१।एवं द्वितीयंशिवाय०।२। तृतीयं यमाय सपरिवाराय
॥३॥ चतुर्थं सोमराजाय० ॥४॥ पंचमं हव्यवाहनाय० ॥५॥ षष्ठं कव्यवाहनाय०॥६॥ सप्तमं मृत्यवे०॥७॥ अष्टमं रुद्राय०॥८॥नवमं
तत्पुरुषाय० ॥ ९ ॥ दशमम् अपसव्येन अमुकगोत्र अमुकप्रेत एषतेपिण्डोंमयादीयतेतवोपष्ठितामितिदद्यात् ॥१०॥ ततोहस्तौप्रक्षा
ल्य सव्येन एकादशंविष्णवेदद्यात् ॥ ११ ॥ ततोहस्तौप्रक्षाल्य आचम्य पूर्ववत्प्रत्यवनेजनंप्रत्येकंदत्त्वा पिंडेषु सूत्राच्छादनगंधपु
ष्पतुलसीधूपदीपनैवेद्यतांबूलपूगीफलदक्षिणादीनिक्रमेणदद्यात् ॥ ततः पिंडानामर्चनविधेः परिपूर्णतास्तु एभिरेकादशपिंडैः
॥ अपसव्यम् ॥ अमुकगोत्रस्य अमुकप्रेतस्यसद्गतिः उत्तमलोकप्राप्तिरस्तु इतिपठित्वा सव्येन आचमनंकृत्वा एकस्मिन्पत्रपुटे ॐ
शिवाआपः संतु ॐ सौमनस्यमस्तु ॥ ॐ अक्षतंचारिष्टंचास्तु ॥ इतिसुप्रोक्षितादि कुर्य्यात् ॥ ततः अक्षय्योदकदानम् ॥ ॐ
विष्णोः यद्दत्तमन्नपानादिकं तदुपतिष्ठताम् इति ॥ १ ॥ एवंसर्वत्र षष्ठ्या विभक्त्या शिवादीनामक्षय्योदकंक्रमेणदद्यात् ॥ ततः
पिंडानामुपरिएकादशसपवित्रान्दर्भान्समर्प्यप्रत्येकंजलधारांदद्यात्।तद्यथा ताम्रपात्रेजलदुग्धसर्वौषधितिलयवतुलसीचंदनहिरण्यानिप्र
क्षिप्यपिंडोपरिपृथक्पृथङ्मंत्रेणशंखेनजलधारांदद्यात् ॥ तत्रमंत्राः॥ॐआपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः ॥ याभिर्म्मि
त्रावरुणावभ्यषिञ्चन्न्याभिरिन्द्रमनन्नयन्नत्यरातीः॥प्रथमेविष्णुपिंडेजलधारापयोधारा उपतिष्ठतु ॥१॥ उपयामगृहीतोस्यन्तर्यच्छमघ
वन्पाहि सोमम्॥ उरुष्यरायऽएषोयजस्व ॥ द्वितीयेशिवपिंडेजलधारा उपतिष्ठतु ॥ २ ॥ ॐयेनापावकचक्षसा भुरण्यन्तञ्जनाँऽअनु ॥

॥१७८॥

त्वंव्वरुणपश्यसि। तृतीयेयमपिंडे जलधारा० ॥३॥ ॐयेदेवासोदिव्येकादशस्त्थपृथिव्यामध्येकादशस्त्थ। अप्सुक्षितोमहिनैकादशस्त्थते
देवासोयज्ञमिमञ्जुषद्ध्वम्। चतुर्थे सोमराजपिंडेजलधारा० ॥४॥ ॐसमुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहा। देवꣳसवितारङ्गच्छस्वाहामित्रा
वरुणौगच्छस्वाहाऽहोरात्रेगच्छस्वाहा छंदांꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञंगच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहा
ग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवीम्भस्मनापृणस्वाहा॥ पंचमेहव्यवाहनपिंडेजलधारा०॥५॥
ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा सूर्य्योज्ज्योतिर्ज्योतिःसूर्यःस्वाहा अग्निर्वर्च्चोज्ज्योतिर्वर्च्चःस्वाहा सूर्य्योवर्च्चोज्ज्योतिर्वर्च्चःस्वाहा
ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा॥ षष्ठेकव्यवाहनपिंडे ॥६॥ ॐहिरण्यगर्भःसमवर्त्ततागेभूतस्यजातःपतिरेकऽआसीत्। सदाधारपृथि
वीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम॥ सप्तमेमृत्युपिंडे ॥७॥ ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः बाहुभ्यामुततेनमः॥ अष्टमेरुद्रपिण्डे
॥८॥ ॐ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवेति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसंकल्पमस्तु ॥ नवमेपुरुषपिंडे॥९॥
(अपसव्येन) ॐयाःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः। दशमेप्रेतपिण्डे॥१० (सव्येन)
ॐविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्। सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः। एकादशेविष्णुपिं

ॐअनादिनि
डेजलधारापयोधारातेऽउपतिष्ठतु ॥ ११ ॥ ततः अपसव्येन ॥ शेषोदकम् एकतंत्रेणएकादशपिंडोपरिजलधारांदद्यात् ॥
धनोदेवः शङ्खचक्रगदाधरः ॥ अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भव ॥१॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ येनमस्यंतिगोविंदं
नतेषां विद्यतेभयम् ॥२॥ कृष्णकृष्णकृपालोत्वमगतीनांगतिर्भव ॥ संसारार्णवमग्नानां प्रसीदपुरुषोत्तम ॥३॥ नारायणसुरश्रेष्ठ लक्ष्मी
कांतवरप्रद ॥ अनेनतर्पणेनाथ प्रेतमोक्षप्रदोभव ॥४॥ हिरण्यगर्भपुरुषव्यक्ताव्यक्तस्वरूपिणे ॥ अस्यप्रेतस्यमोक्षार्थं सुप्रीतोभवसर्वदा॥
॥५॥ इति पठेत् ॥ ततः सव्यंकृत्वादक्षिणार्थंपुरतो हिरण्यं वस्त्रं रजतं गुडाज्यं लवणं लोहदंडं तिलान्धान्यं महिषीमूल्यंचामरं च धृत्वा
॥ अद्येत्यादिपठित्वा॥अमुकगोत्रस्य अमुकप्रेतस्य अमुकदुर्मरणनिमित्तकनारायणबलिविहितैकादशश्राद्धानांसांगतासिद्ध्यर्थम् इमा
निहिरण्याद्येकादशदानानि तत्तद्देवताप्रीतये अमुकगोत्रेभ्यो ब्राह्मणेभ्योदातुमहमुत्सृजे इति संकल्प्य दद्यात्॥ततः ॐ तीर्थेविष्णोःप्रसा
दात् एकादशश्राद्धानांपरिपूर्णताऽस्तु ॥ एभिः एकादशश्राद्धैः अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिः असद्गतिविनाशःसद्गतिप्राप्तिश्चभ
वतु इति पठेत्॥ततः ॐ भद्रङ्कर्णेभिः शृणुयामदेवा भद्रम्पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाᳬंसस्तनूभिर्व्यशेमहिदेवहितंयदायुः॥
॥१॥ इति पिंडविसर्जनं कृत्वा एकादशआमान्नानितन्मूल्यंवाविप्रेभ्योदत्त्वा कर्म्मपूर्तिकामो विष्णुं स्मरेत् ॥ इति विष्ण्वाद्येकादशश्रा
द्धप्रयोगः ॥ अथ पंचश्राद्धानांप्रयोगः ॥ तत्रतावत्स्नात्वावाससीपरिधायविष्णोःपूजनंब्रह्मादिपंचदेवतानां पूजनं च नाममंत्रेणपंचोपचारैः
कृत्वाप्रार्थयेत्॥तत्रमंत्राः॥ॐब्रह्मजज्ञानम्प्रथमंपुरस्ताद्विसीमतः सुरुचोवेनऽआवः॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्च

ब्ब्रिवं॑॥ॐब्रह्मणेनमः।१।ॐविष्णोॕर्रराटमसि विष्णो॑श्नप्त्रेस्त्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवेत्त्वा।ॐविष्णवेनमः
॥२॥ॐनमः शंभवायचमयोभवायचनमः शंकरायचमयस्करायचनमः शिवायचशिवतरायच।ॐशिवायनमः।३।ॐयमायत्वामखा यत्वा
सूर्य्यस्यत्वातपसे देवस्त्वांसवितामध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि॥अर्चिरसिशोचिरसितपोसि ॥ ॐयमायनमः ॥ ४ ॥ अक्रन्क
र्म्मकर्मकृतः सहवाचामयोभुवा ॥ देवेभ्यः कर्म्मकृत्वास्तंप्रेतसचाभुवः ॥ ॐतत्पुरुषायनमः ॥५॥ इतिप्रार्थ्य पंचश्राद्धानि ब्रह्मविष्णु
शिवयमतत्पुरुषाणांकुर्यात्॥तत्रादौपूर्ववच्छ्राद्धस्थानंविधाय स्वासनेप्राङ्मुखउपविश्य सव्येन आचम्य प्राणानायम्य कर्म्मपात्रंजलादि
नापरिपूर्य्यॐअपवित्रः०पुंडरीकाक्षःपुनात्वितिकुशत्रयेणश्राद्धद्रव्याणिस्वात्मानंचसंप्रोक्ष्यॐभूम्यैनमः।ॐभगवत्यैगयायै०ओंभगवतेग
दाधरायनमःइतिप्रणमेत्॥ततः कुशत्रययवजलान्यादाय॥अद्येत्यादिपठित्वा अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिपूर्वकासद्गतिविना
शार्थं सद्गतिप्राप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलिकर्म्मांगभूतब्रह्मादिपंचदेवताश्राद्धानिएकोद्दिष्टविधिना करिष्ये।इतिसंकल्प्यगाय
त्रींत्रिर्जपित्वादेवताभ्य इतित्रिर्जपेत्॥ततो गौरसर्षपान् गृहीत्वा॥सर्वत्र ओं नमोनमस्तेगोविंद०॥ पूर्वे नारायणोरक्षेद्वारिजाक्षस्तुदक्षिणे॥
प्रद्युम्नःपश्चिमेपातु वासुदेवस्तथोत्तरे ॥१॥ ऐशान्यांरक्षतां विष्णुराग्नेय्यांचत्रिविक्रमः ॥ नैर्ऋत्यांपद्मनाभस्तु वायव्यांमाधवोऽवतु ॥२॥
ऊर्ध्वंगोवर्द्धनोरक्षेदधस्ताच्चत्रिविक्रमः ॥ इतिविकीर्य कूष्मांडसूक्ताभिमंत्रितजलेनपाकं प्रोक्ष्यउदङ्मुख उत्तरोत्तरक्रमेणपंचघटान् स्थाप
येत् ॥ ततः प्रथमघटे ओंब्रह्मणे इदमासनंस्वाहा॥१॥इति पूर्वाग्रं कुशत्रयमुत्सृजेत् ॥ एवंद्वितीयम्ओंविष्णवे इदमासनं०॥२॥तृतीयम्

ओंशिवाय इदमासनं० ॥३॥ चतुर्थम् ओंयमाय इदमासनं० ॥४॥ पंचमम् ॐतत्पुरुषाय इदमास०नमः इत्यासनमुत्सृजेत् ॥ ततः पंचपात्राणि
अर्घ्यार्थंधृत्वातेषुएकैकंपवित्रंदत्त्वा ॐशन्नोदेवीरितिप्रत्येकंजलंप्रक्षिप्य यवोसियवया इतियवान् तूष्णींगंधपुष्पाणिच निक्षिपेत् ॥ ततः
पंचार्घपात्राणांसंपत्तिरस्तु इतिपठित्वाप्रथमार्घपात्रस्थपवित्रं पात्रेधृत्वा ॐयादिव्याइत्यर्घ्यपात्रमभिमंत्र्य ॐब्रह्मन्एषतेऽर्घोनमः इति
पवित्रोपरिअर्घंदद्यात् ॥ एवंसर्वत्रविष्णवादिभ्योऽर्घदानम् ॥ अत्रनन्युब्जीकरणम् ॥ ततः पंचसुचटेषु क्रमेणगंधपुष्पधूपदीपादिधृत्वा ॐ
एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसिब्रह्मणेअक्षय्यमस्तुस्वाहा ॥ इतिप्रथममुत्सृजेत् १ एवंविष्णवे २ शिवाय ३ यमाय ४
तत्पुरुषाय ५ चोत्सृजेत् ॥ ततः अमीषांपंचश्राद्धानामर्चनविधेः परिपूर्णतास्तु ॥ इतिप्रार्थ्य ॥ मंडलानिकृत्वा पंचसुपात्रेषुपृथक्पृथक्अन्नं
सोपस्करंसुशीतलजलंचपरिवेषयेत् ॥ ततोऽन्नेमधुदत्त्वामधुमधुमध्वितिचपठित्वाप्रथमपात्रमृजुपाणिभ्यामालभ्य ॐपृथिवीते० ओंइदंवि
ष्णुरितिचजप्त्वाविष्णोहव्यर्ठं रक्षस्व इतिकृचाङ्गुष्ठम् अन्नेनिवेश्य ॥ ओंअपहताइतियवान्विकीर्यवामपाणिनापात्रमत्यजन् कुशत्रयादि
द्वारा ओंएतदन्नंसोपस्करममृतरूपंहव्यंब्रह्मणेस्वाहासंपद्यतांनममइत्युत्सृजेत् ॥१॥ एवंविष्णवे० २ शिवाय० ३ यमाय० ४ तत्पुरुषाय०
५ चोत्सृजेत् ॥ ततः पिंडदानार्थंपंचस्थानंवालुकयानिर्माय प्रत्येकं पूर्ववद्रेखाकरणमुल्मुकभ्रामणंचकृत्वाकुशत्रयमास्तीर्य्य पंचसुपात्रेषु
जलयवगंधपुष्पाणि कृत्वा प्रथमपात्रेण ओंब्रह्मणे अवनेनिक्ष्व इतिप्रथमदर्भोपरि अवनेजनंदद्यात् ॥ १ ॥ एवंवि
ष्णवादिभ्योप्यवनेजनानिदद्यात् ॥ ततः तिलघृतमधुयुक्तेनान्नेन पंचपिण्डान्निर्मायघृतमधुभ्यामभिघार्य एकंपिण्डंकुशत्रयजला
दीनिचादाय ओंब्रह्मन् एषतेपिंडोनमः इतिप्रथमदर्भोपरिदद्यात् १ एवं विष्णवे २ शिवाय ३ यमाय ४ तत्पुरुषाय

च दद्यात् ॥ ततो हस्तौ प्रक्षाल्य आचम्य पूर्ववत्प्रत्यवनेजनं दत्त्वा पिंडेषु सूत्रगंधपुष्पधूपदीपतांबूलदक्षिणादीनि क्रमेण
दत्त्वा पिण्डानामर्चनविधेः परिपूर्णतास्तु एभिःपंचभिःपिण्डैः अमुकप्रेतस्यसद्गतिरुत्तमलोकावाप्तिरस्तु इतिपठेत् ॥ ततः
आचमनंकृत्वा एकस्मिन्पत्रपुटे ॐशिवाआपःसंतु इतिजलम् ॐसौमनस्यमस्तु इतिपुष्पाणि ॐ अक्षतंचारिष्टमस्तु इतियवांश्चप्र
क्षिपेत्॥ततःअक्षय्योदकदानम्॥ओंब्रह्मणोयदत्तैमन्नपानादिकंतदुपतिष्ठताम्॥१॥एवंविष्णोः२ शिवस्य३यमस्य४तत्पुरुषस्य५चाक्षय्यो
दकंदद्यात्॥ततःपिण्डानामुपरिपंचसपवित्रान्कुशान्समर्प्यप्रत्येकंजलदुग्धसर्वौषधियवतुलसीसंयुतां जलधारां शंखेनदद्यात्॥तत्र मंत्राः।
ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥ होतांरंरत्नधातमम्॥१॥ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्यꣳ शूरऽइषव्यो
तिव्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुꣳ सप्तिꣳ पुरंधिर्योषाजिष्णूरथेष्ठाꣳ सभेयोयुवास्ययजमानस्यव्वीरोजायतांनिकामेनिका
मेनꣳ पर्जन्योव्वर्षतुफलवत्योनऽओषधयꣳ पच्च्यंतां योगक्षेमोनः कल्प्पताम् ॥२॥ इतिप्रथमब्रह्मपिण्डेजलधारांदद्यात्॥१॥ॐइषेत्वो
र्जेत्वांव्वायवस्स्थदेवोवः सविताप्रार्प्पयतुश्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइंद्रायभागंप्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघश
ꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि॥ १ ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाꣳसुरे ॥ २ ॥
इतिद्वितीयेविष्णुपिण्डे जलधाराम्॰॥२॥ॐअग्नऽआयाहिवीतये गृणानोहव्यदातये॥निहोतासत्सिबर्हिषि ॥१॥ ॐनमः शंभवायचमयो

भवायंचनमः शंकरायंचमयस्करायचनमः शिवायंचशिवतंरायच ॥२॥ इतितृतीयेशिवपिण्डे० ॥ ३ ॥ ॐ शन्नोदेवीरभिष्टयऽआ
पोभवंतुपीतये॥शंय्योरभिस्रवन्तुनः ॥ १ ॥ॐ यमायंत्वामखायंत्वासूर्यस्यत्वातपसेदेवस्त्वांसवितामध्वानक्तुपृथिव्याःसꣳस्पृशंस्पा
हि अर्चिरसिशोचिरसितपोसि॥२॥इतिचतुर्थेयमपिण्डे० ॥४॥ॐ प्रेताजयंतानरऽइन्द्रोवःशर्मयच्छतु ॥ उग्रावः संतुबाहवोनाधृष्याय
थासंथ॥ १॥ ॐ अक्रन्कर्म्मकर्म्मकृतः सहवाचामयोभुवा देवेभ्यः कर्म्मकृत्वास्तं प्रेतसचाभुवः ॥ २ ॥ इतिपंचमेतत्पुरुषपिण्डेजल
धारांदद्यात् ॥५॥ ततोऽपसव्येनशेषोदकधारामेकतंत्रेणपंचपिण्डोपरिदद्यात् ॥ अनादिनिधनोदेव० ॥१॥ अतसीपुष्पसंकाशं० ॥२॥
कृष्णकृष्णकृपालुस्त्वं० ।।३॥ नारायणसुरश्रेष्ठ० ॥४॥ हिरण्यगर्भपुरुष० ॥५॥ इतिपठेत् ॥ ततः सव्येनदक्षिणामादाय अद्येत्या
दिपठित्वा अमुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकप्राप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलिविहितब्रह्मादिपंचदेवानांश्राद्धकर्मणःप्र
तिष्ठार्थम् इदंहिरण्यमग्निदैवतंयथानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे॥इतिस्वर्णदक्षिणांदद्यात्॥ततः पंचदानानि ॥ भूमिःसस्यवती
धेनुः सुवर्णंचक्रमात्तिलान् ॥ वृषभंसहिरण्यंच पंचश्राद्धेषुदक्षिणा ॥१॥ यथाशक्तिदद्यात् ॥ अथवा पंचदानप्रत्याम्नायेनयथाशक्तिद्रव्यं
दद्यात् ॥ ततः कलशसंकल्पः ॥अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थमुत्तमलोकप्राप्त्यर्थम् अमुकदुर्मरणनिमित्तकनारायणबलौब्रह्म
कर्मणः प्रतिष्ठार्थं ब्रह्मप्रीत्यर्थमिदंतीर्थवारिपूरितं सफलंवस्त्रोपवीतान्नप्रतिमानालिकेरसहितं मृन्मयकलशं ब्रह्मदैवतं ब्रह्मसूक्तजापिनेअमु
कगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहंसंप्रददे।अनेन ब्रह्माप्रीयतामिति दद्यात् ॥ १ ॥ एवं विष्णुरुद्रयमतत्पुरुषाणांकलशान्वत्तत्सूक्तजापि

॥१८१॥

नेदद्यात्॥ततः तीर्थविष्णोः प्रसादाद्ब्रह्मादिपंचश्राद्धानांपरिपूर्णतास्तु॥एभिः कृतैः पंचश्राद्धैः अमुकगोत्रस्यप्रेतस्यप्रेतत्व निवृत्तिः असद्ग
तिविनाशः सद्गतिप्राप्तिश्चास्तु इतिपठेत् ॥ ततः ॐ भद्रंकर्णेभिः शृणुयामदेवा भद्रम्पश्येमाक्षभिर्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवाᳪंसस्तनू
भिर्व्यशेमहिदेवहितंयदायुरिति पिण्डान्विसृज्य विष्णुंस्मरेत्।ततो नारायणबलिकर्मणः सांगतासिद्ध्यर्थं धेनुम् अथवा तन्मूल्यंचाचा
र्यायदत्त्वा ॐ अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्व निवृत्त्यर्थम् अमुकदुर्मरणनिमित्तकनारायणबलिकर्मणिपूजनतर्पणहोमश्राद्धादिषुयन्न्यूना
धिकं तद्भवतां ब्राह्मणानां वचनात्तीर्थदेवताविष्णोः प्रसादात्सर्वंपरिपूर्णमस्तु॥अस्तुपरिपूर्णमित्युक्तेघृतेमुखावलोकनंकृत्वा यथाशक्ति
ब्राह्मणान्दीनानाथादीन् अन्नेन संतोष्य कर्म्मपूर्त्तिकामः ॐ प्रमादात्कुर्वतांकर्म्म प्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोः संपूर्णंस्या
दितिश्रुतिः ॥ १ ॥ यस्यस्मृत्याचनामोक्त्या तपोयज्ञक्रियादिषु॥न्यूनंसंपूर्णतांयाति सद्योवंदेतमच्युतमितिपठित्वाविष्णुंस्मृत्वास्नानं
कुर्य्यात् ॥ इतिश्राद्धप्रकाशेनारायणबलिप्रयोगः समाप्तः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अथ नारायणबलिविहितब्रह्मादिपंचदेवजाप्यसूक्तानि तत्रादौ ब्रह्मसूक्तम् ॥ हरिः ॐ तेजोसिशुक्रममृतमायुष्पाऽआयुर्म्मेपाहि ॥
देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्यामाददे ॥ १ ॥ इमामगृभ्णन् ॥ इमामगृभ्णन्रशनामृतस्यपूर्व्वऽआयुषि
विदथेषुकव्या ॥ सानोऽअस्मिन्त्सुतऽआबभूवऽऋतस्यसामन्त्सरमारपन्ती ॥ २ ॥ अभिधाऽअसि ॥भुवनमसियन्तासि धर्त्ता ॥

सत्त्वमग्निं वैश्वानरꣳसप्प्रथसङ्गच्छस्वाहाकृतः ॥ ३ ॥ स्वगात्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वम्भन्त्स्यामि देवेभ्यः प्रजापतये तेन
राद्ध्यासम्॥ तम्बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥४॥ प्रजापतयेत्वा॥ जुष्टम्प्प्रोक्षामीन्द्राग्निभ्यान्त्वा जुष्टम्प्रोक्षामि वायवेत्वा जु
ष्टम्प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि ॥ योऽअर्वन्तञ्जिघाꣳसति तमभ्यमीति वरुणः
परो मर्त्तः परः श्वा॥५। अग्नये स्वाहा सोमाय स्वाहापाम्मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मि
त्राय स्वाहा वरुणाय स्वाहा ॥ ६ ॥ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्प्रोथते स्वाहा प्प्रप्रोथाय स्वाहा ग
न्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वा
हा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ।७।
यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विव
र्त्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय
स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रङ्करोति तस्मै स्वाहा कुर्व्वते स्वाहा कृताय स्वाहा ॥८॥ तत्सवितुः॥

तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ९ ॥ हिरण्यपाणिमूतये सवितारमुपह्वये ॥ सचेत्तादेवता
पदम् ॥१०॥ देवस्यचेततोमहीम्प्रसवितुर्हवामहे ॥ सुमतिꣳसत्यराधसम् ॥ ११ ॥ सुष्टुतिꣳसुमतीवृधोरातिꣳसवितुरीमहेप्रदेवायमती
विदे ॥ १२ ॥ रातिꣳसत्पतिम्महेसवितारमुपह्वये ॥ आसवन्देववीतये ॥ १३ ॥ देवस्यसवितुर्म्मतिमासवंव्विश्वदेव्यम् ॥ धियाभ
गम्मनामहे ॥ १४ ॥ अग्निꣳस्तोमेन ॥ बोधयसमिधानोऽअमर्त्यम् ॥ हव्यादेवेषुनोदधत् ॥ १५ ॥ सहव्यवाडमर्त्यऽउशिग्दूत
श्चनोहितः ॥ अग्निर्द्धियासमृण्वति ॥१६॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे ॥ देवाँ२ऽआसादयादिह ॥१७॥ अजीजनोहि पवमा
नसूर्यंव्विधारेशक्मनापयः ॥गोजीरयारꣳहमाणः पुरन्ध्या ॥१८॥ व्विभूर्म्मात्रा ॥ प्रभूः पित्राश्वोसिहयोस्यत्योसिमयोस्यर्व्वासिस
प्तिरसिव्वाजयसिव्वृषासिनृमणाऽअसिययुर्न्नामासिशिशुर्न्नामास्यादित्यानाम्पत्वान्विहिदेवाऽआशापालाऽएतन्देवेभ्योश्वम्मेधायप्रो
क्षितꣳरक्षतेहरन्तिरिहरमतामिहधृतिरिहस्वधृतिः स्वाहा ॥ १९ ॥ कायस्वाहाकस्मैस्वाहा ॥ कतमस्मैस्वाहास्वाहाधिमाधीतायस्वाहामनः
प्रजापतयेस्वाहाचित्तंव्विज्ञातायादित्यैस्वाहादित्यैमह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायैस्वाहासरस्वत्यैबृहत्यै
स्वाहा पूष्णेस्वाहा पूष्णेप्रपथ्यायस्वाहा पूष्णेनरन्धिषायस्वाहा त्वष्ट्रेस्वाहा त्वष्ट्रेतुरीपायस्वाहा त्वष्ट्रेपुरुरूपायस्वाहा विष्णवेस्वाहा

विष्णवेनिभूयपायस्वाहा व्विष्णवेशिपिविष्टायस्वाहा ॥ २० ॥ विश्वोदेवस्य नेतुर्म्मर्त्तोव्वुरीतसख्यम् ॥ विश्वोरायऽइषुध्यतिद्युम्नं
वृणीतपुष्यसेस्वाहा।२१।आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्व्वोढा
नड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनःपर्जन्योव्वर्षतुफलवत्योनऽओषधयः
पच्यन्तांय्योगक्षेमोनःकल्पताम्॥२२॥प्राणायस्वाहापानायस्वाहाव्व्यानायस्वाहा चक्षुषेस्वाहा श्रोत्रायस्वाहा व्वाचेस्वाहामनसेस्वाहा
॥२३॥ प्राच्यैदिशे स्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदिशेस्वाहाव्वार्च्यैदिशेस्वाहाप्रतीच्यैदिशेस्वाहाव्वार्च्यैदिशेस्वाहोदीच्यैदिशेस्वाहा
व्वार्च्यैदिशेस्वाहोर्द्ध्वायैदिशेस्वाहाव्वार्च्यैदिशेस्वाहाव्वार्च्यैदिशेस्वाहाव्वार्च्यैदिशेस्वाहा ॥२४॥ अद्भ्यः स्वाहा व्वार्भ्यःस्वाहोदकाय
स्वाहातिष्ठन्तीभ्यःस्वाहास्रवन्तीभ्यःस्वाहास्यन्दमानाभ्यःस्वाहाकूप्याभ्यःस्वाहासूद्याभ्यःस्वाहाधार्याभ्यःस्वाहार्णवायस्वाहासमु
द्रायस्वाहासरिरायस्वाहा ॥२५॥ व्वातायस्वाहा धूमायस्वाहाभ्रायस्वाहामेघायस्वाहाव्विद्योतमानायस्वाहास्तनयतेस्वाहावास्फूर्जते
स्वाहाव्वर्षतेस्वाहावव्वर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहाशीघ्रंव्वर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीतायस्वाहाप्रुष्णतेस्वाहाशीकायतेस्वाहाप्रुष्वाभ्यः
स्वाहाह्रादुनीभ्यःस्वाहानीहारायस्वाहा ॥ २६ ॥ अग्नयेस्वाहा सोमायस्वाहेन्द्रायस्वाहापृथिव्यैस्वाहान्तरिक्षायस्वाहादि

॥ १८३

वेस्वाहादिग्भ्यःस्वाहाशाभ्यःस्वाहोर्व्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा ॥ २७ ॥ नक्षत्रेभ्यःस्वाहा नक्षत्रियेभ्यःस्वाहाहोरात्रे
भ्यःस्वाहार्द्धमासेभ्यःस्वाहा मासेभ्यःस्वाहाऽऋतुभ्यःस्वाहार्तवेभ्यःस्वाहासंवत्सरायस्वाहाद्यावापृथिवीभ्याꣳस्वाहाचन्द्रायस्वाहा
सूर्य्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यःस्वाहारुद्रेभ्यःस्वाहादित्येभ्यःस्वाहामरुद्भ्यःस्वाहाविश्वेभ्योदेवेभ्यःस्वाहामूलेभ्यःस्वाहा
शाखाभ्यःस्वाहावनस्पतिभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यःस्वाहा२८पृथिव्यैस्वाहा अन्तरिक्षायस्वाहादिवेस्वा
हासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहौषधीभ्यःस्वाहावनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यःस्वाहासरी
सृपेभ्यः स्वाहा ॥२९॥ असवेस्वाहावसवेस्वाहाविभुवेस्वाहा विवस्वतेस्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतये
स्वाहाशूषायस्वाहासꣳसर्प्यायस्वाहाचन्द्रायस्वाहाज्ज्योतिषेस्वाहामलिम्लुचायस्वाहादिवापतयेस्वाहा ॥३०॥ मधवेस्वाहा माधवाय
स्वाहाशुक्रायस्वाहाशुचयेस्वाहानभसेस्वाहानभस्यायस्वाहेषायस्वाहोर्जायस्वाहासहसेस्वाहासहस्यायस्वाहातपसेस्वाहातपस्यायस्वाहाꣳह
सस्पतयेस्वाहा३१वाजायस्वाहाप्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहास्वःस्वाहा मूर्ध्नेस्वाहाव्यश्नुविनेस्वाहान्त्यायस्वाहान्त्यायभौ
वनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्रजापतयेस्वाहा॥३२॥आयुर्यज्ञेन॥कल्पताꣳस्वाहाप्राणोयज्ञेनकल्पताꣳस्वाहापानो

यज्ञेनकल्प्पताठँस्वाहाव्यानोयज्ञेनकल्प्पताठँस्वाहोदानोयज्ञेनकल्प्पताठँस्वाहासमानोयज्ञेनकल्प्पताठँस्वाहाचक्षुर्यज्ञेनकल्प्पताठँस्वाहा
श्रोत्रंयज्ञेनकल्प्पताठँस्वाहावाग्यज्ञेनकल्प्पताठँस्वाहामनोयज्ञेनकल्प्पताठँस्वाहात्मायज्ञेनकल्प्पताठँस्वाहाब्रह्मायज्ञेनकल्प्पताठँ
स्वाहाज्ज्योतिर्यज्ञेनकल्प्पताठँस्वाहास्वर्य्यज्ञेनकल्प्पताठँस्वाहापृष्ठंय्यज्ञेनकल्प्पताठँस्वाहायज्ञोयज्ञेनकल्प्पताठँस्वाहा ॥३३॥एकस्मै
स्वाहा द्वाभ्याठँस्वाहाशतायस्वाहैकशतायस्वाहाव्युष्ट्यैस्वाहास्वर्गायस्वाहा ॥ ३४ ॥ इतिश्रीशुक्लयजुर्वेदवाजसनेयिसंहिताय दी
र्घपाठेद्वाविंशोध्यायः ॥२२॥ हरिः ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिठँसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽ
एवेदठँसर्व्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥ २ ॥एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः पादोस्यविश्वा
भूतानित्रिपादस्यामृतन्दिवि ॥३॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्ष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥
ततोविराडजायतविराजोऽअधिपूरुषः॥सजातोऽअत्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥५॥ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम्
पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे छन्दाᳬसिजज्ञिरेतस्माद्यजुस्तस्मादजायत॥
॥७॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः॥८॥तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदे

वाऽअंजयतन्तपाध्याऽऋषंयश्चये ॥९॥ यत्पुरुषंव्यदंधुःकतिधाव्यकल्पयन् ॥ मुखंकिमंस्यासीत् किम्बाहूकिमूरूपादाऽउच्येते॥१०॥
ब्राह्मणोस्यमुखंमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदंस्ययद्वैश्यंःपद्भ्याᳪंशूद्रोऽअंजायत ॥११॥ चन्द्रमामनंसोजातश्चक्षोःसूर्योऽअजायत
श्रोत्रांद्वायुश्चं प्राणश्चमुखांदग्निरजायत ॥१२॥ नाभ्भ्यांऽआसीदन्तरिक्षᳪं शीर्ष्णोद्यौःसमंवर्त्तत॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथांलोकाँऽअंकल्पयन् ॥१३॥ यत्पुरुषेणहविषां देवायज्ञमतंन्वत॥वसन्तोस्या सीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥१४॥ सप्तास्यांसन्परिधयस्त्रिःसप्तसमिधःकृताः देवायद्यज्ञन्तंन्वानाऽअबध्नंन्पुरुषपशुम्॥१५॥यज्ञेनंयज्ञमंयजन्तदेवास्तानिधर्म्माणिप्रथमान्यांसन्तेहनाकम्महिमानंःसचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥१६॥इतिश्रीवाजसनेयसंहितायामेकत्रिंशाध्यायोक्तंविष्णुसूक्तंसमाप्तम्॥२॥अथरुद्रसूक्तम्॥ॐनमंस्तेरुद्रमन्यवंऽउतोतऽइषंवेनमंःबाहुभ्यांमुततेनमंः॥१॥ यातेरुद्रशिवातनूरघोरापांपकाशिनी।तयांनस्तन्वाशन्तमंयागिरिंशन्ताभिचांकशीहि॥२॥यामिषुंगिरीशहस्तेबिभर्ष्यस्तवेशिवाङ्गिरित्रातांकुरुमाहिंᳪंसीःपुरुषंजगंत॥३॥शिवेनव्वचंसात्वागिरिशाच्छांव्वदामसि।यथांनःसर्वमिज्जगंदयक्ष्मᳪंसुमनाऽअसत् ॥ ४ ॥ अध्यंवोचदधिवक्ताप्रंथमोदैव्योंभिषक्॥अहींश्चंसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीः परांसुव ॥ ५ ॥ असौयस्ताम्म्रोऽअंरुणऽउतबभ्रुःसुमंगलंः । येचैनंᳪंरुद्राऽअभितोदिक्षुश्रिताःसंहस्रशोवैषाᳪंहेडं ई

महे ॥ ६ ॥ असौयोऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥ ७ ॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये अस्य सत्त्वानो हन्ते भ्यो करन्नमः ॥ ८ ॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्
ज्याम् ॥ याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥ विज्यं धनुः कपर्द्दिनो विशल्यो बाणवाँ२ उत । अनेशन्नस्य या इषव आभुरस्य
निषङ्गधिः ॥ १० ॥ या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥ ११ ॥ परि ते धन्वनो
हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ १२ ॥ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे निशीर्य्य शल्यानाम्मु
खा शिवो नः सुमना भव ॥ १३ ॥ नमस्त आयुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥ १४ ॥ मा नो महा
न्तमुत मा नो अर्भकम्मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ मा नस्तो
के तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ नमो हिरण्यबाह
वे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो हरि
केशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लुशाय ॥ १७ ॥ नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्प

तये नमोनमो रुद्रायाततायिनेक्षेत्राणाम्पतये नमोनमः सूतायाहंत्यैव्वनानाम्पतये नमोनमो रोहिताय ॥ १८ ॥ नमोरोहिताय स्थ
पतये व्वृक्षाणाम्पतये नमोनमो भुवन्तये व्वारिवस्कृतायौषधीनाम्पतयेनमोनमो मंत्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्र
न्दयतेपत्तीनाम्पतयेनमोनमः कृत्स्नायतया ॥१९॥ नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमोनमः सहमानायनिव्याधिनऽआव्या
धिनीनाम्पतये नमोनमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमोनमो निचेरवे परिचरायारण्यानाम्पतये नमोनमोवञ्चते ॥ २० ॥
नमो व्वञ्चते परिव्वञ्चते स्तायूनाम्पतये नमोनमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघांसद्भ्योमुष्णता
म्पतये नमोनमोसिमद्भ्योनक्तंचरद्भ्यो विकृन्तानाम्पतये नमो ॥२१॥ नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमोनमऽइषुमद्भ्यो
धन्वायिभ्य श्चवो नमोनमऽआतन्न्वानेभ्यः प्प्रतिदधानेभ्य श्चवोनमो नमऽआयच्छद्भ्योस्यद्भ्यश्चवो नमो नमो व्विसृजद्भ्यः
॥२२॥ नमोव्विसृजद्भ्यो व्विध्यद्भ्यश्चवो नमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवो नमो नमः शयानेभ्यऽआसीनेभ्यश्चवो नमो नमस्तिष्ठ
द्भ्योधावद्भ्यश्चवो नमो नमः सभाभ्यः ॥२३॥नमः सभाभ्यः सभापतिभ्यश्चवोनमोनमो श्वेभ्यो श्वपतिभ्यश्चवो नमो नमऽआ
व्याधिनीभ्योव्विविध्यन्तीभ्यश्चवो नमो नमऽउगणाभ्यस्तृंहतीभ्यश्चवोनमो नमोगणेभ्यः ॥२४॥नमोगणेभ्योगणपतिभ्यश्च

वो नमोनमो व्रातेभ्यो व्रातपतिभ्यश्चवो नमो नमो गृत्सेभ्योगृत्सपतिभ्यश्चवो नमो नमो विरूपेभ्योविश्वरूपेभ्यश्चवो
नमो नमः सेनाभ्यः ॥२५॥ नमः सेनाभ्यः सेनानिभ्यश्चवो नमो नमो रथिभ्योऽअरथेभ्यश्चवो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृ
भ्यश्चवो नमो नमो महद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्षभ्योरथकारेभ्यश्चवोनमः कुलालेभ्यः कर्म्मारेभ्यश्च
वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्चवो नमो नमः श्वनिभ्यो मृगयुभ्यश्चवो नमो नमः श्वभ्यः ॥ २७ ॥
नमः श्वभ्यः श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः शर्वायचपशुपतयेचनमोनीलग्रीवायचशितिकण्ठायचनमः कपर्दिने।२८।
नमः कपर्दिनेचव्युप्तकेशायचनमः सहस्राक्षायचशतधन्वनेचनमोगिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय२९।
नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचनमोग्र्यायचप्रथमायचनमऽआशवे ॥३०॥ नमऽआशवेचाजिराय
चनमः शीघ्र्यायचशीभ्यायचनमऽऊर्म्यायचावस्वन्यायचनमोनादेयायचद्वीप्यायच ॥ ३१ ॥ नमोज्ज्येष्ठायचकनिष्ठायचनमः
पूर्वजायचापरजायचनमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायचनमः सोभ्याय।३२।चनमः सोभ्यायचप्रतिसर्य्यायचनमो
याम्यायचक्षेम्यायचनमः श्लोक्यायचावसान्यायचनमऽउर्वर्य्यायचखल्यायचनमोवन्यायच३३।नमोवन्यायचकक्ष्यायचनमः श्रवा

॥ १८६ ॥

यंचप्रतिश्श्रवायंचनमऽआशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्मिने॥३४॥ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणे
चवरूथिनेचनमःश्रुतायचश्श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ॥ ३५ ॥ नमोधृष्णवे चप्रमृशाय चनमोनि
षङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायचसुधन्वनेच ॥ ३६ ॥नमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्याय
चनमःकुल्यायचसरस्यायचनमोनादेयायचवैशन्तायचनमःकूप्याय॥३७॥ नमःकूप्यायचावट्यायचनमोवीध्र्यायचातप्यायचन
मोमेघ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायचनमोवात्याय३८नमोवात्यायचरेष्म्यायनमोवास्तव्यायचवास्तुपायचनमःसो
मायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गवे।३९।नमःशङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोऽग्रेवधायचदूरेवधायचनमो
हन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय४०नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायच
शिवतरायच४१नमःपार्य्यायचावार्य्यायचनमःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यायचफेन्यायचनमःसि
कत्याय४२नमःसिकत्यायचप्रवाह्यायचनमःकिꣳशिलायचक्षयणायचनमःकपर्दिनेचपुलस्तयेचनमऽइरिण्यायचप्रपथ्यायच४३
नमोव्रज्यायचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्यायनमःकाट्यायचगह्वरेष्ठायचनमःशुष्क्याय४४नमःशुष्क्या

यच हरित्याय च नमः पाᳬसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्व्याय च नमः पर्ण्याय ४५ नमः पर्ण
यच पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो
देवानाᳬ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षणत्केभ्यो नमऽआनिर्हतेभ्यः ॥४६॥ द्रापेऽअन्धसस्पते दरिद्र नीललोहित ॥
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ् मो च नः किञ्चनाममत् ॥४७॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमसद्द्विपदे
चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम् ॥४८॥ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥ मीढुष्टम शिवतम शिवो
नः सुमना भव परमे वृक्षऽआयुधन्निधाय कृत्तिं वसानऽआ चर पिनाकं बिभ्रदा गहि ॥५१॥ विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः । यास्ते
सहस्रᳬ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥ ५२ ॥ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥
असंख्याता सहस्राणि ये रुद्राऽअधि भूम्याम् ॥ तेषाᳬ सहस्रयोजनेव धन्वानि तन्मसि ॥५४॥ अस्मिन्महत्यर्णवेन्तरिक्षे भवाऽअधि तेषाᳬ० ॥
॥५५॥ नीलग्रीवाः शितिकण्ठा दिवᳬ रुद्राऽउपश्रिताः ॥ तेषाᳬ० ॥५६॥ नीलग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ॥ तेषाᳬ० ५७

येव्वृक्षेषुशष्ष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः। तेषाꣳ०॥५८॥ येभूतानामधिपतयोव्विशिखासः कपर्दिनः। तेषाꣳ०॥५९॥ येपथाम्पथिरक्ष
यऽऐलवृदाऽआयुर्युधः ॥ तेषाꣳ० ॥ ६० ॥ येतीर्थानिप्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳ० ॥ ६१ ॥ येन्नेषुव्विविद्ध्यन्ति
पात्त्रेषुपिबतोजनान्॥तेषाꣳ० ॥६२॥ यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्द्रावितस्त्थिरे॥तेषाꣳ ॥६३॥ नमोस्तुरुद्द्रेब्भ्योयेदिवियेषांव्वर्ष
मिषवस्तेब्भ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः।तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्ज
म्भेदध्मः ॥६४॥ नमोस्तुरुद्द्रेब्भ्योयेन्तरिक्षेयेषांव्वातऽइषवः।तेब्भ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः।तेब्भ्योनमोऽ
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्द्रेब्भ्योयेपृथिव्व्यांय्येषामन्नमिषवः।तेब्भ्यो
दशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः।तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः
॥ ६६ ॥ ॥ इतिश्रीवाजसनेयसंहितायां षोडशाध्यायोक्तरुद्रसूक्तंसमाप्तम् ॥३॥ अथ यमसूक्तम् ॥ हरिःॐ तदेवा ॥ तदेवाग्निस्तद
दित्त्यस्तद्वायुस्तदुचन्द्रमाः।तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्प्रजापतिः॥ १॥सर्व्वेनिमेषाः।जज्ज्ञिरेव्विद्युतःपुरुषादधि। नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नम
द्ध्येपरिजग्ग्रभत्॥२॥नतस्य । प्प्रतिमाऽअस्तियस्यनाममहद्द्यशः॥हिरण्ण्यगर्ब्भऽइत्त्येषमामाहिꣳसीदित्त्येषाजस्म्मान्नजातऽइत्त्येषः॥३॥

एषोहदेवꣳप्रदिशोनुसर्व्वाꣳ पूर्व्वोहजातꣳसउगर्ब्भेऽअन्तꣳ ॥ सऽएवजातꣳसजंनिष्यमाणꣳप्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखꣳ ॥
॥४॥ यस्म्माञ्जातन्नपुराकिञ्चनैवयऽआबभूवभुवनानिविश्श्वा ॥ प्प्रजापतिꣳ प्प्रजयासꣳरराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी ॥५॥
येनद्द्यौरुग्ग्रापृथिवीचदृढायेनस्वस्तभितंय्येननाकः ॥ येऽअन्तरिक्षेरजसोव्विमानꣳकस्म्मैदेवायहविषाव्विधेम ॥६॥ यङ्क्रन्दसीऽअव
सातस्तभानेऽअब्भ्यैक्षेताम्मनसारेजमाने ॥ यत्राधिसूरऽउदितोव्विभातिकस्म्मैदेवायहविषाव्विधेम ॥ आपोहयद्बृहतीर्व्विश्वमायन्गर्भन्दधानाजनयन्तीरग्निम् ॥ आपाहयद्बृहतीर्य्यश्चिदापः ॥७॥
व्वेनस्तत् ॥ पश्यन्निहितङ्गुहासद्यत्र व्विश्श्वम्भवत्येकनीडम् ॥ तस्मिन्निदꣳसञ्चव्विचैतिसर्वꣳसऽओतꣳप्प्रोतश्चव्विभुꣳप्प्रजासु ॥८॥
प्प्रतद्वोचेदमृतन्नुव्विद्वान्गन्धर्व्वोधामव्विभृतङ्गुहासत् त्रीणिपदानिनिहितागुहास्ययस्तानिव्वेदसपितुꣳपितासत् ॥९॥सनोबन्धुर्ज्जनि
तासव्विधाताधामानिव्वेदभुवनानिव्विश्श्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नद्ध्यैरयन्त ॥१०॥ परीत्यभूतानि ॥ परीत्यलोका
न्न्परीत्यसर्व्वाꣳप्प्रदिशोदिशश्च ॥ उपस्थायप्प्रथमजामृतस्यात्मनात्मानमभिसँविवेश ॥ ११ ॥ परिद्यावापृथिवी ॥ सद्यऽइत्वापरि
लोकान्न्परिदिशꣳपरिस्वꣳ ॥ ऋतस्यतन्तुँव्वितताँव्विचृत्यतदपश्यत्तदभवत्तदासीत् ॥१२॥ सदसस्प्पतिमद्भुतम्प्प्रियमिन्द्रस्यकाम्म्य
म् ॥ सनिम्मेधामयासिषꣳस्वाहा ॥ १३ ॥ याम्मेधान्देवगणाꣳपितरश्चोपासते ॥ तयामामद्यमेधयाग्ग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥

मेधाम्मे ॥ व्वरुणोददातुमेधामग्निः प्प्रजापतिर्म्मेधामिन्द्रश्चव्वायुश्चमेधान्धाताददातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ ब्ब्रह्मंचक्षत्रञ्चोभेश्श्रियमश्नु
ताम् ॥ मयिदेवादधतुश्श्रियमुत्तमान्तस्यैतेस्वाहा ॥ १६ ॥ इतिश्रीवाजसनेयसंहितायांद्वात्रिंशाध्यायोक्तंयमसूक्तंसमाप्तम् ॥ ४ ॥ अथप्रेत
सूक्तम् ॥ हरिः ॐ अपेतः ॥ अपेतोयन्तुपणयोसुम्नादेवपीयवः ॥ अस्यलोकःसुतावतः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंय्यमोददात्ववसा
नमस्मै ॥ १ ॥ सवितातेशरीरेभ्यःपृथिव्यांल्लोकमिच्छतु ॥ तस्मैयुज्यन्तामुस्रियाः ॥ २ ॥ व्वायुःपुनातु ॥ सवितापुनात्वग्नेर्भ्रा
जसासूर्य्यस्यवर्च्चसा ॥ व्विमुच्यन्तामुस्रियाः ॥ ३ ॥ अश्वत्थेवो निषदनम्पर्णेवोव्वसतिष्कृता ॥ गोभाज
ऽइत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥ सवितातेशरीराणिमातुरुपस्थऽआवपतु ॥ तस्मैपृथिविशम्भव ॥
॥ ५ ॥ प्प्रजापतौत्वा देवतायामुपोदके । लोकेनिदधाम्म्यसौ ॥ अपनःशोशुचदघम् ॥ ६ ॥ परम्मृत्यो
अनुपरेहिपन्थांय्यस्तेऽअन्यऽइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्ब्रवीमिमानःप्प्रजांरीरिषोमोतव्वीरान् ॥ ७ ॥ शंव्वातःशर्ठं
हितेघृणिःशन्तेभवन्त्विष्टकाः ॥ शन्तेभवन्त्वग्नयःपार्थिवासोमात्वाभिशूशुचन् ॥ ८ ॥ कल्पन्तान्ते दिशस्तुभ्यमापःशिवतमास्तु
भ्यम्भवन्तुसिन्धवः ॥ अन्तरिक्षर्ठंशिवन्तुभ्यङ्कल्पन्तान्तेदिशःसर्वाः ॥ ९ ॥ अश्मन्वतीरीयते सर्ठंरभद्ध्वमुत्तिष्ठतप्प्रतरता

सखांय६ ॥ अत्रांजहीमोशिंवायऽअसञ्छिवान्वयमुत्तरेमाभिवाजांन् ॥ १० ॥ अपाघमपविल्बिंषमपंकृत्त्यामयोरपंः ॥ अपांमार्गंत्व
मस्म्मदपदु६ष्ष्वप्न्यंठंसुव॥ ११॥सुमित्रियानऽआपऽओषंधय६संतुदुर्मिंत्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चंव्वयन्द्विष्म६ ॥१२॥ अन
ड्वाहंमन्वारंभामहेसौरंभेय૭ंस्स्वस्तयें ॥ सनऽइन्न्द्रंऽइवदेवेब्भ्योव्वन्हिंर्ठंसन्तारंणोभव ॥ १३ ॥ उद्द्वयन्तमंस्प्परिस्व६पश्यंन्तऽउत्तं
रम् ॥ देवन्देंवत्रासूर्य्यमगंन्मज्ज्योतिरुत्तमम् ॥ १४ ॥ इमञ्जीवेब्भ्यंः परिधिन्दंधामिमैषान्नुगादपंरोऽअर्थमेतत् ॥ शतञ्जीवन्तुशरदंः
पुरूचीरन्तर्म्मृत्युन्न्दंधताम्पर्व्वतेन ॥१५॥ अग्नऽआयू૭ंषि पवसऽआसुवोर्ज्जामषञ्चन६ ॥ आरेबांधस्वदुच्छुनांम् ॥ १६ ॥ आयुंष्ष्मा
नग्ने हविषांव्वृधानोघृतप्प्रतीकोग्घृतयोंनिरेंधि ॥ घृतम्पीत्वामधुचारुगव्व्यंम्पितेवंपुत्रमभिरक्षतादिमान्त्स्वाहां ॥१७॥परीमे गामनेष
तपर्य्यंग्गिनमंहृषत ॥ देवेष्ष्वंक्रतश्श्रवऽकऽइमाँऽआंदधर्षति ॥१८॥ क्रव्व्यादंमग्गिनम् प्प्राहणोमिदूरँय्यंमराज्ज्यंङ्गच्छतुरिप्प्रव्वाहऽ
इहैवायमितंरोजातवेंदादेवेब्भ्योंहव्व्यँव्वंहतुप्प्रजानन् ॥ १९ ॥ व्वहंवपाञ्जांतवेद६ पितृब्भ्योयत्रैंनान्न्वेत्थनिहिंतान्न्पराके ॥ मेदंस६
कुल्ल्याऽउपतान्त्स्त्रंवन्तुसत्याऽएंषामाशिष૭सन्नंमन्ता૭ंस्वाहां ॥ २० ॥ स्योनापृथिवि नोभवान्नृक्षरानिवेशंनी॥यच्छांन६शर्मंनप्प्र
थां६ ॥ अपंनऽशोशुंचदघम् ॥ २० ॥ अस्मात्त्वमाधिं जातोसित्वदयञ्ज्जांयताम्पुनंः ॥ असौस्वर्गायंलोकायस्वाहां ॥ २२ ॥

इतिश्रीवाजसनेयसंहितायांपंचत्रिंशाध्यायोक्तं (तत्पुरुष प्रेतसूक्तंसमाप्तम् ॥ इतिश्रीगौडीयश्राद्धप्रकाशेब्रह्मादिपंचसूक्तानिसमाप्तानि ॥
॥९॥ अथनारायणबलिसामग्रीलिख्यते ॥ शालग्रामप्रतिमा साङ्गा १ स्वर्णमयीविष्णुप्रतिमा २ राजतीब्रह्मप्रतिमा १ ताम्रमयीरुद्र
प्रतिमा १ लोहमयीयमप्रतिमा १ सीसकमयीप्रेतप्रतिमा १ सुवर्णखंड । नारिकेलकेफल ७ चंदन । कुंकुम । केशर । कर्पूर ।
गोरोचन । पुष्प विचित्रजैसेदेशकालोद्भवहों । धूप । दीप । दीपवर्तिका । यज्ञोपवीत कईजोडी । तांबूल । पूगीफल९० ऋतुफल । तुलसी
पत्र । बिल्वपत्र । शमीपत्र । गंगोदक । अभावमें तडागकूपादिजल । गोदुग्ध । गोदधि । गोमूत्र । गोमय । मधु । श्वेतवस्त्र । रक्तव
स्त्र । पीतवस्त्र । कृष्णवस्त्र । पीतपट्टवस्त्र । सर्वौषधि । कूठ । जटामांसी । हरिद्राद्वय । देवदारु छड । छडिलो । चंदन । वच ।
चंपक । मुस्ता । सप्तमृत्तिका७अश्वत्थ । वट । प्लक्ष । आम्र । उडुंबर इनपाँचोंकेपचपल्लव९ । पंचरत्न । तंडुल । गोधूम । मुद्ग । माष ।
तिल । यव । शर्करा । गोकाघृत । गव्य । गुग्गुलु । मेवो । मोदक । लड्डु । पेडा । सिंदूर । गौरसर्षपा । दर्भादूर्वा । पलाशादिपत्रकेपात्र । आचमनपात्र ।
कर्मपात्र । ताम्रपात्र । अर्घ्यपात्र । आसन । प्रोक्षणीपात्र १ प्रणीता १ आज्यस्थाली १ चरुस्थाली १ स्त्रुक्स्त्रुव १ पलाशसमिध्
शमीप्रभृतिसमिधः । मृन्मयकलश ५ ताम्रकलश १ पूर्णपात्रपात्र ६ जलपात्र १ धेनु अथवा । मौल्य । लोहदंड १ रजतद्रव्य
पृथ्वीदान । हिरण्य । वस्त्र । गुड । लवण । धान्य । महिषीमूल्य । चामरमूल्य । भूयसी ताम्रदक्षिणा । कार्पासपेटिका । सूत्र । आमान्न । पत्त
ल । यवचूर्ण सेटक भर ३ छायापात्र । तिलतैल । प्रायश्चित्तधेनु अथवा मूल्य । प्राजापत्यव्रत १९ अथवा प्रतिप्राजापत्यगोदान
अथवा मूल्य अथवा प्रतिप्राजापत्य । द्वादशसहस्त्रगायत्रीजप । ब्रह्मादिपंचसूक्तपाठ । शंख १शराव ५० मट्टीकाघटजललानेको लगुड १
श्राद्धस्थानवेष्टनार्थवस्त्र । गौरमृत्तिका । गंगोदक । भस्म ॥ इत्याद्युपकरणानि ॥ ७ ॥ ॥ ७ ॥ ॥

अथ पंचकमरणशांतिप्रयोगः॥ तावन्मरणविधिर्लिख्यते ॥ तत्रादौदाहदेशेशवंनीत्वा शुद्धभूमौसंस्थाप्य तत्समीपे दर्भाणांपंचप्रतिमाः ऊर्णासूत्रवेष्टिताः यवपिष्टेनानुलिप्ताः मनुष्याकृतीः कृत्वापूजयेत् ॥ तद्यथा देशकालौसंकीर्त्यअपसव्येन अमुकगोत्रस्य अमुकप्रेतस्य धनिष्ठादिपंचकेमरणसूचितवंशानिष्टविनाशार्थं पंचकविधिंकरिष्ये इतिसंकल्प्य स्थंडिलेस्थापितपंचप्रतिमाः॥प्रेतवाहायनमः १ प्रेतसखायनमः२प्रेतपायनमः३प्रेतभूमिपायनमः ४ प्रेतहर्त्रेनमः ५ इतिनाममंत्रेणप्रत्येकं गंधपुष्पधूपदीपनैवेद्यादिभिःसंपूज्य दाहसमयेप्रेतस्योपरिविन्यसेत् ॥ प्रथमांशिरसि १ द्वितीयांदक्षिणकुक्षौ २ तृतीयांवामकुक्षौ ३ चतुर्थींनाभौ४पंचमींपादयोर्मध्ये ५ एवंन्यस्य तदुपरिताभ्योनामभिर्मंत्रैर्घृताहुतीर्दद्यात् ॥ प्रेतवाहायस्वाहा ॥ प्रेतसखायस्वाहा॥प्रेतपायस्वाहा ॥ प्रेतभूमिपायस्वाहा॥प्रेतहर्त्रेस्वाहा इतिहुत्वाताभिःसह विधिनाशवंदहेत् ॥ सूतकांते ततः कुर्य्याद्विधानपंचकंतथा ॥ अन्यथानगतिस्तस्य प्रेतपुत्रसुशोभनमितिमरणसमयपंचकविधानम् ॥ अथशांतिप्रयोगः ॥ तत्रादौ सूतकान्ते पुत्रादिस्तीर्थेपुण्यक्षेत्रे वा तडागादिसमीपेगत्वा तत्रकर्म्मभूमिंपरिकल्प्य गोमयोदकेनानुलिप्य गौरमृत्तिकयाऽऽच्छाद्यतत्रसामग्रींस्थापयेत् ॥ ततः स्नात्वाधौतशुक्लवाससीनूतनयज्ञोपवीतंचपरिधाय संध्यादिनित्यक्रियांसमाप्य होमार्थंहस्तमात्रंस्थंडिलंकृत्वा तदीशान्यांशुद्धमृदामंडलंचकृत्वा तत्रवस्त्रंसमास्तीर्यंतदुपरिकलशपंचकंपूर्वदक्षिणपश्चिमोत्तरासुमध्येचधान्यपुंजोपरिक्रमेण स्थापनीयम् ॥ आचम्य प्राणानायम्य ॐअपवित्रः० ॐपुंडरीकाक्षः पुनात्वितिकुशत्रयेण संभारान्स्वात्मानंचजलेनप्रोक्ष्य गणेशनवग्रहादिदेवान्पूजयेत् ॥ ततो देशकालौ संकीर्त्य ॥ अपसव्येन अमुकगोत्रस्य अमुकप्रेतस्य धनिष्ठादिपंचकजनितदुर्मरणदोषनिवृत्यर्थम् (सव्यंकृत्वा) ममगृहे सपरिवाराणामायुरारोग्यसुखप्राप्त्यर्थं विष्णुपूजनपूर्वकंपंचक

शांतिकर्माहंकरिष्ये॥इतिसंकल्प्य विष्णुंषोडशोपचारैः संपूजयेत्॥ततो देशकालौ संकीर्त्य अमुकप्रेतस्य० पंचकशांतिकर्मांगतया विहितं
कलशपंचकंदेवतानांस्थापनंप्रतिष्ठापूजनंचकरिष्ये॥इतिसंकल्प्य॥ॐभूरसिभूमिरसीतिकलशाधारभूमिंस्पृष्ट्वा॥ॐधान्यमसिधिनुहिइति
स्थापितधान्यमभिमंत्र्यय॥तस्योपरिॐआजिंघ्रकुलशमिति क्रमेण कलशपंचकंस्थापयेत्॥ततःॐव्वंरुणस्योत्तमितितेषुजलमापूर्य्य॥
ॐयाऽओषधीःपूर्व्वाजाताइतिसर्वौषधीः॥कांडात्काण्डादितिदूर्वाः॥अश्वत्थेवोनिषदनमितिपंचपल्लवान्॥स्योनापृथिविनो इतिसप्तमृदः॥
याः फलिनीरिति पूगीफलानि॥परिवाजंपतिरिति पंचरत्नानि ॥ हिरण्यगर्भेति सुवर्णखंडानिचक्षिपेत् ॥ ततः ॐव्वंसोःपवित्रमसीति
प्रत्येकंवस्त्रेण सूत्रेणवावेष्ट्य ॥ पूर्णादर्व्विपरापत इतितंडुलपूरितानिपंचताम्रपात्राणिनिधाय ॥ ॐ मनोजूतिर्जुषतामितिप्रतिष्ठां कृ
त्वा ॥तेषुॐतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः÷।अहेडमानोव्वरुणेहबोद्ध्युरुशंसमानऽआयुःप्रमोषीः॥ ॐभूर्भुवः
स्वर्वरुणइहागच्छइहतिष्ठइतिवरुणमावाह्य॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुयजामानस्य दुरितक्षयकारकाः ॥ १ ॥
इतितीर्थान्यावाह्य॥ॐवरुणायनमः॥इतिपंचोपचारैःसंपूज्यॐकलशस्यमुखेविष्णुरित्यादिप्रार्थयेत् ॥ततस्तेषुस्वर्णमयीःपंचप्रतिमाअग्न्यु
त्तारणपूर्व्वकंसंस्थापयेत् ॥ अथावाहनम् ॥ पूर्वकलशेदुग्धजलपूरितेवसून् ॐव्वसोःपवित्रमसिशतधारंव्वसोःपवित्रमसिसहस्रधारंदेव
स्त्वांसवितापुनातुव्वसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ॥१॥ ॐभूर्भुवःस्वःवसवःइहागच्छतइहतिष्ठतॐवसून्आवाहयामिस्थाप

यामि इतिस्थापयेत् ॥ दक्षिणकलशेदध्युदकपूरितेवरुणं० ॐव्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कंभसर्जनीस्त्थोव्वरुणस्यऽऋतसदंन्य
सिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥२॥ ॐभूर्भुवःस्ववरुणइहागच्छ० वरुणयावाहयामि ॐवरुणायनमः इति
स्थापयेत्॥पश्चिमकलशेघृतोदकपूरिते अजैकपदं० ॐउतन्नोहिर्बुध्न्यःशृणोत्वजऽएकपात्पृथिवीसंमुद्रः ।विश्वेदेवाऽऋतावृधोहुवानास्तु
तामंत्राःकविशस्ताऽअंवन्तु॥३॥ॐभूर्भुवःस्वःअजैकवदमावाहयामिस्थापयामि॥ॐअजैकपदेनमः इतिस्थापयेत्॥ उत्तरकलशेगोमयो
दकपूरिते अहिर्बुध्न्यम् ॐशिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिंसीः ॥ निवर्तयाम्यायुषेन्नाद्यायप्रजननायरा
यस्योषायसुप्रजास्त्वायसुवीर्य्याय ॥ ४ ॥ ॐभूर्भुवः अहिर्बुध्न्यइहागच्छेहा० अहिर्बुध्न्यमावाहयामिस्थापयामि॥ॐअहिर्बुध्न्याय
नमः ॥ मध्यकलशेगोमूत्रोदकपूरितेपूषणम् ॐपूषन्तवंव्रतेव्वयंनरिष्येमकदांचन॥स्तोतारस्तऽइहस्मसि ॥ॐभूर्भुवःस्वः पूषन्इहागच्छ
इहतिष्ठपूषाणमावाहयामिस्थापयामि ॐपूष्णेनमः इतिस्थापयेत् ॥ ५ ॥ इत्यावाह्य ॥ ॐमनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिम
न्तंनोत्वरिष्टंयज्ञंसमिमंदधातु।विश्वेदेवासऽइहमादयंतामों३म्प्रतिष्ठ।इतिप्रतिष्ठाप्यप्रत्येकंनाममंत्रेणषोडशोपचारैःसंपूजयेत्।ततस्तत्पा
र्श्वेअक्षतपुंजेषु पूगीफलेषुवायमादिपंचदशदेवान्स्थापयेत् ॥ तद्यथाॐयमायनमःयमम् अवाहयामिस्थापयामि ॥ १ ॥ एवमग्रेॐधर्मरा

जायनमः धर्मराजं० ॥ २ ॥ ॐमृत्यवेनमः मृत्युमावा० ॥३॥ ॐअन्तकाय० अन्तकं० ॥४॥ ॐवैवस्वताय० वैवस्वतं० ॥५॥ ॐकालाय० कालं० ॥६॥ ॐसर्वभूतक्षयाय० सर्वभूतक्षयं० ॥७॥ ॐऔदुंबराय० औदुंबरं० ॥८॥ ॐदध्नाय० दध्नं० ॥९॥ ॐनीलाय० नीलं० ॥१०॥ ॐपरमेष्ठिने० परमेष्ठिनं० ११॥ ॐवृकोदराय० वृकोदरं० ॥ १२ ॥ ॐचित्राय० चित्रं० ॥१३॥ ॐचित्रगुप्तायनमः चित्रगुप्तमावाहयामि स्थापयामि ॥ १४ ॥ ऐशान्येॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥सर्वेभ्यः सर्वशर्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यः॥ ॐअघोरायनमः अघोरमावाहयामिस्थापयामि ॥ १२ ॥ इत्यावाह्य ॐचतुर्दशयमेभ्योनमइतिषोडशोपचारैः पूजयेत् ॥ ततः पंचकलशेषुपंचसूक्तानिज पेत् ॥ प्रथमकलशेॐकृणुष्वपाजः प्रसितिन्नइत्यादिरक्षोघ्नीः पंचर्चः ॥ द्वितीयकलशे ॐविभ्राड्बृहत्पिबतुइत्याद्यनुवाकम् ॥ तृतीयकलशे ॐआशुःशिशानो इत्यादिअप्रतिरथम् ॥ चतुर्थेॐनमस्तेरुद्रमन्यवइत्यादिरुद्राध्यायः ॥ पंचमकलशे ॥ ॐऋचंवाचंप्रपद्ये इत्याद्यध्यायंचपठेत्॥अथाग्निस्थापनम् ॥ तत्रादौदेशकालौसंकीर्त्य ॥ अस्मिन्पंचकशांतिकर्मणिपंचसंस्कारपूर्वकाग्निप्रतिष्ठापनंक रिष्ये॥इतिसंकल्प्य पूर्वरचितस्थंडिलं कुशैःपरिसमुह्य तानैशान्यांनिक्षिप्य गोमयोदकेनोपलिप्यस्रुवमूलेनप्रादेशमात्रमुत्तरोत्तरक्रमेणप्राग ग्रंत्रिरुल्लिख्य उल्लेखनक्रमेणअनामिकांगुष्ठाभ्यांमृदंसमुद्धृत्य उदकेनाभ्युक्ष्य कांस्यपात्रेणाग्निमुपसमाधायस्थंडिलेॐअग्निंदूतम्पुरोदधेह व्यवाहमुपब्रुवे देवाँ२ऽआसादयादिह ॥१॥ इतिमंत्रेणस्थापयेत्॥ततः अभ्यानीतपात्रेसाक्षतोदकंनिषिच्यऽग्निंध्यायेत्॥ॐचत्वारिशृङ्गा त्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ २ ऽआविवेश ॥ १ ॥ अग्नेवैश्वानरशांडिल्यगोत्र

शांडिलासितदैवलेतिॖत्रिप्रवरान्वितभूमिमातृकवरुणपितृकमेषध्वजप्राङ्मुखममसम्मुखोभवइतिवरदनामाग्निंप्रतिष्ठाप्य प्रोक्षितेंधनानिनि
क्षिपेत् ॥ ततः पुष्पचंदनतांबूलवस्त्राण्यादाय ॐअद्यकर्त्तव्यपंचकशांतिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकश
र्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणं वृणुयात् ॥ वृतोस्मीतिप्रतिवचनम् ॥ यथाविहितंकर्मकुर्विति
यजमानेनोक्ते करवाणीतितेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनंविधाय तदुपरिप्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीयतत्रउद
ङ्मुखंब्राह्मणंतदभावे पंचाशत्कुशनिर्मितम् अस्मिन्पंचकशांतिकर्मणि त्वंमेब्रह्माभवइत्यभिधायउपवेशयेत्॥भवानीतिप्रतिवचनम्।ततः
ॐअद्यकर्त्तव्यपंचकशांतिहोमकर्मणि आचार्यकर्मकर्त्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिःपुष्पचंदनतांबूलवासोभिराचार्यत्वेनत्वामहंवृणे
ॐवृतोस्मीतितेनोक्ते आचार्यः प्रणीतापात्रंपुरतः कृत्वावारिणापरिपूर्य्य कुशैराच्छाद्य ब्रह्मणोमुखमवलोक्य अग्नेरुत्तरतःकुशोपरि निद
ध्यात्॥ततः परिस्तरणम्॥बर्हिष ६४ श्चतुर्थभागमादायआग्नेयादीशानान्तम्उत्तराग्रैः४ ब्रह्मणोग्निपर्य्यंतपूर्वाग्रैः४ नैर्ऋत्याद्वायव्यांतम्
उत्तराग्रैः४अग्नितःप्रणीतापर्य्यंतं पूर्वाग्रैः४चतुर्भिश्चतुर्भिर्दर्भदलैःपरिस्तीर्य ततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं२पवित्रकर
णार्थंसाग्रमनंतर्गर्भकुशपत्रद्वयं२प्रोक्षणीपात्रम् आज्यस्थाली चरुस्थाली संमार्जनकुशाः३उपयमनकुशाः ३ समिधस्तिस्रःपालाश्यः ३
स्रुवः खादिरः आज्यंगव्यं चर्वर्थास्तंडुलाः तंडुलपूर्णपात्रं दक्षिणाम् एतानिपवित्रच्छेदनकुशानां पूर्वपूर्वदिशिक्रमेणासादनीयानि॥ततः
पवित्रच्छेदनकुशैःपवित्रेछित्त्वा सपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिक्षिप्य त्रिरुद्दिङ्गनयनम्।ततः प्रोक्षणीपात्रंगृहीत्वापवित्राभ्यांत्रि
रुत्पूय प्रणीतोदकं प्रोक्षणीपात्रेअभ्युक्ष्य प्रोक्षणीजलेन आसादितवस्तूनि एकैकशःप्रोक्ष्य अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात्।तत

आज्यस्थाल्यामाज्यंनिरूप्य प्रणीतोदकेनतंडुलान्प्रक्षाल्य चरुपात्रेप्रणीतोदकंदत्त्वा तत्रतंडुलान्प्रक्षिप्यचरुम् अग्नेर्दक्षिणत आज्यमुत्तर
तोनिदध्यात् ॥ ततः सिद्धे चरौतृणादि प्रज्वाल्य उभयोरुपरिप्रदक्षिणंभ्रामयित्वा वह्नौतत्प्रक्षेपः॥ततस्त्रिःस्रुवप्रतपनं संमार्जनकुशाना
मग्रैरन्तरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिःप्रताप्य दक्षिणतः स्थापयेत् ॥ ततः आज्यमग्नितश्चरोः पूर्वेणानीय
अग्रेधृत्वा आज्यात्पश्चिमे चरुमानीयाज्यस्योत्तरतोनिदध्यात ॥ ततः आज्यस्य प्रोक्षणीवत्रिरुत्पवनम् अवेक्ष्य सत्यपद्रव्येतन्निरसनम्
प्रोक्षण्युत्पवनम्॥ततः उत्थाय उपयमनकुशान्वामहस्ते कृत्वा प्रजापतिंमनसाध्यात्वा तूष्णीमग्नौ घृताक्तास्तिस्रः समिधः प्रक्षिपेत ॥ तत
उपविश्य ॥ सपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेनिधाय ब्रह्मणान्वारब्धः सजघन दक्षिणजानु ि पात्य
सुसमिद्धतमेग्नौजुहुयात् ॥ तत्रप्रथमाहुतिचतुष्टये तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ अथहोमः ॥
ॐप्रजापतयेस्वाहा इदंप्रजापतये नमम इति अग्नेरुत्तरभागे॥ॐइंद्रायस्वाहा इदमिंद्राय नमम इति अग्नेदक्षिणभागे इत्याघारौ॥ ॐअग्न
येस्वाहा इदमग्नये नमम॥ॐसोमायस्वाहा इदंसोमायनममइति मध्येसमिद्धतमे इत्याज्यभागौ॥ इतिहुत्वा वह्निरग्नेः पूजनंषोडशोपचारैः
कुर्य्यात्।ततो वस्वादिप्रधानदेवतानांप्रत्येकं सामिचरुतिलाज्यादिद्रव्यैरष्टोत्तरशतमष्टाविंशतिरष्टौवाऽऽहुतीर्जुहुयात्।तत्रमंत्राः। ॐव्वसोंः
पवित्रंमसिशतधांरंव्वसोंःपवित्रमसिसहस्रधारम्॥देवस्त्वांसवितापुंनातुव्वसोंःपवित्रेंणशतधारेणसुप्वाकामंधुक्षःस्वाहा। इदंवसुभ्यो नमम
१०८।२८।८। ॐव्वरुंणस्योत्तम्भंनमसिव्वरुंणस्यस्कम्भसर्जंनीस्थो व्वरुणस्यऽऋतसदंन्न्यसिव्वरुणस्यऽतऋसंदनमसिव्वरुंणस्यऽऋ

तसदंनमासादस्वाहा।इदंवरुणायनमम १०८।२८।८।ॐउतनोहिर्बुध्न्यःशृणोत्वजऽएकंपात्पृथिवीसंमुद्रःविश्वेदेवाऽऋतावृधोहुवानास्तुता
मंत्रांःकविशस्ताऽअवन्तुस्वाहा॥इदमजैकपदेनमम १०८।२८।८ॐशिवोनामासिस्वाधितिस्तेपितानमस्तेऽअस्तुमामाहिंसीः॥निवर्त्तया
म्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्यायस्वाहा।इदम्अहिर्बुध्न्यायनमम।१०८।२८।८ ॐपूषंतवव्रतेवयन्नरिष्येमकदा
चुनस्तोतारस्त इहस्मसिस्वाहा इदंपूष्णे नमम।१०८।२८।८।ततोयमाद्यघोरांतंप्रत्येकमेकैकाहुतिंचरुणाजुहुयात्॥ॐयमायस्वाहा। इदं
यमायनमम ॥१॥ ॐ धर्मराजाय० इदं धर्म० ॥२॥ ॐ मृत्यवेस्वा० इदं मृत्यवे० ॥३॥ ॐ अंतकाय०इदमन्तकाय० ॥४॥ ॐ वैव
स्वताय० इदं वैवस्व० ॥५॥ ॐकालाय० इदं० ॥६॥ ॐसर्वभूतक्षयाय० इदं०॥७॥ ॐऔदुंबराय०इदं०॥८॥ ॐदध्नाय०इदं० ॥९॥
ॐनीलाय० इदं॥१०॥ ॐ परमेष्ठिने०इदं ॥ ११ ॥ ॐवृकोदराय० इदं० ॥१२॥ ॐचित्राय० इदं॥१३॥ ॐचित्रगुप्तायस्वाहा इदंचि
त्रगुप्ताय नमम ॥१४॥ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यःसर्वेभ्यः सर्वशर्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यः स्वाहा॥इदम् अघोराय०॥
ततः ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः स्वाहा इदं रुद्राय इतिमंत्रेणाष्टोत्तरशत १०८ । २८ । ८ समिद्धो
मः॥विष्णुमंत्रेणतिलहोमः ॥ ततोवस्वादिदेवानामुत्तरपूजनंकृत्वा ब्रह्मणान्वारब्धः ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृतेनमम
इतिचरुशेषंहुत्वा ततःआज्येन ॐभूःस्वाहा॥इदमग्नये नमम ॥१॥ ॐभुवःस्वाहा॥इदंवायवे० ॥२॥ ॐस्वःस्वाहा ॥ इदं सूर्याय० ॥
॥३॥ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांꣳसिप्रमुमुग्ध्यस्मत्स्वाहा

इदमग्नीवरुणाभ्याम् ॥४॥ ॐ सत्वन्नोऽअग्नेऽवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणꣳरराणोव्वीहिमृडीकꣳसुहवोन
ऽएधिस्वाहा इदमग्नीवरुणाभ्यांनमम॥५॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्त्यमित्त्वमयाऽअसि॥अयानोयज्ञंवहास्ययानोधेहिभेषजꣳ
स्वाहा इदमग्नयेअयसेनमम ॥ ६ ॥ ॐ येतेशतंवरुणयेसहस्रंयज्ञियाः पाशाविततामहान्तः ॥ तोभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुम
रुतःस्वर्काः स्वाहा इदं वरुणादिभ्यः ॥७॥ ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमध्यमꣳश्रथाय ॥ अथाव्वयमादित्यव्रतेतवानाग
सोऽअदितयेस्यामस्वाहा। इदं वरुणादिभ्यः० ॥८॥ ॐ प्रजापतये स्वाहा इद प्रजापतयेनमम ॥९॥ इति नवाहुतयः ॥ ततोदिक्पाले
भ्योबलिदानम्॥ अथपूर्णाहुतिः ॐ स्वाहाप्राणेभ्यःसाधिपतिकेभ्यःपृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहा व्वायवेस्वाहादिवेस्वाहा
सूर्य्यायस्वाहा ॥१॥ दिग्भ्यस्वाहा चंद्रायस्वाहा नक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहाव्वरुणायस्वाहा नाभ्यैस्वाहा पूतायस्वाहा ॥ २ ॥ मूर्द्धा
नंदिवोऽअरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निम्। कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहा ॥३॥ इदंमृडाग्नयेनमम
इतित्यागः ॥ ततः संस्रवप्राशनम् आचमनं च कृत्वा ॥ ॐ अद्यकृतैतत्पंचकशांतिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्ण
पात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इति पूर्णपात्रंदद्यात् ॥ ॐ स्वस्तीतिप्रतिवचनानन्तरंब्रह्मग्रंथिविमो
कः। ॐ सुमित्रियानऽआपओषधयःसन्तु। इति प्रणीताजलेनयजमानशिरःसंमृज्य।ॐ दुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियंचवयंद्वि

ष्मत॥इत्यैशान्यांप्रणीतान्युब्जीकरणम् ॥ अग्नौपवित्रप्रतिपत्तिः ॥ ततःस्तरणक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्य ॐदेवागातुविदोगातुं
वित्वागातुमितमनसस्पत॥इमंदेवयज्ञꣳस्वाहावातेधाः स्वाहा इतिजुहुयात् ततःस्रुवेणभस्मानीयदक्षिणानामिकागृहीतभस्मना ॐत्र्यायुषंज
मदग्नेरितिललाटे ॥ ॐकश्यपस्यत्र्यायुषम् ॥ इतिग्रीवायाम् । ॐयद्देवेषुत्र्यायुषम् इति बाहुमूले। ॐतन्नोऽअस्तुत्र्यायुषमितिहृदि।इति
त्र्यायुषंकुर्य्यात् ॥ ततः आचार्यायनक्षत्रप्रतिमादानम् ॥ देशकालौ संकीर्त्य० ॥ इमांधनिष्ठाप्रतिमांवसुदेवतां सतिलान्नांसघटां
सोपस्कराम् अमुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहंसंप्रददे ॥ ॐ स्वस्तीतिप्रतिवचनम् ॥ १ ॥ एवं शतभिषक्प्रतिमां
वरुणदैवतांसमाषान्नांसघटांसोपस्कराम्० ॥२॥ पूर्व्वाभाद्रपदप्रतिमाम् अजैकपाददैवतांससर्षपान्नांसघटांसोपस्कराम्० ॥ ३ ॥ उत्तरा
भाद्रपदप्रतिमाम् अहिर्बुध्न्यदैवतां समुद्गान्नां सघटांसोपस्करां० ॥ ४ ॥ रेवतीप्रतिमांपूषदैवतां सप्तधान्यघटसहितांसोपस्करामभुक
गोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहं संप्रददे ॥ ५ ॥ स्वस्तीतिप्रतिवचनम् ॥ ततः षड्ब्राह्मणभोजनसंकल्पः ॥ ततः पंचदानानि
कुर्य्यात् ॥ पयस्विनींगां १ महिषीं २ सप्तधान्यानि ३ सहिरण्यं सतिलं कृष्णवस्त्रं ४ सहिरण्यं सघृतं कांस्यपात्रंचदद्यात् ॥ ५ ॥
अथवा पंचदानमूल्यद्रव्यंदद्यात् ॥ ततः पचकलशोदकेनयजमानं सपरिवारमभिषिंचेयुः ॥ तत्रमंत्राः ॥ ॐशन्नोमित्रःशंव्वरुणः
शन्नोभवत्त्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिः शन्नोव्विष्णुरुरुक्रमः ॥ १ ॥ शन्नोव्वातः पवताꣳशन्नस्तपतुसूर्य्यः ॥ शन्नः कनिक्रदद्देवः
पर्ज्जन्न्योऽअभिवर्षतु ॥२॥ अहानिशंभवंतुनःशꣳरात्रीः प्रतिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइंद्रावरुणारातहव्या॥

शन्नऽइन्द्रापूषणाव्वाजंसातौशमिन्द्रासोमांसुवितायशंय्योः ॥ ३ ॥ शन्नोंदेवीरभिष्टंयऽआपोंभवन्तुपीतयें॥शंय्योरभिस्रंवन्तुनः ॥४॥
द्यौः शान्तिरन्तरिक्षठं शान्तिःपृथिवी शान्तिरापः शांतिरोषधयः शांतिर्व्वनस्पतयः शांतिर्व्विश्वे देवाः शांतिर्ब्रह्मशान्तिः सर्व्वठं
शान्तिः शान्तिरेवशांतिः सामाशान्तिरेधि ॥५॥ इत्यभिषिच्यघृतेमुखावलोकनंकृत्वा ब्राह्मणेभ्यो भूयसीं दक्षिणांदत्त्वा देवतानामग्ने
श्चविसर्जनंकुर्य्यात् ॥ ततोदेशकालौसंकीर्त्य प्राचीनावीती अमुकगोत्रस्य प्रेतस्य अनेनपंचकशांतिकृते न पंचकजनितदुर्मरणदोषनि
वृत्तिः॥संत्र्यम्॥ममगृहेसकलदुरितोपशांतिरस्तुइतिपठित्वाॐयस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु॥न्यूनंसंपूर्णतांयाति सद्योवं
देतमच्युतमिति कर्मपूर्त्तिकामो विष्णुंस्मरेत् ॥ ततः स्नात्वाशुक्लशुद्धवासीपरिधायब्राह्मणान्पायसान्नेन भोजयित्वागृहंगच्छेत् ॥
एवंयः कुरुतेपुत्रः शुभंतस्यप्रजायते ॥ विधानंयोनकुर्वीत विघ्नस्तस्यभवेत्सदा ॥ १ ॥ इतिब्रह्मपुराणोक्तपंचकशांतिप्रयोगःसमाप्तः॥
॥ अथत्रिपादनक्षत्रमरणशांतिः ॥ तत्रादौएकादशेऽहनिपंचकशांतिवत्सर्वंतीर्थादौपरिकल्प्यस्नात्वाधौतवाससीपरिधाय संध्यादिनित्य
कर्मसमाप्य देशकालौसंकीर्त्य अमुकगोत्रस्यामुकप्रेतस्यत्रिपादनक्षत्रे त्रिपुष्करयोगेवा दुर्मरणजनितदोषोपशांत्यर्थं ममगृहे सपरिवार
स्यायुरारोग्यसुखश्रीप्राप्त्यर्थं विष्णुपूजनपूर्वकत्रिपादनक्षत्रशांतिंकरिष्ये इतिसंकल्प्य ॥ विष्णुंषोडशोपचारैःसंपूज्य॥चतुरस्रंहस्तमात्रं
होमार्थंस्थंडिलंकृत्वातदीशान्यांपूर्वोक्तपंचकशान्तिवत्कलशत्रयस्थापनंतेषामुपरिस्वर्णमयीमूर्त्तयः स्थाप्याः ॥ मध्यकलशेत्रिपादनक्षत्रं
मुख्यदेवतां तद्दक्षिणे तत्पूर्वनक्षत्रमधिदेवतामुत्तरेतदुत्तरनक्षत्रंप्रत्यधिदेवतामित्येवम्प्रतिमात्रयंकलशत्रयेप्रतिष्ठाप्यपूजयेदितरंतुपूर्वव

त्समानम् ॥ होमेतुमुख्यदेवतायै अष्टोत्तरशतम् अधिप्रत्यधिदेवतायै अष्टाविंशत्यष्टाविंशतिसंख्येतिविशेषः॥कृत्तिकात्रिपादेप्राङ्नक्षत्र
भरणी तद्देवता यमः तन्मंत्रः ॥ ॐयमायत्वाङ्गिरस्वते० ॥ कृत्तिकादेवता अग्निस्तन्मंत्रः ॥ ॐअग्निंदूतंपुरोदधे०॥ उत्तरनक्षत्रं रोहिणीत
द्देवताप्रजापतिस्तन्मंत्रः ॥ ॐ प्रजापतेनत्वदेता० पुनर्वसुत्रिपादेप्राङ्नक्षत्रम् आर्द्रा तद्देवता रुद्रस्तन्मंत्रः ॥ ॐ नमस्ते रुद्र०॥पुनर्वसु
देवता अदितिस्तन्मंत्रः ॥ ॐ अदितिर्द्यौः० ॥ उत्तरनक्षत्रंपुष्यस्तद्देवता बृहस्पतिस्तन्मंत्रः॥ॐबृहस्पतेऽअति०॥उत्तराफाल्गुनीत्रिपादे
प्राङ्नक्षत्रंपूर्वा तद्देवता भगस्तन्मंत्रः ॥ भगऽएव भगवाँ० ॥ उत्तराफाल्गुनीदेवता अर्यमातन्मंत्रः ॥ ॐ अर्यमणंबृहस्पतिं० उत्तरान
क्षत्रं हस्तस्तद्देवता रविस्तन्मंत्रः ॥ ॐ आकृष्णेनरजसा० ॥ विशाखात्रिपादेप्राङ्नक्षत्रंस्वातिस्तद्देवतावायुस्तन्मंत्रः॥ॐवायोयेतेसह
स्रिणो०॥ विशाखादेवताइन्द्राग्नीतन्मंत्रः॥ॐइंद्राग्नी आगतꣳ॥उत्तरनक्षत्रमनुराधातद्देवतामित्रस्तन्मंत्रः ॥ॐमित्रस्यचर्षणी०।उत्तराषाढा
त्रिपादेपूर्वनक्षत्रं पूर्वाषाढा तद्देवताजलम् ॥ ॐ आपोहिष्ठा ॥ उत्तराषाढादेवताविश्वेदेवाः ॥ ॐ विश्वेदेवास०॥उत्तरनक्षत्रंश्रवणस्तद्देवता
विधिः ॥ ॐब्रह्मजज्ञानं०॥पूर्वाभाद्रपदात्रिपादे प्राङ्नक्षत्रंशततारका तद्देवतावरुणः०॥ॐवरुणस्योत्तं॥पूर्वाभाद्रपदादेवता अजैकपाद्
ॐउतनोहिर्बुध्न्य०॥उत्तरनक्षत्रम् उत्तराभाद्रपदातद्देवताअहिर्बुध्न्यः॥ॐशिवोनामासि०।ततःकलशत्रयेत्रीणिसूक्तानिजपेत्।प्रथमकलशे
कृणुष्वपाजः०॥९॥द्वितीयकलशे॥विभ्राडित्यनुवाकः॥तृतीयकलशे आशुःशिशानो इत्यप्रतिरथंचजपेत्॥ततोदक्षिणतोब्रह्मासनादिचरु
श्रपणम् आज्यभागांतंपूर्ववत्कृत्वास्थापितदेवतानांसमिच्चरुतिलाज्यादिद्रव्यैःप्रत्येकमष्टोत्तरशतमष्टाविंशतिमष्टौवाजुहुयात्॥मंत्रास्तुपूर्व
उक्ताः॥ततःस्थापितदेवातानामुत्तरपूजनम्॥ततःस्विष्टकृदाद्यभिषेकान्तंपंचकशांतिवद्यथाशक्ति ब्राह्मणभोजनसंकल्पः ॥ स्थापितदेवता

नांविसर्जनम् ॥ ततोभूमिहिरण्यवस्त्रदानानिचदद्यात् ॥ भद्रातिथिमृतस्य भूमिदानम् ॥ त्रिपादर्क्षेहिरण्यंदद्यात् ॥ रव्यंगारकगुरुवाराणामेकस्मि न्वारेमृतस्य वस्त्रदानंकुर्यात् ॥ अन्यत्सर्वंपूर्ववत् ॥ इतित्रिपादनक्षत्रमरणशांतिप्रयोगःसमाप्तः ॥ ॥ छ ॥ ॥ ॥

॥ अथैकादशाहश्राद्धप्रयोगः ॥ तत्रतावत् प्रातर्नद्यादौस्नात्वाशुद्धवाससीनूतनयज्ञोपवीतंचपरिधायसंध्यादिनित्यक्रियांकृत्वानद्यादितीर्थेदेवालयेवागत्वातत्रश्राद्धभूमिंपरिकल्प्य ॥ गोमयोदकाभ्यामुपलिप्यज्वलदंगारैः संशोध्य गौरमृत्तिकयाऽऽच्छाद्य तिलैर्गौरसर्षपैश्चविकिरेत् ॥ ततोमध्याह्ने पुनः स्नात्वाशुक्लवाससीपरिधाय पूर्वरचितश्राद्धदेशमागत्य ॥ गोमयोपलिप्तायां भूमौतिलान्विकीर्य तत्रसपिंडादिद्वारास्वयंवा नूतनमृन्मयभांडैः सकृत्षोडशश्राद्धार्थंपाकंकुर्यात् ॥ ततः पाकेसिद्धे आसनसमीपे तिलतैलेनदीपंप्रज्वाल्यस्थापयेत् ॥ काककुक्कुटादीन्श्राद्धापहंतॄनपसारयेत् ॥ श्राद्धदेशंचवस्त्रेणावेष्टयेत् ॥ ततः कर्ता स्वासनेप्राङ्मुख उपविश्य पादयोरधः कुशत्रयं दक्षिणाग्रं धृत्वा सव्येन आचम्यप्राणानायम्यकर्म्मपात्रंजलेनपरिपूर्य गंधपुष्पादिभिरभ्यर्च्य ॐअपवित्रः पवित्रोवा सर्वावस्थां गतोपिवा ॥ यःस्मरेत्पुडरीकाक्षं सबाह्याभ्यंतरःशुचिः ॥ १ ॥ ॐ पुण्डरीकाक्षः पुनातु इतिपठित्वा कुशत्रयानीतजलेन श्राद्धद्रव्याणिस्वात्मानंच प्रोक्षयेत् ॥ ततः ॐ भूम्यैनमः ॐभगवत्यैगयायैनमः भगवतेगदाधरायनमः इतिनत्वा ॥ कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य (प्राचीनावीती) अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थं पितृसमत्वप्राप्त्यर्थम् आद्यमासिकत्रैपाक्षिकद्वितीयमासिकतृतीयमासिकचतुर्थपंचमोनषष्ठषष्ठसप्तमअष्टमनवमदशमएकादशोनाब्दिकद्वादशमासिकानि स्वस्वकालकर्त्तव्यानि षोडशश्राद्धानि सपिंडीकरणाधिकारसिद्ध्यर्थमेकादशेऽहन्यपकृष्य एकोद्दिष्टविधिनाकरिष्ये इतिसंकल्पयेत ॥ एकाद

शमासाभ्यन्तरेऽधिकमासपातेषोडशपदस्थानेसप्तदशपदंप्रयोज्यम् । ततो गायत्रींत्रिर्जपित्वाॐदेवताभ्यःपितृभ्यश्च महायोगिभ्यएव च॥नमः स्वाहायै स्वधायै नित्यमेवनमोनमः इतित्रिर्जपेत्॥ततोऽपसव्यंकृत्वा ॥ दक्षिणामुखःसजघनंवामजानु निपात्य ॐनमोनमस्ते गोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥१॥ इतितिलगौरसर्षपान्सर्वत्रविकीर्य नीवीबंधंकुर्यात्॥ततः कस्मिंश्चि त्पात्रेजलंगृहीत्वादर्भैरालोडच॥ॐयद्देवादेवहेडनंदेवासश्चकृमाव्वयम्।अग्निर्मातस्मादेनंसोव्विश्वान्मुंचत्वꣳहसः॥१॥यदिदिवायदिनक्त मेनाꣳसिचकृमाव्वयम्।व्वायुर्मातस्मादेनंसो व्विश्वान्मुंचत्वꣳहसः॥२॥यदिजाग्रद्यदिस्वप्नमेनाꣳसिचकृमाव्वयम्।सूर्य्योमातस्मादे नंसोविश्वान्मुंचत्वꣳहसः ॥ ३ ॥ इतिकूष्मांडसूक्तेनाभिमंत्र्य श्वादिदुष्टदृष्टिनिपातदूषितंपाकादिपूतंभवत्वित्युक्त्वा तेनपाकंप्रोक्षयेत्॥ ततः कुशत्रयतिलजलान्यादाय ॥ ॐअद्यामुकगोत्रामुकप्रेत आद्यश्राद्ध इदमासनंतेमयादीयतेतवोपतिष्ठतामित्युक्त्वा ॥ ऋजुकुशत्रयरूपमासनंप्रथमंदक्षिणाग्रंसर्वतः पश्चिमगतमुत्सृजेत् ॥ (नात्रद्विगुणभुग्नमोटकरूपम्) ॥ (सपिंडीकरणं यावदृजु दर्भैः पितृक्रिया इतिविष्णुपुराणीयात्) ॥ पुनः कुशत्रयतिलजलान्यादाय ॥ ॐअमुकगोत्र अमुकप्रेतमासिकश्राद्धनिमित्तकमिद मासनंतेमयादीयतेतवोपतिष्ठताम् इतिद्वितीयमासनं दक्षिणाग्रमुत्सृजेत् ॥ २ ॥ पुनः कुशत्रयादीन्यादाय ॐ अमुकगोत्रा

---

१ (वि० प० वायुगरुडपुराणहेमाद्रिषु) आशिषो द्विगुणा दर्भा जपाशीःस्वस्तिवाचनम् ॥ पितृशब्दः स्वसंबंधः शर्मशब्दस्तथैव च ॥ आवाहः पात्रालंभश्च उल्मुकोल्लेखनादिकम् ॥ तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैवच ॥ प्रदक्षिणविसर्गश्च सीमांतं गमनं तथा ॥ अष्टादशपदार्थांस्तु प्रेतश्राद्धेषु वर्जयेत ॥

॥१९६॥

मुकप्रेतत्रिपाक्षिकश्राद्धनिमित्तकमिदमासनंतेमयादीयतेतवोपतिष्ठतामितितृतीयमुत्सृजेत् ॥ ३ ॥ एवंद्वितीयमासिक० ॥४॥ तृतीयमा
सिक० ॥ ५ ॥ चतुर्थमासिक० ॥ ६ ॥ पंचममासिक० ॥ ७ ॥ ऊनषाण्मासिक० ॥ ८ ॥ षाण्मासिक० ॥९॥ सप्तममासिक० ॥ १० ॥ अष्टम
मासिक० ॥ ११ ॥ नवममासिक० ॥१२॥ दशममासिक० ॥१३॥ एकादशमासिक० ॥१४॥ ऊनाब्दिक०॥ १५॥ द्वादशमासिक०॥ १६॥
एवंतत्तच्छ्राद्धनिमित्तकान्यासनानिक्रमेणदद्यात् ॥ ततः ॐअपहताऽअसुरारक्षाᳬंसिवेदिषदः ॥ इतिवामावर्त्तेनसर्वत्रतिलान्विकीर्य दर्भ
हस्तोभूतले ॐइहलोकंपरित्यज्य गतोसिपरमांगतिम् ॥ मनसावायुरूपेण चटेत्वाहंनिमंत्रये—इतिप्रेतमावाहयेत् ॥ ततोऽर्घपात्रषोडशोप
रिप्रत्येकंदक्षिणाग्रंकुशपत्रैकैकंधृत्वा तत्र ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥शंय्योरभिस्रवंतुनः इतिप्रत्येकंजलंक्षिप्त्वा ॥ ॐतिलोसि
सोमदैवत्यो गोसवोदेवनिर्मितः॥प्रत्नमद्भिःपृक्तः स्वधयापितॄँल्लोकान्प्रीणाहिनः स्वाहा इतिमंत्रेणतिलान्प्रक्षिप्य तूष्णींगंधपुष्पाणिचप्रक्षि
पेत्॥ततः प्रथमपात्रंवामहस्तेकृत्वा पवित्रंतदग्रेधृत्वा ॐयादिव्याऽआपःपयसासंबभूवुर्य्याऽअन्तरिक्षाऽउतपार्थिवीर्याः ॥हिरण्यवर्णायज्ञि
यास्तानऽआपःशिवाःशᳬंस्योनाःसुहवाभवन्तु—इतिपठित्वा॥ कुशत्रयादीन्यादायॐअद्यामुकगोत्रअमुकप्रेतआद्यश्राद्धेःएषतेहस्तार्घोते
मयादीयतेतवोपतिष्ठतामिति प्रथमपवित्रोपरि अर्घ्यजलमुत्सृजेत् ॥ ततोद्वितीयार्घपात्रंगृहीत्वा पवित्रंतदग्रेपलाशपत्रोपरिधृत्वा ॥ ॐया
दिव्या इतिपठित्वा कुशत्रयादीन्यादाय ॐअमुकगोत्रामुकप्रेतमासिकश्राद्धेएषतेहस्तार्घोमयादीयतेतवोपतिष्ठतामितिपवित्रोपरिअर्घंज
लमुत्सृजेत् ॥ एवमेवत्रिपाक्षिकद्वितीयमासिकादिषुज्ञेयम्॥(अत्रपात्रन्युब्जीकरणंकृताकृतम्)ततोगंधादिदानंतावद्गंधपुष्पधूपदीपवस्त्रादी

न्यासाद्यहस्तेकुशत्रयतिलजलान्यादाय ॐअमुकगोत्रअमुकप्रेतआद्यादिद्वादशमासिकांतषोडशश्राद्धनिमित्तकान्येतानिगंधपुष्पधूपदी
पतांबूलवासांसि एकतंत्रेणतेमृयादीयंतेतवोपतिष्ठंताम् इत्युत्सृजेत् ॥ततःअमीषांषोडशश्राद्धानामर्चनविधेः परिपूर्णता इतिपठित्वा ततः
आसनानिवेष्टयित्वाजलेनचतुष्कोणादिमंडलंकुर्यात्॥ अत्रपरकीयभूमौश्राद्धकरणेइममन्नमेतद्भूस्वामिपितृभ्योनमइतिदर्भेषूत्सृजेत् ॥तत
उष्णमन्नंताम्राद्दिपात्रेणकराभ्यामादाय मृतंध्यायन्षोडशपात्रेषुप्रत्येकम् एकस्मिन्पात्रेवापुरुषतृप्तिक्षमंपरिविष्यपृथक्पृथक्पुटकादिस्थ
तानिप्रत्येकंघृतजलव्यंजनानिचोपनीय अन्नंमधुनाभिघार्य ॐमधु० वाताऽऋतायते० इतिमंत्रत्रयेणाभिमंत्र्य ॐ मधुमधुध्वितिचपठेत्॥
(न त्रपात्रालंभागाहौ नात्रपात्रालंभोनाशिषःप्रार्थयदितिप्रचेतःस्मरणात्)॥ ततः सर्वान्नपात्रपरितः ॐ अपहताऽअसुरारक्षाᳬंसिवेदिषद
इतितिलान्विकीर्य ॥ वामकरेणपात्रंस्पृशन्दक्षिणहस्तेकुशत्रयादीन्यादाय ॥ ॐ अमुकगोत्र अमुकप्रेत आद्यश्राद्धे इदमन्नंघृताद्युपस्कर
सहितंतेमयादीयतेतवोपतिष्ठतामित्यासनवामभागेजलमुत्सृजेत् ॥ इदमन्नंप्रेताय उपतिष्ठतुइतिपठेत् ॥ अनेनैवक्रमेण मासिक० २
त्रैपक्षिक० ३ द्वितीयमासिक० ४ तृतीयमासिक० ५ चतुर्थमासिक० ६ पंचममासिक० ७ ऊनषाण्मासि० ८ षाण्मासिक० ९ सप्तम० १०
अष्टम० ११ नवम० १२ दशम० १३ एकादश० १४ ऊनाब्दिक० १५द्वादशमासिकश्राद्धेषुज्ञेयम् १६अथवाएकस्मिन्पात्रेस्थितमन्नम् ॐ
अमुकगोत्रप्रेतआद्यादिद्वादशमासिकान्तषोडशश्राद्धनिमित्तकमिदमन्नघृताद्युपस्करसहितम् एकतंत्रेणतेमयादीयतेतवोपतिष्ठतामित्युत्सृ
जेत्(नात्रपैतृकोजपः ॥ नपैतृकोजपः कार्य्यं इतिहेमाद्रौप्रचेतःस्मरणात्॥विकारमपिनकुर्यात् ॥ प्रेतश्राद्धे न विकिर इतिस्मृतिरत्नावल्यां
नविकिरंस्वधाकारम् इतिवायुपुराणाच्च)॥ ततोऽन्नपात्रसमीपेपिंडदानार्थंसिकताभिः षोडशवेदिकाः दक्षिणप्लवाः कृत्वा गोमयोदकेनोप

लिप्य प्रत्येकंदक्षिणाग्रंकुशत्रयास्तरणंकुर्यात् ॥ ततः षोडशपत्रपुटकेषुजलतिलगंधपुष्पाणिकृत्वा एकंपुटकंगृहीत्वा ॐ अद्या मुकगोत्रामुकप्रेत आद्यश्राद्धपिंडस्थाने अत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रथमवेदिकायां छिन्नमूलकुशत्रयोपरि अवनेजनज लंकिंचिद्दद्यात् ॥ एवं मासिकादिपंचदशश्राद्धपिंडस्थानेप्रत्येकमवनेजनंदद्यात् यथाक्रमेण ॥ ततोघृतमधुतिलयुक्तेनान्नेनषो डशपिंडान्बिल्वोपमान्निर्मायमधुघृताभ्यामभिघार्य प्रथमंपिंडंकुशत्रयतिलजलानिचादाय ॐ अमुकगोत्र अमुकप्रेत आद्यश्राद्धे एषतेपिंडोमयादीयतेतवोपतिष्ठतामितिप्रथमवेदिकायांकुशोपरि अवनेजनस्थाने सव्योपगृहीतदक्षिणकरेणपिंडंदद्यात् १ पुनःकुश त्रयादीनि पिंडंचादाय ॥ ॐ अमुकगोत्रामुकप्रेत मासिकश्राद्ध एषतेपिंडोमयादीयतेतवोपतिष्ठतामितिद्वितीयवेदिकायां कुशोपरिद द्यात् २ एवं त्रैपाक्षिक० ३ द्वितीयमासिक० ४ तृतीयमासिक० ५ चतुर्थमासिक० ६ पंचम० ७ ऊनषाण्मासिक० ८ षाण्मा सिक० ९ सप्तममासिक० १० अष्टम० ११ नवम० १२ दशम० १३ एकादश० १४ ऊनाब्दिक० १५ द्वादशमासिक १६ श्राद्धेषु पृथक्पृथक् पिंडं दद्यात् ॥ ततोहस्तौप्रक्षाल्य सव्येनाचम्य हरिंस्मृत्वा अपसव्यंकुर्यात् ॥ ततः प्रथममवनेजनपात्रमादाय ॐ अमुकगोत्रामुकप्रेत आद्यश्राद्धपिंडे अत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रथमपिंडोपरिप्रत्यवनेजनंदद्यात् ॥ १ ॥ एवं मासिकादिपंचदशश्राद्धपिंडोपरिक्रमेणप्रत्येकं प्रत्यवनेजनंदद्यात् ॥ ततः पिंडसमीपे नीवींविसृज्य सव्येनाचम्य अपसव्येन प्रतिपिंडं प्रक्षालितं सूत्रत्रयं दक्षिणहस्तेनदत्त्वा ॥ कुशत्रयादीन्यादाय ॐ अमुकगोत्रामुकप्रेत आद्यादिद्वादशमासिकान्तषोडशश्राद्धपिंडोपरि एतानिवासांसिते मयादीयंते तवोपतिष्ठंतामितितंत्रेणैवमुत्सृजेत् ॥ ततः षोडशपिंडान्गंधपुष्पतुलसीपत्रधूपदीपनैवेद्यतांबूलपूगी

फलदक्षिणाभिः संपूज्य ॥ ॐ अमुक० प्रेत आद्यादिषोडशश्राद्धपिंडेषुयद्दत्तंगंधाद्यर्चनं तत्तवोपतिष्ठतामित्युत्सृजेत्॥ ततः एभिः षोड शपिंडदानैरमुकगोत्रप्रेतस्यप्रेतत्वनिवृत्तिः ॥ सद्गतिप्राप्तिश्चास्तु ॥ इतिपठित्वा एकस्मिन्पत्रपुटे ॐ शिवा आपः संतु–इतिजलम् ॥ सौमनस्यमस्तु–इतिपुष्पम्॥अक्षतंचारिष्टंचास्तु–इतियवतिलांश्च प्रक्षिप्य॥कुशत्रयतिलजलान्यादाय ॐ अमुकगोत्रस्यअमुकप्रेतस्य आद्यश्राद्धे यद्दत्तमन्नपानादिकंतदुपतिष्ठतामित्यक्षय्योदकं दद्यात् ॥ एवं मासिकादिपंचदशश्राद्धेषुक्रमेणषष्ठीविभक्त्याक्षय्योदकं दद्यात् ॥ ततः पिंडानामुपरि प्रत्येकंपवित्रं निधाय तदुपरि सतिलदुग्धेनजलेनदक्षिणाग्रांजलधारांदद्यात् ॥ अनादिनिधनोदेवःशंख चक्रगदाधरः॥अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षप्रदोभव॥१॥अतसीपुष्पसंकाशंपीतवाससमच्युतम्।येनमस्यंतिगोविंदं नतेषांविद्यतेभयम्॥ ॥ २ ॥ कृष्णकृष्णकृपालुस्त्वमगतीनांगतिर्भव ॥ संसारार्णवमग्नानां प्रसीदपुरुषोत्तम॥३॥नारायणसुरश्रेष्ठ लक्ष्मीकान्तवरप्रद ॥ अने नतर्पणेनाथ तमेप्रोक्षप्रदोभव ॥४॥ हिरण्यगर्भपुरुष व्यक्ताव्यक्तस्वरूपिणे ॥ अस्यप्रेतस्यमोक्षार्थंसुप्रीतोभवसर्वदा॥ ५ ॥ इतिपठित्वा॥ अमुकगोत्रामुकप्रेत अन्नजलधारास्तेमयादीयंतेतवोपतिष्ठंताम् इत्युत्सृजेत् ॥ ततोरजतदक्षिणादानंकुर्यात् ॥ तत्र रजतद्रव्यं कुश त्रयादीनिचादाय ॐ अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थं कृतैतदाद्यादिद्वादशमासिकपर्यंतषोडशश्राद्धानांप्रतिष्ठासिद्ध्यर्थं मिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदातुमहमुत्सृजे इतिसंकल्प्य ब्राह्मणायदद्यात् ॥ ततः पिंडानुत्थाप्य चटविसर्ज नंकुर्यात्॥ततः ॐ देवताभ्यः पितृभ्यश्चेतित्रिर्जपित्वा रक्षादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्य सव्येनाचामेत् ॥ ततः कर्मपूर्तिकामो विष्णुंस्मरेत्। ॐप्रमादात्कुर्वतांकर्म्म प्रच्यवेताध्वरेषुयत्।स्मरणादेवतद्विष्णोः सम्पूर्णंस्यादितिश्रुतिः-इतिपठित्वा श्राद्धवस्तूनिविप्राय

प्रतिपादयेत् ॥ पिंडादिकंगोभ्योवायसेभ्योवादद्यादगाधेजलेवा क्षिपेत् ॥ ततः एकादशप्रभृतिब्राह्मणान्भोजयेत्तान्शय्यादिदानैः परितोषयेत् ॥ ततः षष्ट्युत्तरशतत्रयपिंडदानम् अंजलिदानंचकुर्य्यात् ॥ इत्याद्यादिषोडशश्राद्धपद्धतिः समाप्ता ॥ ॥ ❀ ❀ ॥

अथषष्ट्यधिकशतत्रयपिंडश्राद्धविधिः ॥ तत्रादौसव्येनाचम्यप्राणानायम्यकुशत्रयतिलजलान्यादाय ॥ देशकालौसंकीर्त्य अपसव्यादिना अमुकगोत्रस्यामुकप्रेतस्यपरलोकेमहाक्षुधातृषानिवारणार्थं मरणदिनादारभ्यसंवत्सरपर्य्यंतम् अहरहः सान्नोदकुंभपिंडनिमित्तकषष्ट्यधिकशतत्रयपिंडश्राद्धं करिष्ये इतिसंकल्प्य ॥ गोमयोपलिप्तेदक्षिणप्रवणेस्थंडिलेकुशोपरि त्रिंशत्त्रिंशत्पिंडान्दद्यात् ॥ तद्यथा—एकस्मिन्पत्रपुटे ॥ जलतिलगंधपुष्पाणिकृत्वा तत्पुटकंगृहीत्वा ॐ अमुक० प्रेतषष्ट्यधिकशतत्रयपिंडस्थाने अत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठताम्—इति वेदिकायांकुशोपरि अवनेजनंकिंचिद्दद्यात् ॥ ततस्तिलघृतमधुदधिदुग्धशर्करादियुक्तेनयवचूर्णेन षष्ट्युत्तरशतत्रयपिंडान्निर्म्माय जलेनप्रोक्ष्यप्रथमंत्रिंशत्पिंडान्कुशत्रयादीनिचादाय ॥ ॐ अमुकगोत्र अमुकप्रेत परलोकेमहाक्षुधानिवारणार्थम् एकादशाहे प्रथममासिकाहरहः श्राद्धनिमितकानीमानि त्रिंशत्पिंडानितेमयादीयंतेतवोपतिष्ठंतामिति कुशोपरिदद्यात् १॥ एवं द्वितीयमासिक० २ तृतीय०३चतुर्थ० ४ पंचम०५षाण्मासिक० ६ सप्तम० ७ अष्टम०८ नवम० ९ दशम० १० एकादश० ११ द्वादशमासिक१२श्राद्धनिमित्तकानिक्रमेणत्रिंशत्त्रिंशत्पिंडानिदद्यात्॥ततोऽवनेजनपात्रमादाय ॐअमुकगोत्र०प्रेतषष्ट्युत्तरशतत्रयपिंडोपरि प्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रत्यवनेजनंदत्त्वा पिंडान्सूत्रगंधपुष्पधूपदीपतांबूलैःसंपूज्य॥एभिःषष्ट्यधिकशतत्रयपिंडदानैरमुकगोत्रस्य प्रेतस्य संवत्सरपर्यंतंक्षुधानिवृत्तिरस्तु -इतिपठेत्॥ततोदक्षिणादानं रजतद्रव्यंजलकुशादीनिचादाय। अमुकगोत्र

स्यप्रेतस्यप्रेतत्वनिवृत्त्यर्थंकृतैतत्षष्ट्यधिकशतत्रयपिंडश्राद्धकर्मणःसांगतासिद्ध्यर्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायद
क्षिणात्वेनदातुमहमुत्सृजेइतिदद्यात् ॥ ततः पिंडानुत्थाप्यजलादौप्रक्षिप्यविष्णुंस्मरेत् ततोंऽजलिदानम् ॥ तत्रादौ अश्वत्थादिसमीपे
गत्वातन्मूलदेशेदक्षिणामुख उपविश्यपातितवामजानुःअपसव्येन ॥ कुशयत्रतिलजलान्यादाय॥अमुकगोत्रस्यामुकप्रेतस्यपरलोकेमहा
तृषानिवारणार्थम् अहरहःसान्नोदकुंभनिमित्तषष्ट्यधिकशतत्रयांजलिदानंकरिष्ये–इतिसंकल्प्य॥एकंबृहत्पात्रंजलेनापूर्य्यतत्रदुग्धतिलगं
धपुष्पाणिनिक्षिप्य ऋजुदर्भयुक्तपूर्णांजलिना ॐअमुकगोत्र अमुकप्रेत परलोकेमहातृषानिवारणार्थम् एतेषष्ट्यधिकशतत्रयःतिलतोयांज
लयस्तेमयादीयंतेतवोपतिष्ठंताम् इतिवाक्यंकृत्वाषष्ट्यधिकशतत्रयतिलतोयांजलीन्दद्यात् । ततः-अनादिनिधनोदेवःशंखचक्रगदाधरः।
अक्षय्यः पुंडरीकाक्ष प्रेतमोक्षप्रदोभव ॥ इति प्राथ्र्यविष्णुंस्मरेत् ॥ इति षष्ट्यधिकशतत्रयपिंडश्राद्धप्रयोगः ॥ अथशय्यादिदानम् ॥
तत्रप्रयोगः ॥ तत्रादौ ॥ सारदारुमयींदृढांदंतपत्रहेमपट्टाद्यैरलंकृतांहंसतूलीप्रतिच्छन्नांशुभ्रगंडोपधानकां प्रच्छादनपटीयुक्तांगंधधूपाधि
वासितांपुष्पतांबूलकुंकुमकर्पूरागुरुचंदनदीपोपानच्छत्रचामरव्यजनासनसप्तधान्यघृतपूर्णकुंभसहितां शय्यामासाद्यतत्रहैमंकांचनपुरुषं
स्थापयेत् ॥ (सपिंडनोत्तरंशय्यादानकरणेलक्ष्मीनारायणप्रतिमांस्थापयेत्) ततः पूर्वाभिमुख उदङ्मुखोवा उपविश्य आचम्य
प्राणानायम्य देशकालौसंकीर्त्य ॥ ॐअद्याशौचान्तद्वितीयेह्नि (अपसव्यम्) अमुकगोत्रस्यामुकप्रेतस्यस्वर्गकामः शय्यादानं
करिष्ये इति संकीर्त्य देयब्राह्मणंगंधादिनासंपूज्य ॐइमांसोपकरणशय्यांददामीति द्विजकरेजलंदत्त्वा ॥ ॐददस्व इति प्रतिवचना
नन्तरं विप्रंशय्यायामुपवेशयेत् ॥ ततः ॐसोपकरणशय्यायैनमः–इति शय्यांनमस्कृत्य कांचनपुरुषं गंधपुष्पधूपदीपनैवेद्यतां

बूलादिभिः संपूज्य नमस्कृत्य ॥ कुशत्रयतिलजलान्यादाय ॐ अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्यामुकप्रेतस्यपरलोकेसुख
शयनार्थं स्वर्गलोकप्राप्त्यर्थमिमांसोपस्करांशय्यां कांचनपुरुषप्रतिमायुतांविष्णुदैवत्याममुकगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमहंसंप्र
ददे-इतिसतिलोदकंविप्रहस्तेदद्यात् ॥ ॐस्वस्तीतिविप्रोवदेत् ॥ ततः शय्यादानप्रतिष्ठार्थं हिरण्यंकुशत्रयादीनिचादाय ॥ ॐ
अद्यकृतैतत्सोपकरणशय्यादानप्रतिष्ठासिद्ध्यर्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनतुभ्यमहं संप्रददेइति
दद्यात् ॥ ततःप्रतिगृहीता ॐ स्वस्तीत्युक्त्वाशय्यांसंस्पृशेत् ॥ ततोदाता ॐ यथा न कृष्णशयनं शून्यं सागरजातया ॥
शय्या ममाप्यशून्यास्तु तथा जन्मनिजन्मनि ॥ इति पठित्वा प्रणम्यविसृजेत् इति शय्यादानप्रयोगः ॥ (अत्रकेषुचिद्ग्रंथे
षुद्विजदंपतीपूजनंलिखितम् तत्तुपर्वतीयानांमैथिलानांचज्ञेयम्) ॥ अथत्रयोदशपददानानि ॥ तत्र आसनम् १ उपानहौ २ छत्रम् ३
मुद्रिकाम् ४ कमंडलुम् ५ अन्नम् ६ जलम् ७भाजनानि ८ वस्त्राणि ९ आज्यम् १० यज्ञोपवीतम् ११ यष्टिम् १२ तांबूलम् १३ इमा
नित्रयोदशपददानद्रव्याणि यथाचारं यथाशक्तिसंपाद्य कुशत्रयतिलजलान्यादाय ॥ देशकालौ संकीर्त्य (अपसव्येन) अमुकगोत्र
स्यामुकप्रेतस्य परलोकेसुखप्राप्त्यर्थम् असद्गतिनिवारणार्थम् इमानिआसनोपानच्छत्रमुद्रिकाकमंडल्वन्नजलभाजनवस्त्राज्ययज्ञोपवीतय
ष्टितांबूलानित्रयोदशपदानिनानादैवतानि नानानामगोत्रेभ्यो ब्राह्मणेभ्योदातुमहमुत्सृजे प्रेताय उपतिष्ठंताम् इत्युत्सृजेत् ॥ एभिः पददा
नैरमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिः सद्गतिप्राप्तिः इतिपठित्वाब्राह्मणेभ्योदद्यात् ॥ इतित्रयोदशपददानम् ॥ ततः शक्तौसत्यां महार्हा
णिरत्नानि गाःवाहनंयानानिदासीदासवेश्मानिप्रेतमुद्दिश्यविप्रेभ्योदद्यात् ॥ इत्येकादशाहदिनकर्म ॥ ❋ ॥ ॥ अथसपिंडनश्राद्धम् ॥

तच्चाधुनिकाः द्वादशाहे अनुकल्पेनकुर्वंतितथैवलिख्यते तत्रपूर्वदिने एकादशाहश्राद्धंकृत्वा निरामिषमेकवारंभुक्त्वारात्रौप्रदोषान्तेब्राह्मणा
न्निमंत्रयित्वा सपिंडनदिनेनद्यादौप्रातः स्नात्वा नित्यक्रियांसमाप्य मध्याह्नेपुनःस्नात्वाश्वेतवस्त्रेपरिधायगोमयोपलिप्तायांभूमौसुस्नातसपिं
डादिद्वारास्वयंवापाकद्वयंकुर्यात्।ततोमृतिस्थानेश्राद्धभूमिंपरिकल्प्य गोमयोदकाभ्यामुपलिप्यज्वलदंगारैः संशोध्यगौरमृत्तिकयाच्छाद्य
तिलैर्गौरसर्षपैश्च विकिरेत् ॥ तत्र श्राद्धसामग्रीं जलपूरितान्द्वादशघटांश्चैकांपक्वान्नपूरितांवर्धनींचसंपाद्य श्राद्धार्थ मंडलद्वयंकुर्यात् ॥ तत्र
प्रथमंदेवमंडलंचतुरस्रंकृत्वा तद्दक्षिणेप्रेतमंडलंतत्प्राकपितामहादिमंडलंचवर्तुलंत्रिकोणंवाकृत्वातत्रषड्दर्भचटान्निवेशयेत्॥ततआसनसमी
पेतिलतैलेनदीपंप्रज्वाल्यस्थापयेत् ॥ काककुक्कुटादीञ्छ्राद्धापहर्तॄनपसारयेत् ॥ श्राद्धदेशावरणंचकुर्यात् ॥ तत्रप्रथमंविश्वेदेवास्ततः
प्रेतः प्रेतपित्रादिकमितिक्रमः ॥ तत्रप्रेतश्राद्धेद्विगुणादर्भा आवाहनं स्वधाशब्दं पात्रालंभ अङ्गुष्ठनिवेशनम् अग्नौकरणशेषदानम् उल्मुकभ्रा
मणं शर्मादिशब्दं विसर्जनंचविवर्जयेत् ॥ मोटकस्थानेऋजुदर्भाः स्वधास्थाने उपतिष्ठतामितिवक्तव्यंप्रेतशब्देनोद्देशः कर्त्तव्यः॥प्रेतपित्रा
दिश्राद्धंतुपार्वणवत्कर्त्तव्यम्। अथप्रयोगः ॥ तत्रादौस्वासनेप्राङ्मुख उपविश्य पादयोरधः कुशत्रयंदत्त्वा (सव्येन) पवित्रेपरिधायआ
चम्य प्राणानायम्य कर्मपात्रंजलेनापूर्य्य तत्र जलतिलगंधपुष्पाणिप्रक्षिप्य ॐअपवित्रःपवित्रोवा सर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरी
काक्षं सबाह्याभ्यन्तरः शुचिः ॥ १ ॥ ॐपुंडरीकाक्षः पुनात्वितिकुशत्रयानीतजलेनश्राद्धवस्तूनिस्वात्मानंचसिंचेत् ॥ ततः
ॐ वैष्णव्यैनमः ॥ ॐकाश्यप्यैनमः ॥ ॐ अक्षयायैनमः ॥ ॐ भूम्यैनमः ॥ इतिनत्वा ॥ श्राद्धदेशंगयात्मकत्वेन तदेकदेशस्थं
गदाधरंचध्यात्वा तयोः ॐ भगवत्यैगयायैनमः ॥ ॐ भगवतेगदाधरायनमः ॥ इतिमनोवाक्कायैर्नमस्कारंकुर्यात् ॥ ततः कुश

त्रयतिलजलान्यादाय ॥ देशकालौसंकीर्त्य ॥ ॐ अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्या उत्तमलोकप्राप्त्यर्थमेकोद्दिष्टपार्वणोभय।
त्मकंसपिंडीकरणश्राद्धमहंकरिष्ये इतिसंकल्प्य ॥ गायत्रींत्रिर्जपित्वा ॥ ॐ देवताभ्यःपितृभ्यश्च महायोगिभ्यएवच ॥ नमः
स्वाहायैस्वधायै नित्यमेवनमोनमः ॥ इतित्रिर्जपेत् ॥ ततः ॐ नमोनमस्तेगोविन्द पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्ष
तांसर्वतोदिशः ॥ इतिदैवप्रदेशेयवान्विकीर्य (अपसव्येन) पैतृकप्रदेशे ॐ अग्निष्वात्ताःपितृगणाः प्राचींरक्षंतुमेदिशम् ॥
तथाबर्हिषदःपांतु याम्यांयेपितरःस्थिताः ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः॥अधोर्ध्वमपिकोणेषु हविष्मन्तश्चसर्वदा ॥ रक्षो
भूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमोरक्षांकरोतुवै ॥ वायुभूतपितृणांच तृप्तिर्भवतुशाश्वती ॥ इत्यनेन
दिक्ष्वधस्तादूर्ध्वंकोणेषुच तिलान्गौरसर्षपांश्चविकीर्य वामेदक्षिणेवाकटिभागेनीवींबंधंकुर्यात् ॥ ततः (सव्येन) कस्मिंश्चित्पात्रेज
लंगृहीत्वा दर्भैरालोडच ॥ ॐ यद्देवादेवहेडनंदेवासश्चकृमाव्वयम् ॥ अग्निर्मातस्मादेनंसो व्विश्वान्मुञ्चत्वर्ठंहसः ॥ १ ॥ यदि
दिवायदिनक्तमेनांᳫसिचकृमाव्वयम् ॥ व्वायुर्मातस्मादेनंसो व्विश्वान्मुंचत्वर्ठंहसः ॥ २ ॥ यदिजाग्रद्यदिस्वप्नऽएनांᳫसिचकृ
माव्वयम् ॥ सूर्य्योंमातस्मादेनंसोव्विश्वान्मुंचत्वर्ठंहसः ॥ ३ ॥ इतिकूष्मांडसूक्तेनाभिमंत्र्य ॥ श्वोदक्यादिदुष्टदृष्टिनिपाताद्व
शूद्रादिसंपर्कदोषाच्चपाकादीनां पवित्रताऽस्तु इतिपाकादीन्संप्रोक्षयेत् ॥ अथासनादिदानम् ॥ तत्रतावत् उदङ्मुखउपविश्य
सव्येन सजघनंदक्षिणंजान्वाच्य ॥ कुशत्रययवजलान्यादाय ॥ ॐ अद्यास्मत्पितामहादित्रयश्राद्धसंबंधिनः कामकालसंज्ञका

विश्वेदेवाः इदमासनंवोनमः ॥ इत्युच्चार्य्य देवतीर्थेनप्रथममंडले पूर्वाग्रंकुशत्रयंदद्यात् ॥ ततोयवहस्तः ॥ ॐ कामकालसंज्ञ
कान्विश्वान्देवानावाहयिष्ये इत्युक्त्वा ॥ ॐविश्वेदेवासऽआगंतशृणुतामऽइमर्ठंहवंम्॥ एदंबर्हिर्निषीदत ॥ इत्यनेनावाह्य ॥ॐयवोसियु
वयास्मद्द्वेषोयवयारातीः ॥ इत्यनेनयवान्विकीर्य ॥ॐविश्वेदेवाःशृणुतेमर्ठंहवंम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायज
त्राऽआसद्यास्मिन्बर्हिषिमादयध्वम्॥इतिजपेत्॥(विश्वेदेवोत्पत्तिनाम्नोरज्ञाने) आगच्छंतुमहाभागा विश्वेदेवामहाबलाः॥येयत्रयोजिताः
श्राद्धे सावधानाभवन्तुते॥इति श्लोकोऽप्युच्चारणीयः ॥ ततोऽर्घपात्रेपूर्वाग्रंपवित्रंधृत्वा ॥ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥शंय्योर
भिस्रवंतुनः॥इतिजलंक्षिप्त्वा ॐयवोसियुवयास्मद्द्वेषोयवयारातीः इतियवान्प्रक्षिप्यतूष्णीमेवगंधपुष्पतुलसीदलानिक्षिपेत्॥ततः ॐअर्घ
पात्रसंपत्तिरस्तु इति पठित्वा।अर्घपात्रंवामहस्तेकृत्वापवित्रंपूर्वाग्रंदेवताग्रे पलाशपत्रेनिधाय। ॐयादिव्याऽआपःपयसासंबभूवुर्याऽआन्त
रिक्षाऽउतपार्थिवीर्याः॥हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशर्ठंस्योनाःसुहवाभवंत्विति मंत्रेणार्घपात्रमभिमंत्र्य।दक्षिणहस्तेन कुशत्रय
यवजलान्यादाय।ॐअद्यास्मत्पितामहादित्रयश्राद्धसंबंधिनःकामकालसंज्ञकाविश्वेदेवा।एषवोहस्तार्घःस्वाहानमः।इत्युत्सृज्यपवित्रोपरि
अर्घजलंदक्षिणहस्तस्थदेवतीर्थेनक्षिपेत् ॥ ततोऽर्घपात्रंपवित्रादिसहितं देवदक्षिणपार्श्वे ॐविश्वेभ्यो देवेभ्यः स्थानमसीत्युत्तानंस्थाप
येत्॥अथगंधादिदानम्॥तत्रगंधपुष्पधूपदीपवस्त्रादिकंधृत्वा॥कुशत्रययवजलान्यादाय॥ॐअद्यास्मत्पितामहादित्रयश्राद्धसंबंधिनःकाम
कालसंज्ञकाविश्वेदेवाः एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसिवोनमः इत्युत्सृजेत्।ततःॐविश्वेषांदेवानामर्चनं संपूर्णमस्त्विति

पठित्वा प्रणीताग्निभस्मना वारिणावा ब्राह्मणादिषु चतुरस्रत्रिकोणवर्त्तुलमंडलंवेष्ठपित्र्याकुर्य्यात् ॥ इतिगंधाद्यर्चनान्तंदेवक निर्वर्त्य
प्रेतपित्रादिश्राद्धदेशमागच्छेत्॥तत्र आसने दक्षिणाभिमुखउपविश्य अपसव्यंकृत्वा सजघनं वामंजान्वाच्य॥कुशत्रयतिलजलान्यादाय॥
ॐअमुकगोत्र अमुकप्रेत इदमासनंतेमयादीयते तवोपतिष्ठतामित्युक्त्वा ऋजुकुशत्रयरूपंदक्षिणाग्रमासनमुत्सृजेत् ॥ ततोद्विगुणभुग्नकु
शत्रयतिलजलान्यादायॐअमुकगोत्र पितामहामुकशर्मन्वसुरूप इदमासनंतुभ्यंस्वधा ॥ इतिप्रथमासनं मोटकरूपं दक्षिणाग्रं पश्चिमग
तमुत्सृजेत् ॥१॥ पुनर्द्विगुणभुग्नकुशत्रयादीन्यादाय ॐ अमुकगोत्रप्रपितामहामुकशर्मन् रुद्ररूप इदमासनंतुभ्यंस्वधा॥इति द्वितीयासनं
प्रपितामहायदद्यात्॥२॥पुनर्द्विगुणभुग्नकुशादीन्यादाय ॐअमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नादित्यरूप इदमासनंतुभ्यंस्वधा इतितृती
यासनंसर्वतः पूर्वगतंवृद्धप्रपितामहायोत्सृजेत् ॥ ३ ॥ ततःपितामहादीनुद्दिश्य ॐपितॄनावाहयिष्ये इत्युक्त्वा ॐउशन्तस्त्वानिधीमह्यु
शन्तःसमिधीमहि॥उशन्नुशतऽआवह पितॄन्हविषेऽअत्तवे ॥ इत्यावाह्य ॥ ॐअपहताऽअसुरारक्षा(ँ)सिवेदिषदः॥इतितिलान्विकीर्य॥
ॐआयंतुनःपितरःसोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधयामदंतोधिब्रुवन्तुतेवन्त्वस्मान् ॥ इतिजपेत् ॥ ततोर्घ
पात्रचतुष्टयंनिधायप्रत्येकमेकैकंदर्भदलंधृत्वा ॥ तत्र ॐ शन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥शंय्योरभिस्रवंतुनः॥इतिजलंप्रक्षिप्य ॐ
तिलोसिसोमदेवत्यो गोसवोदेवनिर्मितः॥प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहिनः स्वधा॥इतिप्रत्येकंतिलान्प्रक्षिप्य तूष्णीमेव
गंधपुष्पाणिनिक्षिपेत् ॥ ततोर्घपात्रचतुष्टयसंपत्तिरस्तु इतिपठित्वा प्रेतार्घपात्रं वामहस्तेकृत्वा पवित्रंपलाशपत्रे धृत्वा ॥ ॐ या

दिव्याऽआपः पयसासंबभूवुर्य्याऽआन्तरिक्षाऽउतपार्थिवीर्य्याः ॥ हिरण्यवर्णा यज्ञियास्तानऽआपःशिवाःशꣳ स्योनाःसुहवा भवंतु ॥
इति पात्रजलमभिमंत्र्य ॐ अमुकगोत्रामुकप्रेत सपिंडीकरणश्राद्धे एषतेहस्तार्घोमयादीयते तवोपतिष्ठतामितिपवित्रोपरि अर्घजलं
किंचिद्दद्यात् ॥ अर्घपात्रंचावशिष्टजलपवित्रसहितंपुरतः स्थापयेत् ॥ अथपात्रमेलनम् ॥ तत्रादौकुशत्रयतिलजलान्यादाय देशकालौ
संकीर्त्य ॥ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वकसद्गतिप्राप्त्यर्थं वसुरुद्रादित्यत्वप्राप्त्यर्थंच तत्पितृपितामहप्रपितामहाना
मर्घैः सहप्रेतार्घसंयोजयिष्ये इतिसंकल्प्य ॥ ततः प्रेताऽर्घपात्रस्थंपवित्रं पितामहार्घपात्रेनिधाय प्रेतार्घपात्रंदक्षिणहस्तेधृत्वा ॥
ॐअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंतदर्घपात्रस्थंप्रथमांशजलम् अमुकगोत्रस्यपितामहस्यामुकशर्मणोवसुरूपस्यअर्घपात्रेणसहसं
योजयिष्ये इतिपठित्वा ॥ ॐयेसमानाः समनसः पितरो यमराज्ये तेषाँल्लोकः स्वधानमोयज्ञोदेवेषुकल्पताम् ॥ १ ॥ ॐयेसमानाः
समनसोजीवाजीवेषुमामकाः ॥ तेषाꣳश्रीर्मयिकल्पतामस्मिँल्लोकेशतꣳसमाः इतिमंत्रद्वयान्तेप्रथमांशमर्घजलमर्घेक्षिपेत् ॥ तेन
वसुलोकप्राप्तिः ॥१॥ ततः प्रेतपवित्रंप्रपितामहार्घपात्रेधृत्वा ॥ अमुक० प्रेतस्यप्रेतत्वनिवृत्त्यर्थं तदर्घपात्रस्थंद्वितीयांशंजलम् अमुकगो
त्रस्यप्रपितामहस्यामुकशर्मणः रुद्ररूपस्यअर्घपात्रेणसहसंयोजयिष्ये इतिपठित्वा ॥ ॐ येसमाना:समनस० ॥१॥ येसमाना० ॥२॥
इतिमंत्राभ्यांद्वितीयांशमर्घजलमर्घेक्षिपेत् ॥ तेनरुद्रलोकप्राप्तिः ॥ २ ॥ पुनः प्रेतपवित्रं वृद्धप्रपितामहार्घपात्रेधृत्वा ॥ ॐ अमुक०
प्रेतस्यप्रेतत्वनिवृत्त्यर्थं तदर्घपात्रस्थं सर्वंजलंवृद्धप्रपितामहस्यामुकशर्मणः आदित्यरूपस्यअर्घपात्रेणसहसंयोजयिष्ये इतिपठित्वा ॥

ॐयेसमाना॰ ॐयेसमा॰ इतिमंत्राभ्यांतृतीयांशमर्घजलमर्घेक्षिपेत्॥तेनआदित्यलोकप्राप्तिः॥३॥इतिपात्रमेलनम्॥स्त्रीसपिंडीकरणेतुएवं प्रयोगः ॥ अमुकगोत्रायाः अमुकप्रेतायाः उत्तमलोकप्राप्त्यर्थं तदर्घपात्रस्थंप्रथमांशजलम् अमुकगोत्रायाः पितामह्याः गंगारूपायाः अर्घपात्रेणसहसंयोजयिष्ये इतिपठित्वा ॥ येसमानाः॰ इतिमंत्रद्वयातेप्रथमांशमर्घजलमर्घेक्षिपेत् ॥ तेनवसुलोकप्राप्तिः ॥ १ ॥ अमुक॰ प्रेतायाः उत्तमलोकप्राप्त्यर्थंतदर्घपात्रस्थंद्वितीयांशजलम् अमुकगोत्रायाः प्रपितामह्याः यमुनारूपायाः अर्घपात्रेणसहसंयोजयिष्ये इति पठित्वा ॥ येसमाना॰ इतिमंत्रद्वयान्ते द्वितीयांशमर्घजलमर्घेक्षिपेत् ॥ तेनरुद्रलोकप्राप्तिः ॥ २ ॥ अमुक॰ प्रेतायाःउत्तमलोकप्राप्त्यर्थं तदर्घपात्रस्थंसर्वंजलममुकगोत्राया वृद्धप्रपितामह्याः सरस्वतीरूपाया अर्घपात्रेणसह संयोजयिष्ये इति पठित्वा ॥ येसमाना॰ इतिमंत्र द्वयान्ते तृतीयांशमर्घजलमर्घेक्षिपेत् ॥ तेन आदित्यलोकप्राप्तिः ॥३॥ इतिस्त्रीसपिंडनार्घपात्रमेलनविधिः ॥ ततः अनेन अर्घसंयोजनेन प्रेतस्यसद्गत्युत्तमलोकप्राप्तिः इति पठित्वा प्रेतपवित्रंप्रेतार्घपात्रेकृत्वाप्रेतसमीपेऽउत्तानंन्युब्जंवापात्रंस्थापयेत्॥ततःपितामहादीनामर्घ्यदानम्॥तत्रादौ पितामहार्घपात्रंवामहस्तेकृत्वा दक्षिणाग्रं पवित्रंपात्रेधृत्वाॐयादिव्याऽआपःपयसासंबभूवुर्याऽआन्तरिक्षाऽउतपार्थिवीर्याः हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभवंतुइत्यभिमंत्र्याद्विगुणभुग्नकुशत्रयादीन्यादायॐअमुकगोत्रस्यास्मत्पितामहामुकशर्मन् एषते हस्तार्घः स्वधा इति पवित्रोपर्य्यर्घ्यजलंदद्यात्॥अर्घपात्रंपवित्रजलसहितंचपुरतःस्थापयेत्॥एवमेवप्रपितामहायवृद्धप्र

---

१ श्राद्धविवेकपितृभक्त्यादिषु अर्घ्यमेलनात्प्राक्पितामहाद्यर्घदानमुक्तं तन्मैथिलसांप्रदायिकं ज्ञेयम् ।

पितामहायचदद्यात् ॥ अवशिष्टजलयुतंपात्रद्वयमग्रेस्थापयेत् । ततोवृद्धप्रपितामहप्रपितामहयोः पात्रस्थजलादीनि पितामहपात्रे
कृत्वा (सव्येन) ॐआपः शिवाः शिवतमाः शांताः शांततमास्ते कृण्वन्तुभेषजमितिमंत्रेणशिरस्यभिषेकंकृत्वा (अपसव्येन) ॐपितृ
भ्यः स्थानमसीति प्रथमंपितामहपात्रम् आसनवामप्रदेशभूमावधोमुखं संस्थाप्यतदुपरिप्रपितामहपात्रं वृद्धप्रपितामहपात्रंचदद्यात् ॥
एतानिस्थापितपात्राणि दक्षिणादानपर्यंतंनोद्धरेन्नचालयेत् ॥ ततोगंधादिदानम् ॥ तत्रादौ गंधपुष्पधूपदीपतांबूलवासांसिप्रेतायने
धृत्वा कुशत्रयतिलजलान्यादाय अमुकगोत्रामुकप्रेत सपिंडीकरणश्राद्धे एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेमया
दीयंतेतवोपतिष्ठंतामिति प्रेताय गंधादीन्युत्सृजेत् ॥ १ ॥ पुनः पितामहाद्यासनेषुक्रमेणगंधादिकं धृत्वा ॥ द्विगुणभुग्नकुशत्रयतिलज
लान्यादाय ॥ ॐअमुकगोत्रास्मत्पितामहामुकशर्मन् एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितुभ्यंस्वधा इतिपितामहाय गं
धादीन्युत्सृजेत् ॥ एवंप्रपितामहायवृद्धप्रपितामहायचगंधादीन्युत्सृजेत् ॥ ततःपितॄणामर्चनंसंपूर्णमस्त्वितिब्रूयात् ॥ एवंगंधार्च
नंविधाय सव्यापसव्याभ्यांभोजनपात्रस्थापनदेशंसंमार्ज्य ॥ गौरमृत्तिकया जलेनवा ब्राह्मणादिषुचतुरस्रत्रिकोणवर्तुलमंडलानिकृत्वा
भोजनपात्राणिदद्यात् ॥ अथाग्नौकरणम् ॥ तत्रादौव्यंजनक्षारवर्जितंघृताक्तमुष्णंपितामहादिश्राद्धीयान्नाग्रभागं कांस्यपात्रेसमुद्धृत्य
अपसव्यंकृत्वा वामजानु निपात्य दक्षिणामुखः पत्रपुटकादिस्थजले ॐ अग्नयेकव्यवाहनायस्वाहा इदमग्नयेकव्यवाहनायनमम ॥ ॐ
सोमायपितृमतेस्वाहा इदंसोमायपितृमतेनमम इत्याहुतिद्वयंदक्षिणकरेणजुहुयात् ॥ ततोहुतशेषमन्नंपितामहादिपात्रत्रये किंचित्किंचि
द्दद्यात् ॥ नप्रेतपात्रेदानम् नचविश्वेदेवपात्रेपि॥(नहिस्मृताः शेषभाजोविश्वेदेवाः पुराणगैरितिवचनात्) ततःसव्येन देवपात्रे अपसव्येन

प्रेतपाकात्प्रेतपात्रे(पितृपाकात्)पितामहादिपात्रेषु चतुष्णमन्नं सघृतंव्यंजनजलसहितंप्रत्येकंपुरुषतृप्तिजनकं यथावत्परिविष्य मधुना मिश्रा
र्य्य ॐ मधुव्वाताऽऋतायते मधुंक्षरन्ति सिंधवः॥ माध्वीर्न्नः सन्त्वोषधीः॥ १॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः॥ मधुद्यौरस्तुनः पिता॥
॥२॥ मधुमान्नोव्वनस्पतिर्मधुमाँऽअस्तु सूर्य्यः माध्वीर्गावो भवंतुनः ॥३॥ ॐ मधु मधु मध्विति अभिमंत्रयेत् । ततः(सव्येन)उत्तानपाणिभ्यां
देवपात्रमालभ्य ॐ पृथिवीते पात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा इतिजप्त्वा ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम्॥
समूढमस्यपाꣳसुरेस्वाहा ॥ इत्येतां वैष्णवीमृचमुच्चार्य्याधोमुखंस्वांगुष्ठमनखम् ॐ विष्णोहव्यꣳरक्ष इतियजुषान्नेनिवेश्य ॥ इदमन्नम्
इमाआपः इदमाज्यम् एतत्सर्वंहविरित्युक्त्वा ॐ अपहताऽअसुरारक्षाꣳसिवेदिषदः इतियवान् अन्नपात्रपरितोविकीर्य्य वामेनकरेणपात्रस्पृश
न्दक्षिणकरेणकुशत्रययवजलान्यादाय ॐ अद्यास्मत्पितामहादित्रयश्राद्धसंबंधिनः कामकालसंज्ञका विश्वेदेवाइदमन्नंसोपस्करंपरिविष्टंहव्यम्
अमृतरूपंवः स्वाहानमः ॥ इत्युदकंदेवतीर्थेनासदक्षिणभागेनिक्षिपेत् ॥ ततोऽपसव्यंकृत्वा प्रेतपात्रवर्जं पितामहादिपात्रत्रयालंभः॥ प्रेत
पात्रस्यतुपरितः ॐ अपहताऽअसुरारक्षाꣳसिव्वेदिषद इतितिलान् विकीर्य ॥ अमुकगोत्रामुकप्रेतसपिंडीकरणश्राद्धे इदमन्नंघृताद्युप
स्करसहितं तेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत्॥ ततः पितामहपात्रंन्युब्जाभ्यांन्यस्ताभ्यांपाणिभ्यांस्पृष्ट्वा॥ ॐ पृथिवीतेपात्रंद्यौरपिधानं
ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वधा इतिपठित्वा ॥ ॐ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम्॥ समूढस्यपाꣳसुरे ॥ इत्येतामृचंचज

स्वा:ऽधोमुखंस्वदक्षिणांगुष्ठमनखम् ॐ विष्णोकव्यर्ठरक्ष इत्यन्नेनिवेश्य॥इदमन्नम् इमाआपः इदमाज्यम् एतत्सर्वंहविरित्युक्त्वा ॐ अपंह
ताऽअसुंरारक्षांऽसिवेदिषदः ॥ इतितिलान्पात्रपरितोऽप्रदक्षिणेनविकीर्य वामेनकरेणपात्रंस्पृशन् ॐ अमुकगोत्र पितामहामुकशर्मन्
वसुरूप इदमन्नं सोपकरणं कव्यममृतरूपंतुभ्यंस्वधा इत्युदकं पितृतीर्थेन आसनवामभागेक्षिपेत् ॥ एवंप्रपितामहाय वृद्धप्रपितामहा
य चान्नमुत्सृजेत् ॥ ततः ॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य (सव्येन) व्याहृति
त्रयपूर्वांसप्रणवां गायत्रीं त्रिः सकृद्वाजपेत् ॥ तथा–ॐमधु०वाताऽऋतायतेमधुंक्षरन्तिसिन्धवः॥माध्वीर्न्नः सन्त्वोषधीः ॥१॥ मधुनक्त
मुतोषसोमधुंमत्पार्थिवर्ठ रजः ॥ मधुद्यौरस्तुनः पिता ॥ २ ॥ मधुंमान्नोव्वनस्पतिर्मधुंम्मा२ऽअस्तुसूर्य्यः ॥ माध्वीगावोभवन्तु
नः ॥३॥ इतित्र्यृचम् ॥ ॐमधु मधुमध्वितिचजपेत् ॥ ततःॐकृणुष्वपाजः प्रसितिन्नपृत्थ्वींयाहिराजेवामंवाँऽइभेन ॥ तृष्वीमनुप्प्रसिं
तिन्द्रूणानोऽस्तासिव्विध्यरक्षसस्तपिष्ठैः॥१॥ तवंभ्रमासऽआशुयापंतन्त्यनुंस्पृशधृषताशोशुंचानः ॥ तपूंऽष्यग्नेजुह्वापतङ्गानसंन्दितो
व्विसृंजव्विष्वंगुल्काः ॥ २ ॥ प्रतिस्पशोव्विसृंजतूर्णितमोभवांपायुर्व्विशोऽअस्याऽअदंब्धः ॥ योनोंदूरेऽअघशर्ठ सोयोऽअन्त्यग्ने
माकिंष्टेव्यथिरादंधर्षीत् ॥ ३ ॥ उदंतिष्ठप्रत्यातंनुष्ष्वन्यमित्रां२ऽओषतात्तिग्महेते ॥ योनोऽअरातिर्ठ समिधानचक्रेनीचातधंक्ष्यत
सन्नशुष्कंम् ॥ ४ ॥ ऊर्द्ध्वोभंवप्प्रातिंविध्याध्यस्मादाविष्कृंणुष्वदैव्यांन्न्यग्ने ॥ अवस्थिरातंनुहियातुजूनांज्जामिमजांमिम्प्रमृंणीहिश

त्रून् ॥ अग्नेष्ट्वातेजंसासादयानि ॥८॥ इतिरक्षोघ्नीः पंचऋचः पठित्वा भूमिंतिलैरास्तीर्य ॥ ॐउदीरतामवरऽउत्परासऽउन्मध्यमाः
पितरःसोम्यासः ॥ असुंयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ १ ॥ इत्यादि १२ पितृमंत्रान् ॐसहस्रशीर्षापुरुषः सह
स्राक्षःसहस्रपात् ॥ सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्-इत्यादि १६ पुरुषसूक्तम् ॥ ॐआशुः शिशानोवृषभोनभीमोघनाघनः
क्षोभणश्चर्षणीनाम् ॥ संक्रन्दनोनिमिषऽएकवीरः शतः सेनाऽअजयत्साकमिन्द्रः ॥ इत्यादि १७ अप्रतिरथंचपठेत् ॥ ततः सप्तव्याधाद
शार्णेषु मृगाः कालञ्जरेगिरौ ॥ चक्रवाकाःशरद्वीपे हंसाःसरसिमानसे ॥ तेऽभिजाताःकुरुक्षेत्रे ब्राह्मणावेदपारगाः ॥ प्रस्थितादूरमध्वानं
यूयंतेभ्योऽवसीदत ॥ इतिचपठित्वा यथारुचिस्तवादिकंपठेत् ॥ ततः(अपसव्येन)पितामहपात्रसन्निधौभूमिंप्रोक्ष्यतत्रदक्षिणाग्रंकुशत्रयमा
स्तीर्य सर्वप्रकारमन्नंसव्यंजनमुद्धृत्यसतिलमेकीकृत्य ॥ ॐ अग्निदग्धाश्चयेजीवा येप्यदग्धाः कुलेमम ॥ भूमौ दत्तेनतृप्यन्तु तृप्तायान्तुप
रांगतिम् ॥ १ ॥ इतिमंत्रेणकुशोपरितदन्नंविकिरेत् ॥ ततः (सव्यंकृत्वा) आचम्य हरिंस्मृत्वा (अपसव्येन) ॐमधुवाताऽऋतायते इतित्र्यृचं
मधुमधुमध्वितिचजपेत् ॥ ततःउच्छिष्टसन्निधौहस्तांतरप्रदेशेचतुरस्रंदक्षिणप्लुवंरमणीयंहस्तमात्रंचतुरङ्गुलोच्छ्रितंप्रेतपिंडपातनार्थंस्थानंनिर्मा
यातत्पूर्वतःअपरंपितामहादित्रयपिंडदानार्थंतादृशमेवकुर्यात् ।ततःपितामहादिपिंडस्थानमध्येदर्भपिंजुलीमूलेनॐअपहताऽअसुरारक्षांसि
वेदिषदः ॥ इतिमंत्रेणसव्योपगृहीतदक्षिणहस्तेनदक्षिणाग्रांरेखांसकृदुल्लिख्यदर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्य ॐयेरूपाणिप्रतिमुञ्चमा
नाऽअसुराः सन्तः स्वधयाचरंति ।परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ।इतिमंत्रेण उल्मुकंरेखोपरिभ्रामयित्वादक्षिणतोनिद

ध्यात् ॥ तत उभयत्र उपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयमास्तीर्य देवताभ्यइतित्रिर्जपेत् । ततःपुटकचतुष्टये जलतिलगंधपुष्पाणिकृत्वा एकंप्रेतपुटकंगृहीत्वा अमुकगोत्रामुकप्रेतसपिंडीकरणश्राद्धेपिंडस्थानेअत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रथमवेदिकायांकुशोपरि अवनेजनंदद्यात् । ततोऽपरंपुटकंगृहीत्वा ॐअमुकगोत्रपितामहामुकशर्मन्नत्रावनेनिक्ष्वतेस्वधा । इतिकुशमूलेपितामहायपितृतीर्थेनावनेजनंदद्यात् । एवमेवप्रपितामहायकुशमध्ये वृद्धप्रपितामहायकुशाग्रेऽवनेजनंदद्यात् । ततः सर्वस्माच्छ्राद्धशेषान्नादुष्णंकिंचिदन्नमुद्धृत्य हुतशेषान्नंमध्वाज्यतिलसर्वव्यञ्जनयुतंपात्रेकृत्वा बिल्वोपमांश्चतुरः पिंडान्निर्माय मधुघृताभ्यामभिघार्य्य प्रथममतिस्थूलंप्रेतपिंडं कुशत्रयादीनिचादाय । ॐअमुकगोत्रामुकप्रेत सपिंडीकरणश्राद्ध एतत्तेऽन्नपिंडंमयादीयतेतवोपतिष्ठताम् ॥ इतिप्रथमवेदिकायां कुशोपरिपिंडं दद्यात् ॥ ततोद्वितीयपिंडंद्विगुणभुग्नकुशादीनिचादाय ॐ अमुकगोत्र पितामहामुकशर्मन्वसुरूप एत्तत्तेऽन्नपिंडंतुभ्यं स्वधा इति द्वितीयवेदिकायांप्रथमावनेजनस्थानेसव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनपितामहायदद्यात ॥ एवंप्रपितामहाय वृद्धप्रपितामहायचतत्तदवनेजनस्थानेदद्यात् ॥ ततः पितामहादिपिंडास्तरणकुशमूले ॐ लेपभागभुजः पितरस्तृप्यंतु इतिपठित्वा दक्षिणहस्तंप्रोञ्छ्य जलेनहस्तौप्रक्षालयेत् ॥ ततः (सव्येन) त्रिराचम्यहरिंस्मरेत् ॥ ततः (अपसव्यं कृत्वा) पूर्वदत्तप्रेतावनेजनपात्रंगृहीत्वा ॥ अमुकगोत्रामुकप्रेतसपिंडकीरणश्राद्धे प्रेत पिंडे प्रत्यवनेनिक्ष्वतेयथादीयतेतवोपतिष्ठताम् इतिप्रेतपिंडोपरिप्रत्यवनेजनंदद्यात् ॥ ततः प्रेतपिंडं सूत्राच्छादनगंधपुष्पधूपदीपपूगीफलादिभिः संपूज्य अनेनपिंडदानेन प्रेतस्य सद्गतिः उत्तमलोकावाप्तिः इतिपठेत् ॥ अथपिंडमेलनप्रकारः ॥ तत्रतावत्प्रेतपिंडस्थसूत्रादिकमपनीय हस्तद्वयेनसुवर्णरजतशलाकां

तदभावेदर्भमयींरज्जुंमधुघृताक्तामादायतयाप्रेतपिंडंसमं त्रेधाविभजेत् । ततोदेशकालौस्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्व निवृत्तिपूर्वकपितृसमत्वप्राप्त्यर्थं वस्वादिलोकप्राप्त्यर्थंच अमुकगोत्राणां तत्पितृपितामहप्रपितामहानांपिंडैः सह अमुकप्रेतस्यपिंडसंयोजनं करिष्ये इति संकल्प्य॥प्रेतपिंडस्यप्रथमभागमादाय वामहस्तेकृत्वादक्षिणस्तेपितामहपिंडंधृत्वा अमुकगोत्रस्यामुकप्रेतप्रथमं पिंडशकलम् अमुकपितामहस्यामुकशर्मणोवसुरूपस्यपिंडेनसहसंयोजयिष्येइत्युक्त्वाॐयेसमानाःसमनसःपितरोयमराज्ये॥तेषाँल्लोकः स्वधानमोयज्ञोदेवेषुकल्पताम् ॥१॥ येसमानाःसमनसोजीवाजीवेषुमामकाः॥तेषाᳪंश्रीर्म्मयिकल्पतामस्मिँल्लोकेशतᳪंसमाः॥२॥इति मंत्रद्वयांतेदक्षिणहस्तस्थंपितामहपिंडं वामहस्तस्थप्रेतपिंडशकलेपितृतीर्थेनक्षिप्त्वामधुघृताक्तं कृतावर्त्तुलंकुर्य्यात् । अनेनप्रेतस्यप्रथमपिंडशकलस्य प्रेतपितृसंयोजनेनप्रेतस्यप्रेतत्वनिवृत्तिरस्तु वसुलोकावाप्तिरस्तु इति पठेत् ॥ १ ॥ ततोद्वितीयंप्रेतपिंडशकलंप्रपितामहपिंडं चादाय।अमुक प्रेतस्यद्वितीयंपिंडशकलम् अमुक॰प्रपितामहस्यामुकशर्मणः रुद्ररूपस्यपिंडेनसहसंयोजयिष्ये इत्युक्त्वाॐयेसमाना॰ इतिमंत्रद्वयेनपूर्ववत्प्रपितामहपिंडेनियोजयित्वा अनेन प्रेतद्वितीयपिंडशकलस्यप्रेतपितामहसंयोजनेन प्रेतस्य प्रेतत्वनिवृत्तिरस्तु रुद्रलोकावाप्तिरस्त्वितिपठेत् ॥ २ ॥ ततः तृतीयंप्रेतशकलंवृद्धप्रपितामहपिंडंचादाय॥अमुक॰ प्रेतस्यतृतीयंपिंडशकलम् अमुक॰ वृद्धप्रपितामहस्यामुकशर्मणः आदित्यरूपस्यपिंडेनसहसंयोजयिष्ये इत्युक्त्वा ॥ ॐ येसमाना॰ इतिमंत्रद्वयेनवृद्धप्रपितामहपिंडेनियोजयित्वा अनेनप्रेतस्यतृतीयपिंडशकलस्यप्रेतप्रपितामहसंयोजनेनप्रेतस्यप्रेतत्वनिवृत्तिरस्तु आदित्यलोकावाप्तिरस्तु–इति पठेत्॥३॥(अथस्त्रीस

पिंडनेविशेषः) अमुकगोत्रायाः अमुकप्रेतायाःप्रेतत्वनिवृत्तिपूर्वकपितृसमत्वप्राप्त्यर्थंवस्वादिलोकप्राप्त्यर्थंच अमुकगोत्राणामस्मत्पिताम हीप्रपितामहीवृद्धप्रपितामहीनांपिंडैःसहामुकप्रेतायाः पिंडसंयोजनंकरिष्ये इतिसंकल्प्य ॥ सुवर्णशलाकादिनाप्रेतपिंडंत्रेधाविभजेत् ॥ ततः प्रथमभागंगृहीत्वा॥अमुक० प्रेतायाः पिंडप्रथमशकलम् अमुकगोत्रायाःपितामह्याःपिंडेनसहसंयोजयामीत्युक्त्वा॥ॐयेसंमाना० इति मंत्रद्वयांते प्रथमशकलंप्रथमपिंडेनसह संयोजयेत्॥तेनवसुलोकप्राप्तिः॥१॥ततोद्वितीयभागंगृहीत्वा ॥ अमुक० प्रेतायाःपिंडद्विती यशकलम् अमुकगोत्रायाः प्रपितामह्याः पिंडेनसहसंयोजयामीति पठित्वा॥येसंमाना० इतिमंत्रद्वयान्ते द्वितीयशकलं द्वितीयपिंडेनसह संयोजयेत् ॥ तेनरुद्रलोकप्राप्तिः ॥ २ ॥ ततस्तृतीयभागमादाय अमुक० प्रेतायाः पिंडतृतीयशकलम् अमुकगोत्रायावृद्धप्रपितामह्याः पिंडेनसहसंयोजयामि इत्युक्त्वा॥ॐयेसमाना० इतिमंत्रद्वयान्ते तृतीयशकलं तृतीयपिंडेनसहसंयोजयेत् ॥ तेन आदित्यलोकप्राप्तिः इति वदेत् ॥ इति स्त्रीसपिंडनेविशेषः ॥ ततः पिंडानामभिमृश्येदंपठेत्॥एषवोनुगतः प्रेतः पितरस्तंदधामिवः॥शिवमस्त्विति शेषाणां जायतां चिरजीविनाम् ॥१॥ समानीवआकूतिःसमानाहृदयानिवः ॥ समानमस्तुवोमनोयथावःसुसहासति ॥२॥गच्छस्वपितृलोकेत्वं प्रेतत्वंचपरित्यज ॥ समानैः पितृभिः सार्द्धं विहरस्व यथासुखम् ॥३॥ (अत ऊर्ध्वंभ्रांत्यापिप्रेतशब्दोनकार्य्यः) अत्रावसरेनिश्वासधे नुदानम्।तद्यथा(सव्यम्)अद्येत्यादिदेशकालौसंकीर्त्य अमुकगोत्रस्यास्मत्पितुःपित्रादित्रयेणसहसंयोजनेन चतुर्थस्य निवृत्तिर्जातातच्छो कापनयक्षमार्थं ब्राह्मणाय निश्वासधेनुदाननिष्क्रयरूपंरजतद्रव्यंदातुमहमुत्सृजेइति संकल्प्यदद्यात्॥ततः (अपसव्येन)॥ॐअत्र पितरो

मादयध्वंयथाभागमावृंषायध्वम्-इति पठित्वावामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाः मनाक्श्वासंनियम्यतेनैवपथापरावृत्य।ॐअमीमदन्त पितरोयथाभागमावृंषायिषत-इतिजपेत् ॥ ततः पूर्वंदत्तावनेजनजलेन ॥ ॐअमुकगोत्रपितामहामुकशर्मन् अत्रप्रत्यवनेनिक्ष्वते स्वधा इतिप्रथमपिंडोपरिप्रत्यवनेजनंदद्यात्।एवमेव प्रपितामहवृद्धप्रपितामहपिंडोपरिप्रत्यवनेजनंदद्यात्। ततोनीवींविस्रंस्यसव्येनआचम्य अपसव्यं कृत्वा ॥ ॐनमोवः पितरोरसायनमोवः पितरःशोषायनमोवः पितरोजीवायनमोवः पितरःस्वधायै ॥ नमोवः पितरोघोराय नमोवः पितरोमन्यवे नमोवः पितरः पितरो नमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म ॥ इतिकृताञ्जलिःपठेत् ततः ॐएतद्वः पितरो वासः-इतिपठित्वा प्रत्येकं पितामहादिपिंडोपरिसूत्रत्रयंदद्यात् ॥ ततोद्विगुणभुग्नकुशत्रयादीन्यादाय ॥ ॐअमुकगोत्रपितामहामुकशर्मन्नेतत्तेवासः स्वधा-इतिसूत्रमुत्सृजेत् ॥ एवंप्रपितामहायवृद्धप्रपितामहायचोत्सृजेत ततः प्रत्येकंपितॄनुद्दिश्यतदीयपिंडेषु तूष्णी गंधपुष्पतुलसीधूपदीपतांबूलपूगीफलदक्षिणादीनिदद्यात्।पिंडशेषान्नंपिंडसमीपेविकिरेत्॥ततः(सव्येन देवपात्रे (अपसव्येन) पितृपात्रेषु ॐशिवाआपःसंतु इति सकृत्सकृज्जलंदद्यात् ॥ ॐसौमनस्यमस्तु इतिपुष्पाणि ॥ अक्षतंचारिष्टंचास्तु इतियवांश्चदद्यात् ॥ ततः ॐअद्यामुकगोत्रस्यपितुरमुकशर्मणः सपिंडीकरणश्राद्धेदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामितिपित्रेऽक्षय्योदकंदद्यात् ॥ ततः ॐ अमुकगोत्रस्यपितामहस्यामुकशर्मणःदत्तैतदन्नपानादिकमक्षय्यमस्तु इतिपितामहायदत्त्वाएवमेवप्रपितामहायवृद्धप्रपितामहायचाक्षय्योदकंदद्यात्॥ततः(सव्यंकृत्वा)प्राङ्मुखस्तन्मनाः सुमनाः कृताञ्जलिर्दक्षिणांदिशंपश्यन्ॐअघोराः पितरः सन्तु--इतिपठित्वा समाचारा

तत्पूर्वाग्रां जलधारांदद्यात्॥ततःॐगोत्रंनोवर्द्धतांदातारोनोभिवर्द्धतांवेदाःसन्ततिरेवच॥श्रद्धा चनोमाव्यगमद्बहुदेयं चनोऽस्तु ॥ अन्नंचनोब हुभवेदतिथींश्चलभेमहि।याचितारश्चनःसंतु माचयाचिष्मकंचन॥एताःसत्याआशिषःसंतु-इतियाचेत् ततोऽपसव्यादिकृत्वापिंडोपरि स पवित्रान्कुशानास्तीर्य्य ॥ स्वधांवाचयिष्ये इतिपठित्वा पितामहेभ्यःप्रपितामहेभ्योवृद्धप्रपितामहेभ्यश्च स्वधोच्यताम् इतिब्रूयात् अस्तु स्वधा इत्युक्तेॐऊर्जंवहंतीरमृतंघृतंपयःकीलालं परिस्रुतम् ॥ स्वधास्थतर्प्पयतमेपितॄन् इति कुशोपरिदक्षिणाग्रांजलधारांदद्यात् ॥ ततोऽर्घपात्राण्युत्तानीकृत्यसव्यादिनादेवदक्षिणांदद्यात् ॥ तत्र कुशत्रययवजलहिरण्यद्रव्यमादाय देशकालौस्मृत्वाॐअद्यास्मत्पिताम हादित्रयाणांश्राद्धसंबंधिकामकालसंज्ञकानांविश्वेषांदेवानांकृतैतच्छ्राद्धप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायद क्षिणात्वेनदातुमहमुत्सृजे इतिसंकल्प्य ब्राह्मणायदद्यात् ॥ ततोऽपसव्यादिकृत्वारजतद्रव्यंमोटकादीनिचादाय ॐ अमुकगोत्रस्य पितुरमुकशर्मणः कृतैतत्सपिंडीकरणश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे-इति दद्यात् ॥ पुनः रजतद्रव्यं कुशादीनिचादाय ॐअमुकगोत्रस्यपितामहस्यामुकशर्मणः कृतैतच्छ्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रा यामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे-इतिदद्यात्॥ एवमेव प्रपितामहवृद्धप्रपितामहयोः श्राद्धदक्षिणांदद्यात्॥दैवेरजत निषेधः स्वर्णासंभवेताम्रफलमूलादिकंदद्यात् ॥ ततोनम्रीभूयपिंडानुत्थाप्यस्थाल्यांनिधाय आघ्राय पिंडाधारसकृदाच्छिन्नान्कुशान् उल्मुकं चवह्नौक्षिपेत्॥ततः(सव्येन)ॐविश्वेदवाःप्रीयंतामितिप्रार्थ्य(अपसव्येन)ॐवाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥अस्य

मध्वः पिबतमादयध्वंतृप्ता यातपथिभिर्देवयानैः -इतिमंत्रेण पितॄन्विसर्जयेत् ॥ ततः (सव्येन) ॐदेवताभ्यःपितृभ्यश्च महायोगि भ्यएवच॥नमःस्वाहायैस्वधायै नित्यमेवनमोनमः इतित्रिर्जपेत्॥अथद्वादशकुंभसंकल्पः।तत्रादौ आचम्य(अपसव्येन)कुशत्रयादीन्यादाय देशकालौस्मृत्वा ॐअद्यामुकगोत्रस्य पितुरमुकशर्मणः परलोके क्षुत्पिपासानिवृत्त्यर्थम् इमेद्वादशकुंभाः सान्नोदकाःनानानामगोत्रेभ्यो ब्राह्मणेभ्योदातुमहमुत्सृजे-इतिसंकल्प्य॥सुशीतलजलोपेताः सर्वोपस्करसंयुताः ॥ एतेघटामयादत्ताः स्वर्गद्वार्युपतिष्ठताम्॥इति पठित्वा यथाचारंदद्यात् ॥ विप्रासंभवेघटोदकमश्वत्थादिषुप्रक्षिप्यघटोपकरणादिकंकस्मैचिद्दद्यात् ॥ ततः वर्धनीकुंभंपक्वान्नपूरितंसवस्त्रद क्षिणाकंनिधायसव्येनदेशकालौसंकीर्त्य ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः स्वर्गलोककाम इदंपक्वान्नपूरितंकुंभमेकंवर्द्धनीसंज्ञकं विष्णुप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणायदातुमहमुत्सृजे इतिसंकल्प्य कस्मैचिद्ब्राह्मणायदद्यात् ॥ एवं कुंभमेकंयमचित्रगुप्त प्रीत्यर्थमपिदद्यात् ॥ ततोऽपसव्येन श्राद्धदीपान्पाणिभ्यांनिर्वाप्य सव्येन हस्तौपादौप्रक्षाल्य आचमनंकुर्यात् ॥ ततः ॐ प्रमादात्कुर्वतांकर्म प्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोः संपूर्णस्यादितिश्रुतिरितिपठित्वा कर्म्मपूर्त्तिकामोविष्णुंस्मरेत् ॥ ततः पिंडान्धेन्वादिभ्यो दत्त्वा वैश्वदेवबलिकर्मणीपार्वणवदाचरेत् ॥ उच्छिष्टमार्जनंकुर्यात् ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौसंकी र्त्य ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः स्वर्गलोकप्राप्त्यर्थं सपिंडीकरणश्राद्धसांगतासिद्ध्यर्थंच यथाशक्ति अमुकसंख्याकान्ब्राह्मणां स्तृप्तिपर्य्यन्तेनान्नेनभोजयिष्येइतिसंकल्प्यदशप्रभृतिश्रोत्रियात्अनिषिद्धब्राह्मणान्वायथाशक्तियथाचारंभोजेत॥ततोज्ञातिबांधवातिथि

१ अत्राधुनिकाः शिष्टा एकादशाहनिमित्तकधय्याधेन्वादिदानं कुर्वंति तद्दिने पात्राभावात ।

युक्तः स्वयमपिभोजनंकुर्यात्॥अस्मिन्दिने आगतान्सर्वानतिथिप्रभृतीन् अन्नेनतोषयेत्॥इतिगौडीयश्राद्धप्रकाशे सपिंडनश्राद्धपद्धतिः समाप्ता॥अथमैथिलोक्तसपिंडनप्रयोग ॥पूर्वं दिनेनियमंकृत्वा श्राद्धदिनेप्रातरादिकृत्यंसमाप्य मध्याह्नेस्नातान्ब्राह्मणानाहूय स्वागतंपृष्ट्वा उपविश्यामंत्र्यनियमाञ्छ्रावयित्वा ब्राह्मणपादौप्रक्षाल्यपादार्घंदद्यात् ॥ तत आचमनीयंदत्त्वा स्वयमेवाचम्यावृतस्थानंगत्वाऽन्नाभिप्रायेणसिद्धमितिपाचिकांपृष्ट्वा ब्राह्मणाननुपवेश्य तेषांपादयोर्दक्षिणाग्रंकुशपत्रत्रयंदत्त्वाप्रत्यासनसमर्पितिलतैलेनदीपान्दत्त्वारक्षोघ्नान्सन्निधाप्यश्राद्धहंतॄनपसार्य्यश्राद्धदेयद्रव्याणिसिंचेत्॥अथप्राङ्मुख उपविष्टः कुशजलतिलान्यादायॐ अद्यपितुःसपिंडीकरणश्राद्धमहंकरिष्ये--इतिवाक्यंकृत्वा कुरुष्व इत्यनुज्ञातो गायत्रीं देवताभ्य इतिचत्रिर्जपित्वा आसनाद्यन्नसङ्कल्पपर्यन्तंदैवक्रियाकांडंनिर्वर्त्य आसनादिदत्त्वापितॄनावाह्यतिलान्विकीर्य्यंआयंतुनः-इतिजप्त्वाऽर्घपात्रचतुष्टयं सपवित्रंजलतिलगंधपुष्पैःप्रपूर्य्यार्घंदत्त्वा प्रेतपात्रस्थजलेनपितामहादिषुपात्रेषु पित्रवशिष्टजलानिसिंचेत्॥येसंमाना॰ समनसः॰ पितरोयमराज्ये ॥ तेषांल्लोकः स्वधानमोयज्ञोदेवेषु कल्पताम् ॥१॥ ये संमानाःसमनसो जीवाजीवेषुमामकाः ॥तेषां॰ श्रीर्मयिकल्पतामस्मिँल्लोके शतं॰ समाः ॥२॥ इतिमंत्रद्वयेन ॥ ततः पात्राणिन्युब्जीकृत्यगंधादिदत्त्वा नीवारचूर्णेनमंडलानिकृत्वा आहुतिद्वयंहुत्वा हुतशेषंपितामहादिपात्रत्रयेदत्त्वा।अन्नव्यंजनानिपरिविष्य मधुनाऽभिघार्य मधुव्वाता इतित्र्यृचेनाभिमंत्र्यपात्रमालभ्य पात्रस्थेऽन्नेद्विजाङ्गुष्ठं सयोज्यतिलान्विकीर्यपूर्वमन्नंसंकल्प्यान्नहीनमित्यादिपठित्वाऽ

१ अत्र मैथिलरुद्रधरेण पुटकत्रयधारणादिविशेषः प्रपंचः स्वरुच्या लिखितस्तद्भ्रांतिकरः तथा निर्मूलत्वाच्छिष्टैर्नादरणीयः ।

पोशानंदत्त्वा गयात्र्योदिजप्त्वाऽनुज्ञातोन्नंविकीर्य्याचम्य हरिंस्मृत्वा ब्राह्मणेभ्यः प्रत्येकं जलगंडूषंदत्त्वा पूर्ववद्गायत्रीम् 'मधु
व्वाता॰इति त्र्यृचं मधुमधुमध्वितिजप्त्वाप्रेत विप्रंस्वदितमृइतिपृष्ट्वाइतरान् तृप्तास्थः इतियथार्हंतैरुक्ते शेषमन्नमनुज्ञाप्य पिंडानहंकरिष्ये
इतिपृष्ट्वाकुरुष्वइत्युक्तः एकंप्रेतपिंडार्थमपरं पितामहादिपिंडार्थंस्थानंनिर्माय उभयत्ररेखाकरणंकृत्वा तदुपर्युल्मुकंभ्रामयित्वा तद्दक्षिण
तोऽङ्गारं निधायरेखोपरिछिन्नमूलकुशानास्तीर्यतदुपरिप्रेतायपितामहादिभ्यश्चावनेजनंदत्त्वाऽन्नविशेषेण चतुरःपिंडान्निर्माय प्रेतायवर्त्तु
लंपिंडकृत्वापितामहादिभ्योपिपिंडान्दत्त्वादर्भमूलेकरंप्राग्छच्या चम्यहरिंस्मृत्वाअत्रपितरः॰इत्यादिपठित्वोदङ्मुखीभूयश्वासंमनाङ्नि
यम्यपुनःपरावृत्य'अमीमदंत'इतिजप्त्वापिंडान्प्रत्यवनेज्यनीवींविस्रस्य'नमोवःपितरः'इत्यादिनाऋतुषट्ककरूपतयापितामहादीन्नत्वाऽ
शिषःसंप्रार्थ्यपिंडेषुसूत्रादिदत्त्वाप्रेतपिंडेगंधादिदत्त्वासुवर्णरजतकुशैःप्रेतपिंडंत्रेधाविभज्यपितामहादित्रयेयोजयेत्। येसमानाः'इतिपूर्वो
क्तमंत्रद्वयेन॥ततःपितामहादिपिंडत्रयंप्रेतपिंडभागेनसमंवर्त्तुलंकृत्वागंधादिभिरभ्यर्च्य॥ब्राह्मणानाचमय्यतत्करेषुजलपुष्पाक्षतानिदत्त्वा
पितृगोत्राद्युच्चार्य दत्तमन्नादिकमुपतिष्ठतामितिविप्रकरेऽक्षय्योदकंदत्त्वापितामहादिविप्रकरेतत्तन्नामगोत्राभ्यांदत्तमन्नादिकमक्षय्योदकम
स्त्विति प्रत्येकंदत्त्वा तत आशिषः प्रतिगृह्यपिंडोपरिसपवित्रकुशानास्तीर्यस्वधांवाचयित्वाऊर्जमित्यादिनापिंडान्परिषिच्याघ्रायोत्था
पयेद्दर्भमुल्मुकंचवह्नौनिक्षिप्यार्घपात्राण्युत्तानीकृत्यदक्षिणांदद्यात्॥ततोविश्वेदेवाःप्रीयंतामितिदैवेवाचयित्वाब्राह्मणान्विसृज्य॥आमावा
जस्यइत्यादिनाऽनुव्रज्योदकधारयाप्रदक्षिणीकृत्यगृहंप्रविश्यश्राद्धोत्तरकर्म्मसमापयेत्।इतिमैथिलश्रीदत्तकृतपितृभक्तौसपिंडीकरणप्रयोगः
संक्षिप्तः समाप्तः ॥छ॥ अथसान्नोदकुंभदानम् ॥ तच्चत्रयोदशदिनात्सप्तदशदिनाद्वाऽऽरभ्यप्रत्यहमशक्तेनप्रतिमासंवाकर्त्तव्यम् ॥ तत्रादौ

आचम्यप्राणानायम्य सान्नोदकुंभमुपनीय कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणःक्षुत्तृ
षोपशान्त्यर्थंयावद्वत्सरंतावत्प्रतिमासंसान्नोदकुंभदानंकरिष्ये–इतिसंकल्पंकुर्यात् ॥ ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवामजानु
र्द्विगुणभुग्नकुशत्रयतिलजलान्यादायॐअद्यामुकगोत्रपितरमुकशर्मन् ऊनमासिकसान्नोदकुंभश्राद्धेइदमासनंतुभ्यंस्वधाइति पित्रे आसनं
मोटकरूपंसतिलजलप्रोक्षितंदक्षिणाग्रमुत्सृजेत्॥पुनर्द्विगुणभुग्नकुशादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्ऊनमासिकश्राद्धे इदं
सान्नोदकुंभंतुभ्यंस्वधाइतिवाक्यंकृत्वाब्राह्मणायदद्यात्॥ततःसव्येनॐअद्यकृतैतत्सान्नोदकुंभदानप्रतिष्ठार्थम्इदंरजतंचंद्रदैवतममुकगोत्रा
यामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इतिदक्षिणांदत्वा विष्णुंस्मरेत्॥ एवमेवमासिक०२ त्रैपक्षिक०३ द्वितीयमासिक०४
तृतीय० ५ चतुर्थ० ६ पंचम० ७ ऊनषाण्मासिक० ८ षष्ठ०९ सप्तम० १० अष्टम० ११ नवम० १२ दशम० १३ एकादश० १४
ऊनाब्दिक० १५ सांवत्सरिक० १६ श्राद्धनिमित्तकसान्नोदकुंभदानंकुर्य्यात् ॥ प्रतिमासमशक्तेनवृद्धिप्राप्तौ ऊनषाण्मासिके त्रैपक्षिके
सप्तदशेऽहनिवायथाचारं सर्व्वाण्यपकृष्यकुर्यात् ॥ वृद्ध्युत्तरनिषेधनात् ॥ तत्रप्रयोगः॥देशकालौसंकीर्त्य ॥ ॐअमुकगोत्रस्यपितुरमुक
शर्मणः क्षुत्तृषोपशांत्यर्थम् ऊनमासिकं १ मासिकं २ त्रैपक्षिकं ३ द्वितीयमासिकम् ४ तृतीयं५ चतुर्थं ६ पंचमं ७ ऊनषाण्मासिकं८
षाण्मासिकं ९ सप्तममासिकम्१०अष्टमं ११ नवम १२ दशमम्१३एकादशम्१४ऊनवार्षिकं१५चएतानिपंचदशसान्नोदकुंभश्राद्धानि
स्वस्वकालेकर्त्तव्यानि इदानींममकुलेभविष्यमाणवृद्धिनिमित्तत्वात्सर्वाण्यपकृष्यसांकल्पेनविधिनातंत्रेणसद्यः करिष्ये इतिसंकल्पयेत् ॥
ततोऽपसव्यंकृत्वा द्विगुणभुग्नकुशत्रयादीन्यादाय अमुकगोत्रपितरमुकशर्मन् ऊनमासिकाद्यूनाब्दिकान्तपंचदशसान्नोदकुंभश्राद्ध

निमित्तकम् इदमासनंपंचदशधा विभज्यतुभ्यं स्वधा इत्यासनंदक्षिणाग्रं द्विगुणभुग्नकुशत्रयरूपमुत्सृजेत् ॥ पुनः ॐअमुकगोत्रपितर मुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धनिमित्तका इमे पंचदशसान्नोदकुंभास्तुभ्यंस्वधा- इतिसंकल्प्य ॥ दानप्रति ष्ठादक्षिणासहितपंचदशसान्नोदकुंभान्ब्राह्मणेभ्योदद्यात् ॥ इतिसान्नोदकुंभदानप्रयोगः ॥ अथ ऊनमासिकादिपंचदशश्राद्धम् ॥ तच्च त्रयोदशेहनि चतुर्दशेवादिनेभौमार्कमंदनंदातिथियुग्मैकपादद्विपादत्रिपादचतुर्दशीशुक्रवारकर्तृनक्षत्रभद्राव्यतीपातादिवर्जिते कुर्यात् ॥ तत्रतावदूनमासिकश्राद्धप्रयोगः ॥श्राद्धपूर्वदिने एकभक्तादिनियमंविधाय श्राद्धदिनेप्रातः स्नात्वाश्वेतवस्त्रेपरिधाय संध्यातर्पणादिनित्य कियांचकृत्वा मध्याह्ने पुनःस्नात्वा आचांतोगोमयोपलिप्तश्राद्धदेशमागत्यतिलतैलेनदीपंप्रज्वाल्यस्वासनेप्राङ्मुख उपविशेत्॥ततःकर्म पात्रंजलेनापूर्य गंधपुष्पकुशतिलादिनिक्षिप्य॥पवित्रधारणम् आचमनंप्राणायामंचकृत्वा ॐअपवित्रःपवित्रोवाइतिपठित्वा ॐपुंडरीकक्षः पुनातु इतिकुशत्रयानीतजलेन श्राद्धद्रव्याणिस्वात्मानंचप्रोक्षयेत्॥ततःॐभूम्यैनमः॥ ॐगयायैनमः। ॐगदाधरायनमःइतिनत्वाकुशत्रय तिलजलान्यादाय अद्येत्यादिपठित्वा ॐअमुकगोत्रस्य पितुरमुकशर्मणः ऊनमासिकैकोद्दिष्टश्राद्धमहंकरिष्ये-इतिसंकल्प्य ॥ गायत्रीं जप्त्वादेवताभ्य इतित्रिर्जपेत्।ततः(अपसव्येन)ॐनमोनमस्तेगोविंदपुराणपुरुषोत्तम।इदंश्राद्धंहृषीकेशरक्षतांसर्वतोदिशः॥ १॥अग्निष्वात्ताः पितृ॰इत्यादिपूर्वोक्तमंत्रैःसर्वत्रतिलान्गौरसर्षपांश्चविकीर्यनीवीबंधंकुर्यात्।ततः कूष्मांडसूक्ताभिमंत्रितजलेनकुशैःपाकंप्रोक्ष्यासनादिदद्यात् तत्रादौदक्षिणमुख उपविश्य (अपसव्येन)सजघनंवामंजान्वाच्यद्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॐअमुकगोत्रपितरमुकशर्मन्इद मासनंतुभ्यंस्वधा इतिद्विगुणभुग्नकुशत्रयात्मकमासनंदद्यात् ॥ ततः ॐअपहता इत्यादिनातिलान् विकीर्य ॥ अर्घपात्रोपरिपवित्रंधृत्वा

ॐशन्नोदेवीतिजलम् ॥ ॐतिलोऽसीतितिलान्॥तूष्णीमेवगंधपुष्पेप्रक्षिप्य वामकरेऽर्घपात्रमादाय पवित्रं पलाशपत्रेधृत्वा ॐयादिव्या
आप इत्यभिमंत्र्यॐअमुकगोत्रपितरमुकशर्मन् एषतेहस्तार्घः स्वधा इतिदक्षिणकरेणपितृतीर्थेन पवित्रोपरि अर्घंदत्त्वा ॐपित्रेस्थानम
सीति वामप्रदेशभूमावधोमुखंनिदध्यात् ॥ एवंस्थितंपात्रंसमाप्तिपर्य्यंतंनचालयेत्॥ततोगंधादिधृत्वा द्विगुणभुग्नकुशान्यादाय ॐअमुक
गोत्रपितरमुकशर्मन् एतानिगंधपुष्पधूपदीपतांबूलवासांसितुभ्यंस्वधा इत्युत्सृजेत् ॥ ततोजलादिनामंडलंकृत्वा ॥ परकीयभूमौश्राद्धक
रणेतद्भूस्वामिनेऽन्नबलिंदत्त्वा अथोष्णमिष्टान्नपूर्णपात्रमादायकराभ्यां पितरंध्यायन् पुरुषतृप्तिक्षममन्नंसघृतंपात्रेपरिविष्यात्॥ तत्पार्श्वे
व्यंजनसुशीतलजलपात्राणिस्थापयेत्॥ ततोऽन्नंमधुमयंकृत्वा ॐमधुव्वाता इतित्र्यृचेनाभिमंत्र्य ततोऽन्नपात्रमालभ्य ॐपृथिवीतेपात्रमि
तिजप्त्वाॐइदं विष्णुर्विचंक्रमे॰इत्यादिना स्वाङ्गुष्ठमनखम्ॐविष्णो कव्यर्ठ्ंरक्ष इत्यन्नेनिवेश्य इदमन्नम् इमाआपः इदमाज्यम्इदंहविः
इतिपठित्वाॐ अपहता॰ इत्यादिनाऽन्नपात्रपरितस्तिलान्विकीर्यॐअमुकगोत्रपितरमुकशर्मन्निदमन्नंसोपकरणम् अमृतरूपंकव्यंतुभ्यं
स्वधा इत्युत्सृजेत् ॥ ततः ॐ अन्नहीनमित्यादिपठित्वा गायत्रीम्ॐमधुव्वाता॰इतित्र्यृचं मधुमधुमध्विवतिचजपेत् ॥ ततोरक्षोघ्नीर्ऋचः
पठित्वा भूमिंतिलैरास्तीर्य्य पितरंध्यायन् पितृमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानिचयथाशक्तिपठेत् ॥ ततः उच्छिष्टसन्निधौ आस्तृ
तदक्षिणाग्रकुशोपरिॐ अग्निदग्धाश्चेत्यन्नंभूमौप्रकीर्यसव्येनाचम्य हरिंस्मृत्वा पूर्ववद्गायत्रीं ॐ मधुव्वाता॰ इतित्र्यृचंमधुमधुमध्विवतिच
जपेत्॥ततः(अपसव्येन)उच्छिष्टसन्निधौपिण्डार्थंस्थानंदक्षिणप्रवणंनिर्माय्यतन्मध्येदर्भपिंजुलीमूलेनॐअपहता॰इतिवामान्वारब्धदक्षिणक
रेणप्रादेशमितांरेखांदक्षिणाग्रांसमुल्लिख्य दर्भपिंजुलीमुत्तरस्यांदिशि निक्षिप्य ॐयेरूपाणि इतिमंत्रेणोल्मुकरेखायांभ्रामयित्वादक्षिणतो

निदध्यात् ॥ ततः उपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वा देवताभ्य इतित्रिर्जपेत् ॥ ततः सतिलजलपात्रंगृहीत्वा ॐ अमुकगोत्रपित रमुकशर्मन्नत्रावनेनिक्ष्वतेस्वधा इतिकुशोपरिपितृतीर्थेनावनेजनंदद्यात्॥ततः सर्वस्मादन्नात्किंचिदन्नमुद्धृत्य मध्वाज्यतिलजलसहितंपात्रे कृत्वापिंडंनिर्माय मधुघृताभिघारितंपिंडं कुशादीनिचादाय ॐ अमुकगोत्र पितरमुकशर्मन् ऊनमासिकश्राद्धे एषतेपिंडः स्वधा इति पितृतीर्थेनदद्यात्॥ततोलेपभागभुजस्तृप्यन्तु इतिदर्भमूलेकरंप्रोंछ्य हस्तौप्रक्षाल्य सव्येनाचम्य हरिंस्मरेत् ॥ ततः अपसव्येन ॐअत्रपि तर्मादयस्वयथाभागमावृषायिस्व इतिपठित्वा वामावर्त्तेनोदङ्मुखीभूयप्रीतमनाः श्वासंनियम्यतेनैवपथापरावृत्य ॐअमीमदंतपितर्यथा भागमावृषायिष्ट इतिजप्त्वा पूर्ववत्पिंडोपरिप्रत्यवनेजनदत्त्वा नीवींविस्रंस्य कृतांजलिः ॐनमस्ते पितारसायनमस्तेपितः शोषायनम स्तेपितर्जीवायनमस्तेपितः स्वधायैनमस्तेपितर्घोरायनमस्तेपितर्मन्यवे नमस्तेपितः पितर्नमस्तेगृहान्नः पितर्दत्तसतरते पितर्देष्म इतिपठित्वा ॐएतत्तेपितर्वासः इतिपिंडोपरिसूत्रंधृत्वा ॐअमुकगोत्र पितरमुकशर्मन् एतत्तेवासः स्वधा इतिसूत्रमुत्सृजेत्॥ततस्तूष्णीमे वपितरमुद्दिश्यपिंडेगंधपुष्पधूपदीपतांबूलादिकंदत्त्वा।ॐशिवाः आपः संतु इतिजलम्।सौमनस्यमस्तु इतिपुष्पम्॥अक्षतंचारिष्टमस्तुइत्यक्षतां श्चदद्यात्।ॐअमुकगोत्रस्यपितुरमुकशर्मणऊनमासिकश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठताम् इतितिलयुक्तमक्षय्योदकंदद्यात्।ततः प्राङ्मुख उपवीतीकृतांजलिराशिषोगृह्णीयात्।अघोरःपिताऽस्तु।गोत्रंनोवर्द्धताम् दातारोनोभिवर्द्धताम् वेदाःसंततिरेवच ॥ श्रद्धाचनोमा व्यगमद्बहुदेयंचनोस्तु॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि॥याचितारश्चनःसंतुमाचयाचिष्मकंचन ॥ एताःसत्याआशिषःसंतुइतिपठेत्॥ ततोऽपसव्येनर्पिंडोपरिसपवित्रदर्भानास्तीर्य ॐऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतम्।स्वधास्थतर्पयतमेपितरमितिपिंडोपरिजलधारां

दद्यात् ॥ ततः पिंडमुत्थाप्याघ्राय पिंडाधआस्तृतदर्भेचोल्मुकमग्नौनिक्षिप्यार्घपात्रमुत्तानीकृत्ययथाशक्तिदक्षिणांदद्यात् ॥ तद्यथा–रजत
द्रव्यं कुशादीनिचादाय ॐअद्यामुकगोत्रस्यपितुरमुकशर्मणः कृतैतदूनमासिकश्राद्धप्रतिष्ठार्थमिदंरजतं चंद्रदैवतममुकगोत्रायामुकशर्मणे
ब्राह्मणाय दक्षिणात्वेनदातुमहमुत्सृजे इतिसंकल्प्यदद्यात् ॥ ततः पिंडमुत्थाप्याघ्रायपिंडाधआस्तृतदर्भेचोल्मुकमग्नौनिक्षिपेत् ॥
ततः ॐअभिरम्यतामितिविसृज्य देवताभ्य इतित्रिःपठित्वादीपनिर्वापणंकृत्वा (सव्येन) हस्तौपादौप्रक्षाल्याचम्य ॥ ॐप्रमादादिति
पठित्वा कर्म्मपूर्तिकामोविष्णुंस्मरेत् ॥ ततःपिंडं गाम् अजंवायसान्वाखादयेत् ॥ अग्नौजलेवाक्षिपेत् ॥ ततोवैश्वदेवबलिकर्मणीकृत्वा ब्राह्म
णमेकंभोजयेत् १ एवमेव मासिक २ त्रैपक्षिक ३ द्वितीयमासिक ४ तृतीयमासिक ५ चतुर्थ ६ पंचम ७ ऊनषाण्मासिक ८
षाण्मासिक ९ सप्तमा १० ऽष्टम ११ नवम १२ दशमै १३ कादशो १४ नवार्षिक १५ मासिकानि कुर्यात् ॥ इति ऊनमासिका
दिपृथक्श्राद्धप्रयोगः समाप्तः ॥ प्रतिमासं करणाशक्तौ वृद्धिप्राप्तौ ऊनषाण्मासिके त्रैपक्षिकेवासप्तदशेहनियथाचारं भौमार्कादिवर्जित
एकद्वित्रिन्यूनदिने सर्वाण्यपकृष्य कुर्यात् वृद्ध्युत्तरनिषेधनात् ॥ तत्र प्रयोगः ॥ तत्रादौ पूर्वोक्तोनमासिकश्राद्धवत्सर्वंसपाद्य ॥ देशका
लौसंकीर्त्य ॐ अमुकगोत्रस्यपितुरमुकशर्मणः क्षुत्तृषोपशांत्यर्थम् ऊनमासिकश्राद्धं० १मासिकं० २ त्रैपक्षिकं० ३ द्वितीयमासिकं० ४
तृतीयं० ५ चतुर्थं० ६ पंचमम् ७ ऊनषाण्मासिकं० ८ षाण्मासिकं० ९ सप्तमं० १० अष्टमं० ११ नवमं १२ दशमं० १३ एकादश
मासिकम् १४ ऊनवार्षिकं १५ च एतानि पंचदश ऊनमासिकाद्यूनवार्षिकांतानिश्राद्धानि स्वस्वकालेकर्त्तव्यानि ॥ इदानीं ममकुले
भविष्यमाणवृद्धिनिमित्तत्वात्सर्वाण्यपकृष्यैकोदिष्टविधिनातंत्रेणसद्यः करिष्ये इति संकल्प्य ॥ गायत्रीं देवताभ्य इतिचत्रिर्जपेत् ॥

ततः अपसव्येन ॐनमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥१॥ ॐ 'अग्निष्वात्ता : पितृगणा' इत्यादिपूर्वोक्तमंत्रैः सर्वत्रतिलगौरसर्षपान्विकीर्य्य नीवीबंधंकृत्वापाकंप्रोक्ष्यासनानिदद्यात् ॥ तत्रादौ द्विगुणभुग्नकुशादीन्यादाय ॐअमुकगोत्र पितरमुकशर्मन्नूनमासिकश्राद्धे इदमासनंतुभ्यंस्वधा इति प्रथमंमोटकरूपमासनंपश्चिमगतमुत्सृजेत् ॥ एवं मासिकश्राद्धनिमित्तक० २ त्रैपक्षिक०३ द्वितीयमासिक० ४ तृतीय० ५ चतुर्थ० ६ पंचम० ७ ऊनषाण्मासिक० ८ षाण्मासिक० ९ सप्तम० १० अष्टम० ११ नवम०१२दशम०१३ एकादशमासिक०१४ ऊनसांवत्सरिकश्राद्धनिमित्तक०१५आसना निक्रमेणोत्सृजेत् अथवा ॐअमुकगोत्रपितरमुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धनिमित्तकम् इदमासनं पंचदशधा विभज्यतुभ्यं स्वधा इत्येकमुत्सृजेत्॥ततःॐअपहता इति सर्वत्रतिलान्विकीय पंचदशार्घपात्रोपरिप्रत्येकंपवित्रंधृत्वा ॐशन्नोदेवीतिजलम्॥ तिलोऽसीतितिलान्तूष्णीमेवगंधपुष्पाणिप्रत्येकं प्रक्षिप्य वामकरेप्रथमार्घपात्रमादाय तत्रस्थंपवित्रंपात्रेधृत्वा॥ॐयादिव्याऽआप०इतिपात्रमभिमंत्र्य ॐ अमुकगोत्र पितरमुकशर्मन् ऊनमासिकश्राद्धे एषतेहस्तार्घः स्वधा—इति दक्षिणकरेणपितृतीर्थेन पवित्रोपरि अर्घंदद्यात् ॥ एवंमासिकादिचतुर्दशश्राद्धेष्वनुक्रमेणदद्यात् ॥ अथवा ॐ अमुक० पितरमुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशनिमित्तकश्राद्धे एष ते हस्तार्घः स्वधा इति दद्यात् ॥ ततः ॐ पित्रेस्थानमसीतिस्वस्ववामप्रदेशभूमौक्रमेणाधोमुखंपात्रंकुर्य्यात् ॥ एवं स्थापितानि पंचदशपात्राणिसमाप्तिपर्यंतं न चालयेत् ॥ ततोगंधादिधृत्वाद्विगुणभुग्नकुशादीन्यादाय ॥ ॐ अमुकगोत्रपितरमुकशर्मन् ऊनमासिकाद्यूनवार्षिकपर्य्यंतंपंचदशश्राद्धेषु एतानिगंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि तुभ्यंस्वधा ॥ इत्येकतंत्रेणैवोत्सृजेत् ॥ ततः ॐ अर्चनंसंपूर्णमस्त्विवतिप्रार्थ्य

जलादिनाऽऽसनानिवेष्टयित्वामंडलंकुर्य्यात् ॥ ततः पंचदशपात्रेष्वेकस्मिन्पात्रे वा उष्णमन्नंबहुतरम् अनेकव्यंजनसहितं परि
विष्य तद्दक्षिणपार्श्वे सुशीतलजलपात्रंच धृत्वाऽन्नंमधुमयंकृत्वा ॐ मधुव्वाता० इतित्र्यृचेनाभिमंत्रयेत् ॥ ततः पात्रंन्युब्जह
स्ताभ्यामालभ्य ॐ पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वधा इतिजप्त्वा ॐ इदंविष्णुर्व्विचक्रमे०
इतिचपठित्वास्वाङ्गुष्ठमधोमुखमनखम् ॐ विष्णो कव्यर्ठरक्ष इत्यन्ने निवेश्य ॥ इदमन्नम् इमा आपः इदमाज्यम् इदंहविः इतिप
ठित्वा ॐ अपहता० इति पात्रपरितस्तिलान्विकीर्य वामकरेणपात्रमत्यजन् दक्षिणहस्ते कुशादीन्यादाय ॐ अमुकगोत्र पितर
मुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धनिमित्तकमिदमन्नं सोपकरणम्अमृतरूपंकव्यंतुभ्यंस्वधाइतिवाक्यंकृत्वा जलमास
न्वामभागेभूमौक्षिपेत् । ततः ॐ अन्नहीनंक्रियाहीनमितिपठित्वा गायत्रीं मधुव्वाता० इतित्र्यृचंमधुमधुमध्वितिचजपेत् । ततोरक्षोघ्नी
र्ऋचः पठित्वाभूमिंतिलैरास्तीर्य्यपितरंध्यायन्उदीरतामवरइत्यादिपितृमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानिचरुचिस्तवप्रभृतीनि यथाशक्ति
पठेत् ॥ ततः उच्छिष्टसन्निधौभूमिं प्रोक्ष्य तत्रदक्षिणाग्रकुशत्रयोपरि॥ॐअग्निदग्धाश्चयेजीवा येप्यदग्धाः कुलेमम॥ भूमौदत्तेनतृप्यन्तु
तृप्तायान्तुपरांगतिमितिमंत्रेणान्नंप्रकीर्य सव्येनाचम्य हरिंस्मृत्वा पूर्ववद्गायत्रीं मधुव्वाता० इतित्र्यृचं मधुमधुमध्वितिचजपेत् ॥ ततः
पिंडदानार्थं पंचदशस्थानं[1] दक्षिणप्लवंनिर्माय तन्मध्ये क्रमेण दर्भपिंजुलीमूलेन ॐ अपहता० इतिप्रादेशमितां रेखांदक्षिणा
ग्रामुल्लिख्य दर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्यॐयेरूपाणीत्युल्मुकंरेखोपरि भ्रामयित्वा दक्षिणतोनिदध्यात्॥ ततः उपमूलसकृल्लून
कुशत्रयं सर्वत्ररेखोपरिक्रमेणस्तीर्त्वा 'देवताभ्यः' इतित्रिर्जपेत्॥ततःपत्रपुटेजलतिलगंधपुष्पाणिप्रक्षिप्य तत्पात्रंगृहीत्वा॥ॐअमुकगोत्र

१ अथवा एकमेव स्थानम् ।

पितरमुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धपिंडस्थानेषु अत्रावनेनिक्ष्वतेस्वधा इतिकुशोपरि पितृतीर्थेनकिंचित्किंचिज्जलंक्रमेणनिक्षिपेत्॥ ततः सर्वस्मादन्नात्किंचिदन्नमुद्धृत्य मध्वाज्यतिलजलसहितंपात्रेकृत्वा तेनपंचदशपिंडान्निर्माय मधुघृताभ्याममिघार्य्य एकंपिंडं कुशादीनिचादाय ॐ अमुकगोत्रपितरमुकशर्मन् ऊनमासिकेश्राद्धे एषतेपिंडः स्वधा इतिपितृतीर्थेनप्रथमस्थानेकुशोपरिदद्यात् १ एवं मासिकश्राद्धे०२त्रैपक्षिक० ३ द्वितीयमासिक० ४तृतीय० ५ चतुर्थ० ६पंचम० ७ ऊनषाण्मासिक० ८ षाण्मासिक०९सप्तम०१०अष्टम०११नवम०१२ दशम० १३ एकादशमासिक० १४ऊनवार्षिक० १५श्राद्धेषुक्रमेणतत्तदवनेजनस्थानेपिंडं दद्यात्॥ततोलेपभागभुजस्तृप्यन्तु इतिदर्भमूलेकरंप्रोंछ्य हस्तौप्रक्षाल्य सव्येनाचम्य हरिंस्मरेत्॥ततोऽपसव्यादिना ॐअत्रपितर्मादयस्वयथाभागमावृषायस्व इतिपठित्वा वामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाः श्वासंनियम्यतेनैवपथापरावृत्त्यॐअमीमदन्तपितर्यथाभागमावृषायिष्ट इतिजप्त्वा॥पूर्ववत्पिंडोपरिप्रत्यवनेजनंदत्त्वा नीवीं विस्रंस्यसव्येनाचामेत् ॥ ततः(अपसव्येन)ॐनमस्तेपितारसाय नमस्तेपितः शोषाय नमस्तेपितर्जीवाय नमस्तेपितः स्वधायै नमस्तेपितर्घोराय नमस्तेपितर्मन्यवेनमस्तेपितः पितर्नमस्तेगृहान्नः पितर्द्दत्तसतस्तेपितर्द्देष्म इतिकृतांजलिः पठित्वा ॥ ॐएतत्तेपितर्वासः इति प्रत्येकं पिंडोपरि सूत्रंधृत्वा ॐ अमुकगोत्र पितरमुकशर्मन् ऊनमासिकादिऊनवार्षिकांतश्राद्धपिंडेषु एतानिवासांसितुभ्यंस्वधा इत्युत्सृजेत् ॥ ततस्तूष्णीमेवपितरमुद्दिश्य पिंडान्गंधपुष्पतुलसीधूपदीपतांबूलदक्षिणाभिः संपूज्य पिंडशेषान्नं पिंडसमीपेविकीर्य्य ॥ ॐ शिवा आपः संतु इति । सौमनस्यमस्तु इतिपुष्पाणि जलम् । अक्षतं

---

१ अथवा ॐ अमुकगोत्र पितरमुकशर्मन् ऊनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धनिमित्तकं एष ते पिंडः स्वधा' इत्येकं वा दद्यात्।

चारिष्टमस्त्वितियवतिलांश्चपात्रेषुप्रक्षिप्य कुशादीन्यादाय ॐ अमुकगोत्रस्यपितुरमुकशर्मण ऊनमासिकाद्यूनवार्षिकान्तश्राद्धे षुदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामितितिलयुक्तमक्षय्योदकं दद्यात् ॥ ततः प्राङ्मुखः (उपवीती) कृतांजलिराशिषो गृह्णीयात् ॥ ॐ अघोरः पिताऽस्तु ॥ गोत्रंनोवर्द्धताम् ॥ दातारोनोभिवर्द्धताम् ॥ वेदाः संततिरेवच ॥ श्रद्धाचनोमाव्यगमत् ॥ बहुदेयं चनोऽस्तु॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनः सन्तुमाचयाचिष्मकंचन॥ एताः सत्याआशिषः सन्तु·इतिपठेत्॥ततोऽपसव्येनपिंडोपरिसपवित्रान्कुशानास्तीर्यॐऊर्ज्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतम्।स्वधास्थतर्प्पयतमेपितरमितिपिंडोपरिदक्षिणाग्रां जलधारांदद्यात् ॥ ततोऽर्घपात्राण्युत्तानीकृत्य यथाशक्तिदक्षिणांदद्यात् ॥ तद्यथा-रजतद्रव्यंकुशादीनिचादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतदूनमासिकाद्यूनवार्षिकान्तपंचदशश्राद्धप्रतिष्ठार्थम् इदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेन दातुमहमुत्सृजे इतिसंकल्प्यदद्यात् ॥ ततः पिंडानुत्थाप्याघ्रायपिंडाधआस्तृतदर्भानुल्मुकंचवह्नौक्षिपेत् ॥ ततः ॐ अभिरम्यतामितिविसृज्य देवताभ्य०इतित्रिः पठित्वा दीपनिर्वापणादिकर्म्मसमाप्य कर्म्मपूर्त्तिकामःॐप्रमादादितिपठित्वाविष्णुंस्मरेत् ॥ ततः पिंडान् गामजंवायसान्वा खादयेत्॥अगाधेजलेवाक्षिपेत्॥ततोवैश्वदेवबलिकर्मणीकृत्वापंचदशब्राह्मणान्भोजयेत् ॥ ततः स्वस्तिवाचनं ब्राह्मणपूजनादिकृत्वा आशिषोगृहीत्वा वृद्धिनिमित्तकमंगलारंभंकुर्यात् ॥ पुनः ऊनपदोच्चारणं नकर्त्तव्यम् ॥ ॥ इत्यूनमासिकाद्यूनवार्षिकान्तश्राद्धपद्धतिः ॥ ❋ ॥ ❋ ॥ ❋ ॥ अथसांवत्सरिकैकोद्दिष्टश्राद्धपद्धतिः ॥ तत्रादौश्राद्धपूर्वदिनेएकभक्तादिनियमं विधायश्राद्धदिनेप्रातःस्नात्वाश्वेतधौतवाससीपरिधाय संध्यादिनित्यकर्म्मसमाप्य गोमयोपलेपनज्वलदंगारअमणगौरमृत्तिकाच्छाद

नैः श्राद्धपाकयोर्भूमिसंस्कारंकृत्वा वस्त्रादिनावेष्टयित्वा तिलगौरसर्षपैरवकीर्य श्राद्धदेयवस्तून्यासाद्यस्वयंपाकंकुर्य्यात्॥अथवासुस्नात
स्त्रीबांधवादिद्वाराकारयेत्॥ततोमध्याह्नेपुनःस्नात्वा॥आचांतःश्राद्धदेशमागत्य तिलतैलेनदीपंप्रज्वाल्यकाककुक्कुटादीनपसार्य्यस्वासने
प्राङ्मुखउपविशेत्।ततःकर्म्मपात्रंजलेनापूर्य्यतत्रगंधपुष्पतिलकुशादीनिनिक्षिप्यपवित्रधारणंकृत्वाआचम्य प्राणानायम्य ॐअपवित्रः
पवित्रोवा॰सर्व्वावस्थामितिपठित्वा ॐ पुंडरीकाक्षः पुनात्विति कुशत्रयानीतजलैः श्राद्धद्रव्याणिस्वात्मानंच प्रोक्षयेत् ॥ ततः ॐ भू
म्यैनमः॥ॐभगवत्यैगयायैनमः॥ॐभगवते गदाधरायनमः ॥इतिनत्वा कुशत्रयतिलजलान्यादाय ॥ देशकालौसंकीर्त्य ॥ ॐ अद्या
मुकगोत्रस्य अस्मत्पितुरमुकशर्मणोवसुरूपस्य सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये—इतिसंकल्प्य ॥ गायत्रींत्रिर्जप्त्वा ॐ देवता
भ्यःपितृभ्यश्चमहायोगिभ्यएवच॥नमःस्वाहायैस्वधायै नित्यमेवनमोनमः । इतित्रिर्जपेत्॥ततोऽपसव्यंकृत्वादक्षिणामुखःसजघनंवाम
जानु निपात्यवामहस्ते तिलगौरसर्षपान्गृहीत्वा ॐ नमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥१॥
अग्निष्वात्ताः पितृगणाः प्राचींरक्षंतुमेदिशम् ॥ तथाबर्हिषदः पांतु याम्यां येपितरः स्थिताः ॥२॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसो
मपाः॥अधोर्ध्वमपिकोणेषु हविष्मन्तश्चसर्वदा ॥ ३ ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुवै ॥४॥
वायुभूतपितॄणांचतृप्तिर्भवतुशाश्वती॥ इत्येतैर्मंत्रैर्दिक्षुअधस्तादूर्ध्वकोणेषुच सर्वत्र तिलगौरसर्षपान्विकीर्य्य वामेदक्षिणेवाकटिभागेनीवी
बंधंकुर्यात् ॥ ततःकस्मिंश्चित्पात्रेजलंगृहीत्वा दर्भैरालोड्य ॐ यद्देवादेवहेडनंदेवासश्चकृमावयम् ॥अग्निर्मातस्मादेनसोविश्वान्मुञ्चत्व
ꣳहसः ॥१॥ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम् ॥ वायुर्म्मातस्मादेनसोविश्वान्मुंचत्वꣳहसः ॥२॥ यदिजाग्रद्यदिस्वप्नएनां

ॐसिचक्कुमावयम् ॥ सूर्य्यौं मातस्मादेनंसो विश्वान्मुञ्चत्वर्ठ॑ँहसः॥३॥इति कूष्मांडसूक्तेनाभिमंत्र्य शोदक्यादिदुष्टदृष्टिनिपाताच्छूद्रा
दिसंपर्कदोषाच्च पाकादीनां पवित्रताऽस्तु इति पाकादीन्संप्रोक्षयेत् ॥ ततः आसनादिदानम्॥तावत्अपसव्यादिना द्विगुणभुग्नकुशत्रय
तिलजलान्यादायॐअमुकगोत्रास्मत्पितरमुकशर्मन्वसुरूप इदमासनंतुभ्यंस्वधाइतिद्विगुणभुग्नकुशत्रयात्मकमासनंदक्षिणाग्रं दद्यात् ॥
ततः ॐ अपहताऽअसुरारक्षांॅसिवेदिषदः ॥ इतितिलान्विकीर्य्य एकस्मिन्नर्घपात्रेदर्भदलमेकंसाग्रं प्रादेशमात्रंदक्षिणाग्रंधृत्वा ॐ
शन्नोदेवीरभिष्टयऽआपोभवंतुपीतये ॥ शंय्योरभिस्रवंतुनः इतिजलम् ॥ ॐ तिलोसिसोमदेवत्यो गोसवोदेवनिर्मितः ॥ प्रत्न
मद्भिः पृक्तःस्वधया।पितॄँल्लोकान्प्रीणाहिनःस्वधा—इतितिलांश्च प्रक्षिप्यतूष्णीमेव गंधपुष्पेनिक्षिपेत् ॥ततोर्घपात्रंवामहस्तेकृत्वापवित्रंपात्रे
धृत्वा॥ॐयादिव्याऽआपःपयसासंबभूवुर्य्याऽआन्तरिक्षा उतपार्थिवीर्याः॥हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशर्ठ॑ँस्योनाःसुहवाभ
वंतु ॥ इतिपात्रजलमभिमंत्र्य दक्षिणहस्ते द्विगुणभुग्नकुशादीन्यादाय ॥ ॐ अमुकगोत्र अस्मत्पितरमुकशर्मन्वसुरूप एषतेहस्तार्घः
स्वधा इतिपवित्रोपरि अर्घजलंदत्त्वा ॐ पित्रेस्थानमसीतिवामप्रदेशभूमावधोमुखंनिदध्यात् ॥ एवंस्थितंपात्रं समाप्तिपर्यंतंनचालयेत्॥
ततोगंधादिधृत्वा ॥ द्विगुणभुग्नकुशादीन्यादाय ॐ अमुकगोत्र अस्मत्पितरमुकशर्मन्वसुरूपएतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीत
वासांसितुभ्यंस्वधा इत्युत्सृजेत् ॥ ततः अर्चनंसंपूर्णमस्त्वितिपठित्वाजलादिनामंडलंकृत्वा परकीयभूमौश्राद्धकरणेतद्भूस्वामिनेऽन्नब
लिंदद्यात् ॥ ततः पात्रंदत्त्वातत्र उष्णमन्नंसघृतं पितरं ध्यायन्पुरुषतृप्तिक्षमं कराभ्यां परिविष्य तत्पार्श्वे व्यंजनसुशीतलजल

पात्राणिस्थापयेत्॥ततोऽन्नंमधुमयंकृत्वा ॐमधुव्वाताऽऋतायते मधुंक्षरंतिसिंधवः॥माध्वीर्न्नःसंत्वोषधीः॥ १ ॥ मधुनक्तमुतोषसोमधुंम
त्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥२॥ मधुंमान्नोव्वनस्पतिर्म्मधुंमाँऽअस्तुसूर्य्यः ॥ माध्वीर्गावोभवंतुनः ॥३॥ ॐ मधुमधुमधि्व
त्यभिमंत्रयेत् ॥ ततोऽन्नपात्रंन्युब्जकराभ्यांव्यस्ताभ्यामालभ्य ॥ ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमि
स्वधा । ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरे-इतिपठित्वा ॐ विष्णो हव्यꣳरक्षइत्यनेन स्वाङ्गुष्ठमधोमुखमनखम्
अन्नेनिवेश्य ॐइदमन्नम् ॐइमाआपः ॐइदमाज्यम् ॐएतत्सर्वंहव्यमितिपठित्वा ॐअपहताऽअसुरारक्षांꣳसिवेदिषदः इत्यन्नपात्रपरितस्ति
लान्विकीर्य्य वामकरेणपात्रमत्यजन्दक्षिणकरेणकुशादीन्यादाय ॐअमुकगोत्र अस्मत्पितरमुकशर्मन्वसुरूप इदमन्नंसोपकरणम् अमृत
रूपंहव्यंतुभ्यंस्वधा इत्युत्सृजेत् ॥ ततः ॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य गायत्रीं त्रिः सकृ
द्वाजपेत् ॥ तथापवित्रपाणिर्दर्भेष्वासीनः ॐमधुवाताऽऋतायत इत्यादिमंत्रत्रयम् ॐमधुमधुमधि्वतिचजपेत् ॥ ततः ॐ कृणुष्वपाजः
प्रसितिन्नपृथ्वींय्याहिराजेवामवाँऽइभेन । तृष्वीमनुप्प्रसितिन्द्रूणानोस्तासिव्विद्ध्यरक्षसस्तपिष्ठैः ॥१॥तवभ्भ्रमासऽआशुयापतन्त्यनुस्पृ
शधृषताशोशुचानः ॥ तपूꣳष्यग्नेजुह्वापतङ्गानसंदितोव्विसृजव्विष्वगुल्काः ॥ २ ॥ प्रतिस्पशोव्विसृजतूर्णितमोभवापायुर्व्विशोऽअ
स्याऽअदब्धः॥योनोदूरेऽअघशꣳसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥३॥ उदग्नेतिष्ठप्प्रत्यातनुष्वन्यमित्राꣳऽओषतात्तिग्महेते ॥

योनोऽअरातिठ्ठं समिधानचक्रेनीचातंधंक्ष्यतसन्नशुष्कम् ॥४॥ ऊर्द्ध्वोभवप्रतिविद्धयाद्ध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥ अवस्थिरातनु
हियातुजूनांजामिमजामिम्प्रमृणीहिशत्रून्।अग्नेष्ट्वातेजंसासादयामि॥५॥ इतिरक्षोघ्नीर्ऋचःपठित्वाभूमिंतिलैरास्तीर्य्यपितरंध्यायन्।ॐउदीर
तामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ॥ असुंयऽईयुरवृकाऽऋतज्ञास्तेनोऽवन्तुपितरोहवेषु ॥ इत्यादि पितृमंत्रान्॥ ॐ सहस्र
शीर्षा इत्यादिपुरुषसूक्तम् ॥ ॐ आशुः शिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनाम्।संक्रन्दनोनिमिषऽएकवीरःशतठ्ठंसेनाऽअज
यत्साकमिन्द्रः-इत्यादिअप्रतिरथंचपठेत् ॥ ततः सप्तव्याधादशार्णेषु मृगाःकालंजरेगिरौ ॥ चक्रवाकाः शरद्वीपे हंसाःसरसिमानसे ॥
तेऽभिजाताःकुरुक्षेत्रे ब्राह्मणावेदपारगाः ॥ प्रस्थितादूरमध्वानं यूयंतेभ्योऽवसीदत ॥ इतिगाथां पठित्वा ॥ अन्या
नियथारुचिस्तवप्रभृतीनिचपठेत् ॥ ततः उच्छिष्टसन्निधौ भूमिंप्रोक्ष्य तत्रास्तृतदक्षिणाग्रकुशत्रयोपरि ॐ अग्निदग्धाश्चयेजीवा ये
प्यदग्धाः कुलेमम ॥ भूमौदत्तेनतृप्यंतु तृप्तायांतुपरांगतिम् ॥ इतिमंत्रेणान्नंप्रकीर्य्य सव्येनाचम्य हरिंस्मृत्वापूर्ववद्गायत्रीं मधुव्वाता इति
त्र्यृचंमधुमधुमध्वितिचजपेत् ॥ ततः (अपसव्येन) उच्छिष्टसन्निधौचतुरस्रं दक्षिणप्लवंहस्तमात्रं रमणीयंचतुरङ्गुलोच्छ्रितं पिंडदानार्थं
स्थानंनिर्म्माय तन्मध्यदेशेदर्भपिंजुलीमूलेनॐअपहताऽअसुरारक्षाᳪंसिवेदिषदः- इतिमंत्रेणसव्योपगृहीतदक्षिणहस्तेनदक्षिणाग्रांसकृल्ले
खांलिख्यदर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्य ॐयेरूपाणिप्रतिमुंचमानाऽअसुराःसंतः स्वधयाचरंति॥परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्र
णुदात्यस्मात् इतिमंत्रेणज्वलदुल्मुकंरेखोपरिभ्रामयित्वादक्षिणतोनिदध्यात्।ततःउपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वा(सव्येन)देवताभ्य

इतित्रिर्जपेत्॥ततः (अपसव्येन) एकस्मिन्पत्रपुटके जलतिलगंधपुष्पाणिकृत्वा तत्पुटकमादाय ॐअमुकगोत्र अस्मत्पितरमुकशर्म न्वसुरूप अत्रावने निक्ष्वतेस्वधा इति कुशोपरिदक्षिणहस्तेनपितृतीर्थेनावनेजनंदद्यात् ॥ ततः सर्वस्मादन्नादुष्णंकिंचित्किंचिदन्नमुद्धृत्य मध्वाज्यतिलजलसहितंपात्रेकृत्वा बिल्वोपमंपिंडंनिर्माय मधुघृताभिघारितंकुशादीनिचादाय ॐ अमुकगोत्र अस्मत्पितरमुकशर्म न्वसुरूप सांवत्सरिकश्राद्धे एषतेपिंडः स्वधानमः ॥ इति सव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेन अवनेजनस्थानेदद्यात्॥ततः ॐलेपभा गभुजस्तृप्यंतु इतिदर्भमूलेकरंप्रोञ्छ्यहस्तौप्रक्षाल्य सव्येनाचम्य हरिंस्मरेत् ॥ ततोऽपसव्यादिना ॐअत्रपितर्मादयस्वयथाभागमावृषा यस्व इतिपठित्वा वामावर्त्तेनोदङ्मुखोभूत्वा प्रीतमनाः श्वासंनियम्यतेनैवपथापरावृत्त्य ॐअमीमदन्तपितर्यथाभागमावृषायिषत इति श्वासमुत्सृजेत्॥ततोऽवनेजनपात्रंगृहीत्वा ॐअमुकगोत्रपितरमुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधानमः इति पिंडोपरिप्रत्यवनेजनंदत्त्वानीवीं विस्रस्य सव्येनाचम्य अपसव्येनॐनमस्तेपितारसायनमस्तेपितःशोषायनमस्तेपितर्जीवायनमस्तेपितःस्वधायैनमस्तेपितर्घोरायनमस्ते पितर्मन्यवेनमस्तेपितः पितर्नमस्तेगृहान्नः पितर्दत्तसतस्तेपितर्देष्म इति कृतांजलिःपठेत् । ततः ॐएतत्तेपितर्वासः ॥ इतिपिंडोपरिसूत्रं धृत्वा ॐअमुकगोत्र पितरमुकशर्मन्वसुरूप एतत्तेवासः स्वधा इति सूत्रमुत्सृजेत् ॥ ततः पितरमुद्दिश्यतदीयपिंडे तूष्णीं गंधपुष्पतुलसी धूपदीपतांबूलपूगीफलदक्षिणादीनिदद्यात् ॥ पिंडशेषान्नंपिंडसमीपेविकिरेत् ॥ ततः ॐशिवा आपः संतु इतिजलं सौमनस्यमस्तु इति पुष्पम् अक्षतंचारिष्टं चास्तु इतियवतिलांश्चान्नपात्रे दद्यात् ॥ ततः ॐअमुकगोत्रस्यास्मत्पितुरमुकशर्मणोवसुरूपस्यदत्तैतदन्नपाना दिकमक्षय्यमुपतिष्ठतामिति तिलयुक्तमक्षय्योदकं दद्यात् ॥ ततः प्राङ्मुखः (उपवीती) कृतांजलिर्दक्षिणांदिशंपश्यन् आशिषोगृह्णीयात्॥

ॐअघोरः पिताऽस्तु इतिपठित्वा ॐगोत्रंनोवर्द्धतां दातारोनोभिवर्द्धतां वेदाः सन्ततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु॥अन्नंच
नोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनःसंतुमाचयाचिष्मकंचन॥ एताःसत्याआशिषःसन्तु इतिवदेत् ॥ ततोऽपसव्येन पिंडोपरि
सपवित्रंकुशत्रयमास्तीर्य्य ॐऊर्ज्जंवहंतीरमृतंघृतंपयः कीलालंपरिस्रुतम्॥स्वधास्थतर्पयंतमेपितरम् ॥ इति मंत्रेणपिंडोपरिदक्षिणाग्रांजल
धारांदद्यात्॥ततः अर्घपात्रमुत्तानीकृत्ययथाशक्तिरजतदक्षिणां कुशादीनि चादायॐअमुकगोत्रस्यास्मत्पितुरमुकशर्मणोवसुरूपस्य कृते
तत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदं रजतंचंद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इति संकल्प्यदद्यात्॥
ततः पिंडमुत्थाप्य स्थाल्यांनिधाय अवघ्राणंकृत्वापिंडाधःस्थंसकृल्लूनकुशत्रयमुल्मुकंचवह्नौक्षिपेत्॥ततोदेवताभ्य इतित्रिर्जपित्वाॐ
अभिरम्यतामिति विसृज्यरक्षादीपंनिर्वाप्यमव्येन हस्तौपादौप्रक्षाल्याचामेत् ॥ ततः ॐप्रमादादितिपठित्वा कर्म्मपूर्तिकामोविष्णुंस्म
रेत् ॥ ततः पिंडंगामजंवायसान्वाखादयेदग्नौ जले वा क्षिपेत् ॥ ततोवैश्वदेवबलिकर्म्मणीकृत्वा ब्राह्मणान्भोजयेत् ॥ एवमेवमातृभ्रातृपितृ
व्यादीनांश्राद्धंज्ञेयम् ॥ इतिसांवत्सरिकैकोद्दिष्टश्राद्धपद्धतिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥अथमातृकैकोद्दिष्टश्राद्धपद्धतिः॥श्राद्धपूर्वदिनेएकभक्तादिनियमंविधाय श्राद्धदिनेप्रातःस्नात्वा श्वेतधौतवाससीपरिधाय संध्यादिनित्य
कर्मसमाप्य गोमयोपलेपनज्वलदंगारभ्रामणगौरमृत्तिकाच्छादनैः श्राद्धपाकयोर्भूमिसंस्कारं कृत्वा वस्त्रादिनावेष्टयित्वा तिलगौरसर्षपैरव
कीर्य श्राद्धदेयवस्तून्यासाद्य स्वयंस्त्रीबांधवादिद्वारावापाकंकुर्यात् ॥ ततोमध्याह्नेपुनः स्नात्वा आचांतः श्राद्धदेशमागत्य तिलतैलेनदीपं
प्रज्वाल्य काककुक्कुटादीनपसार्य्य स्वासनेप्राङ्मुखउपविशेत्ततः कर्मपात्रंजलेनापूर्य्य तत्रगंधपुष्पातिलकुशादीनिनिक्षिप्य पवित्रधारण

कृत्वा आचम्य प्राणानायम्य ।ॐ अपवित्रः पवित्रोवा० १ इतिपठित्वा । ॐ पुंडरीकाक्षःपुनात्विति कुशत्रयानीतजलैः श्राद्धद्रव्या
णिस्वात्मानंचप्रोक्षयेत् ॥ ततः ॐ भूम्यैनमः । ॐभगवत्यैगयायैनमः ।ॐ भगवतेगदाधरायनमः । इतिनत्वा कुशत्रयतिलजलान्या
दायदेशकालौसंकीर्त्यअद्यामुकगोत्रायाअस्मन्मातुरमुकदेव्यागंगारूपायाः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये इतिसंकल्प्य। गायत्रीं
त्रिर्जप्त्वा ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्यएवच ॥ नमः स्वाहायै स्वधायैनित्यमेवनमोनमः१ इतित्रिर्जपेत् ॥ततोऽपसव्यंकृत्वा
दक्षिणामुखः पातितवामजानुः तिलगौरसर्षपान्गृहीत्वाॐनमोनमस्तेगोविंदपुराणपुरुषोत्तम । इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः॥१॥
अग्निष्वात्ताः पितृगणाः प्राचींरक्षंतुमेदिशम्॥ तथाबर्हिषदःपांतुयाम्यांयेपितरः स्थिताः॥२॥प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः
अधोर्ध्वमपिकोणेषु हविष्मंतश्चसर्वदा ॥३ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषांयोमेरक्षांकरोतुवै॥ ४ ॥ वायुभूत
पितॄणांच तृप्तिर्भवतुशाश्वती ॥ इत्येतैर्मंत्रैर्दिक्षुविदिक्षु अधस्तादूर्ध्वंचसर्वत्रतिलगौरसर्षपान्विकीर्य॥ वामेदक्षिणेवाकटिभागेनीवींबंधंकु
र्य्यात्।ततःकस्मिंश्चित्पात्रेजलंगृहीत्वादर्भैरालोड्य। ॐयद्देवादेवहेडनंदेवासश्चकृमावयम्।अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वंहसः।१।
यदिदिवायदिनक्तमेना ऽँसिचकृमावयम्॥ वायुर्म्मातस्मादेनसोविश्वान्मुञ्चत्वंहसः॥२॥यदिजाग्रद्यदिस्वप्नऽएना ऽँसिचकृमावयम्॥
सूर्य्योमातस्मादेनसो विश्वान्मुञ्चत्वंहसः॥३॥ इतिकूष्मांडसूक्तेनाभिमंत्र्य श्वोदक्यादिदुष्टदृष्टिनिपाताच्छूद्रादिसंपर्कदोषाच्चपाकादी
नांपवित्रताऽस्तु इतिपाकादीन्प्रोक्षयेत्॥ततः आसनादिदानम्॥तावदपसव्यादिनाद्विगुणभुग्नकुशत्रयतिलजलान्यादायदेशकालौस्मृत्वा
ॐअमुकगोत्रेऽस्मन्मातरमुकदेविगंगारूपिणिसांवत्सरिकैकोद्दिष्टश्राद्ध इदमासनंतुभ्यंस्वधा-इतिद्विगुणभुग्नकुशत्रयात्मकमासनंदक्षिणा

ग्रंसतिलमुत्सृजेत्॥ ततःॐ अपहताऽअसुरारक्षाᳬंसिवेदिषदः ॥ इतिवामावर्त्तेनतिलान्विकीर्य एकस्मिन्नर्घपात्रे पवित्रंदक्षिणाग्रंधृत्वा ॥
तत्रॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतये॥शंय्योरभिस्रवंतुनः- इतिजलंक्षिप्त्वा॥ॐतिलोसिसोमदैवत्योगोसवो देवनिर्मितः ॥ प्रत्नमद्भिः
पृक्तः स्वधयापितृँल्लोकान्प्रीणाहिनः स्वधा-इतितिलान् ॥ तूष्णीमेवगंधपुष्पेचक्षिपेत् ॥ ततोऽर्घपात्रंवामहस्ते कृत्वापवित्रंपात्रेधृत्वा।ॐ
यादिव्याऽआपः पयसासंबभूवुर्य्याऽआन्तरिक्षाऽउतपार्थिवीर्य्याः॥ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशᳬंस्योनाःसुहवाभवंतु-इति
पात्रजलमभिमंत्र्य॥दक्षिणहस्तेद्विगुणभुग्नकुशादीन्यादायॐअमुकगोत्रेऽस्मन्मातरमुकदेविएषतेहस्तार्घःस्वधा-इतिपवित्रोपरिअर्घजलं
दत्त्वा अवशिष्टजलसहितंसपवित्रंचार्घपात्रम्॥ ॐमात्रेस्थानमसीतिआसनवामप्रदेशभूमावधोमुखे निदध्यात्॥एवंस्थितंपात्रंदक्षिणादान
पर्यंतनोद्धरेन्नचालयेत् ॥ ततोगंधादिकंधृत्वा॥द्विगुणभुग्नकुशत्रयादीन्यादायॐ अमुकगोत्रेऽस्मन्मातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्ध
एतानिगंधपुष्पधूपदीपतांबूलसिंदूरवासांसि तुभ्यंस्वधा-इत्युत्सृजेत् ॥ ततःअर्चनसंपूर्णमस्त्वितिप्रार्थ्यजलादिनामण्डलंकृत्वा(परकी
यभूमौश्राद्धकरणे-ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमः-इतिकुशोपरिभूस्वामिनेऽन्नबलिंदद्यात्॥भूमौस्वसत्वेनावश्यकता) ततोभोजनपा
त्रंदत्त्वा तत्र उष्णमन्नंसघृतंपितरंध्यायन्पुरुषतृप्तिक्षमं कराभ्यांपरिविष्यतत्पार्श्वेव्यंजनंसुशीतलजलपात्राणिचस्थापयेत्॥ततोऽन्नंमधुम
यंकृत्वा ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिंधवः॥ माध्वीर्न्नः सन्त्वोषधीः ॥१॥ मधुनक्तमुतोषसोमधुमत्पार्थिवᳬंरजः॥ मधुद्यौरस्तु
नः पिता ॥२॥ मधुमान्नोव्वनस्पतिर्मधुमाँऽअस्तुसूर्य्यः॥माध्वीर्गावोभवंतुनः ॥३॥ ॐमधुमधुमध्वित्यभिमंत्रयेत् ॥ ततोऽन्नपात्रंन्युब्जा
भ्यांन्यस्ताभ्यांकराभ्यामालभ्यॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वधा ॥१॥ ॐ इदंविष्णुर्विचक्रमेत्रेधा

निदधेपदम्॥समूढमस्यपाᳫंसुरे ॥ २ ॥ इतिपठित्वा ॥ ॐविष्णो कव्यᳫं रक्षइत्यनयास्वांगुष्ठमधोमुखमनखमन्नेनिवेश्य ॥ ॐइदमन्नम्ॐइमाआपःॐइदमाज्यम्॥ॐइदकविरितिपठित्वा ॥ ॐअपहताऽअसुरारक्षाᳫंसिवेदिषदः ॥इत्यन्नपात्रपरितोवामावर्तेनतिलान्विकीर्य्य वामकरेणपात्रमत्यजन्दक्षिणकरेणकुशादीन्यादाय।ॐअमुकगोत्रेऽस्मन्मातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धे इदमन्नंसोपकरणम् अमृतरूपंकव्यंतुभ्यंस्वधा–इत्युत्सृजेत् ॥ ततः ॐअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य गायत्रींत्रिःसकृद्वाजपेत् ॥ ततः ॐ मधु०वाताऽऋतायते० इत्यादिमंत्रत्रयम् ॥ ॐ मधुमधुमध्विति चजपेत् ॥ ततः ॐ कृणुष्वपाजइत्याद्यारक्षोघ्नीऋचः ५ पठित्वा भूमिंतिलैरास्तीर्य मातरंध्यायन् । ॐ उदीरतामवर०इत्यादिपितृमंत्रान् १३ ॐ सहस्रशीर्षा०इत्यादिपुरुष० १६ इतिपुरुषसूक्तम् ॥ ॐआशुः शिशानो० इत्यप्रतिरथंचपठित्वा अन्यानिरुचिस्तवप्रभृतीनिपठेत् ॥ तत उच्छिष्टसमीपेभूमिंप्रोक्ष्य तत्रास्तृतदक्षिणाग्रकुशोपरिॐअग्निदग्धाश्चयेजीवा येप्यदग्धाः कुलेमम ॥ भूमौ दत्तेन तृप्यंतु तृप्तायांतुपरांगतिम् ॥ १ ॥ इतिमंत्रेणान्नंप्रकीर्य्य(सव्येन)आचम्य हरिंस्मृत्वा गायत्रीं मधुव्वाता इतित्र्यृचम् मधुमधुमध्वितिचजपेत्॥ततोऽपसव्येन चतुरस्रं दक्षिणप्लुवं पिंडदानार्थंस्थानंनिर्माय तन्मध्येदर्भपिंजुलीमूलेन॥ॐअपहताऽअसुरारक्षाᳫंसिवेदिषदः-इतिमंत्रेणसव्योपगृहीतदक्षिणहस्तेन दक्षिणाग्रांसकृल्लेखामालिख्य दर्भपिंजुलीमुत्तरस्यांदिशि निक्षिप्यॐयेरूपाणिप्रतिमुंचमानाऽअसुराःसन्तःस्वधयाचरंति।परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥ १ ॥ इतिमंत्रेणज्वलदुल्मुकंरेखोपरिभ्रामयित्वा दक्षिणतोनिदध्यात् ॥ ततउपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वा सव्येन ॐदेवताभ्यः–इतित्रिर्जपेत् ॥ ततोऽपसव्यंकृत्वा पत्रपुटके जलतिलगंधपुष्पाणिकृत्वा तत्पुटकंकुशादीनिचादायॐ

अमुकगोत्रेऽस्मन्मातरमुकदेवि सांवत्सरिकैकोद्दिष्टश्राद्धेपिंडस्थानेऽत्रावनेनिक्ष्वतेस्वधाइतिकुशोपरि अवनेजनंदद्यात् ॥ततःसर्वस्मादन्ना
दुष्णंकिंचित्किंचिदन्नमुद्धृत्य मध्वाज्यतिलजलसहितंपात्रेकृत्वा बिल्वोपमंपिंडंनिर्माय मधुघृताभ्यामभिघार्य्य द्विगुणमुग्नकुशादीनिपिंडं
चादायॐअमुकगोत्रेऽस्मन्मातरमुकदेवि सांवत्सरिकैकोद्दिष्टश्राद्धे एषतेपिंडः स्वधानमः-इतिसव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनकुशो
परिपिंडमवनेजनस्थानेदद्यात्॥ ततः लेपभागभुजांतृप्तिमुद्दिश्य दर्भमूलेकरंप्रोञ्छ्य हस्तौप्रक्षाल्य सव्येनाचम्यविष्णुंस्मरेत्॥ततोऽपस
व्यादिकृत्वा दक्षिणामुखः ॐ अत्रमातर्मादयस्व यथाभागमावृषायस्व--इतिपठित्वा वामावर्त्तेनोदङ्मुखीभूत्वा प्रीतमनाःश्वासंनियम्य
तेनैवयथापरावृत्य ॐअमीमदंतमातर्यथा भागमावृषायिषत इतिश्वासमुत्सृजेत् ॥ ततोऽवनेजनपात्रंगृहीत्वा ॐअमुकगोत्रेऽस्मन्मा
तरमुकदेवि अत्रप्रत्यवनेनिक्ष्वतेस्वधा इतिपिंडोपरिप्रत्यवनेजनंदत्त्वा नीवींविस्रंस्य सव्येनाचामेत्।ततोऽपसव्यादिकृत्वाॐनमस्तेमाता
रसायनमस्तेमातःशोषायनमस्तेमातर्जीवायनमस्तेमातःस्वधायै नमस्तेमातर्घोरायनमस्तेमातर्मन्यवेनमस्तेमातर्मातर्नमस्तेगृहान्नोमातर्दे
हिसतस्तेमातर्देष्मइतिकृतांजलिःपठित्वाॐएतत्तेमातर्वासः—इतिपिंडोपरिसूत्रंधृत्वा कुशादीन्यादाय॥ ॐअमुकगोत्रेऽस्मन्मातरमुकदेवि
एतत्तेवासः स्वधा—इतिसूत्रमुत्सृजेत्।ततोमातरमुद्दिश्यतदीयपिंडेतूष्णींगंधकुंकुमपुष्पधूपदीपतांबूलपूगीफलदक्षिणादीनिदत्त्वा पिंडशे
षान्नंपिंडसमीपेविकिरेत्॥ततोऽन्नपात्रे ॐशिवाआपःसंतु—इतिजलम् ॥ ॐसौमनस्यमस्तु—इतिपुष्पम्॥ॐअक्षतंचारिष्टंचास्तु—इतिय
वांश्चदद्यान्नतंडुलान्।ततोदेशकालौस्मृत्वाॐअमुकगोत्रायाअस्मन्मातुरमुकदेव्यागंगारूपिण्याःसांवत्सरिकैकोद्दिष्टश्राद्धेदत्तैतदन्नपानादि
कमक्षय्यमुपतिष्ठतामिति तिलयुक्तमक्षय्योदकंदद्यात् ॥ ततः प्राङ्मुखः सव्यंकृत्वा कृतांजलिर्दक्षिणांदिशंपश्यन् आशिषोगृह्णीयात् ॥

ॐअघोरामाताऽस्तु-इतिपठित्वापिंडोपरिपूर्वाग्रांजलधारांदत्त्वाॐगोत्रनोवर्द्धतां दातारोनोभिवर्द्धतां वेदाः संततिरेवच॥श्रद्धाचनोमा
व्यगमद्बहुदेयंचनोऽस्तु॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनः संतुमाचयाचिष्मकंचन॥ एताःसत्याः आशिषः संतु-
इतिप्रार्थयेत्॥ततोऽपसव्यादिकृत्वा पिंडोपरिसपवित्रंकुशत्रयंदक्षिणाग्रमास्तीर्य्य जलेन ॐ ऊर्ज्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतम् ॥
स्वधास्थतर्पयतमेमातरम् ॥१॥इतिदक्षिणाग्रांजलधारांदद्यात् ॥ ततः अर्घपात्रमुत्तानीकृत्ययथाशक्तिरजतदक्षिणांदद्यात् ॥ द्विगुणभु
ग्नकुशादीनिदक्षिणांचादायॐअमुकगोत्रायाअस्मन्मातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धकर्मणःप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगो
त्रायाऽमुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे-इतिसङ्कल्प्ययथासंभवयथाचारंचदद्यात्।ततःपिंडमुत्थाप्यस्थाल्यांनिधायअवघ्रा
णंकृत्वा पिंडाधःस्थंसकृल्लूनकुशत्रयमुल्मुकंचवह्नौक्षिपेत् ॥ ततः सव्येन ॐ देवताभ्यइतित्रिर्जपित्वाअपसव्येन ॐ अभिरम्यताम्
इतिविसृज्य रक्षादीपंनिर्वाप्यसव्येनहस्तौपादौप्रक्षाल्यआचामेत्॥ ततः ॐप्रमादादितिपठित्वाकर्म्मपूर्त्तिकामोविष्णुंस्मृत्वा पिंडंगवादि
भ्योदत्त्वा श्राद्धीयवस्तूनिब्राह्मणायप्रतिपाद्य वैश्वदेवंबलिकर्मणीकृत्वा ब्राह्मणान्भोजयेत् ॥ ततः इष्टैः सहशेषभोजनकुर्य्यात् ॥ एवमेव
सापत्नमातृपितृव्यपत्नीभ्रातृपत्नीस्वस्त्रीप्रभृतीनांश्राद्धंज्ञेयम् ॥ इतिश्रीगौडीयश्राद्धप्रकाशेमातृकैकोद्दिष्टश्राद्धप्रयोगः समाप्तः ॥ ॥ छ ॥
॥ अथस्त्रीकर्तृकैकोद्दिष्टश्राद्धप्रयोगः ॥ पूर्वदिनेएकभक्तादिनियमंकृत्वा श्राद्धदिनेप्रातःस्नात्वा शुक्लवस्त्रयुगधारिणीनित्यकर्मसमाप्य
गोमयोपलिप्तेसुसमावृतेदेशेस्वयंपाकंकृत्वा मध्याह्नेपुनःस्नात्वा पूर्वोपकल्पितश्राद्धदेशमागत्यतिलतैलेनदीपंप्रज्वाल्यस्वासनेप्राङ्मुखी
उपविशेत् ॥ ततः कर्मपात्रंजलेनापूर्य्यतत्रगंधपुष्पतिलकुशादीनिनिक्षिप्यरजतादिपवित्रधारणंकृत्वा आचम्य अपवित्रः पवि

त्रोवा० ॥ १ ॥ पुंडरीकाक्षः पुनात्वितिकुशत्रयेणश्राद्धीयद्रव्याणिस्वात्मानंचप्रोक्षयेत् ॥ ततोभूम्यैनमः ॥ काश्यप्यैनमः । अक्षय्यायैनमः । भगवत्यैगयायैनमः । भगवतेगदाधरायनमः । इतिमनोवाक्कायैर्नमस्कारंकुर्यात् ॥ ततःकुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य अद्यामुकगोत्रस्यअस्मत्पत्युरमुकशर्मणोवसुरूपस्यसांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये इतिसंकल्प्य देवताभ्यः इतित्रिःपठेत् ॥ ततोदक्षिणामुखीपातितवामजानुस्तिलगौरसर्षपान्गृहीत्वा। नमोनमस्तेगोविंद पुराणपुरुषोत्तम॥इदंश्राद्धंहृषीकेश रक्ष तांसर्वतोदिशः॥१॥ इतिसर्वत्रपूर्वादिदिक्षुविकीर्य्य नीवीबंधंकुर्यात् ॥ अथासनादिदानम्॥द्विगुणभुग्नकुशत्रयतिलजलान्यादाय अद्या मुकगोत्र अस्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोदिष्टश्राद्ध इदमासनंतुभ्यंनमः । इतिपितृतीर्थेनदक्षिणाग्रमासनमुत्सृजेत्॥ ततः–तिलेभ्यो नमःइतितिलान्विकीर्यअर्घपात्रेपवित्रंधृत्वा अद्योनमः–इतिजलंप्रक्षिप्यतिलेभ्योनमः-इतितिलांस्तूष्णींगंधपुष्पाणिचनिक्षिपेत्॥ततोऽर्घ पात्रसंपत्तिरस्तु-इतिपठित्वाअर्घपात्रंवामहस्तेकृत्वातत्रस्थंपवित्रंपलाशपत्रेदक्षिणाग्रंधृत्वा अद्योनमः–इत्यभिमंत्र्य द्विगुणभुग्नकुशतिलज लान्यादाय-अद्यामुकगोत्रअस्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धे एषतेहस्तार्घोनमः-इत्यर्घंपवित्रोपरिददद्उत्सृजेत् ॥ ततोऽर्घपात्र मासनवामपार्श्वे पत्येस्थानमसि इतिन्युब्जीकुर्यात् ॥ ततोगंधादिदानम्॥ द्विगुणभुग्नकुशत्रयतिलजलान्यादायअद्यामुकगोत्र अस्मत्पते ऽमुकशर्मन्सांवत्सारकैकोद्दिष्टश्राद्ध. एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितुभ्यंनमः-इत्युत्सृजेत्॥ततःअर्चनंसंपूर्णमस्त्वितिप ठित्वा जलेन आसनंवेष्टयित्वार्घमंडलंकुर्यात्॥(अत्रपरकीयभूमौश्राद्धकरणेइदमन्नमेतद्भूस्वामिपितृभ्योनमः-इतिघृतादियुक्तमन्नंदद्यात्) ततोभोजनपात्रेउष्णमन्नंसघृतव्यंजनंसुशीतलजलसहितंयथावत्परिविष्यमधुदत्त्वामधुमधुमध्वित्यभिमंत्र्यअन्नपात्रंन्युब्जाभ्यांव्यस्ताभ्यां

॥२१९॥

पाणिभ्यांस्पृष्ट्वा विष्णवेनमः—इतिस्वांगुष्ठमनखमन्नेनिवेश्य इदमन्नम्। इमा आपः। इदमाज्यम्। एतत्सर्वंकव्यमित्यन्नजलघृतेषुनिक्षिप्य तिलेभ्योनमः-इतितिलान्पात्रपरितोविकीर्य पात्रंवामकरेणस्पृशन्दक्षिणकरेकुशादीन्यादाय अद्यामुकगोत्र अस्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्ध इदमन्नंसोपस्करंकव्यममृतरूपंतुभ्यंनमः—इत्युत्सृजेत्॥ ततः अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य मधुमधुमध्विंतिचजपेत्।ततोभूमौतिलान्विकीर्ययथारुचिस्तवादीनियथाशक्तिपठित्वा-नमस्तुभ्यंविरूपाक्ष नमस्तेऽनेकचक्षुषे। नमःपिनाकहस्ताय वज्रहस्तायवैनमः॥१॥इतिश्लोकमपिपठेत्॥ ततउच्छिष्टसन्निधौभूमिंप्रोक्ष्य तत्रदक्षिणाग्रकुशत्रयमास्तीर्य व्यंजनघृततिलसहितमन्नंगृहीत्वा अग्निदग्धाश्चयेजीवा येप्यदग्धाःकुलेमम॥ भूमौदत्तेनतृप्यंतु तृप्तायांतुपरांगतिम्॥ १ ॥ इतिकुशोपरितदन्नंविकीर्य सव्येन आचम्य विष्णुंस्मृत्वामधुमधुमध्विंतिचजपेत्।ततोऽपसव्यादिना उच्छिष्टसन्निधौचतुरस्रंदक्षिणप्लवंस्थानंनिर्माय तन्मध्ये दर्भपिंजुलीमूलेनदक्षिणाग्रांप्रादेशमात्रांरेखांकृत्वा दर्भपिंजुलीमुत्तरस्यांदिशिनिक्षिप्य ज्वलदुल्मुकंरेखोपरिभ्रामयित्वा दक्षिणतोनिदध्यात्।तत उपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वा प्राङ्मुखी देवताभ्यः-इतित्रिःपठित्वा दक्षिणामुखीपुटकेतिलजलगंधपुष्पाणिकृत्वा।पुटकंगृहीत्वा अद्यामुकगोत्रअस्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्वतेनमः-इतिकुशोपरि अवनेजनंदद्यात्।किंचिज्जलंपात्रे अवशेषयेत्।ततस्तिलजलव्यंजनमधुघृतयुतान्नेनपिंडंनिर्माय मधुघृताभ्यामभिघार्य कुशादीनि पिंडंचादाय अद्यामुकगोत्र अस्मत्पतेऽमुकशर्मन्वसुरूप सांवत्सरिकैकोद्दिष्टश्राद्धएषतेपिंडोनमः—इत्यवनेजनस्थानेकुशोपरिपिंडंदद्यात्।ततोदर्भमूलेकरंप्रोञ्छ्यहस्तौप्रक्षाल्यसव्येनाचम्य विष्णुंस्मरेत्॥ततोऽपसव्यादिना पत्येनमः-इतिपठित्वा वामावर्त्तेनोदङ्मुखीभूत्वा श्वासंनियम्य पतिंध्यायन्दक्षिणामुखी पत्येनमः

इतिश्वासमुत्सृजेत् ॥ ततः पूर्वदत्तावनेजनपात्रंगृहीत्वा अद्यामुकगोत्र अस्मत्पतेऽमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धपिंडेऽत्रप्रत्यवनेनिक्ष्व तेनमः इतिप्रत्यवनेजनंदद्यात ॥ ततोनीवींविस्रंस्य आचम्य अपसव्येन । वसंतायनमस्तुभ्यं ग्रीष्मायचनमोनमः ॥ वर्षाभ्यश्चशरत्संज्ञ ऋतवेचनमःसदा ॥१॥ हेमंतायनमस्तुभ्यं नमस्तेशिशिरायच ॥ माससंवत्सरेभ्यश्च दिवसेभ्योनमोनमः ॥२॥ इतिकृतांजलिःपठेत् ॥ ततःएतत्तेपतेवासोनमः इतिपिण्डोपरित्रिगुणितसूत्रमूर्णादशांवादत्त्वाकुशादीन्यादाय अद्यामुकगोत्रास्मत्पतेऽमुकशर्मन्एतत्तेवासोनमः-इत्युत्सृजेत् ॥ ततः पितरमुद्दिश्यतदीयपिण्डेगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदत्त्वापिण्डशेषान्नंपिण्डसमीपेविकिरेत् ॥ ततो भोजनपात्रेशिवा आपःसंतु—इतिजलम् । सौमनस्यमस्तु—इतिपुष्पम् । अक्षतंचारिष्टंचास्तु—इतियवतिलांश्चदद्यात ॥ ततःअद्यामुकगोत्रस्य अस्मत्पत्युरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धेदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकंदद्यात । ततःप्राङ्मुखी सव्येनकृतांजलिराशिषोगृह्णीयात् अघोरःपतिरस्तु—इति पूर्वाग्रां जलधारां दद्यात् ॥ ततः प्राङ्मुखी कृतांजलिः ॥ गोत्रंनोवर्द्धतामित्यादि पठित्वा एताःसत्या आशिषः संत्वित्याशिषः प्रार्थयेत् ॥ ततःपिंडोपरि दक्षिणामुखी सपवित्रकुशत्रयं दक्षिणाग्रमास्तीर्य्य तदुपरि दक्षिणाग्रां जलधारां दद्यात्। ततोऽर्घपात्रमुत्तानीकृत्य दक्षिणादानम्। अद्यामुकगोत्रस्यपत्युरमुकशर्म्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थंमिदंरजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणांदद्यात ततःपिंडमुत्थाप्य स्थाल्यांनिधायअवघ्राणं कृत्वा पिंडाधःस्तृतदर्भंचोल्मुकंचवह्नौक्षिपेत् ॥ ततोऽभिरम्यतामितिविसर्जनम् ॥ ततः प्राङ्मुखी देवताभ्य इतित्रिः पठेत् ॥ततोदक्षिणामुखी हस्ताभ्यांदीपंनिर्वाप्य ततोहस्तौ पादौ प्रक्षाल्याचम्यप्रमादात्कुर्वतामित्यादिपठित्वा श्राद्धसंपूर्णकामतयाविष्णुंस्मरेत्॥ततः

श्राद्धीयवस्तूनिब्राह्मणायार्प्पयेत् ॥ ततो यथाशक्तिब्राह्मणान्भोजयित्वा बांधवैः सहस्वयमपिभोजनंकुर्यात् ॥ इतिगौडीयश्राद्धप्रकाशे स्त्रीकर्तृकैकोद्दिष्टश्राद्धप्रयोगः ॥ अथविधवाकर्तृकमहालयादिषुपार्वणप्रकारः ॥ तत्र अपुत्रविधवास्वभर्तृतत्पितृपितामहानां सपत्नीकानां तथा स्वपितृपितामहप्रपितामहानां सपत्नीकानांच महालयापरपक्षीयपार्वणश्राद्धंकुर्यात् ॥ तत्रसंकल्पः ॥ देशकालौ संकीर्त्य अद्यामुकगोत्राणां ममभर्तृतत्पितृपितामहानां सपत्नीकानां द्वितीयगोत्राणां ममपितृपितामहप्रपितामहानां सपत्नीकानां तृप्त्यर्थं महालयापरपक्षश्राद्धं करिष्ये इतिसंकल्प्य पूर्वोक्तषड्दैवत्यपार्वणविधिना अमंत्रकं श्राद्धंकुर्यात् ॥ अथवास्वयं संकल्पंकृत्वा ब्राह्मण द्वाराकारयेत्॥तत्र (ब्राह्मणकर्तृकपक्षेएवंसंकल्पः) अमुकगोत्राया अमुकनाम्न्या ममयजमान्या भर्तृतत्पितृपितामहानां तथा तस्याएव पितृपितामहप्रपितामहानां तृप्त्यर्थं महालयापरपक्षपार्वणश्राद्धंकरिष्ये इत्युच्चार्य्य पूर्ववत्समंत्रकंप्रयोगंकुर्यात्॥इति विधवाकर्तृकषड्दैवत्यपार्वणविधानम्॥इतिश्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनगरनिवासिना श्रीवसिष्ठगोत्रोद्भवपंडितश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचंद्रसूनुना श्रीमहादेवभक्तवाजसनेयिना गौडपंडितश्रीचतुर्थीलालशर्मणा विरचितेगौडीयश्राद्धप्रकाशे पद्धतिखण्डे प्रेततृप्तिविधायकं पंचमंप्रकरणं समाप्तम् ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ अथ जीवच्छ्राद्धपद्धतिः॥ तावत् पुत्राद्यधिकाररहितः स्वीयमन्यस्यवा देशकालश्रद्धाधनव्यवसायाधिक्येसति जीवच्छ्राद्धंकर्तुमिच्छुर्यस्यांकस्यांचित्कृष्णद्वादश्यांप्रातःस्नानंकृत्वाशुक्लवाससीपरिधाय सध्यादिनित्यावश्यकंसमाप्य निर्विघ्नतार्थंगणेशादिदेवान्पूजयेत्॥ तद्यथा आचम्यप्राणानायम्यदेशकालौसंकीर्त्यॐअद्यकृष्णद्वादश्यांकरिष्यमाणजीवच्छ्राद्धे निर्विघ्नकामो गणेशनवग्रहकुलदेवतानां पूजन

महंकरिष्ये इतिसंकल्प्य चंदनादिनागणेशनवग्रहान्कुलदेवतांश्च पूजयेत ॥ ततस्ताम्रपात्रेजलगंधाक्षतपुष्पाणिगृहीत्वा ॐसूर्यायनमः इतिसूर्य्यायाऽर्घ्यंदत्त्वा देशकालौसंकीर्त्य ॐ अद्यकृष्णद्वादश्यांजीवच्छ्राद्धाङ्गभूतमुपवासव्रतंकरिष्यइतिसंकल्प्योपवासंकुर्यात् ॥ ततो मध्याह्नेस्नात्वा मध्याह्नसंध्यांकृत्वा श्रीमहाविष्णुंषोडशोपचारैःसंपूज्य तदग्रेयथायुक्तमर्घ्यंदत्त्वा वैतरणीधेनुदानं तिलादिमहाष्ट दानानि तिलपूर्णताम्रपात्रऋणधेनुपापधेन्वादिदानंच यथाशक्तिप्रेतकल्पोक्तवत्कुर्यात्।एवंयथासंभवंदानानिकृत्वा पुरुषसूक्तोपनिषद्भागव तानि गीताविष्णुसहस्रनामादीनिपुण्यस्तोत्राणिचपठेच्छृणुयाद्वा महामृत्युजयजपमपिकुर्यात् ॥ इतिद्वादशीकृत्यम् ॥ अथत्रयोद शीकर्म ॥ तत्रादौ प्रातःस्नानादिनित्यक्रियां समाप्य गंगातीरादिदेशे तदऽसंभवे शुद्धायां भूमौगोमयोपलिप्तायां धौतवस्त्रद्वयधरः कुश पाणिः प्राङ्मुखोबद्धशिखः स्वासने उपविश्य आचम्य कुशत्रययवजलान्यादाय देशकालौसंकीर्त्यॐअद्यकृष्णत्रयोदश्यां ममामुकगो त्रस्याऽमुकशर्मणो जीवतआत्मनः कर्त्तव्यौर्ध्वदैहिकक्रियाया मरणोत्तरभविष्यप्रेतत्वविमुक्तिकामः श्रीपरमेश्वरप्रीत्यर्थं जीवच्छ्राद्ध महंकरिष्ये–इतिसंकल्प्य जलमैशान्यांदिशिक्षिपेत् ॥ ततःॐभूरसिभूमिरसीत्यादिनाकलशंसंस्थाप्य मनोजूतिरितिप्रतिष्ठां कृत्वा तत्र वरुणंसंपूज्य प्रार्थ्य तदुपरिस्वर्णमयीं विष्णुप्रतिमांस्थापयेत् ॥ ततोदेशकालौस्मृत्वा ॐ अद्यजीवच्छ्राद्धांगभूतषोडशोपचारैर्विष्णुपू जांकरिष्ये।इतिसंकल्प्यॐसहस्रशीर्षा०इत्यादिपुरुषसूक्तेनषोडशोपचारैःसंपूज्यॐविष्णो क्षमस्व इतिक्षमाप्य तदग्रेतिस्रोजलधेनूःसोप स्कराःसतिलाः संस्थाप्यपूजयेत्॥तद्यथा–विष्णोरग्रेचतुर्हस्तपरिमितंमण्डलंकृत्वा तत्रपंचविंशतिकुशपत्ररचितंविष्टरमेकमादायॐसो मायपितृमतेस्वधानमः-इतिउत्तरदिशिदक्षिणाग्रंसंस्थाप्य॥एवंद्वितीयंविष्टरम्ॐअग्नयेकव्यवाहनायस्वधानमः इतिदक्षिणदिशिदक्षिणाग्रं

स्थापयेत् ॥ ततस्तृतीयं द्वयोर्मध्ये ॐयमायांगिरसेस्वधानमः-इतिदक्षिणाग्रेस्थापयेत् ॥ ततस्तत्रक्रमेणत्रीन्कुम्भान् ॐआजिघ्रकलशे तिसंस्थाप्यप्रत्येकं ॐवरुणस्योत्तंभनमितिजलेनापूर्य्यॐपरिवाजपतिरितिपंचरत्नानिॐकाण्डात्काण्डादितिदूर्वाःॐअश्वत्थेवइतिपंचपल्ल वांश्चनिक्षिप्यॐव्वसोःपवित्रमसीतिसितयुग्मवस्त्रेणावेष्टयेत्॥ततः प्रतिकलशंत्रीणिकांस्यपात्राणिपृथक्पृथग्घृतमधुदधिपूरितानिमुखस्थाने स्थापयेत्॥(मुखस्थानंकुशविष्टरमूले)तत्रैवकुष्ठ-मांसी मुरा-उशीर-आमलक-इति पंचौषधिघ्राणदेशेस्थाप्य(घ्राणदेशमपिकुशविष्टरमूलम्) ततः प्रियंगुपत्राणिआदायप्रत्येकंकर्णयोःस्थाप्य (कुशविष्टरस्यघ्राणसमीपेकर्णदेशे) ततोयज्ञोपवीतंशिरःस्थानेप्रत्येकंस्थापयेत् ॥ ततश्चतुस्ताम्रपात्राणितिलपूरितानिप्रत्येकंकुंभंचतुर्दिक्षुसंस्थाप्यप्रत्येकंकुंभपार्श्वेछत्रमुपानत्कंस्थापयेत् । ततःप्रत्येकंस्वर्णशृंगाणि रौप्य खुराणिचसंस्थाप्यएवंप्रकारेणचतुर्थांशेनत्रीणिवत्सरूपाणितत्रैवकारयेत् ॥ इतिजलधेनुस्थापनप्रकारः ॥ अथपूजनप्रकारः।तत्रतावद्देश कालौसंकीर्त्यॐअद्यकृष्णत्रयोदश्यांजीवच्छ्राद्धाङ्गभूतजलधेनुत्रयपूजनमहंकरिष्येइतिसंकल्प्यॐसोमोद्देश्यसवत्सायैजलधेनवेनमः-इ त्युत्तरस्थांषोडशोपचारैःसंपूजयेत्॥ततः ॐअग्न्युद्देश्यसवत्सायैजलधेनवेनमः-इतिदक्षिणस्थांद्वितीयां०॥ॐयमोद्देश्यसवत्सायैजलधेन वेनमः-इतिमध्यस्थांतृतीयांचषोडशोपचारैःपूजयेत् ॥ एवंसंपूज्यॐसोमायत्वापितृमतेस्वधानमः-इतिमंत्रेणउत्तरस्थांनिवेदयेत्।ॐअग्न येकव्यवाहनायस्वधानमः-इतिदक्षिणस्थां०।ॐयमायांगिरसेस्वधानमः-इतिमध्यस्थांचनिवेदयेत्। ततोऽपराह्णेनिमंत्रितपंचब्राह्मणान्स्ना तान्यजमानसवर्णेनाहूतान्प्रांगणेशुचिःकृतांजलिर्दर्भेषुतिष्ठन्स्वागतमितिब्रूयात्। सुस्वागतमितितेरुक्तेगोमयोपलिप्तायांभूमौपीठाद्यासने षूपवेश्य दक्षिणहस्तेनब्राह्मणजानुस्पृष्ट्वादेवब्राह्मणौप्राङ्मुखौवस्वादिब्राह्मणांस्त्रीनुदङ्मुखान्निमंत्रयेत् । तद्यथा-ॐअद्यजीवच्छ्राद्धसंबंधि

विश्वेदेवश्राद्धार्थंयुवामहमामंत्रये-इतिदेवविप्रौनिमंत्र्य।ॐअद्यवसुश्राद्धार्थंत्वामहमामंत्रये-इत्येकंवसुश्राद्धार्थंचनिमंत्र्यएवमेवरुद्रादित्य
श्राद्धार्थंचएकैकंविप्रंनिमंत्रयेत्। एवंपंचब्राह्मणाभवंति। आमंत्रितोस्मीतिप्रतिवचनम्। ततः ॐअक्रोधनैःशौचपरैः सततंब्रह्मचारिभिः।
भवितव्यंभवद्भिश्च मयाचश्राद्धकारिणा-इतिब्राह्मणान्श्रावयेत् ॥ भवितव्यमितिप्रतिवचनम्॥ततः इदंवःपाद्यमितिपाद्यमुपनीय विनीतः
स्वयमेवतेषांपादौप्रक्षालयेत् ॥ ततः ॐविश्वेदेवाइदमर्घ्यंवःस्वाहानमः—इत्युभयत्रब्राह्मणपादयोर्यवपुष्पगंधोदकैरर्घंदत्त्वा ॐअद्यवस.
वएषोऽर्घोयुष्मभ्यंस्वधानमः इतिवसुब्राह्मणपादयोरर्घंदद्यात् ॥ एवमेवरुद्रादित्यब्राह्मणपादयोरर्घंदद्यात् ॥ ततः ॐइदमाचनीय
मितिब्राह्मणेभ्य आचमनार्थंजलंदत्त्वा स्वयमप्याचमनंकृत्वा ब्राह्मणैः सहश्राद्धभूमिमागत्यान्नाभिप्रायेणसिद्धमित्युक्त्वाआसनानिकल्प
यित्वा उपस्पृश्य ॥ अत्राध्वमितिदेवब्राह्मणौप्राङ्मुखौ वस्वादिब्राह्मणानुदङ्मुखानुपवेशयेत् ॥ ततस्तेषांपादयोरधस्तात्कुशत्रयंदत्त्वा
प्रत्यासनसमीपेतिलतैलेनदीपान्प्रज्वाल्य काककुक्कुटादीन्श्राद्धापहंतॄनपसारयेच्छ्राद्धदेशावरणंचकुर्यात् ॥ ततःकर्त्ताब्राह्मणानांपुरतः
स्वासनेप्राङ्मुख उपविश्य सव्येनकुशपवित्रधारणमाचमनंचकृत्वा ॐअपवित्र०ॐ पुंडरीकाक्षःपुनात्वितिपठित्वा कुशत्रयानीतजलेन
श्राद्धीयद्रव्याणि स्वात्मानंचसिंचेत ॥ ततःॐभूम्यैनमः ॐगयायैनमः ॐभगवतेगदाधरायनमः—इतिनत्वा कुशत्रयतिलजलान्यादाय
ॐअद्यजीवच्छ्राद्धांगभूतवसुरुद्रादित्यानां सदैवंपार्वणश्राद्धंकरिष्ये इतिसंकल्प्य कुरुष्वेतिब्राह्मणानुज्ञातोगायत्रींत्रिर्जपित्वा ॐ देव
ताभ्य-इतित्रिर्जपेत ॥ ततस्तिलगौरसर्षपान्गृहीत्वा ॐनमोनमस्तेगोविंद इत्यादिमंत्रैः पूर्वोक्तपार्वणवत्सर्वत्रविकीर्यंनीवीबंधंकुर्यात्॥ततः
ॐयद्देवादेवहेडनमित्यादिकूष्मांडसूक्ताभिमंत्रितजलैरन्नंप्रोक्ष्यहरयेनिवेदयेत ॥ तत उदङ्मुखोदक्षिणंजान्वाच्य यज्ञोपवीत्यंतर्जानुकरो

जलयवसमन्वितमृजुकुशत्रयमादाय ॐअद्यजीवच्छ्राद्धेवस्वादिश्राद्धसंबंधिनोविश्वेदेवाः इदमासनंवोनमः इत्युच्चार्य्यमिलितद्विजह
स्तयोर्जलमासिच्य आसनदक्षिणभागस्योपरिदेवतीर्थेनपूर्वाग्रंकुशत्रयंत्यजेत्॥ततोदक्षिणाभिमुखः प्राचीनावीतीःपातितवामजानुःद्विगु
णभुग्नकुशत्रयतिलजलान्यादायॐअद्यजीवच्छ्राद्धे इदमासनंवसुभ्यःस्वधानमः-इतिपठित्वा प्रथमविप्रकरेजलंदत्त्वा आसनवामभागस्यो
परिमोटकरूपंकुशत्रयंपितृतीर्थेनदद्यात्॥ एवमेवरुद्रादित्येभ्योप्यासनंदद्यात्।ततःसव्येनॐविश्वान्देवानावाहयिष्ये-इतिदेवब्राह्मणौपृष्ट्वा
आवाहय-इत्यनुज्ञातोदेवब्राह्मणांगुष्ठेगृहीत्वाॐविश्वेदेवासः-इत्यावाह्यायवोसियवया०इतियवान्विकीर्यॐविश्वेदेवाःशृणुत०इत्यादिप
ठेत्।विश्वेदेवोत्पत्तिनाम्नोरज्ञाने-आगच्छंतुमहाभागा०इतिश्लोकमपिपठेत्।ॐततोऽपसव्येनॐपितॄनावाहयिष्ये-इतिपितृब्राह्मणांगुष्ठंगृही
त्वाॐउशन्तस्त्वा-इत्यावाह्यॐअपहता० इतितिलान्विकीर्यॐआयंतुन० इत्यादिमंत्रंपठेत् ॥ ततोऽर्घपात्रपंचके प्रत्येकमेकैकंपवित्रं
धृत्वाॐशन्नोदेवीरितिमंत्रावृत्त्याप्रतिपात्रंजलंप्रक्षिप्यॐयवोसीतिदेवपात्रद्वययवान्प्रक्षिप्यॐतिलोसि०इत्यादिमंत्रावृत्त्यावस्वादिपा त्रये
तिलान्प्रक्षिप्य पंचस्वपिगंधपुष्पाणितूष्णींक्षिपेत्।ततःसव्येनॐदेवार्घपात्रसंपत्तिरस्तु-इतिपठित्वा अस्तुसंपत्तिरित्यनुज्ञातःप्रथमंदेवार्घ
पात्रंवामहस्तेकृत्वा तत्रस्थंपवित्रंदेवविप्रकरे पूर्वाग्रंदत्त्वाकिंचिदुदकान्तरंचदत्त्वाॐयादिव्या०इत्यभिमंत्र्यॐविश्वेदेवाएषवोहस्तार्घःस्वाहा
नमः-इतिदक्षिणहस्तेनपवित्रोपरिअर्घ्यंदत्त्वापवित्रसहितमर्घ्यपात्रंपुरतःस्थापयेत्। ततोऽपसव्येनवसुपात्रंवामहस्तेकृत्वातत्रस्थंपवित्रंतद्वि
प्रकरे उत्तराग्रंदत्त्वाॐयादिव्या०इतिपठित्वा॥मोटकादीन्यादायॐअद्यवसवः एषवोर्घःस्वधानमः-इतिपितृतीर्थेनपवित्रोपरि अर्घजलं
दत्त्वा पवित्रसहितमर्घपात्रमग्रे स्थापयेत ॥ एवमेवरुद्रादित्येभ्योपितत्तन्नाम्नार्घदद्यात ॥ अत्रसंस्रवबहुत्वाऽभावेनसमवनयनाभावात्पात्र

न्युब्जीकरणाभावः अतः सर्वेषांपात्राणामुत्तानमेवस्थापनम् ॥ ततःसव्येनविप्रकरयोर्जलमासिच्य गंधपुष्पधूपदीपादिकंधृत्वा कुशत्र
ययवजलान्यादाय ॐविश्वेदेवाः एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि वोनमः इत्युत्सृजेत् ॥ ततःकृतांजलिः ॐ
विश्वेषांदेवानामर्चनंसंपूर्णमस्तु–इतिब्रूयात ॥ ॐ अस्त्वर्चनंसंपूर्णमितिप्रतिवचनम् ॥ ततोऽपसव्येन गंधादिकंधृत्वाविप्रकरेजलमासि
च्य मोटकादीन्यादायॐअद्यवसवः एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसियुष्मभ्यंस्वधानमः- ॥इतिउत्सृजेत ॥ एवमेवरुद्रा
दित्येभ्योपिगंधादिदद्यात ॥ ततः पितॄणामर्चनंसंपूर्णमस्त्वितिपठित्वा अस्त्वर्चनंसंपूर्णमित्यनुज्ञातः अयंवोगंधःइदंवोमाल्यमित्यादि
क्रमेणप्रत्येकं ब्राह्मणेभ्यःप्रतिपादयेत्।तैश्चपुष्पाणिशिखावर्ज्यंनधार्याणि।अत्रावसरे अन्यान्यप्याभरणकमंडलुशय्यासनप्रभृतीनिद्रव्या
णिफलार्थितयादेयानि॥ततो वसुभ्यस्त्वामहंविप्र भोजयामि॥रुद्रेभ्यस्त्वामहविप्र भोजयामि॥सूर्येभ्यस्त्वामहंविप्र भोजयामि-इतिपठि
त्वा भोजनपात्रस्थापनदेशंसमार्ज्य नीवारचूर्णेनगौरमृत्तिकयावा प्रणीताग्निभस्मनाजलेनवा ब्राह्मणान्वेष्टयित्वामंडलानिकुर्यात् ॥
ततो भोजनपात्राणिदत्त्वा हस्तप्रक्षालनार्थंप्रत्येकं जलंदद्यात् ॥ अथाग्नौकरणम् ॥ तत्रतावद्व्यंजनक्षारवर्जितं घृताक्तमुष्णंश्राद्धीया
न्नाग्रभागंकांस्यपात्रे समुद्धृत्यॐअग्नौकरणंकरिष्ये–इतिपृष्ट्वा कुरुष्वेत्यनुज्ञातः पित्र्यविधिनावसुब्राह्मणहस्तेजलेवा ॐ अग्नयेकव्यवा
हनायस्वाहा ॥ इदमग्नयेकव्यवाहनाय ॥ ॐ सोमायपितृमतेस्वाहा ॥ ॥ इद सोमायपितृमते–इत्याहुतिद्वयं जुहुयात् ॥
ततः शेषमन्नंरुद्रादित्यपात्रयोर्दत्त्वा पिंडार्थंचावशेषयेत् ॥ ततः सव्येनदेवपात्रद्वये अपसव्येन वस्वादिपात्रेषुच उष्णमन्नंसघृतमनेकव्यं
जनयुतं सुशीतलजलसहितंयथावत्परिविष्य मधुनाभिघार्यॐमधुव्वाताऽऋतायते इत्यादित्र्यृचामधुमधुमध्वित्यनेनचाभिमंत्रयेत्।वव

(सव्येन) उत्तानपाणिभ्यां देवपात्रमालभ्य ॐपृथिवीते० इतिजप्त्वा इदंविष्णु० इत्येतांवैष्णवीमृचमुच्चार्य्याऽधोमुखद्विजाङ्गुष्ठमनखंस्वहस्ते
नगृहीत्वा ॐविष्णोहव्यर्ठःरक्ष-इतियजुषाऽन्नेनिवेश्य इदमन्नम् इमा आपः इदमाज्यम् एतत्सर्वंहविरित्युक्त्वा ॐअपहता० इत्यन्नपात्रंपरि
तोयवान्विकीर्य दक्षिणकरेणकुशत्रययवजलान्यादाय ॐअद्यवस्वादिश्राद्धसंबंधिनोविश्वेदेवाःइममन्नंसोपस्करंहव्यंपरिविष्टंपरिवेक्ष्यमा
णंच ब्राह्मणतृप्तिपर्यंतममृतरूपंवः स्वाहानमः-इत्युच्चार्य्य उदकंदेवतीर्थेनविप्रदक्षिणभागे भूमौक्षिपेत् ।ततोऽपसव्येनन्युब्जपाणिभ्यांव्य
स्ताभ्यां वसुपात्रमालभ्यॐपृथिवीते० इदंविष्णु० इत्यादिपठित्वा ॐविष्णोकव्यर्ठः रक्षइत्यनयापूर्ववदंगुष्ठंनिवेश्य अपहता० इत्यादिना
तिलान्पात्रंपरितोविकीर्य्य द्विगुणभुग्नकुशत्रयादीन्यादाय ॐअद्यजीवच्छ्राद्धे वसवः इदमन्नंसोपस्करंकव्यंपरिविष्टं परिवेक्ष्यमाणंचब्राह्म
णतृप्तिपर्यंतममृतरूपं युष्मभ्यंस्वधानमः इत्युदकंपितृतीर्थेनविप्रवामभागेभूमौनिक्षिपेत् ॥ एवमेवरुद्रादित्येभ्योपितत्तन्नाम्नोत्सृजेत् ॥
ततः ॐअन्नहीनमित्यादिप्रार्थ्य जुषध्वमिच्छातः इतिचोक्त्वा भवंतः प्राशयन्तु इतिब्राह्मणेभ्यः सकृत्सकृदपोशानंदद्यात् ॥ तेच वा
ग्यताः नियमवंतः ॐकारपूर्वंभुंजेरन् ॥ श्राद्धकर्त्तातेष्वश्नत्सु व्याहृतित्रयपूर्वांसप्रणवांगायत्रींत्रिःसकृद्वाजपेत् ॥ ततः पवित्रपाणिर्द
र्भेष्वासीनःॐमधुवाताऽऋतायते० इतित्र्यृचं मधुमधुमध्वतिचपठेत् ॥ ततः(सव्येन)ॐकृणुष्वपाजः-इत्यादिरक्षोघ्नीः पंचऋचः पठित्वा
भूमौतिलान्विकीर्य वस्वादिरूपतया ब्राह्मणान्ध्यायन् ॐ उदीरतामवर-इत्यादिपितृमंत्रान्सहस्रशीर्षेत्यादिपुरुषसूक्तम् ॥ ॐ आशुः
शिशानः-इत्याद्यप्रतिरथंचपठेत् ॥ ततः अन्यान्यपिरुचिस्तवप्रभृतीनिपवित्राणिपठेत् ॥ अथतृप्तान्ज्ञात्वा (अपसव्येन) उच्छिष्ट
सन्निधौविप्राग्रतोभूमिंप्रोक्ष्य तत्रदक्षिणाग्रकुशत्रयमास्तीर्य्य सर्वप्रकारमन्नंसव्यंजनमुद्धृत्य सतिलमेकीकृत्य ॐ अग्निदग्धाश्चेतिमंत्रेण

कुशोपरितदन्नंविकिरेत।ततः (सव्येन) आचम्य हरिंस्मृत्वा ब्राह्मणेभ्योजलगंडूषंदत्त्वा गायत्रीं मधुवाता० इत्यादित्र्यृचंमधुमधुम ध्वति
चजपेत ॥ ततस्तृप्ताःस्थ–इतिपृष्ट्वा तृप्ताःस्मइतितैरुक्ते शेषमन्नंकिंक्रियतामितिपृष्ट्वाइष्टैः सहभुज्यतामित्युक्ते पिंडानमहंकरिष्ये–इति
पृच्छेत्।कुरुष्वेत्यनुज्ञातोऽपसव्यादिनावस्त्रादिब्राह्मणोच्छिष्टसंनिधौचतुरस्रंमण्डलाकारंवाचतुरंगुलोच्छ्रितंसैकतंवस्वादिपिंडदानार्थंस्था
नंनिर्मायतन्मध्यदेशेदर्भपिंजुलीमूलेन ॐअपहता० इतिसव्योपगृहीतदक्षिणहस्तेनदक्षिणाग्रां रेखांसकृदुल्लिख्य दर्भपिंजुलीमुत्तरस्यांदि
शिनिक्षिपेत ॥ ततः ॐ येरूपाणीतिमंत्रेणज्वलदुल्मुकंरेखोपरिभ्रामयित्वा दक्षिणतोनिदध्यात् ॥ ततः उपमूलसकृदाच्छिन्नदक्षिणाग्र
कुशत्रयंरेखोपरिस्तीर्त्वा देवताभ्य० इतित्रिर्जपेत । ततः पुटकत्रये जलतिलगंधपुष्पाणिकृत्वा । एकंपुटकंवामहस्तेकृत्वा मोटकादीन्या
दाय ॐ अद्यजीवच्छ्राद्धेवसवः अत्रावनेनिग्ध्वंयुष्मभ्यंस्वधा इतिकुशमूले अवनेजनंदत्त्वा एवमेवरुद्रा।दित्येभ्यःकुशमध्याग्रयोर्दद्यात॥
ततः सर्वस्माच्छ्राद्धशेषान्नादुष्णमन्नमुद्धृत्य मध्वाज्यतिलसर्वव्यंजनयुतंपात्रेकृत्वा बिल्वोपमांस्त्रीन्पिंडान्निर्माय मधुघृताभ्यामभि
घार्य्य प्रथमपिंडमादाय मोटकादिना ॐ अमुकगोत्रस्यममामुकशर्मणो मरणोत्तरभविष्यप्रेतत्वविमुक्त्यर्थं जीवच्छ्राद्धेवसवःएषपिंडः
युष्मभ्यंस्वधा–इतिकुशमूलेदत्त्वा एवंरुद्रेभ्यः कुशमध्ये पुनः आदित्येभ्यश्चकुशाग्रेपिंडंदद्यात् ॥ ततः कुशमूले लेपभुजांतृप्तिमुद्दि
श्य लेपभागभुजः पितरस्तृप्यन्तु-इति करौप्रोञ्छ्य जलेनप्रक्षाल्य सव्येनत्रिराचम्यविष्णुंस्मरेत । ततः (अपसव्येन) ॐअत्रपितरोमा
दयध्वंयथाभागमावृषायध्वमितिपठित्वा वामवर्त्तेनोदङ्मुखोभूत्वा श्वासंनियम्यतेनैवपथापरिवृत्यॐअमीमदंत पितरोयथाभागमावृषा
यिषत-इतिजपेत् । ततःपूर्वदत्तावनेजनावशिष्टजलेन पिण्डोपरिप्रत्यवनेजनंदत्त्वानीवींविस्रंस्य सव्येन।चम्य(अपसव्येन)ॐनमोवःपितरो

रसाय—इति कृतांजलिः पठेत् ॥ ततः ॐ एतद्वः पितरोवासः—इति पठित्वा पिण्डेषुसूत्राणि प्रतिपिण्डमूर्णादशावादत्त्वा ॐ अंद्यव सवः एतद्वासो युष्मभ्यंस्वधा—इत्युत्सृज्य एवंरुद्रादित्येभ्योप्युत्सृजेत् ॥ ततोवस्वादीनुद्दिश्य तदीयपिण्डेषुतूष्णींगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदद्यात् ॥ ततोब्राह्मणहस्तेषु ॐ शिवाआपः संत्वितिसकृत्सकृज्जलंदद्यात् ॥ ॐसौमनस्यमस्त्वितिपुष्पाणि ॐअक्षतचारिष्टमस्त्वितियवांश्चदद्यात् ॥ अस्तु इतिप्रतिवचनम् ॥ ततः कुशतिलजलान्यादाय ॥ ॐ अद्यजीवच्छ्राद्धेवसूनांदत्तैतदन्नपानादिकमक्षय्यमस्तु—इतिविप्रकरे जलंदद्यात ॥ एवं रुद्राणामादित्यानांच तत्तद्विप्रकरेदद्यात् ॥ ततः सव्यंकृत्वा प्राङ्मुखस्तन्मनाःकृतांजलिदक्षिणां दिशंपश्यन् ॐ अघोराः पितरः संत्वितिवदेत् ॥ सन्त्वितितैरुक्ते ॐ गोत्रंनोवर्द्धतामित्यादिवदेत् ॥ वर्द्धतामितिप्रतिवचनम् । ततः (अपसव्येन) पिण्डोपरिसपवित्रान्कुशानास्तीर्यस्वधांवाचयिष्ये—इतिब्रूयात् । वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यश्च स्वधोच्यतामितिवदेत् ॥ अस्तुस्वधेतितैरुक्ते ॐ ऊर्ज्जंवहंतीरितिमंत्रेण सपवित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात् ॥ ततः पिण्डानुत्थापयामि ॥ उत्थापय—इत्यनुज्ञातः पिण्डानुत्थाप्य स्थाल्यांनिधायाऽवघ्राणं कृत्वापिण्डाधःस्थान्सकृदाच्छिन्नदर्भानुल्मुकंचाग्नौक्षिपेत् ॥ ततोऽर्घपात्राणिसंचाल्यदेवब्राह्मणाभ्यांदक्षिणांदद्यात् ॥ तद्यथा (सव्येन) कुशत्रययवजलान्यादाय ॐ अद्यकृतैतज्जीवच्छ्राद्धांगभूतवस्वादिश्राद्धसंबंधिविश्वेषांदेवानां श्राद्धप्रतिष्ठार्थमिदंतिलपूरितकांस्यपात्रं सदक्षिणममुकगोत्राभ्याममुकशर्मभ्यांब्राह्मणाभ्यामहंसंप्रददे इतिसंकल्प्य पात्रंताभ्यांप्रतिपादयेत् ॥ स्वस्तीतिप्रतिवचनम् ॥ ततः ॐ अद्यजीवच्छ्राद्धेवसूनांश्राद्धप्रतिष्ठार्थमिमामुत्तरस्थांसोमोद्देश्यकांसोपस्करांजलधेनुममुकगोत्रायामुकशर्मणेवसुस्थानीयब्राह्मणायतुभ्यमहंसंप्रददे इतिप्रतिपादयेत् ॥ ततः ॐ अद्यजीवच्छ्राद्धाङ्गभूतरुद्राणांश्रा

द्धप्रतिष्ठार्थमिमांदक्षिणस्थामस्युद्देश्यकांसोपस्करांजलधेनुममुकगोत्रायामुकशर्मणेरुद्रस्थानीयब्राह्मणायतुभ्यमहंसंप्रददे–इतिदद्यात्॥पुनः
ॐअद्य० आदित्यानांश्राद्धप्रतिष्ठार्थमिमांमध्यस्थांयमोद्देश्यकांसोपस्करांजलधेनुममुकगोत्रायामुकशर्मणे आदित्यस्थानीयब्राह्मणायतु
भ्यमहंसंप्रददे–इतिब्राह्मणायप्रतिपादयेत् ॥ ततःॐविश्वेदेवाःप्रीयंतामितिभवंतोऽधिब्रुवंतु–इतिदेवद्विजान्वाचयित्वाॐप्रीयंतांवोविश्वे
देवाःइतिप्रतिवचनान्तरम्ॐवाजेवाजेइतिमंत्रेणवस्वादिब्राह्मणानुत्थाप्य पंक्तिमूर्द्धन्यमंगुष्ठेनगृहीत्वागृहीतोदकपात्रोविसर्जयेत्॥एवमेव
देवब्राह्मणौविसर्जयेत् ॥ ततस्तान्बहिःस्थितान्ॐआमवाजस्यइतिप्रदक्षिणीकृत्याष्टौपदान्यनुव्रज्यगृहंप्रविशेत्॥ततोरक्षादीपान्निर्वाप्य
उच्छिष्टापनयनंपिण्डप्रतिपत्तिजलादिप्रक्षेपणरूपांकृत्वाहस्तौपादौप्रक्षाल्याचम्यॐनमोनारायणाय–इतिजपन्विष्णोक्षमस्वस्वस्थानंग
च्छ–इत्युक्त्वापुष्पांजलिनाविष्णुंविसृज्यब्राह्मणेभ्योभूरिभोजनंदत्त्वावैश्वदेवान्तेस्वयंपारणंकृत्वासायंसंध्यादिकर्मसमाप्यकामकालेशान वि
शेषकंविष्णुंस्मरन्यथाशक्तिजागरणंकुर्यात् ॥ इतित्रयोदशीकृत्यम् ॥ अथचतुर्दशीकृत्यम् ॥ तावत्प्रातःस्नानादिपंचयज्ञांतंनित्यकृत्यं
निर्वर्त्य ब्राह्मणोग्रामस्यपूर्वद्वारेण उत्तरेणक्षत्रियः पश्चिमेनवैश्यः दक्षिणेनशूद्रोयवान्वस्त्राणिलोहखंडानिच ॐजितंतेपुंडरीकाक्ष नमस्ते
विश्वभावन ॥ नमस्तेस्तुहृषीकेश महापुरुषपूर्वज–इतिपठन्विकिरन् महानद्यादिकेतीरेकूपेतरजलाशयेवायथासंभवंगच्छेत्॥तत्रभूमिंसं
शोध्य दक्षिणाभिमुखोभूत्वा स्मार्ताग्निंलौकिकाग्निंवास्वयंप्रज्वाल्य चितार्थंस्थानंसंचिंत्य त्रैवर्णिकद्वाराचितांनिर्मायपूर्वंज्वालितेग्नौ आ
ज्येनाहुतित्रयंजुहुयात् ॥ ॐभूम्यैस्वाहा ॥ १ ॥ ॐयमायस्वाहा ॥ २ ॥ ॐरुद्रायस्वाहा ॥ ३ ॥ इतिहुत्वा ततःपंचाशत्कुशान्गृही
त्वापुरुषाकारप्रतिकृतिंकुर्यात्॥तद्यथा-ॐअद्यब्रह्मलोकगमनहेतुकामआत्मप्रतिकृतिंकरिष्ये–अथवाअमुकत्रैवर्णिकद्वाराकारयिष्ये-इति

संकल्प्य मनुष्याकारंपुत्तलकंकृत्वा ऊर्णासूत्रेणप्रत्यंगंबद्ध्वायवपिष्टेनलिप्त्वा ॐगयादीनि चतीर्थानि- इत्यादिमंत्रैर्जलेसर्वतीर्थान्यावाह्यतेन जलेनप्रतिकृतिंस्नाप्य गोपीचंदनगंगोदकादिनोपलिप्य शुद्धवस्त्रयज्ञोपवीततुलसीपत्रमालादिभिर्भूषितंशवरूपिणंकृत्वा पूर्वनिर्मितचिता यामास्तीर्णकुशायामूर्ध्वमुखंसंस्थाप्यवस्त्रेणाच्छाद्यपिंडदानंकुर्यात् ॥ तत्रदक्षिणाभिमुखः कुशत्रयतिलजलान्यादाय ॐअद्यममामुक गोत्रस्यमरणोत्तरभविष्यप्रेतत्वनिवृत्त्यर्थंयवपिंडदानमहंकरिष्ये-- इतिसंकल्प्य चतुष्कोणंमंडलंकृत्वा तत्रदक्षिणाग्रान्दर्भानास्तीर्य्याप सव्यंकृत्वा यवापिष्टेनतिलमधुघृतदुग्धयुक्तेनपंचपिण्डान्निर्माय एकंपिंडकुशादीनिचादायओंअमुकगोत्रस्यममामुकशर्मणो भविष्यमरणो त्तरमृत्युस्थानभूम्यधिष्ठानदेवताप्रीत्यर्थमेषमेपिण्डः स्वधा-इतिकुशोपरिदद्यात् ॥ १ ॥ पुनः द्वितीयंपिण्डमादाय ओंअमुक० द्वारदेशे गृहवास्त्वधिदेवताप्रीत्यर्थमेषमेपिण्डःस्वधा-इतिद्वितीयं० ॥ २ ॥ तृतीयंवृक्षमूले ओंअद्यामुक० मरणोत्तरविश्रांतस्थानेपिशाचराक्षस यक्षप्रीत्यर्थमेषमेपिण्डःस्वधा इतितृती० ।३। चतुर्थम् ओंअद्यामुक० मरणोत्तरचत्वराधिष्ठातृखेचरदेवताप्रीत्यर्थमेषमेपिडःस्वधा-इतिदद्या त् ॥ ४ ॥ ततःपाषाणलोष्टसंचयेश्मशानदेवताःसंपूज्य गोमयोपलिप्तायांभूमौपंचभूसंस्कारान्कृत्वा तत्रतुलसीचंदनादियज्ञियकाष्ठे नचितिंनिर्माय तत्रास्मप्रतिकृतिंस्थाप्य तद्दक्षिणभागेकुशोपरिओंअद्यचितास्थानेश्मशानवासिभूतादिप्रीत्यर्थमेषमेपिण्डःस्वधा-इतिपि ण्डंदद्यात् ॥ ततःतद्दक्षिणकुशौषष्ठंपिण्डंदत्त्वाततोऽग्निप्रज्वाल्यओंक्रव्यादायनमः इतिगंधादिनासंपूज्यओंअस्मात्त्वमभिजातोसि इतिघृ ताहुतिंदत्त्वा प्रथमंशिरोभागेस्वयंदहेत् । ततःस्थलान्तरेभूमिशुद्धिंकृत्वा तत्र अग्न्यंतरंप्रज्वाल्य मुद्गतंडुलतिलतंडुलचरुस्थालीद्वयनिर्वापं कृत्वा प्रत्येकंमधुक्षीरघृतोदकैःपूरयेत् तत्समीपेमुद्गपूरितानित्रीणिशरावाणिकृत्वा ओंपृथिव्यैनमस्तुभ्यमित्येकंभूम्यनिवेद्य ओंय

मायनमस्तुभ्यमित्यनेनद्वितीयंयमाय० ॐरुद्रायश्मशानपतयेनमः इतितृतीयंरुद्रायनिवेदयेत् ॥ ततोदीप्तप्रतिकृतिदाहमग्निम् ॐकव्या
दवह्नितप्तायैभूम्यैनमः इतिपठन्क्षीराक्तजलकुम्भजलेन निर्वापयेत् ॥ ततः नद्यादिकेस्नात्वा नाभिमात्रेजलेस्थित्वा दक्षिणामुखः
(प्राचीनावीती) ॐयमायस्वधानमः ॥ ॐधर्मराजायस्वधानमः ॥ ॐमृत्यवे० ॥ ॐअन्तकाय० ॐवैवस्वताय०॥ॐकालायस्व
धा०॥ॐसर्वप्राणहरायस्वधानमः-इतिप्रत्येकंसतिलजलांजलिंदत्त्वा बहिरागत्यॐरुद्रायश्मशानपतयेनमः–इतिमंत्रेणतिलोदकपूर्णकुंभं
भुविविकिरेत् ॥ ततो भूमौदक्षिणाग्रकुशत्रयमास्तीर्य्य ॐशुक्रवाहाय रुद्रायस्वधानमः इतिमंत्रं स्मरन् ॐअमुकगोत्राऽमुकशर्मन्
इदंतिलोदकंतुभ्यमस्तु–इतितिलोदकं स्वस्मैदर्भोपरिदद्यात्॥ ततः–पूर्वकृतचरुद्वयोद्धृताभ्यां मुद्गभक्त १–तिलभक्ताभ्यां २–प्रत्येकंपंच
पंच–इत्येवंदशपिण्डान्निर्माय मरणोत्तरीयदशपिंडदानेतिकर्त्तव्यतया प्रेतशब्दोच्चारणरहिततया दशपिण्डान्दद्यात् ॥ तद्यथा ॐ
अद्यामुकगोत्रस्य ममामुकशर्मणः कर्त्तव्योर्ध्वदेहिकक्रियायां शरीरावयवपूरकदशपिण्डदानमहंकरिष्ये--इतिसंकल्प्य ॥ गौरमृत्ति
कांस्थाप्य (अपसव्येन) दर्भास्तरणमवनेजनंचकृत्वा तिलजलमधुघृतक्षीरयुक्तमुष्णंपिण्डं कुशतिलजलानिचादाय॥ॐअद्येत्यादि०
ममामुकगोत्रस्य जीवतआत्मनःकर्त्तव्योर्द्ध्वदेहिकक्रियायांस्वशरीरसंपादनार्थे एषशिरःपूरकः प्रथमः पिण्डोमेस्वधा–इतिदर्भोपरि
दद्यात् ॥ १ ॥ एवं कर्णाक्षिनासिकाद्यंगसंपादनार्थंद्वितीयः ॥ २ ॥ गलांसभुजवक्षःसंपादनार्थंतृतीयः ॥ ३ ॥ नाभिलिंगगुदपूरकः
चतुर्थः ॥ ॥ जानुजंघापादपूरकः पंचमः ॥ ५ ॥ सर्वमर्मपूरकः षष्ठः ॥ ६ ॥ सर्वनाडीपूरकः सप्तमः ॥ ७ ॥ दन्तलोमादिपूरकोऽ
ष्टमः ॥ ८ ॥ वीर्यपूरकोनवमः ॥ ९ ॥ पूर्णत्वतृप्तित्वक्षुत्पिपासाविपर्ययपूरकोदशमः ॥ १० ॥ ततः प्रत्येकंप्रत्यवनेजनं गंधादिदानंच

दत्त्वा प्रतिदिनसंख्ययातिलतोयांजलयस्तिलतोयपात्राणि चदद्यात्॥ततः सर्वेषामक्षयोस्तु इतिपठित्वा प्रसन्नवदनःश्रीविष्णुंस्मरेत्॥ततः पिण्डानामुष्णत्वेनिवृत्ते एकैकंपिंडंजलकुंभेनिधाय नाभिमात्रेजलेगत्वा एकैकंदक्षिणामुखोजलमध्येक्षिपेत्॥ ततः पंचपंचाशज्जलकुंभान् तदभावेशरावाणिवाजलांजलीन्नामगोत्राभ्यांदद्यात्॥तद्यथा–ॐअद्यामुकगोत्रस्यामुकशर्मणोममजीवतआत्मनः कर्त्तव्यौर्द्ध्वदेहिकक्रियायांमरणोत्तरगंतव्यपरलोकेक्षुधातृषा॥निवारणार्थमेतेपंचपंचाशत्कुंभास्तिलमधुक्षीरयुताः अथवाअंजलयः अश्वत्थमूलेमेस्वधा -इतिदद्यात् ॥ ततोगृहमागत्य सायंगृहद्वागेमांतेत्रिकाष्ठिकादौपात्रद्वयं जलक्षीराभ्यामापूर्य्य ॐजीवात्रस्नाहि–इतिजलपात्रम् ॐजीव इदंदुग्धंपिबेतिदुग्धपात्रंचनिवेदयेत्॥यद्यप्यत्रमाल्यंनोक्तं तथापितदपिबोध्यंप्रकृतौदर्शनात् ॥ ततोरात्रौदक्षिणाग्रदर्भेषु उदङ्मुखः स्वपेत् ॥ प्रातराद्यादिश्राद्धविधानादेकरात्रमाशौचंवदन्ति॥इति चतुर्दशीकृत्यम्॥अथामावास्याकृत्यम् ॥ प्रातरमावास्यायांसूर्य्योदयानंतरंस्नात्वाविप्रादिक्रमेण वार्यायुधप्रतोदयष्टिस्पृष्ट्वा ततोनद्यादितीरेभूमिशुद्धिंकृत्वा गोमयोदकेनोपलिप्य ॥ तत्र सपिण्डस्त्रीद्वारावा नूतनपात्रैः पाकमारभेत् ॥ पाकेकृते प्रथमंषष्ट्युत्तरत्रिशतघट ३६०-दानमंजलिदानंवाअश्वत्थमूलेकुर्यात् ॥ तद्यथा ॐअद्येत्यादिपठित्वा अमुकगोत्रस्य ममामुकशर्मणो जीवतआत्मनःकर्त्तव्यौर्द्ध्वदेहिकक्रियायां मरणोत्तरभविष्यप्रेतत्वविमुक्तिकामःषष्ट्यधिकशतत्रयघटदानंवा अंजलिदानं करिष्ये-इतिसंकल्प्य दद्यात्॥ततः आद्यादिषोडशश्राद्धंप्रेतशब्दरहितं स्वधांतेनकुर्यात्॥तद्यथा–कुशत्रयतिलजलान्यादाय अद्येत्यादि पठित्वा ॐअमुकगोत्रस्यममामुकशर्मणो जीवतआत्मनः कर्त्तव्यौर्द्ध्वदेहिकक्रियायांमरणोत्तरभविष्यप्रेतत्वविमुक्तिकामःआद्यादिषोडश श्राद्धान्यहंकरिष्ये इतिसंकल्प्य पूर्वोक्तप्रेतकल्पीयाद्यादिषोडशश्राद्धविधिनाप्रेतशब्दवर्ज्यंस्वधादिप्रयोगेण कुर्यात॥ततःषष्ट्युत्तरशतत्रय

वपिण्डान्दीपांश्चदद्यात्॥ आद्यादिश्राद्धसमीपे कर्षूत्रयं घृतान्नदधिभिः पूरयेत् ॥ ततः शय्यादानंकांचनमूर्त्तिद।नं वृषोत्सर्गादिकमेकृत्वा
ततोवसुरुद्रादित्यैःसह सपिण्डनोक्तविधिनासपिण्डनश्राद्धंकुर्यात् । ततोमोक्षधेनुद।नं ब्राह्मणभोजनंविष्णुस्मरणम् ॥इति श्रीपं० चतुर्थी
लालगौड०श्राद्धप्र०ब्रह्मपुराणहेमाद्रिकल्पतरुप्रोक्तजीवच्छ्राद्धपद्धतिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
अथजलधेनुदानप्रयोगः ॥ ॥ तत्रतावत्पूर्वोक्तविधिनासवत्सांगांपरिकल्प्य प्रातःस्नानादिनित्यक्रियांसमाप्यशुक्लांबरधरःशुद्धासनोपरि
प्राङ्मुख उपविश्य गणेशंसूर्यादिग्रहांश्चपूजयेत्।ततोदेशकालौसंकीर्त्य सर्वपापक्षयपूर्वकाशेषयज्ञफलप्राप्तिसहितभुक्तिमुक्तिकामोजीवच्छ्रा
द्धनिमित्तहेतवेजलधेनुदानमहंकरिष्ये—इतिसंकल्प्य ॐ कुरुष्वेत्यनुज्ञातःस्वस्त्ययनंपुण्याहवाचनमाचार्यवरणंचकुर्यात्।ततोवरणद्रव्यं
गृहीत्वाॐअद्यकर्त्तव्यजलधेनुदानकर्म्मण्येभिर्द्रव्यैस्त्वामहंवृणे॥वृतोस्मीतिप्रतिवचनम्।इतिवृत्वाहिरण्मयंश्रीजलशायिनंभगवंतंपुरुषसू
क्तेनषोडशोपचारैःपूजयेत् ततोधेनुपूजनम् ॥ॐसवत्सजलधेनवेनंदिन्यैसुभगायैसुशीलायैसुभद्रायैकामधेनवेनमः॥आवाहनंसमर्पयामि
इत्यावाह्यप्रतिष्ठाप्य आसनपाद्यार्घ्याचमनीयस्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यतांबूलगोग्रासादिभिःप्रत्यक्षगोदानप्रकारैःपूजयेत् ॥ ततः
प्रदक्षिणीकृत्यॐयालक्ष्मीःसर्वभूतानां याचदेवेष्ववस्थिता॥धेनुरूपेणसादेवी ममपापंव्यपोहतु ॥१॥ देहस्थायाचरुद्राणीशंकरस्यसदा
प्रिया ॥ धेनुरूपेण० ॥२॥ विष्णोर्वक्षसियालक्ष्मीः स्वाहाचैत्रविभावसोः ॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपेणसास्थिता ॥३॥ चतुर्मुखस्य
यालक्ष्मीर्यालक्ष्मीर्धनदस्यच ॥ लक्ष्मीर्यालोकपालानां साधेनुर्वरदास्तुमे ॥ ४ ॥ स्वधात्वंपितृमुख्यानां स्वाहायज्ञभुजांतथा ॥ सर्वपाप
हराधेनुस्तस्माच्छांतिंप्रयच्छमे ॥ ५ ॥ शेषपर्यंकशयनः श्रीशार्ङ्गायुधभूषणः ॥ जलशायीजगद्योनिःप्रीयतांमयिकेशवः ॥६॥ इतिप्रार्थ्य

गोपुच्छंगृहीत्वा। अद्येत्यादिदेशकालौसंकीर्त्य। आत्मनः सर्वपापक्षयपूर्वकभगवद्वासुदेवप्रीतिकामोजीवतआत्मनःकर्त्तव्यौर्द्ध्वदेहिकक्रिया
यांमरणोत्तरभविष्यप्रेतभावनिवृत्तयेकर्तव्यजीवच्छ्राद्धेवसुरुद्रादित्यरूपब्राह्मणेभ्योदातव्यदक्षिणार्थमिमांजलधेनुं श्रीहिरण्मयविष्णुप्रति
मायुतां मृन्मयकलशजलपूरितांपंचरत्नगर्भामष्टादशान्नैर्निर्मितां सितवस्त्रयुगच्छन्नां दूर्वापल्लवशोभितां कुष्ठमांसीमुरोशीरामलकनासि
कायुतां प्रियंगुपत्रश्रवणां यज्ञोपवीतशिरां गुडास्यां शर्करजिह्वां नवनीतस्तनां स्वर्णनेत्रयुतां क्षौमपुच्छांदिक्चतुष्टयस्थांपततान्रमयति
लपात्रयुतांकांस्यदोहांघृतक्षौद्रवन्मुखीं छत्रोपानद्युतांमृगाजिनोपरिविनिर्मितांदर्भविष्टरसंस्थितांमिक्षुदंडपादांसितकमलांसितसूत्रशिरा
लामगरुकाष्ठनासिकां सुगंधपुष्पयुतांपूगीफलदंतांसितसर्षपरोमकां स्वर्णशृंगींरौप्यखुरांताम्रपृष्ठींगंधादिनासुपूजितांचतुर्थभागवत्ससहितां
यथानामगोत्रायब्राह्मणायदातुमहमुत्सृजे॥ स्वस्तीतिप्रतिवचनम्। इतिदत्त्वा पूर्वोक्तप्रार्थनांकृत्वा दानप्रतिष्ठार्थंदक्षिणांदद्यात्। इतिजलधे
नुदानविधिः॥ अथ जीवच्छ्राद्धकर्मणःसामग्रीलिख्यते ॥ स्वर्णमयीविष्णुप्रतिमा १ स्वर्णशकले २ सुवर्णशलाका १ पंचरत्नपुडिकाः
५ चंदनं कुंकुमं केशरम् अगरु कर्पूरं पुष्पाणि पुष्पमाला धूपः दीपवर्त्तिका मोदकादिनैवेद्यं पूगीफलानि तांबूलानि ऋतुफलानि
यज्ञोपवीतानि ताम्रकलशः १ मृन्मयकलशाः ३ तिलपूर्णताम्रपात्रं १ श्वेतवस्त्रं रक्तसूत्रं दूर्वा आम्रपल्लवाः कांस्यपात्राणि घृतमधु
दधिपूरितानि १२ कुष्ठ-जटामांसी-मुरा-उशीर-आमलकानि तिलपूरितताम्रपात्राणि १२ छत्राणि३उपानहौ ३ स्वर्णशृंगाणि ६ रौप्य
खुराणि १२ ताम्रपृष्ठानि ३ चतुर्थांशद्रव्यरचितवत्साः ३ श्राद्धसामग्री—वस्त्राणि उत्तरीयवस्त्राणि आसनानि ५ जलपात्राणि ५ भो
जनपात्राणि ५ पत्रपुटकानि ५० कर्मपात्रे २ आचमनपात्रम् १ अर्घ्यपात्रेताम्रमये२ तिलाः पीतसर्षपाः तैलदीपकपात्राणि५भक्ष्यभो

ज्याद्यन्नं शाकानि घृतदधिमधूनि गंगाजलं कांस्यपात्रं सुशीतलजलं यवाः तंडुलाः वस्त्रखंडानि लोहखंडानि पंचाशद्दर्भरचितवि
ष्टराणि ४ पंचाशद्दर्भरचितंपुरुषाकारपुत्तलम् १ ऊर्णासूत्राणि, यवपिष्टं, तुलसीपत्रमाला, यज्ञियकाष्ठरचिताचिता १ गोपीचंदनंगंगामृ
त्तिका शालग्रामप्रतिमासांग। १ गोमयं पंचगव्यं दधि दुग्धं शर्करा चरुश्रपणार्थंतंडुलाः। शरावाणि मुद्राः सप्तधान्यम् ॥ गोदानसामग्री
शय्यासोपस्करा गोदानम् ऋणधेनुः मोक्षधेनुः प्रायश्चित्तधेनुः वृषोत्सर्गद्रव्याणि कांचनपुरुषः अष्टौ महादानानि पददानं दक्षिणाभूयसी
ब्र ह्मणभोजनं प्रियंगुपत्राणि गुडं नवनीतं क्षौमवस्त्रं पीतवस्त्रं दोहनपात्रं मृगाजिनानि २इक्षुदंडान् ४कंबलानि ३घण्टाः ३ इत्याद्युपकरणा
नि ॥ अथलिङ्गपुराणोक्तजीवच्छ्राद्धपद्धतिः ॥ तत्रतावत्पुत्राद्यधिकाररहितः स्वीयंश्राद्धंकर्तुमिच्छुर्मरणकालेसमासन्ने कृष्णद्वादश्यामुप
वासंकृत्वा पर्वतेवानदीतीरे वनेदेवालयेवा गंधपर्णरसादिभिर्भूमिंविधिनापरीक्ष्य तत्रखननसंप्लावनगोमयोपलेपनादिभिःशुद्धिंसंपाद्यत्रयो
दश्यामुक्तस्थानेसंभारानुपकल्पयेत् ॥ ततस्तद्दिनेप्रातर्नद्यादिकेयथाविधिस्नात्वाशुक्लवाससीपरिधाय संध्यादिनित्यकर्म्मसमाप्य मध्ये
पूजार्थं स्थंडिलंकृत्वातत्रलिंगतोभद्रंसर्वतोभद्रंवाविलिख्य तत्प्राग्दिशिहस्तमात्रंचतुरस्रंकुंडमथवा इषुमात्रंस्थंडिलंसैकतंकुर्यात् ॥
ततः स्वासनेप्राङ्मुखउपविश्य आचमनंप्राणायामंचकृत्वा देशकालौसंकीर्त्य ॐ अद्यामुकगोत्रस्यामुकशर्मणोममजीवात्मनः कर्त्त
व्यौर्ध्वदेहिकक्रियायांमरणोत्तरभविष्यप्रेतत्वविमुक्तिपूर्व्वकजीवन्मुक्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थंलिंगपुराणोक्तजीवच्छ्राद्धंविधिंकरिष्ये-इतिसं
कल्प्य सुमुखश्चेत्यादिस्मरणपूर्व्वकगणेशनवग्रहकुलदेवान्संपूज्य पुण्याहंस्वस्त्ययनंवाचयित्वा आचार्यादिवरणंचकृत्वा तान्वस्त्राङ्गु
लीयकदक्षिणाभिः संतोष्य कुण्डेस्थंडिलेवापंचभूसंस्कारान्संपाद्य तत्रस्वगृह्योक्तविधिनाऽग्निंस्थापयेत् ततःपूजास्थंडिलपश्चिमतः प्राङ्

मुखउपविश्य ॐ अद्यजीवच्छ्राद्धांगभूतं ब्रह्मादिदेवस्थापनंपूजनंचकरिष्ये–इतिसंकल्प्य पुष्पाण्यादायमंडलेब्रह्मादीन्स्थापयेत्॥(तत्र मंत्राः) ॐ भूः ब्रह्मणेनमः ब्रह्माणंस्थापयामि ॥ १ ॥ ॐ भुवः विष्णवेनमः विष्णुंस्थापयामि ॥ २ ॥ ॐ स्वः रुद्रायनमः रुद्रंस्थापयामि ॥ ३ ॥ एवंद्वितीयोद्देशेनसर्वत्र ॥ ॐ महः ईश्वरायनमः ॥ ४ ॥ ॐ जनः प्रकृतयेनमः ॥ ५ ॥ ॐतपः पुद्गलायनमः ॥ ६ ॥ ॐ ऋतंपुरुषायनमः ॥ ७ ॥ ॐ सत्यंशिवायनमः ॥ ८ ॥ ॐशर्व्वधरांमेगोपाय घ्राणेगंधंशर्व्वायदेवायभूर्नमः ॥९॥ॐशर्व्वधरांमेगोपाय घ्राणेगंधंशर्व्वस्यदेवस्य पत्न्यैभूर्नमः ॥१०॥ ॐभवजलंमेगोपाय जिह्वायांरसंभवायदेवायभुवोनमः ॥११॥ ॐ भवजलंमेगोपायजिह्वायां रसंभवस्यदेवस्यपत्न्यैभुवोनमः ॥ १२ ॥ ॐरुद्राग्निंमेगोपायनेत्ररूपं रुद्रायदेवायस्वर्नमः ॥ १३ ॥ ॐरुद्राग्निंमेगोपायनेत्ररूपंरुद्रस्यदेवस्यपत्न्यैस्वर्नमः ॥ १४ ॥ ॐउग्रवायुंमेगोपायत्वचिस्पर्शमुग्रायदेवायमहोनमः ॥ १५ ॥ ॐउग्रवायुंमेगोपायत्वचिस्पर्शमुग्रस्यदेवस्य पत्न्यैमहोनमः ॥१६॥ ॐभीमसुषिरंमेगोपायश्रोत्रेशब्दंभीमायदेवायजनोनमः ॥ १७ ॥ ॐ भीमसुषिरंमेगोपायश्रोत्रेशब्दंभीमस्यदेवस्यपत्न्यैजनोनमः ॥१८॥ ॐ ईशरजोमेगोपाय द्रव्येतृष्णामीशायदेवायतपोनमः॥ १९ ॥ ॐ ईशरजोमेगोपाय द्रव्येतृष्णामीशस्यदेवस्यपत्न्यैतपोनमः ॥२०॥ ॐ महादेव सत्यंमेगोपाय श्रद्धांधर्म्मेमहादेवाय ऋतंनमः ॥२१॥ ॐमहादेवसत्यंमेगोपायश्रद्धांधर्म्मेमहादेवस्यपत्न्यैऋतंनमः ॥ २२ ॥ ॐपशुपतेपाशंमेगोपाय भोक्तृत्वंभोग्ये पशुपतयेदेवायसत्यंनमः ॥ २३ ॥ ॐ पशुपतेपाशंमेगोपाय भोक्तृत्वंभोग्ये पशुपतेर्देवस्यपत्न्यैसत्यंनमः ॥ २४ ॥ ॐ शिवायसत्यंनमः शिवसत्यंस्थापयामि ॥२५॥ एवंसंस्थाप्यॐमनोजूतिर्जुषतामितिप्रतिष्ठांकृत्वा उक्तक्रमेणप्रत्येकम् ॐब्रह्मादिशिवसत्यांस्थापितदेवताभ्योनमः- इतितंत्रेणवाषोडशोपचारैः संपूज्य ततः समा

चारान्मंडलमध्ये ताम्रकलशंयथाविधिसंस्थाप्य तत्रहैमंरुद्रंपूजयेत्॥ततः अग्नेःपरिस्तरणादिप्रोक्षणपर्य्यंतंयथाशाखंसमाप्य समिद्धतमे ग्नौघृतेन आघारावाज्यभागौहुत्वा स्थंडिलेऽग्निंसंपूज्य समिच्चरुघृतैः पृथक्पात्रस्थैः पृथक्पृथक् होमंकुर्यात्॥(तत्रमंत्राः)ॐभूर्ब्रह्मणेस्वाहाइदंब्रह्मणे ॥१॥ ॐभुवः विष्णवेस्वाहा इदंविष्णवे ॥ २ ॥ ॐस्वःरुद्रायस्वाहा इदंरुद्राय ॥३॥ ॐमहः ईश्वरायस्वाहा इदं०॥४॥ ॐजनः प्रकृतयेस्वाहा इदं० ॥५॥ ॐतपः पुद्गलायस्वाहा इदं० ॥ ६ ॥ ॐऋतंपुरुषायस्वाहा इदं० ॥ ७ ॥ ॐसत्यंशिवायस्वाहा इदं० ॥ ८ ॥ ॐ शर्वधरांमेगोपायघ्राणेगंधंशर्वायदेवायभूः स्वाहा इदंशर्वायदेवाय ॥ ९ ॥ ॐ शर्वधरांमेगोपायघ्राणेगधं शर्वस्यदेवस्यपत्न्यैभूः स्वाहा इदंशर्वस्यदेवस्यपत्न्यै ॥ १० ॥ ॐ भवजलंमेगोपायजिह्वायांरसं भवायदेवायभुवःस्वाहा इदंभवाय ॥११॥ ॐ भवजलंमेगोपाय जिह्वारसंभवस्यदेवस्यपत्न्यैभुवःस्वाहा इदंभवपत्न्यै ॥ १२ ॥ रुद्राग्निंमेगोपायनेत्ररूपंरुद्रायदेवायस्वःस्वाहा इदंरुद्राय ॥ १३ ॥ ॐ रुद्राग्निंमेगोपायनेत्ररूपंरुद्रस्यदेवस्य पत्न्यैस्वःस्वाहा इदंरुद्रपत्न्यै ॥ १४ ॥ ॐ उग्रवायुंमेगोपायत्वचिस्पर्शमुग्रायदेवायमहः स्वाहा इदमुग्राय ॥ १५ ॥ उग्रवायुंमेगोपायत्वचिस्पर्शमुग्रस्यदेवस्यपत्न्यैमहः इदमुग्रपत्न्यै ॥ १६ ॥ ॐ भीमसुषिरंमेगोपायश्रोत्रेशब्दं भीमायदेवाय जनः स्वाहा इदं भीमाय॥ १७॥ॐभीमसुषिरंमे गोपायश्रोत्रे शब्दंभीमस्यदेवस्यपत्न्यैजनः स्वाहा इदंभीमपत्न्यै ॥ १८ ॥ ॐईशरजोमे गोपायद्रव्येतृष्णामीशायदेवायतपः स्वाहा इदमीशाय ॥ १९ ॥ ॐईशरजोमेगोपाय द्रव्येतृष्णामीशस्यदेवस्यपत्न्यैतपः स्वाहा इदमीशपत्न्यै ॥२०॥ ॐमहादेव सत्यंमेगोपायश्रद्धांधर्मं महादेवायऋतं स्वाहा इदं महादेवाय ॥ २१ ॥ ॐमहादेवसत्यंमेगोपायश्रद्धांधर्म्मंमहादेवस्यपत्न्यैऋतं स्वाहा इदंमहादेवस्यपत्न्यै ॥ २२ ॥ ॐपशुपतेपाशंमे

गोपाय भोक्तृत्वंभोग्येपशुपतये देवायसत्यं स्वाहा इदं पशुपतये ॥ २३ ॥ ॐपशुपतेपाशंमेगोपायभोक्तृत्वं भोग्येपशुपतेर्देवस्य पत्न्यैपत्यं स्वाहा इदं पशुपतेः पत्न्यै ॥२४॥ ॐशिवायसत्यं स्वाहा इदं शिवायसत्यम् ॥२५॥ ॐशिवस्यपत्न्यै स्वाहा इदं शिवस्यपत्न्यै ॥२६॥ इत्येतैः षड्विंशतिमन्त्रैर्हुत्वा पुनः संहारक्रमेण ॐसत्यं शिवायेत्यादिब्रह्मणेस्वाहा इत्यंतमष्टौ तथा पशुपतिपत्न्यादि सर्वान्तमुक्तक्रमेणसंपूज्यघृतचरुसमित्क्रमात्प्रत्येकं होतव्यम् ॥ ततः केवलनघृतेन ॐशर्वधरांमेछिन्धि प्राणोगंधंछिन्धि मेऽघंजहिभूः स्वाहा ॥१॥ ॐभवजलंमेछिन्धि जिह्वायांरसं छिन्धिमेऽघंजहिभुवः स्वाहा ॥ २ ॥ ॐरुद्र अग्निंमेछिधिनेत्ररूपंछिन्धिमेऽघंजहिस्वः स्वाहा ॥३॥ ॐ उग्रवायुंमे छिन्धित्वचिस्पर्शं छिन्धिमेऽघंजहि भूर्भुवः स्वः स्वाहा ॥४॥ एतैश्चतुर्भिर्मन्त्रैःमहस्रंपंचशतंवाष्टोत्तरशतं जुहुयात् ॥ ततः आज्येनैव ॐ प्राणेनिविष्टोऽमृतजुहोमिशिवोमाविशाप्रदाहायप्राणायस्वाहा ॥ १ ॥ ॐप्राणाधिपतयेरुद्रायपृषातकायस्वाहा ॥२॥ ॐभूः स्वाहा ॥३॥ ॐभुवः स्वाहा ॥ ४ ॥ ॐ स्वः स्वाहा ॥ ५ ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ ६ ॥ एतैः षण्मंत्रैरष्टोत्तरशताहुतीर्जुहुयात ॥ एवं सप्ताहंप्रत्यहं यथोक्तंहुत्वास्वगृह्योक्तस्विष्टकृदादिपूर्णाहुत्यंतंकर्म्मसमाप्य सप्तमेऽहनि विप्रान्निमंत्र्य ॥ शर्व०१भव०२रुद्र०३उग्र०४भीम०५ईशान०६महादेव७पशुपति०८ इत्येभ्योऽष्टौपिण्डान्दत्त्वा निमंत्रितानष्टौब्राह्मणाञ्छ्राद्धार्हान्भोजयित्वा वस्त्राभरणवाहनशयनकांस्यासनभाजनसुवर्णरजतधेनुतिलक्षेत्रगेहदासीदासदक्षिणादिभिःसंतोष्य ब्राह्मणसहस्रंसदक्षिणं भोजयेत् ॥ दिनत्रयंरुद्रस्यबहुचरुनिवेदनम् ॥ एवंकृतेजीवन्मुक्तः स्यात् ॥ इति लिङ्गपुराणोक्तजीवच्छ्राद्धपद्धतिः ॥ इतिश्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढनगरनिवासिना ॥ श्रीवसिष्ठकुलोद्भवश्रीरामकृष्णपौत्रेणश्रीकस्तूरिचन्द्रसूनुनाश्रीमहादेवभक्तमाध्यंदिनवाजसनेयिनापंडितगौडश्री चतुर्थीलालशर्म्मणा विरचिते गौडीयश्राद्धप्रकाशे महानिबन्धेपद्धतिखंडे षष्ठंप्रकरणंसमाप्तम् ॥ ६ ॥ ॥ ७ ॥

॥अथ शूद्रश्राद्धपद्धतिप्रकरणम्॥उक्त्वाद्विजानांश्राद्धस्य विधिंकृत्स्नंसमंत्रकम् ॥ अधुनाशूद्रजातीनां करोमिश्राद्धपद्धतिम्॥ १॥अत्रमरण समयादारभ्यसांवत्सरिकपूर्वकपार्वणान्तंकर्म्मंउच्यते॥तत्रतावत्पुत्रादिरासन्नमृत्युंपित्रादिंज्ञात्वापूर्वकृतसमस्तपातकनिरासार्थंषडब्दमब्दं सार्द्धाब्दं वा तत्प्रतिनिधिरूपं धेनुदानं तीर्थयात्रा ब्राह्मणभोजनं वा स्वर्णरूप्ययोर्निष्कं तदर्द्धंवा गोवृषमूल्यं यथाश क्त्यनुरूपंप्रायश्चित्तंतद्द्वाराकारयेत् ॥ तदशक्तौस्वयंवाकुर्य्यात् ॥ एवंप्रायश्चित्तंकृत्वा ॥ गोभूतिलहिरण्याज्यवासोधान्यगुडा निच ॥ रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥ १ ॥ एतानिदशदानानि विप्रेभ्यो यथाशक्तिदद्यात् ॥ ततो वैतरणी धेनुदानं० तिलादीनिर्महाष्टदानानि० ॥ शक्तौसत्यांतिलपूर्णपात्रं मोक्षधेनुमृणधेनुमुत्क्रांतिधेनुंचदद्यात् ॥ दुर्मरणमृतेतु चांद्रायणद्वय मथवा पंचदशप्राजापत्यम्॥शक्तौसत्यांप्रतिप्राजापत्यमेकैकांवागामथवा प्रतिप्राजापत्यं द्वादशब्राह्मणतृप्तिजनकमामान्नंवा तीर्थयात्रा दिद्वाराशुद्धिंसंपाद्यदाहादिकुर्य्यात् ॥ एवमेवऊर्द्ध्वोच्छिष्टाध उच्छिष्टोभयोच्छिष्टादिदोषयुक्तमरणे पूर्वोक्त धेन्वादिरूपंप्रायश्चित्तंसंकल्प्य सूतकान्तेकुर्य्यात् ॥ एवंकर्ताप्यधिकाराभावे आत्मनः शुद्धिंसंपाद्य दहनादिकुर्य्यात् ॥ अथमरणसमयकृत्यम् ॥ तत्रतावत्पुण्यस्तोत्रं रामकृष्णादिनामजपंकुर्यात्कारयेद्वा ॥ ततः प्राणोत्क्रमणसमये पुत्रादिरधिकारी गंगादितीर्थसमीपे अथवा स्वगृहे गोमयोपलिप्तायां भूमौ गंगोदकमिश्रितनूतनजलेन संस्नाप्य धौतशुक्लवाससीपरिधाप्य चंदनपुष्पमालारुद्राक्षधात्रीतुलसीपत्राद्यैरलंकृत्य पुत्रादिःस्वोत्सङ्ग

१ षडब्देप्राजापत्यानि १८० अब्दे ९० सार्द्धाब्दे ४५ इति । २ आमान्नादिद्वारा, शूद्रस्य पक्वनिषेधात्। ३ चत्वारिंशन्माषाः । ४ गारुडे–तिला लोहं हिरण्यं च कार्पासं लवणं तथा ॥ सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतम्, इति ।

स्थापितशिरसः अपगतप्राणस्यमुखे नासिकाद्वये चक्षुर्द्वयेश्रोत्रद्वयेपंचरत्नानि स्वर्णशकलानिवाघृतबिन्दून्क्षिप्त्वा दर्भवत्यांभूमौ तिलान्विकीर्य तत्रोदक्छिरसंस्थापयेत् ॥ ततः प्राणोत्क्रमणानन्तरं पुत्रादयो यथाचारं स्ववपनंकारयित्वा स्नात्वा नववस्त्रैकदेशंपरिधाय तदेकदेशमुत्तरीयंकृत्वा प्रेतं पुनःस्नापयित्वा वाससाच्छाद्य पुष्पाद्यैरलंकृत्य चितायामुत्तानंदक्षिणशिरसं शवंस्थापयेत्॥ अथपिण्डदानप्रयोगः॥पुत्रादिरपसव्येन वामजान्वाच्य मृतदक्षिणपार्श्वेदक्षिणाभिमुख उपविश्य ॥अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिपूर्वकमुत्तमलोकप्राप्त्यर्थमौर्ध्वदेहिकंकर्म करिष्ये-इतिसंकल्प्य दक्षिणाग्रंकुशत्रयमास्तीर्यावनेज्य ॥ अद्यामुकगोत्रामुकप्रेत मृतिस्थानेशवनिमित्तक (ब्रह्मदैवतोवा) एषतेपिण्डोमयादीयते तवोपतिष्ठतामित्येकंपिण्डंसतिलं पितृतीर्थेनदत्त्वा गृहद्वारानयेत् ॥ तत्र अद्यामुकगोत्रामुकप्रेत द्वारदेशे पांथनिमित्तक (विष्णुदैवतोवा) एषतेपिण्डोमयादीयते तवोपतिष्ठतामिति पिंडंदत्त्वा पुत्रादयोबालपुरःसरा लौकिकाग्निं पिण्डादिकंचगृहीत्वा शवंप्रच्छादितमुखं प्राक्छिरसमूर्ध्वमुखं पुरदक्षिणद्वारेणारण्येश्मशानदेशंप्रतिनयेयुः ॥ ततोग्रामश्मशानयोर्मध्येविश्रामे॥अद्यामुकगोत्रामुकप्रेत विश्रान्तौभूतनिमित्तक (रुद्रदैवतोवा) एषतेपिण्डोमयादीयतेतवोपतिष्ठतामिति विश्रामपिण्डंदद्यात् ॥ ततः सर्वे बांधवावृद्धादयः प्रेतमनुगच्छेयुः ॥ अथ श्मशानदेशंप्राप्य शुचिदेशे शनैर्दक्षिणशिरसं शवंस्थाप्य चितास्थाने कुशत्रयोपरि अमुकगोत्र अमुकप्रेत चितास्थानेवायुनिमित्तक(यमदैवतोवा)एषतेपिण्डोमयादीयतेतवोपतिष्ठतामितिपिण्डंदद्यात्। ततः खननसंप्लावनादिना भूमिसंशोध्य गोमयेनोपलिप्य तत्र यज्ञियकाष्ठैर्दहनपर्याप्तं दक्षिणोत्तरायतं दारुचयं कृत्वा चिताकाष्ठं

१ अत्र चत्वरे खेचरनिमित्तपिण्डदानं यथाचारम् ।

जलेनप्रोक्ष्य तत्र दक्षिणशिरसं सवस्त्रमुत्तानमुखं शवंचितौ निदध्यात् ॥ ततः शिरःप्रदेशे शुद्धमृदावेदिंकृत्वा पंचसंस्कारान्संपाद्य तत्रक्रव्यादसंज्ञकमग्निंप्रज्वाल्य ॥ क्रव्यादायनमः इतिगंधमाल्यादिभिः संपूज्य ॥ त्वंभूतभृज्जगद्योनिस्त्वं भूतपरिपालकः ॥ मृतः संसारिकस्तस्मादेनं त्वंस्वर्गतिंनय ॥ १ ॥ इतिप्रार्थ्य शवहस्ते साधकनाम्ना पिण्डंदद्यात् ॥ अमुकगोत्रामुकप्रेत शवहस्ते साधक निमित्तक एषते पिण्डो मयादीयतेतवोपतिष्ठतामिति दद्यात् ॥ ततः पुत्रादिर्यथाचारं बहुलतृणान्गृहीत्वा अग्नौप्रज्वाल्य प्रदक्षिणंपरिक्रम्य॥कृत्वातुदुष्कृतं कर्म जानतावाप्यजानता॥मृत्युकालवशंप्राप्य नरंपंचत्वमागतम् ॥१॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ॥ दहेयंसर्वगात्राणि दिव्याँल्लोकान्सगच्छतु॥२॥इतिमंत्रद्वयेनशिरःस्थानेऽग्निंदद्यात् ततोर्धंदग्धे आज्याहुतिंदत्त्वासजलंकुंभमादायपादतोऽप्रदक्षिणंत्रिःपरिक्रम्ययथाचारमश्मनाकुम्भंभित्त्वा॥अनवेक्षमाणा बालपुरःसराःस्नानार्थंनद्यादिकेगच्छेयुः॥ तत्रोदकसमीपंगत्वापूर्वंधृतं वस्त्रंप्रक्षाल्यपुनःपरिधायवामानामिकयाजलमालोड्यवृद्धाद्याःस्नात्वाशुद्धवाससीपरिधाय सव्येनाचम्याऽपसव्येनजले पाषाणपृष्ठेवाशुचितीरदेशेदक्षिणाग्रकुशत्रयोपरि ऋ[2]जुदर्भतिलपूर्णांजलिना पितृतीर्थेन अमुकगोत्रामुकप्रेतएषतिलतोयाञ्जलिस्तेमयादीयतेतवोपतिष्ठतामितिसर्वेदक्षिणमुखाःसंक्र[3]न्दिर्दशवादद्युः । ततःसव्यंकृत्वाआचम्यजलाशयादुत्तीर्यस्नानवस्त्रंनिष्पीड्यशुचौदेशेशाड्वलवत्सुपविष्टान्सपिण्डानन्येसुहृद इतिहासपुराणादिविविधकथाभिःसंसाराऽनित्यतांदर्शयेयुः।ततःपश्चादनवलोकयंतोऽधोमुखा बालानग्रतःकृत्वायमे

१ शिरःस्फोटनानंतरं तिलमिश्रांदद्यादिति । २ हेमाद्रिविष्णुपुराणयोः–सपिण्डीकरणंयावदृजुदर्भैः पितृक्रिया । सपिण्डीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेदिति । ३ एकवारं त्रिवारंवा दशवारमथापिवा–इतिगारुडात । ४ अहरहर्नयमानो गामश्वं पुरुषंपशून् । वैवस्वतो न तृप्येत सुरया इव दुर्मतिरिति ।

गाथांगायन्तःपंक्तिभूताग्रामंप्रत्यायांति ॥ ततोगृहद्वारसमीपेस्थित्वानिंबपत्राणिदंतैर्विदश्याचम्य गोमयसर्षपवृषांबुदूर्वाग्नीनालभ्यपादेन
पाषाणमाक्रम्यगृहंप्रविशेयुः वृद्धाःशोकापनोदनंकुर्युः ॥ इतिदाहविधिः॥ अथसूर्यास्तमयादूर्ध्वंरात्रावन्तरिक्षे चतुष्पथेश्मशानेवात्रिका
ष्ठिकायामेकस्मिन्नपक्वेमृन्मयेपात्रे उदकं द्वितीये क्षीरंचनिधाय अपसव्येनदक्षिणामुखउपविश्य॥अमुकगोत्रस्यामुकप्रेतस्य आप्यायनार्थं
तापोपशमनार्थंचाकाशेमृन्मयेपात्रेक्षीरोदकयोर्निधानंकरिष्येइतिसंकल्प्य ॥ श्मशानानलदग्धोसि परित्यक्तोसिबांधवैः ॥ इदंनीरमिदं
क्षीरमत्रस्नाहिइदंपिब ॥१॥ इतिपठित्वा॥अमुकगोत्रामुकप्रेत अनेनजलेनस्नाहि इदंक्षीरंपिब इतिनिवेदयेत्॥एतत्क्षीरोदकनिधानमेकाहं
वादिनत्रयंवादशाहंयथाचारंप्रत्यहंरात्रौकर्त्तव्यम् ॥ ततः त्र्यहमुपवासः क्रीतलब्धाशनंवा अधःशय्यासनं सर्वेषांयावदशौचम् ॥ इच्छया
प्रथमादिदशाहपर्यंतं कुटुंबैःसहभोजनंतच्चदिवैव ॥ बहिःप्रेतायदीपोदेयः ॥इति दाहप्रकरणम्॥ अथाऽस्थिसंचयनम् ॥ तच्चप्रथमतृतीयच
तुर्थसप्तमनवमेषुभौमार्कमंदतिथियुग्मैकपादद्विपादत्रिपादकर्तृनक्षत्रधनिष्ठादिपंचकवर्जदिनेषुकार्यम्॥शूद्राणांविशेषतोदशमेह्नि।तत्रप्रयो
गः।श्राद्धदिनेसामग्रींसंपाद्यश्मशानसमीपेगत्वाशुचिभूमौश्राद्धस्थानंप्रकल्प्यगोमयोदकेनप्रोक्ष्यगौरमृत्तिकयाच्छाद्यतिलैर्विकिरेत्ततोन
द्यादिकेस्नात्वा स्वासने उपविश्य कुशपवित्रादिधारणं कृत्वा आचम्य 'पुण्डरीकाक्षायनमः'—इतिश्राद्धसामग्रींस्वात्मानंचप्रोक्षयेत्।ततो
देशकालौ संकीर्त्य (अपसव्येन) अमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वनिवृत्त्या उत्तमलोकप्राप्त्यर्थमस्थिसंचयनश्राद्धंकरिष्ये—इत्युक्त्वा
दक्षिणामुखोवामजानुनिपात्य कुशचटंनिधाय ॥ इहलोकंपरित्यज्य गतोसिपरमांगतिम् ॥ मनसावायुरूपेण चटेत्वाहंनियोजये।१। इति
निमन्त्रयेत् ॥ ततः कुशत्रयतिलजलान्यादाय ॥ अमुकगोत्रामुकप्रेत इदमासनंतेमयादीयतेतत्रोपतिष्ठतामित्यासनमृजुकुशत्रयरूपमुत्सृ

जेत् (न मोटकरूपम्) ॥ ततस्तिलान्विकीर्य अर्घपात्रे कुशपत्रमेकंधृत्वा तत्रजलतिलगंधपुष्पाणिप्रक्षिप्य तदर्घपात्रंवामहस्ते कृत्वापवित्रंपलाशपत्रेधृत्वा ॥ अमुकगोत्रामुकप्रेत एषतेहस्तार्घोमयादीयतेतवोपतिष्ठतामितिदक्षिणहस्तेनार्घंदद्यात् ॥ ततो गन्धादिधृत्वा ॥ अमुकगोत्रामुकप्रेत एतानिगन्धपुष्पधूपदीपतांबूलवासांसितेमयादीयंतेतवोपतिष्ठंतामित्युत्सृजेत् ॥ ततःपात्रेसघृतमन्नंपरिविष्य जलपात्रंचधृत्वावामकरेणपात्रंस्पृशन्अमुकगोत्रामुकप्रेतइदमन्नंघृताद्युपस्करसहितंतेमयादीयतेतवोपतिष्ठतामितिवामभागेजलमुत्सृजेत्॥ ततोऽन्नपात्रसमीपे पिण्डदानार्थं सिकताभिर्वेदिं निर्माय तत्रकुशत्रयमास्तीर्य पत्रपुटके जलतिलगन्धपुष्पाणिकृत्वा तत्पुटकंगृहीत्वा अमुक० प्रेत अत्रावनेनिक्ष्वते मयादीयतेतवोपतिष्ठतामितिकुशत्रयोपरि अवनेजनंदद्यात् ॥ ततोघृततिलदधिशर्करादियुक्तेनान्नेन पिण्डं निर्माय वामहस्तेकृत्वा दक्षिणहस्ते कुशत्रयादीन्यादाय ॥ अमुक० प्रेत अस्थिसंचयनिमित्तकश्राद्धेएषतेपिण्डोमयादीयतेतवोपतिष्ठतामितिवामान्वारब्धदक्षिणहस्तेनकुशोपरिपिण्डंदद्यात् ॥ ततोहस्तौप्रक्षाल्य अवनेजनपात्रेण अमुक० प्रेत अत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रत्यवनेजनंदद्यात् ॥ ततः पिण्डोपरिसूत्रंदत्त्वा ॥ अमुक० प्रेत एतद्वासस्तेमयादीयते० इत्युत्सृजेत् ॥ ततःपिण्डंगंधपुष्पधूपदीपतांबूलपूगीफलादिभिः संपूज्य । अमुक० प्रेत एतानिगंधपुष्पधूपदीपपूगीफलादीनितेमयादीयंते० इत्युत्सृजेत्॥ततःअमुकप्रेतस्यास्थिसंचयनिमित्तकश्राद्धेयद्दत्तमन्नपानादिकम् तदुपतिष्ठतामित्यक्षय्योदकंदत्त्वासपवित्रंकुशत्रयंपिण्डोपरिनिधायसतिलदुग्धेन जलेन जलधारांदद्यात् ॥ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अक्षय्यःपुण्डरीकाक्षः प्रेतमोक्षप्रदोभव ॥१॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ येनमस्यंतिगोविंदंनतेषांविद्यतेभयम्॥२॥इतिपठित्वा॥ अमुक०प्रेतअन्नपिण्डेजलधारातेमयादीयतेतवोपतिष्ठतामिति

दक्षिणाग्रांजलधारांदद्यात्।ततः पिण्डमुत्थाप्यपात्रेनिधायदक्षिणाद्रव्यंकुशत्रयादीनिचादायअमुकगोत्रस्यामुकप्रेतस्यकृतैतदस्थिसंचयनि
मित्तकश्राद्धप्रतिष्ठार्थमिदंरजतंतन्मूल्योपकल्पितंवाद्रव्यममुकब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे-इति संकल्प्यदद्यात्।ततःकर्मपूर्त्तिका
मो विष्णुंस्मृत्वाश्राद्धवस्तूनि विप्रायप्रतिपादयेज्जलेवाक्षिपेत्॥पिण्डादिकंगवादिभ्योदद्यात्॥इतिश्राद्धप्रयोगः ॥ एवंश्राद्धंविधायगंधपुष्प
धूपदीपनैवेद्यादिकंगृहीत्वा श्मशानसमीपमागत्य चिताया उत्तरतउपविश्य॥क्रव्यादमुखेभ्योदेवेभ्योनमः इतिमंत्रेणश्मशानवासिदेवा
न्गंधपुष्पधूपदीपनैवेद्यादिभिःश्मशानेपूजयेत्॥ततोबलिदानं गंधपुष्पाद्यार्चितमामान्नबलिंगृहीत्वा॥ येऽस्मिञ्छ्मशानेदेवाःस्युर्भगवंतःस
नातनाः।तेऽस्मत्सकाशादृगृह्णंतुबलिमष्टांगमक्षयम्॥प्रेतस्यास्यशुभाँलोकान्प्रयच्छंतुचशाश्वतान्।अस्माकमायुरारोग्यंसुखंचददता(चि)रम्
इतिपठित्वा एषोऽष्टाङ्गबलिः शंकरादिश्मशानवासिदेवताभ्योनमम--इत्येकंबलिंदत्त्वाएवंप्रदक्षिणक्रमेणाऽपरबलित्रयंपूर्वादिषुत्रिद्वारेषु
दद्यात्॥ततस्तान्बलीन्क्षीरेणाभ्युक्ष्यशंकारादिदेवताःस्वीयंस्वीयंस्थानंगच्छंतु--इति विसृज्यततोऽपसव्यंकृत्वासदुग्धजलेनचितिंप्रोक्ष्य
पलाशशाखयाचितेर्भस्मापोह्याङ्गुष्ठकनिष्ठिकाभ्यांशिरसःउरसःपाण्योः पार्श्वयोःपादयोरस्थीन्यादायपंचगव्येनमोक्ष्यगंगोदकेनप्रक्षाल्य
गंधार्द्यर्चिता निक्षौमवस्त्रेणावेष्ट्य मृन्मयेनवकुंभेनिधायशरावेणपिधायवनेवृक्षमूलेवाभूमौनिखायभस्मनद्यादितोयेक्षिप्त्वाचितिदेशेवेदिंकृ
त्वा गोमयेनविलिप्य तत्रपूर्ववद्गंधादिपूजांकृत्वा बलिमंत्रेण आमान्नबलिचतुष्टयंदद्यात्॥तान्क्षीरेणाभ्युक्ष्यविसर्जयेत्॥ततोगृहमागत्यस

१ अत्र ब्रह्मपुराणे पिण्डत्रयदानमुक्तम्। एकंश्मशानवासिभ्यः प्रेतायैव तु मध्यमम्॥ तृतीयं तत्सखिभ्यश्च दक्षिणासंस्थमादरादिति।

चैलोबंधुभिः स्नायात्त ॥ शिष्टान्यस्थीनिगंगायांक्षिपेत् ॥ तत्प्रकारः--कदाचित्तद्दिनेवांपुत्रादिरस्थिकुंभंगृहीत्वा तान्य[१]थीनिपंचगव्येन प्रक्षाल्यहिरण्यमुक्तारूप्यप्रवालमध्वाज्यतिलैः संयोज्यमृत्संपुटेनिधायतीर्थंगत्वास्नात्वादक्षिणांदिशंपश्यन्नमोस्तुधर्मायइतिजलंप्रविश्य समेप्रीतोऽस्तुइतिगंगायांक्षिप्त्वास्नात्वासूर्यंनमस्कृत्य विप्रेभ्योदक्षिणांदत्त्वागृहमागत्ययथाचारंश्राद्धतर्पणब्राह्मणभोजनादिकुर्यात्।एवंकृ तेप्रेतक्रियाकर्त्रोश्चस्वर्गःस्यात् ॥ इत्यस्थिसंचयनम् ॥ अथदशगात्रश्राद्धानि॥तत्रप्रयोगः ॥ पुत्रादिर्ग्रामाद्बहिर्देवतायतनेवानद्यादितीरेवा गृहद्वारिशुचिदेशेयथाचारंप्रेतस्यमूर्द्धादिनिष्पत्त्यर्थंपिण्डदानंकुर्य्यात्॥तत्रादौनद्यादिकेस्नात्वा नूतनमृन्मयभांडेनजलमानीयश्राद्धस्थाने गत्वा पवित्रेपरिधाय आचम्य शुचिभूमौपिण्डदानस्थानादेशान्यांदिशिअग्निप्रज्वाल्य तत्रतैजसेवामृन्मयेतंडुलान्छ्रपयित्वा अपसव्यं कृत्वादक्षिणामुखउपविश्यपातितवामजानुर्गौरमृत्तिकयापिण्डार्थंदक्षिणाप्लवंस्थानंनिर्मायगोमयोदकेनोपलिप्यतत्रदक्षिणाग्रंकुशत्रयास्तर णंकुर्य्यात्॥ततःपत्रपुटकेजलतिलगंधपुष्पाणिप्रक्षिप्य तत्पुटकंगृहीत्वाअमुकगोत्रामुकप्रेतशिरःपूरकप्रथमपिण्डस्थाने अत्रावनेनिक्ष्वते मयादीयतेतवोपतिष्ठतामितिकुशत्रयोपरिकिंचिज्जलंपितृतीर्थेनदद्यात्। ततश्चरुणाअथवासक्तुनावायवचूर्णेनतिलघृतमधुदुग्धशर्करायुतंक पित्थमात्रंपिण्डंकृत्वा कुशत्रयादीनिपिण्डंचादाय ॥ अमुकगोत्रामुकप्रेत शिरःपूरकएषप्रथमः पिण्डस्तेमयादीयतेतवोपतिष्ठतामितिवा मान्वारब्धदक्षिणकरेणपितृतीर्थेनकुशोपरिपिण्डंदद्यात्॥ततः प्रत्यवनेजनदानम् ॥ अमुक० प्रेत शिरःपूरकप्रथमपिण्डेऽत्रप्रत्यवनेनिक्ष्व

---

१ दशाहाभ्यंतरे यस्य गंगातोयेस्थि मज्जति । गंगायांमरणंयादृक्तादृक्फलमवाप्नुयादितिगारुडात्। २ हेमाद्रौ--पितृशब्दं स्वधां चैव न प्रयुंजीत कर्हिचित ॥ उपतिष्ठतामय पिण्डः प्रेतायेति समुच्चरेत्॥ तूष्णीं धूपं प्रसेकं च दीपं पुष्पं तथैव च ॥ अशुद्धत्रिषुवर्णेषु इदं दद्यान्न संशय इति ॥ ३ अस्थिसंचयनादूर्ध्वं दशगात्रं समाचरेदितिगारुडात ।

तेमया।दीयतेतवोपतिष्ठता।मितिपिण्डोपरिपूर्ववद्द्यात् ॥ ततः प्रेतमुद्दिश्य तूष्णींमेवोर्णासूत्रगन्धभृंगराजपुष्पधूपदीपतांबूलानिपिण्डे दत्त्वा ॥ अमुकगोत्रप्रेतशिरःपूरकप्रथमपिण्डे एतान्यूर्णासूत्रगन्धपुष्पधूपदीपतांबूलपूगीफलानितेमयादीयंतेतवोपतिष्ठंतामित्युत्सृजेत्॥ ततः पिण्डस्थार्चनविधेः परिपूर्णतास्तु॥ततः पात्रे जलदुग्धतिलगन्धपुष्पाणिकृत्वा॥अमुकगोत्र० प्रेत शिरःपूरकप्रथमपिण्डे एषतिल तोयांजलिस्तेमयादीयतेतवोपतिष्ठतामित्येकंत्रयंवादशकंजलांजलिंपिण्डोपरिदद्यात् ॥ ततस्तिलतोयपूर्णंपुटकं पिण्डसमीपेधृत्वा ॥ अमुकगोत्र०प्रेतशिरःपूरकप्रथमश्राद्धेएतत्तेतिलतोयपात्रंमयादीयतेतवोपतिष्ठतामित्येकंदद्यात्।ततःअनादिनिधनोदेवःशंखचक्रगदाधरः। अक्षय्यःपुण्डरीकाक्षःप्रेतमोक्षप्रदोभव॥१॥अतसीपुष्पसंकाशं पीतवाससमच्युतम्॥येनमस्यंतिगोविंदं नतेषांविद्यतेभयम्॥२॥इतिप्रार्थ्य काकेभ्योबलिंदद्यात्॥काकोसियमदूतोसि गृहाणबलिमुत्तमम्॥यमद्वारेगतेप्रेते तमाप्यायितुमर्हसि॥१॥ ततःपिण्डं जलेक्षिपेद्गवेवादद्या द्वायसान्वाखादयेत्।ततःस्नात्वागृहमागत्यगोग्रासंदत्त्वानिरामिषमेकवारंभक्षयेत्। इतिप्रथमदिनकर्म।एवमेवद्वितीयादिदिवसेषुद्वितीया दिपिण्डदानम् ॥ तत्रविशेषः॥ द्वितीयदिने—अमुकगोत्रप्रेत कर्णाक्षिनासिकापूरकोद्वितीयः पिण्डस्तेमयादीयतेतवोपतिष्ठताम्॥अमुकप्रे त द्वितीयदिने—द्वेतिलतोयाञ्जलीद्वेतिलतोयपात्रेचतेमयादीयेतेतवोपतिष्ठेतामितिदद्यात्॥२॥ तृतीयदिने—गलांसभुजवक्षःपूरकस्तृतीयः पिण्डस्तेमयादीयतेतवोपतिष्ठताम्॥अमुकप्रेत तृतीयदिनेत्रयस्तिलतोयांजलयस्त्रीणितिलतोयपात्राणिचतेमयादीयन्तेतवोपतिष्ठंताम् ॥३॥

१ मृतश्चपञ्चमादूर्ध्वमव्रतः सव्रतोपि वा ॥ पायसेन गुडेनापि पिण्डान्दद्याद्दशक्रमात॥एकादशं द्वादशं च वृषोत्सर्गविधिं विना ॥ महादानविहीनंच पौगंडे कृत्यमाचरेत ॥ जीवमाने च पितरि न पौगंडे सपिण्डनम् ॥ अतस्तस्य द्वादशाहन्येकोद्दिष्टं समाचरेदितिगारुडात् ॥

चतुर्थदिने नाभिलिंगगुदपूरकश्चतुर्थः पिण्डस्ते मयादीयते०॥चत्वारस्तिलतोयाञ्जलयःचत्वारितिलतोयपात्राणिच तेमयादीयन्तेतत्रोप
तिष्ठंतामिति ॥४॥ पंचमदिने जानुजंघापादपूरकःपञ्चमःपिण्डस्तेमयादीयते०॥पंचतिलतोयांजलयः पंचतिलतोयपात्राणिचतेमयादी
यन्ते०॥५॥षष्ठदिने सर्वमर्मपूरकःषष्ठःपिण्डस्तेमयादीयते०॥षट्तिलतोयाञ्जलयःषट्तिलतोयपात्राणिचतेमयादीयंते०॥६॥सप्तमदिने
सर्वनाडीपूरकःसप्तमःपिण्डस्तेमयादीयते०।सप्ततिलतोयाञ्जलयःसप्ततिलतोयपात्राणिचतेमयादीयंते०।७॥अष्टमदिनेदन्तलोमादिपूरकोऽ
ष्टमः पिण्डस्तेमयादीयते०॥अष्टौतिलतोयाञ्जलयः अष्टौतिलतोयपात्राणिचतेमयादीयन्ते०॥८॥ नवमदिने वीर्यपूरकोनवमःपिण्डस्ते
मयादीयते०॥नवतिलतोयाञ्जलयःनवतिलतोयपात्राणिचतेमयादीयन्ते०॥९॥ दशमदिनेअमुकगोत्रप्रेतक्षुत्पिपासापूरकोदशमःपिण्डस्ते
मयादीयतेतत्रोपतिष्ठताम्॥अमुकप्रेत० दशतिलतोयांजलयस्तेमयादीयंते०॥ अमुक० प्रेत दशतिलतोयपात्राणिचतेमयादीयंतेतत्रोपति
ष्ठंतामिति।१०। अन्यत्सर्वंसमानम्।अत्यशक्तौतुदिनत्रयंवापिण्डदानंकार्यंत्र्यहाशौचेतुप्रथमदिवसेत्रीन्पिण्डान्द्वितीयदिनेचतुरस्तृतीयदि
नेपित्रीन्पिण्डान्दद्यात्।सद्यआशौचपक्षेतु एकस्मिन्नेवदिनेदशपिण्डान्दद्यात्। येनद्रव्येणप्रथमपिण्डोदत्तस्तत्सजातीयेनैवपिण्डान्तरंदद्या
त्॥येनपुत्रादिनाप्रथमःपिण्डोदत्तःसएवपिण्डांतरमपिदद्यात्॥अत्रकेचिन्नवश्राद्धं विषमदिवसेदशाहमध्येकुर्वन्तितत्राधिकंफलंभवति॥अ
करणेप्रत्यवायोनास्ति।इच्छाचेत्कर्त्तव्यम्।विधिस्तुपूर्ववत्। इतिदशगात्रश्राद्धानि।अथाशौचान्तदिनकृत्यम्।तत्रप्रेतस्पृष्टवासास्यंत्यानामा
श्रितानांचदत्त्वामृन्मयपाकभांडादीनिचत्यक्त्वागृहशुद्धिंविधायकेशलोमनखान्यथाचारंवापयित्वा सर्षपकल्केनतिलामलकैर्वाशिरश्चोन्मृ
ज्यशुद्धजलेनस्नानंचकृत्वावासोयुगंपरिधायआचम्यवाग्यतोवृषभंगांसुवर्णगोरोचनंदधिदूर्वांचस्पृष्ट्वाशूद्रोयष्टिंसंस्पृश्यशुद्धोभवेत्।अथैका

दशाहदिनकर्मतत्रतावच्छूद्राणां¹वृषोत्सर्गः।तस्यप्रयोगः।प्रागुदक्प्रवणेविविक्तेनिर्जनेवनेगोमध्येवत्सतरीचतुष्टयेनद्वाभ्यामेकेनवासहितंत्रिहायनंसर्वलक्षणविशिष्टंवृषंवस्त्रमाल्यकिंकिणीघंटाहेमपट्टिकादिभिर्भूषयित्वा तत्रानयेत्।तत आचम्य पूर्वाभिमुखः कुशत्रयतिलजलान्यादायदेशकालौसंकीर्त्य ॥ अद्यैकादशेऽह्नि अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंस्वर्गलोकप्राप्त्यर्थं वृषोत्सर्गंकरिष्ये—इतिसंकल्प्य ऐशान्यांकलशंसंस्थाप्य तत्रताम्रं रुद्रंनिधाय नाममंत्रेणषोडशोपचारैः संपूज्य अग्निंस्थापयेत्॥ततोहस्ते पुष्पचंदनतांबूलवासांस्यादाय देशकालौसंकीर्त्य अद्यकर्त्तव्यवृषोत्सर्गांगभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे ॥ वृतोस्मीतिप्रतिवचनम् ॥ इतिब्रह्माणंवृत्वा एवमेवहोतारं वृणुयात्॥ततो होता हस्तमात्रं चतुरस्रं स्थण्डिलंकृत्वा कुशैःपरिसमुह्य तानैशान्यांपरित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनमध्येप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य अनामिकांगुष्ठाभ्यांमृदमुद्धृत्य ऐशान्यांक्षिप्त्वा तंदेशंजलेनाऽभ्युक्ष्य तत्रतूष्णींकांस्यपात्रस्थमग्निंस्थापयेत् ॥ ततोऽग्नेर्दक्षिणतः शुद्धमासनंदत्त्वा तदुपरिप्रागग्रान्कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणानीय अत्रत्वंमेब्रह्माभव इत्यभिधाय ब्राह्मणं तदभावे कुशनिर्मितंकल्पितासने उपवेशयेत् ॥ ततः प्रणीतापात्रंजलेनापूर्य्य कुशैराच्छाद्य ब्रह्माणमवलोक्याऽग्नेरुत्तरतः कुशोपरिनिदध्यात्॥ ततः प्रागग्रैश्चतुर्भिर्दर्भैः आग्नेयादीशानांतं॰ ब्रह्मणोग्निपर्यंतं नैर्ऋत्याद्वायाव्यन्तमभितः प्रणीतापर्यंतं क्रमेण अग्नेःपरिस्तरणं कृत्वा अग्नेः पश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयम् ²पवित्रार्थं साग्रमनन्तर्गर्भंकुशपत्रद्वयम् २ प्रोक्षणीपात्रमाज्यस्थालीचरुस्थाली संमार्जन

१ (हेमाद्रौ) एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः । पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशैतैरपि इति ।

कुशत्रयमुपयमनकुशत्रयंसमिधस्तिस्रः स्रुव आज्यंगव्यंतंडुलान्दुग्धं तण्डुलपिष्टं तण्डुलाद्यन्नपूर्णपात्रं दक्षिणांच पवित्रच्छेदनकुशान्
पूर्वदिशि क्रमेणासादनीयम् ॥ ततः कुशपत्रद्वयमादाय अग्रतः २ प्रादेशमात्रंप्रमाप्य कुशत्रयेणच्छित्त्वा पवित्राभ्यां प्रणीतोदकमुत्पूय
प्रणीतोदकंत्रिःप्रोक्षण्यांनिधाय प्रोक्षण्युदकंभूमौत्रिःक्षिप्त्वापवित्रे प्रोक्षण्यांनिधाय प्रणीतोदकेनप्रोक्षणीप्रोक्षणं प्रोक्षणीजलेनासादित
वस्तुसेचनमग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रनिधाय आज्यस्थाल्यामाज्यंनिरूप्य चरुस्थाल्यांतण्डुलान्निक्षिप्य प्रणीतोदकेनतांस्त्रिःप्र
क्षाल्य तत्रप्रणीतोदकंदुग्धंचप्रक्षिप्य आज्यंपायसंपिष्टंचरुंचश्रपणार्थं युगपदग्नौनिधाय तृणंप्रज्वाल्य प्रदक्षिणमाज्यचर्व्वोः समंताद्भ्रा
मयित्वा वह्नौतत्प्रक्षिप्य दक्षिणहस्तेनस्रुवमादायाधोमुखमग्नौतापयित्वा सव्येपाणौकृत्वा दक्षिणहस्तेन संमार्जनकुशानामग्रैरग्रम
ध्यैर्मध्यंमूलैर्मूलंस्रुवंसंमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनःप्रतप्य स्रुवंदक्षिणतोनिदध्यात ॥ ततः स्वयमाज्यंचरुंच उद्वास्य स्वपुरतः
आज्यं तदुत्तरतश्चरुंनिधाय आज्यंप्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्येतन्निरसनम् । पुनः प्रोक्षण्युत्पवनम् ॥ ततउत्थाय उपयमनकुशा
न्वामहस्तेकृत्वा प्रजापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्ताः समिधस्तिस्रः प्रक्षिपेत् ॥ तत उपविश्य सपवित्रप्रोक्षण्युदकेनाग्निंपर्यु
क्ष्य प्रणीतापात्रेपवित्रेनिधाय पातितदक्षिणजानुः कुशाग्रेणब्रह्मणान्वारब्धः सुसमिद्धेऽग्नौ आज्येनजुहुयात॥तत्र ब्राह्मणद्वारातूष्णींहोमः॥
इहरतिः स्वाहा इदमग्नये १ इहरमध्वंस्वाहा इदमग्नये २ इहधृतिः स्वाहा इदमग्नये ३ इहस्वधृतिःस्वाहा इदमग्नये ४ अग्नयेस्वाहा
इदं० ५ अग्नयेस्वाहा इदं० ६ इतिषड् हुत्वा ॥ प्रजापतये स्वाहा इदं० १ इंद्राय० इदं० २ अग्नये० इदं० ३ सोमाय०इदं०४इत्या
घारावाज्यभागौचहुत्वा पायसंतंडुलपैष्टकंचादाय संस्रवंविनैव जुहुयात्॥ अग्नयेस्वाहा इदं० १ रुद्राय० इदं०२ शर्वाय०इदं०३ पशुप

तये० इदं० ४ उग्राय० इदं ५ अशनये० इदं ६ भवाय० इदं० ७ महादेवाय० इदं० ८ ईशानायस्वाहा इदमीशानाय ९ इतिहुत्वा पिष्टकेन पूष्णे स्वाहा इदंपूष्णे १ ततः पायसपिष्टकाभ्याम् अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते इतिजुहुयात् ॥ तत आज्येन अग्नये० इदं० १ वायवे० इदं० २ सूर्य्याय० इदं० ३ अग्नीवरुणाभ्यांस्वाहा इदं० ४ अग्नये० इदं० ५ वरुणादिभ्यः स्वाहा इदं० ६ वरुणाय० इदं० ७ प्रजापतये० इदं ८ इतिमनसाहुत्वा स्थंडिलपरितोदिक्पालेभ्योमाषभक्तबलीन्दद्यात् ॥ अत्रपूर्णाहुतिहोमोबर्हिर्होमश्चकृताऽकृतः॥ततो भस्मवंदनंसंस्रवप्राशनमाचमनंकृत्वा प्रणीताजलेनशिरःसंमृज्य पवित्रे अग्नौप्रक्षिप्य ऐशान्यां प्रणीतांन्युब्जीकुर्यात् ॥ ततो ब्रह्मणेपूर्णपात्रदानं ब्रह्मग्रथिविमोकश्च ॥ ततो होत्रे सुवर्णदक्षिणांदत्त्वा रुद्रंनमस्कृत्य दक्षिणपार्श्वेत्रिशूलेनपरस्मिश्चक्रेणव्यत्ययेनवा यथाचारं कुंकुमेनवृषमंकयित्वा लोहकारमाहूयचिह्नयेत् ॥ ततो वत्सरीसहितंवृषभं स्नापयित्वा लोहघंटानूपुरकनकपट्टिकादिभिः सर्वानलंकृत्य प्रणम्य वृषभस्यदक्षिणकर्णे–वृषोहिभगवान्धर्मश्चतुष्पादः प्रकीर्त्तितः ॥ वृणोमितमहंभक्त्यासमांरक्षतुसर्वदा ॥१॥ इति जपित्वा उदङ्मुखः (सव्येन) वृषपुच्छंगृहीत्वा ॥ कुशत्रयतिलजलान्यादाय ॥ अद्येकादशेऽह्नि काश्यपगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वकाक्षय्यस्वर्गलोकप्राप्तिकाम एनंवृषंरुद्रदैवतं यथाशक्त्यलंकृतंगंधाद्यर्चितं त्रिशूलचक्रांकितंयुवानंवत्सतरीयुतममुकगोत्रायामुकप्रेताय अहमुत्सृजामि युष्मभ्यंपतिंददाम्येतेन पत्यास्वच्छंदंचरत तेनश्रीरुद्रः प्रीयतामित्युक्त्वासतिलजलंभूमौक्षिपेत् ॥ ततोऽपसव्यंकृत्वा सतिलंपुच्छंगृहीत्वा दक्षिणामुखः अमुकगोत्रप्रेत इदंतेवृषवत्सतर्योःपुच्छोदकेमुपतिष्ठतामित्युक्त्वा अंजलिंदत्त्वा ॥ नमः पितृभ्योमातृभ्यो बंधुभ्यश्चाबितृप्तये ॥ मातृपक्षाश्चयेकेचिद्येचान्येपितृपक्षजाः ॥

गुरुश्वशुरबंधूनां येकुलेषुसमुद्भवाः ॥ येप्रेतभावमापन्नायेचान्ये श्राद्धवर्जिताः ॥ वृषोत्सर्गेणतेसर्वे लभंतांप्रीतिमुत्तमामित्यंजलित्रयं
दद्यात् ॥ ततः (सव्येन) अयंहिवोमयादत्तः सर्वासांपतिरुत्तमः ॥ तुभ्यंचैवमयादत्ताः पत्न्यःसर्वामनोरमाः ॥ वृषएषमयादत्तस्तं
तारयतुसर्वदा ॥ १ ॥ इतिप्रार्थ्य ॥ दाताब्राह्मणानाहूयवक्रोक्तिभिःपदैः ॥ नचाज्यंनचतत्क्षीरं पातव्यंकेनचित्कचित् ॥ नवाह्योसौवृष
श्चैषामृतेगोमूत्रगोमये ॥ १ ॥ इतिश्रावयेत् ॥ ततः आमान्नेनत्रिप्रभृतीन्ब्राह्मणान्संतोष्य ॥ बहुतोयतृणेऽरण्ये अथवा बहुगोधनसंकुले
गोकुलेवत्सतरीयुतोगोपतिःक्षेपणीयः ॥ निर्गते गोपतौ विप्रेभ्योदक्षिणांरुद्रकुंभंचदत्त्वा विष्णुंस्मरेत् ॥ एवंवृषोत्सर्गविधिंनरोयःकरोति
भक्त्यानिजपूर्वजानाम् ॥ उद्धृत्यतान्दुर्गतिपंकमग्नान्स्वयंसलोकंसमुपैतिशंभोः॥इतिवृषोत्सर्गपद्धतिः ॥ अथगोदानप्रयोगः॥तत्रआशौ
चान्तद्वितीयेह्नि पुण्यदेशेयथोक्तलक्षणवतींगांसंस्थाप्य ब्राह्मणमुपवेश्य स्वयं गोपुच्छदेशेप्राङ्मुखः कुशत्रयतिलजलान्यादाय अद्ये
त्यादिदेशकालौसंकीर्त्य अमुकगोत्रस्यामुकप्रेतस्यस्वर्गकामो गोदानमहंकरिष्ये ॥ तदंगतया गोब्राह्मणस्यचपूजनमहंकरिष्ये-इति
संकल्प्य ब्राह्मणंपाद्यादिभिः संपूज्य हस्तेपुष्पचंदनतांबूलवासांस्यादायकरिष्यमाणगोदानार्थमनेनद्रव्येण त्वामहंवृणे॥वृतोस्मीतिप्रति
वचनम्॥इतिवृत्वाधेनुंपूजयेत्॥तद्यथा—आवाहयाम्यहंदेवींसुरभिंलोकमातरम्।यस्याःशरणमाविष्टःसर्वपापैःप्रमुच्यते॥१॥ इत्यावाहनम्॥
सर्वदेवप्रियंदेविचंदनंमलयोद्भवम्॥कस्तूरीकुंकुमाढ्यंचगोगंधंप्रतिगृह्यताम्॥२॥इतिगंधम्॥ऐरावतकुलेजाताशतक्रतुप्रियासदा।यालक्ष्मीः
सर्वभूतानांयाचदेवेष्ववस्थिता।धेनुरूपेणसादेवीममपापंव्यपोहतु॥३॥इतिपुष्पा०।अथाङ्गपूजा॥आस्यायनमः।शृङ्गाभ्यांनमः॥ पृष्ठाभ्यां
नमः॥पुच्छायनमः॥पूर्वपद्भ्यांनमः॥पश्चिमपद्भ्यांनमः॥वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् ४इति

धूपं०॥साज्यंचवर्त्तिसंयुक्तं वह्निनायोजितंमया॥दीपंगृहाणसुरभे मयादत्तंहिभक्तितः ॥५॥ इतिदीपं०॥वैष्णवीसुरभेमातर्नित्यं विष्णुपदे
स्थिता।नैवेद्यंहिमयादत्तंगृह्यतांपापाहारिणि।६।इतिनैवेद्यंतृणानिच।आच्छादनंचकौशेयंशुद्धंचैवसुनिर्मलम्॥सुरभ्यैदीयमानंतुप्रीयतांकेश
वःसदा ॥७॥ इतिवस्त्रम् ॥ यत्तेमयार्पितंशुद्धं घंटांचामरमंडितम् ॥ सुरभेतद्गृहाणेदं मनित्रिदशवंदिते ॥८॥ इतिघंटाचामरौ ॥ एवंगंधा
दिभिःसंपूज्यप्रदक्षिणांकृत्वाउदङ्मुखोगोपुच्छंगृहीत्वाकुशत्रयतिलजलैस्तर्पणंकुर्य्यात्॥तद्यथा—देवासुरास्तथायक्षानागागंधर्वराक्षसाः।
पिशाचागुह्यकाःसिद्धाःकूष्मांडास्तरवःखगाः।१।जलेचराभूनिलयावाय्वाधाराश्चजन्तवः।प्रीतिमेतेप्रयांत्वाशुमद्दत्तेनाम्बुनाखिलाः।२।आ
ब्रह्मणोयेपितृवंशजाता।मातुस्तथावंशभवामदीयाः।वंशद्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च।३।तेसर्वेतृप्तिमायांतुगोपुच्छोदक
तर्पणैः।इतितर्पणंकृत्वागावोममाग्रतः संतुगावोमेसंतुपृष्ठतः॥गावोमेहृदयेसन्तुगवांमध्येवसाम्यहम्१इतिप्रार्थ्यगोपुच्छंकुशादीनि चादाय
अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गकामः इमां गां सवत्सांसुपूजितांपयस्विनींसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठींवस्त्रयु
गच्छन्नांकांस्यपानीयपात्रांपैत्तलदोहांरुद्रदैवताममुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ इतिगोपुच्छंसतिलकुशोदकंहस्तेदद्यात् ॥
स्वस्तीतिप्रतिवचनम्॥ततोदानप्रतिष्ठार्थंहिरण्यदक्षिणांदत्त्वाविसृजेत्॥इतिगोदानप्रयोगः॥अथशूद्राणामेकादशाहश्राद्धप्रयोगः॥तत्रप्रात
र्नद्यादौस्नात्वाशुद्धवाससीपरिधायनित्यावश्यकंसमाप्य नद्यादितीरेदेवालयेवागत्वा तत्रश्राद्धभूमिंपरिकल्प्य गोमयोदकाभ्यामुपलिप्य
ज्वलदंगारैः संशोध्यगौरमृत्तिकयाऽऽच्छाद्यतिलैर्गौरसर्षपैश्चविकिरेत् ॥ ततोमध्याह्नेपुनःस्नात्वा पूर्वरचितश्राद्धदेशमागत्यतिलतैलेनदी
पप्रज्वाल्यसंस्थाप्यकाककुक्कुटादीञ्श्राद्धापहंतॄनपसारयेत ॥ तत आसनेउपविश्य सव्येनाचम्य ॥ अपवित्रः० ॥ पुंडरीकाक्षःपुनात्विति

जलेनश्राद्धद्रव्याणिस्वात्मानंचप्रोक्ष्य।भूम्यैनमः।गयायैनमः।गदाधरायनमः।इतिनत्वाकुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्यअप
सव्येन ॥ अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थं पितृसमत्वप्राप्त्यर्थमाद्यमासिकत्रैपक्षिकद्वितीयमासिकतृतीयमासिकचतुर्थं॰पंच
म॰ ऊनषष्ठ॰ षष्ठ॰ सप्तम॰ अष्टम॰नवम॰दशम॰ एकादश॰ऊनाब्दिक॰ द्वादशमासिकानि स्वस्वकालेकर्त्तव्यानि षोडशश्राद्धानि
[2]संपिण्डीकरणाधिकारसिद्ध्यर्थमेकादशेहन्यपकृष्यएकोद्दिष्टविधिनातन्त्रेणकरिष्ये इतिसंकल्पयेत् (एकादशमासाभ्यन्तरेऽधिमासपाते[3]
षोडशपदस्थानेसप्तदशपदंप्रयोज्यम्) ततोदेवताभ्यइतित्रिर्जपित्वा अपसव्येनदक्षिणाभिमुखः पातितवामजानुः तिलगौरसर्षपान्गृही
त्वा ॥ नमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥ १ ॥ इतिसर्वत्रविकीर्यनीवीबंधंकुर्य्यात् ॥ ततः
कुशत्रयतिलजलान्यादाय॥काश्यपगोत्रामुकप्रेत आद्यश्राद्धे इदमासनंतेमयादीयतेतवोपतिष्ठतामित्युक्त्वा ऋजुकुशत्रयरूपमासनंप्रथमं
सर्वतः पश्चिमगतंदक्षिणाग्रमुत्सृजेत् १ (नात्रमोटकरूपम्) एवंमासिकश्राद्धनिमित्तक॰ २ त्रैपक्षिक॰ ३ द्वितीयमासिक॰ ४ तृतीय॰
५ चतुर्थ॰ ६ पंचम॰ ७ ऊनषाण्मासिक॰ ८ षाण्मासिक॰९ सप्तम॰ १० अष्टम॰ ११ नवम॰ १२ दशम॰ १३ एकादश॰ १४
ऊनाब्दिक॰ १५ द्वादशमासिक १६ निमित्तकान्यासनानिक्रमेणपूर्वपूर्वगतान्युत्सृजेत् ॥ ततः तिलेभ्योनमः—इतितिलान्विकीर्य
दर्भहस्तस्तेषु ॥ इहलोकंपरित्यज्य गतोसिपरमांगतिम् ॥ मनसावायुरूपेण चटेत्वाहंनिमंत्रये ॥ १ ॥ इतिप्रेतमावाहयेत् ॥ ततःषो

१ जातूकर्ण्यः-द्वादश प्रतिमास्यानि आद्यषाण्मासिके तथा। त्रैपाक्षिकाब्दिकेचेति श्राद्धान्येतानि षोडश इति । २ स्मृतिरत्नावल्याम्—द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिण्डनम् । एकादशेह्निकुर्वीत प्रेतश्राद्धानि षोडश इति । ३ संवत्सरस्य मध्ये तु यदि स्यादधिमासकः ॥ तदा त्रयोदशे मासि क्रिया प्रेतस्य वार्षिकी । इति गारुडे ।

डशाऽर्घपात्रोपरि एकैकंप्रादेशमात्रंसाग्रंदर्भदलंधृत्वा तेषुअद्भ्योनमः इतिजलंक्षिप्त्वा तिलेभ्योनमः इतितिलान् तूष्णींगंधपुष्पाणिच प्रक्षिपेत्॥ततः प्रथमपात्रंगृहीत्वा तत्रस्थितंदर्भदलंपलाशपत्रेधृत्वा अद्भ्योनम इत्यर्घपात्रमभिमंत्र्य काश्यपगोत्रामुकप्रेत आद्यश्राद्धे एषतेहस्तार्घोमयादीयतेतवोपतिष्ठतामितिपवित्रसंज्ञकदर्भोपर्य्यर्घजलंक्षिपेत॥ एवंमासिकादिपंचदशश्राद्धनिमित्तकान्यर्घजलानिनिक्षिपेत् ॥ अर्घ्यपात्राणिचपुरतउत्तानतयाएवस्थापयेत् (नन्युब्जम्) ॥ ततोगंधपुष्पधूपदीपतांबूलवासांसिधृत्वा काश्यपगोत्रामुकप्रेत आद्यादिद्वादशमासिकांतषोडशश्राद्धनिमित्तिकान्येतानिगंधपुष्पधूपदीपतांबूलवासांसितेमयादीयन्तेतवोपतिष्ठंतामित्येकतंत्रेणोत्सृजेत् ॥ ततोगौरमृद्भस्मादिनामंडलंकृत्वा (परकीयभूमौश्राद्धकरणेतद्भूस्वामिने इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिबलिंदत्त्वा) एकस्मिन्वाषोडशपात्रेषु आमान्नंसोपस्करंसजलंपरिविष्य मधुदत्त्वा मधुमधुमध्वितिचाभिमंत्रयेत् (नात्रपात्रालम्भोंवाहो) ततःअन्नपात्रंपरितस्तिलान्विकीर्य वामकरेण पात्रंस्पृशन् ॥ काश्यपगोत्रामुकप्रेत आद्यादिद्वादशमासिकान्तषोडशश्राद्धनिमित्तकमिदमन्नंघृताद्युपस्करसहितंतेमयादीयते तवोपतिष्ठतामित्यासनवामभागेजलमुत्सृजेत् (नात्रपैतृकोजपः) ॥ विकिरमपिन कुर्यात् ॥ ततोऽन्नपात्रसमीपे पिण्डदानार्थं सिकताभिः षोडशवेदिकाः कृत्वा गोमयोदकेनाभ्युक्ष्य प्रत्येकं दक्षिणाग्रकुशत्रयास्तरणं कुर्यात् ॥ ततः षोडशपुटकेष्वेकस्मिन्पुटकेवा जलतिलगन्धपुष्पाणिकृत्वा तत्पुटकंगृहीत्वा ॥ काश्यपगोत्रामुकप्रेत आद्यश्राद्धपिण्ड

---

१ हेमाद्रिगादडकारिकासु—आशिषो द्विगुणा दर्भा ञ्याशीः स्वस्तिवाचनम् । पितृशब्दः स्वसंबन्धः शर्मशब्दस्तथैव च॥ आवाहः पात्रालंभश्च उल्मुकोल्लेखनादिकम् । तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च । प्रदक्षिणाविसर्गश्च सीमांत गमनं तथा । अष्टादश पदार्थास्तु प्रेतश्राद्धे विवर्जयेत—इति ।

स्थानेऽत्रावनेनिक्ष्वतेमयादीयते तवोपतिष्ठतामितिवेदिकायांकुशत्रयोपरिअवनेजनजलंकिंचिद्दद्यात् ॥ १ ॥ एवमेवमासिकादिपिण्ड स्थानेषु प्रत्येकमवनेजनंदद्यात् ॥ ततश्चरुणासक्तुनावा आमान्नेन घृतमधुतिलयुक्तेन षोडषपिण्डान्निर्माय प्रथमंपिण्डं कुशत्रया दीनि चादाय ॥ काश्यपगोत्रामुकप्रेत आद्यश्राद्धे एतत्ते पिण्डंमयादीयते तवोपतिष्ठतामिति सव्योपगृहीतदक्षिणहस्तेन कुशोपरि पितृ तीर्थेनावनेजनस्थानेदद्यात् ॥ १ ॥ एवं मासिक० २त्रैपक्षिक० ३द्वितीयमासि० ४तृतीयमासि० ५चतुर्थ० ६पंचम० ७ऊनषाण्मासि० ८ षाण्मासिक० ९ सप्तममासिक० १० अष्टम० ११ नवम० १२ दशम० १३ एकादश० १४ ऊनाब्दिक० १५ द्वादशमासिक १६ श्राद्धनिमित्तकपिण्डानिक्रमेण दद्यात् ॥ ततो हस्तौप्रक्षाल्य सव्येनाचम्य हरिंस्मृत्वा अपसव्येन अवनेजनपात्रं गृहीत्वा काश्यप गोत्रामुकप्रेताद्यश्राद्धपिण्डे अत्रप्रत्यवनेनिक्ष्वते मयादीयते तवोपतिष्ठतामिति प्रथमपिण्डोपरि प्रत्यवनेजनंदद्यात्॥एवमेव मासिका दिपंचदशपिण्डेषु क्रमेण प्रत्यवनेजनंदद्यात् ॥ ततोनीवींविस्रंस्य सव्येनाचम्य हरिंस्मृत्वा अपसव्येन प्रतिपिण्डं सूत्रत्रयंदत्त्वा काश्यपगोत्रामुकप्रेत आद्यादिद्वादशमासिकान्तषोडशश्राद्धपिण्डेषु एतानिवासांसि ते मया दीयन्ते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततः पिण्डान्गंधपुष्पधूपदीपतांबूलपूगीफलादिभिः संपूज्य एकस्मिन्पत्रपुटके शिवा आपः सन्तु इतिजलं सौमनस्यमस्तु इतिपुष्पम् अक्षतं चारिष्टंचास्तु इतितिलांश्चदत्त्वा कुशत्रयादीन्यादाय काश्यपगोत्रस्यामुकप्रेतस्य आद्यादिद्वादशमासिकान्त षोडशश्राद्धेषु यद्दत्तमन्नपानादिकं तदुपतिष्ठतामित्यक्षय्योदकंदद्यात् ॥ ततः पिण्डोपरिसपवित्रंकुशत्रयं निधाय ॥ सतिलदुग्धेनजलेन दक्षिणाग्रांधारांदद्यात् अनादिनिधनोदेवः शंखचक्रगदाधरः॥अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदोभव॥१॥अतसीपुष्पसंकाश पीतवास

समच्युतम्॥येनमस्यंतिगोविन्दं नतेषांविद्यतेभयम्॥२॥नारायणसुरश्रेष्ठ लक्ष्मीकान्त वरप्रद॥अनेनतर्पणेनाद्य प्रेतमोक्षप्रदोभव ॥ ३ ॥ काश्यपगोत्रामुकप्रेत अत्रजलधारास्तेमयादीयन्ते तवोपतिष्ठन्तामितिदद्यात् ॥ ततः पिण्डानुत्थाप्य कुशानग्नौक्षिप्त्वाहस्तौप्रक्षालयेत्॥ ततो रजतदक्षिणामादाय काश्यपगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्तिपूर्वकसद्गतिप्राप्त्यर्थं कृतैतदाद्यादिद्वादशमासिकान्तषोडश श्राद्धकर्मणः सांगतासिद्ध्यर्थमिदंरजतंचन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेनदातुमहमुत्सृजे इतिदद्यात् ॥ ततो देव ताभ्यः० इतित्रिःपठित्वा रक्षादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्याचामेत् ॥ ततः कर्म्मपूर्त्तिकामोविष्णुंस्मृत्वा प्रमादादितिपठित्वा श्राद्धवस्तूनि विप्राय प्रतिपादयेदगाधेजलेवाक्षिपेत् ॥ ततः पिण्डान्गोभ्यो वायसेभ्यो वा दद्यादगाधेजलेवाक्षिपेत् ॥ ततः एकादशामान्नानि विप्रेभ्योदत्त्वा शय्यादिदानैः परितोषयेत् ॥ इत्याद्यादिषोडशश्राद्धपद्धतिः ॥छ॥ ॥ अथशय्यादिदानम्॥ तत्र प्रयोगः ॥ तत्रादौ सारदारुमयींदृढां दन्तपत्रहेमपट्टाद्यैरलंकृतां हंसतूलीप्रतिच्छन्नांशुभ्रगण्डोपधानकां प्रच्छादनपटीयुक्तां गन्ध धूपाधिवासितां पुष्पतांबूलकुंकुमकर्पूरागरुचन्दनदीपकोपानच्छत्रचामरव्यजनासनसप्तधान्यघृतपूर्णकुंभसहितां शय्यामासाद्य तत्र हैमंकांचनपुरुषंस्थापयेत् ॥ ततो देशकालौसंकीर्त्य अद्याशौचान्तद्वितीयेह्नि काश्यपगोत्रस्यामुकप्रेतस्य स्वर्गकामः शय्या दानंकरिष्ये—इतिसंकल्प्य देयब्राह्मणं गन्धादिनासंपूज्य इमां सोपकरणांशय्यां ददामीतिद्विजकरेजलंदत्त्वा ददस्वेतिप्रतिवचना नन्तरं विप्रंशय्यायाा मुपवेशयेत् ॥ ततः सोपकरणशय्यायैनमः—इतिशय्यांनमस्कृत्य कांचनपुरुषं गन्धपुष्पधूपदीपनैवेद्यतांबूला दिभिः संपूज्य नमस्कृत्य कुशत्रयतिलजलान्यादाय॥ अद्याशौचान्तद्वितीयेह्नि काश्यपगोत्रस्यामुकप्रेतस्यपरलोकेसुखशयनार्थं स्व

र्गलोकप्राप्त्यर्थमिमांसोपस्करांशय्यां कांचनपुरुषप्रतिमायुतांविष्णुदेवत्याममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे—इतिसतिल कुशोदकं विप्रहस्तेदद्यात् ॥ स्वस्तीति विप्रोवदेत् ॥ ततः शय्यादानप्रतिष्ठार्थंहिरण्यंदत्त्वा शय्यांसंस्पृशेत् ॥ ततोदाता—यथानकृष्ण शयनं शून्यंसागरजातया ॥ शय्याममाप्यशून्यास्तु तथाजन्मनिजन्मनि ॥ १ ॥ इतिप्रार्थ्यप्रणम्यविसृजेत्॥इतिशय्यादानम्॥अथत्रयो दशपददानम्॥तत्र आसनम् १ उपानहौ २ छत्रं ३ मुद्रिकां ४ कमण्डलुम् ५ अन्नं ६ जलं ७ भाजनानि ८ वस्त्राणि ९ आज्यम् १० यज्ञोपवीतम् ११ यष्टिम् १२ तांबूलम् १३ इमानित्रयोदशदानद्रव्याणियथाशक्तिसंपाद्य कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य (अपसव्येन) काश्यपगोत्रस्यामुकप्रेतस्यपरलोके सुखप्राप्त्यर्थमसद्गतिनिवारणार्थमिमानि आसनोपानच्छत्रमुद्रिकाकमण्डलवन्नजल भाजनवस्त्राज्ययज्ञोपवीतयष्टितांबूलानित्रयोदशदान।निनानादैवतानिनानानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे—प्रेतायउपतिष्ठताम् । एभिःपददानैरमुकप्रेतस्य प्रेतत्वनिवृत्तिःसद्गतिप्राप्तिरितिपठित्वा यथाचारंदद्यात्॥ततः शक्तौसत्यांगाःवाहनंयानंदासीदासवेश्मरत्नादी निचप्रेतमुद्दिश्य विप्रेभ्योदद्यात् ॥ इतित्रयोदशपददानम्॥अथोदकुंभदानम् ॥ तच्च[1] एकादशाहादारभ्ययावत्संवत्सरंदातव्यम्॥परंत्वाधु निकआपत्कल्पेन सपिण्डनस्यमुख्यतयाद्वादशाहकालत्वादेकस्मिन्नेव दिने पूर्वोक्तसान्नोदकुंभनिमित्तकषष्ट्यधिकशतत्रयांजलिदानंपि ण्डानांदानंचकुर्वन्त्यतस्तथैवलिख्यते ॥ तत्रप्रयोगः॥कुशत्रयतिलजलान्यादाय काश्यपगोत्रस्यामुकप्रेतस्य मरणदिनादारभ्यसंवत्सर पर्यंतं तृषानिवृत्त्यर्थं प्रतिदिनसान्नोदकुंभनिमित्तकषष्ट्यधिकशतत्रयांजलिदानं करिष्ये—इतिसंकल्प्य दक्षिणामुखः पातितवामजा

१ स्मृतिसमुच्चये—एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ॥ दिनेदिने प्रदातव्यो यावत्स्याद्वत्सरः श्रुतैरिति ।

नुरपसव्येन ऋजुकुशत्रयतिलजलैस्तर्पयेत् ॥ अमुकगोत्रामुकप्रेत एषतिलतोयांजलिस्ते मयादीयतेतवोपतिष्ठतामित्यश्वत्थादौ ३६० दद्यात्॥एवमेव क्षुधानिवारणार्थं३६०पिण्डदानंकुर्य्यात्॥तत्र काश्यपगोत्रस्यामुकप्रेतस्य संवत्सरपर्यंतं क्षुधानिवारणार्थं प्रतिदिनश्राद्ध निमित्तकषष्ट्यधिकशतत्रयपिण्डदानंकरिष्यइतिसंकल्प्य हस्तमात्रकेस्थण्डिलेदर्भानास्तीर्य अमुकगोत्रामुकप्रेतप्रथममासिकश्राद्धनिमि त्तकानीमानि त्रिंशत्पिण्डानितेमयादीयन्तेतवोपतिष्ठंतामिति त्रिंशत्पिण्डानि३० दद्यात्॥एवमेव द्वितीयादिमासेषु॥इत्येकादशाहदिन कर्म॥छ॥ ॥ अथशूद्राणांसपिण्डनश्राद्धम्॥तच्चाधुनिका द्वादशाहे अनुकल्पेनकुर्वंति तैथवलिख्यते॥तत्रादौसपिण्डनदिने प्रातः स्नात्वा नित्यावश्यकं समाप्य मध्याह्नेपुनः स्नात्वाशुक्लधौतवाससी परिधाय गोमयोपलिप्तायांभूमौ सपिण्डादिद्वारा पाकंकारयेत्॥ततोमृति स्थाने श्राद्धभूमिंपरिकल्प्यगोमयोदकेनोपलिप्य गौरमृत्तिकयाच्छाद्य तत्र श्राद्धसामग्रीं जलपूरितान्द्वादशघटांश्चैकामामान्नपूरितांवर्ध नीं च संपाद्य आसनसमीपेतिलतैलेनदीपंप्रज्वाल्यस्थापयेत् ॥ काककुक्कुटादीनपसारयेच्छ्राद्धदेशावरणंचकुर्य्यात्॥ततः स्वासनेप्राङ् मुखउपविश्य (सव्येन) दर्भपवित्रधारणंकृत्वाआचम्य॥अपवित्रः पवित्रो०इतिपठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धवस्तूनि स्वात्मा नंचसिंचेत् ॥ ततः भूम्यैनमः ॥ भगवत्यैगयायैनमः ॥ भगवते गदाधरायनमः इतिप्रणम्य ॥ कुशत्रयतिलजलान्यादायदेशकालौ स्मृत्वा ॥ (अपसव्येन) काश्यपगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्या उत्तमलोकप्राप्त्यर्थममुकगोत्रैरमुकप्रेतपितृपितामहप्रपितामहै रमुकामुकदासैः सह मृतद्वादशाहेपार्वणैकोद्दिष्टोभयात्मकं सपिण्डीकरणश्राद्धमहंकरिष्य इतिसंकल्पयेत् ॥ ततोदेवताभ्यः पितृभ्य

१ हेमाद्रिमाधवगारुडेषु—आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात॥अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते—इति।तत्रैव—मंत्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि कीर्त्तितमिति।

श्वेतित्रिः पठित्वा तिलयवगौरसर्षपान्गृहीत्वा॥नमोनमस्तेगोविन्द पुराणपुरुषोत्तम॥इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥ १ ॥ अग्नि
ष्वात्ताः पितृगणाः प्राचींरक्षंतुमेदिशम्॥तथाबर्हिषदः पांतु याम्यांयेपितरः स्थिताः॥२॥प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः॥अधो
र्ध्वमपिकोणेषुहविष्मंतश्चसर्वदा।३।रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः॥ सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुवै॥४॥वायुभूतपितॄणांचतृप्ति
र्भवतुशाश्वती।इत्यनेनदिक्षु अधस्तादूर्ध्वकोणेषुचसर्वत्रविकीर्यनीवीबन्धंकुर्यात्॥अथासनादिदानम्।तत्रादौ उदङ्मुखउपविश्य(सव्येन)
सजघनंदक्षिणंजान्वाच्य कुशत्रययवजलान्यादाय।अद्य अस्मत्पितामहादित्रयश्राद्धसंबंधिनः कामकालसंज्ञकाविश्वेदेवा इदमासनंवोनम
इत्युच्चार्य्य देवतीर्थेनपूर्वाग्रंकुशत्रयंदेवमंडलेउत्सृजेत्॥ततः कामकालसंज्ञकान्विश्वान्देवानावाहयिष्ये इत्युक्त्वाकामलेभ्योनमः ॥ आग
च्छन्तुमहाभागा विश्वेदेवामहाबलाः॥येयत्रयोजिताः श्राद्धेसावधानाभवंतुते॥ १॥इत्यनेनाऽऽवाहयेत् ततोऽर्घपात्रेद्वेकुशंपत्रेधृत्वादेवतीर्थे
नदेवेभ्योनम इतिजलं यवेभ्योनम इतियवान्गंधपुष्पेचक्षिपेत्।ततोर्घपात्रमादाय तत्रस्थेपवित्रेपलाशपत्रेधृत्वा।अद्भ्योनमः इत्यभिमंत्र्य ॥
अद्यपितामहादित्रयश्राद्धसंबंधिनः कामकालसंज्ञकाविश्वेदेवा एषवोहस्तार्घोनमः इत्यर्घंदत्त्वा पात्रेपवित्रादिकृत्वा विश्वेभ्योदेवेभ्यः
स्थानमसीत्युत्तानंस्थापयेत् ॥ ततोगंधादिदानम् तत्रगंधपुष्पधूपदीपवस्त्रादिकमासनेधृत्वा कुशत्रययवजलान्यादाय ॥ अद्यपितामहा
दित्रयश्राद्धसंबंधिनः कामकालसंज्ञकाविश्वेदेवा एतानिगंधपुष्पधूपदीपतांबूलवासांसिवोनमः इत्युत्सृजेत् ॥ ततो विश्वेषांदेवानाम
र्चनंसंपूर्णमस्त्वितिपूर्णतांवाचयित्वाऽग्रेभुवंसंमृज्यपलाशादिपत्रावलीर्न्यस्यगौरमृत्तिकयाभस्मनावार्घमंडलंकुर्यात्॥एवंदेवक्रियाकाण्ड

१ कात्यायनः-अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ एतदेव हि पिञ्जूल्या लक्षणं समुदाहृतमिति ।

॥२४०॥

निर्वर्त्य पित्रादिश्राद्धदेशमागत्यासनेदक्षिणामुखउपविश्य अपसव्यंकृत्वा सजघनंवामंजान्वाच्य कुशत्रयतिलजलान्यादाय ॥ अद्य काश्यपगोत्रस्यामुकदासप्रेतस्य इदमासनमुपतिष्ठतामितिऋजुकुशत्रयरूपंदक्षिणाग्रमासनं प्रेतमंडलेस्थापयेत् ॥ ततो द्विगुणमुग्नकुश त्रयतिलजलान्यादाय काश्यपगोत्रपितामहामुकदास इदमासनं तुभ्यंनमः ॥ इतिप्रथमासनंमोटकरूपंदक्षिणाग्रंपश्चिमगतंपितामहाय उत्सृजेत्॥एवंप्रपितामहायवृद्धप्रपितामहायचोत्सृजेत् ॥ ततः पितृनावाहयिष्ये इत्युक्त्वा आवाहय इत्यनुज्ञातस्तिलान्विकीर्य पितृभ्योनमः इतिपठेत् ॥ ततोऽर्घपात्रचतुष्टये दर्भदलमेकैकपवित्रसंज्ञकंदक्षिणाग्रंधृत्वा ॥ अद्भ्योनम इतिप्रत्येकं जलंप्रक्षिप्य तिलेभ्योनम इतितिलान् तूष्णीं गंधपुष्पाणिच निक्षिपेत् ॥ ततः प्रेतार्घपात्रमादाय तत्रस्थंपवित्रंपलाशपत्रेधृत्वा अद्भ्योनमः इतिपात्रमभिमंत्र्य॥अमुकगोत्रामुकप्रेत एषतेऽर्घोमयादीयतेतवोपतिष्ठतामित्युक्त्वा पितृतीर्थेनपवित्रोपरि अर्घजलंकिंचिद्दद्यात्॥अर्घपात्रंचपवित्रजलसहितंपुरतः स्थापयेत्॥अथपात्रमेलनम्॥एवंप्रेतायार्घ्यंदत्त्वा प्रेतार्घ्यशेषंपितामहादिपात्रेषुसंयोजयेत्॥तत्रप्रयोगः॥(सव्येन) कुशत्रयादीन्यादायदेशकालौसंकीर्त्य (अपसव्येन) काश्यपगोत्रस्यामुकदासप्रेतस्य प्रेतत्वनिवृत्तिपूर्वकंसद्गतिप्राप्त्यर्थं तत्पितृपितामहप्रपितामहानामर्घैःसहार्घंसंयोजयिष्य इतिसंकल्पयेत्॥ततः प्रेतार्घपात्रंगृहीत्वा तत्रस्थंपवित्रं पितामहार्घपात्रे निधाय प्रेतार्घपात्रंदक्षिणहस्तेकृत्वा ॥ अमुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं पितृसमत्वप्राप्त्यर्थंचतदर्घपात्रस्थंप्रथमांशजलं काश्यपगोत्रस्यप्रेतपितुरमुकदासस्यवसुरूपस्यार्घपात्रेण सहसंयोजयिष्ये इतिप्रथमांशमर्घेणैवार्घेक्षिपेत्॥ततः तेनवसुलोकप्राप्तिः॥१॥पुनः प्रेतपवित्रं प्रपितामहार्घपात्रेनिधाय अमुकप्रेतस्य०

१ मैथिलरुद्रधरकृतश्राद्धविवेके—पात्रत्रयमग्रेधृत्वाइत्यादिप्रपंचः स्वरुच्या एवकल्पितः स शिष्टैर्नादरणीयः प्रमाणशून्यत्वात् ।

तदर्घपात्रस्थं द्वितीयांशजलं काश्यपगोत्रस्य प्रेतपितामहस्यामुकदासस्यरुद्ररूपस्यार्घपात्रेण सहसंयोजयिष्ये–इति द्वितीयांशं प्रेतार्घपात्रजलमर्घैणैवार्घे क्षिपेत् ॥ तेनरुद्रलोकप्राप्तिः ॥ २ ॥ ततः प्रेतपवित्रं वृद्धप्रपितामहार्घपात्रे कृत्वा ॥ अमुक प्रेतस्य प्रेतत्व० तदर्घपात्रस्थं तृतीयांशजलं काश्यपगोत्रस्य प्रेतप्रपितामहस्यामुकदासस्यादित्यरूपस्यार्घपात्रेण सह संयोजयिष्ये–इतितृतीयांशंप्रेतार्घपात्रजलमर्घैणैवार्घे क्षिपेत् ॥ तेनआदित्यलोकप्राप्तिः ॥ ३ ॥ इतिपात्रमेलनम् ॥ ततः प्रेतपवित्रं प्रेतार्घपात्रेकृत्वा तत्पात्रंप्रेतासनवामप्रदेशेस्थापयेत् ॥ अथपितामहादिभ्योर्घदानम् ॥ तत्रपितामहार्घपात्रंगृहीत्वा तत्रस्थंपवित्रं तदग्रेपलाशपत्रेधृत्वा ॥ अद्भ्योनमः-इत्यर्घपात्रमभिमंत्र्यदक्षिणकरेकृत्वा ॥ काश्यपगोत्रपितामहामुकदास एषतेहस्ताऽर्घोनमः ॥ इति पितृतीर्थेनपवित्रोपरिजलंदद्यात् ॥ एवमेवप्रपितामहवृद्धप्रपितामहाभ्यांदद्यात् ।अवशिष्टजलसहितान्यर्घपात्राणिपुरतःस्थापयेत्॥ततोवृद्धप्रपितामहार्घपात्रस्थानिजलादीनिप्रपितामहार्घपात्रेकृत्वा ॥ तत्सर्वंपितामहार्घपात्रेकृत्वा ॥ ततपितृभ्यः स्थानमसीत्यासनवामप्रदेशभूमावधोमुखंस्थापयेत्॥तदुपरिप्रपितामहाद्यर्घपात्रद्वयंस्थापयेत्।स्थापितान्यर्घपात्राणिदक्षिणादानपर्य्यंतंनोद्धरेन्नचालयेत्।ततोगंधादिदानम् ॥ गंधपुष्पधूपदीपतांबूलवासांसिधृत्वा कुशत्रयतिलजलान्यादाय॥अमुकगोत्रप्रेतसपिंडीकरणश्राद्ध एतानिगंधपुष्पधूपदीपतांबूलवासांसितेमयादीयंते तवोपतिष्ठंतामितिप्रेतायोत्सृजेत्।पुनर्द्विगुणभुग्नकुशत्रयादीन्यादाय । काश्यपगोत्रपितामहामुकदास एतानिगंधपुष्पधूपदीपतांबूलवासांसितुभ्यंनमः इतिपितामहायोत्सृजेत्।एवमेवप्रपितामहायवृद्धप्रपितामहायचोत्सृजेत्।ततः पितॄणामर्चनंसंपूर्णमस्त्वितिपठित्वा सर्वत्रभुवंसंमृज्यपलाशादिपत्रावलीःस्थापयेत्।अथाग्नौकरणम् ततःश्राद्धीयादामान्नादन्नंगृहीत्वा अग्नौकरणंकरिष्यइति

पृष्ट्वा कुरुष्वेत्यनुज्ञातः(अपसव्येन) पत्रपुटकादिस्थजलेऽव्यंजनक्षारवर्जितम्॥अग्नयेकव्यवाहनायनमः इदमग्नये० १सोमायपितृमतेनमः
इदंसोमायपितृमते २ इतिहुत्वाहुतशेषंपितामहादिपात्रेषुतूष्णींदत्त्वापिण्डार्थमवशेषयेत् ॥ (नप्रेतपात्रेदानम् नचविश्वेदेवपात्रे ॥ नहि
स्मृताःशेषभाजोविश्वेदेवाःपुराणगैरितिवाक्यात्)ततः(सव्येन)देवपात्रेऽन्यदामान्नंदत्त्वादैवपूर्वंचतुर्गुणंद्विगुणंसमंवा आमान्नंसोपस्करंदत्त्वा
मधुनाभिघार्य मधुमधुमध्वित्यभिमंत्रयेत् ॥ ततः सव्यादिनादेवपात्रमुत्तानकराभ्यामालभ्य विष्णवेनमःइत्यङ्गुष्ठंदत्त्वायवेभ्योनमइतिप
रितोयवान्विकीर्य्य वामकरेणपात्रंस्पृशन्दक्षिणकरेणकुशत्रययवजलान्यादाय ॥ अद्यास्मत्पितामहादित्रयश्राद्धसंबंधिनःकामकालसंज्ञ
का विश्वेदेवाइदमामान्नंसोपस्करंहव्यममृतरूपंवोनमः—इत्युदकंदेवतीर्थेन दक्षिणभागेभूमौक्षिपेत्।ततोऽपसव्यादिनाप्रेतपात्रवर्जं पितामहा
दिपात्रत्रयालंभः॥ प्रेतपात्रस्यतुपरितः तिलेभ्योनम इतितिलान्विकीर्यकुशत्रयादीन्यादायकाश्यपगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे इद
मन्नंसोपस्करंसजलंतेमयादीयतेतवोपतिष्ठतामितिवामभागेजलमुत्सृजेत् ॥ ततोहस्तप्रक्षालनंकृत्वापितामहपात्रंन्युब्जाभ्यांव्यस्ताभ्यां
पाणिभ्यांस्पृष्ट्वा ॥ विष्णवेनमः इत्यङ्गुष्ठंदत्त्वा ॥ तिलेभ्योनम इतितिलान्परितोविकीर्य ॥ वामकरेणपात्रंस्पृशन् द्विगुणभुग्नकुशत्र
यादीन्यादाय ॥ काश्यपगोत्र पितामहामुकदास इदमन्नंसोपस्करंसजलममृतरूपंतुभ्यंनमः इतिपितृतीर्थेन आसनवामभागेजलमुत्सृ
जेत्॥एवमेवप्रपितामहायवृद्धप्रपितामहायचामान्नमुत्सृजेत् ॥ततःअन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत्॥तत्सर्वमच्छिद्रमस्त्वितिप्रार्थ्य
मधुमधुध्वितिचपठेत्॥ततःसप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ।चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे।तेऽभिजाताःकुरुक्षेत्रेब्राह्मणावेद
पारगाः॥प्रस्थितादूरमध्वानंयूयंतेभ्योऽवसीदत॥इतिपठित्वारुचिस्तवादिकंपठेत्॥ततःपितामहपात्रसन्निधौभूमिंप्रोक्ष्यतत्रदक्षिणाग्रंकुशत्र

यमास्तीर्य्यंआमान्नमादायसव्यंजनतिलमेकीकृत्य।अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यंतु तृप्तायान्तुपरांगतिम्॥१॥
इतिकुशोपरिपितृतीर्थेनविकिरेत्॥ततःसव्येनाचम्यविष्णुंस्मृत्वा अपसव्येनप्रेतपिण्डार्थंवेदिंनिर्मायतत्पूर्वगतमपरंपितामहादित्रयपिण्डदा
नार्थंचवेदिंकुर्य्यात्॥ततः पितामहादिवेदिमध्येदर्भमूलेनदक्षिणाग्रांरेखांकृत्वा उल्मुकंभ्रामयित्वा उभयत्रसकृदाच्छिन्नकुशान्दक्षिणाग्राँ
स्तीर्त्वापात्रचतुष्टयेजलतिलगंधपुष्पाणिकुर्यात्॥ततःप्रथमपात्रमादाय॥काश्यपगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे अत्रावनेनिक्ष्वतेमयादी
यतेतवोपतिष्ठतामितिप्रथमवेदिकायांकुशोपरि अवनेजनंदद्यात् ॥ ततोऽपरपुटकंगृहीत्वाकाश्यपगोत्रपितामहामुकदास अत्रावनेनिक्ष्व ते
नमः इतिद्वितीयवेदिकायांकुशमूलेपितामहायावनेजनंदद्यात्॥एवमेवप्रपितामहायकुशमध्येवृद्धप्रपितामहायकुशाग्रेऽवनेजनंदद्यात्॥ त
तोगृह्यपाकेनवापायसेनसक्तुभिर्वाऽऽमान्नेनमध्वाज्यतिलव्यंजनसहितेन चतुरः पिण्डान्कृत्वा मधुघृताभ्यामभिघार्य्य ॥ प्रथमपिण्डं कुशान्न
यादीनिचादाय काश्यपगोत्र अमुकदासप्रेत सपिण्डीकरणश्राद्ध एतत्तेपिण्डंमयादीयते तवोपतिष्ठतामिति पितृतीर्थेन प्रथमवेदि
कायां कुशोपरिदद्यात् ॥ ततोद्वितीयपिण्डं द्विगुणभुग्नकुशादीन्यादाय काश्यपगोत्रपितामहामुकदास एतत्तेपिण्डंनमः इतिद्वितीय
वेदिकायां प्रथमावनेजनस्थाने सव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनपितामहायपिण्डंदद्यात् ॥ एवमेवप्रपितामहाय वृद्धप्रपितामहायच
पिण्डंदद्यात् ॥ ततः पितामहादिपिण्डास्तरणकुशमूले लेपभागभुजस्तृप्यन्तु–इतिकरंप्रोञ्छ्य हस्तौप्रक्षाल्यसव्येनाचम्यविष्णुंस्म
रेत् ॥ ततोऽपसव्येन प्रेतावनेजनपात्रमादाय काश्यपगोत्रामुकप्रेतात्रप्रत्यवनेनिक्ष्वतेमयादीयते तवोपतिष्ठतामितिप्रेतपिण्डोपरि प्रत्य
वनेजनंदद्यात्॥ततः प्रेतपिण्डं सूत्राच्छादनगंधपुष्पधूपदीपतांबूलादिभिरभ्यर्च्य ॥ अनेनपिण्डदानेन प्रेतस्यसद्गतिःउत्तमलोकावाप्तिः॥

अथपिण्डसंयोजनम् ॥ तत्रादौ पिण्डसूत्रादिकमपनीयहस्तद्वयेनसुवर्णरजतशलाकां तदभावे दर्भमयींरज्जुं मधुघृताक्तामादाय तया प्रेतपिण्डंसमंत्रेधाविभजेत् ॥ तत्रदेशकालौस्मृत्वा काश्यपगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपूर्वकपितृसमत्वप्राप्त्यर्थं वस्वादिलोकप्राप्त्यर्थंच अमुकगोत्राणां तत्पितृपितामहप्रपितामहानांपिण्डैः सहअमुकप्रेतस्यपिण्डसंयोजनंकरिष्ये-इतिसंकल्प्य ॥ततः प्रेतपिण्डस्य प्रथमभागमादाय वामहस्तेकृत्वा दक्षिणहस्तेपितामहपिण्डंधृत्वा काश्यपगोत्रस्यामुकप्रेतस्य पिण्डप्रथमशकलममुकगोत्रस्य प्रेतपितुरमुकदासस्यवसुरूपस्य पिण्डेनसहसंयोजयिष्ये-इत्युक्त्वापितामहपिण्डेनसहमधुघृताक्तंवर्तुलंचकृत्वा काश्यपगोत्रपितामहामुकदासएषते पिण्डोनमः इतिकुशमूले पितृतीर्थेनदद्यात् ॥ तेनवसुलोकप्राप्तिः ॥ १ ॥ ततोद्वितीयं प्रेतपिण्डभागं तत्पितामहपिण्डंच गृहीत्वा ॥ काश्यपगोत्रस्यामुकप्रेतस्य द्वितीयंपिण्डशकलं काश्यपगोत्रस्य प्रेतपितामहस्य रुद्ररूपस्य पिण्डेनसह संयोजयिष्ये इत्युक्त्वा प्रपितामहपिण्डेनियोज्य काश्यपगोत्र प्रपितामहामुकदास एषतेपिण्डोनमः इतिकुशमध्येदद्यात्॥तेनरुद्रलोकप्राप्तिः ॥२॥ पुनस्तृतीयभागमादाय ॥ काश्यपगो० अमुक प्रेतस्यतृतीयंपिण्डशकलंकाश्यपगोत्रस्यप्रेतप्रपितामहस्यादित्यरूपस्यपिण्डेनसह संयोजयिष्येइत्युक्त्वावृद्धप्रपितामहपिण्डेपूर्ववन्नियोज्य० काश्यपगोत्रवृद्धप्रपितामहामुकदास एषतेपिण्डोनमःइतिकुशाग्रेदद्यात्॥ तेन आदित्य लोकावाप्तिः ॥३॥ एवंप्रेतभागेनसह पिण्डत्रयं प्रत्येकमेकीकृत्य समंवर्तुलंकृत्वा ॥ ततः-एषवोनुगतः प्रेतः पितरस्तंददामिवः॥ शुभं भवतु शेषाणां जायंतांचिरजीविनः ॥१॥ इतिपिण्डानभिमृशेत ॥ (अत ऊर्ध्वंकदाचिद्भ्रांत्यापिप्रेतशब्दोनकार्य्यः)॥ततस्तूष्णींवामावर्त्तेन उदङ्मुखोभूत्वा श्वासंनियम्य तेनैवपथापरावृत्य पितृभ्योनमः इतिपिण्डोपरि श्वासमुत्सृजेत ॥ ततः पूर्वदत्तावनेजनपात्रं

गृहीत्वा॥काश्यपगोत्र पितामहामुकदास अत्रप्रत्यवनेनिक्ष्वतेनमः इतिपितामहपिण्डोपरिप्रत्यवनेजनंदद्यात्॥ एवमेव प्रपितामहवृद्ध
प्रपितामहपिण्डोपरिप्रत्यवनेजनंदद्यात्॥ततोनीवीं विस्रंस्यआचम्य॥वसंतायनमस्तुभ्यंग्रीष्मायचनमोनमः॥वर्षाभ्यश्चशरत्संज्ञऋतवेच
नमः सदा॥ हेमंतायनमस्तुभ्यं नमस्तेशिशिरायच ॥ मासवत्सरेभ्यश्च दिवसेभ्योनमोनमः ॥ इतिऋतुरूपान्पितॄन्नमस्कुर्य्यात् ॥
ततः पितृभ्योनमः इतिप्रत्येकंपितामहादिपिण्डोपरिसूत्रत्रयंदत्त्वा कुशादीन्यादाय काश्यपगोत्राः पितामहप्रपितामहवृद्धप्रपिता
महा अमुकामुकदासा एतानिवासांसि युष्मभ्यंनमः इत्युत्सृजेत् ॥ ततः पिण्डान्गंधपुष्पधूपदीपतांबूलदक्षिणादिभिः संपूज्य पिण्ड
शेषान्नं पिण्डसमीपेविकिरेत् ॥ ततः सव्यंकृत्वाहस्तौप्रक्षाल्य उदङ्मुखोदेवान्नपात्रे शिवा आपः संतु इतिजलम् ॥ सौमनस्यमस्त्व
तिपुष्पम्॥अक्षतंचारिष्टंचास्तु-इतियवांश्चनिक्षिपेत्॥एवमेव(अपसव्येन)पित्रादिपात्रचतुष्टयेप्रत्येकंजलपुष्पतिलान्दत्त्वा॥काश्यपगोत्र
स्यपितुरमुकदासस्य सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामिति पित्रेऽक्षय्योदकंदद्यात् ॥ एवमेवपितामहादीनामप्य
क्षय्योदकंदद्यात्॥ततः(सव्येन) प्राङ्मुखःकृतांजलिर्दक्षिणांदिशंपश्यन् अघोराः पितरःसंतु–इति पठित्वासमाचारात्पूर्वाग्रांजलधारांद
द्यात्॥ततः गोत्रंनोवर्द्धतां दातारोनोऽभिवर्द्धतां संततिश्चवर्द्धतां श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्तु॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि
याचितारश्चनःसंतु माचयाचिष्मकंचन॥एताः सत्याआशिषःसंतु –इतिब्राह्मणद्वारायाचेत॥ततोऽपसव्येन पिण्डोपरिसपवित्रान्कुशाना
स्तीर्य ॥ पितृभ्योनमः इतितदुपरि दक्षिणाग्रांजलधारांदद्यात् ॥ ततः पिण्डानुत्थाप्याघ्रायस्थाल्यांनिधापयेत् ॥ पिण्डाधारसकृदा
च्छिन्नदर्भानुल्मुकंचवह्नौक्षिपेत् ततोऽर्घपात्राण्युत्तानीकृत्य सव्येनदेवदक्षिणांदद्यात् ॥ तत्रकुशत्रययवजलहिरण्यद्रव्यमादाय ॥

अद्यास्मत्पितामहादित्रयसंबंधिकामकालसंज्ञकानां विश्वेषांदेवानां कृतैतच्छ्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदातुमहमुत्सृजे इतिदद्यात् ॥ ततोऽपसव्यादिनाद्विगुणभुग्नकुशत्रयादि रजतद्रव्यंचादाय ॥ काश्यपगोत्रस्यपितुरमुकदासस्य कृतैतत्सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दातुमहमुत्सृजे-इति पितृश्राद्धदक्षिणांदद्यात् ॥ एवमेव पितामहप्रपितामहवृद्धप्रपितामहानांक्रमेणश्राद्धदक्षिणांदद्यात्॥ (दैवेरजतनिषेधः) ततः सव्येन देवताभ्यः० इति त्रिर्जपित्वाविश्वेदेवाःप्रीयंतामितिब्रूयात्॥ततोऽपसव्येन द्वादशसजलघटसंकल्पंकुर्यात्॥तत्रद्विगुणभुग्नकुशत्रयतिलजलान्यादाय॥काश्यपगोत्रस्यास्मत्पितुरमुकदासस्यपरलोकेक्षुत्पिपासानिवृत्त्यर्थमिमे द्वादशकुम्भाः सान्नोदका नानानामगोत्रेभ्यः ब्राह्मणेभ्योदातुमहमुत्सृजे-इतिसंकल्प्य सुशीतलजलोपेताः सर्वोपस्करसंयुताः एतेघटामयादत्ताः स्वर्गद्वारेपुपतिष्ठतामितिपठित्वायथाचारंदद्यात्॥ततः पितॄन्विसृज्य । श्राद्धीयदीपान्पाणिभ्यां निर्वाप्य हस्तौपादौप्रक्षाल्य आचम्य कर्म्मपूर्त्तिकामो विष्णुंस्मरेत् ॥ ततः पिण्डान्गामजं वायसान्वाखादयेत् ॥ अग्नौजलेवाक्षिपेत्॥ततो बलिकर्मकृत्वा यथाशक्तिदशप्रभृतिब्राह्मणान् आमान्नेनतोषयेत्।ततोऽतिथिबांधवादिभिः सह स्वयमपिभोजनं कुर्यात्॥इतिसपिंडनश्राद्धपद्धतिः समाप्ता ॥ अथद्वादशाहेसपिंडनोत्तरं वैतरणीधेनुदानंशय्यादानंचकुर्वंति ॥ एकादशाहे सद्ब्राह्मणाऽलाभात॥तद्विधिस्तुपूर्ववज्ज्ञेयः॥अथशब्द्राणाम् ऊनमासिकादिपंचदशसान्नोदकुंभदानं तच्चसप्तदशाच्चतुर्दशदिनादारभ्यप्रतिमासंकार्यम्।तत्र तावदाचम्ये विष्णुंस्मृत्वा सान्नोदकुंभमुपनीय ॥ कुशत्रयतिलजलान्यादाय ॥ देशकालौ संकीर्त्य ॥ काश्यपगोत्रस्य पितुरमुकदासस्य

१ गोभिलः-यस्यसंवत्सरादर्वाग्विहिता तु सपिण्डता । विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश-इति ।

क्षुत्तृषोपशांत्यर्थं यावद्वत्सरं तावत्प्रतिमासं सान्नोदकुम्भदानंकरिष्ये इति संकल्पंकुर्य्यात्॥ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवाम
जानुर्द्विगुणभुग्नकुशत्रयतिलजलान्यादाय ॥ अमुकगोत्रपितरमुकदास ऊनमासिकसान्नोदकुम्भश्राद्धे इदमासनंतेनमः इति पित्रेमोट
करूपमासनं तिलजलसहितंदक्षिणाग्रमुत्सृजेत् ॥ पुनर्द्विगुणभुग्नकुशत्रयादीन्यादाय ॥ काश्यपगोत्रपितरमुकदास ऊनमासिकश्राद्धे
अयं सान्नोदकुंभस्तुभ्यंनमः इतिसंकल्प्य ब्राह्मणायदद्यात्॥ततःअद्यकृतैतत्सान्नोदकुंभदानप्रतिष्ठार्थमिदंरजतं चंद्रदैवतं यथानामगोत्राय
ब्राह्मणाय दक्षिणांदातुमहमुत्सृजे-इति दक्षिणांदद्यात् ॥ एवमेवमासिकादिचतुर्दशश्राद्धनिमित्तकसान्नोदकुंभदानंकुर्यात ॥
प्रतिमासंकरणाशक्तौपुत्रजन्मादिवृद्धिप्राप्तौ ऊनषाण्मासिकेत्रैपाक्षिकेवा सप्तदशेऽहनियथाचारं सर्वाण्यपकृष्यतंत्रेणकुर्य्यात्॥(वृद्ध्युत्तर
निषेधनात्) ॥ तत्रप्रयोगः॥देशकालौसंकीर्त्य॥अमुकगोत्रस्यपितुरमुकदासस्यक्षुत्तृषोपशांत्यर्थमूनमासिकं १ मासिकं २ त्रपाक्षिकं ३ द्वि
तीयमासिकं ४ तृतीयमासिकं ५ चतुर्थ० ६ पंचम० ७ ऊनषाण्मासिकं ८ षाण्मासिकं ९ सप्तम० १० अष्टम० ११ नवम० १२ दशम० १३
एकादश० १४ ऊनाब्दिकं १५ च एतानिपंचदशसान्नोदकुंभश्राद्धानिस्वस्वकालकर्त्तव्यानि इदानींममकुलेभविष्यवृद्धिनिमित्तत्वात्सर्वाण्यप
कृष्यसांकल्पेनविधिनातंत्रेणसद्यः करिष्ये इतिसंकल्पयेत्॥ततोऽपसव्यंकृत्वा द्विगुणभुग्नकुशत्रयादीन्यादाय ॥ काश्यपगोत्र पितरमुक
दास ऊनमासिकाद्यूनाब्दिकान्तपंचदशसान्नोदकुंभश्राद्धनिमित्तकमिदमासनं पंचदशधाविभज्यतुभ्यंनमः इत्यासनंदक्षिणाग्रमुत्सृजेत्।
पुनः काश्यपगोत्र पितरमुकदास ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकानि इमानिपंचदशसान्नोदकुंभानितुभ्यंनमः इतिसंक

१ द्वादशाहेचषाण्मासे त्रिपक्षेवाथवत्सरे । उदकुंभाःप्रदातव्याः मार्गेतस्यसुखायैव ॥ इतिगारुडात् ।

त्य दानप्रतिष्ठादक्षिणासहितपंचदशसान्नोदकुंभानिब्राह्मणेभ्योदद्यात् ॥ इतिसान्नोदकुंभदानम् ॥ अथऊनमासिकादिपंचदशश्राद्धानि ॥ तावच्चतुर्दशेऽहनि । ऊनमासिकैकोद्दिष्टंकृत्वा क्रमेणमासिकादिश्राद्धानिकुर्यात् ॥ प्रतिमासंकरणाऽशक्तौपुत्रजन्मविवाहादिवृद्धिप्राप्ता ऊनमासिके त्रैपक्षिकेवा ऊनषाण्मासिके एकद्वित्रिन्यूनदिने भौमार्कमंदनंदातिथियुग्मैकपादद्विपादत्रिपादचतुर्दशीशुक्रवारकर्तृनक्षत्रभद्रा व्यतीपातादिवर्जिते एकस्मिन्नेवदिनेपंचदशश्राद्धानिकुर्यात् ॥ तत्रप्रयोगः ॥ श्राद्धपूर्वदिने एकभक्तादिनियमंविधाय श्राद्धदिनेप्रातः स्नात्वा धौतवाससीपरिधाय नित्यकार्यंकृत्वा मध्याह्नेपुनःस्नात्वा गोमयादिनासंस्कृतंश्राद्धदेशमागत्य तिलतैलेनदीपंप्रज्वाल्य स्वासने प्राङ्मुखउपविशेत् ॥ ततः पवित्रधारणंकृत्वा आचम्य अपवित्रः पवित्रोवा० इतिपठित्वा पुंडरीकाक्षः पुनातु इतिजलेनद्रव्याणिस्वात्मानंचप्रोक्षयेत ॥ भूम्यैनमः ॥ गयायैनमः ॥ गदाधरायनमः इति नत्वा कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य अद्यकाश्यपगोत्रस्यपितुरमुकदासस्य यावत्सांवत्सरं तावत्क्षुत्तृष्यर्थमूनमासिकं १ मासिकं २ त्रैपक्षिकं ३ द्वितीयमासिकं ४ तृतीय० ५ चतुर्थ० ६ पंचम० ७ ऊनषाण्मासिकं ८ षष्ठमासिकं ९ सप्तम० १० अष्टम० ११ नवम० १२ दशम० १३ एकादशमासिकं १४ ऊनाब्दिकं १५ च एतानिपंचदशश्राद्धानिस्वस्वकालेकर्त्तव्यानि इदानींममकुलेभविष्यवृद्धिनिमित्तत्वात्सर्वाण्यपकृष्य एकोद्दिष्टविधिनातंत्रेण

---

१ गालवः—ऊनषाण्मासिकंषष्ठे मासार्द्धेत्वूनमासिकम् । त्रैपक्षिकंत्रिपक्षेस्यादूनाब्दं द्वादशेतथा—इति । २ एकद्वित्रिदिनैरूने त्रिभागेनोनएववा ॥ श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः—इति । ३ हेमाद्रौगार्ग्यः—नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ॥ ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्—इति । ४ माधवीयेशांख्यायनिः—सपिंडीकरणादर्वागपकृष्यकृतान्यपि ॥ पुनरप्यपकृष्यंतेवृद्ध्युत्तरनिषेधनादिति ॥ निषेधश्चकात्यायनेनोक्तः—निवृत्तवृद्धितंत्रेतु मासिकानिनतंत्रयेदिति ।

सद्यः करिष्ये इतिसंकल्प्य विष्णुंस्मरेत् ॥ ततोऽपसव्यंकृत्वा । दक्षिणामुखः पातितवामजानुस्तिलगौरसर्षपान्गृहीत्वा नमोनमस्तेगो
विंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः॥१॥इतिसर्वत्रविकीर्य नीवीबंधंकुर्यात् ॥ ततो मोटकतिलजलान्यादाय काश्य
पगोत्र पितरमुकदास ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकैकोद्दिष्टश्राद्धे इदमासनंतुभ्यंनमः इत्युच्चार्य्य पितृतीर्थेन मोटक
रूपदक्षिणाग्रकुशत्रयात्मकमासनमुत्सृजेत् ॥ ततः तिलेभ्योनमः इतितिलान्विकीर्य अर्घपात्रोपरिपवित्रंधृत्वा तत्र अद्भ्योनमः इतिज
लंप्रक्षिप्य तिलेभ्योनमः इतितिलान् तूष्णींगंधपुष्पेनिक्षिपेत् ॥ ततोऽर्घपात्रसंपत्तिरस्तु इतिपठित्वा अर्घपात्रं वामहस्ते कृत्वा तत्र
स्थंपवित्रं पलाशपत्रे धृत्वा अद्भ्योनमः इत्यर्घपात्रमभिमंत्र्य मोटकादीन्यादाय अद्य काश्यपगोत्र पितरमुकदास ऊनमा
सिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तक एषतेहस्तार्घोनमः इत्युच्चार्य्य दक्षिणकरेण पितृतीर्थेन पवित्रोपरि सावशेषम् अर्घंदद्या
त् ॥ अर्घपात्रंच पितृवामपार्श्वे पित्रेस्थानमसीतिन्युब्जीकुर्य्यात् ॥ दक्षिणादानपर्यंतं न चालयेत ॥ ततो गंधपुष्पधूपदीपादिकं
धृत्वा मोटकादीन्यादाय अद्यकाश्यपगोत्र पितरमुकदास ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकानि एतानि गंधपुष्प
धूपदीपतांबूलवासांसितुभ्यंनमः इत्युत्सृजेत् ॥ ततः अर्चनं संपूर्णमस्त्वित्युक्त्वा गौरमृत्तिकया जलेनवा आसनं वेष्टयित्वार्घ
मंडलंकुर्यात् ॥ अत्रपरकीयभूमौश्राद्धकरणे इदमन्नंभूस्वामिपितृभ्योनमः इतिघृतादियुक्तमन्नंदद्यात् ॥ ततो भोजनपात्रे उष्णमन्नं
सघृतम् अनेकव्यंजनयुतं सुशीतलजलसहितं यथावत्परिविष्यमधुदत्त्वा मधुमधुमध्वित्यभिमंत्रयेत् ॥ ततः अन्नपात्रं न्युब्जपा
णिभ्यांव्यस्ताभ्यां स्पृष्ट्वा विष्णवेनमः इतिपठित्वा स्वाङ्गुष्ठमनखम् विष्णवेनमः इत्यन्नेनिवेश्य इदमन्नम् इमाआपः इदमा

ज्यम् एतत्सर्वंकव्यमितिपठित्वा तिलेभ्योनमः । इत्यन्नपात्रपरितस्तिलान्विकीर्य्य वामकरेणपात्रमत्यजन्दक्षिणकरेणमोटकादीन्या
दाय अद्यकाश्यपगोत्रपितरमुकदासऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकमिदमन्नंसोपस्करंकव्यम् अमृतरूपंतुभ्यंनमः इत्यु
दकंपितृतीर्थेनपित्रासनवामभागेभूमौक्षिपेत्।।ततः अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत् ।। तत्सर्वमच्छिद्रमस्तु इतिप्राथ्र्यमधुमधुमध्वि
तिजपेत्।।ततः सप्तव्याधादशार्णेषु मृगाःकालंजरेगिरौ।।चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे।। १ ।।तेभिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः।।
प्रस्थितादूरमध्वानं यूयंतेभ्योऽवसीदथ।।२।।इतिपठित्वाअन्यानिसप्तार्चिरुचिस्तवप्रभृतीनियथाशक्तिजपेत्।ततःउच्छिष्टसन्निधौभूमिंप्रो
क्ष्य तत्र दक्षिणाग्रंकुशत्रयमास्तीर्य्य सर्वप्रकारमन्नंसव्यंजनमुद्धृत्यसतिलमेकीकृत्य अग्निदग्धाश्चयेजीवा येप्यदग्धाः कुलेमम।।भूमौदत्तेनतृ
प्यन्तु तृप्तायांतुपरांगतिम्-इतिकुशोपरितदन्नंविकीर्य(सव्येन)आचम्यहरिंस्मृत्वा मधुमधुमध्वितिचजपेत्।ततोऽपसव्येन उच्छिष्टसन्निधौ
चतुरस्रंदक्षिणप्लवंस्थानंनिर्माय तन्मध्येदर्भपिंजूलीमूलेनदक्षिणाग्रांप्रादेशमात्रांरेखांकृत्वा दर्भपिंजूलीमुत्तरस्यांदिशिनिक्षिपेत् ।। ततो
ज्वलदुल्मुकंरेखोपरिभ्रामयित्वादक्षिणतोनिदध्यात्।ततःउपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वादेवताभ्यः०इतित्रिःपठेत्।ततःसतिलज
लपात्रंगृहीत्वा अद्य काश्यपगोत्रपितरमुकदास ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेनमः इतिकुशो
परि अवनेजनंदद्यात् ।किंचिज्जलंपात्रे अवशेषयेत्।ततोगृह्यपाकेनवा पायसेनसक्तुभिर्वायवपिष्टेन मध्वाज्यतिलव्यंजनसहितंबिल्वोपमंपि
ण्डंनिर्माय मधुघृताभ्यामभिघार्य्य मोटकादियुतमादाय अद्यकाश्यपगोत्रपितरमुकदासऊनमासिकाद्यूनत्रार्षिकान्तपंचदशश्राद्धनिमि
त्तक एषतेपिण्डोनमः—इतिसव्योपगृहीतदक्षिणहस्तेनावनेजनस्थानेपिण्डंदद्यात् ।। ततोलेपभागभुजस्तृप्यंतु—इतिदर्भमूलेकरंप्रोञ्छ्य

हस्तौप्रक्षाल्यसव्येनाचम्यहरिंस्मरेत्।ततोऽपसव्यादिना पित्रेनम इतिपठित्वा वामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाःश्वासंनियम्यतेनैवपथा
परावृत्य पित्रेनमः इतिश्वासमुत्सृजेत् ॥ ततःपूर्वदत्तावनेजनपात्रजलेन अद्यकाश्यपगोत्रपितरमुकदास अत्रप्रत्यवने निक्ष्वतेनमः इति
पिण्डोपरिप्रत्यवनेजनंदत्त्वानीवींविस्रंस्यसव्येनाचम्य(अपसव्येन)वसंतायनमस्तुभ्यंग्रीष्मायचनमोनमः।वर्षाभ्यश्चशरत्संज्ञकतवेचनमः
सदा ॥१॥ हेमन्तायनमस्तुभ्यं नमस्तेशिशिरायच॥मासंसंवत्सरेभ्यश्च दिवसेभ्योनमोनमः॥२॥इतिकृताञ्जलिःप्रार्थयेत्।ततःएतत्तेवासो
नमःइतिपिण्डोपरिसूत्रमूर्णादशांवादत्त्वाकाश्यपगोत्रपितरमुकदास एतत्तेवासोनमइत्युत्सृजेत्।ततःपितरमुद्दिश्यतदीयपिण्डेगंधपुष्पधूप
दीपतांबूलदक्षिणादीनिदत्त्वापिण्डशेषान्नंपिण्डसमीपेविकिरेत्।ततोभोजनपात्रेशिवाआपःसंतुइतिजलं सौमनस्यमस्तुइतिपुष्पम्।अक्षतं
चारिष्टमस्तितियवांस्तिलांश्चदद्यात् ॥ ततः अद्यकाश्यपगोत्रस्यपितुरमुकदासस्य ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकद
त्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकंदद्यात् ॥ ततः प्राङ्मुखः (सव्येन) कृतांजलिराशिषोगृह्णीयात् ॥ अघोरः पिताऽ
स्तुइति ॥ ततः गोत्रंनोवर्द्धतां दातारोनोऽभिवर्द्धतां संततिश्चवर्द्धतां श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभे
महि ॥ याचितारश्चनःसंतुमाचयाचिष्मकंचन ॥ एताःसत्याःआशिषःसंतु इतिवदेत् ॥ ततोऽपसव्येन पिण्डोपरिसपवित्रंकुशत्रयमा
स्तीर्य्य पित्रेनमः इतिदक्षिणाग्रांजलधारांदद्यात् ॥ ततः पिण्डमुत्थाप्य स्थाल्यांनिधाय अवघ्राणंकृत्वा पिण्डाधःस्तृतदर्भ
चोल्मुकं वह्नौनिक्षिप्य अर्घपात्रमुत्तानीकृत्ययथाशक्तिरजतदक्षिणांदद्यात् ॥ अद्यकाश्यपगोत्रस्यपितुरमुकदासस्य कृतैतदूनमासिका
द्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे

इतिदद्यात् ॥ ततः अभिरम्यतामितिविसृज्य देवताभ्यः०इतित्रिःपठित्वा रक्षादीपंनिर्वापयेत् ॥ ततः (सव्येन) हस्तौपादौप्रक्षाल्य आचम्य प्रमादात्कुर्वतांकर्म्म प्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोः संपूर्णंस्यादितिश्रुतिः—इतिपठित्वा कर्म्मपूर्त्तिकामोविष्णुं स्मरेत् ॥ ततः पिण्डंगामजवायसान्वाखादयेत् ॥ अग्नौजलेवाक्षिपेत् ॥ ततोवैश्वदेवबलिकर्मणीकृत्वा श्राद्धद्रव्याणि ब्राह्मणायप्रतिपाद्य यथाशक्तिब्राह्मणान्आमान्नेनतोषयेत् ॥ ततःयस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु।न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतम्। १।इतिप ठित्वा अतिथिसुतभृत्यबांधवादिभिःसहस्वयंभुंजीत॥ततोमंगलाचरणंकुर्यात्॥एवमेवमातृपितृव्यभ्रात्रादिश्राद्धप्रयोगः॥ इतिशूद्राणाम् ऊनमासिकाद्यूनाब्दिकान्तपंचदशश्राद्धनिमित्तकैकोद्दिष्टश्राद्धप्रयोगः।छ।अथशूद्रसांवत्सरिकैकोद्दिष्टश्राद्धपद्धतिः। तावत्क्षयाहपूर्वदिनेनि रामिषमेकवारंभुक्त्वा तद्दिनेरात्रौप्रदोषान्ते विप्रनिमंत्रणंकृत्वा श्राद्धदिनेप्रातः श्वेतवस्त्रयुगलेनस्नात्वा नित्यावश्यकंसमाप्य श्राद्धभूमिं गोमयोदकेनोपलिप्य ज्वलदंगारैः संशोध्य गौरमृत्तिकयाच्छाद्य तिलैर्गौरसर्षपैश्चविकीर्य वस्त्रादिनावेष्टयित्वा तत्र श्राद्धसामग्रींसंपाद येत् ॥ ततोमध्याह्नेपुनः स्नात्वाशुक्लवाससीपरिधाय श्राद्धभूमिमागत्यासनसमीपेतिलतैलेनदीपंप्रज्वाल्य स्थापयेत् ॥ दीपरक्षाद्विजे नकार्या ॥ काककुक्कुटादीन्छ्राद्धापहंतृनपसारयेत्॥ ततःकर्तास्वासनेप्राङ्मुखउपविश्यसव्येनाचम्य॥अपवित्रःपवित्रोवासर्वावस्थांगतो पिवा ॥ यःस्मरेत्पुंडरीकाक्षं सबाह्याभ्यंरःशुचिः॥१॥ पुंडरीकाक्षः पुनातु इतिपठित्वा कुशत्रयानीतजलेनश्राद्धदेशद्रव्याणिस्वात्मानंच सिंचेत् ॥ ततः वैष्णव्यैनमः ॥ काश्यप्यैनमः ॥ अक्षय्यायैनमः ॥ भूम्यैनमः ॥ इतिनत्वा भगवत्यैगयायनमः ॥ भगवतेगदाधरायनमः इतिमनोवाक्कायैर्नमस्कारंकुर्यात् ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य अद्यामुकगोत्रस्य पितुरमुकदासस्य सांवत्सरिकैको

दिष्टश्राद्धमहंकरिष्ये इतिसंकल्प्य विष्णुर्विष्णुर्विष्णुरितिजपित्वा देवताभ्यःपितृभ्यश्चेतित्रिःपठेत् ॥ ततोऽपसव्यंकृत्वा द
क्षिणामुखः पातितवामजानुः तिलगौरसर्षपान्गृहीत्वा नमोनमस्तेगोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥१॥
अग्निष्वात्ताःपितृगणा०इत्यादिपठित्वा पूर्वादिदिक्षु अधस्तादूर्ध्वंकोणेषु चसर्व्वत्रतिलान्गौरसर्षपांश्चविकीर्य्य वामे दक्षिणेवाकटिभागे
नीवीबंधंकुर्य्यात् ॥ ततः आसनादिदानम् मोटकतिलजलान्यादाय॥अद्यकाश्यपगोत्रपितरमुकदाससांवत्सरिकैकोद्दिष्टश्राद्धेइदमासनं
तुभ्यंनमः इत्युच्चार्य्यपितृतीर्थेन मोटकरूपंदक्षिणाग्रमासनमुत्सृजेत् ॥ ततः तिलेभ्योनमः इतितिलान्विकीर्य्य अर्घपात्रोपरि
पवित्रंधृत्वा तत्र अद्भ्योनमः इतिजलंप्रक्षिप्य तिलेभ्योनमः इतितिलान् तूष्णींगंधपुष्पे निक्षिपेत्॥ततोऽर्घपात्रसंपत्तिरस्तु इतिपठित्वा
अर्घपात्रंवामहस्तेकृत्वा तत्रस्थंपवित्रं पलाशपत्रेधृत्वा अद्भ्योनमः इत्यभिमंत्र्य मोटकादीन्यादाय काश्यपगोत्रपितरमुकदास
एषते हस्तार्घोनमः इत्युच्चार्य दक्षिणकरेण पितृतीर्थेन पवित्रोपरिसावशेषमर्घंदद्यात् ॥ अर्घपात्रंच पितृवामपार्श्वे पित्रेस्थानमसी
तिन्युब्जीकुर्य्यात् ॥ दक्षिणादानपर्यंतं नचालयेत् ॥ ततोगंधपुष्पधूपदीपादिकंधृत्वा मोटकादीन्यादाय अद्यकाश्यपगोत्रपितरमुक
दास एतानिगंधपुष्पधूपदीपतांबूलवासांसितुभ्यंनमः इत्युत्सृजेत् ॥ ततः अर्चनंसंपूर्णमस्त्वितिपठित्वा गौरमृत्तिकयाजलेनवा
आसनंवेष्टयित्वार्घमंडलंकुर्य्यात् ॥ (अत्रपरकीयभूमौश्राद्धकरणे इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिघृतादियुक्तमन्नंदद्यात्) ॥
ततोभोजनपात्रे उष्णमन्नं सघृतव्यंजन सुशीतलजलसहितम् आसन्नंवायथावत्परिविष्य मधुदत्त्वा मधुमधुमध्वित्यभिमत्रयेत् ॥
ततः अन्नपात्रं न्युब्जपाणिभ्यान्यस्ताभ्यांस्पृष्ट्वा विष्णवेनमःइतिपठित्वा स्वाङ्गुष्ठमनखमन्ने निवेश्य इदमन्नम् इमाआपःइदमाज्यम्

एतत्सर्वंकव्यम् इतिपठित्वा तिलेभ्योनमः इतितिलान्विकीर्य्य वामकरेणपात्रंस्पृशन्दक्षिणकरेण मोटकादीन्यादाय अद्यकाश्य
पगोत्रपितरमुकदाससांवत्सरिकैकोद्दिष्टश्राद्धे इदमन्नंसोपस्करं कव्यम् अमृतरूपंतुभ्यंनमः इत्युदकं पितृतीर्थेन पित्रासनाद्वामभागेभूमौ
क्षिपेत्॥ततःअन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत्॥तत्सर्वमच्छिद्रमस्तु इतिप्रार्थ्य मधुमधुमध्वितिचजपेत्॥ततः सप्तव्याधादशार्णेषु
मृगाःकालंजरेगिरौ॥चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे॥१॥तेभिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः॥प्रस्थितादूरमध्वानंयूयंतेभ्योऽवसी
दथ॥२॥ इतिपठित्वा अन्यान्यपि सप्तार्चिरुचिस्तवप्रभृतीनियथाशक्तिपठेत्॥ततःउच्छिष्टसन्निधौभूमिंप्रोक्ष्य तत्रदक्षिणाग्रकुशत्रयमा
स्तीर्य व्यंजनघृततिलसहितमन्नंगृहीत्वा अग्निदग्धाश्चयेजीवा येप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यंतु तृप्तायान्तुपरांगतिम् इतिकुशोप
रितदन्नंविकीर्य सव्येनाचम्य हरिंस्मृत्वा मधुमधुमध्वितिचजपेत् ॥ ततोऽपसव्यादिना उच्छिष्टसन्निधौ चतुरस्रंदक्षिणप्लवंस्थानंनिर्माय
तन्मध्येदर्भपिंजूलीमूलेन दक्षिणाग्रां प्रादेशमात्रांरेखां कृत्वा दर्भपिंजूलीमुत्तरस्यांदिशिनिक्षिपेत् ॥ ततोज्वलदुल्मुकंरेखोपरिभ्रामयि
त्वा दक्षिणतोनिदध्यात्॥ततःउपमूलसकृल्लूनकुशत्रयंरेखोपरिस्तीर्त्वादेवताभ्यः० इतित्रिःपठेत्॥ततःसतिलजलपात्रं गृहीत्वाअद्यकाश्य
पगोत्रपितरमुकदास अत्रावनेनिक्ष्वतेनमः इतिकुशोपरि अवनेजनंदद्यात्॥किंचिज्जलंपात्रे अवशेषयेत्॥ततो गृहपाकेन वा पायसेन सक्तु
भिर्वा यवपिष्टेन मध्वाज्यतिलव्यंजनसहितं ल्वोपमंपिण्डंनिर्माय मधुघृताभ्यामभिघार्य्यमोटकादियुतमादाय अद्यकाश्यपगोत्रपित
रमुकदास सांवत्सरिकैकोद्दिष्टश्राद्धे एषतेपिण्डोनमः इतिसव्योपगृहीतदक्षिणहस्तेनावनेजनस्थाने पिण्डंदद्यात् ततोलेपभागभुजस्तृ
प्यन्तु इति दर्भमूलेकरंप्रोञ्छ्य हस्तौप्रक्षाल्य सव्येनाचम्यहरिंस्मरेत्॥ततोऽपसव्यादिनापित्रेनमःइतिपठित्वावामावर्त्तेनोदङ्मुखोभूत्वा

प्रीतमनाःश्वासंनियम्य तेनैवपथापरावृत्त्य पित्रेनम इतिश्वासमुत्सृजेत् ॥ ततः पूर्वंदत्तावनेजनपात्रजलेन अद्यकाश्यपगोत्रपितरमुकदास अत्रप्रत्यवनेनिक्ष्वतेनमः इतिपिण्डोपरिप्रत्यवनेजनंदत्त्वा नीवींविस्रंस्य सव्येनाचम्य (अपसव्येन) वसंतायनमस्तुभ्यं ग्रीष्मायचनमो नमः।वर्षाभ्यश्चशरत्संज्ञकऋतवेचनमःसदा। १।हेमंतायनमस्तुभ्यंनमस्तेशिशिरायच।मासस्संवत्सरेभ्यश्चदिवसेभ्योनमोनमः।२।इतिकृतांज लिः पठेत् ततः एतत्तेपितर्वासोनमः इति पिण्डोपरि त्रिगुणितसूत्रमूर्णा दशांवा दत्त्वा काश्यपगोत्रपितरमुकदास एतत्तेवासोनमः इत्युत्सृजेत् ॥ ततः पितरमुद्दिश्य तदीयपिण्डे गंधपुष्पधूपदीपतांबूलदक्षिणादीनिदत्त्वा पिण्डशेषान्नंपिण्डसमीपे विकिरेत्॥ततोभोज नपात्रे शिवाआपः संतु इतिजलं सौमनस्यमस्तु इतिपुष्पम् अक्षतंचारिष्टं चास्तु इतियवतिलांश्चदद्यात् ततः अद्यकाश्यपगोत्रस्य पितुरमुकदासस्य सांवत्सरिकैकोद्दिष्टश्राद्ध दत्ततदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकंदद्यात्॥ततः प्राङ्मुखः(सव्येन)कृतांज लिराशिषो गृह्णीयात् ॥ अघोरः पिताऽस्तु इति॥ततः गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धतां संततिश्चवर्द्धतां श्रद्धाचनोमाव्यगमद्बहुदेयं चनोऽस्तु।अन्नंचनोबहुभवेदतिथींश्चलभेमहि। याचितारश्चनःसंतुमाचयाचिष्मकञ्चनाएताःसत्याआशिषःसंतुइतिवदेत्।ततोऽपसव्येन पिण्डोपरि सपवित्रंकुशत्रयंधृत्वा पित्रेनमः इतिदक्षिणाग्रांजलधारांदद्यात ॥ ततः अर्घपात्रमुत्तानीकृत्य यथाशक्तिरजतदक्षिणांदद्यात्॥ अद्यकाश्यपगोत्रस्यपितुरमुकदासस्यकृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणा त्वेनदातुमहमुत्सृजे इतिदत्त्वा पिंडमुत्थाप्य स्थाल्यांनिधाय अवघ्राणंकृत्वा पिण्डाधस्तृतदर्भंचोल्मुकंचवह्नौक्षिपेत् ॥ अभि रम्यतामितिविसृज्य देवताभ्यः०इतित्रिःपठित्वारक्षादीपंनिर्वापयेत्॥ततः(सव्येन) हस्तौपादौप्रक्षाल्यआचम्यप्रमादादितिपठित्वाकर्म

पूर्त्तिकामो विष्णुंस्मरेत्॥ततःपिंडं गामजं वायसान्वा खादयेत्॥अग्नौ जलेवाक्षिपेत्॥ततो वैश्वदेवबलिकर्मणी कृत्वा श्राद्धद्रव्याणि ब्राह्मणाय प्रतिपाद्य यथाशक्ति ब्राह्मणान् आमान्नेन तोषयेत्ततोऽतिथिसुतभृत्यबांधवादिभिः सह स्वयं भुंजीत ॥ एवमेव मातृभ्रातृपितृव्यादिश्राद्धप्रयोगः ॥ इतिश्रीश्राद्धप्रकाशेशूद्रक्षयाहैकोद्दिष्टश्राद्धपद्धतिः समाप्ता ॥ ॥ छ ॥ ॥ छ॥ ॥ छ ॥

॥ अथशूद्रस्यपार्वणश्राद्धप्रयोगः ॥ तत्रतावत्पूर्वदिनकृत्यम् ॥ कर्तापूर्वेद्युर्निरामिषमेकवारंभुक्त्वा तद्दिनेरात्रौप्रदोषान्ते असंभवे प्रातर्वा श्राद्धारंभसमयेवा यथावकाशं विप्रगृहंगत्वा ब्राह्मणनिमंत्रणंकुर्यात् ॥ ततः श्राद्धकर्त्ता द्विर्भोजन दूरगमनं मैथुनं भारोद्वहनं श्रमं हिंसां क्रोधं त्वरां प्रमादं कलहं क्षौरं च वर्जयेत् ॥ शुचिः सत्यवादी क्षमी ब्रह्मचारीचभवेत्॥अथश्राद्धदिनपूर्वाह्णकृत्यम्॥कर्ताब्राह्मे मुहूर्त्ते उत्थाय यथोपदेशं शौचविधिंकृत्वा आचम्यदतधावनं नतुकुर्यात् ॥ ततो नद्यादौस्नात्वा धौतवाससीपरिधाय नित्यकर्मसमाप्य श्राद्धभूमिंगोमयोदकेनोपलिप्य गौरमृत्तिकयाऽऽच्छाद्य तिलैर्गौरसर्षपैश्चविकिरेत्॥तत्रश्राद्धसामग्रींसंपाद्य अपराह्णे स्नात्वाशुक्लवाससी द्वेपरिधाय ब्राह्मणैः सहश्राद्धभूमिमागत्य आसनानिदत्वा देवब्राह्मणान्प्राङ्मुखान्पितृब्राह्मणानुदङ्मुखानुपवेशयेत्॥तदभावे कुशमयद्विजान् वास्थापयेत्॥ततः प्रत्यासनसमीपे तिलतैलेनदीपंप्रज्वाल्य काककुक्कुटादीञ्श्राद्धापहंतॄनपसारयेत्॥दीपरक्षाद्विजैरेवकार्या श्राद्धदेशाचरणंचकुर्यात् ॥ ततः कर्तास्वासने प्राङ्मुखउपविश्य सव्येनाचम्य कर्मपात्रंजलेनप्रपूर्य गंधपुष्पकुशान्क्षिप्त्वा तज्जलेन अपवित्रः पवित्रोवा० इतिपुण्डरीकाक्षायनमः० इतिश्राद्धीयद्रव्याणिस्वात्मानंचप्रोक्षयेत॥ततः वैष्णव्यैनमः काश्यप्यैनमः अक्षय्यायै

१ सचोपदेष्टृब्राह्मणवशादनियतशाखया कार्यं इति मदनपालः तन्न ॥ अनियतस्य धर्मत्वाऽयोगात्तेन शूद्राणांवाजसनेयिन इति गौडमंथे दक्षोक्तेर्हरिहरभाष्यादिसंवादाच्छिष्टाचारात्माध्यंदिनशाखयोच्यते इति ।

नमः भूम्यैनमः इतिभूमिंनत्वा श्राद्धदेशं गयात्मकत्वेन तदेकदेशस्थं गदाधरंचध्यात्वा तयोः भगवत्यैगयायैनमः भगवतेगदाधरा
यनमः इतिमनोवाक्कायैर्नमस्कारंकुर्यात ॥ ततः कुशत्रयतिलजलान्यादाय देशकालौसंकीर्त्य अद्यामुकगोत्राणामस्मत्पितृपितामहप्र
पितामहानाममुकामुकदासानां तथाऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकदासानां सदैवंपार्वणश्राद्धं पितृतृप्तिकामोहं
करिष्ये–इतिसंकल्प्य विष्णुंत्रिःस्मरेत्॥ततो देवताभ्यःपितृभ्यश्च महायोगिभ्यएवच॥नमःस्वाहायैस्वधायैनित्यमेवनमोनमः–इतित्रिः
स्मृत्वा यवतिलगौरसर्षपान्गृहीत्वा ॥ नमोनमस्तेगोविंद पुराणपुरुषोत्तम॥इदंश्राद्धंहृषीकेश रक्षतांसर्वतोदिशः ॥ १ ॥ तिलारक्षंत्वसु
राहभार्रक्षंतुराक्षसात् ॥ वह्नीर्वैश्रोत्रियंरक्षेदतिथिःसर्वरक्षकः॥२॥इतिपठित्वा अग्निष्वात्ताःपितृगणाः प्राचींरक्षंतुमेदिशम्॥तथाबर्हिषदः
पान्तु याम्यांयेपितरःस्थिताः ॥ ३ ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः ॥ अधोर्ध्वमपिकोणेषु हविष्मन्तश्चसर्वदा॥४॥इत्यादि
भिरधस्तादूर्ध्वंकोणेषुच सर्वत्रतिलान्गौरसर्षपांश्च विकीर्य्य (अपसव्येन) वामेदक्षिणेवाकटिभागे यथाचारं नीवीबंधोविधेयः॥अथा
सनादिदानम् ॥ तत्रादौ उदङ्मुखः सजघनंदक्षिणं जान्वाच्य (सव्येन) कुशत्रयमादाय अद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवा
र्द्रवसंज्ञका विश्वेदेवा इदमासनं वोनमः इत्युच्चार्य्य देवतीर्थेन पूर्वाग्रं कुशत्रयमुत्सृजेत् ॥ एवंमातामहादिदेवेभ्योऽपिदद्यात् ॥ ततो
दक्षिणामुखः (अपसव्येन) वामंजान्वाच्य द्विगुणभुग्नकुशत्रयतिलजलान्यादाय अद्यकाश्यपगोत्रास्मत्पितृपितामहप्रपितामहामुका
मुकदासा इदमासनंत्रेधाविभज्य युष्मभ्यंनमः इत्युच्चार्य्य पितृतीर्थेन मोटकरूपमासनं दक्षिणाग्रमुत्सृजेत् ॥ एवमेव माताम
हादिभ्योप्यासनं दद्यात् ॥ ततः सव्यादिना सयवकरः पुरूरवार्द्रवसंज्ञकान्विश्वान्देवानावाहयिष्ये इत्युच्चार्य्य आगच्छंतुमहाभागा
विश्वेदेवामहाबलाः।येचात्रयोजिताःश्राद्धे सावधानाभवंतुते॥इत्यावाह्य यवेभ्योनमः इतियवान्विकिरेत्॥ततोऽपसव्यादिनासतिलहस्तः

पितृनावाहयिष्ये मातामहादींश्चावाहयिष्ये इत्युक्त्वा तिलेभ्योनमः इतितिलान्विकिरेत्ततः (सव्येन) देवपात्रद्वये (अपसव्येन) पितृपात्र द्वयेच दर्भपवित्रमेकैकंधृत्वा अद्योनमः इतिप्रत्येकंजलंप्रक्षिप्य देवपात्रयोः यवेभ्योनमः इतियवान्पितृपात्रद्वये तिलेभ्योनमः इतितिलान्प्र क्षिप्य सर्वत्रतूष्णीमेव गंधपुष्पाणिक्षिपेत् ॥ ततोऽर्घपात्राणिसंपन्नानि इत्युक्त्वा (सव्येन) प्रथमं देवार्घपात्रं वामहस्तेकृत्वा तत्रस्थंप वित्रं पलाशपत्रेदत्त्वा अद्योनमःइत्यभिमंत्र्यकुशत्रययवजलान्यादायअद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनः पुरूरवार्द्रवसंज्ञकाविश्वेदेवा एषवो ऽर्घोनमः इतिदक्षिणहस्तेनदेवतीर्थेनपवित्रोपरि अर्घदत्त्वा पवित्रसहितमर्घपात्रंदेवपुरतःस्थापयेत् ॥ एवमेवमातामहादिदेवेभ्योप्यर्घंद द्यात् ॥ ततोऽपसव्यादिना पित्रर्घपात्रंगृहीत्वा पवित्रंपलाशपत्रेदत्त्वा अद्योनमः इतिपात्रमभिमंत्र्य मोटकादीन्यादाय अद्यकाश्यप गोत्रास्मत्पितृपितामहप्रपितामहामुकामुकदासा एषहस्तार्घस्त्रेधाविभज्य युष्मभ्यंनमः इतिदक्षिणहस्तस्थपितृतीर्थेनपवित्रोपरिअर्घंजलं सावशेषंदद्यात् ॥ अर्घपात्रंचपुरतःस्थापयेत् ॥ एवमेवमातामहादिभ्योप्यर्घंदद्यात् ॥ ततः सव्यंकृत्वा विश्वेभ्योदेवेभ्यः स्थानमसीतिप वित्रजलयुतंदेवार्घपात्रमासनदक्षिणपार्श्वे उत्तानंक्रमेणस्थापयेत्।ततोऽपसव्यादिना पितामहप्रपितामहार्घपात्रजलादीनि पितृपात्रेकृत्वा एवमेवप्रमातामहवृद्धप्रमातामहयोः पात्रस्थजलादीनिमातामहपात्रेकुर्यात्॥ततः सव्येन पितृपात्रस्थजलेनप्राङ्मुखोनेत्रांजनंकृत्वाशिर सि अद्योनमः इत्यभिषेकंकुर्य्यात् ॥ ततोऽपसव्यंकृत्वा पितृभ्यः स्थानमसीतिप्रथमंपितृपात्रंपित्रासनवामप्रदेशभूमावधोमुखंसंस्थाप्य तदुपरिपितामहपात्रंतदुपरिप्रपितामहपात्रंचदद्यात ॥ एवं मातामहेभ्यः स्थानमसीतिमातामहपात्रंन्युब्जीकृत्यप्रमातामहवृद्धप्रमाता महपात्राभ्यामाच्छादयेत् ॥ एतत्पात्रद्वयंदक्षिणादानपर्यंतंनोद्धरेन्नचालयेत् ॥ अथ गंधादिदानम् ॥ सव्यादिकृत्वा गंधपुष्पधूपदीपादिकं धृत्वा कुशत्रययवजलान्यादाय अत्रास्मत्पित्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्रवसंज्ञकाविश्वेदेवा एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीत

वासांसिवोनमः इत्युक्त्वार्घ्यगंधाद्युत्सृजेत । एवमेवमातामहादिदेवेभ्योपिदद्यात ।ततःकृतांजलिःकर्ताविश्वेषांदेवानामर्चनंसंपूर्णमस्त्विति
ब्रूयात ॥ ततोऽपसव्यादिना पितृपक्षे गंधादिकंधृत्वाद्विगुणभुग्नकुशत्रयतिलजलान्यादाय अद्यकाश्यपगोत्रा अस्मत्पितृपितामहप्र
पितामहामुकामुकदासा एतानिगंधपुष्पधूपदीपतांबूलवासांसित्रेवाविभज्य युष्मभ्यंनमः इतिपित्रादिभ्योगंधाद्युत्सृज्य एवमेव माताम
हादिभ्योप्युत्सृजेत् । ततः कृतांजलिर्भूत्वा पितॄणामर्चनंसंपूर्णमस्त्वितिब्रूयात॥एवंगंधाद्यर्चनंविधाय भोजनपात्रस्थापनदेशंसंमार्ज्यपा
त्राणिदत्त्वा गौरमृत्तिकयाजलेनवाप्रत्येकमासनवेष्टयित्वाक्रमेणमंडलमअभ्युक्षणंवाकुर्यात्।अथाग्नौकरणम्।तत्रव्यंजनक्षारवर्जितंघृताक्त
मन्नकांस्यपात्रेसमुद्धृत्य (सव्येन) दक्षिणकरेणरजतादिपात्रस्थजले अग्नयेकव्यवाहनायनमः इदं० सोमायपितृमतेनमः इदं—इत्याहुति
द्वयंजुहुयात् । ततोहुतशेषमन्नंदेवपात्रद्वयं अपसव्येन पित्रादिपात्रद्वयेचदत्त्वापिण्डार्थमवशेषयेत् । अत्रपरकीयभूमौश्राद्धकरणे इदमन्नमे
तद्भूस्वामिपितृभ्योनमः इतिघृतादियुक्तमन्नंदर्भेषुदद्यात नस्वगृहे ॥ ततः सव्येन देवपात्रद्वये अपसव्येन पित्रादिपात्रद्वयेच आमान्नंसघृ
तमनेकव्यंजनयुतं सुशीतलजलसहितंयथावत्परिविष्यमधुदत्त्वा मधुमधुमध्वित्यभिमंत्रयेत् ॥ ततः सव्येन उत्तानपाणिभ्यांप्रथ
मंदेवान्नपात्रमालभ्य विष्णवेनमः इतिपठित्वा अधोमुखंस्वाङ्गुष्ठमनखम्अन्नेनिवेश्य इदमन्नम्इमाआपःइदमाज्यम्एतत्सर्वंहविरित्युक्त्वा
अन्नपात्रपरितोयवान्विकीर्य वामेनकरेणपात्रंस्पृशन्दक्षिणकरेणकुशत्रयादीन्यादाय अद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनःपुरूरवार्द्र
वसंज्ञकाविश्वेदेवा इदमन्नंसोपस्करंहव्यम् अमृतरूपंपरिविष्टंवोनमः इत्युदकंदेवतीर्थेनदेवदक्षिणभागेभूमौनिक्षिपेत् ॥ एवमेवमातामहा
दिदेवेभ्योऽप्युत्सृजेत। ततोऽपसव्यादिना पितृपात्रंन्युब्जपाणिभ्यांव्यस्ताभ्यांस्पृष्ट्वा विष्णवेनमः इतिपठित्वा अधोमुखंस्वाङ्गुष्ठमनखम्
अन्नेनिवेश्य इदमन्नम् इमाआप इदमाज्यम् एतत्सर्वंकव्यम्इत्युक्त्वातिलेभ्योनमः इतितिलानअन्नपात्रपरितोविकीर्य वामकरेणपात्रंस्पृश

न्दक्षिणकरेणद्विगुणभुग्नकुशत्रयादीन्यादाय अद्यास्मत्पितृपितामह प्रपितामहाअमुकामुकदासाइदमन्नंसोपस्करंकव्यम् अमृतरूपंपरिविष्टंत्रेधा
विभज्य युष्मभ्यंनमः इत्युदकंपितृतीर्थेन पित्रासनवामभागेभूमौनि क्षिपेत्॥एवमेवमातामहादिभ्योप्युत्सृजेत् ॥ ततः अन्नहीनंक्रिया
हीनं विधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु ॥ इतिप्रार्थ्य मधुमधुमधिवतिचजपेत् ॥ ततः सप्तव्याधादशार्णेषु मृगाःकालंजरे
गिरौ। चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे ॥१॥ तेऽभिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः॥प्रस्थितादूरमध्वानंयूयंतेभ्योऽवसीदथ ॥२॥
इतिपठित्वासप्तार्चिस्तवंशृणुयात्॥ अमूर्त्तानांचमूर्त्तानांपितृणांदीप्ततेजसाम् ॥ नमस्यामिसदातेषां ध्यायिनांदिव्यचक्षुषाम् ॥१॥ इंद्रा
दीनांचनेतारो दक्षमारीचयोस्तथा॥सप्तर्षीणांतथान्येषां तान्नमस्यामिकामदान् ॥२॥ मन्वादीनांमुनींद्राणां सूर्याचंद्रमसोस्तथा॥तान्न
मस्याम्यहंसर्वान्पितरश्चार्णवेषुच॥३॥नक्षत्राणांग्रहाणांचवाय्वग्न्योर्नभसस्तथा॥द्यावापृथिव्योश्चतथानमस्यामिकृतांजलिः ॥४॥देवर्षी
णांग्रहाणांचसर्वलोकनमस्कृतान्॥अभयस्यसदादातॄन्नमस्येहंकृतांजलिः ॥५॥ प्रजापतेःकश्यपाय सोमायवरुणायच ॥ योगेश्वरेभ्यश्च
तथा नमस्यामिकृतांजलिः ॥६॥ नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु ॥ स्वयंभुवेनमस्यामि ब्रह्मणेयोगचक्षुषे ॥७॥ सोमाधारान्पि
तृगणान्योगमूर्त्तिधरांस्तथा॥नमस्यामितथासोमं पितरंजगतामहम् ॥८॥ अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄनहम्॥अग्नीषोममयंवि
श्वं यतएतदशेषतः ॥९॥ येतुतेजसियेचैते सोमसूर्याऽग्निमूर्त्तयः ॥ जगत्स्वरूपिणश्चैव तथाब्रह्मस्वरूपिणः ॥१०॥ तेभ्योऽखिलेभ्यो
योगिभ्यः पितृभ्योयतमानसः ॥ नमोनमोनमस्तेमे प्रसीदंतुस्वधाभुजः॥११॥पितरऊचुः ॥ स्तोत्रेणानेनचनरो योऽस्मांस्तोष्यतिभक्ति
तः ॥ तस्यतुष्टावयंभोगानात्मज्ञानंतथोत्तरम् ॥१२॥शरीरारोग्यमर्थंच पुत्रपौत्रादिकंतथा ॥ प्रदास्यामोनसंदेहो यच्चान्यदपिवांछितम्
॥१३॥ तस्मात्पुण्यफलंलोके वांछद्भिः सततंनरैः ॥ पितॄणांचाक्षयांतृप्तिं स्तव्यस्तोत्रेणमानवैः ॥१४॥ पठिष्यंतिद्विजाद्याणां भुंजतां

पुरतःस्थिताः ॥ अस्माकमक्षयंश्राद्धं तद्भविष्यत्यसंशयम् ॥१६॥ इति ॥ ततोऽन्यन्यापिरुचिस्तोत्रप्रभृतीनियथाशक्तिशृणुयात्॥ततः
उच्छिष्टसन्निधौभूमिंप्रोक्ष्यतत्रदक्षिणाग्रंकुशत्रयमास्तीर्य्यआमान्नमादायसव्यंजनतिलमेकीकृत्यअग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम
॥ भूमौदत्तेनतृप्यन्तु तृप्तायांतुपरांगतिम् ॥ १ ॥ इतिकुशोपरिपितृतीर्थेनतदन्नंविकिरेत् ॥ ततः सव्येन आचम्यहरिंस्मृत्वा
मधुमधुमध्वितिपठेत॥ततोऽपसव्येनपित्राद्युच्छिष्टसन्निधौचतुरस्रंदक्षिणाप्लवंरमणीयंपित्रादित्रयपिण्डपातनार्थंसिकताभिःस्थानंनिर्माय
तथामातामहाद्युच्छिष्टसन्निधौमातामहादिपिण्डपातनार्थंतादृशमेवस्थानंकुर्यात्। तत्रउभयत्रमध्यदेशेदर्भपिंजूलीमूलेनतूष्णींदक्षिणाग्रां
रेखांसकृदुल्लिखित्वा दर्भपिंजूलीमुत्तरस्यांदिशिनिक्षिप्यज्वलदुल्मुकंरेखोपरिभ्रामयित्वा दक्षिणतोनिदध्यात् ॥ ततः उपमूलस
कृदाच्छिन्नदक्षिणाग्रकुशत्रयंरेखोपरिस्तीर्त्वा पत्रपुटकषट्केजलतिलगंधपुष्पाणिकृत्वा एकंपात्रंगृहीत्वा अद्यकाश्यपगोत्रपितर
मुकदास अत्रावनेनिक्ष्वतेनमः इतिकुशमूलेपित्रेपितृतीर्थेन अवनेजनंदद्यात् ॥ एवंपितामहायकुशत्रयमध्येप्रपितामहायकुशाग्रे अव
नेजनंदद्यात् ॥ एवमेवमातामहादिभ्योपिदद्यात् ॥ ततोगृहपाकेन वा पायसेन सक्तुभिर्वायवपिष्टनमध्वाज्यतिलव्यंजनसहितान्बि
ल्वोपमान्षट्पिण्डान्निर्माय मधुघृताभ्यामभिघार्य्य पित्रादिभ्योदद्यात्॥ तत्रप्रथमंपिण्डंमोटकादीनिचादायअद्यकाश्यपगोत्रपितरमु
कदास एतत्तेपिण्डंनमः इतिप्रथमावनेजनस्थानेसव्योपगृहीतदक्षिणहस्तेनपितृतीर्थेनदद्यात् ॥ एवमेवपितामहादिभ्यः पंचभ्यः
प्रत्येकं तत्तदवनेजनस्थानेपिण्डंदद्यात्॥ततः प्रपितामहादूर्ध्वंत्रयाणांलेपभुजांतृप्तिमुद्दिश्यपित्रादिकपिण्डाधारकुशमूले लेपभागभुजः
पितरस्तृप्यंतुइतिपठित्वाहस्तंप्रोञ्छ्यजलेनहस्तौप्रक्षालयेत् ॥ ततः सव्येन द्विराचम्यहरिंस्मरेत्ततोऽपसव्येन पितृभ्योनमः इतिपठि
त्वावामावर्त्तेनोदङ्मुखोभूत्वाप्रीतमनाःश्वासंनियम्यतेनैवपथापरावृत्यपितृभ्योनमइतिश्वासमुत्सृजेत।एवंमातामहपक्षेपिकुर्यात्।ततःपूर्व

दत्त्वाऽवनेजनपात्रंगृहीत्वा अद्यकाश्यपगोत्रपितरमुकदास अत्रप्रत्यवनेनिक्ष्वतेनमः इतिपिण्डोपरिप्रत्यवनेजनंदद्यात् ॥ एवमेवपितामह
पिण्डोपरिप्रत्येकंप्रत्यवनेजनंदद्यात् ॥ ततोनीवींविस्रंस्य आचम्य अपसव्येनकृतांजलिः—वसंतायनमस्तुभ्यं ग्रीष्मायचनमोनमः॥वर्षा
भ्यश्चशरत्संज्ञऋतुभ्यश्चनमःसदा॥ १॥हेमंतायनमस्तुभ्यंनमस्तेशिशिरायच॥मासंवत्सरेभ्यश्चदिवसेभ्योनमोनमः॥ २॥इतिपठित्वापितृ
भ्योनमः ॥ मातामहेभ्योनमः ॥ इतिप्रार्थयेत् ॥ ततः पितृभ्योनमः॥मातामहेभ्योनमःइतिपठित्वा षट्सुपिण्डेषु सूत्राणिप्रतिपिण्डमूर्णा
दशांवादत्त्वा ॥ अद्यकाश्यपगोत्राऽस्मत्पितृपितामहप्रपितामहाऽमुकामुकदासा एतानिवासांसियुष्मभ्यंनमः इत्युत्सृजेत् ॥ एवंमाताम
हादिभ्योप्युत्सृजेत् ॥ ततः पित्रादीनुद्दिश्यतदीयपिण्डेषु तूष्णींगंधपुष्पधूपदीपतांबूलदक्षिणादीनिदद्यात ॥ पिण्डशेषान्नंचपिण्डसमीपे
विकिरेत् ॥ ततः सव्यापसव्याभ्यां देवपितृभोजनपात्रेषु शिवाआपः सतु इतिसकृत्सकृज्जलं सौमनस्यमस्तु इति पुष्पाणि अक्षतं
चारिष्टमस्त्वितियवांश्चदद्यात् ॥(नतंडुलान्) ततःमोदकादीन्यादाय अद्यकाश्यपगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुक
दासानांदत्तैतदन्नपानादिकमक्षय्यमस्तु इतिसतिलमक्षय्योदकंभोजनपात्रेदद्यात् ॥ एवमेवमातामहेभ्योऽप्यक्षय्योदकंदद्यात्॥ततःसव्यन
प्राङ्मुखस्तन्मनाः कृतांजलिर्दक्षिणांदिशंपश्यन् अघोराः पितरःसंतु अघोरामातामहाश्चसंतु॥गोत्रंनोवर्धतांदातारोभिवर्धंतां संततिश्चव
र्द्धतां श्रद्धाचनोमाव्यगमत् बहुदेयंचनोस्तुअन्नंचनोबहुभवेतअतिथींश्चलभेमहि।याचितारश्चनःसंतुमाचयाचिष्मकंचन इत्याशिषोगृह्णी
यात् ॥ ततःपिण्डोपरिसपवित्रकुशानास्तीर्यपित्रादिभ्योमातामहेभ्यश्चस्वधोच्यतामितिपठितेदक्षिणाग्रांजलधारांदद्यात्॥ततोऽर्घपात्रा
ण्युत्तानीकृत्य(सव्येन)देवदक्षिणांदद्यात्।तत्रहिरण्यकुशत्रयादीनिचादायअद्यास्मत्पित्रादित्रयश्राद्धसंबंधिनांपुरूरवार्द्रवसंज्ञकानांविश्वषां
देवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थंमिदंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणाय दक्षिणात्वेन दातुमहमुत्सृजे—इतिसंकल्प्य

दद्यात् ॥ एवंमातामहादिदेवश्राद्धदक्षिणामपिदद्यात् ॥ ततोऽपसव्यादिनारजतद्रव्यंकुशादीनिचादाय अद्यकाश्यपगोत्राणामस्मत्पितृ पितामहप्रपितामहानाममुकामुकदासानांकृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदरजतंचंद्रदैवतममुकशर्मणेब्राह्मणायदक्षिणात्वेनदातुमहमुत्सृजे इतिपितृदक्षिणांदद्यात् ॥ एवमेवमातामहादिश्राद्धदक्षिणामपिदद्यात् ॥ (दैवेरजतनिषेधः) ततः पिण्डानुत्थाप्यस्थाल्यांनिधाय अवघ्राणं कृत्वा पिंडाधःस्थान्सकृदाच्छिन्नान्दर्भानुल्मुकद्वयं च वह्नौक्षिपेत् ॥ ततः सव्येन विश्वेदेवाः प्रीयंतामिति प्रार्थ्य (अपसव्येन) उत्तिष्ठतपितरः विश्वेदेवैःसह इतिपितॄन् विसृज्यमंडलंप्रदक्षिणीकृत्यनमस्कृत्योपविशेत्॥ततो–देवताभ्यःपितृभ्यश्च महा योगिभ्यएवच ॥ नमः स्वाहायै स्वधायैनित्यमेवनमोनमः इतित्रिःपठित्वारक्षादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्य आचम्य प्रमादात्कुर्वतां कर्म० इति विष्णुं स्मरेत् ॥ ततःपिण्डान्गामजंवायसान्वाखादयेत् ॥ अग्नौजलेवाक्षिपेत ॥ (पुत्रकामःपितामहपिण्डं ऋतुस्नातायै पितृभक्तायैसाध्व्यैधर्मपत्न्यैदद्यात ॥ साशुचिर्वाग्यतापुत्रकामा पितृभ्योनमः इतिपठित्वाऽश्नीयात ततोवैश्वदेवबलिकर्मणीकृत्वाश्राद्धी यद्द्रव्याणिब्राह्मणेभ्यः प्रतिपाद्यदशाऽष्टौवाब्राह्मणानामन्नादिनातोषयेत् ॥ ततः अतिथिसुतभृत्यबांधवादिभिः सहस्वयमपिभोजनंकु र्यात ॥ तद्दिनेश्राद्धकर्ता द्यूताध्वगमनमैथुनायासकलहपुनर्भोजनहिंसादीनि न कुर्यात् ॥ इतिपंडितगौडश्रीचतुर्थीलालविर चितेश्राद्धप्रकाशेशूद्रपार्वणश्राद्धपद्धतिः समाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ अथशूद्राणामाभ्युदयिकश्राद्धम्॥तच्चपुत्रजन्मविवाहयज्ञप्रतिष्ठावृषोत्सर्गतीर्थयात्रादिकमंगलकृत्येषुकर्त्तव्यम् ॥ तत्रतावच्छ्राद्धात्पूर्वं षोडशमातरःपूजनीयाः ॥ तत्रविधिः ॥ कर्ताप्रातःस्नानादिनित्यकर्मसमाप्यस्वासनेप्राङ्मुख उदङ्मुखोवा उपविश्याचम्य देशकालौ संकीर्त्य अद्यकाश्यपगोत्रोऽमुकदासोहंकरिष्यमाणामुककर्मनिमित्तकाभ्युदयिकश्राद्धाङ्गभूतगणपतिसहितषोडशमातृकास्थापनपूजनं

चकरिष्ये इति संकल्प्य ॥ सुमुखश्चैकदंतश्च इत्यादिस्मरणपूर्वकंगणेशादींस्तंडुलपुंजेषु स्थापयेत् ॥ तत्रादौपुष्पाण्यादाय
श्रीगणपते इहागच्छ इहतिष्ठ १ गौरि इहागच्छ इहतिष्ठ २ पद्मे इहागच्छ इह० ३ शचि इहागच्छ इह० ४ मेधे
इहागच्छ इह० ५ सावित्रि इहागच्छ इह० ६ विजये इहा० ७ जये इहा० ८ देवसेने इहा० ९ स्वधे इहा० १० स्वाहे इहा० ११
मातर इहागच्छत इहतिष्ठत १२ लोकमातरः इहागच्छत इहतिष्ठत १३हृष्टेइहागच्छेहतिष्ठ १४ पुष्टेइहा०१५तुष्टे इहा०१६ आत्मकुल
देवते इहागच्छ इहतिष्ठ १७इत्यावाह्य मातरः सुप्रतिष्ठिताः भवंतु इति पुष्पाणि विकीर्य्य नाममंत्रेणप्रत्येकं तंत्रेणवा पाद्यार्घाचमनीय
स्नानवस्त्रगंधपुष्पधूपदीपनैवेद्यतांबूलदक्षिणादीनि समर्प्य गणपतिसहिताः षोडशमातरः प्रीयंतामिति प्रार्थ्य क्षमध्वमितिक्षमापये
दिति ॥ ततः ब्राह्मी माहेश्वरीचैव कौमारी वैष्णवीतथा वाराहीचतथेंद्राणी चामुंडाः सप्तमातरः—इति सप्तमातृरावाह्य संपूज्य ॥ कुडचे
घृतेन सप्तपंचवाधारा उत्तरोत्तरक्रमेणकृत्वा ॥ वसोर्धारायैनमः इतिषोडशोपचारैः संपूज्य नांदीश्राद्धं कुर्यात् ॥ तत्रप्रयोगः ॥ तावच्छ्राद्ध
सामग्रीं संपाद्य ब्राह्मणैः सह श्राद्धभूमिमागत्य आसनानिदत्त्वा देवपितृब्राह्मणानष्टौ चतुरोवा प्राङ्मुखानुदङ्मुखान्वोपवेशयेत् ॥
तदभावेकुशमयचटान्वास्थापयेत्॥ ततोरक्षादीपंनिधाय आचम्य स्वासने प्राङ्मुखउदङ्मुखोवाउपविश्य आचम्यकर्मपात्रंजलेनप्रपूर्य
गंधपुष्पदूर्वायवदध्यादिनिक्षिप्य तज्जलेन अपवित्रः पवित्रोवा०पुंडरीकाक्षायनमः इति श्राद्धद्रव्याणि स्वात्मानंच प्रोक्षयेत् ॥ ततोभूम्यै
नमः विष्णवेनमः इतिनत्वा कुशयत्रयपवजलान्यादाय देशकालौस्मृत्वा॥अद्यामुकगोत्राणामस्मन्मातृपितामहीप्रपितामहीनाममुकामु
कदेवीनां नांदीमुखीनाम् अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकदासानांनांदीमुखानां तथा अमुकगोत्राणामस्म
न्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकदासानां नांदीमुखानाम् अमुककर्मनिमित्तकाभ्युदयिकश्राद्धमहंकरिष्ये—इतिसंकल्प्य

विष्णुंस्मरेत् ॥ ततोयवगौरसर्षपान्गृहीत्वा नमोनमस्ते गोविंद पुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेश रक्षतांसर्वतो दिशः ॥ १ ॥इतिपठित्वा सर्वत्रविकीर्य नीवीबंधं कुर्यात ॥ अथपाद्यादिदानम् ॥(सर्वं सव्येन देवतीर्थेन प्रदक्षिणकर्मणा यवैश्चकर्त्तव्यम्) पाद्यपात्रंगृहीत्वा अद्यमात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिनःसत्यवसुसंज्ञकाविश्वेदेवाः इदंवः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिर्नमः इतिदद्यात् ॥ ततः काश्यपगोत्रास्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यः नांदीमुख्यः इदंवः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिर्नमःकाश्यपगोत्राःस्मत्पितृपितामहाः अमुकामुकदासाः नांदीमुखा इदंवः पाद्यं पादावनेजनंपादप्रक्षालनंवृद्धिर्नमः ॥ द्वितीयगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकदासाः नांदीमुखाःइदंवः पाद्यपादावनेजनंपादप्रक्षालनंवृद्धिर्नमः॥अथासनम् ॥सत्यवसुसंज्ञकाविश्वेदेवाः इदमासनं वोनमः अत्राध्वम् इत्युक्त्वाकुशत्रयंपूर्वाग्रमुत्सृजेत् ॥ एवं सर्वत्र नांदीश्राद्धे क्षणः कर्त्तव्यः प्राप्नुतां भवंतौ प्राप्नवाव इतिपठेत् ॥ काश्यपगोत्रास्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यः नांदीमुख्यः इदमासनंत्रेधाविभज्यवोनमः अत्राध्वम् इत्यासनंदत्त्वा नांदीश्राद्धेक्षणः कर्त्तव्यः प्राप्नुतांभवंतौप्राप्नवाव इति० ॥ काश्यपगोत्राऽस्मत्पितृपितामहप्रपितामहा अमुकामुकदासाः नांदीमुखाः इदमासनं त्रेधाविभज्यवोनमः । अत्राध्वं नांदीश्राद्धेक्षणः कर्त्तव्यः प्राप्नुतांभवंतौप्राप्नवाव इति०॥द्वितीयगोत्राऽस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकदासाः नांदीमुखाः इदमासनं त्रेधाविभज्यवोनमः अत्राध्वं प्राप्नुतांभवंतौप्राप्नवाव इत्यासनंदद्यात ॥ ततोऽर्घपात्रमादाय ॥ सत्यवसुसंज्ञकाविश्वेदेवाः एषवोर्घोनमः इत्यर्घंदत्त्वा काश्यपगोत्राः मातृपितामहीप्रपितामह्यः एषहस्तार्घस्त्रेधाविभज्य युष्मभ्यंनमः ॥ काश्यपगोत्राः पितृपितामहप्रपितामहाः एषहस्तार्घस्त्रेधाविभज्ययुष्मभ्यंनमः ॥ द्वितीगोत्राः मातामहप्रमातामहवृद्धप्रमातामहा एषहस्तार्घस्त्रेधाविभज्य युष्मभ्यंनमः इत्यर्घदानंकुर्यात् ॥ ततः सर्वत्र गंधपुष्पधूपदीप

तांबूलवासांसिक्रमेणधृत्वाकुशत्रययवजलान्यादायअद्यसत्यवसुसुंज्ञकेभ्यो विश्वेभ्योदेवेभ्यःइदंगंधाद्यर्चनंनमःसंपद्यतांवृद्धिः।काश्यपगो
त्राभ्यःमातृपितामहीप्रपितामहीभ्योनांदीमुखीभ्यः इदंगंधाद्यर्चनंनमः संपद्यतांवृद्धिः॥काश्यपगोत्रेभ्यः पितृपितामहप्रपितामहेभ्योनांदीमु
खेभ्यःइदंगंधाद्यर्चनंनमः संपद्यतांवृद्धिः ॥ अमुकगोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्योनांदीमुखेभ्यः इदंगंधाद्यर्चनंनमःसंपद्यतां
वृद्धिः॥ततः एतेगंधपुष्पधूपदीपतांबूलाच्छादनांताःसर्वे उपचाराः संपूर्णा भवंतु इति प्रार्थयेत् ॥ ततोर्धचंद्रमंडलमभ्युक्षणंवाकृत्वा पात्रेष्वा
मान्नानिद्विगुणानिसमानिवाहिरण्यंदत्त्वा प्रोक्ष्य पात्रमालभ्ययवान्विकीर्यान्ने विष्णवेनमः इत्यङ्गुष्ठंदत्त्वा॥कुशत्रयादीन्यादाय॥सत्यवसुसं
ज्ञकाविश्वेदेवाःनांदीमुखाःइदंवः युग्मब्राह्मणभोजनपर्याप्तंद्विगुणमामंसोपस्करम् आममूल्यभूतंयथाशक्ति हिरण्यं वा अमृतरूपेण संप्रददे
नमम संपद्यतांवृद्धिः॥ ततः काश्यपगोत्रा मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यः नांदीमुख्य इदंवः युग्मब्राह्मणभोजनपर्याप्तं द्विगुण
मामंसोपस्करम्आममूल्यभूतंयथाशक्तिहिरण्यंवाअमृतरूपेणसंप्रददेनमम संपद्यतांवृद्धिः॥काश्यपगोत्राःपितृपितामहप्रपितामहाःइदंवः
युग्मब्राह्मणभोजनपर्याप्तं द्विगुणमामंसोपस्करम् आममूल्यभूतंयथाशक्तिहिरण्यंवा अमृतरूपेण संप्रददेनमम संपद्यतांवृद्धिः॥ अमुकगोत्र
मातामहप्रमातामहवृद्धप्रमातामहाःइदंवः युग्मब्राह्मणभोजनपर्याप्तं द्विगुणमाम सोपस्करम् आममूल्यभूतंयथाशक्तिहिरण्यं अमृतरूपेण
संप्रददे नमम संपद्यतांवृद्धिः अत्रपिण्डाः कृताऽकृताः पिण्डदानपक्षे वेदित्रयंनिर्माय पूर्वाग्रारेखाः तिस्रःकृत्वादर्भानास्तीर्य नवपात्राणि
जलयवगंधपुष्पैः पूरयित्वा पात्रमेकमादाय काश्यपगोत्रे मातरमुकदेवि नान्दीमुखि अत्रावनेनिक्ष्वतेनमः इति कुशमूले मात्रेऽवने
जनंदत्त्वा पात्रान्तरेण कुशमध्ये पितामह्यै कुशाग्रे प्रपितामह्यै चावनेजनंदद्यात्॥एवं द्वितीयवेदिकायांपित्रादिभ्यस्तृतीयवेदिकायां माता
महादिभ्यश्चप्रत्येकमवनेजनंदद्यात् ॥ ततोयवदधिबदरघृतमिश्रितामान्नेनसक्तुनावानवपिण्डान्निर्माय एकंपिण्डंकुशादींश्चादाय अत्र

काश्यपगोत्रेमातरमुकदेविनांदीमुखिएषतेपिंडोनमः इतिदेवतीथनमात्रेतदवनेजनस्थानेपिण्डंदत्त्वा पितामहीप्रपितामहीभ्यांतत्तदवने
जनस्थानेपिण्डंदद्यात् ॥ एवमेवपितृपितामहप्रपितामहेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यश्चतत्तदवनेजनस्थानेक्रमेणपिण्डान्दद्या
त् ॥ ततोऽवनेजनपात्रंगृहीत्वा काश्यपगोत्रेमातरमुकदेविनांदीमुखि अत्रप्रत्यवनेनिक्ष्वतेनमः इतिमातृपिण्डोपरिप्रत्यवनेजनंदत्त्वा
पितामह्यादिभ्योपिक्रमेणतत्तत्पिण्डोपरिप्रत्यवनेजनंदद्यात् ॥ ततोनीवींविस्रंस्य आचम्यहरिंस्मरेत्॥ ततःपिण्डेषुसूत्राणिदत्त्वा संकल्पयगं
धपुष्पधूपदीपताम्बूलादिभिः प्रत्येकंपिण्डानभ्यर्च्यशिवाआपःसंतु इतिजलं सौमनस्यमस्तु इतिपुष्पाणि अक्षतंचारिष्टंचास्तु इतियवां
श्चप्रत्येकंपात्रेषुनिक्षिप्य नांदीमुख्योमातरःप्रीयंतांनांदीमुखाःपितरःप्रीयंतांनांदीमुखाःमातामहाश्चप्रीयंताम् इत्युदकंदत्त्वा कृतांजलिःगोत्र
नोवर्द्धताम् दातारोनोभिवर्धंताम् संततिश्चवर्द्धताम् श्रद्धाचनोमाव्यगमत् बहुदेयंचनोस्तुअन्नंचनोबहुभवेत् अतिथींश्चलभेमहि याचितारश्च
नःसंतु माचयाचिष्मकंचन। इत्याशीःप्रार्थयेत् ॥ ततः। पिण्डोपरिसपवित्रकुशान्धृत्वा तूष्णींतदुपरिपूर्वाग्रांजलधारांदत्त्वादक्षिणांदद्यात्
(अत्रफलमूलयवमयी एवदक्षिणातन्निष्क्रयहिरण्यद्रव्यंवा) दक्षिणाद्रव्यंकुशत्रयादींश्चादाय॥ अद्यसत्यवसुसंज्ञकानांविश्वेषांदेवानांकृते
तन्नांदीश्राद्धकर्मणः सांगतासिद्ध्यर्थंद्राक्षामलकयवमूलभूतांतन्निष्क्रयद्रव्यंवा दक्षिणांदातुमहमुत्सृजे इतिसंकल्प्यदद्यात् ॥ पुनः का
श्यपगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनां कृततन्नांदीश्राद्धकर्मणःसांगतासिद्ध्यर्थं द्राक्षामलकयवमूलभूतां
निष्क्रयद्रव्यंवादक्षिणांदातुमहमुत्सृजे इति ॥ एवंपितृणांमातामहानांचश्राद्धदक्षिणांक्रमेणदद्यात् ॥ ततः मातापितामहीचैव तथैवप्रपि
तामही ॥पितापितामहश्चैव तथैवप्रपितामहः॥१॥मातामहस्तत्पिताच प्रमातामहकादयः ॥ एतेभवंतुसुप्रीताः प्रयच्छंतुसुमंगलम् ॥२॥
इतिप्राथ्र्य पिण्डान्विसृज्यकर्म्मपूर्त्तिकामोविष्णुंस्मरेत् ॥ इतिश्राद्धप्रकाशेशूद्राणामाभ्युदयिककश्राद्धपद्धतिःसमाप्ता ॥ ॥ छ ॥

अथ दुर्मरणमृतानांशूद्राणांनारायणबलिप्रयोगः॥ तत्रतावत्सूतकान्तेपुण्यदेशेतीर्थगृहेवापंचभूतसंस्कारंविधाय तत्रसामग्रींसंस्थाप्यनद्यां दौस्नात्वाधौतवाससीद्वेपरिधाय नित्यकर्मसमाप्यगणपतिनवग्रहान्पूजयेत॥ततोदुर्मरणमृतप्रायश्चित्तंकार्यम्॥ तद्यथा—देशकालौस्मृत्वा अमुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणदोषपरिहारार्थंकुगतिनिवारणार्थं सद्गतिप्राप्त्यर्थंनारायणबल्यधिकारार्थंचपंचदशप्राजापत्यात्मकं प्रायश्चित्तं प्रतिप्राजापत्यंयथाशक्तिधेनुमूल्यम् अथवा अमुकसंख्यापरिमितगीताविष्णुसहस्रनामपाठान्ब्राह्मणद्वारायथाकालेनाचरिष्ये इति संकल्प्य यथाशक्तिधेनुमूल्यम्गीताविष्णुसहस्रनामपाठान्आमान्नतीर्थयात्रादिद्वारासंपादयेत॥ ततः आचम्यदेशकालौस्मृत्वा अमुक गोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षय्यस्वर्गलोकप्राप्तिकामस्तथा चतुःषष्टिदुर्मरणांतर्गतयत्किंचिद्दुर्मरणदोषपरिहारार्थं श्रीनारायणप्रीत्यर्थंनारायणबलिकर्माहंकरिष्ये--इतिसंकल्प्य स्वपुरतश्चतुरस्रंस्थंडिलंकृत्वा तदुपरिश्वेतवस्त्रमास्तीर्य तत्रतंडुलैरष्टदलंसंपाद्य ईशानादिष्वष्टशक्तीनांस्थापनम्॥तद्यथा~कुशत्रयतिलजलान्यादाय अमुकगोत्रस्य० प्रेतस्य रोगोत्पत्तिमरणावसाने ऊर्ध्वोच्छिष्टाध उच्छिष्टोभयोच्छिष्टाकृतस्नानाशौचमरणमरणसमयहरिनामोच्चारवर्जितामेध्यकेशास्थिस्पर्शेत्यादिनानादोषपरिहारार्थं प्रेतत्वनिवृत्त्यर्थम् असद्गतिविनाशार्थं सद्गतिविष्णुलोकप्राप्त्यर्थंच सत्येशस्थापनप्रतिष्ठापूजनमहंकरिष्ये इतिसंकल्प्य पुष्पाण्यादाय ईशाने रुक्मिण्यैनमः रुक्मिणीमावाहयामिस्थापयामि १ एवंसर्वत्र ॥ पूर्वे सत्यभामायै० सत्यभामां० २ आग्नेय्यां० जांबवत्यै०जांबवतीं० ३ दक्षिणे नाग्निजित्यै० नाग्निजितीं० ४ नैर्ऋत्ये कालिंद्यै० कालिंदीं० ५ पश्चिमे मित्रविंदायै० मित्रविंदां० ६ वायव्ये लक्ष्मणायै० लक्ष्मणां० ७ उत्तरे चारुहासिन्यैनमः चारुहासिनीमावाहयामिस्थापयामि ८ इतिसंस्थाप्य मध्ये ताम्रकलशंस्थापयेत्॥तस्यविधिः॥ तत्रादौभूमिंसंपूज्यपृथ्वित्वयाधृतालोका देवित्वंविष्णुनाधृता॥कलशाधारभूतंहि पवित्रंकुरुचासनम् इतिभूमिंस्पृशेत् १ तत्र यवोसिधा

न्यराजोसि सर्वोत्पत्तिकरः शुभः।प्राणिनांजीवनोपायः कलशाधःक्षिपाम्यहम्२इतिधान्यंक्षिप्त्वातस्योपरिकलशंस्थापयेत।गंगेचयमुने
चैव गोदावरिसरस्वति॥नर्मदेसिंधुकावेरि कुंभेस्मिन्सन्निधिंकुरु३इतिजलेनप्रपूर्य गंधंक्षिप्त्वा सर्वौषध्यः सप्तमृदः पंचपल्लवान्दूर्वापंचर
त्नानिहिरण्यंपूगीफलंच निक्षिपेत्॥ततः।जीवनंसर्वलोकानां लज्जायारक्षणंपरम्।सुवेषधारिवस्त्रंहि कलशेवेष्टयाम्यहम्४इति वस्त्रेणसंवेष्ट्य
धान्यपूर्णमिदंपात्रंस्थापितंकलशेयतः।तेनायंकलशःपूर्णःपूर्णाःसंतुमनोरथाः५इतिपूर्णपात्रंनिधायश्रीफलंधृत्वापुष्पमालादिभिःशोभितं
कृत्वा तत्र–मकरस्थंपाशहस्तं शुभवर्णकिरीटिनम् ॥ आवाहयेप्रतीचीशंवरुणंजलनायकम् ॥ भोवरुणइहागच्छइहतिष्ठ इत्यावाह्य॥
वरुणायनमः इतिसंपूज्य कलशस्यमुखेविष्णुः कंठेरुद्रःसमाश्रितः ॥ मूलेतस्यस्थितोब्रह्मा मध्ये मातृगणाःस्मृताः॥१॥कुक्षौतुसागराः
सप्त सप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदः सामवेदोप्यथर्वणः॥अगैश्चसहिताःसर्वे कलशंतुसमाश्रिताः॥२॥इत्यभिमंत्र्य देवदानवसंवादे
इत्यादिप्रार्थयेत् ॥ इतिकलशस्थापनम्॥अतःपरंस्वर्णमयींसत्येशमूर्त्तिंदुग्धजलपंचामृतस्नापितांकलशोपरिसंस्थाप्य अष्टशक्तिसहितः
सत्येशः सुप्रतिष्ठितोवरदोभवतु इतिप्रतिष्ठांकुर्यात्॥अथपूजनम्॥उर्व्यांक्षीरसमुद्रेस्मिन्योग्निसत्येचसंस्थितः॥अत्रत्वंसत्ययासार्द्धंसत्ये
शभवसन्निधौ१ भगवन्सत्येशइहागच्छइहतिष्ठ इत्यावाहनम्॥सोमसूर्याग्निसंकाशंपद्ममष्टदलान्वितम्।गृहाणासनंसत्येशत्रैलोक्यस्थिति
कारण२सत्येशायनमःआसनंसमर्पयामि।रत्नाभरणसर्वांग सर्वदेवनमस्कृत ॥ पाद्यंगृहाणदेवेश गंधपुष्पाक्षतैर्युतम् ३ इतिपाद्यं०सत्ये
शसुखभूयिष्ठसत्येशमुक्तिदायक॥सत्येशसत्ययायुक्तगृहाणार्घ्यंनमोस्तुते ४ इत्यर्घ्यं०॥गंगाजलसमानीतं सुवर्णकलशेस्थितम्॥ गृहाणा
चमनंदेवत्रैलोक्यस्यापिपावन५इत्याचमनम्॥क्षीरसागरकल्लोलैःस्नाहिपापनिषूदन।त्राहिमांभूतभव्येश दत्तेनजलबिंदुना॥६॥ इतिस्नानम्
ततः पंचामृतस्नानम् ॥ अभिषेकः आचमनं०हरस्वसर्वदुरितं येनाहंवेष्टितोहरे॥वस्त्रेणानेनशुभ्रेणसत्येशकुरुवाञ्छितम्॥७॥ इतिवस्त्रं०यज्ञे

योगेतथासांख्येपवित्रत्वंसदोच्यते। यज्ञोपवीतदानेनकुरुमांसर्वपावनम्।८। इतियज्ञोपवीतं०॥सुगंधंचंदनंदिव्यंकेशरागरुसंयुतम्॥ विलेपनं
सुरश्रेष्ठसर्वपापहरोभव।९। इतिचंदनं०। सत्येशायनमस्तुभ्यंमूर्तामूर्तस्वरूपिणे। वासुदेवनृसिंहाख्यकपिलादित्यभूधर।१०। इतिपुष्पाणि॥
वहुभांतेजगन्नाथकोमलातिमनोहराम्। गृहाणतुलसींविष्णोययासंतोषितोहरिः।११। इतितुलसीपत्राणि०। शक्तिवृंदयुतोदेवपूजाधूपंसुरेश्वर।
गृहणत्वंतुसत्येशसत्ययासहरक्षमाम्।१२। इतिधूपं०। ज्योतीरूपमरूपंत्वावदंतिमुनिपुंगवाः। ज्योतिर्मध्येस्थितोदेवदीपंगृह्णन्नमोस्तुते।१३
इतिदीपम्। त्रातात्वमेवसत्येशसत्ययासहचिंत्यते। गृहाण देवदेवेशममनैवेद्यमुत्तमम्।१४। इतिनैवेद्यं०। नारायणनमस्तेस्तुवासुदेवनमोनमः।
त्रैलोक्यजगदाधारत्राहिमांमधुसूदन।१५। इतिआचमनं०। नमस्तेदेवदेवेशपुराणपुरुषोत्तम पापोपशमनार्थायप्रीत्यर्थंप्रतिगृह्यताम्॥१६॥
इतिऋतुफलम्। पूगीफलंसकर्पूरंतांबूलंसुमनोहरम्। पवित्रकरणंनित्यंतांबूलंप्रतिगृह्यताम् ॥१७॥ इतितांबूलं। अनेकजन्मसंभूतंपापंछिन्धि
सुरेश्वर। मयादत्तार्घदानेनभुक्तिमुक्तिप्रदोभव॥ १८॥ इतिहिरण्यदक्षिणां० वाराहाच्युतयज्ञेशलक्ष्मीकान्तसुरेश्वर। पुत्रपौत्रप्रदोविष्णोपापशत्रो
निरंजन॥१९॥ इतिनीराजनम्। प्रभोसत्येशसत्यानांविभोविष्णोसुरेश्वर। हरदुःखंचरोगंचपापंजन्मशतोद्भवम्॥२०॥ अनिरुद्धेशगोविंदविष्णो
चक्रिन्नमोस्तुते पूजांगृहाणदेवेश प्रीयस्वगरुडध्वज ॥२१॥ इतिनमस्कारः॥(अत्राष्टौशक्तीनांपूजापृथक्कार्या) अथप्रार्थना॥ अपराधसह
स्राणि लक्षकोटयुतानिच। नश्यंतितत्क्षणात्पापंसत्येशस्य चपूजनात्। सत्येशपंचवक्त्रस्त्वंलक्ष्म्यासहजगत्पते। वासुदेवः स्थितःपूर्वेनृसिंहोद
क्षिणेस्थितः। कपिलःपश्चिमास्येतुवाराहश्चोत्तरेस्थितः। ऊर्ध्ववक्तेच्युतोज्ञेय एतद्वैवक्त्रपंचकम्। सत्येशसंस्थितंराजन्पूजाकालेसदैवहि। क्षी
रोदपूर्णचंद्रास्यपद्मकार्णिकसंस्थितम् पद्मकौमोदकीशंखचक्राण्यस्त्राणिबिभ्रतम्।२२। इतिप्रार्थ्य। सनारिकेलार्घदानम्। सत्येशायनमस्तुभ्यं
पापारेपरमेश्वर। मयादत्तार्घदानेनप्रेतमुक्तिप्रदोभव।१। इत्यर्घंदत्त्वानारिकेलमर्पयेत्। ततःप्रायश्चित्ताङ्गाष्टौब्राह्मणभोजनसंकल्पः। ततोहस्ते

जलमादाय कृतेनानेनपूजनेन अष्टशक्तिसहितः श्रीसत्येशः प्रीयतामित्युत्सृजेत्।अथपंचकलशस्थापनम्।तत्रादौकुशत्रयतिलजलान्या दायदेशकालौसंकीर्त्यकाश्यगोत्रस्य ॰प्रेतस्यप्रेतत्वविमुक्तिपूर्वकविष्णुलोकप्राप्तिकामस्तथा चतुःषष्टिदुर्मरणांतर्गतयत्किंचिद्दुर्मरणनिमि त्तकनारायणबलिकर्मांगतयाविहितंपंचकलशपंचदेवतास्थापनपूजनमहंकरिष्येइतिसंकल्प्यसत्येशाद्दक्षिणभागे स्थंडिलेपूर्वादिदिक्षुमध्ये च क्रमेणपंचकलशान्पूर्वोक्तविधिनास्थापयेत्।वस्त्रवेष्टनंपृथक्पृथक् । पंचकलशेषु पंचधान्यानांस्थापनम् । ब्रह्मकलशेगोधूमाः १ विष्णु कलशेतंडुलाः २ रुद्रकलशेमुद्गाः ३ यमकलशेमाषाः ४ प्रेतकलशेतिलाः स्थाप्याः ५ ब्रह्मारौप्यमयःकार्यो विष्णुःस्वर्णमयोभवेत् ॥ रुद्रस्ताम्रमयःकुर्याद्यमोलोहमयःस्मृतः ॥ सीसमयस्तत्पुरुषः पंचमूर्त्तिरुदाहृताः ॥ १ ॥ ततोब्रह्मादिमूर्तीनां दुग्धजलधारयाभ्युत्तारणं कृत्वाक्रमेणपंचकलशोपरिसंस्थाप्य पंचदेवानामावाहनंकुर्यात् ॥ तत्रप्रयोगः ॥ पूर्वदिशिक्षीरोदकपूरितेकलशे श्वेतवस्त्रवेष्टितायांरजत प्रतिमायांब्रह्माणम् । आवाहयामिदेवेश ब्रह्ममूर्त्तिपितामहम् ॥ पुस्तकंचाक्षसूत्रंचशूलंहस्तेकमंडलुम्॥ १॥हंसपृष्ठसमारूढंदेवतागणसे वितम् ॥ आगच्छभगवन्ब्रह्मन्कुंभेस्मिन्संस्थितोभव ॥ २ ॥ भगवन्ब्रह्मन्निहागच्छ इहतिष्ठ इत्यावाह्यब्रह्मणेनमः इतिस्थापयेत् ॥ १ ॥ पश्चिमदिशिगंगोदकपूरितेकलशेपीतवस्त्रवेष्टितायांस्वर्णप्रतिमायांविष्णुम्।आवाहयामिदेवेशंविष्णुंत्रैलोक्यपूजितम्। शंखचक्रगदापद्म चतुर्बाहुंसुशोभनम् ॥१॥गरुडंचसमारूढं लक्ष्मीगणसमायुतम् ॥ आगच्छभगवन्विष्णो कुंभेस्मिन्संस्थितोभव ॥ २ ॥ भगवन्वि ष्णोइहागच्छ इहतिष्ठ॥विष्णवेनमः इतिस्थापयेत् ॥२॥ उत्तरदिशिमधुघृतसंयुतेकलशेरक्तवस्त्रवेष्टितायांताम्रप्रतिमायांशिवम्॥आवा हयामिदेवेशं शिवंत्रैलोक्यधारिणम् ॥ वृषभंचसमारूढं चंद्रार्धकृतशेखरम् ॥ १ ॥ त्रिशूलायुधसंयुक्तं मुंडमालाविभूषितम् ॥ उमया चसमायुक्तं नागयज्ञोपवीतकम् ॥ आगच्छदेवदेवेश कुंभेस्मिन्संस्थितोभव ॥२॥ भगवन् शिव इहागच्छ इहतिष्ठ ॥ शिवायनमः

इतिस्थापयेव् ॥ ३ ॥ दक्षिणदिशिकलशे कृष्णवस्त्रवेष्टितायांलोहप्रतिमायांधर्मराजम् ॥ आवाहयामिदेवेशं यमंजंतुभयंकरम् ॥ रौद्र मूर्तिंविरूपाक्षं कृष्णांजनसमप्रभम् ॥ १ ॥ माहिषंरथमारूढं दंडायुधसमन्वितम् ॥ कर्मणांसाक्षिणंदेवं धर्मार्थकामचिंतनम् ॥ आगच्छ धर्मराजेंद्र कलशेस्मिँस्थितोभव ॥२॥ भगवन्यमराज इहागच्छइहतिष्ठ इत्यावाह्य यमायनमःइतिस्थापयेत ॥ ४ ॥ मध्यमेकलशेकृ ष्णवस्त्रवेष्टितायांसीसकप्रतिमायांतत्पुरुषम् ॥ तत्पुरुषमावाहयामिस्थापयामि भगवँस्तत्पुरुष इहागच्छइहतिष्ठ तत्पुरुषायनम इति स्थापयेत् ॥ ५ ॥ एवमावाहनंस्थापनंचकृत्वापुष्पाक्षतान्विकीर्यनामममंत्रेणप्रत्येकंषोडशोपचारैःसंपूज्य नमस्कृत्य इदमत्रगंधपुष्पधूप दीपनैवेद्यफलतांबूलदक्षिणाद्युपचाराः पंचदेवताभ्योनमम ॥ पंचदेवतापूजनविधेःपरिपूर्णतास्तु इति प्रार्थयेत् ॥ ततः पंचाक्षरद्वादशा क्षराष्टाक्षरमंत्रजपकरणार्थं ब्राह्मणान्वृत्वाजपांस्तादाराकारयेत् ॥ अथ पंचदेवतानांतर्पणम् ॥ तावद्गंधपुष्पतिलदुग्धगंगोदकसर्वौ षधियवमिश्रितजलेनपात्रंप्रपूर्य कुशत्रयतिलजलान्यादाय अद्यकाश्यपगोत्रस्य अमुकप्रेतस्यासद्गतिदुर्मृत्युविनाशसद्गतिप्राप्त्यर्थं ब्र ह्मादिदेवानां स्वैःस्वैर्नाममंत्रैस्तर्पणंकरिष्ये इतिसंकल्प्य देवमुद्दिश्यतर्प्पयेत्॥तत्रादौ ब्रह्मतर्प्पणम् ॥ ब्रह्मातृप्यताम् १ आत्मभूस्तृप्य ताम् २ सुरज्येष्ठस्तृप्यताम् ३ परमेष्ठीतृप्यताम ४ पितामहस्तृ० ५ हिरण्यगर्भस्तृ० ६ लोकेशस्तृ०७ स्वयंभूस्तृ० ८ चतुराननस्तृ० ९ धातातृप्यताम् १०अब्जयोनिस्तृ० ११द्रुहिणस्तृ० १२ विरिंचिस्तृ० १३ कमलासनस्तृ० १४स्रष्टातृ० १५ प्रजापतिस्तृप्यताम् १६ वेधास्तृप्यताम् १७विधातातृप्यताम् १८विश्वसृट्तृप्यताम् १९विधिस्तृप्यताम् २० कमलोद्भवस्तृ० २१रजोमूर्तिस्तृ०२२ सत्य कस्तृ०२३ हंसवाहनस्तृप्यताम् २४निघनस्तृप्यताम्२५नाभिजन्मातृप्यताम २६अनेनतर्पणेनभगवान्ब्रह्माप्रीयताम्इति ब्रह्मतर्पणम् ॥

अथ विष्णुतर्पणम् ॥ केशवस्तृप्यताम् १ नारायणस्तृप्यताम् २ माधवस्तृप्यताम् ३ गोविंदस्तृ० ४विष्णुस्तृ०५मधुसूदनस्तृ०६ त्रि
विक्रमस्तृ० ७ वामनस्तृ०८ श्रीधरस्तृ० ९ हृषीकेशस्तृ० १० पद्मनाभस्तृ० ११ दामोदरस्तृ० १२ वासुदेवस्तृ० १३ संकर्षण
स्तृ० १४ प्रद्युम्नस्तृ० १५ अनिरुद्धस्तृ० १६ मत्स्यस्तृ० १७ कूर्मस्तृ० १८ वाराहस्तृ० १९ नारसिंहस्तृ० २० वामनस्तृ० २१
रामस्तृ० २२ श्रीरामस्तृ० २३ कृष्णस्तृ० २४ बुद्धस्तृ० २५ कल्किस्तृ० २६ शौरिस्तृ० २७ वैकुंठस्तृ० २८ महाबलस्तृ० २९
पुरुषोत्तमस्तृ० ३० अजस्तृ० ३१ पद्मनाभस्तृ० ३२ अनंतस्तृ० ३३ कपिलस्तृ० ३४ शेषस्तृ० ३५ हलायुधस्तृ० ३६ बलभद्र
स्तृप्यताम् ३७ अच्युतस्तृप्यताम् ३८श्रीपतिस्तृप्यताम् ३९सत्येशस्तृप्यताम् ४० अनेनतर्पणेनभगवान्विष्णुःप्रीयतामितिप्रार्थयेत् ॥
इति विष्णुतर्पणम् ॥ अथ रुद्रतर्पणम् ॥ भवस्तृप्यताम् १ भवनाशस्तृ० २ महादेवस्तृ० ३ उग्रस्तृ० ४ उग्रनाशनस्तृ० ५ शर्वस्तृ०
६ शशिमौलिस्तृ० ७ रुद्रस्तृ० ८ नीलकंठस्तृ० ९ शिवस्तृ० १० भवहारिस्तृ० ११ ईशानस्तृ० १२ सर्वकामप्रदस्तृ० १३ देवाधि
देवस्तृ० १४ शंकरस्तृ० १५ शूलपाणिस्तृ० १६ शंभुस्तृ० १७ स्वयंभूस्तृ० १८ पार्वतीपतिस्तृ० १९ स्थाणुस्तृ० २० त्रिनेत्रस्तृ०
२१ शशिभूषणस्तृ० २२ महेश्वरस्तृप्यताम् २३हरस्तृ० २४पशुपतिस्तृप्यताम् २५ अनेनतर्पणेनभगवान्रुद्रःप्रीयतामितिप्रार्थयेत् ॥
इति रुद्रतर्पणम् ॥ अथ यमतर्पणम् ॥ यमस्तृप्यताम् १ धर्मराजस्तृ० २ मृत्युस्तृ० ३ अंतकस्तृ० ४ वैवस्वतस्तृ० ५ कालस्तृ०
६ सर्वभूतक्षयस्तृ० ७ औदुंबरस्तृ० ८ दध्नस्तृ० ९ नीलस्तृ० १० परमेष्ठीतृ० ११ वृकोदरस्तृ० १२ चित्रस्तृ० १३ चित्रगुप्तस्तृ
प्यताम् १४ पितृपतिस्तृ० १५ समवर्तीतृप्यताम् १६ परेतराट्तृप्यताम् १७ कृतांतस्तृ० १८ यमुनाभ्रातातृ० १९ शमनस्तृ० २० यम
राट्तृप्यताम् २१ दंडधरस्तृ० २२ श्राद्धदेवस्तृ० २३ अनेनतर्पणेनयमः प्रीयतामितिप्रार्थयेत् ॥ इति यमतर्पणम् ॥ अथ तत्पुरुष

तर्प्पणम् ॥ अनादिनिधनोदेवः शंखचक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्षः प्रेतमोक्षप्रदोभव ॥ १ ॥ तत्पुरुषस्तृप्यताम् ॥ नारायणसुर श्रेष्ठलक्ष्मीकान्तवरप्रद ॥ अतेनतर्पणेनाद्य प्रेतमोक्षप्रदोभव ॥ २ ॥ तत्पुरुषस्तृप्यताम् ॥ जयत्वंदेवदेवेश जयाजन्मजयाधर ॥ जयकामदभक्तानां प्रभोविष्णोनमोनमः ॥ ३ ॥ तत्पुरुषस्तृप्यताम् ॥ हिरण्यगर्भपुरुषप्रधानव्यक्तरूपिणे ॥ श्रीनमोवासुदेवायशु द्धज्ञानस्वरूपिणे ॥४॥ तत्पुरुषस्तृ० ॥ अच्युतानंतगोविंद विष्णोमाधवकेशव ॥ अस्यजीवस्यमोक्षार्थं सुप्रीतोभवतर्पणे ॥५॥ तत्पुरु षस्तृ० ॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥ येनमस्यंतिगोविंदं नतेषांविद्यतेभयम् ॥६॥तत्पुरुषस्तृप्यताम् ॥ अनेनतर्पणेनभगवां स्तत्पुरुषःप्रीयतामितिप्रार्थयेत् । ततःपंचदेवतानांतर्पणंपरिपूर्णमस्तु॥अनेनपंचदेवतातर्पणेनकृतेन (अपसव्यम्) काश्यपगोत्रस्य अमुक प्रेतस्य असद्गतिविनाशः सद्गतिप्राप्तिरितिपठेत् ॥ ततस्तर्पणकर्मणः सांगतासिद्धये आमान्नंतन्निष्क्रयद्रव्यंवासंकल्प्यदद्यात् ॥ इति पंचदेवतर्प्पणम् ॥ अथप्रायश्चित्तहोमः ॥ तत्रतावदग्निस्थापनम् ॥ होताहस्तमात्रंचतुरस्रंस्थंडिलं कृत्वा कुशैःपरिसमुह्य तानैशा न्यांपरित्यज्य गोमयोदकेनोपलिप्यस्रुवमूलेन मध्येप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्यानामिकांगुष्ठाभ्यांमृदमुद्धृत्य ऐशान्यां क्षिप्त्वा तंदेशंजलेनाभ्युक्ष्य तूष्णीं कांस्यपात्रस्थमग्निंस्थापयेत् ॥ ततोऽग्नेर्दक्षिणतःशुद्धमासनं विधायतदुपरिप्रागग्रान्कुशानास्तीर्य अग्निंप्रदक्षिणं कारयित्वा ब्राह्मणमुदङ्मुखंतत्रोपवेश्यास्मिन्नारायणबलिहोमकर्मणि त्वंमे ब्रह्माभव इति प्रार्थयेत् ॥ ततः प्रणीतापात्रं पुरतः कृत्वा वारिणापरिपूर्य्य कुशैराच्छाद्य ब्रह्माणमवलोक्याग्नेरुत्तरतःकुशोपरि निदध्यात् ॥ ततः परिस्तरणं प्रागग्रैश्चतुर्भिश्चतु र्भिर्दर्भैः आग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतमग्नितः प्रणीतापर्यंतं परिस्तरणं कृत्वा अग्नेरुत्तरतः पश्चिम दिशिपवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थंसाग्रमनन्तर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली चरुस्थाली संमार्जनकुशाः २

उपयमनकुशाः ३ समिधस्तिस्रः स्रुवः आज्य तंडुलान् अन्नपूर्णपात्रं च पवित्रच्छेदनकुशानांपूर्वपूर्वदिशि क्रमेणासादनीयम् ॥
ततः कुशपत्रद्वयमादाय अग्रतः प्रादेशमात्रंप्रमाप्यः कुशत्रयेण च्छित्त्वा सपवित्रकरेण प्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय अनामिकाङ्गुष्ठा
भ्यांपवित्रेगृहीत्वा त्रिरुत्पवनम्।ततःप्रोक्षणीपात्रंगृहीत्वापवित्राभ्यांत्रिरुत्पूयप्रणीतोदकेनप्रोक्षणीपात्रमभ्युक्ष्यप्रोक्षणीजलेनासादितवस्तु
सेचनम् ॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रंनिदध्यात् ॥ ततः आज्यस्थाल्यामाज्यंनिक्षिप्य प्रणीतोदकेन तंडुलान्प्रक्षाल्य चरुपात्रे
प्रणीतोदकंदत्त्वातत्र तंडुलान्प्रक्षिप्यचरुमाज्यंचगृहीत्वायुगपदग्नौनिधायसिद्धेचरौतृणादिप्रज्वाल्यप्रदक्षिणमुभयोरुपरिभ्रामयित्वावह्नौ
प्रक्षिपेत्॥ततस्त्रिःस्रुवप्रतपनंसम्मार्जनकुशानामग्रैरन्तरतोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्यपुनस्त्रिःप्रतप्यदक्षिणतोनिदध्यात्॥
ततःआज्यंचरुंचानीय स्वपुरतःआज्यंतदुत्तरतश्चरुंनिधायआज्यंप्रोक्षणीवत्त्रिरुत्पूय अवेक्ष्य सत्यपद्रव्येतन्निरसनं पुनःप्रोक्षण्युत्पवनम्।
ततः उत्थायोपयमनकुशान्वामहस्तेकृत्वाप्रजापतिंमनसाध्यात्वा तूष्णीमग्नौ घृताक्तास्तिस्रः समिधः प्रक्षिपेत् ॥ ततः उपविश्य
सपवित्रप्रोक्षण्युदकेनाग्निपर्युक्ष्य प्रणीतापात्रेपवित्रेनिधाय पातितदक्षिणजानुः कुशाग्रेण ब्रह्मणान्वारब्धः सुससिद्धतमेग्नौ आज्येनजु
हुयात् ॥ (तत्रब्राह्मणद्वारा तूष्णीं स्वाहांतोहोमः) प्रजापतये स्वाहा इदंप्रजापतये १ इतिमनसा इंद्राय स्वाहा इदं० २ इत्याघारौ
अग्नये स्वाहा इदं० ३ सोमायस्वाह इदंसोमाय इत्याज्यभागौ ४ ॥ ततोऽग्निंसंपूज्यविष्णवेस्वाहा इदंविष्णवे २ इतिचतुर्विंशत्याज्या
हुतीर्हुत्वा॥लोमभ्यः स्वाहा इतिलोमभ्यः २ त्वचे स्वाहा इदं०२ लोहिताय० इदं०२ मेदोभ्यः० इदं०२मांसेभ्यः० इदं०२स्नायुभ्यः०
इदं०२ अस्थिभ्यः०इदं०२ मज्जाभ्यः० इदं०२ रेतसे० इदं० १ पायवे० इदं० १आयासाय० इदं० १ प्रयासाय० १संयासाय०१विया
साय०१ उद्यासाय० १ शुचे० १ शोचते० १ शोचमानाय० १ शोकाय० १तपसे०१ तप्यते०१तप्यमानाय०१तप्ताय०१घर्म्माय०१

निष्कृत्यै० १ प्रायश्चित्यै० १ भेषजाय० १ यमाय० १ अंतकाय० १ मृत्यवे० १ ब्रह्मणे० इदं० १ब्रह्महत्यायै०इदं १ विश्वेभ्योदेवेभ्यो० इदं० १द्यावापृथिवीभ्यां स्वाहा इदं० १ इतितूष्णीं४२ आज्याहुतीर्हुत्वा चरुमादायाभिघार्यहस्तेनैवजुहुयात्॥गणपतयेस्वाहा इदं०४ सूर्याय०इदं०४ चंद्रमसे०इदं०४ भौमाय० इदं०४बुधाय०इदं०४बृहस्पतये०इदं०४शुक्राय० इदं ४ शनैश्चराय० इदं० ४राहवे०इदं०४ केतवे०इदं०४इतिहुत्वा॥विष्णवेस्वाहा इदं विष्णवे नमम इति षोडशचर्वाहुतीः पुनर्जुहुयात्॥ततःनमोभगवतेवासुदेवाय स्वाहा इदं विष्णवे इति तिलयवाहुतयः१०८अष्टोत्तरशतंहुत्वा अग्नयेस्विष्टकृते० इदं०इति स्विष्टकृत् आज्येन अग्नये०इदं १ वायवे०इदं२सूर्याय० इदं ३ अग्निवायुसूर्य्येभ्यः० इदं० ४ अग्नीवरुणाभ्यां० इदं० ५ अग्नये०६ वरुणादिभ्यः७वरुणाय०८प्रजापतये०९इति होमंकुर्यात् ॥ ततः स्थंडिलस्यसमंतात्पूर्वादिदिक्षु इंद्रादिदशदिक्पालेभ्योमाषभक्तबलिदानंकृत्वा ॥ मृडाग्नयेस्वाहा इदंमृडाग्नयेनमम इतिपूर्णाहुतिंदद्यात् ॥ ततः स्तरणक्रमेणबाहरुत्थाप्याज्येनाभिघार्य्य ॥ अग्नयेस्वाहा इदं० इति हस्तेनैवजुहुयात् ॥ ततोभस्मवंदनं संस्रवप्राशनमाचमनंचकृत्वा प्रणीताजलेनशिरः संमृज्य पवित्रे अग्नौप्रक्षिप्य ईशान्यांप्रणीतान्युब्जीकुर्यात्॥ततोब्रह्मणेपूर्णपात्रदानम्॥अद्यकृतैतन्नारायणबलिकर्मांगतया विहितंप्रायश्चित्तहोमसांगतासिद्ध्यर्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदातुमहमुत्सृजे इतिसंकल्प्यदद्यात् ॥ ब्रह्मग्रंथिविमोकः ॥ ततो यथाशक्तिब्राह्मणान् आमान्नेन तन्निष्क्रयद्रव्येणवासंतोष्य अनेनकर्मांगदेवताः प्रीयंताम् इतिप्रार्थयेत् ॥ प्रायश्चित्तहोमविधेः परिपूर्णतास्तु ॥ अनेनप्रायश्चित्तांगहोमेनकृतेन अमुकगोत्रप्रेतस्य दुर्मरणदोषनिवृत्तिः सद्गतिप्राप्तिः ॥ इतिप्रायश्चित्तहोमः ॥ अथैकादशविष्णुश्राद्धानि ॥ तत्रादौपूर्वाभिमुखः उपविश्य पवित्रधारणंकृत्वा आचम्य एकादशघटान्संस्थाप्य विष्णुःशिवोयमश्चैवसोमश्चहव्यवाहनः ॥ कव्यश्चमृत्यूरुद्रश्चपुरुषश्चक्रमानिमान् ॥ प्रेतस्तुदशमःप्रोक्तोविष्णुरेकादशः

स्मृतः॥इत्येवैकादशप्रोक्ताः श्राद्धेस्मिन्नधिकारिणः॥ अपवित्रः पवित्रोवा० पुंडरीकाक्षायनमःइतिकुशत्रयजलेनश्राद्धीयद्रव्याण्यात्मानं चसिंचेत्॥ततोयवान्गृहीत्वा प्रथमचटे विष्णुश्राद्धेक्षणमुपतिष्ठताम्०॥ द्वितीयेशिवश्राद्धेक्षणमुपतिष्ठताम्०॥ तृतीयेयमश्राद्धे० चतुर्थे सोमराज० पंचमेहव्यवाहन० षष्ठेकव्यवाहन० सप्तमेमृत्यु० अष्टमेरुद्र० नवमेपुरुष० दशमेप्रेतश्राद्धे० एकादशेविष्णुश्राद्धेक्षणमुपतिष्ठताम् ॥ इतिसर्वत्रविकीर्य प्रथमंविष्णवे एतत्पाद्यंपादावनेजनंपादप्रक्षालनं०॥ एवंसर्वत्र एषवः पादार्घः॥ इदमत्रचंदनपुष्पम्॥इदमाचमनम् ॥ एवंचटपूजांकृत्वा आचमनम् ॥ यवगौरसर्षपैर्दिग्बंधः ॥ पूर्वेनारायणःपातुवारिजाक्षस्तुदक्षिणे॥प्रद्युम्नःपश्चिमेपातुवासुदेवस्तथोत्तरे॥ऊर्ध्वंगोवर्धनोरक्षेदधस्तात्त्रिविक्रमः ॥१॥ इति॥ततः कुशत्रययवजलान्यादाय देशकालौस्मृत्वा अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थमसद्गतिविनाशार्थं सद्गतिप्राप्त्यर्थं चतुःषष्टिदुर्मरणांतर्गतयत्किंचिद्दुर्मरणदोषनिवृत्त्यर्थं नारायणबलिकर्मांगभूतैकादशविष्णुश्राद्धानिविष्ण्वादिविष्णुपर्यंतानि एकोद्दिष्टविधिना एकतंत्रेणाहंकरिष्ये इतिसंकल्प्य एकादशचटेषु क्रमेण आसनदानम्॥प्रथम विष्णवे इदमासनम १द्वितीयंशिवाय इदमासनम् २एवंसर्वत्र॥यमायसपरिवाराय० ३सोमराजाय०४हव्यवाहनाय०५कव्यवाहनाय०६ मृत्यवे०७रुद्राय०८पुरुषाय०९(अपसव्येन)प्रेताय इदमासनमुपतिष्ठतां०१०(सव्येन)हस्तप्रक्षालनंसर्वत्र विष्णवेइदमासनम्॥११॥ततःएकादशार्घपात्रपूरणम्॥तेष्वेकैकंदर्भदलपवित्रम्॥अद्भ्योनमइत्युदकपूरणम्॥यवेभ्योनमइतियवप्रक्षेपः॥प्रेतपात्रेतिलेभ्योनमइतितिलान् तूष्णींचंदनपुष्पाणि एकादशार्घपात्राणाम् अर्घ्यार्चनविधेः परिपूर्णतास्तु इतिपठेत्॥ ततः अर्घपात्रस्थपवित्रं पलाशपत्रे धृत्वा अर्घपात्रमादाय अद्भ्योनमः इत्यभिमंत्र्य ॥ विष्णो एषतेऽर्घोनमः इतिदेवतीर्थेन पवित्रोपर्य्यर्घ्यजलंक्षिप्त्वासपवित्रमर्घपात्रं पुरतः स्थापयेत्॥ एवंसर्वत्र ॥ शिव० २ यमसपरिवार ३ सोमराज० ४ हव्यवाहन० ५ कव्यवाहन० ६ मृत्यो० ७ रुद्र० ८ पुरुष० ९

(अपसव्येन) अमुकगोत्र० प्रेत एषतेहस्तार्घोमयादीयतेतवोपतिष्ठतामिति० १० ततः (सव्यम्) हस्तप्रक्षालनं पुनः विष्णो एषतेऽर्घोनमः ११ अन्नपात्रन्युब्जीकरणंनार्घवंदनं तत्र एकादश घटेषु गंधपुष्पधूपदीपतांबूलवासांसिधृत्वा कुशत्रययवजलान्यादाय अद्येत्यादिपठित्वा० एतानिगंधपुष्पधूपदीपतांबूलवासांसिविष्ण्वादि विष्णुपर्यंतेभ्यः प्रत्येकं एकतंत्रेणवा अक्षय्यमस्तु इत्युत्सृज्य ॥ अमीषामेकादशश्राद्धानामर्चनविधेः परिपूर्णतास्तु इतिप्रार्थयेत् ॥ आचमनम् ॥ ततः एकादशपात्रेषु आमान्नं निष्क्रयद्रव्यंवापृथक् परिविष्यमधुदत्त्वापात्रमालभ्य विष्णवेनमः इत्यंगुष्ठंनिवेश्ययवान्विकीर्यइदमन्नंसोपस्करंमद्दत्तममृतरूपंविष्णवेनमःइत्युत्सृजेत् १।एवं शिवाय० २ यमायसपरिवाराय० ३सोमराजाय० ४हव्यवाहनाय०५कव्यवाहनाय०६मृत्यवे०७रुद्राय०८पुरुषाय०९ (अपसव्येन) अमुकगोत्र०प्रेतइदमन्नंसोपस्करंतेमयादीयतेतवोपतिष्ठतामइत्युत्सृजेत् १०॥ततः (सव्येन) हस्तौप्रक्षाल्य विष्णवे० ११ अन्नमुत्सृजेत ॥ ततःपिण्डदानार्थं चतुरस्राः प्रादेशमात्रा एकादशवेदिकाः कृत्वासर्वत्रकुशानास्तीर्य ॥ अवनेजनपात्रेण प्रथमंविष्णोअवनेनिक्ष्वतेनमः इत्यवनेज्य एवं शिवादिभ्योपिक्रमेणदद्यात् ॥ ततःपिण्डदानम् ॥ तिलघृतमधुयुतेनान्नेन एकादशपिण्डान्कृत्वा ॥ एकंपिण्डंकुशादीन्यादाय विष्णो एषतेपिण्डोनमः इतिप्रथमस्थानेकुशोपरिदद्यात्॥ १एवंक्रमेण शिव० २ यमसपरिवार० ३ सोमराज०४हव्यवाहन०५ कव्यवाहन०६ मृत्यो०७ रुद्र० ८ पुरुष०९ (अपसव्येन) अमुकगोत्र० प्रेत एषते पिण्डोमयादीयतेतवोपतिष्ठतामितिपितृतीर्थेन दशमस्थानेकुशोपरिपिण्डंदद्यात ॥ १० ॥ ततः सव्येनाचम्य विष्णो एषतेपिण्डोनमः इत्येकादशंदद्यात् ॥ ततः हस्तौप्रक्षाल्य आचम्यविष्णुंस्मरेत् ॥ ततोऽवनेजनपात्रेण विष्णो अत्रप्रत्यवनेनिक्ष्वतेनमः इतिप्रथमपिण्डेप्रत्यवनेजनंदत्त्वाक्रमेणशिवादिभ्योदद्यात्। ततः सर्वत्रसूत्रचंदनपुष्पतुलसीशमीपत्रधूपदीपतांबूलपूगीफलादीनिदत्त्वा ॥ पिण्डानामर्चनविधेःपरिपूर्णतास्तु (अपसव्येन) एभि

रेकादशश्राद्धपिण्डैः अमुकगोत्रस्यप्रेतस्यसद्गतिः उत्तमलोकप्राप्तिः ॥ ततः (सव्येन) आचमनम् ॥ एकस्मिन्पत्रपुटे शिवाआपः संतु । इतिजलम् ॥ सौमनस्यमस्तु इतिपुष्पम् ॥ अक्षतंचारिष्टंचास्तु इतियवांश्चनिक्षिपेत् ॥ (अपसव्येन) सुप्रोक्षितजलेन पिण्डोपरि सिंचनम् ॥ अमुकगोत्रस्यप्रेतस्यसद्गतिः उत्तमलोकप्राप्तिः ॥ ततः (सव्येन) विष्णोः यद्दत्तमन्नपानादिकंतदुपतिष्ठतां यस्योद्दिष्टं तस्योपतिष्ठताम् ॥ एवंसर्वत्रशिवादीनांदद्यात् ॥ ततः पिण्डोपरि एकादशपवित्राणि समर्प्यएकादशपिण्डोपरिजलधाराःपयोधारावा अहमुत्सृजामीतिपठित्वा ताम्रपात्रेजलदुग्धसर्वौषधितिलयवतुलसीचंदनहिरण्यादिप्रक्षिप्यताम्रपात्रेण पिण्डोपरिपृथक्पृथक्नाममंत्रेण विष्णवेनमः १शिवायनमः२यमायसपरिवाराय०३सोमराजाय०४हव्यवाहनाय०५कव्यवाहनाय०६रुद्ररूपाय०७मृत्यवे०८पुरुषाय० ९प्रेताय१०विष्णवेनमः११इतिजलधारांदद्यात्॥ततःअनादिनिधनोदेवःशंखचक्रगदाधरः॥अक्षय्यः पुंडरीकाक्षःप्रेतमोक्षप्रदोभव॥११॥ अतसीपुष्पसंकाशं०।२॥कृष्णकृष्णकृपालोत्वमगतीनांगतिर्भव॥संसारार्णवमग्नानांप्रसीदपुरुषोत्तम३।नारायणसुरश्रेष्ठलक्ष्मीकान्तजनार्दन॥अनेनतर्पणेनाथ प्रेतमोक्षप्रदोभव॥४॥इतिप्रार्थयेत्॥ततोदक्षिणादानतावत्॥हिरण्यंवस्त्ररजते गुडाज्यंलवणंतथा ॥ लोहदंडस्तिलधान्यं महिषींचामरंददेत् ॥ एतानिएकादशदानानितन्मूल्यद्रव्यंवा।पुरतःसंस्थाप्य देशकालौस्मृत्वा अमुकगोत्रस्यप्रेतस्यदुर्मरणनिमित्तकनारायणबलिविहितैकादशश्राद्धसांगतासिद्ध्यर्थमिमानिहिरण्यादीन्येकादशदानानिविष्णवादिविष्णुपर्यंतानांप्रीतयेनानानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे इत्युत्सृज्य विष्णोःप्रसादादेकादशश्राद्धानांपरिपूर्णतास्तु ॥ (अपसव्यम्) एभिरेकादशश्राद्धैःकृतैरमुकप्रेतस्यप्रेतत्वनिवृत्तिःअसद्गतिविनाशःसद्गतिप्राप्तिः ॥ ततः (सव्येन) पिण्डानुत्थाप्यप्रवाह्य घटान्विसृज्य आचम्य

कर्मपूर्तिकामोविष्णुंस्मरेत् ॥ श्राद्धीयवस्तुब्राह्मणायदद्याज्जलेवाक्षिपेत् ॥ इत्येकादशश्राद्धपद्धतिः समाप्ता ॥ अथपंचश्राद्धप्रयोगः ॥
तत्रादौसव्येनाचमनं कर्मपात्रपूरणम्॥अपवित्रःपवित्रोवाइतिप्रोक्षणम्॥कुशत्रययवजलान्यादाय अद्य०नारायणबल्यंगभूतपंचदेवताश्रा
द्धान्येकतंत्रेणाहंकरिष्ये इत्युच्चार्य्य पंचघटान्स्थापयेत्॥ततःप्राङ्मुखःकुशोपग्रहःयवान्गृहीत्वा प्रथमब्रह्मश्राद्धेक्षणमुपतिष्ठताम् १ विष्णु
श्राद्धेक्षणम्०२ रुद्रश्राद्धेक्षणम्०३यमश्राद्धे०४तत्पुरुषश्राद्धेक्षणमुपतिष्ठताम्५इतिसर्वत्र विकीर्य ब्रह्मणेएतत्पाद्यंपादावनेजनंपादप्रक्षालनं
नमः एवंविष्णवादिभ्यः।ततःएषवःपादार्घःइदमत्रचंदनंपुष्पम् इदंवः आचमनम् इतिघटपूजांविधाय आचमनंकृत्वा यवगौरसर्षपान्गृहीत्वा
पूर्वेनारायणःपातु वारिजाक्षस्तुदक्षिणे।प्रद्युम्नःपश्चिमेपातु वासुदेवस्तथोत्तरे॥ऊर्ध्वंगोवर्धनोरक्षेदधस्ताच्चत्रिविक्रमः॥ १ ॥ इतिसर्वत्रविकी
र्य नीवीबंधंकुर्यात् ॥ ततः पंचश्राद्धोपहाराणांपवित्रतास्तु इति अन्नादिप्रोक्ष्य कुशत्रयादीन्यादाय देशकालौ स्मृत्वा (अपसव्यम्)
अमुकगोत्रस्यामुकप्रेतस्यसद्गतिप्राप्त्यर्थं नारायणबल्यंगभूतं पंचदेवताश्राद्धमहंकरिष्ये इतिसंकल्प्य (सव्येन) ब्रह्मणे इदमासनंनमः १
विष्णवे इदमासनंनमः २ रुद्रायइदं०३यमायइदं०४तत्पुरुषायइदं०५ इतिप्रत्येकंकुशत्रयं पूर्वाग्रमुत्सृजेत॥ततोहस्तप्रक्षालनम् अर्घपा
त्रपूरणम् ५ कुशपवित्रधारणम् ५ अग्नोनमः इत्युदकं यवेभ्योनमः इतियवान् तूष्णींगंधपुष्पाणिचक्षिपेत्॥ततः अर्घपात्राणामर्चन
विधेः परिपूर्णतास्तु इतिपठित्वा प्रथमपात्रस्थंपवित्रंपलाशपत्रेधृत्वा अग्नोनमः इत्यभिमंत्र्य ब्रह्मन्नेषतेहस्तार्घोनमः इतिदेवती
र्थेनपवित्रोपरि अर्घजलंदद्यात् ॥एवंसर्वत्र॥ ततः पूजनंगंधपुष्पधूपदीपतांबूलवासांसिप्रत्येकंधृत्वा अद्येत्यादिपठित्वा एतानिगंधपुष्प
धूपदीपतांबूलवासांसि ब्रह्मादितत्पुरुषेभ्यः प्रत्येकमक्षय्यमस्तु इत्युत्सृज्य अमीषांपंचश्राद्धानामर्चनविधेः परिपूर्णतास्तु इतिप्रा

र्थयेत ॥ आचमनम् ॥ ततः पंचपात्रेषु आमान्नंतन्निष्क्रयद्रव्यंवापृथक्पृथक् परिविष्य मधुदत्त्वा पात्रमालभ्य विष्णवेनमः इत्यंगुष्ठं निवेश्य यवान्विकीर्य इदमन्नं सोपस्करं मद्दत्तममृतरूपं ब्रह्मणेनमः इत्युत्सृजेत् १ ॥ एवं विष्णवे०२रुद्राय० ३ यमाय० ४ तत्पुरुषाय० ५ चोत्सृजेत्॥ततः पिंडदानार्थं पंचस्थानानिनिर्माय प्रत्येकंकुशत्रयमास्तीर्य॥अवनेजनपात्रेण ब्रह्मन् अत्रावनेनिक्ष्वतेनमः ॥ इतिप्रथमस्थाने अवनेज्य॥एवं विष्णु० २ शिव० ३ रुद्र० ४ तत्पुरुषेभ्योप्यवनेजनंक्रमेणदद्यात्॥ततः तिलघृतमधुयुतेनान्नेन पंच पिंडान्कृत्वा एकंपिंडं कुशत्रयादीन्यादाय ब्रह्मन् एषते पिण्डोनमः इतिप्रथमस्थाने कुशोपरिदद्यात् ॥ १ ॥ एवं क्रमेण विष्णवे ०२ रुद्राय० ३ यमाय० ४ तत्पुरुषाय० ५ चदद्यात् ॥ ततो हस्तप्रक्षालनमाचमनं विष्णुस्मरणंचकुर्यात्॥ततोऽवनेजनपात्रेण ब्रह्मन् अत्र प्रत्यवनेनिक्ष्वतेनमः इतिप्रथमपिण्डेप्रत्यवनेजनंदत्त्वाक्रमेणविष्ण्वादिभ्योदद्यात्।ततःसर्वेषुपिण्डेषु सूत्राच्छादनगंधपुष्पधूपदीपतांबूल पूगीफलादीनिदत्त्वा पिण्डार्चनविधेः परिपूर्णतास्तु इतिप्रार्थ्य एभिः पंचश्राद्धपिण्डैः (अपसव्यम्) अमुकगोत्र० प्रेतस्य सद्गति प्राप्तिःअसद्गतिविनाशः इतिपठेत्॥ततः (सव्येन) आचमनं सुप्रोक्षितादिकरणं शिवाआपःसंतु सौमनस्यमस्तु अक्षतंचारिष्टंचास्तु इति जलपुष्पाक्षतान्क्षिप्त्वा ॥ ब्रह्मणेयद्दत्तमन्नपानादिकं तदुपतिष्ठतामिति॥एवं विष्ण्वादीनाम् अक्षय्योदकंदद्यात्॥ततःपिण्डोपरि पवित्राणि समर्प्य ताम्रपात्रे जलदुग्धतिलसर्वौषधियवतुलसीहिरण्यादीनिप्रक्षिप्य तेनजलेन पिण्डोपरि पृथक्पृथक् नाममंत्रेण ब्रह्मणेनमः ब्रह्मन् इमांतेजलधारामुत्सृजामि इतिप्रथमपिण्डेजलधारांदद्यात्॥एवं विष्णुरुद्रयमतत्पुरुषपिण्डेषुक्रमेणदद्यात्॥ततः अनादिनिधनोदेवः० १ अतसीपुष्पसंकाशं० २ नारायणसुरश्रेष्ठ० ३ कृष्णकृष्णकृपालोत्वं० ४इतिप्रार्थ्य॥दक्षिणाद्रव्यंगृहीत्वा अद्यकृतैतत्पंचश्राद्धकर्मणःसां गतासिद्ध्यर्थमिमांदक्षिणां ब्रह्मादिप्रेतपर्यंतेभ्यः प्रत्येकमक्षय्यमस्त्वितिदद्यात्॥ततः पंचदानानि ॥ भूमिंसस्यवतींधेनुं सुवर्णंचक्रमात्ति

लान् ॥ वृषभंसहिरण्यंच पंचश्राद्धेषुदक्षिणा॥१॥ यथाशक्तिकुर्यात् ॥ ततः पंचघटदानम् ॥ अद्येत्यादिपठित्वा अमुकगोत्रस्य०प्रेतस्यप्रे
तत्वनिवृत्त्यर्थमुत्तमगतिप्राप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबल्यंगभूतब्रह्मकर्मणःसांगतासिद्ध्यर्थं ब्रह्मप्रसन्नतार्थमिमंतीर्थवारिपूरितंसफ
लंवस्त्रोपवीतान्नप्रतिमानालिकेरसहितं मृन्मयकलशंब्रह्मदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणायदातुमहमुत्सृजे ॥अनेनब्रह्माप्रीयताम्॥
एवं विष्णुरुद्रयमतत्पुरुषाणांप्रीतये क्रमेणोत्सृज्यदद्यात् ॥ ततः पंचश्राद्धपरिपूर्णतास्तु ॥ एभिः पंचश्राद्धैः कृतैः अमुकप्रे
तस्य सद्गतिप्राप्तिरसद्गतिविनाशः इतिपठेत् ॥ ततः पिण्डानुत्थाप्य प्रवाह्य घटान्विसृज्यदीपंनिर्वाप्य हस्तौपादौप्रक्षाल्या
चम्य कर्मपूर्त्तिकामोविष्णुंस्मरेत् ॥श्राद्धीयवस्तूनिब्राह्मणेभ्यःप्रतिपादयेज्जलेवाक्षिपेत ॥ ततोयथाशक्तिब्राह्मणान्दीनांधपंगुप्रभृतीं
श्चामान्नेननिष्क्रयद्रव्येणवासंतोष्य घृतेमुखावलोकनंकृत्वास्नानंकुर्यात ॥ इतिशूद्राणांनारायणबलिप्रयोगः ॥ अथनारायणबल्युपक
रणानि॥विष्णोः॥स्वर्णप्रतिमे २ ।रजतप्रतिमा १ ।ताम्रप्र० १ ।लोहप्र० १।सीसकप्र० १ ।स्वर्णशकलानि८ पंचरत्नानि५।चंदनम्।केशरम्।
कर्पूरम् । धूपः । दीपवर्त्तिकाः५० । पुष्पाणिविचित्राणि॥ तुलसीपत्राणि । बिल्वपत्राणि । दूर्वाः । नैवेद्यम्मोदकादि । तांबूलानि । पूगी
फलानि२५।ऋतुफलानि।एला।नालिकेरफलानि६।दुग्धम्।दधि।गोमूत्रम्।गोमयम्।मधु।यज्ञोपवीतानि५।रक्तसूत्रम्। कुंकुमम्।श्वेतवस्त्राणि
१५रक्तवस्त्रे२ ।पीतवस्त्रे२ । कृष्णवस्त्रे२। कौशेयम् । तंडुलाः । गोधूमाः । मुद्गाः माषाः।तिलाः । यवाः । मेवा । गुग्गुलुः । शर्करा । ताम्र
कलशः १ । मृन्मयकलशाः ५ । शरावाः ५० । पत्रपुटकानि५० । मृन्दयोपकुंभाः १० । सप्तमृत्तिकाः७।पंचपल्लवाः५।सर्वौषध्यः । गंगामृ
त्तिका।गंगोदकम्।सिंदूरम्।गौरसर्षपाः।समिधः।आज्यम्।गव्यम्।स्रुवा।प्रणीता १।प्रोक्षणी १।आज्यस्थाली १।चरुस्थाली १।पत्रावल्यः १०।
कार्पासम्।लवणम्।रजतम्।वस्त्रम्।गुडम्।तैलम्।धान्यम्।लोहदंडः१।महिषीमूल्यम्।धेनुमूल्यम्।चामरमूल्यम्।भूमिमूल्यम्।पलाशपत्राणि।

वृषभमूल्यम्।आमान्नम् १०।कुशाः।आसनानि४।ताम्रपात्रम् १ अर्घ्यपात्रम् १ आचमनपात्रम् १ वेष्टनार्थंवस्त्रम।गौरमृत्तिका।पूर्णपात्रम्। कांस्यपात्रम् १ कटोरिके२दक्षिणाद्रव्यम्।गीतापाठः।विष्णुसहस्रनामपाठः ॥ द्वादशाक्षरपंचाक्षराष्टाक्षरमंत्रजपाः।शमीपत्राणि। पेटिका १ लगुडम् १ शय्या सोपस्करा ॥ यवचूर्णप्रस्थानि ३ इत्याद्युपकरणानि ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अथ पंचकशांतिप्रयोगः ॥ तावत् मरणदिनकृत्यम् ॥ तत्रदर्भाणां पंचप्रतिमा मनुष्याकृतीः कृत्वा ऊर्णासूत्रेणावेष्टच्य यवपिष्टेनानुलिप्य स्थंडिलेपूर्वादिदिक्षुमध्येच संस्थापयेत् ॥ ततोदेशकालौस्मृत्वा (अपसव्येन) अमुकगोत्रस्य अमुकप्रेतस्य धनिष्ठादिपंचकमरणसूचित वंशारिष्टविनाशार्थं पंचकविधानंकरिष्ये इतिसंकल्प्य (सव्येन) प्रेतवाहायनमः प्रेतवाहमावाहयामि १ प्रेतसखाय० प्रेतसखं० २ प्रेतपाय० प्रेतपं० ३ प्रेतभूमिपाय० प्रेतभूमिपं० ४ प्रेतहर्त्रेन० प्रेतहर्त्तारं० ५ इत्यावाह्यसंस्थाप्य गंधपुष्पधूपदीपनैवेद्यतांबूलादिभिर्नाममंत्रेणपूजयेत्॥ततोगंधमाल्याद्यर्चितांप्रतिमांदाहसमयेप्रेतस्योपरिन्यसेत् ॥ प्रथमांशिरसि १ द्वितीयांदक्षिणकुक्षौ २ तृतीयां वामकुक्षौ ३ चतुर्थींनाभौ ४ पंचमींपादयोर्मध्ये ५ तदुपरिताभ्योनाममंत्रैर्घृताहुतीर्दत्त्वा ताभिः सहशवंविधिनादहेत् ॥ ततः सूतकान्प्रशांतिंकुर्यात् ॥ इतिपंचकमरणविधानम् ॥ अथशांतिप्रयोगः ॥ तत्रसूतकांतेतीर्थंगत्वा तत्रस्नात्वा अहतवस्त्रेपरिधाय स्वासनेप्राङ्मुख उपविश्य आचम्य कुशोपग्रहः तत्रशुद्धमृदामंडलंकृत्वा तत्रकलशपंचकं पूर्व-दक्षिण-पश्चिमोत्तरासु मध्येच क्रमेण पूर्वोक्तविधिनास्थापयित्वा तद्दक्षिणपार्श्वेगणेशनवग्रहंचतुर्दशयमानांस्थापनंकुर्य्यात् ॥ तद्यथा-देशकालौसंकीर्त्य (अपसव्येन) अमुकगोत्रस्यामुकप्रेतस्य पंचकजनितदुर्मरणदोषशांत्यर्थं (सव्यं) ममगृहे सपरिवारस्यायुरारोग्यसुखश्रीप्राप्त्यर्थं पंचकशांतिकर्माहंकरिष्ये इतिसंकल्प्य ॥ सुमुखश्चैकदंतश्चेत्यादिस्मरणपूर्वकगणेशनवग्रहान्संपूजयेत् ॥ ततः स्थापितकलशेषुगंगोदकसर्वौषधिदूर्वामृत्तिकापंचपल्लव

पूगफलपंचरत्नादीनिनिक्षिप्य वस्त्रवेष्टनं धान्यसमर्पणंचकृत्वा तदुपरि पंचनक्षत्रदेवतानांप्रतिमाःस्वर्णमयीःस्थापयेत ॥ अथावाहनंपूजनंच ॥ पूर्वदिशिदुग्धजलपूरिते कलशेवस्त्रवेष्टितायांस्वर्णप्रतिमायां वसून्० ॥ वसुभ्योनमः वसून् आवाहयामि स्थापयामि॥१॥ इतिस्थापयेत् ॥ दक्षिणे दध्युदकपूरिते०वरुणं०वरुणायनमःवरुणमावाहयामिस्थापयामि॥२॥इतिस्थापयेत्॥पश्चिमे घृतोदकपूरितेकलशे अजैकपादम् ॥ अजैकपादायनमः अजैकपादमावाहयामिस्थापयामि॥३॥इतिस्थापयेत् ॥ उत्तरे गोमयोदकपूरि तेकलशे अहिर्बुध्न्यम्॥ अहिर्बुध्न्यायनमः अहिर्बुध्न्यमावाहयामिस्थापयामि॥४॥इति स्थापयेत्॥मध्यस्थेगोमूत्रोदकपूरितेकलशेपूष णं पूष्णेनमः पूषणमावाहयामिस्थापयामि ॥ ५ ॥ इतिस्थापयेत् ॥ इत्यावाह्यवस्वादयोदेवाः सुप्रतिष्ठिताभवन्तु इति प्रतिष्ठाप्य आ वाहनमंत्रैः षोडशोपचारैः प्रत्येकंपूजयेत् ॥ अनेनपूजनेनवस्वादयोदेवाःप्रीयंतामितिपठित्वाचतुर्दशयमानांस्थापनंकुर्यात ॥ तद्यथा— यमायमनः यममावाहयामिस्थापयामि ॥ १ ॥ एवं सर्वत्र ॥ धर्मराजाय०धर्मराजम्०२ मृत्यवे०मृत्युम्०३अंतकायनमः अंतकम्० ४ वैवस्वताय० ५ कालाय० ६ सर्वभूतक्षयाय० ७ औदुंबराय० ८ दध्नाय० ९ नीलाय० १० परमेष्ठिने० ११ वृकोदराय० १२ चि त्राय० १३ चित्रगुप्तायनमः चित्रगुप्तमावाहयामिस्थापयामि १४ इत्यावाह्यपुष्पाणि विकीर्य चतुर्दशयमेभ्योनमः इतिषोडशोपचारैः पू जयेत् ॥ अथाग्निस्थापनम् ॥ होता हस्तमात्रंचतुरस्रंस्थंडिलंकृत्वाकुशैः परिसमुह्यतानैशान्यांपरित्यज्य गोमयोदकेनोपलिप्यस्रुवमूलेन मध्येप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्यअनामिकांगुष्ठाभ्यांमृदमुद्धृत्य ऐशान्यांक्षिप्त्वातंदेशंजलेनाभ्युक्ष्यतूष्णींकांस्यपात्रस्थम ग्निंस्थापयेत् ॥ ततोदक्षिणतोब्रह्मासनादिचरुश्रपणाग्निपर्युक्षणांतंकर्मकृत्वा आज्येनजुहुयात ॥ ब्राह्मणद्वाराहोमः ॥ प्रजापतयेस्वाहा इदं० १ इंद्राय० इंदम्० २ अग्नये० इदम्० ३ सोमाय० इदं० ४ इत्याघारावाज्यभागौहुत्वा अग्निंसंपूज्य गणपतिनवग्रहेभ्यश्चरुहोमंकु

यांत्॥ ततः वस्वादिपंचप्रधानदेवानांप्रत्येकं समिच्चरुतिलाज्यादिद्रव्यैरष्टोत्तरशतमष्टाविंशतिमष्टौवाहुतीर्जुहुयात् ॥ तत्रमंत्राः॥ वसुभ्यः स्वाहा इदं० १०८ वरुणायस्वाहाइदं० १०८ अजैकपदेस्वाहाइदम्० अहिर्बुध्न्यायस्वाहा इदम्० १०८ पूष्णेस्वाहा इदं० १०८ इति ॥ यमायस्वाहा इदं० ८ धर्मराजाय० इदं० ८ मृत्यवे० इदं० ८ अंतकाय० इदम्० ८ वैवस्वताय० इदं०८कालाय०इदं०८सर्वक्षयाय०८औदुंबराय० ८ दध्नाय० ८ नीलाय० ८ परमेष्ठिने० ८ वृकोदराय० ८ चित्राय० इदं० ८ चित्रगुप्ताय० इदं ८ इतितिलहोमंकृत्वा ॥ चरुणा अग्नयेस्विष्टकृतेस्वाहा इदं० इतिस्विष्टकृद्धोमंकुर्यात् ॥ ततः आज्येन अग्नये० इदं० १ वायवे० इदं० २ सूर्याय० इदं० ३ अग्निवायुसूर्येभ्य० इदम्० ४ अग्नीवरुणाभ्यां० ५ अग्नये०इदम्० ६ वणादिभ्यः० ७ इदमु० ७ वरुणादय० इदं० ८ प्रजापतये० इदं० ९ इतिनवाहुतीर्हुत्वास्थंडिलंपरितोदिक्पालेभ्योमाषभक्तबलीन्दद्यात् ॥ अथपूर्णाहुतिः ॥ मृडाग्नयेस्वाहा इदंमृडाग्नयेनमम—इतिपूर्णाहुतिंहुत्वास्तरणक्रमेणबर्हिर्हुत्वा‍प्याज्येनाभिघार्य्य अग्नये० इदमु० इतिहस्तेनैवजुहुयात्॥ ततोभस्मवंदनं संस्रवप्राशनमाचनंमचकृत्वाप्रणीताजलेनशिरः संमृज्यपवित्रे अग्नौप्रक्षिप्य ऐशान्यांप्रणीतांन्युब्जीकुर्यात्॥ततोब्रह्मणेपूर्णपात्रदानं ब्रह्मग्रंथिविमोकश्च ॥ ततःपंचमूर्त्तिदानम्॥ अद्येत्यादिपठित्वाअमुकप्रेतस्यपंचकमृत्युदोषपरिहारद्वारापुत्रादीनांसर्वारिष्टनिवृत्त्यर्थमिमांस्वर्णमयीं धनिष्ठाप्रतिमांवसुदैवतांसतिलान्नांसघटांसोपस्करामसुकगोत्रायामुकशर्मणेब्राह्मणायदातुमहमुत्सृजेइतिसंकल्प्यदद्यात्॥ १ ॥ एवंद्वितीयांवरुणदैवतांसमाषान्नां०॥२॥तृतीयामजैकपाददैवतांससर्षपान्नां०।३।चतुर्थीमहिर्बुध्न्यदेवतांसमुद्गान्नां०।४।पंचमींपूषदेवतांससप्तधान्यां ॥ ५ ॥ इति ॥ ततः षड्ब्राह्मणभोजनसंकल्पः॥ततः पंचकलशोदकेनयजमानस्यसपरिवारस्याभिषेकः ॥ ततः पंचदानानि ॥ पयस्विनींगाम् १ महिषीम् २ सप्तधान्यम्।३।सहिरण्यंकृष्णवस्त्रातिलदानम्।४।सहिरण्यघृतम्।५।इतिदत्वाकर्मकारयित्रेदक्षिणांदद्यात्॥ ततोदेवताः

अग्निंच विसृज्यब्राह्मणेभ्योभूयसींदक्षिणांदत्त्वा अनेनपंचकशांतिकर्मणा (अपसव्यं) अमुक०प्रेतस्य पंचकजनितदुर्मरणदोषनिवृ
त्तिः (सव्यं) ममगृहेसकलदुरितोपशांतिरस्तु इतिपठेत्॥ततःकर्मपूर्त्तिकामोविष्णुंस्मृत्वा शांत्युपकरणानि ब्राह्मणेभ्योदत्त्वा घृतेमुखावलो
कनं कृत्वास्नायात्॥इतिपंचकशांतिप्रयोगः॥ अथग्रंथाऽलंकारोग्रन्थकर्तृणामुभयकुलवर्णनं च ॥ देशेविशाले हि मरौ बभूवबीकोजिनामा
नृपतिः पुरा हि॥तस्यैव नाम्ना खलु राजधानी लोके बिकानेर इति प्रसिद्धा॥१॥तच्छास्ता राजनीतिज्ञो गङ्गासिंहो महीपतिः॥विद्वा
ञ्छूरो हि धर्मात्मा गोविप्रप्रतिपालकः ॥२॥ यस्य प्रीतिरभूद्रम्या गोरुण्डे सप्तमे नृपे॥नृपाणां भारतीयानां प्राप्तोच्चा पदपद्धतिः॥३॥
तस्यैव राज्येऽतिमनोहरे पुरे श्रीरत्नदुर्गे नृपदुर्गमे शुभे॥विद्यासदाचारयुतैश्च सद्भिर्जैर्वैश्यैर्धनाढ्यैर्बहुभिश्च मण्डिते॥४॥आसीद्वसिष्ठा
न्वयगौडविप्रो माध्यन्दिनीयो बुधजीवराजः॥विवृद्धमानो विदुषां समाजे सुज्ञैर्नरैः सर्वसमृद्धिभाक्सः॥५॥तस्यात्मजा बाणमितास्तु
सद्गुणाः सुवेदविद्याध्ययने च नैपुणाः ॥ आयातयातद्विजशुद्धप्राङ्गणा वीर्येण संताडितवैरिदुर्गणाः ॥६॥ एतेषु मुख्यः किलरामकृष्णो
ज्ञानेन स्वल्पीकृतसर्वतृष्णः ॥ स्वबुद्धितः खण्डितवैरिप्रश्नः सुभक्तिसंतर्पितदेवकृष्णः ॥७॥ तस्याऽभवन्नाममिताःसुपुत्राःस्वधर्मरक्ताः
सुकलत्रमित्राः । गृहेषु संलेखितरम्यचित्राः श्रीकान्तपूजानिरताः पवित्राः ॥८॥ इमानि नामानि भवन्ति तेषां चतुर्भुजाख्यो विबुधो
ऽग्रजातः ॥ कस्तूरिचन्द्राभिधसज्जनोऽन्योऽपरो गुणी ज्येष्ठमुखस्तु रामः॥९॥तत्रापि मध्या निजवंशपालकाः कस्तूरिचन्द्राख्यमहत्सु
सत्कृताः ॥ तेषां सुपुत्रावनवन्द्यवन्दितावास्तां किल द्वौ नितरां धरातले ॥१०॥ चातुर्थिलालाख्यगुरूमुखाख्यौसुज्ञौगुणाढ्यौ निजध
र्मरक्तौ ॥ ज्येष्ठस्तयोर्वै खलु पण्डिताग्र्यः श्रीशम्भुपादाब्जविलग्नचित्तः॥११॥षट्शास्त्रवेत्ता श्रुतिकर्मरक्तः परोपकारी सुनिबन्धकर्त्ता॥
दाता मनस्वी द्विजदेवभक्तो हुतावशिष्टान्नसदानुरक्तः॥१२॥यत्प्रसूर्हरबाईति पिता कस्तूरिचन्द्रकः॥मातामहश्च श्रीरामो मातुलो विष्णु

दत्तकः ॥ १३ ॥ सूत्रं कात्यायनं यस्य शाखा माध्यन्दिनी किल ॥ श्रीवसिष्ठकुलं वित्तं स चतुर्थाख्यपण्डितः॥१४॥ एतादृशो गौड कुले शताब्द्यां निबन्धकर्त्ता न बभूव कश्चित्॥द्विःषण्णिबन्धा रचिता हि येन शिवस्य साम्बस्य वरप्रसादात्॥१५॥शान्तिप्रतिष्ठश्राद्धानां ज्योतिषोत्सर्गकर्मणाम् ॥ अनुष्ठानविधेश्चापि संस्काराणां विधेस्तथा॥१६॥प्रायश्चितेश्च शुद्धेश्च वैद्यकोद्यापनस्य च ॥ तथा सद्धर्मणां ग्रन्था रचिता द्वादश त्विमे॥१७॥ग्रन्थस्तृतीयस्तत्रायं पूर्णतामगमच्छुभः॥अनेन प्रीयतां शम्भुर्भवान्या सह सर्वदा॥१८॥ स्वस्ति श्रीमान्महाराजो भूपालिवरहीरकः॥ चिरंजीयात्सतां मान्यो गङ्गासिंहो महीपतिः॥१९॥धनवृद्धिर्धर्मवृद्धिः प्रजावृद्धिः सुखप्रदा ॥ आयुर्वृद्धिश्च भूयाद्वै महाराजस्य सन्ततम्॥२०॥श्रीमत्प्रभुप्रतापेन गोव्याघ्रादिगणोऽखिलः॥युगपच्चैकदेशे हि जलं पास्यति निर्भयः॥२१॥सर्वाः प्रजा प्रजायन्ते सुखिनः खलु राजनि॥श्रीमति शासति राज्यं विद्यावृद्धिर्भविष्यति ॥२२॥ इति श्रीमन्महाराजाधिराजराजराजेन्द्रक्षत्रियकुलाकमरुदेशाधिपतिश्रीगङ्गासिंहवर्म्मबीकानेरराज्यान्तर्गतश्रीरत्नगढनिवासिना गौडवंशावतंसवासिष्ठगोत्रोद्भवपण्डितश्रीरामकृष्णपौत्रेण श्रीकस्तूरिचन्द्रात्मजेन श्रीमहादेवभक्तनानानिबधकर्त्रा पण्डितश्रीचतुर्थीलालशर्म्मणा विरचिते चातुर्थीलालभास्करेमहानिबन्धे गौडीयश्राद्धप्रकाशे तृतीये ग्रन्थे शूद्रश्राद्धविधानप्रकरणं समाप्तम् ॥७॥ ॥ समाप्तोऽयं ग्रन्थः ॥छ॥

१—२ उभयत्र भेदेवेतिह्रस्वत्वम् ।

श्रीगणेशाय नमः॥ अथ पर्णनरदाहविधानम्—बृहद्गारुडे—अस्थीनि चेन्न लभ्यन्ते प्रोषितस्य नरस्य च॥तेषां च हि गतिस्थानं विधानं कथयाम्यहम् ॥१॥ पश्चात्पुत्तलकं कार्य्यं सर्वौषधिसमन्वितम् ॥ पलाशस्य च वृन्तानां विभागं शृणु काश्यप ॥ २ ॥ कृष्णाजिनं समास्तीर्ण कुशैश्च पुरुषाकृतिम् ॥ शतत्रयषष्टियुत वृन्तैः प्रोक्तोऽस्थिसञ्चयः ॥ ३ ॥ विन्यस्य तानि वृन्तानि अङ्गेष्वेषु पृथक्पृथक् ॥ चत्वारिंशच्छिरोभागे ग्रीवायां दश विन्यसेत् ॥ ४ ॥ विंशत्युरःस्थले दद्याद्विंशतिर्जठरे तथा ॥ बाहुद्वये शतं दद्यात्कटिदेशे च विंशतिम् ॥ ५ ॥ ऊरुद्वये शतं चापि त्रिंशज्जंघाद्वये न्यसेत् ॥ दद्याच्चतुष्टयं शिश्ने षड् दद्याद्वृषणद्वये ॥ ६ ॥ दशपादांगुलीभागे एवमस्थीनि विन्यसेत् ॥ नारिकेलं शिरःस्थाने तुम्बं दद्याच्च तालुके ॥ ७ ॥ पञ्चरत्नं मुखे दद्याज्जिह्वायां कदलीफलम् ॥ अन्त्रेषु नालिकं दद्याद्वालुकां घ्राणमेव च ॥८॥ वसायां मृत्तिकां दद्याद्धरितालमनःशिलाः ॥ पारदं रेतसःस्थाने पुरीषे पित्तलं तथा ॥९॥ मनःशिला तथा गात्रे तिलकल्कं तु संधिषु ॥ यवपिष्टं तथा मांसे मधु शोणितमेव च ॥ १० ॥ केशेषु च जटाजूटं त्वचायां च मृगत्वचम् ॥ कर्णयोस्तालपत्रं च स्तनयोश्चैव गुञ्जिका ॥ ११ ॥ नासायां शतपत्रं च कमलं नाभिमण्डले ॥ वृन्ताकं वृषणद्वंद्वे लिङ्गे स्याद्गृंजनं शुभम् ॥१२॥ घृतं नाभ्यां प्रदेयं स्यात्कौपीने च त्रपुः स्मृतम् ॥ मौक्तिकं स्तनयोर्मूर्ध्नि कुंकुमेन विलेपनम् ॥ १३ ॥ कर्पूराऽगुरुधूपैश्च शुभैर्माल्यैः सुगंधिभिः ॥ परिधानं पट्टसूत्रं हृदये दीपकं न्यसेत् ॥ १४ ॥ ऋद्धिवृद्धी भुजौ द्वौ च चक्षुर्भ्यां च कपर्दकम् ॥ दन्तेषु दाडिमीबीजान्यङ्गुलीषु च चम्पकम् ॥१५ ॥ सिन्दूरं नेत्रकोणे च ताम्बूलाद्युपहारकम् ॥ सर्वौषधियुतं प्रेतं कृत्वा पूजां यथोदिताम् ॥ १६ ॥ साग्निके चापि विधिना यज्ञपात्रं न्यसेत्क्रमात् ॥ श्रियः पुनन्तु

मे शिर इमं मे वरुणेन च ॥१७॥ प्रेतस्य पावनं कृत्वा शालग्रामशिलोदकैः॥विष्णुमुद्दिश्य दातव्या सुशीलागौः पयस्विनी ॥१८॥ तिला लौहं हिरण्यं च कार्प्पासं लवणं तथा ॥ सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतम् ॥ १९ ॥ तिलपात्रं ततो दद्याद् पददानं तथैव च ॥ कर्तव्यं वैष्णवं श्राद्धं प्रेतमुक्त्यर्थमात्मनः ॥२०॥ प्रेतमोक्ष ततः कुर्य्याद्धृदि विष्णुं प्रकल्प्य च ॥ एवं पुत्तलकं कृत्वा दाहयेद्विधिपूर्वकम् ॥२१॥ तच्छुद्धये तु संस्कर्ता पुत्रादिर्निष्कृतिं चरेत् ॥ त्रीन्कृच्छ्रान्षड्द्वादश च तथा पंच दशापि च ॥ २२ ॥ प्रायश्चित्तनिमित्तानुसारेण विधिवत्स्मृतः ॥ अशक्तौ गोहिरण्यादिप्रत्याम्नायं चरेदपि ॥ २३ ॥ आत्मनोऽनधिकारित्वे शुद्धिमेवं चरेद्बुधः ॥ अशुद्धेन तु यद्दत्तमुद्दिश्याशुद्धिमेव च ॥ २४ ॥ नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥ शुद्धिं सम्पाद्य कर्तव्यं दहनाद्यौर्ध्वदेहिकम् ॥ २५ ॥ अकृत्वा निष्कृतिं यस्तु कुरुते दहनादिकम् ॥ मतिपूर्व्वममत्या च क्रमात्तन्निष्कृतिं शृणु ॥२६॥ कृत्वाग्निमुदके स्नानं स्पर्शनं वहनं कथाम् ॥ रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुद्ध्यति ॥ २७ ॥ एषामन्यतमं प्रेतं यो वहेत दहेत वा ॥ कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत् ॥२८॥ निमित्ते लघुनि स्वल्पं महन्महति कल्पयेत् ॥ मया तेऽयं समाख्यातो दुर्मृतस्य विधिः खग ॥२९॥ तदा मृतं विजानीयाद्दीपनिर्वाणमागतः ॥ अग्निदाहं ततः कुर्य्यात् सूतक च दिनत्रयम् ॥३०॥ दशाहं गर्त्तपिंडं च कर्त्तव्यं प्रेतपूर्वकम् ॥ एवं विधिं ततः कुर्य्यात्ततः प्रेतश्च मुक्तिभाक् ॥ ३१ ॥ मतिभ्रांत्या प्रतिकृतेः कृते दाहे स वै यदि ॥ आयाति तेन कर्त्तव्यमज्जनं घृतकुंडके ॥ ३२ ॥ जातकर्म्मादिसंस्काराः कर्त्तव्याः पुनरेव तु ॥ ऊढामेव स्वकां भार्य्यांमुद्वहेद्विधिवत्पुमान् ॥ ३३ ॥ वर्षे पंचदशे पक्षिन् द्वादशे वा गते सति ॥ अज्ञातस्य प्रोषितस्य कृत्वा प्रतिकृतिं दहेत् ॥ ३४ ॥

आश्वलायनगृह्यसूत्रेपि ॥ अस्थिनाशे पलाशवृंतानां त्रीणि षष्टिशतानि च । पुरुषप्रतिकृतिं कृत्वाऽशीत्यूर्ध्वं तु शिरसि । ग्रीवायां दश योजयेत् । उरसि त्रिशतं दद्याद्विंशतिं जठरे तथा । बाहुभ्यां च शतं दद्याद् दद्यादंगुलिभिर्दश । दशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव च । ऊरुभ्यां च शतं दद्यात्त्रिंशतं जानुजंघयोः । पादांगुलीषु च दश एतत्प्रेतस्य लक्षणम्॥ ऊर्णासूत्रेण संवेष्टच यवपिष्टेन लेपयेत् ॥ वायुपुराणे–कृष्णपक्षे पंचदश्यामष्टम्यां वा समाहितः । एकादश्यां विशेषेण ततः प्रभृति सूतकम् । त्रिरात्रं सर्ववर्णानामेष धर्मो व्यवस्थितः ॥ शुद्धितत्त्वे–पर्णनरं दहेन्नैव प्राक् त्रिपक्षात्कथंचन । पितृहा मातृहाष्टम्यां नैव दर्शे दहेद्यदि । आशौचाभ्यंतरे यदि दाहं न कुर्यात्तदा मरणदिनावधि त्रिपक्षानंतरम् अमावास्यायां कृष्णाष्टम्यामेकादश्यां वा दाहः कार्य्यः। इति पर्णनरदाहविधानम्॥

अथ पर्णनरदाहप्रयोगः॥त्रिपक्षादनंतरममावास्यायांकृष्णाष्टम्यामेकादश्यां वा तीर्थादौ गत्वा यथाविधि स्नानं कृत्वा संध्यादिनित्यावश्यकं विधाय विष्णुंषोडशोपचारैःसंपूज्यविदेशमरणजन्यदोषपरिहारार्थमष्टौकृच्छ्रान्प्रायश्चित्तत्वेनकुर्य्यात्।तद्यथा।देशकालौसंकीर्त्य अमुकस्य विदेशमरणजन्यप्रत्यवायपरिहारार्थमष्टौ कृच्छ्रान् अमुकप्रत्याम्नायेनाऽहमाचरिष्येइति संकल्प्य तदार्नीमेवब्राह्मणेभ्योयथाशक्तिप्रत्याम्नायद्रव्यं दद्यात् ॥ असंभवे संकल्पमात्रं कृत्वा अन्यत्कुर्यात्। पुनर्देशकालौस्मृत्वा।अमुकस्यदेशांतरमृतस्यएवदाहार्थंपर्णवृंतादिभिर्नराकृतिं करिष्ये,इति संकल्प्य।शुद्धायां भूमौ कृष्णमृगचर्मास्तीर्य तदुपर्य्येकं शिरो दक्षिणोत्तरायतं निधाय तदुपरि पलाशवृंतानि तदभावे शरवृंतानि न्यसेत् । तद्यथा चत्वारिंशच्छिरसि४०,दश ग्रीवायां१०,त्रिंशतमुरसि३०,विंशतिं जठरे२०,बाहुद्वयेशतम् १००,दश हस्तांगुलीषु १०,पंच वृषणयोः५,चत्वारि लिंगे ४,ऊरुद्वये शतम् १००,जानुजंघयोः त्रिंशत् ३०,दश पादांगुलीषु च१०,

दद्यात्।एवं षष्ट्यधिक३६० शतत्रयमितैः शरपर्णैः शरीरं निर्माय ऊर्णासूत्रेण शरेण सह बद्ध्वा जलालोडितयवपिष्टेनअनुलिम्पेत्।ततः शक्तौ सत्यां वक्ष्यमाणान्यन्यान्यपि तत्तदंगेषु कार्याणि। शिरसि नारिकेलम्। तालुस्थाने वर्तुलं तुंबीफलम्।मुखेपंचरत्नम्।जिह्वायां कदलीफलम्। दंतेषु दाडिमबीजानि। कर्णयोस्तालपत्रे। नेत्रयोः कपर्दकौ।नेत्रकोणेषु सिंदूरम्। नासिकायां तिलपुष्पे वालुकां वा॥ स्तनयोर्गुंजाद्वयम्। नाभिमंडले कमलम्। आम्रफलं वा। वृषणयोर्वृंताकद्वयम्। लिंगे गृंजनम्।नाभौ घृतम्।अंत्रेषु नालिकाम्।भुजद्वये ऋद्धिवृद्धी।अगुलीषु चम्पकम्।वाते मनःशिलाम्।पित्ते हरितालम्।कफेसमुद्रफेनम्।रुधिरे मधु।पुरीषे गोमयम्।मूत्रे गोमूत्रम्।केशेषुजटा-जूटम्। त्वचायां मृगत्वचम्।गात्रे मनःशिलां लेपयेत्। लोमसिऊर्णासूत्राणि।मांसस्थाने यवपिष्टम्।रेतसि पारदम्।कौपीनेत्रपु।मूर्ध्नि कुंकुमेन विलेपनम्। परिधाने पट्टसूत्रम्। उपहारे तांबूलम्। एवं सुशोभितं कृत्वा पंचगव्येन पंचाऽमृतेन च स्वस्वमंत्रेण प्रोक्षणं कुर्य्यात्॥ तद्यथा। गायत्र्या गोमूत्रेण मानस्तोके०इति गोमयेन आप्यायस्वेति दुग्धेन दधिक्राव्णो इति दध्ना तेजोसीत्याज्येन च प्रोक्षयेत्।पुनः पयः पृथिव्यामिति गोदुग्धेन। दधिक्राव्णो इतिदध्ना। घृतं घृत० इति घृतेन। मधुवाता इति मधुना। अपाठ०रससुद्वयेति शर्करोदकेन च स्नापयेत्। ततः आपोहिष्ठेति तिसृभिः। वरुणस्योत्तं० तत्त्वायामि० इमम्मेवरुण०इत्यादिवारुणमंत्रैः कुशोदकेन प्रोक्ष्यअहतंवस्त्रं परिधापयेत्।यज्ञोपवीतद्वयं मंत्रेणपरिधापयेत्।ततो गंधपुष्पमालादिभिः कर्पूराऽगरुसुधूपैश्च तंभूषयित्वा मंत्रेणप्राणप्रवेशंभावयेत्। ॐ प्राणाः शिशुर्महीनां० १ इति मन्त्रं पठित्वा।ॐयन्मेयमं वैवस्वतम्० इति स्पृष्ट्वा जपेत् ।ॐ अयं स देवदत्त इति तमभिमृश्य। उशन्नाग्निश्चेन्मृताधानवदग्निं श्रौतं स्मार्तं चोत्पाद्य। अयमस्यावसथ्याग्निरयमस्यश्रौताग्निरिति वदेत्। ततः। शालग्रामशिलोदकेन

॥२६६॥

गंगोदकेन च संप्रोक्ष्य वैतरण्यादिदानम्। अष्टौ महादानानि च दत्त्वा समाचारात्तस्य नाभिदेशे घृतदीपमदीर्घकालावस्थायिनं न्यस्य दीपस्य नाशे तस्य प्राणस्योत्क्रांतिर्ज्ञातव्या । ततो दाहविधिना पुत्तलं दग्ध्वा स्वशुद्ध्यर्थं त्रीन् षट् द्वादश पञ्चदश वा कृच्छ्रान् प्रायश्चित्तानुसारेण गोहिरण्यादिप्रत्याम्नायद्वारा संपाद्य दशगात्राद्यौर्ध्वदेहिकं सर्वं कुर्यात्। एवं कृते प्रेतस्य मुक्तिर्भवति इति पर्णनरदाहप्रयोगः ॥ अथ त्रिपिंडीश्राद्धविधानम्॥स्कंदपुराणे—नारद उवाच ॥ देवदेव महादेव त्रैलोक्यस्याघनाशन॥प्रेतपीडा-भिभूतानां कथं मुक्तिर्वद प्रभो ॥१॥ श्रीविष्णुरुवाच ॥ बाला युवानो वृद्धाश्च कुले यस्य मृता ननु॥लुप्तपिण्डा लुप्ततोयाःस्नानं धर्मं विना मृताः ॥२॥ खट्वायां दुष्टसंस्पृष्टा ये मृता वंदिवेश्मनि ॥ विना मंत्राग्निना दग्धा येऽपमृत्युवशं गताः॥३॥शूद्रान्नसेविनो ये च तत्कलत्रापहारिणः ॥ परदाररता ये च परद्रव्यापहारकाः ॥४॥ वेदशास्त्रविहीनाश्च तथा ये वेदनिंदकाः ॥ आत्माभिमानिनो ये च परपीडापरायणाः ॥५॥ एवं नानाविधा विप्राः प्रेत्य प्रेता भवंति ते ॥ स्त्रियश्च पुरुषाश्चैव इहैवाप्यन्यजन्मनि ॥६॥ कुले ग्रामे वने गेहे पीडां कुर्वंति ते च वै ॥ कलहो यत्र नित्यं हि मलिनत्वं दरिद्रता ॥७॥ दैन्यं विपर्य्ययमृतिः सा पीडा प्रेतसंभवा॥ राजचौराग्नि दुष्टश्च ह्रियते यद्धनं वने ॥८॥ पापकर्मरतंवित्तं सा पीडा प्रेतसंभवा॥आत्मधर्मविहीनो यः परधर्मरतो भवेत्॥ परगेहनिवासश्च सा पीडा प्रेतसंभवा।९।परस्त्रीषु परस्वेषु परद्रोहेषु ये रताः॥परवृत्तिं हि चेच्छंति सा पीडा प्रेतसंभवा।१०। पुत्रद्वेषःपितुर्द्वेषस्तथा द्वेषस्तु बंधुषु। नानाजातिषु यो द्वेषः सा पीडा प्रेतसंभवा ॥११॥ एवं नानाविधाः पीडाः प्रेताः कुर्वंति जंतुषु॥तेषां पीडाविनाशार्थं त्रिपिण्डीश्राद्ध माचरेत् ॥ १२ ॥ तीर्थे देवालये नद्याः संगमे चाश्रमे तथा ॥ तडागेऽश्वत्थमूले वा त्रिपिण्डीश्राद्धमिष्यते ॥१३॥ अदैवं श्राद्धमे

वृद्धि विप्राभावे वटुत्रयम्॥दर्भाणां तत्र बालस्तु युवानः स्थविरास्तथा ॥१४॥ अनादिष्टसुगोत्रं तु प्रेतश्राद्धे प्रपूजयेत ॥ यवपिष्टैः
पायसेन तिलैः पिण्डत्रयं त्यजेत् ॥१५॥ देशकालादिकं स्मृत्वा विष्णुपूजां समाचरेत्॥पौरुषेण तु सूक्तेन विष्णुमंत्रेण वा सुतम्॥
॥१६॥ स्थाप्य रम्यं तु कलशं सर्वोपस्करसंयुतम् ॥ प्रतिपूज्य महाविष्णुं बद्ध्वा चैव वटुत्रयम् ॥१७॥ कलशेषु तिथौ चैतं मंत्रराज
मुदीरयेत्॥इमं लोकं परित्यज्य गतोऽसि परमां गतिम् ॥१८॥ मनसा वायुरूपेण कुशे त्वां योजयाम्यहम् ॥ दत्त्वा पिंडत्रयं विप्रं
प्रतिपूज्य यथाक्रमम् ॥ १९ ॥ गोदानं भूमिदानं च तिलदानं तथैव च॥ हिरण्यसर्पिर्दानं च वस्त्रदानं गुडस्य तु ॥२०॥ रौप्यदानं
लवणकं दश दानानि भागशः ॥ दत्त्वा तानि महाबाहो विष्णुतर्पणमाचरेत् ॥ २१ ॥ शंखोदकेन पयसा मिश्रेण तु तिलैः
सह ॥ सूक्तेन पौरुषेणाथ मंत्रैरन्यतमैः शुभैः ॥ २२ ॥ ततस्तु प्रार्थयेद्देवं शंखचक्रगदाधरम्॥हृषीकेशं जगन्नाथं पुंडरीकायतेक्षणम्
॥ २३ ॥ त्वया संरक्षिता देवा दैत्यभीतेर्जनार्दन ॥ तथा मां प्रेतपीडाभ्यो रक्षस्व शरणागतम्॥ २४ ॥ ततो विसर्जनं कृत्वा वटूनां
कलशैः सह ॥ गोदानानि ततो दत्त्वा यथोक्तानि यथाक्रमम् ॥ २५ ॥ ब्राह्मणान्भोजयेद्भक्त्या पायसेन घृतेन च ॥ एवं यः कुरुते
मर्त्यस्तस्य पीडानिवारणम् ॥२६॥ भविष्यति सदा पुत्रसुखं भुंक्ते स्ववेश्मनि ॥ इति त्रिपिंडीश्राद्धविधानम् ॥ ॥ छ ॥ ॥ छ ॥
श्रीगणेशाय नमः ॥ ॥ अथ त्रिपिण्डीश्राद्धपद्धतिःप्रारभ्यते ॥ तत्रादौ कर्त्ता तीर्थे गत्वा शुचिः सन् पूर्वमेव प्रकल्पिते गोमयोपलि-
प्तस्थाने कृतकुशोपग्रहःस्वाचान्तःप्राणायामाऽङ्गन्यासंकृत्वा देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं विष्णुषोडशोपचारपूजामहं करिष्ये।
इति संकल्प्य षोडशोपचारैरशक्तौ पञ्चोपचारैर्यथोक्तपूजनं कुर्यात्॥ततो दक्षिणाभिमुख उपविश्य सम्मुखे कलशत्रयस्थापनं कुर्यात्।

भूरसीति मंत्रेण भूम्यै नमः॥भूमिस्पर्शः॥ धान्यमसीति धान्यम्॥आजिघ्रकलशमिति कलशाय नमः कलशं स्थापयामि॥वरुणस्योत्तं भनमसीति वरुणाय नमः जलम्॥यवोसियवयास्मदिति यवान्॥याओषधीरिति ओषधीः ॥ याःफलिनीरिति फलम्॥हिरण्यगर्भेति पंचरत्नम्॥तदुपरि सुवर्णमूर्तिस्थापनम्॥मूर्तेर्वस्त्रेण वेष्टनम् ॥ मनोजूतिरिति प्रतिष्ठाप्य देवानावाहयेत् ॥ प्रथमकलशे ॐ इदंविष्णु र्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपा७सुरे॥इति सत्त्वरूपं विष्णुमावाहयामि स्थापयामि॥द्वितीयकलशे-ब्रह्मजज्ञानं प्रथमंपुरस्ता द्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्च विवः ॥ इति रजोरूपं ब्रह्माणमावाहयामि स्थापयामि ॥ तृतीयकलशे-ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥ बाहुभ्यामुततेनमः॥ इति तमोरूपं रुद्रमावाहयामि स्थापयामि॥ ततस्त्रयाणां पूजनम् ॥ तत्र त्रयाणां ब्राह्मणानां वरणम् ॥ तेभ्यः कुण्डलमुद्रिकावस्त्रदानम् ॥ अथ चटत्रयस्थापनम् । आचमनम् । विष्णुस्मरणम् । ततोऽपसव्यं कृत्वा दक्षिणाभिमुख उपविश्य प्रागग्रेषु कुशेषु उदङ्मुखोपविष्टानां त्रयाणामेव ब्राह्मणानां निमन्त्रणं कुर्यात् ॥ कुशजलतिलान्गृहीत्वा ॐ श्राद्धेक्षणं क्रियताम् । करवाम इति ॥ यथा प्राप्नुवन्तु भवन्तः । प्राप्ताः स्मः "अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥" भवद्भिस्त्रिपिण्डीश्राद्धं पितृकार्यं सम्पाद्यमेव प्रसीदत ॥ इति नियमाञ्श्रावयेत् । यथा नामगोत्र अनिर्दिष्टसापेक्षकः सत्त्वरूपविष्णुशर्म्मन् एतत्ते पाद्यं पाद्यावनेजनं पादप्रक्षालनम् । एष अर्घः । इदमत्र चन्दनं च पुष्पं पादार्घे इदमाचमनीयम् । एवमपरद्वये- यथानामगोत्र अनिर्दिष्टसापेक्षकरजोरूपब्रह्मशर्म्मन् एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनम् । एष अर्घः । इदमत्र

चंदनं च पुष्पं पादार्घें । इदमाचमनीयम्॥एवं तृतीये–यथानामगोत्र अनिर्दिष्टसापेक्षक तमोरूपरुद्रशर्म्मन् एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनम् । एष अर्घः । इदमत्र चन्दनं च पुष्पं पादार्घें इदमाचनीयम् ॥ ततः सव्यम् । आचमनम् । उपग्रहकुशत्यागः । पुनः कुशोपग्रहः । प्राणायामः । अपसव्यम् । दिग्बन्धनम् । "पूर्वें नारायणो देवो दक्षिणे मधुसूंदनः ॥ पश्चिमे वामनो देव उतरे च गदाधरः॥१॥ऊर्ध्वं तु पुण्डरीकाक्ष अधस्ताद्विष्णुदेवताः"॥नीवीबन्धनम् । सव्यम् । "श्राद्धभूमौ गयां ध्यात्वा ध्वात्वा देवं गदाधरम्॥ ताभ्यां चैव नमस्कारं कृत्वा श्राद्धं समाचरेत् ॥ १ ॥ सप्त व्याधा दशार्णेषु मृगाः कालंजरे गिरौ ॥ चक्रवाकाः शरद्वीपे हंसा सरसि मानसे ॥ २ ॥ तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ प्रस्थिता दीर्घमध्वानं यूयं किमवसीदथ ॥ ३ ॥" ततो देवताभ्य इति त्रिर्जपेत्॥ततः कर्मपात्रोदकपूरणम्॥आसनम् । मध्ये तिलयवतुलसीचन्दनप्रक्षेपः । कर्मपात्राभिमंत्रणम् । ॐयद्देवा अवरो वरेण्यो वरदो वाहो धरणीधरः॥इत्यामन्त्रैः पाकप्रोक्षणम् । अपवित्रः पवित्रो वा इत्यादिश्लोकं पठेत् । त्रिपिण्डीश्राद्धोपहाराणां पवित्रताऽस्तु।सव्यम् । देशकालादिकं स्मृत्वा मम शरीरस्यपुत्रकलत्रादेश्च सर्वेष्टजनस्यप्रेतपीडोपणांत्यर्थं[अपसव्यम्]यथानामगोत्राणामनिर्दिष्टसापेक्षकानां सत्त्वरजस्तमोरूपाणां विष्णुब्रह्मरुद्रशर्म्मणाम्।असद्गतिविनाशपूर्वकस्वर्गलोकाद्यक्षयविष्णुलोकप्राप्त्यर्थं त्रिपिण्डीश्राद्धमहं करिष्ये इति संकल्पः ॥ आसनम् । यथानामगोत्राय अनिर्दिष्टसापेक्षकाय सत्त्वरूपाय विष्णुशर्म्मणे इदमासनं स्वधा। हस्तप्रक्षालनम् । उपग्रहविष्टरार्थम् । इमे कुशाः । एवम् । यथानामगोत्राय अनिर्दिष्टसापेक्षकाय रजोरूपाय ब्रह्मशर्म्मणे इदमासनं स्वधा। यथानामगोत्राय अनिर्दिष्टसापेक्षकाय तमोरूपाय रुद्रशर्म्मणे इदमासनं स्वधा॥अर्घपात्रपूरणम् । एकैकं पवित्रम् । शन्नो देवीत्युद

कम् । तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः॥प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वधा॥इदमत्र चंदनं च पुष्पम्। अर्घपात्राणामर्चनविधेः परिपूर्णताऽस्तु स्वधा भवतु । अस्तु स्वधा । पवित्राणां पूजनम् । या दिव्या आपः पयसा संबभूवुर्याऽ आन्तरिक्षाऽउत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तानऽआपः शिवाः सꣳस्योनाः सुह वा भवन्तु॥यथानामगोत्र अनिर्दिष्टसापेक्षक सत्त्वरूप विष्णुशर्म्मन् एष तेऽर्घः ॥ एवं रजोरूप० । एवं तमोरूप० । अत्र संस्रवाभावः । नाघवन्दनम् । न पात्रन्युब्जीकरणम् । [सव्यम्] ब्राह्मणानां पूजनम् । वाससां संप्रदानम् । पुष्पमालायज्ञोपवीतदानम् । धूपदीपौ । अर्चनसंकल्पः ।[अपसव्यम्] यथादत्त गन्धाद्यर्चनम्।यथानामगोत्राय अनिर्दिष्टसापेक्षकाय सत्त्वरूपाय विष्णुशर्म्मणे अक्षय्यमस्तु स्वधा॥एवं रजोरूपाय तथा तमोरूपाय अर्चनं गंधादिकं स्वधा॥ अस्य श्राद्धस्य विधेः परिपूर्णताऽस्तु [सव्यम्] आचमनम् । ब्राह्मणानां परिवेषणम् । मधुपायसमिष्टान्नकृशरमापान्नैर्भोजयेत्।ब्राह्मणभोजनसंकल्पः॥ [अपसव्यम्] इदमन्नं घृताद्युपस्करसहितं यद्दत्तं यच्च दास्यामि तृप्तिपर्यंतं तत्सर्वं यथा नामगोत्राय अनिर्दिष्टसापेक्षकाय सत्त्वरूपाय विष्णुशर्मणे अक्षय्यमस्तु स्वधा ॥ एवं रजोरूपाय तमोरूपायेति वक्तव्यम् [सव्यम्] ततस्तेभ्योऽपोशनार्थं जलदानम् । ब्राह्मणैस्तु बलिदानादिवर्जं जले प्राशनमात्रपूर्वकं भोक्तव्यं यथा विधिः॥ततो यज्ञोपवीती प्राङ्मुखो यजमानो गायत्र्यादिकं जपित्वा मधुवातेति त्र्यृचं च ब्राह्मणा स्वदितमिति वक्तव्यम्।सुस्वदितमिति प्रतिवचनम्।[अपसव्यम्] पिण्डस्थाने रेखाकरणम् । अपहताऽअसुरा रक्षाꣳसि वेदिषदः ॥ इति रेखोपरिदक्षिणाग्रान् कुशानास्तीर्य ततोऽवनेजनं दद्यात् । यथानामगोत्र अनिर्दिष्टसापेक्षक सत्त्वरूप विष्णुशर्म्मन् अवनेनिक्ष्व एवं ब्रह्मन्० । एवं रुद्र० । यदि तु प्रेतोऽज्ञातनामगोत्रो

भवेत् तदाऽमुकगोत्र सत्त्वरूप अमुकप्रेत एवं रजोरूपाऽमुकप्रेत तमोरूपाऽमुकप्रेतेति प्रयोक्तव्यमिति ॥ ततः पिण्डद्रव्ये–मधुवा ताऽऋतायते मधु क्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः । मधुद्यौरस्तु नः पिता ॥ मधुमान्नोवनस्पतिर्मधुमाँऽअस्तुसूर्यः।माध्वीर्गावोभवन्तु नः ॥ ॐमधुमधुमधु ॥ ततः।पिण्डस्थानेसमूलदक्षिणाग्रान् कुशान्कृत्वा तत्र सर्वतस्तिलान्प्रक्षिपेत । ततो यवादिपिष्टेषु मधुरत्रयं संयोज्यक्रमेण पिण्डत्रयंकृत्वा प्रथमं यवपिण्डमादायपितृवंशेत्यादिश्लोकान्पठेत्। तिलयुक्तं पिंडं वक्ष्यमाणैर्मंत्रैर्दद्यात् "पितृवंशे मृता ये च मातृवंशे तथैव च॥गुरुश्वशुरबंधुनां ये चान्ये बान्धवाः स्मृताः ॥१॥ ये मे कुले लुप्तपिण्डाः पुत्रदारैर्विवर्जिताः॥क्रियालोपगता ये च जात्यन्धाः पंगवस्तथा॥२॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम॥ भूमौ दत्तेन पिण्डेन तृप्ता यांतु परां गतिम् ॥३॥ इदं यवमयं पिण्डंमधुसर्पिःसमन्वितम्॥ददामि तस्मै प्रेताय यः पीडां कुरुतेमम ॥४॥ ये केचित्प्रेतरूपेण वर्तंते पितरो मम॥यवपिण्डप्रदानेनतृप्तिं गच्छन्तु शाश्वतीम्॥५॥ ये केचिद्दिवि तिष्ठन्ति प्रेताः सात्त्विकरूपिणः ॥ सात्त्विकपिण्डदानेन तृप्तिं गच्छन्तु मेऽक्षयाम्॥६॥ यथानामगोत्र अनिर्दिष्टसापेक्षकसत्त्वरूपविष्णुशर्मन् एषते पिण्डः स्वधा नमः ॥१॥ द्वितीयं व्रीहिपिण्डमादाय पितृवंशेति पूर्ववत्पठित्वा पिण्डंदद्यात्। तत्र मंत्राः॥ "इमं व्रीहिमयं पिण्डंमधुरत्रयसंयुतम् ॥ तन्मुक्तये प्रयच्छामि पीडां ये कुर्वते मम॥१॥ये केचिद्वायुरूपेण वर्तन्ते पितरो मम॥तण्डुलपिण्डदानेन व्रजंतु गतिमुत्तमाम् ॥२॥ अन्तरिक्षे च ये जाता राजसा वायुरूपिणः॥राजसपिण्डदानेनतृप्यन्तुसंमुदान्विताः ॥३॥ यथा०रा०ब्रह्मशर्मन् एष ते पिण्ड इत्यादिकं पठेत् तृतीयं तिलमयं पिण्डमादाय पितृवंशेति पठेत् । "इमं तिलमयं पिण्डं मधुना सर्पिषा युतम्॥ तेभ्यो ददामि ये पीडां मे कुले कुर्वते

सदा ॥१॥ ये केचित्तामसाः प्रेता भूमौ तिष्ठन्ति सर्वदा ॥ तेन पिण्डप्रदानेन तृप्तिं गच्छंतु ते ध्रुवाम् ॥२॥ तमोरूपाश्च ये केचिद्वर्त्तंते पितरो मम।तिलपिण्डप्रदानेन ते तृप्यन्तु क्षुधार्दिताः ॥३॥ तमोरूप रुद्रशर्म्मन् पठेत् । अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् अमीमदन्तपितरो यथाभागमावृषायिषत ॥ इति जपित्वा उदङ्मुखीभूयश्वासं नियम्य तेनैव यथासुखं परावर्त्त्य-अमीमदन्तपितरो यथाभागमावृषायिषत।इति जपित्वा यथा॰ प्रत्यवनेनिक्ष्व ते स्वधा।यथा॰ प्रत्यवनेनिक्ष्व तेस्वधा।यथा॰ प्रत्यवनेनिक्ष्वतेस्वधाइति विसर्जनं कृत्वा-नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरोघोराय नमो वः पितरः पितरो नमो वः।इति षडञ्जलिकरणम्॥गृहान्नः पितरो दत्त सतोवः पितरो देष्म इति जपम् । एतद्वः पितरो वासः इति सूत्राणि प्रतिपिण्डंगन्धपुष्पधूपदीपनैवेद्यादिदत्त्वायथाक्रमंपिण्डेभ्योमातुलिंगबीजजंबीरतित्तिडीभिर्बहुवचनोपदेश्यैस्त्रिभिस्त्रिभिःफलै रर्घदानम्॥तत्र वाक्यम् इमानि गन्धादिकानि एष मातुलुंगबीजफलार्घश्च यथानामगोत्राय अनिर्दिष्टसापेक्षकाय सत्त्वरूपायविष्णुश- र्मणे अक्षय्यमस्तु स्वधा ॥ यथा॰ इमानि गन्धपुष्पधूपदीपनैवेद्यानि ब्रह्मशर्म्मणे अक्ष॰ ॥ इमानि गन्धपुष्पधूपदीपनैवेद्यानि एष तित्तिडीफलार्घश्च यथा॰ तमोरूपाय रुद्रशर्मणे अक्षय्यमस्तु स्वधा । पिण्डानामर्चनविधेः परिपूर्णतास्तु । अनेनपिण्डदानेनास्मत्कुले अनिर्दिष्टसापेक्षकाणाम् अक्षय्यतृप्तिरस्तु । गयायां पिण्डदानेन या तृप्तिस्सा तृप्तिरस्तु।त्रिपिण्डश्राद्धेनिमित्तं परिपूर्णमस्तु॥[सव्यम्] आचमनम् । विष्णुतर्पणम् । तत्रादावाचमनमुपग्रहकुशत्यागपूर्वकम्।पुनः कुशोदग्रहणम् । ततो देशकालौ स्मृत्वायथानामगोत्राणां॰ महातृषोपशमनार्थं विष्णुलोकप्राप्त्यर्थं तत्कर्माङ्गभूतंविष्णुतर्पणमहंकरिष्ये।इति संकल्पं कृत्वा चंदनतुलसीयवतिलसर्वौषधिदुग्धमि-

ध्रितंजलंकृत्वा शंखोदकेनशालग्रामशिलोपरितदभावेकुशखंडादौवैदिकपौराणिकवैष्णवमंत्रान्पठन्तर्पणंकुर्यात्।ॐसहस्रशीर्षा०।२२।
अदित्यै व्युन्दनमसि०। तद्विष्णोः०। ऊर्गसि०। एषा ते शुक्र०। अग्नेस्तनूरसि०। रक्षोहणो वो वलगह०। ऊरुविष्णो०।
अत्त्यन्याँ २ याते धामान्युश्मसि०। मित्रावरुणाभ्यां त्वा०। उपया० स्यादित्ये धातारातिः इन्द्रश्च विश्वेदेवा अ॑ अन्युपु०सोम॑
राजानं०। अग्निरेकाक्षरेण९। प्रपर्वतस्य०। वरास्त्वाधापयंतु० विष्णोः क्रमोऽसि०। विष्णोः कर्माणि०। तद्विष्णोः०। अग्निभा-
गोऽसि०। प्रोथदश्वो०। आपितन् अग्नयेस्वाहा। वायुष्ट्वा०। अश्वस्तू०। पृश्निस्तिरश्चीन०। कृष्णग्रीवा०। उन्नतऋषभो०। एता
ऐन्द्राग्ना०कृष्णाभौमा०।धूमा च संत्यया०।कृष्णग्रीवा०।बभ्रव उपध्वस्ता धूमाबभ्रुनीकाशाः प्रजापतये च० ॥ ऐरापह्लोरु०। खड्गो
वैश्वदेवः०।शादन्दद्भि० ।इंद्राग्न्योः पक्षतिः ।अथैतान्०। तन्मित्रस्य० आकृष्णेन०अग्न इन्द्र० त्रीणि पदा०। तद्विप्रासो०। एवमेतैर्मन्त्रै
स्तर्पणं कृत्वा पौराणिकैर्मन्त्रैस्तर्पणं कुर्यात। ते च मन्त्राः·अनादिनिधनो देवः शंखचक्रगदाधरः ॥ अक्षयः पुण्डरीकाक्षः प्रेतमो
क्षप्रदोभव ।१। अतसीपुष्पसंकाशं पीतवाससमच्युतम्। ये नमस्यंति गोविन्दं न तेषां विद्यते भयम्।२।कृष्ण कृष्ण कृपालोत्वमग
तीनां गतिर्भव॥संसारार्णवमग्नानां प्रसीद परमेश्वर ॥३॥ नारायण सुरश्रेष्ठ लक्ष्मीकांत वरप्रद ॥ अनेन तर्पणेनाथ प्रेतमोक्षप्रदोभव॥४॥
हिरण्यगर्भः पुरुषः प्रजानां व्यक्तिकारकः॥ अस्य प्रेतस्य मोक्षार्थं सुप्रीतो भव तर्पितः ॥५॥ अथ विष्णुनामभिस्तर्पणम्॥केशवस्तृ
प्यतु०। पद्मनाभस्तृ०।जनार्दनस्तृ०।अनंतस्तृ०। दामोदरस्तृ०। हृषीकेशस्तृ०। पुण्डरीकाक्षस्तृ०। माधवस्तृ०। मधुसूदनस्तृ०।

वामनस्तृ० । कृष्णस्तृ० । वासुदेवस्तृ० वैकुण्ठस्तृ० विष्णुस्तृ० ।अच्युतस्तृ० ।श्रीपतिस्तृ० ।श्रीधरस्तृ० ।गोविन्दस्तृ० ।त्रिविक्रमस्तृ० ।
चक्रपाणिस्तृ० । गदाधरस्तृ० । नारसिंहस्तृ० । श्रीरामस्तृ० । नारायणस्तृ० । उपेन्द्रस्तृ० । शार्ङ्गपाणिस्तृ० । श्रीवत्सलाञ्छनस्तृ० ।
पीताम्बरस्तृ० असुरान्तकस्तृ० ।चतुर्भुजस्तृ० ।नरोत्तमस्तृ० पुरुषोत्तमस्तृ० ।अनिरुद्धस्तृ० ।संकर्षणस्तृ० । वासुदेवस्तृ० । अधोक्षजस्तृ० ।
यज्ञवाराहस्तृ० । गोपालस्तृ० । गोपीपतिस्तृ० ।गुणातीतस्तृ० । गरुडध्वजस्तृ० । चाणूरमथनस्तृ० परमात्मातृ० । परमेश्वरस्तृ० ।
निरामयस्तृ० । निर्विकारस्तृ० । निर्विकल्पस्तृ० । निष्कलंकस्तृ० । निर्गुणस्तृ० । सर्वेश्वरस्तृ० ।हिरण्यगर्भस्तृ० ।वेदपुरुषस्तृ० ।ज्योतिःस्वरूपस्तृ० ।प्रद्युम्नस्तृ० । शेषशायीतृ० । जगन्नाथस्तृ० । गदाधरस्तृ० । गरुडवाहनस्तृ० । मुकुन्दस्तृ० । धरणीधरस्तृ० । अक्षयमोक्षप्रदस्तृप्यतु ॥ शेषोदकं शालग्रामशिलोपरि पिंडोपरि च० ॥[अपसव्यम्]यथानामगोत्राणां मोक्षार्थम् इदमुदकमुपतिष्ठतु॥अथ कलशोदकं पिंडोपरि सिञ्चेत् । प्रथमं कलशं गृहीत्वा-"विष्णुकलशे स्थितं तोयं विष्णुसूक्ताभिमंत्रितम्॥अभिषिञ्चन्तु तत्तोयं प्रेतत्वं च निवर्तयेत्" ॥१॥ विष्णुलोकप्राप्तिरस्तु ॥ द्वितीयं कलशं गृहीत्वा-"ब्रह्मकलशे स्थितं तोयं ब्रह्मसूक्ताभिमंत्रितम् ॥ अभिषिञ्चन्तु तत्तोयं प्रेतत्वं च निवर्तयेत्"॥२॥ब्रह्मलोकप्राप्तिरस्तु॥तृतीयं कलशं गृहीत्वा-"रुद्रकलशे स्थितं तोयं रुद्रसूक्ताभिमंत्रितम्॥ अभिषिञ्चन्तु तत्तोयं प्रेतत्वं च निवर्तयेत्"॥३॥रुद्रलोकप्राप्तिरस्तु॥[सव्यम्]आचमनम्।सुप्रोक्षिता।दिकरणम्।ततो ब्राह्मणाःस्वस्ति भवंतो ब्रुवंतु इति ब्रूयात् । स्वस्ति सर्वेभ्यः इति प्रतिवचनम्॥[अपसव्यम्] अक्षय्योदकदानम् । यथानाम० यद्दत्तमन्नपानादिकं तदुपतिष्ठताम् । एवं रजोरूपतमोरूपस्य० येषामुद्दिष्टं तेषामक्षय्यमस्तु । [सव्यम्] गोत्रं नो वर्द्धताम् । दातारो नोऽभिवर्द्धन्ताम्।वेदाःसंततिरेव च॥

श्रद्धा च नो माव्यगमद्बहुदेयं च नोस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नःसन्तु मा च याचिष्म कंचन॥
मायाचेथाः । एताः सत्या आशिषः सन्तु॥[अपसव्यम्] स्वधां वाचयिष्ये । वाच्यतामित्यनुज्ञातः अनिर्दिष्टसापेक्षकेभ्यः स्वधोच्य
ताम् । अस्तु स्वधेत्युच्यमाने ऊर्जं वहंतीरमृतं घृतं पयः कीलालम्परिस्रुतम् ॥ स्वधास्थतर्प्पयत मे पितॄन्॥इत्युदकधारां दद्यात् ॥
दक्षिणादानम्–कृतैतत्रिपिंडीश्राद्धसांगतासिद्ध्यर्थंवस्त्रांतन्निष्क्रयीभूतंद्रव्यंवादक्षिणांमुखवासताम्बूलंयथानामगोत्राय० अक्षय्यमस्तु ।
स्वधाकृतैस्त्रिपिण्डी० । यथानामगोत्राय० रुद्रशर्म्मणे अक्षय्यमस्तु । स्वधावस्त्रदानम् । शय्यादानम् । कमंडलुदानम् । छत्रदानम् ।
उपानद्दानम् । गोदानम् । भूमिदानम् । अन्नमिष्टान्नादिसकलपदार्थदानम् । हीरकमुक्ताफलादिदानम् । ततस्तान्प्रार्थयेत्।"दिव्यन्तरि
क्षभूमिस्थाःसात्त्विका राजसास्तथा । प्रेताश्च तामसा येऽन्ये शांतिं यच्छन्तु तर्प्पिताः"॥[सव्यम्]"अन्नं च नोबहुभवेदतिथींश्च लभे
महि ॥ याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥१॥ मा याचेथा एता आशिषः सत्याःसन्तु॥स्वयमेव तिलकं कुर्य्यात् ॥
[अपसव्यम्] पिंडोद्धरणभाजनानि चालयेत्॥हस्तप्रक्षालनम्।पुनः पृच्छा।अथ पूर्वोच्चरिते काले भवतां ब्राह्मणानां वचनात् श्रीतीर्थं
विष्णुप्रसादात्०॥ अमुकमासे पक्षे तिथौ वासरे नक्षत्रे करणेत्यादि । एवंगुणविशिष्टशुभपर्वणि तिथौ [अपसव्यम्] यथानामगो
त्राणां सत्त्वरजस्तमोरूपाणामनामयशाश्वतब्रह्मविष्णुशिवलोकप्राप्त्यर्थंत्रिपिंडीश्राद्धस्यविधेःपरिपूर्णतास्तु०।अस्त्विदंब्राह्मणोब्रूयात् ।
अभिरम्यताम् । आमावाजस्य प्रसवो जगम्यादे मे द्यावापृथिवी विश्वरूपे॥आमागंताम्पितरामातरा चामासोमोऽमृतत्वेन गम्यात्

[सव्यम्] आचमनम् । "आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्तु तथा राज्यं प्रीता नृणां पितामहाः ॥१॥इति ब्राह्मणैः कर्तुराशिषो देयाः । यंयं कामं कामयते सोऽस्मै कामः समृध्यते । श्राद्धं च परिपूर्णार्थं स्वर्गं मोक्षं सुखानि च॥१॥ विष्णुपूजनमहं करिष्ये । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥१॥ यन्न कृतं तत्परिपूर्णमस्तु । स्वस्ति भवंतो ब्रुवन्तु स्वस्ति ॥ इति त्रिपिंडीश्राद्धपद्धतिः सम्पूर्णा ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

इति गौडीय श्राद्धप्रकाशमहानिबन्ध-सम्पूर्णः

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.